संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतं

# श्रीगीतगोविन्दम्

## त्रयोदशटीकासमेतम्

( द्वितीयो भागः )

प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

संकलकः
आचार्यः प्रफुल्लकुमारमिश्रः

सम्पादकः
प्रो. शिवशङ्करमिश्रः



शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-16

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतम्

# श्रीगीतगोविन्दम्

## त्रयोदशटीकासमेतम्

**( द्वितीयो भागः )**

प्रधान-सम्पादकः

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

संकलकः

**आचार्यः प्रफुल्लकुमारमिश्रः**

उपाध्यक्षः

महर्षिसान्दिपनीराष्ट्रियवेदविद्याप्रतिष्ठानम्

उज्जयिनी

सम्पादकः

**प्रो. शिवशङ्करमिश्रः**

शोधविभागाध्यक्षः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**( केन्द्रीयविश्वविद्यालयः )**

**नवदेहली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2023

ISBN : 978-81-87987-97-9

मूल्यम् : ₹ 3000.00 (भागचतुष्टयम्)

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# सूची


| | सर्गः | विषय | पृष्ठा |
|---|---|---|---|
| १. | चतुर्थः सर्गः | स्निग्धमधुसूदनः | ११ |
| २. | पञ्चमः सर्गः | साकांक्षपुण्डरीकाक्षः | ११२ |
| ३. | षष्ठः सर्गः | सोत्कण्ठवैकुण्ठः | २०४ |
| ४. | सप्तमः सर्गः | नागरनारायणः | २५२ |
| ५. | अष्टमः सर्गः | विलक्षलक्ष्मीपतिः | ४२६ |

# श्री गीतगोविन्दम्
## चर्तुदश टीकोपेतम्

(१) नारायणदाशकृत- सर्वाङ्गसुन्दरी
(२) राणाकुम्भकृत- रसिकप्रिया
(३) जगद्धरकृत- सारदीपिका
(४) शंकरमिश्रकृत- रसमञ्जरी
(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी
(६) शुक्लध्वजनृपतिकृत- सारवती
(७) वनमालिभट्टकृत- सञ्जीवनी
(८) नारायणपण्डितकृत- पदद्योतनिका
(९) कृष्णपण्डितकृत- जयन्ती
(१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)
(११) पूजारीगोस्वामीकृत- बालवोधिनी
(१२) लक्ष्मणकृत- रसिकरङ्गदा
(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी
(१४) श्रीकान्तमिश्रकृत-पदभावार्थचन्द्रिकाटीका

# श्लोक:/प्रबन्ध: सूची


| | | |
|---|---|---|
| ❖ | **चतुर्थ: सर्ग:** | **११-११०** |
| IV.24 | यमुनातीरवानीरनिकुञ्जे..... | ११-१४ |
| IV.I.8.1 | निन्दति चन्दनमिन्दुकिरणमनु..... | १५-२३ |
| IV.I.8.2 | अविरलनिपतितमदन....... | २४-२७ |
| IV.I.8.3 | कुसुमविशिखशरतल्पमनल्प...... | २८-३१ |
| IV.I.8.4 | वहति च विगलितलोचन........ | ३२-३६ |
| IV.I.8.5 | विलिखति रहसि कुरङ्गमदेन...... | ३७-४० |
| IV.I.8.6 | प्रतिपदमिदमपि निगदति माधव........ | ४१-४३ |
| IV.I.8.7 | ध्यानलयेन पुरः परिकल्प्य........ | ४४-४८ |
| IV.I.8.8 | श्रीजयदेवभणितमिदमधिकं........ | ४९-५१ |
| IV.25 | आवासो विपिनायते प्रियसखी..... | ५२-५८ |
| IV.I.9.1 | स्तनविनिहितमपि हारमुदारम्..... | ५९-६२ |
| IV.I.9.2 | सरसमसृणमपि......... | ६३-६४ |
| IV.I.9.3 | श्वसितपवनमनुपमपरिणाहम्......... | ६५-६६ |
| IV.I.9.4 | दिशि दिशि किरति........ | ६७-७० |
| IV.I.9.5 | नयनविषयमपि......... | ७१-७२ |
| IV.I.9.6 | त्यजति न पाणितलेन........ | ७३-७५ |
| IV.I.9.7 | हरिरिति हरिरिति जपति........ | ७६-७७ |
| IV.I.9.8 | श्रीजयदेवभणितमिति.......... | ७८-८० |
| IV.26 | सा रोमाञ्चति सीत्करोति..... | ८१-९० |
| IV.27 | स्मरातुरां दैवतवैद्यहृद्य..... | ९१-९५ |
| IV.28 | कन्दर्पज्वर संज्वरातुर तनोराश्चर्य..... | ९६-१०० |
| IV.29 | क्षणमपि विरहः पुरा न सेहे..... | १०१-१०४ |
| IV.29 | (क) वृष्टिव्याकुलगोकुलावन........ | १०५-११० |

| | | |
|---|---|---|
| ❖ | **पञ्चमः सर्गः** | **११२-२०२** |
| V.30 | अहमिह निवसामि..... | ११२-११६ |
| V.I.10.1 | वहति मलयसमीरे...... | ११७-१२१ |
| V.I.10.2 | दहति शिशिरमयूखे....... | १२२-१२४ |
| V.I.10.3 | ध्वनति मधुपसमूहे........ | १२५-१२६ |
| V.I.10.4 | वसति विपिनविताने........ | १२७-१२९ |
| V.I.10.5 | भणति कविजयदेवे......... | १३०-१३२ |
| V.31 | पूर्वं यत्र समं...... | १३३-१३८ |
| V.I.11.1 | रतिसुखसारे गतमभिसारे...... | १३९-१४५ |
| V.I.11.2 | नामसमेतं कृतसंकेतं......... | १४६-१५० |
| V.I.11.3 | पतति पतत्रे विचलति पत्रे....... | १५१-१५३ |
| V.I.11.4 | मुखरमधीरं त्यज मञ्जीरं........ | १५४-१५७ |
| V.I.11.5 | उरसि मुरारेरुपहितहारे........... | १५८-१६२ |
| V.I.11.6 | विगलितवसनं परिहृतरसनं........ | १६३-१६६ |
| V.I.11.7 | हरिरभिमानी रजनिरिदानी........ | १६७-१६९ |
| V.I.11.8 | श्रीजयदेवे कृतहरिसेवे........ | १७०-१७३ |
| V.32 | विकिरति मुहुः...... | १७४-१७८ |
| V.33 | त्वद्वाम्येन समं...... | १७९-१८४ |
| V.34 | आश्लेषादनु चुम्बनादनु...... | १८५-१९२ |
| V.35 | सभयचकितं विन्यस्यन्तीं...... | १९३-१९८ |
| V.35 | (क) राधामुग्धमुखारविन्द....... | १९९-२०२ |
| ❖ | **षष्ठः सर्गः** | **२०४-२५०** |
| VI.36 | अथ तां गन्तुमशक्तां..... | २०४-२०७ |
| VI.I.12.1 | पश्यति दिशि दिशि... | २०८-२१३ |
| VI.I.12.2 | त्वदभिसरणरभसेन..... | २१४-२१५ |
| VI.I.12.3 | विहितविशदबिसकिसलय..... | २१६-२१८ |
| VI.I.12.4 | मुहुरवलोकित..... | २१९-२२१ |
| VI.I.12.5 | त्वरितमुपैति न...... | २२२-२२३ |

VI.I.12.6 श्लिष्यति चुम्बति...... २२४-२२५
VI.I.12.7 भवति विलम्बिनि....... २२६-२२८
VI.I.12.8 श्रीजयदेवकवेरिदमुदितम्....... २२९-२३०
VI.37 विपुलपुलकपालिः........ २३१-२३७
VI.38 अङ्गेष्वाभरणं करोति...... २३८-२४३
VI.38 (क) किं विश्राम्यासि....... २४४-२५०

❖ **सप्तमः सर्गः** **२५२-४२४**

VII.39 (क) हारावलीतरलकाञ्चन....... २५२-२५२
VII.39 अत्रान्तरे च कुलटा....... २५३-२५८
VII.40 प्रसरति शशधरबिम्बे........ २५९-२६२
VII.I.13.1 कथितसमयेऽपि हरिरहह..... २६३-२६८
VII.I.13.2 यदनुगमनाय निशि..... २६९-२७१
VII.I.13.3 मम मरणमेव...... २७२-२७४
VII.I.13.4 मामहह विधुरयति...... २७५-२७७
VII.I.13.5 अहह कलयामि..... २७८-२८०
VII.I.13.6 कुसुमसुकुमारतनुमतनु....... २८१-२८३
VII.I.13.7 अहमिह निवसामि....... २८४-२८७
VII.I.13.8 हरिचरणशरणजयदेव...... २८८-२९०
VII.41 तत्कि कामपि कामिनीमभिसृतः....... . २९१-२९६
VII.42 अथागतां माधवमन्तरेण..... २९७-३००
VII.I.14.1 स्मरसमरोचित..... ३०१-३०५
VII.I.14.2 हरिपरिरम्भणवलित..... ३०६-३०७
VII.I.14.3 विचलदलकललितानन....... ३०८-३१०
VII.I.14.4 चञ्चलकुण्डलदलित...... ३११-३१२
VII.I.14.5 दयितविलोकितलज्जित........ ३१३-३१७
VII.I.14.6 विपुलपुलकपृथुवे........ ३१८-३२०
VII.I.14.7 श्रमजलकणभरसुभगशरीरा....... ३२१-३२३
VII.I.14.8 श्रीजयदेवभणित हरि रमितं....... ३२४-३२६

VII.43 विरहपाण्डुमुरारिमुखाम्बु...... ३२७-३३१
VII.I.15.1 समुदितमदने रमणीवदने..... ३३२-३३८
VII.I.15.2 घनचयरुचिरे रचयति..... ३३९-३४२
VII.I.15.3 घटयति सुघने कुचयुगगगने..... ३४३-३४६
VII.I.15.4 जितविसशकले मृदुभुजयुगले..... ३४७-३५०
VII.I.15.5 रतिगृहजघने विपुलापघने........ ३५१-३५५
VII.I.15.6 चरणकिसलये कमलानिलये...... ३५६-३६०
VII.I.15.7 रमयति सुदृशं कामपि.......... ३६१-३६३
VII.I.15.8 इह रसभणने कृतहरिगुणने........ ३६४-३६७
VII.44 नायात: सखि निर्दयो........ ३६८-३७५
VII.I.16.1 अनिलतरलकुवल......... ३७६-३७९
VII.I.16.2 विकसितसरसिजललित........ ३८०-३८२
VII.I.16.3 अमृतमधुरमृदुतर..... ३८३-३८४
VII.I.16.4 स्थलजलरहरुचिकर..... ३८५-३८७
VII.I.16.5 सजलजलदसमुदयरुचिरेण..... ३८८-३८९
VII.I.16.6 कनकनिकषरुचिशुचि वसनेन........ ३९०-३९२
VII.I.16.7 सकलभुवनजनवर तरुणेन........ ३९३-३९५
VII.I.16.8 श्रीजयदेवभणित वचनेन......... ३९६-३९७
VII.45 मनोभवानन्दन चन्दनानिल....... ३९८-४०२
VII.46 रिपुरिव सखीसंवासोऽयं........ ४०३-४०८
VII.47 बाधां विधेहि मलयानिल...... ४०९-४१४
VII.47 (क) इषन्मीलितेदृष्टि........ ४१५-४१९
VII.47 (ख) प्रातर्नीलानिचोलमच्युतमुर:........ ४२०-४२४

❖ **अष्टम: सर्ग:** **४२६-४७५**

VIII.48 अथ कथमपि यामिनीं..... ४२६-४३०
VIII.I.17.1 रजनिजनितगुरुजागर..... ४३१-४३९
VIII.I.17.2 कज्जलमलिनविलोचनचुम्बन..... ४४०-४४२
VIII.I.17.3 वपुरनुहरति तव....... ४४३-४४६

VIII.I.17.4 चरणकमलगलदलक्त........ ४४७-४५०
VIII.I.17.5 दशनपदं भवदधरगतं....... ४५१-४५३
VIII.I.17.6 बहिरिव मलिनतरं तव.......... ४५४-४५६
VIII.I.17.7 भ्रमति भवानबलाकवलाय........ ४५७-४६०
VIII.I.17.8 श्रीजयदेवभणितरतिवञ्चित....... ४६१-४६४
VIII.49 तवेदं पश्यन्त्याः...... ४६५-४७०
VIII.49 (क) अन्तर्मोहनमौलिघूर्णन.... ४७१-४७५

# ।। चतुर्थः सर्गः ।।

## स्निग्धमधुसूदनः



## ।। चतुर्थः सर्गः।।

।स्निग्धमधुसूदनः ।

**२४-यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्।**
**प्राह प्रेमभराद्भ्रान्तं माधवं राधिकासखी।।२४।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२४।। राधिकासखी माधवं प्राहेति वाक्यार्थः। यमुनातीरवानीरनिकुञ्जे मन्दं यथा स्यादेवमास्थितं ''शीतवानीरवञ्जुला **इत्यमरः**''। पुनः कीदृशं प्रेमभरोद्भ्रान्तं स्नेहातिशयेनावस्थितमित्यर्थः।।२४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२४।। मधुमथनं हृदि कृत्वा परं जयदेवीये मातौ वरम् ।
तनुते धातुं श्रुतिसुखकरं कुम्भो नृपशतवन्द्यश्चिरम् ।।

इदानीं तयोः पृथक्कामावस्थां निरूप्य संयोजयितुमिच्छुर्दूतीयोगं निरूपयति, यमुनातीरवानीरेति। राधिकासखी माधवं प्राह; किंविशिष्टं माधवम्? प्रेमभरेण स्नेहोद्रेकेणोद्भ्रान्तमुद्विग्नचित्तम्। पुनः किंभूतम्? यमुनातीरस्थे वानीरनिकुञ्जे वेतसनिकुञ्जे मन्दं निरुत्साहं यथा स्यात्तथा आस्थितमासीनम्। अथवा, अमन्दमिति वचनविशेषणम्। अतिशयव्याकुलां राधां दृष्ट्वा अमन्दं सवेगमाह। पथ्यावक्त्रं छन्दः 'युजोर्जेन स' इति। पूर्वोक्तमेव स्पष्टयति; अत्र गीते विरहोत्कण्ठिता नायिका वर्णनीया 'नायिका लक्षणैर्युक्ता गीतकाव्येषु दर्शिता। एकैव नायिका वापि हरमूर्तिरिवाष्टधा। वाससज्जा समुत्कण्ठा स्वाधीनभर्तृका तथा। कलहान्तरिता वापि विप्रलब्धाभिसारिका। खण्डिता प्रोषिता चैव नायिकाश्चाष्ट संमताः।' तत्र समुत्कण्ठितालक्षणमुक्तं **भरतेन-** 'यस्याः समुचितेऽप्यह्नि प्रवासी नैति वल्लभः। सा स्मरानलसंतप्ता विरहोत्कण्ठिता मता'।।२४।।

### (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।२४।। पूर्वसर्गे कृष्णस्य विरहजनितावस्था वर्णिता। अत्र तु राधायास्तापमाह, यमुनेति। राधिकायाः सखी माधवं कृष्णं वक्ष्यमाणमुवाच। राधिकेत्यत्रानुकम्पायां

कः। कीदृशं कृष्णम्! यमुनातीरवानीरनिकुञ्जे वेत्रलताच्छन्नप्रदेशे मन्दं स्वैरमास्थितमासीनम्। तत्र हेतुगर्भाविशेषणमाह, प्रेमेति। प्रेमभरेण राधिकाविषयस्नेहेधक्ये नोद्भ्रान्तमुद्विग्नम्। तथा च प्रेमभरेण ध्यानपरम्परया तां साक्षात्कृत्य तदन्वेषणं विहाय लतागृहस्थितमिति भावः। 'अथ वेतसे। रथाभ्रपुष्पविदुलवेत्रवानीरवञ्जुलाः' **इत्यमरः**। 'मन्दः खले मन्दगते मूर्खे स्वैरिणि रोगिणि' इति **विश्वः**।।२४।।

## (४) लक्ष्मणकृत-श्रुतिरञ्जनी

।।२४।। अथ राधाविरहवेदनापारकरणाय तत्सखी कृष्णमानेतुं मृगयमाणा भाग्यवशेन एकान्तावस्थितं तमालोक्य स्योचितमाचरति। यमुनेति। राधिकायाः सखी यमुनातीरेकालिन्दीतटे बानीरनिकुञ्जे वेत्र मन्दिरे आस्थितं भ्रान्त्यावस्थितं प्रेम्णा राधाविषयप्रणयेन राधाव्यतिरिक्तकामिनीकदम्बसम्भोगरूपापराधजनितसाध्वसेन च तद्भ्रान्तमाकुलम्। अथवा प्रेमवशादपराधजनितं यदधिकं भयं तेनोद्भ्रान्तं त्रस्तं लोके बहिः प्रेमास्पदवस्तु विषयापराधस्यातिभीतिकरत्वादिति भावः। प्रेमभरोद्भ्रान्तमिति केषुचित् पाठः तदा प्रेमभरः प्रेमाधिकां तद्वशाद्भ्रान्तं राधाविषयप्रेमातिशयेन तस्याः परिमार्गणं कृतवन्तमित्यर्थः। एतादृशं श्रीकृष्णं माधवं मन्दं शनैः यथा तथा प्राह ब्रूते। अत्र वक्ष्यमाणवचनस्य रहस्यरूपत्वेन इतरश्रवणायोग्यत्वान्मन्दमित्युक्तमित्यवगन्तव्यम्। आहे इत्यत्र णलन्तत्वेन भूतत्वं भ्रान्तः तदुक्तं **वामनेन**, ''आहे भूते णलन्तभ्रमादिति।।२४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२४।। अथ राधाविरहवर्णनाय प्रसङ्गमवतारयति। उत्कण्ठिताया राधायाः सखी माधवं गीतेन वक्ष्यमाणं प्राह। यदाह, 'अनेककायसंयुक्तो यस्य नागच्छति प्रियः। तदानागमदुःखार्त्ता समेतोत्कण्ठिता यया।।' सखी चात्र निसृष्टार्था दूती बोद्धव्या। तल्लक्षणं **साहित्यदर्पणे**, उभयोर्भावमुन्नीय स्वयम्वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्था तु सा मता।। माधवं कीदृशम्? यमुनातीरवानीरकुञ्जे कालिन्दीकुले वेतसोपरिलक्षितलतागृहे मन्दं मधुरं जडतायुक्तमिति यावत्, एवं यथा स्यात्तथा आस्थितमुपरिस्थम्। पुनः किम्भूतम्? प्रेमभरेण स्नेहातिशयेनार्थाद्राधायाः उद्भ्रान्तं चञ्चलचित्तमित्यर्थः। 'मन्दं स्वैरे विलम्बे च अलसेऽपि च कीर्तितमि इति **विश्वः**।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

तृतीये विरहावस्था कृष्णस्योक्ता प्रियां प्रति।
चतुर्थे विरहावस्था [१] तस्यास्तं प्रति वर्ण्यते [२]।।

।।२४।। [3]रः कामोऽधिको यस्याः सा राधिका तत्सखी वासन्ती माधवं[4] श्रीकृष्णं प्रत्याह। वक्ष्यमाणमूचे। कीदृशम्? प्रेमभरेण [5] स्नेहाधिक्येन उद्भ्रान्तं चेष्टाशून्यं; तद्ध्याननिष्ठं वा; उद्विग्नं वा। एतेनोद्वेगावस्थाऽन्य क्रियामन्दचेष्टा च सानुरागता चोक्ता। कीदृशम्? यमुनायाः तीरवानीरनिकुञ्जे [6] वेत्रलतागृहे मन्दं स्वैरं, अमन्दं सवेगं वा आसीनम्। कथं मदनुग्रहं करिष्यतीति भावः। यमुनातीरनीरनिकुञ्जपदैः कृतान्तभगिनी दाहाधिकान्वेषण- कामाधिकताः क्रमेण सूचिताः। मन्दः खले [7] मन्दगते मूर्खे इति विश्वः (६३.१०)। वानीरं वेतसे प्रोक्तं जाम्बुक इति **शाश्वतः**। रस-वदलङ्कारः[8]।।२४।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२४।। इदानीं राधासखी कृष्णं प्राह, यमुनेति। राधिकासखी माधवं कृष्णं प्राह वक्ष्यमाणमुक्तवती। कीदृशं [9] माधवम्? यमुनातीरे यः वानीरनिकुञ्जो वेतसो [10]पलक्षितलतागृहं तत्र मन्दं तूष्णीं आस्थितमासीनम्। पुनः [11] कीदृशम्? प्रेमभरेण राधायां प्रेमातिशयेन उद्भ्रान्तं उद्विग्नचित्तम्। [12]कथं मयि प्रसादं [13]प्रिया यास्यतीति।।२४।।

१.सम्प्रति-इ.२.पद्यमिदं नास्ति-ज.३.रहः-अ.ब.इ.फ.ग.ह.ज.४.नास्ति-अ.ब. ५.प्रेमाधिक्येन-इ.६.वेतसलतागृहे-ज.७.मन्दरते-विश्व। मन्दगजे-इ.८.एतदनन्तरं प्रशंसायां कः इति दृश्यते-इ.फ.ग.ह.ज.९.कृष्णम्-क.१०.उपलक्षितं-क.ल.म.११.कथम्भूतम्-क.१२.कथमपि-ड.ल.म.१३.नास्ति-ड.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२४।। इत्थं माधवविलासमुक्त्वा चतुर्थसर्गे राधाया विरहावस्थामष्टपदीमय्या वर्णयितुमाह, यमुनेति। राधिकायाः सखी नर्मसहचरी यमुनायाः कालिन्द्यातीरे वानीरनिकुञ्जः तस्मिन् आस्थितं प्रेमभरेण प्रीत्यतिशयेन उद्भ्रान्तं उन्मादावस्थं; इदमिदमितिकर्तव्यताविचारशून्यं माधवं प्राह।।२४।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२४।। **यमुनेत्यादि**। राधिकासखी माधवं श्रीकृष्णं प्राह वक्ष्यमाणमुवाच इत्यर्थः। राधिकायाः सखी राधिकासखी षष्ठीसमासः। किंविधम्? यमुनातीरस्य वानीरो वेतसस्तस्य निकुञ्जे मन्दम् अपटुः यथा स्यादेवम् आस्थितम्। ''मन्दः शनौ हस्तिविधिप्रभेदे, तद्धर्मजाते त्रिषु रोगयुक्ते निर्भाग्यमूर्खा पटुलालसेषु, स्वैरं च बिम्बेऽपि च किञ्चिदर्थे।।'' इति **कुमुदाकरः**। पुनः किंविधम्? प्रेमभरोद्भ्रान्तमित्यादि। प्रेमभरेण

स्नेहातिशयेन उद्भ्रान्तम् उद्विग्नमनावस्थितचित्तमिति यावत्। प्रेमभयोद्भ्रान्तमिति पाठे कामसम्भो गसमीहावती प्रीति: प्रेम हतादरतया गतात्मा पुनर्न आयास्यतीति भयं ताभ्याम् उद्भ्रान्तमिति भाव:।।२४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२४।। अथ श्रीराधिकाविरहोत्कण्ठितं श्रीकृष्णं स्वसखीमाश्वास्यागता सखी प्राह, यमुनेति। श्रीराधिकासखी माधवं प्राह। कीदृशं? श्रीराधिकाविषयकप्रेमाधिक्ये उद्भ्रान्तमुत्तम् अतएव तदन्वेषणं विहाय यमुनातीरस्य वेतसकुंजे मन्दं निरुद्यमं यथा स्यात्तथासीनम्। 'वेतसे शीतवानीरवञ्जुला:' **इत्यमर:**।।२४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२४।। अथ सखीमुखेन एव श्रीराधाविरहमुद्घाटयितुमुपक्रमते। यमुनेति। स: काम: पूर्वोक्तरीत्या प्रेम एव भरोऽधिको यस्या: सा राधिका, तस्या सखी तद्विरहदु:खासहमानतया श्रीकृष्णसमागमाय कृतयत्ना सहचरी माधवं मन्दं गद्गदिका निरुद्धकण्ठतया क्षीणस्वरं यथा स्यात् तथा प्राह, प्रकर्षेणाह, यथोत्साहमुवाचेत्यर्थ:। कीदृशं, प्रेमभरेण राधाविषयप्रणयातिशयेन उद्भ्रान्तमनवस्थितचित्तं, अत एव अन्वेषणमपहाय विरहव्यथाया किंकर्त्तव्यतासूचितया यमुनातीरसम्बन्धेनातिशीतले वानीरकुञ्जे, आ, ईषद्स्थितं विरहवैकल्येन क्षणं स्थित्वा पुनरुत्तिष्ठन्तं पुनश्च तिष्ठन्तमित्यर्थ:। 'वेतसे शीतवानीरवञ्जुला:' **इत्यमर:**।।२४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२४।। यमुनातीरेति; यमुनानद्या: वेतसवल्लरी-विलास–गृहे श्रीराधान्वेषणं मुधा इति विविच्य निरूद्यम: स्थिरो जात:श्रीकृष्ण:। श्रीराधिकाया: सखी इदृशं श्रीराधाप्रणय-भारेणोद्भ्रामत: तस्यान्वेषणं परिहिय स्थिरस्थितं श्रीकृष्णं वदति। अत्र मधुसूदन: स्निग्धो नाम कोमलनम्रभावापन्नेनैव कविना सूचित:।।२४।।

।।अष्टमः प्रबन्धः/ गीतम् ८ ।।

।।कर्णाटरागेण गीयते।।

**१-निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम्।**
**व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्।।**
**सा विरहे तव दीना**
**माधव मनसिज विशिखभयादिव भावनया त्वयि लीना।। ध्रुवम्** ।।१ ।।

**(१) नातरायणदासकृत-सर्वाङ्गसुन्दरी**

।।१ ।। कर्णाटरागेण गीयते। अस्य स्वरूपम्,

कृपाणपाणिर्गजदन्तपत्रमेकंबहन् दक्षिणकर्णपूरम्।
संस्तूयमानः सुरचारणोघैः कर्णाटरागः शिखिकण्ठनीलः।।

अस्यां गाथायां विरहोत्कण्ठिता वर्णनीया। तथा चोक्ता नायिकालक्षणम्

प्रणयः परिणामेन गीतकाव्येषु दर्शिता।
एकैव नायिका चापि हरमूर्त्तिरिवाष्टधा।।
वासकसज्जा समुत्कण्ठा स्वाधीनभर्त्तृका तथा।
कलहान्तरिता चापि विप्रलब्धाभिसारिका।।
खण्डिता प्रोषिता चैव नायिका शुद्धसम्मताः।।

अत्रसमुत्कण्ठालक्षणं तत्रैवोक्तम्,

ग्राम वर्त्तिन्येकावस्तुनान्यद्दर्शने।
तत्रस्थं काङ्क्षिते कान्तं विरहोत्कण्ठिता मता।।

उद्दाममन्मथ महाज्वरवेपमानां रोमाञ्चकञ्चुकितमङ्कमाबहन्तीम्।
गाढानुरागवचनां पुरतः सखीनामुत्कण्ठितां वदति तां **भरतः** कवीन्द्रः।।

पुनश्च,

आगन्तुं कृतचित्तोऽसौ दैवान्नायाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा।।
किं रुद्धः प्रिययान्ययाचिदथवा संख्या ममोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः।
इत्यालोच्य मृगदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्त्रजः।।

तथाहि विरहो लोहसज्ज इति आशाबन्धेन वल्लभजनस्य एकग्रामप्रवासो मा दुर्मरणं विशिष्यते।। मरणादपि गुरुतरमपि एकग्राम प्रवास कार्य्य व्यग्रं प्रियमुन्मादवस्तुदर्शने। उत्कण्ठिता मातरि सम्बोधनात्। लज्जाप्रमाणा सलक्षणा सप्तमा मदनावस्था सखीजनं हरयति।

हे माधव! सा राधा तव विरहे लीनेति वाक्यार्थ:। उत्प्रेक्षते मनसिजविशिख-भयादिव भावनया त्वयि लीनेति। हे हरे! त्वच्चरणगतो जन: कामेन हन्तुं न शक्यते, यतस्त्वं शार्ङ्गधन्वा कामस्तु पुष्पधन्वेत्येवं ध्यानेन त्यय्युपश्लिष्टेत्य- भिप्राय:। अत्रगीते प्राथमिकपदत्रयेण राधिकोद्वेगावस्था प्रतिपाद्या। तल्लक्षणम्,

यस्मिन् रम्यमरम्यं स्यान्न च हर्षाय किंचन।
प्रद्वेषप्रणितव्येऽपि स उद्वेगोऽभिधीयते।।

निन्दतीत्यादि। सा राधिका चन्दनमिन्दुकिरणं च निन्दतीति प्राक् वाक्यार्थ:। स्वभावात् शीताविमौ यन्मां दहेते ममैव दुर्दैवमित्यनुपश्चादधीर मन्दमन्दं तत्तन्मनु-विन्दतीति द्वितीय:। व्यालनिलयेत्यादि। व्यालनिलयश्चस्दनतरुरुच्यते। चन्दनतरुषु भुजङ्गा इत्युच्यते। चन्दनतरुसम्पर्कात् मलयपर्वतवायु: कामवर्द्धकत्वात् विषमिवेत्युत्-प्रेक्षते।।१।।

## (२) राणाकुम्भकृत-रसिकाप्रिया

।।१।। निन्दतीति। पूर्वं ध्रुवपदंव्याक्रियते; सा विरहे इति। हे माधव! सा राधा भावनया त्वयि लीना त्वद्द्यानेन त्वन्मयत्वं प्राप्ता इति बुद्ध्या त्वयि लीनेति। त्वामन्तरा स्थिता। उत्प्रेक्षतेकामशरभीत्येव। यथा त्वामन्तरा स्थितायां ते कामशरास्त्वय्येव पतन्ति, न तस्यामिति बुद्धेति भाव:। किंविशिष्टा सा? तव विरहे सति दीना दैन्यमाप्ता। इति ध्रुव:।। अत्रोत्प्रेक्षालंकार:। किं किं करोति तत्कर्माह, चन्दनं निन्दति चन्दनस्य निन्दां करोति । स्मराह्लादकत्वाद्विपक्षपक्षमाश्रितमिवाभातीति। तत एव इन्दुकिरणमनु खेदं विन्दति लभते। कथम्? अधीरं यथा भवति तथा । अधीरमिति चन्दनविशेषणं वा। अधिकं ईरयति प्रेरयति कामशरानिति निन्दार्थ:। अपि च, मलयानां व्यालनिवासानां समीरं गरलमिव कलयति। केन हेतुना? व्यालनिलयमिलनेन व्यालनिलयानां व्यालनिवासानां चन्दनानां मिलनेन सङ्गात् । अत्र रूपकोत्प्रेक्षाविरोधालंकार:।।१।।

## (३) जगद्धरकृत-सारदीपिका (टीकानोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१।।निन्दतीति। गीतस्यास्य कानर(ड)राग: एकतालीतालश्च। गीतार्थस्तु, हे माधव! सा राधा तव विरहे त्वद्विश्लेषे चन्दनं निन्दति। अथ च इन्दुकिरणमनुलक्षीकृत्या-

धीरमनल्प खेदं दुःखं विन्दति प्राप्नोति। मलयसमीरं मलयपर्वतसंबन्धिनं वातं व्यालनिलयमिलनेन व्यालानां सर्पाणां निलयो निवासश्चन्दनवृक्षस्तस्य मिलनेन संसर्गेण गरलमिव कलयति मन्यते। चन्दनवृक्षस्थितैः सर्पैः पीत्वोद्गीर्णाः। एते मलयजवायवोऽत एव विषमयाः कथमन्यथा शरीरसंपर्कादेव मूर्च्छां मे जनयन्तीति मन्यत इति भावः। कृतस्तथा मन्यत इत्यतो हेतुगर्भविशेषणमाह, दीनेति। दीना दुःखिता। तथा च दुःखितस्य सुखहेतुरपि दुःखायैव भवतीति भावः। पुनः कीदृशी ? भावनया ध्यानेन त्वयि लीना मग्ना। कस्मादिव ? मनसिजस्य कामस्य ये विशिखा बाणास्तद्भयादिव। 'व्यालो भुजङ्गमे प्रोक्तः श्वापदे दुष्टदन्तिनि' इति **विश्वः**। 'गरलं तु विषे माने गरले तृणपूरके' इति च।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। उक्तप्रकारमेव व्यक्तीकरोति। निन्दतीत्यादिना कर्णाटगौडरागेण गीयते इत्युक्तं तस्यायमभिप्रायः। मित्रेष्वपि पुरुषरागाः सन्तीति सूचयितुं तथोक्तमिति तद्दयानं तु,

कृपाणपाणिर्गजदन्तपत्रमेकं बहन् दक्षिणकर्णपूरे।
संस्तूयमान सुरचारणोधैः कर्णाटरागः शिखिनीलकण्ठः।।

एकतालेन गेयम्। तल्लक्षणं तु प्रागेव लिखितम्। तत्र सा विरहेत्यादि लीनेत्यन्तं ध्रुवपदम्। प्रथमं व्याक्रियते हे माधव! श्रीकृष्ण! अत्र माधवपदेन कृष्णसम्बोधनं तस्य नायिकान्तरसम्भावनया विरहभावनया विरहभबरूपमर्म्मोद्घाटनमित्यवगन्तव्यम्। तव विरहे विप्रयोगे या सती अनन्यपतिका सा राधिका मनसिजस्य कामदेबस्य विशिखेभ्यः शरेभ्यो भयादिव शरप्रहरणसाध्वसादिवेत्यर्थः। शरेभ्य इत्यत्र भीतार्थानां भयहेतुरित्यपादानसंज्ञायां पञ्चमीभावनया हृदयावस्थितभगवदनुसन्धानेन त्वयि लीना, मदनशरपतनभयादिव तल्लक्ष्यभूत मनसा सह तव हृदये निलीय वसतीत्यर्थः।

अथवा त्वयि लीना भावनया भवतैक्यं गतेत्यर्थः। अनेनान्यानुरक्तिः सूचिता। निरन्तरं तदेकायत्तचित्ता सती स्थितेति तात्पर्यार्थः। अत्र निलीयावस्थाने भयादिवेति हेतूत्प्रेक्षणादुत्प्रेक्षा, तया च भयातुर साम्यं ध्वन्यत इत्यलंकारेणालङ्कारध्वनिः। लीना सती किं करोतीत्याकाङ्क्षायामाह। शिष्टैः पदैः तत्कृत्यमाह। निन्दतीत्यादि। हे माधवः! सा राधिका तव विरहे सति चन्दनं अङ्गलेपनार्थमानीतं मलयजरजः तनुलिप्तं वा निन्दति विगिति दूषयतीत्यर्थः। तस्योद्दीपकत्वादितिभावः। अनु पश्चादिन्दुकिरणं सर्वलोकश्लाघनीयं चन्द्रकिरणं च निन्दति। किरणमिति जातावेकवचनम्। अनु अनन्तरम् अधीरं धियं बुद्धिं राति गृह्णातीति धीरं बुद्ध्यनुकूलं रा आदाने इत्यस्माद्धातो-

ऽनुपसर्गे क इत्यर्थः। तादृशं न भवतीत्यधीरम् प्रतिकूलतयावेदनीयमित्यर्थः। तादृशं खेदं दुःखं विन्दति लभते।

अथवा अधीरं चञ्चलं सर्वत्र प्रसरणमित्यर्थः। एतादृशमिन्दुकिरणममुं नु चन्द्रकिरणमभिलक्षीकृत्य बिन्दति प्रानोतीति वा योजना। अनुर्लक्षणे कर्मप्रवचनीयसंज्ञा अथवा धीरमिति क्रियाविशेषणम्। तदाभावप्रधानो निर्द्देशः। अथवा न विद्यते धीरो नास्मिन् विषये यस्मात् सकाशात् इति व्युत्पत्त्या खेदविशेषणम् अथवा अधीः विरहे वेदनावशाद्वुद्धिहीना सती अं विष्णुरूपं त्वामनुखेदं विन्दतीत्यनुभवं भवन्निमित्तखेदमनुभवतीत्यर्थः। बुद्धिहीनत्वं सर्वश्लाध्यचन्दनेन्दुनिन्दकत्वादवगन्तव्यम्।

अथवा अधीरमिति मन्दपवनविशेषणं वा तदा अधीरं चञ्चलमित्यर्थः। विरहिणां प्रतिकूलमिति वा एतादृशं मलयसमीरं दक्षिणपवनं व्यालानामुरगाणां निलया आबासभूता ये मलयद्रुमास्ते मिलनेन सम्पर्केण हेतुना गरलमिव विषमिव ''क्ष्वेड़स्तु गरलं **विषमित्यमरः**'' कलयति मनुते यथा सर्पसम्बन्धाद्विषमिव प्रतिकूलतया पश्यति तथा मलयानिलमपीत्यर्थः। चन्दनतरुषु व्यालास्तिष्ठन्तीति लोकप्रसिद्धिः। मिलनेत्यत्र इषुपध लक्षणक प्रत्ययान्तान्मिलशब्दात्करोति णिचि ल्युट् प्रत्ययः। अथवा घञ्। ठक् प्रत्ययान्मिलशब्दात्पूर्वप्रक्रिया।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। गीतस्य कर्णाटरागः। एकतालीतालः। रागलक्षणं यथा, कृपाणपाणिर्गजदन्त-पत्रमेकं वहन् दक्षिणकर्णपूरे। संस्तूयमानः सूरचारणोधैः कर्णाटरागः शिखिकण्ठलीलः।। माधवं सखी प्राहेति यदुक्त्तं तदाह, हे माधव सा राधा तव विरहे सति दीना दुःखिता भावनया तदेकात्मचिन्तनेन त्वयि लीना संगुप्ता भवतीत्यर्थः। किमर्थम् अत्रोत्प्रेक्षते मनसिजः कामः तस्य विशिखो बाणः तस्य भयादित्यर्थः। अन्योऽपि शरपतनभयेन कस्मिश्चिदप्याश्रये निह्नत्य तिष्ठतीति युक्तम्। तदनेन त्वयि लीनायां तस्यां शरपातेन भवानपि बिद्धः स्यादिति सूचितम्। अपि किं करोति ? चन्दनं मलयजं निन्दति। निदि कुत्सायां धातुः। इन्दुकिरणमनु लक्षीकृत्य खेदमन्तस्तापम् अधीरं चाञ्चल्यसहितं यथा स्यादेवं विन्दति लभते। मलयसमीरं गरलमिव कलयत्यवधारयति। अत्रोत्प्रेक्षते, व्याल्याः सर्पाः तेषां निलयः आश्रयः चन्दनद्रुमः तस्मिन् मिलनेन सम्बन्धेनवेत्यर्थः ननु व्यालनिलयमिलनेनेत्यनेन एकत्रैवहेतूपन्यासः कृत इति वैषम्यं स्यादिति चेन्न, सर्वत्रैव विरहस्य हेतुत्वात् व्यालनिलयमिलनेनेत्युत्प्रेक्षामात्रम्। तस्यास्तु स्वेच्छाधीनतया सर्वत्राकरणेऽपिदोषाभावादिति गरलमिवाकलयतेति मलयसमीरस्य दुःखविशेष-

जनकत्वाभिमानत्वात् तथोत्प्रेक्षितमित्यवधेयम्। सन्तापकत्वात् विशेषेणऽपि कविसम्प्रदायेन कस्यचिदुत्कर्षवर्णने दोषाभावः। तथा च कर्पूरमञ्जरी, चिरं[+]जोण्हा उण्हा गरलसरिस इत्यादि। जगद्धरादयस्तु व्यालनिलयो मलयगिरिः तत्र चन्दनस्य मिलनेन जन्मना चन्दनं निन्दति। व्यालनिलयः सर्पाश्रयः महेशः तत्र मिलनेन चन्द्रकिरणमनु लक्षीकृत्य खेदमधीरञ्चेति यथा स्यादेवं विन्दति। मलयपवनपक्षे तु सुगममेवेति व्याचक्षते। तत्र व्यवस्थितानुसङ्गे प्रमाणाभावः पूर्णचन्द्रस्य महेशगिरः सम्बन्धाभावेन सन्तापकत्वालाभश्चेत्यादि दूषणमवधारणीयम।।१ ।।

* लक्ष्मीटीकाविराजिते **साहित्यदर्पणो** 'निसृष्टार्था तु सा मता' इत्यस्य स्थाने 'निसृष्टार्थस्तु स स्मृतः' इति पाठः।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। कर्णाटरागे एकतालीताले। रागलक्षणम् -

कृपाणपाणिर्गजदन्तपत्र मेकं वहन् दक्षिणकर्णपूरे।
संस्तूयमान[२]स्सुरचारणाद्यैः कर्णाटराग [३]शिशिखिकण्ठनीलः।।

काललक्षणं[४]पूर्वमेवोक्तम्। अत्र च नायिकालक्षणम्-

वासकसज्जा समुत्कण्ठा स्वाधीन[५]नतिका तथा।
कलहान्तरिता वाऽपि विप्रलब्धाऽभिसारिका।।
[६]खण्डिता प्रोषिता चैव नायिकाश्चाष्ट सम्मताः।।

तत्र समुत्कण्ठितालक्षणं **भरते-**

[७]यस्यास्समुचितेऽप्यह्नि [८]प्रवासी नैति वल्लभः।
सा स्मरानलसन्तप्ता विरहोत्कण्ठिता मता।।इति।।

सख्युक्तं गीतेन दर्शयतिनिन्दतीत्यादिना। हे माधव! मधुप्रिय! सा तव विरहे विश्लेषे दीना दुःखिता। अत एव दाहकत्वात् चन्दनं इन्दुकिरणञ्च निन्दति। अधीरं बहुखेदं कष्टमनुविन्दति [१] प्राप्नोति। [२]त्वद्विरहे अदाहकोऽपि [३] दाहकस्सञ्जात इति ध्वनिः। किञ्च चन्दनपर्वतवायुं सर्पनिवाससंसर्गेण [४] आशीविषमिव कलयति मन्यते। कीदृशी? कामबाणभयात्तत्रासत इव। भावं च प्रियं प्रति नयतीति भावना ध्यानं तेन त्वयि लीना लग्ना। कामबाणा मामेव दहन्तु न मत्प्रियमिति ध्यानं तेन त्वयि लीना लग्ना। कामबाणा मामेव दहन्तु न मत्प्रियमिति ध्यानं कवचत्वेन करोतीति भावः। [५] शम्बरारिर्मनसिजः **इत्यमरः** (१.१.-२६)। धीरस्तु कुङ्कुमे स्वल्पे बुधे धैर्यवति इति **विश्वः**। गरलं विषे माने गरलं तृणपूलके इत्यपि (**विश्वः** १०५.५७)।

व्यालो भुजङ्गमे, क्रूरे श्वापदे दुष्टदन्तिनि इति **विश्वः** [६](१०४.१९)। [७]उत्प्रेक्षो-पमालङ्कारः।।१।।

१.कानडगौड-इ. २.सुरचारणोच्चैः-फ.ग.ह.ज. ३.सखिकण्ठनीलः-ज.४.पूर्ववत्-ग.५.भर्तृका-इ.फ.ग.ह.ज.६.खण्डिता प्रोषिताऽपि वा नायिकाष्टविधा मताः-अ.ब.७.अनेककार्यव्यासङ्गाद्यस्या नागच्छति प्रियः। तदनागतदुःखार्ता विरहोत्कण्ठिता तु सा।। (ना. शा. २२.२१४)८.प्रवासैः-अ.९.तु सा-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१।। उक्तश्लोकार्थं गीतेनाह- [८]निन्दतीति। [९] अस्य [१०] गीतस्य कर्णाटकरागः। तल्लक्षणम्।

कृपाणपाणि [११] र्गजदन्तपत्रमेकं वहन् दक्षिण [१२] कर्णपूरे।
[१३]संस्तूयमानस्सुरचारणौधैः कर्णाटरागश्शिखिनीलकण्ठः।। इति।।

अत्र गीते विरहोत्कण्ठिता वर्णनीया। तत्र [१४]काव्यादावष्टौ नायिका वर्ण्यन्ते।-

वासकसज्जा सोत्कण्ठा स्वाधीनभर्तृका तथा।
कलहान्तरिता चापि विप्रलब्धाऽभिसारिका।
खण्डिता प्रोषिता चैव नायिकाश्चाष्ट सम्मताः।
तत्र [१५] समुत्कण्ठालक्षणं **भरतोक्तम्-**
यस्याः समुचिते चाह्नि[१६]प्रवासी[१७]नैति वल्लभः।
सा स्मरानलसन्तप्ता विरहोत्कण्ठिता मता।।इति।।

गीतार्थस्तु, हे माधव कृष्ण, सा राधा तव विरहे सीदति; दीना [१८]दुःखिता। त्वयि त्वद्विषये भावनया अनुचिन्तनेन कामबाणः [१] कृष्णविरहे प्रविश्य स्थितां मां न पीडयिष्यतीति भावनता लीना प्रविष्टा। कस्मादिव? मनसिजविशिखभयादिव कामबाणभयादिव। केन प्रकारेण तिष्ठतीत्याह, हे कृष्ण! सा राधा चन्दनं निन्दति। इन्दुकिरणं चन्द्रदीप्तिमनु लक्ष्यीकृत्य अधीरं महान्तं खेदं अनुतापं विन्दति। अनु च मलयसमीरं [२]मलयाचलजवायुं व्यालनिलयमिलनेन सर्पस्थानयुक्तेन गरलमिव विषमिव कलयति मन्यते।।१।।

१.नास्ति-अ.ब. २.तद्विरहे-अ.ब. ३.दाहकत्वे जातः-अ.ब.इ.फ.ग.ह.ज. ४.सा विषमिव-इ.फ.ग.ह.ज. ५.तः. ६.पर्यन्तो भागो नास्ति-अ.ब.७.उत्प्रेक्षालङ्कारः-इ. उत्प्रेक्षोपमालड;कृती-फ.ह.ज.८.नास्ति-ड.ल.म.९.कर्णाटरागेण गीयते एकतालताले। कर्णाटरागलक्षणम्-ल.म.१०.नास्ति-क.११.जगदण्डतन्त्र-ड.१२.कर्णपूरम्-ड. १३.संस्तूयमानस्तु सुविचारणैर्यः-क.१४.काव्यादावष्ट-ड.१५.विरहसमुत्कण्ठालक्षणम्-क. १६.प्रवासे-ड.१७.नैव-क.१८.दुःखिता वर्तते-क.

## (९) कृष्णपण्डितकृत-जयन्ती

।।१।। कानडगौडरागेण गीयते एकतालीतालेन। तल्लक्षणम्;
निन्यासांशग्रहोपेतो रागः कन्नडगौडकः।
सम्पूर्णोऽपि कदाचित्स्यादारोहे त्यक्तधैवतः।। गोयज्ञः पश्चिमे यामे उत्कलानामतिप्रियः।। इति।

निन्दतीति। सा विरहे इति ध्रुवपदे कर्तृपदम्; अन्यत्र क्रियाकर्मणी। हे कृष्ण! तव विरहे दीना सा राधिका। अतिविरहसन्तापद्योतनार्थं[३] द्विवारं पाठः विरहे तव दीनेति। **सङ्गीतरत्नाकरे** गीतलक्षणे द्विर्गीनिरञ्जनार्थमुक्तम्। तथा च चन्दनचर्चितं निन्दति दूषयति, सन्तापकत्वात्। अधीरं चपलतया युक्तं स्यात्तथा इन्दुकिरणं चन्द्रचन्द्रिकां खेदं दुःखसाधनत्वात् दुःखं अनुविन्दति जानाति। मलयसमीरं दक्षिणवायुं व्यालाः सर्पाः तेषां निलयेन मलयाचलेन मिलनेन सम्बन्धेन गरलमिव सन्तापकत्वाद्विषमिव कलयति जानाति। समीरस्य विषत्वेन सम्भावनाद्वस्तूत्प्रेक्षा। सन्तापकत्वादेव वायोर्विषत्वसम्भावनस्योचितत्वं व्यालनिलयमिलनेनेति हेतोः कथनात्प्रौढोक्तिः। प्रौढोक्तिरुत्कर्षहेतौ चेद्धेतुत्वप्रकल्पनम् (**चन्द्रालोकः-१२५**) इति तल्लक्षणात्। ध्रुवायाः व्याख्यानम्। हे माधव! मनसिजस्य विशिखात् बाणात् भयं तस्मादिव त्वयि लीना गूढा त्वय्येव ध्यानान्तःकरणा। अत्र विशिखभयस्य लयनाहेतोर्हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा। भयस्य सत्त्वादुक्तास्पदा। वस्तुतस्तु लीनेवेति औत्कण्ठ्येन रहसि स्थितायाः निगूढत्वनिमित्तत्वेन धर्मोत्प्रेक्षा।।१।।

१.कृष्णविषये-क. २.मलयजवायुं-क.ल.म. ३.सा विरहे तव दीना कृष्ण सा विरहे तव दीना इति इ पाठः।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१।। कर्णाटरागेण गीयते। तस्य लक्षणं यथा, ''कृपाणपाणिर्गजदन्तपत्रमेकं दहन् दक्षिणकर्णपूरम्। संस्तूयमानः सुरचारणोघैः कर्णाटरागः शिखिकण्ठनीलः।।'' इति। अस्यां हि गाथायां विरहोत्कण्ठिता वर्णनीया। तल्लक्षणं यथा, ''अनेककार्यसंसक्तो यस्या नागच्छति प्रियः। तदनागमदुःखार्ता विरहोत्कण्ठिता मता।।'' इति। किं प्राहेत्याह, निन्दतीति। हे माधव! सा तव प्रिया मत्सखी वा, तव विरहे दीना दैन्यम् आपन्ना अस्तीति वाक्यार्थः। किंविधा? भावनयेति। भावनया ध्यानेन पर्यालोचनेन वा त्वयि लीना त्वयैव लयनं गतेत्यर्थः। ''भावना लोभने ध्याने पर्यालोकेऽधिवासने'' इति

**मेदिनी**। उत्प्रेक्षते। मनसिज विशिखभयादिवेति। कामस्य शरेभ्यः त्रासादिव कामशरबाधारहितस्य कृष्णस्य पृथक्त्वे कामशरो बाधते। अतः कृष्णे प्रविष्टा सुखं तिष्ठामीति त्वयि लीनेत्युत्प्रेक्षार्थः। तव कामबाधारहितत्वं स्वयमनुपगमात्। किं च प्रियसन्धाने कामशरो न बाधत इति तात्पर्यम्। अथवा माधवशब्दोपादानेन श्लेषोक्त्या कृष्णस्य वसन्तत्वे प्राप्ते तस्य काममित्रत्वात् तदाश्रयणत्वमुचितम्। अन्योऽपि यस्माद् भीतो भवति तन्मित्रमाश्रयत इति व्यङ्ग्यार्थः। ''माधवः कमलाकान्ते वसन्ते मधुवंशजे'' इति **हट्टचन्द्रः**। अत्र गीते प्राथमिकपदत्रयेण राधिकोद्वेगावस्था प्रतिपाद्या। तल्लक्षणम्, ''यस्मिन्रम्यमरम्यं स्यान्न च हर्षाय किञ्चन। प्रद्वेषः प्राणिभाव्येऽपि स उद्वेग स्मृतो यथा।।'' इति। निन्दतीति। सा चन्दनम् इन्दुकिरणं च निन्दतीति प्राग्वाक्यार्थः। स्वभावात् शीताविभौ यन्मां दहतस्तन्ममैव दुर्दैवमिति। अनु विन्दति खेदमधीरमिति । अनु पश्चात् अधीरम् अमन्दं खेदं विन्दति लभत इति द्वितीयः। अधीरमिति क्रियाविशेषणं वा। ''धीरं तु कुङ्कुमे मन्दे बुधे धैर्यवति त्रिषु'' इति **कुमुदाकरः**। किं वा चन्दनं निन्दति इन्दुकिरणमनुलक्षीकृत्य खेदं विन्दति। व्यालनिलयेत्यादि। व्यालनिलयेन सह मिलनेन हेतुना मलयसमीरं विषमिव कलयति जानाति अनुभवति स्वीकरोति वेत्युत्प्रेक्षते। ''कलितं स्वीकृते ज्ञाने'' इति **धरणिः**। ''व्यालनिलयश्चन्दनतरुरुच्यते'' इति। चन्दनतरुषु भुजङ्गा इत्युक्तेः। चन्दनतरुसम्पर्कात् कामवर्धकत्वेन मलयपर्वतवायुर्विरहिणं पीडयतीति वस्त्वर्थः। तस्य चन्दनतरुषु सर्पे भुक्ते इत्यनेन विषमिश्रितत्वात् विषमिवेत्युत्प्रेक्षा।।१ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१ ।। गीतस्यास्य कर्णाटरागः। यथा, ''कृपाणपाणिर्गजदन्त पत्रमेकं वहन् दक्षिणकर्णपूरम् ।संस्तूयमानः सुरचारणोघैः कर्णाटरागः शिखिकण्ठनीलः।'' एकताली तालम्।

हे माधव! सा श्रीराधा तव विरहनिमित्तं दीना दुःखिता। अत्रोत्प्रेक्ष्यते, कामबाणस्य भयात् त्वयि ध्यानेन लीनेवास्ते। कामरूपे त्वयि प्रसन्ने तद्भयं न करिष्यतीत्यभिप्रायः। न केवलमेतच्चन्दनमिन्दुकिरणं च निन्दति, स्वभावशीतलौ यन्मां दहतस्तन्ममैव दुर्दैवमित्यनु पश्चादधीरं यथा स्यात्तथा खेदं विन्दति। तथा चन्दनतरोः संपर्केण मलयसमीरं गरलमिव कलयति। तत्रस्थ सर्पभुक्तोज्झितो वायुर्विष-मिलितत्वाद्विषवदुत्प्रेक्ष्यते।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। यत् प्राह तद् विवृणोति निन्दतीत्यादिना गीतेन। कर्णाटरागेण गीयत इत्युक्तम्। अस्य रूपम्,

कृपाणपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरम्।
संस्तूयमानः सुरचारणोघैः कर्णाटरागः शिखिकण्ठनीलः। इति ।

हे माधव! लक्ष्मीवन्महाकूलसूतत्वेन पूर्णकामतया अविदितपरसन्ताप श्रीकृष्ण! या खलु त्वया बहुतरप्रणयोपलालिता सा राधा कयाऽपि दैवगत्या कृततत्प्रणयभङ्गस्य तव विरहे सत्तामात्रेणापि विविधदुरवस्थासंपादिनि विप्रयोगे दीना उपायान्तरशून्यतया प्राप्तदैन्या वर्त्तत इति शेषः। तर्हि किं करोति मनसिजस्य सदाऽऽसन्नवर्त्तितया अनिर्वार्यस्य मदनस्य विशिखेभ्यः सन्तापनशोषणादि विविधशक्तियुक्तेभ्यः शरेभ्यः यद्भयं, कथमशरणाऽस्मि। मन्दभाग्या, किं करोमि, क्व यामीत्यादिना विविधार्ति-सम्पादकं साध्वसं तस्माद्धेतोः त्वयि मदनबाणाभेदनचेतसि भावनत्वात् तदेकाग्रचित्ततया लीना इवास्ते। त्वयि प्रसन्ने तद्भयं न भविष्यतीति त्वामेव सदा ध्यायन्ती स्थितेति अभिप्रायः।

ननु विरहतापोपशान्त्यै सन्ति बहव उपचारास्तर्हि किमर्थं नोपचर्यते इति चेत् तर्हि आह; निन्दतीति। सा चन्दनं निन्दति, विरहसन्तापोपशमकतयाऽति प्रशस्तस्य सुघृष्टचन्दनद्रवस्य तद्विरहतापप्रभावानभिज्ञाभिः सहचरीभिरन्तिकमानीतस्य स्वयं मरणोपायतया अनुमोदितस्य हृदयस्पर्शमात्रेणैव रजोऽवशिष्टस्य ततः प्रखरश्वसिताघातेन इतस्ततो विक्षिप्तस्य धिक्! निःसारमिदं चन्दनमिति निन्दां करोति। तथा इन्दुकिरणं च निन्दति। कथमुदितो भगवान् सन्तापावसाननिदानमिन्दुरिति पुनः पुनः पृच्छन्ती विदिततदत्याहितकृत्याभिः सखीभिः नेति नेति प्रतारिता प्रयत्नेनान्तर्गृहस्थापिताऽपि गवाक्षमार्गप्रविष्टकिरणकणपिधानसावधानाभिस्ताभिर्यावदेव यो यः किरणो न पिधीयते, तावदेव तदभिमुखं गात्रं विक्षिपन्ती किञ्चित् स्पर्शेण साऽपि अकिञ्चित्करत्वमिति निन्दां करोति। स्वभावतोऽति शीतलावपि एतौ चन्दनचन्द्रकरौ मयि किञ्चदपि नोपकृतवन्तौ। तन्ममैव दुर्दैवमिति अनु पश्चात् अधीरं यथा स्यात् तथा खेदं विन्दति। पूर्वखेदादपि अधिकतरं लभत इत्यर्थः। किं च मलयो नाम दक्षिणदिक्स्थित-चन्दनोत्पादकः पर्वतविशेषः, तत्सम्बन्धिनं समीरं पवनं गरलमिव कालकूटमिव कलयति मनुते, केन व्यालानां सर्पाणां निलय आवासश्चन्दनतरुरिति प्रसिद्धिः। 'भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्। नास्त्रंसत् करिणां ग्रैवम्' इति कालिदासोक्तिश्च। तस्य मिलनेन

सम्पर्केण हेतुना तत्र यत् सर्वभुक्तोज्झिततया विषमिश्रितत्वात् विषमेवायमिति उत्प्रेक्ष्य मरणानुकूलौषधिविशेषतया सम्भावितं क्षौमाञ्चलावरणादिना सखीभिरपि अशक्यप्रतिकारं मलयमारुतं स्वयमङ्गीकरोति। न च तत्फलं प्राप्नोतीति भावः। 'घङ्' अर्थ 'क' प्रत्ययान्त मिलशब्दात् तत् करोतीति णिचि ल्युडिति मिलनं साधु। विशेषोक्तिरलङ्कारः। 'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' इति लक्षणम्।।१ ।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। निन्दतीति; श्रीराधायाः विरहदशां श्रीकृष्णस्य पुरः विवृणोति तस्याः सखी। विरहदशायां मलयजप्रकोपितापं अर्थात् मलयपवनजन्यः दक्षिणानिलद्वारा लव्धस्तापः प्रददाति। तदर्थं सा तस्यानादरं करोति। न केवलं तदपितु चन्द्रस्य सुशीतलं किरणमपि खेदं करोति। मलयानिलमथवा दक्षिणमारुतस्य स्पर्शोऽपि सर्पविषसम्मिलित इव मन्यते तया। एवम्भूता सा तव विरहे हे माधव कन्दर्पशरभयात् तज्जन्यभावनया त्वद्भावितचित्तवृत्तिसम्पन्ना तवाभ्यन्तरे सा लीनतां गच्छति। ।१ ।।

**२- अविरलनिपतितमदन शरादिव भवदवनाय विशालम्।**
**स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम्।। सा वि० ।।२ ।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२ ।। सा राधिका स्वहृदयमर्म्मणि सजलनलिनीदलजालं वर्मसन्नाहं करोमिति वाक्यार्थः। असमस्तरूपकमिव।

नलिनी स्यात्पङ्कजिनी पद्मिनी च सरोजिनी। कङ्कटं वर्मसन्नाहं विशालं पृथुलं महत्।।

**इत्यमरः**। उत्प्रेक्षते अविरतनिपतितमदनशरादिव भवदवनायेति। तस्याः हृदये भवान् तिष्ठति हृदयं च, कामो विध्यति मर्मस्थलत्वात्। हृदयव्यवधानच्च भवतोऽपि वेधः स्यादिति भवद्रक्षणार्थं सा सन्नह्यत इत्यर्थः। एतेन भवद्रक्षार्थमात्मनिरूपे निरपेक्षा वृत्तिस्तस्या इति सूचितम्। गात्रे निपतित इति धनुषश्च्युतो ज्ञेया। नतु गीते स्फुटितः। गीते स्फुटितस्य बाणस्य सन्नाहेन परित्रातुमाशङ्क्यत्वात्। किम्बा निपतिते इति भावे क्तः। अविरतं निपतितं निपाततं यस्य इति विग्रहः।।२ ।।

### (२) राणाकुम्भकृत-रसिकाप्रिया

।।२ ।। ध्यानादेकतामापन्नत्वं प्रकटयति, अविरलेति। सा सजल नलिनीदलजालं स्वहृदयमर्मणि वर्म करोति। किंभूतं तत्? विशालम्। उत्प्रेक्षते, अविरलनिपतितमदन-

शराद्भवदवनायेव। अविरलं निपतितं निपातो येषां ते च ते मदनशराश्च। जातावेकवद्भावादेकवचनम्। त्वय्यासक्ततया 'त्वयि मृतेऽहमेव मृता' इति हृदयमर्मत्वं त्वय्येव विधाय भवदवनायेति युक्तम्। स्वहृदयमर्मणि भवदवनाय भवद्रक्षणाय सजलनलिनीदलजलं पिधानमिव करोति हृदयात्मा निरगादिति बुद्धेति युक्तिलेश।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।।अविरलेति हे कृष्ण ! सा रधा स्वहृदयमर्मणि सजलनलिनीदलजालं सजल कमलिनीपत्रसमूहमेव वर्म तनुत्रं करोति। कस्मै प्रयोजनाय, भवदवनाय स्वहृदयस्थितस्य भवतो रक्षणाय। कस्मादिव अविरलं निरन्तरं पतितो यो मदनशर: कामबाणस्तस्मादिव कीदृशं वर्म विशालं विस्तीर्णं त्वं तस्याहृदये सर्वदा इति भाव:।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। अविरलेति। सा स्वहृदयरूपमर्मस्थाने विशालं सजलनलिनी दलजालं जलसहितं कमलिनीपत्रसमूहं वर्म कवचं करोति। किमर्थमिव ? अविरलं यथा स्यादेवं निपतितो यो मदनशर: कामबाणस्तस्माद्भवदवनाय भवतो रक्षणायैव। तस्या हृदये त्वं सर्वदा तिष्ठसि, अतोऽविरतनिपतद्भिर्मदनशरैस्ते पीडा मा भूदिति पद्मिनीपत्रैस्ते सन्नाहमिव सा करोतीति भाव:। केचित्तु, कीदृशं वर्म ? अविरलनिपतितमदन शरादवनाय स्वरक्षणाय भवदिव संपद्यमानमिवेति व्याकुर्वन्ति। 'अवनं रक्षणे प्रीतौ' इति **विश्व:**।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।।अविरतेति। हे माधव:! सा राधिका अविरतमनवरतं निपतित: समागतो यो मदनशर: कामबाण: तस्मात्सकाशात् शरादितिजातावेकवचनम्। निपतितमिति भावे निष्ठा। भवत: निरन्तरं निजहृदयस्थितस्य तव अवनाय संरक्षणायैव विशालं विपुलं कर्म करोत्ययत्नगौरवपरिहाराथमेतद्विशेषणमवगन्तव्यम्। सजलानां जलेन सहितानां नलिनीदलानां नलिनीपलाशानां जालं समूहं तत्र जलसाहित्यं जलानां निविडसम्बन्धद्यातनार्थमवगन्तव्यम्। स्वस्य हृदयं सर्वनाम्नो वृत्तिमात्रेण स्वभाव इति पुंवद्भाव:। तदेव मर्म जीवनस्थानं हृदयस्य मर्मणि वा बर्म कवचं करोति, हृदयासक्तभवदवनाय जलजालं कवची करोतीत्यर्थ:। अत्र भवदनाय बर्म करोति इत्युत्प्रेक्षया राधाया: प्राणेभ्योऽपि कृष्णे प्रेमातिशयरूपवस्तुप्रतीतेरलंकारेण वस्तुध्वनि:।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। राधाया: कृष्णमात्रप्रियत्वं दर्शयति। स्वस्यं हृदस्यं स्वहृदयं तदेव मर्मस्थानमिति विग्रह:। सा राधा स्वहृदयमर्मणि सजल नलिनीदलजालं पानीयसहितपद्मपत्रसमूहं वर्मसम्वाहं करोति। अतिशैत्त्यप्रतिपादनार्थं सजलेति विशेषणम्। किम्भूतम्? विशालं महत्तरं क्षुद्रेण स्तनपरिणाहस्यावधारणासम्भवेन हृदयाच्छादनाभावात् विशालेत्युक्तमिति भाव:। किमर्थं वर्मकरोतीत्यत आह, भवदवनाय भवतो रक्षणाय, न तु निज रक्षणार्थमित्यन्यत्रौदास्यं दर्शितमिति भाव:। अव रक्षणे धातु:। कुत: सकाशाद् वक्ष्यमाणमित्यत आह, अविरलं निपतितं निपतनं यस्य भावे क्त:, तथा अविरल: निपतितश्चासौ मदनशरश्चेति अविरलनिपतितमदनशरस्तस्माद् अविरलं निरन्तरं निपतितो यो मदन शर: कामबाणस्तस्मादिति जगद्धर:। तन्मते निपतितबाणाद्रक्षार्थं वर्मकरणमुचितमिति ध्येयम्। राधाहृदयस्थ एव चेत् कृष्ण: तदा कथं तस्या विरह इति न वाच्यं विरहोपशमहेतुसङ्गमालाभात्। 'जाले नीपद्रुमे जाली कोषातक्यामुदाहृतम्। गवाक्षे च तथानाये क्षारके कुम्भवृन्दयो*रि'ति।।२।।

+'परमि'ति पाठान्तरम्।

*'दन्तवृन्दयोति'इति **मेदिनी**।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२।। अविरलेति हे कृष्ण! भवतो रक्षणाय [१] जलसहितकमलिनीपत्रसमूहं स्वस्य [२]मर्मरूपे हृदये विशालं विस्तीर्णं वर्म कवचं करोति। कस्मादिव?[३] अविरलं निरन्तरं यो निपतितो [४]मदनशर: कामबाण: तस्मादिव[५]। पूर्वं त्वयि [६] लीनाऽपि शान्तिमलभमाना हृदये [७] त्वद्रक्षणार्थं कवचं करोतीति भाव:। अनेन स्नेहाधिक्यं दौत्यनिपुणता चोक्ता। अवनं रक्षणे प्रीतौ इति '**विश्व**:' (७१.२५)। उत्प्रेक्षालङ्कार:।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। अविरलेति। हे कृष्ण! सा राधा स्वहृदयमर्मणि सजलनलिनी दलजालं [८] सोदककमलिनीपत्रसमूहमेव वर्म कवचं करोति। कस्मै प्रयोजनाय? [९] भवदवनाय [१०] हृदि स्थितस्य भवतो रक्षणाय। कस्मादिव? अविरलं निरन्तरं निपतित: यो मदनशर: [११] कामबाण: तस्मादिव। कीदृशं [१२] वर्म? विशालं[१३]विस्तीर्णम्। त्वं तस्या हृदये सर्वदा तिष्ठसीति भाव:।।२।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२।। (अविरलेति।) अविरलं सान्द्रं निपतितात् मदनशरात् कामबाणादिति जातावेकवचनम्। तस्माद्भवत: तव अवनाय रक्षणायैव विशालं महत् सजलनलिनीदलानां

जलसहितकमलच्छदानां समुदायमेव स्वहृदयध्यानवदाश्रये मर्मणि जीविताश्रये वर्म कवचं करोति तनोति। अत्र विरहतापशान्त्यर्थं धृतसजलनलिनीदलस्य भवदवननामफल-सम्भवत्वेनोत्प्रेक्षणात् फलोत्प्रेक्षा। असिद्धस्य अवनस्याभावात् ।।२।।

१.जलसहितं-इ.फ.ग.ह.ज. २.हृदयरूपे मर्मस्थाने-इ.फ.ग.ह. ३.तः५पर्यन्तो भागो नास्ति-अ.ब. ४.मनसिजशरः-ग. ६.लीनाऽप्यशान्तिं-अ.ब.फ.ग.ह.ज.लीनाऽथ शान्तिं-इ. ७.त्वद्रक्षणार्थे-इ.फ.ग.ह.ज. ८.सजल-क.ल.म. ९.नास्ति-क. १०.स्वहृदयस्थितस्य-ल.म.स्वहृदयस्थितस्य रक्षणाय-क. ११-१२.नास्ति-ड. १२.नास्ति-ल.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। अविरतेति। प्रकृतत्वात् सा राधिका स्वहृदयमर्मणि विशालं विस्तीर्णं सजलं यत् नलिनीदलजालं पद्मिनीपत्रनिचयं तद्वर्मसन्नाहं करोतीति वाक्यार्थः। 'नलिनी स्यात् पङ्कजिनी पद्मिनी च सरोजिनी' इति **'रत्नमाला'**। 'कङ्कटं वर्मसन्नाहम्' इति। 'विशालं पृथुलं महद्' **'इत्यमरः'**। 'जालं गवाक्षे आनाये क्षा(को)रके दम्भ(न्त)वृन्दयोः' इति **'विश्वः'**। किमर्थमित्याह। उत्प्रेक्षते। अविरतमविश्रान्तं निपतितो यो मदनशरस्तस्मात् सकाशात् भवदवनायेवेति। तस्याः हृदये भवान् तिष्ठति। भावनावशात् हृदयं च कामो विध्यति। मर्मस्थलत्वात् हृदयवेधनाच्च भवतोऽपि वेधः स्यादिति भवन्तं रक्षितुं सा सन्नद्ध इत्यर्थः। एतेन भवद्रक्षार्थम् आत्मनि निरपेक्षा-वृत्तिस्तस्या इति सूचितम्। निपतित इति धनुषश्च्युतो ज्ञेयो न तु गात्रे स्फुटितः, गात्रे स्फुटितस्य बाणस्य सन्नाहेन परित्रातुमशक्यत्वात्। किं वा निपतित इति भावे क्तः। अविरतं निपतितं निपतनं यस्येति विग्रहः। किं वा यावत् वर्म न विध्यते तावत् पतितेभ्यः कामशरेभ्यः व्यथामनुभूय वर्म करोतीति गम्यते। अत एव वर्मशब्दो-पादानम्।।२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२।। त्वयातिस्निग्धा सा। त्वं कथं निष्ठुरोऽसीत्याह। स्वहृदयमर्मस्थाने सजलनलिनीदलजालं पृथुलं वर्म कवचं कराति। तत्रोत्प्रेक्षते, निरन्तरनिपतित-मदनशरभयात्तव रक्षणार्थमेव। तस्या हृदये भवांतिष्ठति। हृदयं कामोविध्यति। मर्मस्थानत्वात् हृदयवेधनाच्च भवतो वेधःस्यादिति भवद्रक्षणार्थं सा सन्नह्यत इत्यर्थः। निपतित इति भावे क्तः। अविरतं निपतनं यस्येति विग्रहः पतितबाणासंभवात्।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। न च भावनया हृदि स्थापिते त्वयि निःशङ्कं निलेतुं मिलितुं शक्नोतीत्याह अविरतेति। हे माधव! सा राधा स्वस्याः हृदयमर्मणि यत्र ध्यानेन भवानुपस्थापितोऽस्ति,

तत्र सजलनलिनीदलजालं जलसहितपद्मिनीपत्रसमूहं विशालं विपुलं वर्म कवचं करोति। उत्प्रेक्षते, निपतितेति भावे निष्ठा। अविरतं विश्रान्तिरहितं निपतितं यस्य। अविरतत्व-विशेषणसामर्थ्यात् उत्पतनमपि बोद्धव्यम्। निपतति, उत्पतते पुनः पततीत्यर्थः। अनेन निरन्तरं दुःसहव्यथाजनकत्वं सूचितम् । ईदृशात् मदनशरात् मन्मथास्त्रात् सकाशात्, जातावेकवचनम्। तेषां पञ्चत्वे प्रसिद्धेऽपि मोहन शोषण सन्तापन विदारण मारणादिविविधवृत्तिमत्त्वेन बाहुल्यात् भवतो हृदयस्थितस्य तव अवनाय रक्षणाय इव निरन्तरं दुःसहविविधवेदनाकारिणमतिदारुणं मन्मथशरं निजाङ्गसङ्गिनमनुभवन्ती धिगस्तु मामतिनिर्धृणां यदात्मरक्षणैकपरायणा तादृशमतिकोमलाङ्गमनेन दारुणास्त्राञ्चित-निजाङ्गसङ्गेन दूषयामीति भयशङ्काकुलितचित्ता सा त्वदुपयोगिनं तथा कवचं कल्पितवतीति भावः। सजलेति शोषणदाहादि प्रशमाभिप्रायेण। जालमिति प्रत्यैकमसामर्थ्यशङ्कया तानि सङ्घीकृत्येत्यर्थः। विशालमिति परिणाहिकुचमण्डल-शालितया हृदयप्रदेशस्यापर्याप्तिशङ्कयेति भावः।।२।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। अविरलेति; अनवरतकामशराघातेन त्वं विदीर्णो भविष्यसीति मत्वा नित्यं तस्याः हृदि विराजसे। त्वयि शराघातं न पतेदिति सा हृदये सिक्तनलिनीदलस्य वर्मधारणं करोति।।२।।

**३-कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।**
**व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम्।।सा वि०।।३।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३।। सा राधा कुसुमशयनीयं पुष्पशय्यां करोतीति वाक्यार्थः। कीदृशं अनल्पविला-सकलाकमनीयं, अनल्पबिलासकलासम्भोगश्रृङ्गारः इत्यर्थादधिगन्तव्यम्। विरहे तव शरशय्यां यत इत्युत्प्रेक्षते, कुसुमविशिखशरतल्पव्रतमिवेति। ननु कामशर-शय्याख्यं ब्रतमतिदुष्करं जीवनसन्देहोत्पादकत्वात्तत्क्रिमर्थं तत्र श्रद्धते इत्याह। तव परिरम्भसुखायेति। दुष्प्रापं हि तस्यालिङ्गनसुखं विना तपसा न लभ्यते इत्यभिप्रायः।।३।।

### (२) राणाकुम्भकृत-रसिकाप्रिया

।।३।। कुसुमेति। सा कुसुमशयनीयं कुसुमशय्यां करोति। किंभूतं कुसुमशयनीयम्? अनल्पविलास कलाकमनीयं बहुतरविलासरमणीयम्। किमिव? कुसुमविशिखशरतल्पं

व्रतमिव। किमर्थम्? तव परिम्भसुखाय। अन्योऽपि सुखैषी व्रतमाचरति। दुर्लभभवदाश्लेषावाप्त्यैः स्मरेण दूयमाना सा दुष्करं तस्यैव शरशय्याव्रतमाचरतीत्यर्थः। अत्रोत्प्रेक्षालंकारः।।३।।

**(३) जगद्धरकृत-सारदीपिका**

।।३।। कुसुमेति कुसुम शयनीयं पुष्पशय्यां करोति। कीदृशं अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरं पुष्पशय्या स्वयमेवमनोज्ञा इयं शय्याविरचना कुशलशय्याभावे पुष्पशय्यां करोतीत्यर्थः। कमिव कुसुमविशिखः कामस्तस्य शराः पुष्पाणि तान्येवतल्पशय्या तादृशं व्रतमिव शरशय्याशयनरूपं दारूणं व्रतमितिभावः। किमर्थं व्रतमित्यत आह तव परिरम्भसुखाय आलिङ्गन सुखं प्राप्तुमित्यर्थः।।३।।

**(४) शंकरमिश्रकृत-रसमञ्जरी**

।।३।। कुसेमति। सा कुसुमशयनीयं पुष्पशय्यां करोति रचयति। कीदृशम्? अनल्पविलासकलायां बहुतरक्रीडाकलायां कमनीयं काङ्क्षणीयम्। न दैवस्य गतिर्ज्ञातुं शक्यते। को वेदाकस्मादेव भवानागच्छतीत्याशयेन कुसुमशय्यामारचय्य त्वन्मार्गदत्तदृष्टिरेकनिष्ठैव तिष्ठतीति भावः। किमिव करोति? कुसुमविशिखः कामस्तस्य ये शराः कुसुमस्वरूपास्तेषां तल्पं शय्या तत्र तस्वरूपं व्रतमिव। तव परिरम्भसुखाय तवालिङ्गनजन्यसुखप्राप्तये करोति? 'तल्पं च शयनीये स्यात्तल्पं वृन्दकलत्रयोः' इति **विश्वः**। एतैस्त्रिभिः पदैरुद्वेगाख्या प्रपञ्चावस्था कथिता। तल्लक्षणं प्रागेवोक्तम्।।३।।

**(५) लक्ष्मीधरकृत-श्रुतिरञ्जनी**

।।३।। कुसुमेति। हे माधव! सा राधिका अनल्पा बहुला ये विलासाः विभ्रमास्तदर्थं याः कलाः शिल्पिकर्माणि तैः कमनीयं रमणीयं बिलासानुकूलचित्रकर्मसमेतमित्यर्थः। एतादृशं कुसुमशयनं पूर्वं भवद्विरचितप्रसूनशय्यां कुसुमविशिखस्य मन्मथस्य शरतल्पं कुसुमरूपबाणनिर्मितशय्यारूपं ब्रतमिव तव परिरम्भ सुखायालिङ्गनसौख्याय करोति। यथा लोके कश्चित् क्षिप्रमेवेश्वरप्रसादाद्यारामत्वात्सुखसिद्ध्यर्थं असिपत्रशयनादि कठोरब्रताचरणमीश्वरमुद्दिश्य करोति तथेयमपि सहजकुसुमशयनं भवत् परिरम्भमहाफलाय मदनशरतल्परूप व्रतमिव करोतीत्यर्थः अत्र व्रतमिवेत्युत्प्रेक्षया लौकिकव्रताचरणकर्त्तृसाम्य प्रतीतेरलङ्कारेणालङ्कारध्वनिः।।३।।

**(६) शुक्लध्वजनृपतिकृत-सारवती**

।।३।। अपि किंङ्करोतीत्यत आह। कुसुमानि तच्छयनीयं शयनोपहितञ्चेति कुसुमशयनीयम्। सा राधा कुसुमशयनीयं कुसुमशय्यां करोति। किमिव?

कुसुमविशिख शरतल्पं व्रतमिव। किमर्थं व्रतं करोतीत्यत आह तव परिरम्भसुखाय तवालिङ्गनसुखार्थम्। अत्र परिरम्भपदस्य नित्यसाकाङक्षत्वाद् असमस्तेनापि तवेतिपदेनान्वयानुभावकत्वम्, यथा तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किम्बक्षश्चरणानतिव्यतिकरव्याजेन गोपाष्यत इत्यादौ अतिवीरेण भीष्मेनापि प्राणनिरपेक्षेण शरतल्पव्रतमाचरितमिति तदाचरणं सूचितमेवेति भावः। कीदृशं शयनीयम्? अनल्पविलासकलाभिर्बहुतरक्रीडाशिल्पैः कमनीयं मनोहरमित्यर्थः। यद्वा पुष्पशयनीयमतिसुखदमिति सकललोकप्रसिद्धमेवेति सा किं दुष्करं करोतीत्याशंक्याह, कीदृशं शयनीयम्? अनल्पा अतिशयिता सुविमलकला श्रृङ्गारचेष्टा सुकमनीयं वाञ्छनीयं न तु विरहावस्थायामिति भावः। तथा तापशान्त्यभिप्रायेन कुसुमशयनीयं कृतं तदेव शरतल्पव्रमिव जातमित्युत्प्रेक्षालंकारः। तल्पं शय्याट्टदारेष्विति **मेदिनीकारः**।।३।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३।। कुसुमेति। किञ्च कुसुमशय्यां तव परिरम्भसुखायालिङ्गनाय व्रतमिव करोति। कीदृशम्? [३]कुसुमविशिखस्य कामस्य शराणां तल्पमास्तरो यत्र। अनल्पविलास-कलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरम्। व्रतफलपरिपाकेन[४]त्वयाऽवश्यं गन्तव्यमिति[५]भावः। [६]तल्पं तु[७]शयनीयं स्यात्तल्पं [८] कामकलत्रयोः इति **विश्वः** (७५.८)।[९] नियमो व्रतमस्त्री [१०] **इत्यमरः** [११] (२.७.३७)। दीपकालङ्कारः।।३।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।३।। कुसुमेति। कुसुमशयनीयं पुष्पशय्यां [१२] करोतीत्यर्थः। अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरम्। पुष्पशय्या स्वयमेव मनोज्ञा इयन्तु विरचनाकुशला शय्याभावे पुष्पशय्यामेव करोतीत्यर्थः। किमिव?[१३] कुसुमविशिखः कामस्तस्य शराः पुष्पणि तान्येव तल्पं शय्या तादृशं[१४] व्रतमिव। शरशय्याशयनरूपं दारुणं व्रतमिति भावः। किमर्थं व्रतमित्यत आह, तव परिरम्भसुखाय आलिङ्गनसुखं प्राप्तुमित्यर्थः।।३।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३।। कुसुमेति। अनल्पाः बहवश्चेतसि विलासकलाः पद्माद्यनेकसंवेशविशेषाः तैः कमनीयं रमणीयम्। कुसुमानां शयनीयं तद्युक्तशय्या तव परिरम्भस्य आलिङ्गनस्य सुखाय सौख्याय आलिङ्गनानन्दरूपफलार्थं कुसुमविशिखस्य मदनस्य शरतल्पं सायकशयनं व्रतमिव करोति। त्वां विना शत(य)नास्तृतकुसुमानि निन्दनि। तथाऽपि सज्जत्वात् मार्गे परीक्षते इति भावः। अत्र कुसुमशयनस्य व्रतत्वेनोत्प्रेक्षणा-द्वस्तूत्प्रेक्षा ।।३।।

१.नास्ति-अ.ब. २.आलिङ्गनसुखाय-ह. ३.कुसुमविशिखशराणां-ग.४.त्वया गन्तव्यमिति-ग. ५.ध्वनिः-इ.फ.ग.ह.ज. ६.तल्पं तु शयनीये स्यात्तल्पमट्टकलत्रयोः-विश्वः। ७.कमनीयं-अ.ब. ८.मदनकलत्रयोः-इ.फ.ग.ह.ज. ९.तः११.पर्यन्तं नास्ति-अ.ब.१०.स्त्रियाम्-ग.ज.१२.करोति-क.ल.म.निद्रां करोतीत्यर्थः-ड.१३.कुसुमविशिखस्य शराः-क.१४.व्रतमेव-ड.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। रचयतीति वाक्यार्थः। उत्प्रेक्षते। व्रतमिवेति। व्रतवतः कष्टरूपत्वात् पुष्पशय्यायाः। किं नाम व्रतमित्यत आह, कुसुमविशिखशरतल्पमिति। कुसुमान्येव विशिखा यस्य कामस्येति न्याय्यपदमिदम्। तस्य हि शराः कुसुमान्येव तन्मयतल्पम् एतद्रूपम्। किं वा कुसुमविशिखशरमयतल्पं यत्र व्रते तत्तथा। कुसुमशयनीयं कीदृशम्? अनल्पविलासकलाकमनीयमिति। अनल्पा बहुला चासौ विलासकला चेति तत्र कमनीयं वाञ्छनीयम्। अनल्पविलासकला शृङ्गार इत्यर्थादवगन्तव्यम्। कुसुमशय्या हि विलासिनां सुखदायिनी भवति। विरहिणां तु सा मदनशरशय्यायते दुःखजननात्। ननु कुसुमविशिखशरतल्पं व्रतमतिदुष्करं जीवनसन्देहोत्पादकत्वात् तत् किमर्थं श्रद्धते इत्याह, तव परिरम्भसुखायेति। दुष्टानां हि तवालिङ्गनसुखं विना तपसा न लभ्यत इत्यभिप्रायः।।३।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३।। अन्यदपि, सा कुसुमशय्यां करोति। कीदृशं? अनल्पविलासकलायाः कमनीयम्। विरहे तदपि कामशरशय्या यत्र इत्युत्प्रेक्षते व्रतमिव। ननु एतद्दुष्करं जीवनसन्देहोत्पादकं किमिति करोति, तदपरिरम्भसुखाय, दुष्प्राप्यं तव परिरम्भसुखमित्यर्थः।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।। नलिनीदलकवचान्तर्हितत्वेन भावनया त्वयि लीयमानाऽपि कामविशिखभयात् न मुच्यत इति उपायान्तरमुपकल्पयन्त्याह कुसुमेति। यैः कुसुमैर्बाणतां नीतैर्मदनो मां पीडयति, तैरेव शरतल्परूपं व्रतमाचरामीति सा राधा अनल्पा या विलासकला बहुविधसम्भोगचेष्टितानि, तदर्थं कमनीयमभिलषणीयं यत् कुसुमशयनीयं पूर्वं विनिर्मितमभूत् तदेवाधुना विरहसमये कुसुमविशिखस्य कामस्य शरतल्पं जातम्। तद्रूपं व्रतं करोतीवेत्युत्प्रेक्षते। ननु किमर्थमतिदुष्करं जीवनसन्दोहापादनं व्रतमाचरति। तत्राह, तव परिरम्भसुखाय, शरसंघाञ्चितमिदं गात्रं तदालिङ्गनयोग्यं न भवतीति शरतल्पव्रतप्राप्तेन देहान्तरेण तस्यातिसुकुमारस्य आलिङ्गनसुखं सम्पादयामीति कृत्वा तथा करोतीति भावः। अनेन त्वरितमागच्छ इति सख्यभिप्रायः ध्वनितः।।३।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। कुसुमविशिखेति; पुष्पशरशय्या इव मन्यते सा सुकुमारपुष्पशय्या ते विरहेण। यतो हि शरशय्यां यथा जनः दुःखेन दुःसहेन रात्रिं यापयति तथैव प्रचुरकलाविलासं दुःखव्रतमिव मनुते सा तवालिङ्गनसुखफलाय सा शरशय्याव्रतमपि धारयति।।३।।

**४-वहति च विगलितलोचनजलधरमाननकमलमुदारम्।**
**विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ।। सा वि० ।।४।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।४।। इतः पदचतुष्टयेन राधिकोन्मादावस्था प्रतिपाद्या। तल्लक्षणम्

श्वासप्ररोदनोत्कम्पवसुधोल्लेखनैरपि। व्यापारो जायते यत्र स उन्मादो निरूप्यते।।

आननं कमलं मा वहतीति वाक्यार्थः। न केवलं कुसुमशयनीयं करोत्यवंरूपश्च शब्दार्थः। आननकमलमिति। आननंकमलमिवेति विग्रहः। कीदृशं दलितविलोचनजलभरं दलितो युक्तो विलोचनजलधरो यत्रेति विग्रहः। अत्रोपमामाह, विधुमिवविकटविधुन्तुददन्त-दशनगलितामृतधारमिति विकटस्य विधुन्तुदस्य राहोर्दन्तदलनेन चर्वणेन गलितामृतधारो यस्येति विग्रहः "विकटः सुन्दरः प्रोक्तो विशालविकरालयोः" इति **विश्वः**।।४।।

### (२) राणाकुम्भकृत-रसिकाप्रिया

।।४।। वहतीति। सा आननकमलं वहति। किंभूतम्? चलितविलोचनजलभरम्। चलितः संभक्तः विलोचनेन जलभरो यत्र। वा चलिते संभक्ते विलोचने जलभरेण यत्र। अथवा, चलितविलोचन एव जलधरो मेघो यत्रेति पाठः। किंविशिष्ट आननकमलम्? उदारं मनोहरम्। कमिव? विधुमिव? किंभूतं विधुम्? विकटा विकराला विधुन्तुददन्तास्तैर्दलनेन पीडनेन गलितामृतधारा यस्मिन्। अनेन भवद्विरहेणानवरतं रुदत्या मुखमिन्दुकान्तिं बिभर्तीत्याशयः, असितवर्णमभूदित्यर्थः। अत्रोपमालंकारः।।४।।

### (३) जगद्धरकृत-सारदीपिका

।।४।। वहतीति साराधा उदारं मनोज्ञम् आननकमलं वहति धारयति कीदृशं चलितम् उच्छ्वसितं यद्विलोचन जलं नेत्राश्रु तद्धारयतीति कमिव विधुमिव। कीदृशं विधुं विकटेन दारुणेन महता विधुन्तुदस्य राहोर्दन्तनदलनात् गलिता मृतधारा यस्मात्।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। वहतीति। सा उदारमाननकमलं श्रेष्ठं मुखपद्मं वदति धारयति। कीदृशम्? वलिते तवमार्गविलोकनाय तिर्यक्प्रसारिते विलोचने नेत्रे एव जलधरौ मेघौ यत्र तादृशम्। अत्र निरन्तराश्रुवर्षित्वेन नेत्रयोर्जलधरत्वेन निरूपणम्। कमिव ? विधुमिव। कीदृशं विधुम्? विकटाः कराला विशाला वा ये विधुन्तुदस्य राहोर्दन्तास्तैर्दलनं खण्डनं तस्माद्गलिता प्रच्युताऽमृतस्य धारा यत्र तादृशम्। अत्र मुखस्य विधुना नेत्रजलस्य चामृतधारारूपसादृश्याद्वाक्यार्थोपमा बोध्या। 'विकटः सुन्दरे प्रोक्तो विशाल-विकरालयोः' इति **विश्वः**। 'तमस्तु राहुः खर्भानुः सैंहिकेयो विधुन्तुदः' **इत्यमरः**। इयं चोन्मादाख्या सप्तमावस्था। तदुक्तं **श्रृङ्गारतिलके** (२/१३) 'श्वासः प्ररोदनोत्कम्पवसुधाश्लेषणैरपि। व्यापारो जायते यत्र स उन्मादः स्मृतो यथा।।' इति।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। वहतीति हे माधव! सा राधिका विगलितं शस्तं यद्विलोचनजलं भवद्विरहोत्पन्नाश्रुजलं तस्या अधरं गलिताश्रुकमित्यर्थः।
तथाप्युदारं तादृगवस्थायामपि दर्शनयोग्यमित्यर्थः। एतादृशमाननं कमलमिव आननकमलं कर्म विधुं चन्द्रं तुदति व्यथयतीति विधुन्तुदो राहुः विधुरूपोस्तुद इति खसि इत्यनव्ययस्येति मुम्। विकटो भयङ्करः स चासौ विधुन्तुदश्चेति। तस्य दन्तदलनैर्गलिताः स्रस्ताः अमृतधाराः सुधाधाराः यस्मात्तादृशं विधुं चन्द्रमसमिव वहति धत्ते। अत्र उपमानोपमेयसाधारणधर्मेवादीनां चतुर्णामुपादानात् पूर्णोपमालङ्कारः। तेन च भवद्वियोगेन सा निरन्तरं दुःखाक्रान्ता इवास्तु इति वस्तु व्यज्यते इत्यलङ्कारेण ध्वनिः। तेन च त्वया शीघ्रमनुग्राह्येत्यनुरणितवस्तुध्वनिः।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। अपि किङ्करोतीत्याशंक्याह। चशब्दः समुच्चये। सा राधा आननकमलं मुखपद्मं वहति पाणिनेत्यर्थाल्लभ्यते। कीदृशम्? वलितः संलग्नो विलोचनयोर्जलभरो जलपूरो यत्र एतादृशम्? वलितविलोचनजलधरमिति बहुषु पाठः। तत्पक्षे वलितः सम्भक्तः, विलोचने चक्षुषी एव जलधरो वर्षकमेघो यत्रेति उत्प्रेक्षा। एतांदृशं तथा चाविरतं रोदितीति वाक्यार्थः। उदारं महान्तम्। किमिव? पूर्णत्वात् विधुमिव चन्द्रमिव। कीदृशम्? विकटाः करालाः ये विधुन्तुददन्ताः तैर्दलितः विकटविधुन्तुददन्तदलितः अत, एव गलितामृतधारा यस्य स भवति गलितामृतधारः। विकटविधुन्तुददन्त-

दलितश्चासौ गलितामृतधारश्चेति स तथा तम् दन्तदलनगलितामृतधारमिति बहुषु पाठः। तत्पक्षे विकटानां विधुन्तुददन्तानां दलनैर्गलिता अमृतधारा यस्य एतादृशमित्यर्थः। अत्रोभयपक्षेऽपि दन्दपदोपादानंस्वरूपकथनाय दलनस्याव्यक्तत्वलाभार्थ-मेवेत्यवधेयम्। इयञ्चाद्भूतोपमा बोद्धव्या, बाहुदन्तदलनगलिताभृतधारात्वस्य चन्द्रस्याप्रसिद्धेः। न च कमलेनोपमितस्य चन्द्रेणोपमायां विरोधः, सादृश्यविशेषलाभार्थं तत्सम्भवात्। 'धारा सन्याग्रिमस्कन्धे सन्ततौ पत्तनान्तरे। द्रवद्रव्यप्रपाते तु तुरङ्गगतिपञ्चके। खड्गादीनाञ्च निशितमुखाग्रे परिकीर्तिता' इति।।

* टीकानुसारं 'दलन' इत्यस्य स्थाने 'दलित' इति पाठः स्यात्।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। व्रतमुक्त्वेदानी [१] मपि साहसमाचरतीति कथयति, वहतीत्यादिना। सा उदारं मुखकमलं वहति धारयति। प्रेमाश्रुणा सहजशीतलेन च। कीदृशम्? वलिते त्वन्मार्गावलोकनाय प्रसारिते [२]लोचने जलधरौ जलदौ [३]मेघौ यत्र। एतेनेर्ष्यादयो मृदुत्वं च[४]सूचितानि। [५]कमिव? विधुं[६] चन्द्रमिव। कीदृशं चन्द्रमिव? विकटैः करालैविधुन्तु-दस्य राहोर्दन्तैर्दलनेन खण्डनेन गलिता प्रच्युता अमृतस्य धारा यत्र। अत्र मुखं विधुना नेत्रजलममृतधारया सहोपमम्। अत्र विधुन्तुद इव कामः [७] क्षीणबलः दन्तैस्तन्मुखं दलतीति ध्वनिः। विकटः सुन्दरे प्रोक्तो विशालविकरालयो : इति **विश्व** (३७.३०)। तमस्तु राहु : स्वर्भानुस्सैहिकेयो विधुन्तुदः **इत्यमरः** (१.३.२६)।।४।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। वहतीति। सा राधा उदारं मनोज्ञं आननकमलं वहति धारयति। कीदृशम्? [८]चलितमुच्छ्वसितं यद्विलोचनजलं नेत्राश्रु तद्धारयतीति। [९]कमिव? विधुमिव। [१०] कीदृशं विधुमिव? विकटेन दारुणेन महता विधुन्तुदस्य राहोर्दन्तेन दलनात् खण्डनात् गलिता अमृतधारा यस्मात्।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। वहतीति। वलिताभ्यां विवर्तिताभ्यां विलोचनाभ्यां[११]जलभरः अश्रुप्रवाहो यस्मिन् तत्। आननमेव कमलम्। विकटाः निम्नोन्नताः विधुन्तुदस्य राहोः दन्ताः तैः दलनेन भेदनेन गलितामृतधारा सुधासृतिर्यस्मिन् तम्। विधुमिव चन्द्रमिव वहति। गलदश्रुमुख - कमलोपमासिद्ध्यर्थं विकटेत्यादिविशेषणं विधोर्दत्तम्। तच्च स्वतस्सिद्धं न भवतीत्युत्प्रेक्षैव। न कल्पितोपमा। तया च रूपकं सङ्कीर्णम्।।४।।

१.अतिसाहसम्-इ.फ.ग.ह.ज. २.लोचनजलधरौ-अ.ब.लोचने एव जलधरौ जलदौ-इ.फ.ग.ह.ज. ३.नास्ति-अ.ब. ४.सूचितम्-अ.ब.इ.फ.ग.ह.ज. ५.किमिव-अ.ब.इ.फ.ग.ह.ज. ६.चन्द्रं-अ.ब.इ.फ.ग.ह.ज. ७.नास्ति-अ.ब. ८.चलितविलोचन इति-ड.मूलपाठोऽपि। ९.किमिव-क.ल.म. १०.कीदृशम्-ड.कीदृशं विधुम्-क.ल.म. ११.जलभर इति इ.मूलपाठः।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। इतः पदचतुष्टयेन राधिकोन्मादावस्था प्रतिपाद्या। तल्लक्षणम् ''श्वासास्रवदनोत्कम्पवसुधालेखनैरपि। व्यापारो जायते यत्र स उन्मादः स्मृतः यथा।।'' इति। वहतीत्यादि। हे माधव! सा आननकमलं वहति चेति वाक्यार्थः। न केवलं कुसुमशयनीयं करोत्येवंरूपश्च शब्दार्थः। आननं कमलमिवेति विग्रहे उपमितं व्याघ्रादिभिः सामान्यप्रयोगे इति उपमासमासः। किंविधम्? विगलितेत्यादि। विगलितं यल्लोचनजलमश्रु तस्य भरोऽतिशयो यत्रेति विग्रहः। एवंविधमाननकमलं वहतीत्यर्थः। तत्रोपमानमाह। किमिव? विधुमिवेति । विधुं किंविधम्? विकटेत्यादि। विकटस्य भयानकस्य विधुन्तुदस्य राहोर्दन्तैर्यद्दलनं चर्वणं तेन गलिता अमृतधारा सुधालेखा यस्येति विग्रहः। एतेन लोचनजलभरेण चन्द्रस्यामृतधारोपमा। इयमिवैकशब्दाद् वाक्यार्थोपमा ''विकटः सुन्दरे प्रोक्तो विशालविकरालयोः'' इति **विश्वः**। ''धारा खड्गादिनिशितमुखे सम्पातलेखयोः। द्रवद्रव्यस्य पतने तुरङ्गरतिपञ्चके'' इति **'रुद्रटः'**। उदारमिति आननकमलविशेषणम्। ननु विधुमिवेति आननकमलचन्द्रयोरुपमालङ्कारो न सम्भवति। ''साधर्म्यमुपमाभेदे'' इति **काव्यप्रकाश**लक्षणेन समानावयवत्वेनोपमास्वीकारात् पुंनपुंसकयोः साधर्म्याभावात्। सत्यं यत्र नानात्वेऽपि पुंनपुंसकयोः सामान्याभिधायिपदं नानात्वं नापद्यते न तत्रैतद्दूषणं भवति। यथा, ''गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः'' इति। न पुनर्गुणा रत्नानीवेति यथा चन्द्रमिव मुखं पश्येति। न पुनश्चन्द्र इव मुखं भातीति। तथा च **दण्डी**, ''न लिङ्गवचने भिन्ने नहि नाधिकतापि वा। उपमा दूषणायालं यत्रोद्वेगो न धीमताम्।।'' इति। ननु प्रकृते धीमतामुद्वेगोऽस्ति। न हि चन्द्रमिव मुखं पश्येत्यत्र यथा चन्द्रशब्दस्य पुंस्त्वं क्लीबलिङ्गतामपि स्पृशति सादृश्यात् तथा विधुमिवाननकमलं वहतीति विधुशब्दः पुंस्त्वबुद्धिः क्लीबलिङ्गतां स्पृशति रूपकत्वादिति। एवं तर्हि मुखकमलस्य नपुंसकत्वबुद्धिः पुंलिङ्गतामप्येकरूपतया स्पृशतीति समीचीनः। यथा अस्यैव जयदेवकवेः निधिमिव जघनं घटयेति। ''क्लीबे तु जघनं पुरः'', ''निधिर्ना शेवधिर्भेदे'' **'इत्यमरः'**। तेन विपर्य्ययेण विधुरूपता आननकमलस्य निधिरूपता च जघनस्येति। किं च पुंसि पद्मं नलिनमित्यादौ पद्मादीनां षोडशानामपि द्विलिङ्गता न तु

केवलस्य पद्मशब्दस्येति व्याख्यातम्। तथा च, ''मृगभेदे च कमल: कमला श्रीवरस्त्रियो:। न स्त्रियां कमल: पद्मेन द्वयो: कमलं जले।।'' इति 'मेघमाली'। तेन विधुकमलयोरत्र लिङ्गं न भिद्यत इत्यदोष:। एवं निधिजघनयोरपि न भेद:। तथाहि, ''क्लीबे तु जघनं पुर:'' इति क्लीबनिर्देशे पुन: क्लीबग्रहणात् जघनस्य पुंलिङ्गतापि सूचिता, ''उद्धृतो हि ग्रन्थ: फलातिरेकं साधयति'' इति न्यायात्। यथा, ''कलिका कोरक: पुमान्'' इति कोरकशब्दस्य पुमानित्ययं निर्देश: क्लीबतां प्रतिपादयति। ''समूपहरन् विचकार कोरकाणि'' इति '**माघ:**'। अत एव ''जघनं च श्रोणिपूर्वभागे ना कटिमात्रके'' इति '**कुमुदाकर:**'। तत्र च कटिमात्रवाचीति केचित्। ननु आननकमलं विधुमिवेति स्वभावविरुद्धयो: कमलचन्द्रयो: उपमानोपमेयभावो न सम्भवति महाकविभिरस्वीकारात्। सत्यम्। आननं कमलमिवेति पूर्वपदार्थप्रधानसमासेन आननस्य प्राधान्यात् नैष: दोष:। यत्ये(था) गलितलोचनजलभरेण तस्यामृतधारोपमा लोचनजलभरमित्येतद्विशेषणं पूर्वपदार्थप्रधानोपमासमासस्य साधनम्। उत्तरपदार्थप्रधान-रूपकसमासस्य बाधकं लोचनजलभरस्यासम्भवात्। प्रयुक्तं च महाकविभि: यत् - ''अधरदलमिश्रितं प्रियाया: वदनसरोरुहसाम्यमिति। यस्या: तदमृतममृतं स इन्दुरिन्दुर्विषमितरं तमसा समस्तथान्य:।।'' इत्यादि:।।४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।४।। न केवलं कुसुमशयनीयं करोति, अपि च उदारमाननकमलं धारयति कीदृशं ? वलितानि अविरतं गलितानि नयनयोर्जलानि धारयतीति तत्। कमिव ? विधुमिव। कीदृशं विधुं ? करालस्य राहोर्दन्तस्य चर्वणेन गलितामृतधारा यस्यतम्।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। तथा कृतातिक्रूरव्रतवैफल्येन विगलितधैर्या भवतीत्याह; वहति च। कुसुमशयनीयमधिशयाना एव सा विगलितं विशेषेण गलितं निरन्तराविच्छिन्नधारारूपेण पतितमित्यर्थ:। ईदृशं यल्लोचनयोर्जलं तस्य धरं, आननकमलं मुखपद्मं वहति धारयति, कीदृशं, तथाभूताश्रुपीडितमप्युदारमुत्कृष्टं दर्शनीयमित्यर्थ:। किमिव, विकट: करालो यो विधुन्तुदो राहुस्तस्य दन्तदलनेन दशनाघातेन गलिता नि:सृता अमृतधारा यस्मात् तादृशं, विधुमिव, पाण्डुतैकसारचन्द्रमण्डलमिव। एतेन माधुर्यमुक्तम्।

''तन्माधुर्यं भवेत् या तु सर्वावस्थासु चारुता'' इति लक्षणात् ।अभूतोपमया न चेदृशी दृष्टा श्रुता वा दशा इत्यत: परं किं भावीति न जानामि। अतो गमने विलम्ब: मा विधेय इति वस्तुध्वनि:।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। वहतीति; सा तव विरहेण मुखकमले जलपूर्णं लोतकपूर्णं च गलितं धारं क्रन्दितलोतकधारा इव पतति यथा चन्द्रस्य मुखात् राहोः दन्ताघातेनामृतधारा अधः गलति पतति वा ।।४।।

**५-विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।**
**प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ।। सा वि० ।।५।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।५ ।। सा राधा भवन्तं रहस्येकान्ते कुरङ्गमदेन कस्तूर्य्या विलखतीति वाक्यार्थः। कीदृशम् असमशरभूतं कामतुल्यं कामसदृशब्यवहारसुन्दरे प्रोक्तारमाह। मकरमधो विनिधायेति ''मकरो यादसां भेदे निधिराशिप्रभेदयोः'' इति **मेदिनी**। करे च शरं नवचूतमिति। विनिधायेत्यवगम्यते। नूतनाम्रकुसुमं करे शरमर्पयित्वेत्यर्थः। लिखित्वा किं करोतीत्याह। प्रणमतीति। भगवतोऽन्यः कामदेवो नास्तीति कृत्वा ''ननु बन्धूकपुष्पसदृशः खलु कामदेव इत्यस्त्यागमः। तत्कथं कुरङ्गमदेन विषदृशेन कामदेवलिखनमुच्यते।'' विरहावस्थायां मनस्थितचित्तता असूचनार्थं गैरिकादिना कामदेवलिखनं नोक्तम्।।५ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५ ।। अपि च, विलिखतीति। हे कृष्ण! सा मत्सखी रहसि एकान्ते कुरङ्गमदेन भवन्तं विलिखति। किंभूतं भवन्तम्? असमशरभूतं कुसुमशरतामापन्नम्। त्वामेव दुर्लभत्वात् वाहकत्वेन कुसुमशरोऽयमिति बुद्ध्या। किं कृत्वा विलिखति? करे नवचूतशरं विनिधाय। अत्र चूतपुष्पधारणेन पूजोपयुक्ता। अनन्तरं प्रणाम उचित एव। पीडाकरे कामे स्वरक्षार्थमर्चनप्रणामयोरपि युक्तत्वमेव। अयं च विरहिणीव्यापार उक्तः। तदुक्तं **भरतेन,** 'देवतापूजनं कुर्याद्दद्याद्बलिभुजे बलिम् । लिखेत्कान्तप्रतिकृतिं पाठयेच्छुकसारिकाः।। गणयेच्चावधिदिनं गीतं गायेत्तदङ्कितम्। एवंविधविनोदेन नयेत्कालं वियोगिनी'।। च पुनः अधः वाहनदेशे मकरं विनिधाय एवं साङ्गोपाङ्गकामरूपं भवन्तं विनिधाय मा दहेति प्रणमति। अत्र लिखित्वा प्रणमतीति वक्तव्ये विरहिणो हि कृत्याकृत्यज्ञा न भवन्तीति पौनःपुन्येन यत्र तत्र गच्छन्तीति द्योतनार्थम्। अत्रोपमालंकारः।।५ ।।

## (३) जगद्धरकृत-सारदीपिका

।।५।। विलिखतीति हे कृष्ण! सा राधा असमशरभूतं कन्दर्पस्वरूपं भवतं त्वां रहसि एकान्ते कुरङ्गमदेन मृगमदेन कस्तूरीकया विलखति अध: कामरूपस्य भवतोऽधस्तान्मकरं कामवाहनं विनिधाय कृत्वा करे हस्तेन वचनं नूतनाम्ररूपं शरं बाणं च विनिधाय संस्थाप्य प्रणमति पूजानन्तरं प्रणामो युज्य तव मकरस्य ध्वजत्वे प्रसिद्धेवाहनत्वेऽपि न दोष:।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। किंच, विलिखतीति ।रहस्येकान्ते कुरङ्गमदेन कस्तूर्या भवन्तं विलिखति। कीदृशम्? असमशरभूतं कामस्वरूपिणं तव करे नवचूतं शरं निधाय तवाध: आसनस्थाने मकरं निधाय धृत्वा प्रणमति। कुसुमशरो मकरवाहनस्त्वमेवासीत्यनेन 'चूतरूपपुष्पशरेण किमिति मां संतापयसि?' इति प्रणम्य त्वां याचत इति भाव:।। 'मृगनाभिर्मृगमद: कस्तूरीगन्धकेशरे' इति **हारावलि:**।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। विलिखतीति। हे माधव! सा राधिका रहसि एकान्ते अन्यथा परिहास: स्यादिति भाव:। अनेन तदेकायत्तचित्तता सूचिता। कुरङ्गमदेन कस्तूरिकया कृष्णकस्तूरिकयो: सावर्ण्यात् कुरङ्गमदेनेत्युक्तमवगन्तव्यम्। असमशररूपं शतकोटिकन्दर्पसमानतेजसं भूतमिति केषुचित् पाठ: तदाप्ययमेवार्थ:। वियोगदशायामुभयोरपि चित्तमोहकरत्वात् तथारूपणमित्यवगन्तव्यम्। एतादृशं भवन्तं त्वां अधो भूभागे विलिखति मकरं च लिखति केतकेन निर्मातीत्यर्थ:। अधो इत्युदयव्ययपक्षे भवन्तं लिखति, फलकादा-वितिशेष:। अथो अनन्तरं मकरं लिखतीत्यन्वय:। करेण नवचूतं नूतनसहकारकोरकरूपं शरं वाणीं च निधाय निक्षिप्य प्रणमति शरेण मां प्रहरति प्रणामं करोतीत्यर्थ:। लोकेऽपि हि वाधकं प्रति नमस्कारं सन्तुष्टत्वादितिभाव:।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। अपि किङ्करोतीत्यत आह। सा राधिका रहसि निभृतस्थाने कुरङ्गमदेन कस्तूरिकया असमशरभूतं कामदेवरूपं भवन्तं विलिखति। अध: पादतले मकरं विनिधाय च पुन: करे नवचूतं नूतनचूतांङ्कुरं शरं विनिधाय अतएवासमशरभूतं कामस्वरूपं निजरक्षार्थं प्रणमति। अनेन कान्तप्रतिकृतिलिखनेन देवताराधनादिविरहिणी-व्यापारो राधाया: दर्शित:। तदुक्तं भारते 'देवतानमनं कुर्याद्दद्याद्वलिभुजो बलिम्। लिखेत्कान्तप्रतिकृतिं पाव्येत् शुकसारिका:।। गणयेच्चावधिदिनं गीतं गायेत्तदङ्कित:।

एवम्विधनिनादेन नयेत्कालं वियोगिनी ।।' इति। तथा च पुष्पशरमकरवाहनमतः सकाशात् कृष्णस्य भेद इति दर्शयता तस्य सौन्दर्यातिशयों राधाया उत्कण्ठितातिशयश्च दर्शितः। 'मृगनाभिमृगमदी गन्धशेखर' इति **हारावली** ।।५ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५ ।। विलिखतीति। किञ्च हे कृष्ण! सा राधा रहस्येकान्ते कुरङ्गमदेन कस्तूर्या भवन्तं विलिखति। एतेनानुरागमालिन्यमुक्तम्। कीदृशम्? [१] असमशरभूतं कामरूपम्। किञ्च तव करे शरं धृत्वाऽधो मकरं मत्स्यं कन्दर्पवाहनं [२] विनिधाय [३] प्रणमति नमस्करोति। कीदृशम्? नवचूतं नूतनाम्राङ्कुरम्। तव पूजनं कृत्वा त्वामेव याचत इति भावः। यथा,

देवतापूजनं कुर्याद्दद्याद्बलिभुजे बलिम्।
लिखेत्कान्तप्रतिकृतिं पाठयेच्छुकशारिकाम्।। इति वचनम्।

[४] अथ वा कोप एव प्रणामः। श्रीकृष्ण एव प्रणामं करोत्विति [५] सम्प्रेरयतीति भावः। मृगनाभिर्मृगमदः [६] कस्तूरी गन्धशेखरः इति **हारावली** (२.३८९) ।।५ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५ ।। विलिखतीति। हे कृष्ण। सा राधा असमशरभूतं कन्दर्पस्वरूपं [७]भवन्तं[८]त्वां रहसि एकान्ते कुरङ्गमदेन कस्तूरिकया विलिखति। अधः कामरूपस्य भवतः [९] अधस्तात् मकरं कामवाहनं विनिधाय कृत्वा करे हस्ते नवचूतं नूतनाभ्ररूपं शरं बाणं च विधाय संस्थाप्य प्रणमति। पूजानन्तरं प्रणामो युज्यत एव। मकरस्य ध्वजत्वे प्रसिद्धेऽपि [१०] वाहनत्वेऽपि न दोषः ।।५ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५ ।। विलिखतीति। रहसि एकान्ते कुरङ्गमदेन कस्तूर्या असमशरभूतकामस्वरूपं भवन्तं विलिखति। चित्रलिखितत्वात्प्रति रूपकाधः प्रदेशे च मकरं मत्स्यं विनिधाय वाहनत्वेन लिखित्वा करे च नूतनरसालकुसुममञ्जरीशरं च निधाय प्रणमति। त्वामेव मन्मथजनकत्वान्मदनत्वेन उपासत इत्यर्थः एतेन विलेखनरूपानुभावः। अत्र कन्दर्पहतो : कृष्णस्य कन्दर्पस्य चैक्यवर्णनाद्धेतुहेतुमतोरैक्यम्। हेतुं केचित्प्रचक्षते इति लक्षणात् ।।५ ।।

१.नास्ति-अ.ब.इ.फ.ग.ह. २.निधाय-ग.विधाय-ग. ३.नास्ति-अ.ब.४.यद्वा-ग.५.तं प्रेरयतीति-इ.६.प्रोक्ता कस्तूतिका बुधैः-हारावली। ७.नास्ति-क.८,९.नास्ति-इ.१०.वाहनत्वे-ड.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। विलिखति। चित्ररूपेण विन्यस्यतीति वाक्यार्थः। किंविधम्? असमशरभूतमिति। असमाः पञ्चसंख्यकत्वात् असमा अविद्यमानसदृशा वा शराः यस्य तद्भूतं तत्सममिति कामदेवतुल्यत्वं नायकस्योक्तम्। ''भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिषूचिते। प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना'' इति **मेदिनी**। कामस्यादृश्यव्यवहारमाह, मकरमिति। जलजन्तुविशेषं वाहनरूपम् अधो विनिधाय तले लिखित्वेत्यर्थः, कामस्य मकरकेतुत्वात्। ''मकरः यादसाभेदे निधिराशिप्रभेदयोः'' इति **मेदिनी**। करे च नवचूतं शरं विनिधायेत्येव गम्यते। लिखित्वा किं करोतीत्याह - प्रणमतीति। प्रणामं करोति। भवतोऽन्यः कामदेवो नास्तीति निश्चित्य। ननु बन्धुकपुष्पसदृशं खलु कामदेवः इत्यस्त्यागमः। तत्कथं कुरङ्गमदेन विसदृशेन कामदेवलिखनमुच्यते। विरहावस्थायाम् अनवस्थितचित्ततासूचनार्थं गैरिकादिना कामदेवलिखनं नोक्तम्। किं वा कृष्णं व्यपदिश्य वदति भवन्तं लिखतीति। तद् यदि गैरिकादिना लिखनं स्यात् तदा भवन्तमिति वक्तुमयुक्तम्। किं तर्हि कामदेवः लिखतीति युज्यते।।५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। किं च कामरूपेण त्वामेवाराधयतीत्याह सा भवन्तमेकान्ते कस्तूर्य्या विलिखति। कीदृशं? कामतुल्यम्। कामांशसादृश्यमाहमकरमधो विनिधाय करे च नवाम्रमुकुलवाणं विनिधाय प्रणमति। त्वदन्यः कामो नास्तीतिकृत्वेतिभावः स्वचित्तोन्मादकत्वात्।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। किमिति एवं व्रतादिंना क्लिश्यामि, कन्दर्पस्याप्यत्र को दोषः मूलकारणं स एव । यद् वैमुख्यादेव ईदृशीं दशामनुभवामि ।अतः आराध्य तमेव प्रसादयामीति कामरूपेण त्वामाराधयतीत्याह; विलिखतीति । सा राधा सख्यो न पश्यन्तीति रहसि एकान्ते अनुकृतत्वदङ्गवर्णसौरभेण कुरङ्गमदेन कस्तुरिकारसेन असमशरभूतं भवन्तं निजवैषम्याचरणेन कन्दर्पात्तव भेदमपश्यन्ती तद्रूपेण त्वां विलिखति । लिखितुं अध्यवस्यन्ती त्वदङ्गमाधुरीस्मरणसञ्जातस्तम्भकम्पादिप्रतिबन्धकतया आत्मानं शोचन्ती कथमपि धैर्यमवलम्ब्य लिखतीति 'वि' उपसर्गेण सूच्यते ।कामस्वरूपं दर्शयति, अधश्चरणतले मकरं विनिधाय करे दक्षिणकरे च नवचूतं नूतनरसालमुकुलं विनिधाय वामकरे चापारोपणानन्तरमिति ज्ञेयम् ।प्रणमति नमस्करोति ।लिखति प्रणमतीति त्वत् सादृश्यानुकारिरेखादर्शनेन त्वत् सौन्दर्यस्मृतिसमुदितविस्मयान्विता त्वदङ्ग-

सौन्दर्यलेशेनापि मदनस्य पराजयं निश्चित्य कथमिव तादृशसौभाग्यैकनिधानं स्मरेण सदृशीकर्त्तुं प्रवृत्तास्मीति स्वापराधं क्षमयितुं प्रणामस्य पौनःपुन्यं बोधयति।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। विलिखतीति; भवन्तं असमशरः कन्दर्परूपमन्यमाना सा कस्तुरिकया तवरूपस्य लिखनं करोति। तदनुगुणं मकरस्य नक्रस्य चित्रं तथा च नूतन चूतस्य शायकरूपेणापि चित्रितं करोति। तदुक्त **भारते** "देवतानमनं कुर्याद्दद्याद्बलिभुजो बलिम्। लिखेत्कान्तप्रतिकृति पाठ्येत् शुकसारिकाः।। गणयेच्चावधिदिनं गीतं गायेत्तदङ्कितः। एवम्विधनिनादेन नयेत्कालं वियोगिनी।।" इति। यतो हि कन्दर्पस्य कुम्भीरवाहनस्तथा चूतादयः शराः सन्ति। राधा एतानि चित्रित्य कन्दर्पं नमस्करोति।।५।।

**६-प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम्।**
**त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ।। सा वि० ।।६।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।६।। हे माधवः! सा राधा तव चरणे पतिताहमिति प्रतिपदं निगदतीति वाक्यार्थः। न केवलं लिखति प्रणमति च। इत्येवं रूपोऽपि शब्दार्थः। कथं मम चरणे निपतितासीत्यादि त्वयि विमुखे इत्यादि।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। प्रतिपदमिति। हे माधव! सा मत्सखी प्रतिपदं प्रतिचरणन्यासं प्रतिस्थानं वा इदमेव निगदति। अत्रापिरेवार्थे। इदमिति किम्? अहं तव चरणे निपतिता। सपदि मयि विषये त्वयि विमुखे सति सुधानिधिरपि सुधानिधानमपि तनुदाहं शरीरदाहं तनुते। अथवा, सुधानिधिश्चन्द्रोऽप्यतनुदाहं स्मरतापं तनोति। अतनु यथा स्यादिति च। अत्रातिशयोक्तिरलंकारः।।६।।

## (३) जगद्धरकृत-सारदीपिका

।।६।। प्रतिपदमिति हे कृष्ण! सा राधा प्रतिपदं प्रतिक्षणम् इदमपि निगदति इदं किं हे माधव, हे कृष्ण, तव चरणे अहं पतिता किमित्यत आह। त्वयि विमुखे पराङ्मुखे सति मयि स पतित तत्क्षणं सुधानिधिरपिचन्द्रोपितनुदाहं शरीरपीडां तनुते विस्तारयति यतश्चन्द्रोप्येवं कुरुते अतस्तवचरणे पतिता।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। प्रतिपदमिति। प्रतिपदमितस्ततश्चलन्ती पदं पदं प्रतिपदं निगदति। हे माधव! तव चरणेऽहं पतिता त्वयि विमुखे विश्लिष्टे सति सुधानिधिरमृतनिधिश्चन्द्रोऽपि

तनुदाहं मच्छरीरसंतापं तनुते विस्तारयति । त्वं माया लक्ष्म्या धवः स्वामी। चन्द्रश्च समुद्रोत्पन्नत्वाल्लक्ष्म्याः सहोदर इति त्वयि निकटस्थिते सति सपत्न्यपि मे किमपि न कर्तुं शक्नोति। त्वयि प्रतिकूले च सति स्वभगिनीसापत्न्यं मयि स्मरन्सुधानिधिरपि मे तनुदाहं तनुते इति 'माधव'पदेन ध्वनितम्। सुधानिधेस्ताप-कारित्वं विरुद्धमिति विरोधनामायमलंकारः।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। प्रतिपदमिति। हे माधव! सा राधिका न केवलं प्रणमति इदं वक्ष्यमाणमपि प्रतिपदं प्रतिक्षणं निगदति वक्ति। उक्तप्रकारमेव अभिनयं दर्शयति माधवेति। हे माधव! राधाकर्तृक सम्बोधनमिदम्। अहं तव चरणे पतिता दण्डवन्निपतितास्मि प्रसीदेति शेषः अन्यथा त्वयि विमुखे पराङ्मुखे सति सपदीदानीमेव न तु कालान्तरे इति भावः अनेन कृष्णस्यालौकिक निग्रहानुग्रहसामर्थ्यं द्योतयति।

सुधानिधिः अमृतकरः चन्द्रोऽपि किमुतान्य इत्यर्थः। मयि विषये तनुदाहं शरीरतापं तनुते विस्तारयति। एवं प्रकारेण सा निगदतीत्यन्वयः। अत्र श्रीकृष्णस्य वैमुख्ये सति तापापनोदनसामर्थ्यस्यापि एकैकवस्तुनः तापकारित्वप्रतिपादनरूपवस्तुना तत्साम्मुख्ये सति सर्वस्यापि हिताचरणरुपवस्तुप्रतीते वस्तुना वस्तुध्वनिः। तेन श्रीकृष्णस्यालौकिकमहिमासम्पन्नत्वरूप वस्तु व्यज्यते इत्यनुरणितवस्तुध्वनि।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। अपि किङ्करोतीत्यह आह। हे माधव तव चरणेऽहं पतिता सा राधा इति प्रतिपदमपि प्रतिस्थानमपि निगदति वदति। मा लक्ष्मीः तस्याः धवः माधवः स्वामीति माधवपदोपन्यासेन कृष्णस्यौदास्ययोग्यता दर्शिता। यद्यहमुदासीनस्तदा कथमेवमस्माकमनुनयङ्करोतीत्याशंक्याह, त्वयि विमुखे पराङ्मुखे सति सपदि तत्क्षणमेव सुधाश्रयोऽपि चन्द्रः तनुदाहं शरीरदाहं तनोति विस्तारयति। अत्र स्वभावसन्तोषकसुधानिधिश्चेद्दहत्यन्येषां का वार्ता इत्यपिना द्योत्यते, तथा त्वयि विप्रतीपे सर्वमेवास्माकं सहसैव विप्रतीपं भवतीति अनयेत्येव भवदनुनयः क्रियत इति भावः। तदुक्तम्येन विना न जीविज्जि अनुनिज्जि अशोकआ ववाहोपि। पत्तिरिरेण सुवडा हेतु नकसुनवन्महे अग्नी।। पदं व्यवसिति त्राणस्थान लक्ष्म्याङ्घ्रिवस्तुष्विति।।६।।

*'अनाय इत्येव भवदनुनय इति क्रियत' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६।। किञ्च [२] उन्मादावस्थामेवाह, प्रतिपदमिति। सा प्रतिपदं [३] प्रतिचरण क्षणं क्षणं वा; इदं निगदति अतिशयेन विलपति। हे माधव मधुप्रिय! तव चरणेऽहं पतिता।

त्वामेव [४] नमस्करोमीति भावः। [५] किञ्च सुधानिधिश्चन्द्रोऽपि त्वयि विमुखे पराङ्मुखे सति [६] मयि सपदि शीघ्रं तनुदाहं शरीरतापं तनुते विस्तारयति। विरोधोऽलङ्कारः।।६।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६।। प्रतिपदमिति। हे कृष्ण! सा राधा प्रतिपदं प्रतिक्षणमिदमपि निगदति [७] वदति। हे माधव [८] कृष्ण, तव चरणेऽहं पतिता। [९]किमिदमितीत्यत आह, [१०] त्वयि विमुखे पराङ्मुखे सति मयि सपदि तत्क्षणं सुधानिधिरपि चन्द्रोऽपि तनुदाहं शरीरपीडां तनुते विस्तारयति। यतश्चन्द्रोऽप्येवं कुरुते अतस्तव चरणे पतिताऽहम्।[११] कायमनोभावेन शरणं प्राप्तेत्यर्थः। शरणागतस्य कदाचित्पीडा न भवतीति मत्वा [१२] ।।६।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। प्रार्थनामाह, प्रतिपदमिति। हे माधव! प्रतिपदं वचने वचने इदं अनुपदमेव वक्ष्यमाणं निगदति। तदेवाह, तव चरणे अहं पतिता। नमस्करोमीत्यर्थः। त्वयि कृष्णे विमुखे सति मयि विषये सुधानिधिः अमृतकरोऽपि तनुदाहं तनुते विस्तारयति। सुधाकरस्य दाहशामकत्वेऽपि त्वद्वैमुख्याद्विपरीतमाचरतीति विरूपकार्योत्पत्तिरूप-विषमालङ्कारः। त्वयि विमुखे इति पदार्थहेतुककाव्यलिङ्गमूलक इत्यनयोरङ्गाङ्गिभावेन सङ्करः।।६।।

१.पदमिदं ध्यानलयेन इत्यस्मात्पदात्पश्चात् दृश्यते मुद्रिते (नि.सा.)।२.उन्मादावस्थोक्त-मेवाह-ग.३.प्रतिचरणं क्षणं चेदं-इ.ग.प्रतिचरणं क्षणं वेदं-फ.ह.४.नमस्करोमीत्यर्थः-इ.फ.ग.ह.ज.५.किञ्चेति-अ.ब.इ.फ.ग.ह.ज.६.नास्ति-अ.ब.७-८.नास्ति-ड.९.किमित्यतआह-अ.म.किमितीत्यत आह-ल.१०.अहं त्वयि-ड.११.तः १२.पर्यन्तं नास्ति-ड.ल.म.

## (९) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। प्रतिपदमित्यादि। हे माधव! प्रतिपदं पदे पदे सा इदमपि निगदतीति वाक्यार्थः। न केवलं लिखति प्रणमति च इत्येवंरूपोऽपि शब्दार्थः। इदमिति किम्? माधवेत्यादि। हे माधव! तव चरणे पादमूले अहं पतिता भवामीति शेषः। कथं मच्चरणे निपतितासीत्याशङ्क्याह, त्वयीत्यादि। त्वयि विमुखे पराङ्मुखे सति सुधानिधिरपि अमृतनिधानं चन्द्रोऽपि सपदि तत्क्षणं तव पराङ्मुखसमकालमेव मम तनुदाहं तनुते प्रतिपादयतीति यावत्। अतो हेतोस्त्वां शरणमापन्नास्मीति भावः। अत्रायुक्तपदार्थेऽपि-शब्दः सुधानिधिस्तनुदाहं तनुत इत्ययुक्तं खल्वेतत्। ''अपि सम्भावनाप्रश्नशङ्कागर्हा-समुच्चये।। तथा युक्तपदार्थे च कामचारक्रियासु च।'' इति **मेदिनी**। ''सद्यः सपदि तत्क्षणम्'' **इत्यमरः**।।६।।

**(११) पूजारी गोस्वामीकृत-बालवोधिनी**

सा न केवलं प्रणमति, हे माधव! मधो:सखे! तव चरणेऽहं पतिता, इदमपि प्रतिक्षणं जल्पति। कथं मच्चरणे पतसि? त्वयि विमुखे सति तत्क्षणादेव अमृतनिधिश्चन्द्रोऽपि तनुदाहतनुते।।६।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।६।। एतदनन्तरकृत्यमाह; प्रतिपदमिति। सा प्रतिपदमनुक्षणमपि इदं निगदति नितरां निवेदयतीत्यर्थ:। इदमिति किम्। हे माधव! मत् प्राणनाथ श्रीकृष्ण। पक्षे कन्दर्पत्वेन सम्बोधनम्। हे मधो: सखे! अहं तव चरणे पतिताऽस्मि। किमर्थं मयि विषये त्वयि विमुखे पराङ्मुखे सति सपदि तत्क्षणादारभ्य न त्वन्यदेति भाव:। अतनुमनल्पमियदिति वक्तुमशक्यं दाहं सन्तापं तनुते, विस्तारयति प्रतिक्षणं विलक्षणतया आपादयतीत्यर्थ:। तनो: शरीरस्य दाहमिति वा। उक्तं च **श्रीहंसदूते,**

"प्रभो मुक्तापेक्षे व्रजति न हि को वा विमुखताम्" इति। अतो मयि प्रसीदेति भाव:। एवं स्वमुखेन साक्षान्निवेदनात् लज्जापरित्याग: सूचित:।।६।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।६।। प्रतिपदमिदमपीति; प्रतिपदविक्षेपणे सा ब्रूते हे कन्दर्परूपिमाधव तव पादौ अहं पतामि। त्वं यदि विमुखस्यात्तर्हि अहं चन्द्रस्यामृतवर्षामपि अग्निदहनवदनुभवामि।।६।।

**७-ध्यानलयेन पुर: परिकल्प्य भवन्तमतीव दुरापम्।**
**विलपति हसति विषीदति रोदिति वञ्चति चञ्चति तापम्।। सा वि०।।७।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।७।। ध्यानलयेन भवन्तं पुर: परिकल्प्य विलपत्येब मा बिद्धि योजना। "स्याच्चित्त-भावनाध्यानं मानसैकाग्रतालया:।" कथं ध्यानलयेन पुर: परिकल्पयति न पुन: साक्षात्कुरुत इति दुरापमिति विलपतीति। हे कृष्ण! जन्मान्तरे याभिस्त्वमारा- धितस्ता एव ते सुभगा: युक्ता:। न मया जन्मान्तरे त्वमाराधितस्तत्कथमत्रागतोऽसि परिदेवनं करोतीत्यर्थ:। "विलाप: परिदेवनमित्यमरे:।।" इसतीति किं परिदेवनेन कष्टादयं प्राप्तोनिर्भत्स्त्यमान पुनर्यास्यति श्रृङ्गाराप्रकाशकं हासं करोति। यदुक्तं, "हासो भवति श्रृङ्गारदिति विषीदतीति प्रत्यक्षगतो भवानालिङ्गनादिकं न करोतीति कृत्वा रोदतीति।

अनन्तरोक्तकरणात् सा प्रेमावलोकनमपि न कुरुते किन्तु क्रन्दतीत्यर्थ:। रोदनं हि नायकवशीकरणे परमो मन्त्र:। "रोदितमुदितमस्त्रं योषितां विग्रहेष्विति" **माघे**।

वञ्चतीति स्थानान्तरं गच्छति। निरनुक्रोशस्य नायकस्य पार्श्वे स्थिता किं प्रयोजनमितिकृत्वा मुञ्चति तापमिति चिरकालदर्शनात् सम्भाषणादिकं न कुरुते क्षणात् क्षीण तप: सर्वं करिष्यतीति कृत्वा किलकिञ्चितनामायं भाव:। यदुक्तं **नाट्यालोचने,**

लीला विलासो विच्छित्तिर्विभ्रमकिलकिञ्चितम्।
मोट्टायितं कुट्टमितं विब्वोको ललितं तथा।
विहृतिं चेति विज्ञेया दशस्त्रीणां स्वभावजा:।।इति

शुष्करुदितभयह्रासश्रममूर्च्छादु:खरोगाणां संकरकरणं किललिञ्चितं ज्ञेयम्।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, ध्यानलयेनेति। हे कृष्ण! सा मत्सखी भवन्तं विलिखति। किंविशिष्टं भवन्तम्? अतीव दुरापं दूतीप्रेषणादिना दुरापं दुर्लभम्। किं कृत्वा विलिखति? ध्यानलयेन ध्यानैकाग्रतया विषीदति। तन्न कुरुतां नाम; प्रेम्णा दृष्टिमपि न प्रयच्छतीति रोदिति। दृष्टायामपि नास्य संतोष इति चञ्चति स्थानात्स्थानान्तरं गच्छति। पुनरागत्य दृष्टश्चेत्स वश्यो भविष्यतीत्याशयेन तापं मुञ्चति इति ।अत्र दीपकमलंकार:।।७।।

## (३) जगद्धरकृत-सारदीपिका

।।७।। ध्यानेति हे कृष्ण! अतीवदुरापं दूतिद्वाराऽपि दुर्ल्लभवन्तं ध्यानलयेन चित्रैकाग्रविशेषेण पुरोऽग्रेपरिकल्पनां कृत्वामीयं स्नेहम् इदानीमपि न करोतीति विलापं करोतीति हसति तव दर्शनेन विषीदति हास्यानन्तरानर्थक्यात्। अतएव रोदिति चञ्चति स्थानान्तरं गच्छति स्थानान्तरे आलिङ्गनादिकं करिष्यतीति। अत एव तापं मुञ्चति मनस्तापं त्यजति।।७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। ध्यानेति। ध्यानं चिन्तनं तत्र यो लयस्तत्परत्वं तेनातीवातिशयेन दुरापं दु:खेन प्राप्यं भवन्तं पुरोऽग्रे परिकल्प्य सा राधा विलपति 'शठ! इयत्कालं याभि: सह क्रीडां कृतवानसि, तत्रैव गच्छ' इत्याद्युक्त्वा रोदिति। भाग्यवशादागतोऽप्यतिनिर्भर्त्सनात्को वेद पुनर्यातीत्यनुरागप्रकटनाय हसति। पश्चात्पुर:स्थितोऽप्ययं मामालिङ्गनादिना न संभावयतीति विषीदति विषादं प्राप्नोति। पुन: कथमयं वश्य: स्यादिति विचार्य रोदिति। यतो नायिकानां नायकस्य पुरतो रोदनं परमवशीकरणं जायत इति। तदुक्तम्- 'रुदितमुदितमस्त्रं योषितां विग्रहेषु' इति । पश्चाद्रोदने तदौदासीन्यमालक्ष्य गच्छन्तीं मामयमनुनेष्यतीत्यभिप्रायेण चञ्चति स्थानान्तरं गच्छति। पश्चाद्ध्यानेनैव तत्सङ्ग-परिकल्पनया तापं मुञ्चति। किलकिञ्चिताख्यो वाऽयं भाव:। तदुक्तं **दशरूपके,**(२/

३९) 'क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चिताम्' इति। इयमप्युन्मादाख्यावस्था। अलंकारश्चेह दीपकमिति। तदुक्तम् (**का.प्र.**१०/१०३),'सैव क्रियासु बह्वीषु कारकस्येति दीपकम्' इति। अस्यार्थः, बह्वीषु क्रियासु कारकस्य सैव सकृद्वृत्तिरेव दीपकमिति।।७।।

## (४) लक्ष्मणकृत-श्रुतिरञ्जनी

।।७।। ध्यानेति। हे माधव! सा राधा अतीव दुरापं योगिभिरप्यगस्यं भवन्तं त्वां ध्यानं नाम चित्तस्य विषयान्तरसञ्चारपरिहारेण एकस्मिन्नेव वस्तुनि स्थिरीकरणं तेन हेतुना लयः ध्येयवस्तुसमागमः तेन हेतुना पुरः अग्रभागे परिकलय असन्निहितमपि त्वां ध्यानेन सन्निहितं कृत्वेत्यर्थः। अथवा हे माधव! ध्यानेन भवचिन्तनेन लयः भवद्व्यतिरिक्तविषयान्तरस्य क्षयः तेन हेतुना भवनं पुरः परिकल्प्य पुरः परिकल्पनं च कृष्णस्य तस्मै बिरहनिमित्तविशुद्धविबिधचेष्टाबिज्ञापनार्थमित्यवगन्तव्यम्।

भवद्विरहवेदनाविभ्रान्तिवशात् विशुद्धाः चेष्टाः करोतीति शेषः। अतएवाह विलप तीत्यादि। हे माधव! सा राधिका विलपति भवद्विरहवेदनावशात्। श्रोतृणां कर्णशूलाय मानानि वाक्यानि वदतीत्यर्थः। विषीदति भवद्विरहवेदनावशादेव भूमौ परिषीदति चिन्तयतीत्यर्थः। पा घ्राध्मा इत्यादिना सदेः सीदादेशः। रोदिति विरहशोकात् सखीनां पुरः अश्रुजलं निषिञ्चतीत्यर्थः। रुदादिभ्यः सर्वधातुक इड़ागमः भ्रमति वेदना वशादेव इतस्ततः पर्य्यटतीत्यर्थः तापं क्षणमात्रं देहदाहं च मुञ्चति सुखावस्तितेवाभाती-त्यर्थः। अत्र विलपतीत्यादितुल्यधर्मैः प्रणयि वस्तुवियोगजात भ्रान्तिसमेतजनौपम्यस्य गम्यत्वाद्दीपकालङ्कारः,

प्रस्तुताप्रस्तुतानां च सामर्थ्यस्तुल्यधर्मतः।
औपम्यं गम्यते यत्र दीपकं तन्निगद्यते।। इति लक्षणात्।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। अपि किङ्करोतीत्यत आह। सा राधा भवन्तमतीव दुरापं अतीव दुर्लभम् अत एव ध्यानसंश्लेषेण ध्यानेन या एकचित्तता तया इत्यर्थः, पुरोऽग्रे परिकल्प्य उपस्थितं कृत्वा विलपति कथं त्वमप्यस्माकमेवंजात इत्यादिप्रकारेण विलापङ्करोतीत्यर्थः। तदनन्तरं हसति स एवायं कृष्णः सर्वगोपीर्विहाय मम पुरतः तुष्णीं तिष्ठतीति मद्भीत्या न किञ्चिदभिधत्त इति हासं करोतीत्यर्थः। तदनन्तरं विषीदति कथमेतावत्कालं मम सम्मुखे स्थित्वापि मदीयालिङ्गनचुम्बनार्थं न यतत इनि विषादं करोतीत्यर्थः। तदनन्तरं रोदिति आलिङ्गनचुम्बनाद्यर्थं यत्न मा करोतु सम्भाषणमपि न करोतीति रोदनं करोति।

तदनन्तरं चञ्चति दूरस्थितास्मीति यथोचितव्यवहारं न करोतीत्यभिप्रेत्य त्वदत्यन्तसमीपं गच्छतीत्यर्थः। तदनन्तरं तापं मुञ्चति मया चिरकालमियं विरहदुःखानुभावितेति लज्जितः माम्प्रति सम्भाषणादिकं न करोति कालान्तरेषु गतलज्ज सकलं ममाभिलाषं पूरयिष्यतीति सन्तापं त्यजतीत्यर्थः। वस्तुतस्तु निकटङ्गताविशेषदर्शनेन मोहमापन्ना पूर्वोत्पन्नं सन्तापं त्यजतीत्येवार्थः। अत्र विलपति हसतीत्यादिना किञ्चिद्भावो दर्शितः।।७।।

*'अनाय इत्येव भवदनुनय इति क्रियत' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। किञ्च, उन्मादावस्थामुक्त्वा किलिकिञ्चतेनाहध्यानेत्यादिना। ध्यानलयेन चिन्तनपरत्वेन भवन्तमतीव दुरापं अतिशयेन दुष्प्रापं [१] भवन्तं पुरोऽग्रो परिकल्प्य कृत्वा शोकेन विलपति प्रेम्णा हसति स्नेहाधिक्येन विषीदति रोदिति विरहेण चञ्चति गच्छति त्वदन्वेषणाय अनुरञ्जनेन तापं दुःखं मुञ्चति त्यजति। शोकरोषाश्रुहर्षादि [२] स्सङ्करः किलिकिञ्चितमिति। दीपकालङ्कारः।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। ध्यानेति[८६]। हे कृष्ण! अतीव दुरापं[३]दूतीद्वाराऽपि दुर्लभं भवन्तं ध्यानलयेन चित्तैकाग्र्येण पुरोऽग्रे परिकल्प्य कल्पनां कृत्वा मयि स्नेहमिदानीमपि न करोतीति [४] विलापं [५] करोति; हसति; भवदर्शनेन विषीदति हास्यानन्तरमानर्थक्यात्। अत एव रोदिति[६]चञ्चति स्थानान्तरं गच्छति स्थानान्तरे आलिङ्गनादिकं करिष्यतीति। अत एव तापं मुञ्चति मनस्तापं त्यजति।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। ध्यानलयेनेति। ध्यानलयेन अतीव अत्यन्तं दुरापं समये प्राप्तुमशक्यं भवन्तं माधवं ध्यानविषयैकतानतारूपं तेन लयः बहिरिन्द्रियव्यापारशून्यतया दृढीभावः। तेन पुरः स्वसमक्षं परिकल्प्य मनसा स्थापयित्वा विलपति तव चरणे पतिताऽहमित्यादिकं प्रलपति। श्रोतुर्निकटेऽभावात्। हसति सन्निहित इति हास्यं तनोति। विषीदति दुःखं विषादं प्राप्नोति। रोदिति रोदनं करोति। [७]चुम्बति भ्रान्त्या चुम्बनं करोति। अत एव तापं मुञ्चति हृष्यति। अत्र ध्रुवपदस्थसेति कारकस्यानेकतिङन्तान्वयेन दीपनात्कारकदीपकालङ्कारः। तेनानेकसञ्चारीभावाः गम्यन्त इति भावः।।७।।

१.नास्ति-इ.फ.ग.ह.ज. २.सङ्करः नास्ति-ग. ३.नास्ति-क. ४-५.नास्ति-ड. ६.चलति स्थानान्तरं आलिङ्ग नादिकं-ड.चञ्चति स्थानान्तरं आलिङ्ग नादिकं-ल.म. ७.चुम्बति मुञ्चति तापम् इति इ. पाठः

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। **ध्यानेत्यादि**। सा ध्यानलये निध्यानं मनसि परिचिन्तनं तस्य यो लयः संश्लेषः तेन वा लयः एकाग्रचित्तता तेन वा भवन्तं त्वां पुरः परिकल्प्य सम्मुखे स्थितं सङ्कल्प्य विलपतीत्यादि योजनास्याः चित्तभावना ध्यानं मानसैकाग्रता लयः। ''लयो विलासे संश्लेषे साम्ये तौर्यत्रिके च'' इति **मेदिनी**। कथं ध्यानलयेन पुरः परिकल्पयति, न पुनः साक्षात् कुरुत इति। अप्रत्यक्षतया अतीव दुरापम् अतितरां दुर्लभम्। अत एव ध्यानेन परिकल्पनम्। विलपतीति। हे कृष्ण! जन्मान्तरे याभिः समाराधितस्ता एव तव सुभगायुक्ताः। न मया जन्मान्तरे त्वमाराधितस्तत् कथमत्रागतोऽसीति परिदेवनं करोतीत्यर्थः। ''विलापः परिदेवनम्'' **इत्यमरः**। हसतीति। किं परिदेवनेन कष्टादयं प्राप्तो निर्भर्त्स्यममानः पुनर्यास्यतीति शृङ्गारप्रकाशनहासं करोति। यदुक्तम् - ''हासो भवति शृङ्गाराद्'' इति। किं वा हन्त मम सम्मुखमागतोऽसीति हर्षवशेन हासः। विषीदतीति। अहरहः पुरतः स्थित्वापि मामालिङ्गनादिकं न करोषीति कृत्वा। रोदितीति। अश्रूणि विमुञ्चति हा मयि त्वदधीनजीवितायां सप्रेमावलोकनमपि न कुरुष इति कृत्वा। रोदनं हि नायकवशीकरणे परमो मन्त्रः। ''रुदितमुदितमस्त्रं योषितां विग्रहेषु'' इति **माघे**। वञ्चतीति। स्थानान्तरं गच्छति। निरनुक्रोशस्य नायकस्य पार्श्वे स्थित्वा किं प्रयोजनमिति कृत्वा चिरकालदर्शनात् सम्भाषणादिकं न कुरुते। क्षणात् क्षीणत्रपः सर्वं करिष्यतीति कृत्वा। अथवा सम्मुखीनमिव भवन्तं दृष्ट्वा विरहवेदनां जहाति। विलपतीत्यादिना विप्रलम्भस्य व्यभिचारिभावाः कथिताः। अयं तु किलकिञ्चितनामा भावः। यदुक्तम्, ''लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्। मोट्टायितं कुट्टमितं विव्वोको ललितं तथा। विहृतं चेति विज्ञेया दश स्त्रीणां स्वभावजाः।'' इति। तत्र ''शुष्करुदितभयहासश्रममूर्च्छादुःखरोषाणाम्, सङ्करकरणं हर्षादशक्तं किलकिञ्चितं ज्ञेयम्'' इति।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। पुनश्चातिव्यग्रतया ध्यानलयेन भवन्तं साक्षादिव कृत्वा विलपति। कथं ध्यानलयेन पुरः पुरकल्पयति साक्षात् कथं न क्रियत इत्याह, दुरापम्, दूतीप्रेषणा-दिनापि अप्राप्यम्। त्वत्प्राप्त्यानन्दोच्छलिता हसति, पुनरन्तर्द्धाने विषीदति, रोदिति च, पुनः पुनः स्फुरन्तं अनुधावति, पुनः प्राप्तमित्यालिङ्गनादिना तापं मुंचति।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। लज्जापगमानन्तरावस्थामाह; ध्यानेति। हे माधव ! सा राधा अतीव दुरापं दूतीप्रेषणादिबहुयत्नेनापि दुष्प्रापं भवन्तं त्वां ध्यानलयेन, ध्यानं नाम विषयान्तरपरिहारेण

ध्येयवस्तुनि चित्तस्य स्थिरीकरणम्। तेन लय इष्टवस्तुमिलनं, तेन पुरः परिकल्प्य, अग्रे साक्षात्कृत्य विलपति, नाथ। चिरेण दृष्टोऽसि । कोपावेशेनातिदारुणत्वं कृतं मया पापिन्या, पुनरपि नेदृशं करोमि, इति विज्ञापयामि, कुरु मे प्रसादमिति सकरुणं वदति। ततस्त्वां मन्दमन्दमुपसर्पन्तं विभाव्य समागतः खलु मज्जीवातुरिति सञ्जातानन्दसन्दोहा हसति हासं करोति। ततः ससम्भ्रममासनं सन्त्यज्य अभ्युत्थानसमय एव तिरोहित मत्वा। अनन्तरं रोदिति। समागतश्चेत् विरहदुःखितां मां किञ्चिदपि असम्भाष्य किमिति गत इति क्रन्दति। ततो वञ्चति, पुनरागत्य आश्लिष्यन्तं विभाव्य वाम्येनापसरति। वनुर्गतौ प्रलम्भने च धातुः। चञ्चतीति पाठे स एवार्थः। ततस्तापं मुञ्चति। इदानीमेवासौ दुरवग्रहो वशीकृत इति विरहतापं त्यजति। क्षणं स्वस्थैव भवतीत्यर्थः, सर्वमेतद् विरहोन्मादचेष्टितमेवेति ज्ञेयम्।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। ध्यानलयेति, हे दूराप श्रीकृष्ण! त्वं न लब्धुं शक्तरित्येवं मन्यतेऽसै। अतः ध्यानेन लययोगेन च त्वं प्रत्यक्षतया वर्तसे इत्येवं चिन्तयित्वा सा तुभ्यं ध्यानेन लीनतां व्रजति। कदाचित् त्वं तस्मादन्तर्लीयसे इति मत्वा रोदिति। कदाचिच्च त्वं समीपे असि इति ज्ञात्वा हसति, विलपति, विषादेन क्रन्दति व्याकुलचित्तेन इतस्ततो भ्रमति अत्र अष्टसत्वविकारः कामिनः दशदशाश्च विवृणोति कविः।।७।।

**८-श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।**
**हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ।। सा वि० ।।८।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।८।। यद्यधिकम् अधिकमिति क्रियाविशेषणम्। मनसा नटनीयं तदेवं जयदेवेन भणितम्। हरिविरहाकुलवल्लवयुबतिसखीवचनं पठनीयमित्यर्थः। शेषमर्थं श्लोकेन सूचयति।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। श्रीजयदेवेति। हे वैष्णवाः! इदं श्रीजयदेवभणितं यदि मनसाधिकं नटनीयमभिनेतव्यम्। 'नट' शब्देनात्र नाट्यस्याभिनयप्राधान्यादभिनयो विवक्षितः। अथवा, नटनीयमित्यास्वादनीयम्, रसनीयमिति यावत्। 'नाट्यशब्दो रसे मुख्यः' इति **भरतीये**। किंभूतभिदम्? सखीमधिकृत्य वर्तमानम्। तर्हि हरिविरहाकुलबल्लव-युवत्या राधायाः वचनं पठनीयम्। जयदेवभणितिष्विदमेव सारमित्यर्थः

'प्रतिमण्ठकतालेन रागे देशाङ्कसंज्ञिते। पदात्तुर्याक्षरैर्युक्तः पदात्संगमतस्तथा।। आकारोपचितालापग मकाकुलविग्रहः। आभोगात्तेनकैः पाटैः प्रचुरैरतिपेशलः।। हरिवल्लभपूर्वोऽयमशोकपल्लवः स्मृतः।।' इति हरिवल्लभाशोकपल्लवनामाष्टमः प्रबन्धः।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीजयदेवेति श्रीजयदेवेन भणितं कथितं मनसा चित्तेन अधिकं सातिशयं यदि नटनीयं नृत्तयितव्यं तदा हरि विरहेण कृष्णवियोगेनाकुलायाः वल्लव युवत्याः राधायाः सखीवचं गीतरूपं पठनीयं श्रीजयदेवगीते-ष्विदमतिशयितव्यमितिभावः।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। जयदेवभणितं जयदेवकवित्वमतिशयितं यदि मनसा नटनीयं नर्तितव्यं तदा इदं हरिविरहेणाकुला व्याकुला या बल्लवयुवतिस्तस्या या सखी दूतीत्वेन प्रेषिता तस्या वचनं पठनीयम्। इयं विरहोत्कण्ठिता। नायिका। तल्लक्षणं तु प्रागेवोक्तम्।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। श्री जयदेवेति। हे जनाः हरेः श्रीकृष्णस्य विरहेणाकुलाधिकचिन्तिता या वल्लवयुवति सा राधिका तस्याः सखी तद्वचनरूपं श्रीजयदेवेन भणितमिदं समनन्तरमेव बर्णितगीतम् अधिकं यथा तथा मनसा यदि नटनीयम् अभ्यासार्हं यदिस्यात्तर्हि पठनीयम्। सर्वदा गेयमित्यर्थः।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। हे सामाजिकाः! श्रीजयदेवभणितं गीतं मनसा चित्तेन अधिकं यथा स्यादेवं नटनीयं नर्त्तनीयम् आदरणीयम्वा। तदाह हरिविरहेनाकुलाया वल्लवयुवत्या राधायाः सखीवचनमिदं पठनीयं भवद्भिरिति शेषः। तथा च यदि जयदेवभणनेन मनसा कुत्रापि नर्त्तनाभिलाष आदरो वा तदा प्रकृतगीतमनुसरणीयमित्येतद्गीतस्तुतिरिति भावः। 'नटनं स्यादादरेऽपि नृत्ये लास्ये च सम्मुख' इति **शाखतः**।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। गीतार्थं सङ्ग्रहेणाह, श्रीजयदेवेत्यादिना। श्रीजयदेवभणितं कथितमिदमधिक-मतिशयेन [१] यदि [२] यदा मनसा चित्तेन नटनीयं [३] तदा हरिविरहेण श्रीकृष्णविरहेण व्याकुला या वल्लवयुवतिः गोपयुवतिः श्रीराधा तत्सखीवचनं पठनीयम्। [४]गीतिरेव सर्वं विधास्यतीति भावः ।।९।।

[५] इति श्रीरामत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां अष्टमः प्रबन्धः ।।८ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८ ।। श्रीजयदेवेति। श्रीजयदेवेन भणितं [६] कथितमिदं गीतं मनसा [७]चित्तेनाधिकं सातिशयं यदि नटनीयं तदा हरिविरहेण कृष्णवियोगेन आकुलाकुलाया वल्लवयुवत्या राधायास्सखीवचनं गीतं [८] पठनीयम्। जयदेवगीतेषु इदमतिशयमिति भावः ।।८ ।।

[९]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां अष्टमः प्रबन्धः ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८ ।। श्रीजयदेवेति। श्रीजयदेवेन भणितं इदं हरेः विरहेण वियोगेन आकुला विह्वला वल्लवयुवतिः राधा तत्सख्याः वचनं अधिकं मनसा नटनीयं यदि चिन्तनीयं चेत् पठनीयं तदेति शेषः। बहुपाठानन्तरं तदर्थः भवतीति भावः ।।८ ।।

[१०]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामष्टमः प्रबन्धः।

१-२ .नास्ति-अ.ब. ३ .तदाह-अ.ब. ४ .गीतमेव-इ.फ.ग.ह.ज. ५ .नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. ६ .कथितं-ड. ७ .चिन्तनादिकं यदि नटनीयं नर्तयितव्यं तदा कृष्णवियोगेन-ड. ८ .तदेव पठनीयम्-ल.म.तत्पठनीयम्-क. ९ .नास्तीयं पुष्पिका-ड.क.ल.म. १० .नास्तीयं पुष्पिका-इ.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८ ।। श्रीजयेति। यदि अधिकं यथा स्यादेवं मनसा नटनीयं विनोदनीयं रसिकजनेनेति शेषः। तदेवं जयदेवेन भणितं हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयं गेयमित्यर्थः। हरिविरहो विच्छेदस्तेनाकुला चासौ वल्लवयुवतिश्चेति कर्मधारयः। तस्याः सखीवचनं कृष्णं प्रति दौत्येन वचनम् ।।८ ।।

## (१०) पूजारी गोस्वामीकृत-बालवोधिनी

।।८ ।। यदि मनसा नटनीयं नर्त्तयितव्यम्, तदा श्रीजयदेव-भणितमिदमधिकं यथा स्यात्तथा पठनीयम्। कुतः ? यतो हरिविरहाकुलायाः श्रीराधायाः सख्या वचनं यत्र तत् ।।८ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८ ।। अथ कविर्वर्णितस्य गीतस्य निजोक्तिमध्येऽपि आधिक्यं सूचयन् आस्वादकान् प्रति उपदिशति। श्रीति। हे भक्तजनाः! भवद्भिर्यदि श्रीजयदेवस्य भणितमधिकं यथा स्यात्तथा मनसा नटनीयम्, आवर्त्तनीयम्, अतिशयेन स्वादनीयमित्यर्थः तदा हरिविरहेणाकुलाया वल्लवयुवत्याः श्रीराधायाः सखीवचनरूपम् इदं गीतं पठनीयमभ्यसनीयम् ।।८ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्रीजयदेवेति; श्रीजयदेवेन कथितां कामपि कथां यन्मनसि नर्त्तनीयां कल्पनीयां वा तर्हि तदधिकं पठनीयम्। श्रीकृष्णविरहाकुलराधायाः वर्णना प्रियसखिना यत्कृता तन्मनसि वारम्बारं चिन्तनीयं कर्त्तुमीहते चेत् तच्छर्वं वारम्बारं पठनीयम् ।।८।।

**२५-आवासो विपिनायते प्रियसखीमालाऽपि जालायते**
**तापोऽपि श्वसितेन दावदहनज्वाला करालायते।**
**साऽपि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं**
**कन्दर्पोऽपि यमायते विरचयञ्शार्दूलविक्रीडितम्।।२५।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२५।। हे श्रीकृष्ण! सा राधिका त्वद्विरहेण हरिणीरूपायते इति योजना। हन्तेति विपादे ''हन्तहर्षेऽन्तकम्पायां वाक्यारम्भविषादयोरित्यमरः।'' हरिणी रूपायत इति मृगीरूप इवाचरतीति श्लेषोक्त्या पाण्डुवर्णापीत्यर्थः। कथं हरिणीरूपायत इत्याह। आवासो वसतिस्थानमरण्यायते सुरतचेष्टाराहित्येन दुःखजनकत्वात्। प्रियसखी मालापि जालायत इति दुःखेनात्मानं राधिकां व्यापादयिष्यतीति मत्वा सखीभिराबृत्तेत्यभिप्रायः स्वच्छन्दगमनप्रतिरोधात्। आनायः पुंसि जालं स्यात्।'' ''मालातु श्रेणिरावलिः। तापोऽपि श्वसितेन तथा सन्तपति यथा वातेन बनाग्नेरुल्का निर्गच्छन्तीत्यर्थः।'' ''दवौ दावौ वनारण्य वर्हजन्महरौभवावित्यमरः।'' श्वसितेन यस्ताप इति वा, हा कथं कन्दर्पोऽपि यमायते। विरचयन् शार्द्दूलविक्रीडितमिति हेति विषादे। ''हाविषादशुचार्त्तिषु'' **इत्यमरः**। कथमिति महदेतदनुचितं प्राणास्तु चेष्टादिनेत्यभिप्रायः। पदेनानेन हरिणा इव राधायाः प्रिये दृढानुरागो दर्शितः। कृष्णे च पशुत्वं सस्नेहायां राधायां विस्नेहब्यवसायकत्वात्। वृत्तं चास्य शार्द्दूलविक्रीड़ितम्। ''सूर्य्याश्वैर्मसज स्तताः सगुरवः शार्द्दूलविक्रीड़ितम्।।२५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२५।। किं बहुना, इदानीं मत्सख्यास्त्वदृते त्वयि विपरीते सर्वमेव विपरीतमित्याह, आवास इति। 'हन्त' इनि खेदे। हे माधव! सा मत्सखी त्वद्विरहेण हरिणीरूपायते मृगीरूपसिवाचरति। स्वभावतो विरहेण पाण्डुवर्णो भवत्येवेति तथाविधं रूपमधिकृत्य हरिणीरूपेणोपमीयत इत्युक्तम्। कथमिति प्रश्ने हरिणीविशेषणेनाह, आवासो विपिनायते। हरिण्यः किल वने वसन्ति, तस्या मे सख्या आवासो विपिनायते ।अत्र

'आवास' शब्देन निलय उच्यते। प्रियसखीनां माला श्रेणिः जालायते; इतस्ततो गमनाय तद्रोधकत्वात् । अथवा, प्रियसखीदत्ता मालापि जालायते। हरिणीवन्धनार्थं जालं क्षिप्यते तद्वदाचरति। अपि च, तापोऽपि देहतापोऽपि श्वसितेन निःश्वसितेन दावाग्निज्वाला-वलीवाचरति। एवं तस्या हरिणीत्वं निरूप्य खेदमभिनयन्त्याह, 'हा' इति कष्टे। सा मत्सखी कथं वर्तते ? यतः कामोऽपि शार्दूलविक्रीडितं विरचयन् यमायते यम इवाचरति। शार्दूलः किल हरिणीं हन्तीत्युक्तिः। अत्र च हरिणीवन्मत्सख्यास्त्वयि दृढानुरागोऽस्ति। निःस्नेहे स्नहेवत्तया पशुरूपत्वेन हरिणीरूपमौचितीमावहति। निःस्नेहेऽस्नेहवति सैवेत्यवधारणार्थः। वृत्तमपि शार्दूलविक्रीडितम्। अत्र लुप्तोपमा। विरोधा-भासश्चालंकारः।।२५।।

## (३) जगद्धरकृत-सारदीपिका

।।२५।। गीतोक्तमर्थं श्लोकेनाह आवास इति। हे कृष्ण! हन्तेति खेदानुकारे सा राधापि त्वद्विरहेण भवद्वियोगेन हरिणीरूपायते मृगीरूपमिवाचरति। कथमित्यत आह। आवासः गृहं विपिनायते वनमिवाचरतीति। त्वद्विरहात् प्रियसखीमालापिसखीसमूहोऽपि स्वेच्छागमननिवारकतया जालायते जालमिवाचरति तापोऽपि देहदाहोपि श्वसितेन श्वासोछ्वासेन दावदहनज्वालाकलापायते अरण्यवन्हिवालापरम्परेवाचरति । कन्दार्पेऽपि कथं यमायते यम इवाचरति हा शब्दः स्वात्मनो दुःखाधिक्यसूचनार्थः कीदृशः कन्दर्पः शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् मृगीमरणशार्दूलादेव भवति।।२५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२५।। सा त्वां विना कुत्रापि न निर्वृन्तिं लभत इत्यत आह, आवास इति। तस्यास्त्वद्विरहेणावासो मन्दिरं विपिनायतेऽरण्यमिवाचरति। प्रियसखीनां माला पंक्तिरपि जालायते आनायवदाचरति। यदा त्वद्विश्लेषदुःखासहिष्णुतया जीवितमपि त्यक्तुं प्रवृत्ताभवति तदा सखीभिर्निवार्यत इति स्यच्छन्दव्यवहारप्रतिबन्धकतया जालवदा-चरतीति भावः। अथ तापो विरहजनितस्तापो निःश्वसितेन निःश्वासेन दावदहनज्वालाया दावाग्निशिखाया यः कलापः समूहः स इवाचरति। अपरोऽपि दावाग्निर्वायुना प्रचण्डो भवतीति ध्वनिः। सापि हरिणीरूपायते हरिणीरूपायते हरिणीवदाचरति। हा कष्टम्। कथम् ? कन्दर्पोऽपि कामोऽपि परानन्दजनकोऽपि त्वद्विरहे यमायते कृतान्त इवाचरति। किं कुर्वन् ? शार्दूलस्य व्याघ्रस्य विक्रीडितं क्रीडां कुर्वन्। यथा हरिणी समन्ततः प्रदीप्तदावाग्निज्वालयोद्विग्ना व्याघ्रेण त्रासिता अग्रे व्याधंजालं विततं पश्यन्ती दशदिशं चकितं विलोकमाना क्वापि न निर्वृतिं लभते, तथेयमपि व्याघ्ररूपेण कामेन त्रासिता

सखीष्वावासेषु क्वापि निर्वृतिं न लभत इति भावः। अत्र शार्दूलविक्रीडितनामकं" छन्द इत्यपि ध्वनितम्। अत्र प्रथमपादे उद्वेगाख्यावस्था कथिता। तल्लक्षणं तूक्तं प्राक्। रोषे चाष्टमी व्याध्यवस्था कथिता। तदुक्तम्, 'अभिष्टसंगमाभावाद्व्याधिः संतापलक्षणः। अत्र संतापनिःश्वासौ शीतवस्तुनिषेवणम्।। नोत्तरं भाषते प्रश्ने नेक्षते न शृणोति च।।' इति। 'शार्दुलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च' इति विश्वः।।२५।।

**(५) लक्ष्मीधरकृत-श्रुतिरञ्जनी**

।।२५।। सखी प्रकारान्तरेणापि राधा विरहवेदनां कृष्णाय कथयति। हे श्रीकृष्ण! त्वद्विरहेण भवद्वियोगेन हेतुना तस्याः आवासः क्रीडागृहं विपिनायते अरण्यानी-वाचरति। "कर्त्तुःक्यङ् स लोपश्च" (३-१-११) इति क्यङ्। अकृत् सार्वधातुकयो (७-४-२५) रिति दीर्घः। एवं सर्वत्र प्रक्रिया। त्वद्विरहेण इत्यस्य सर्वत्रान्वयः अवगन्तव्यः।

किं च प्रियसखीनां माला समूहोऽपि अत्यन्तरङ्गताप्रकाशनार्थं प्रियग्रहणम् अथवा सर्वदा-आनुकूल्याचरणसूचनाद्वारा विरहस्य अतिदुःसहसूचनार्थं जालायते सर्वदिशो बन्धवागुरेवाचरन्ति। तथा तापः शरीरदाहोऽपि श्वसितेनोपोद्बोलकनिः-श्वासवातेन दाबदहनस्य बनहुताशनस्य तत्र दावशब्दो वनवह्निशब्दवाचकः वनवाचकश्च। यदा वनवह्निवाचकः तदा करीकलभवंशकरीरादिव द्रष्टव्यम्। पवन पक्षे तु सुगमम्। "वने च वनवह्नौ च दवदावौ प्रकीर्त्तिताविति।" ज्वालायाः करालः भयङ्करः दाबदहनश्चासौ ज्वालाकरालश्चेति स इवाचरतीति। तदनन्तरमाचार प्रत्ययः। अथ सा राधिकापि वनरूपवासाद्यनु-गुणसूचनार्थोऽपि शब्दः।यद्वा नानाविधश्रृङ्गारचेष्टो-पदेष्कृत्वहेतु गुरुकल्पस्य कामस्य शमनकर्माचरणमयुक्तमितिद्योतनार्थमपि-शब्दः।शार्द्दूलो नाम व्याघ्रः। "शर्द्दूलद्विपिनौ व्याघ्रे" **इत्यमरः** तस्य विक्रीड़ितं शार्द्दूलविहारकल्पशरप्रयोगमित्यर्थः। विरचयन् कुर्वन् यमायते यमकल्प व्याध इवाचरति। हा कष्टं मातृकल्पायां तस्यां राधायां कृष्णसुतप्रद्युम्नरूपकामस्य एतादृशकर्मानुचरणस्य अनुचितत्वं सूचयिता। हा कथमित्युक्तमवगन्तव्यम्। अत्र क्यङि अर्थादौपम्ये प्रतीतेरुपमाभेदः तदुक्तम्,

इवादिलोपे द्विबिधनाम क्वचिच्च क्यङि।
तथाणि समासे सप्तधैषा प्रकीर्त्तिता।। इति।।

एषु उपमेयार्थः। तथा च यथा लोके दयावता दूरवस्थामृगीमुच्यते तथेयं दुरवस्था शीघ्रं मुक्तव्या इति व्यज्यत इत्यलंकारेण वस्तुध्वनिः। शार्द्दूलविक्रीडितमित्यत्र अस्यापि

वृत्यस्य शार्दूलविक्रीड़ितत्वात् कवेश्चातु र्य्यमनुसन्धेयम्। "सूर्य्याश्वैर्मसजस्तताःसगुरवः शार्दूलविक्रीड़ितम्" इति लक्षणात्।।२५।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।२५।। भवत्वेवं विलम्बेन तस्याः समीहितं सम्पादयिष्यामीति कृष्णवचनमाशंक्य राधायाः कालक्षेपमुपदर्शयति। हन्त खेदे। हे कृष्ण त्वद्विरहेण भवद्विश्लेषेण तस्याः राधाया आवासो विपिनायते भवन्तम्विना शून्यतया अरण्यमिवाचरति। प्रियसखीमांलापि स्निग्धसखीश्रेण्यपि स्वच्छन्देत ततो गमनविघातकतया जालायते जालवदाचरति। तापोऽपि देहदाहोऽपि श्वसितेन दावदहनज्वालासमूहवदाचरति। अन्योऽपि वह्निः वायुना भवतीति युक्त्तैवोत्प्रेक्षा। साऽपि राधाऽपि अस्मिन्नवसरे हरिणीरूपायते मृगीरूपवदाचरति,यथा वने जलेन दावानलेन च वेष्टिता मृगी व्याकुला भवतीति तद्वदित्यर्थः। हा कष्टे। कथं सम्भ्रमे। कन्दर्पोऽपि कामोऽपि शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् यमायते मृत्युरिवाचरति ताम्प्रतीत्यर्थात्। तथा च यदि तदनुकूलमाचरति तदा सा जीवति न परञ्चेति भावः। अत्रैवम्विधे कठिने त्वयि तथाविधस्नेहवती राधेति हरिणीरूपायत इत्यनेन तस्याः पशुत्वमुपदर्शितम्। शार्दूलविक्रीडित''मेव छन्दो नाम इत्यापि छलेनोपदर्शितम्। राधाया व्याध्यवस्था च दर्शिता। तथा च **भावलतायाम्,** 'सन्तापवेदनाप्रायो दीर्घश्वाससमाकुलः। तनुकृततनुव्याधिरष्टमो जायते ध्रुवमि'ति। 'जालमालयवृन्दयोरि'**त्यमरः**।।२५।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।२५।। एवं सा त्वां विना [१] कुत्रापि नानन्दं लभत इति प्रलपति, आवासेति। हे कृष्ण! त्वद्विरहेण आवासो [२] गृहं विपिनायते अरण्यमिवाचरति। किञ्च प्रियसखीमाला वल्लभ [३] सहचरीसमूहोऽपि जालव[४]द्बन्धनत्वेन प्रतीयते। तापोऽपि विरहोद्भवसन्तापोऽपि निःश्वसितेन श्वासेन दावदहनज्वालावलावाचरति। किञ्च[५]हन्तेति कष्टे; त्वद्विरहेण साऽपि हरिणीरूपायते [६] कामशार्दूलत्रस्ता मृगीवाचरति परिभ्रमति। [७]हा कष्टे। कथं वा कन्दर्पोऽपि[८]कामोऽपि यमायते त्वद्विरहेण कृतान्तवदाचरति। एतेन कामस्य सन्तापकर्तृत्वमुक्तम्। किं कुर्वन्? शार्दूलस्य व्याघ्रस्य विक्रीडितं [९] क्रीडां विरचयन् कुर्वन् मृगीमरणं व्याघ्रादेव भवति; तद्वदत्रापि। एतेनोद्वेगावस्था [१०] व्याध्यवस्था चोक्ता। तल्लक्षणम्,

अभीष्टसङ्गमाभावात् व्याधिस्सन्तापलक्षणः।[११] शार्दूलो राक्षसे व्याघ्रे पशुभेदे च।। इति **विश्वः** (१०५.११३) ।।२५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२५।। गीतोक्तमर्थं श्लोकेनाह- आवास इति। हे कृष्ण! हन्तेति खेदे; सा राधाऽपि त्वद्विरहेण[१२] भवद्वियोगेन हरिणीरूपायते मृगीरूपमिवाचरति। कथमित्यत आहआवासो गृहं विपिनायते वनमिवाचरति। त्वद्विरहा[१३]त्प्रियसखीसमूहोऽपि स्वेच्छागमननिवारकतया जालायते जालमिवा[१]चरति। तापोऽपि देहदाहोऽपि श्वसितेन श्वासोच्छ्वासेन दावदहनज्वालाकलापायते अरण्यवह्निज्वालापरम्परेवाचरति। कन्दर्पोऽपि कथं[२] यमायते यम इवाचरति। हाशब्दःस्वात्मनो दुःखाधिक्यसूचनार्थः कीदृशः कन्दर्पः? शार्दूलविक्रीडितं[८८] व्याघ्रचेष्टितं विरचयन्[३]कुर्वन् मृगीमरणं शार्दूलादेव[४]भवति ।।२५।।

१.नास्ति-ग.२.गृहमपि-फ.३.सहचरोऽपि-इ.४.बन्धनं प्रतीयते-अ.ब.५.हन्त कष्टम्-इ.ह.फ.ज. ६.कामशर्दूलविक्रीडितत्रस्ता-ग.७.हा कष्टम्-इ.फ.ग.ह.ज.८.नास्ति-ग.९.नास्ति-अ.ब.१०.नास्ति-ज.११.लाङ्गूलं मेहने पुच्छे शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितः ।। विश्वः । १२. नास्ति-ड.१३.सखीमूहोऽपि-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२५।।आवास इति।आवासः निवासगृहं विपिनायते शून्यवनमिवाचरति। प्रियसखी नर्मसहचरीतुल्या सम्भोगकाले साक्षित्वात्सखीत्वारोपः। स्रक् कुसुममालाऽपि जालायते रज्जुकृतवागुरायते। तापोऽपि विरहज्वरोऽपि श्वसितेन निःश्वासरूपवायुना सहायेन दावदहनस्य ज्वालानां शिखानां कलापायते समुदाय इवाचरति। साऽपि राधिकाऽपि हरिणीरूपायते मृगीस्वरूपेवाचरति। हन्तेति खेदे। कन्दर्पोऽपि शार्दूलविक्रीडितं व्याघ्रचरितं विरचयन् कुर्वन् यमायते अन्तक इवाचरति। हा कथं कष्टं कथं जीविष्यति। अत्र क्यङ्ताः पञ्चलुप्तोपमाः। एतासां संसृष्ट्या दशम्यवस्थारूपं वस्तु व्यज्यते। अष्टपद्यामस्यामातुरस्याञ्च विरहोत्कण्ठिता नायिका। चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मनाः **(प्रता-ना-प्र. ४६)**। शार्दूलविक्रीडितेति वृत्तनामकथनात् मुद्रालङ्कारः। सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः इति तल्लक्षणात् **(चन्द्रा १३९)** ।।२५।।

१.आचरतीति-ड.२.नास्ति-ल.म.३.नास्ति-क.४.नास्ति-ड.भवतीत्यर्थः-क.ए

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२५।। **आवास** इति। हे कृष्ण! सापि मम सखी या त्वया पूर्वं गौराङ्गी अनुभूता इत्यपि शब्दार्थः। इदानीं त्वद्विरहेण हन्त विषादः। ''हन्त हर्षेऽनुकम्पायां

वाक्यारम्भविषादयोः" **इत्यमरः**। हरिणीरूपायत इति। हरिणी पाण्डुरूपा स्त्री तस्या रूपं स्वरूपं तदिवाचरति। यद्वा हरिणी पाण्डुवर्णा सती रूपायते पशुवदाचरति। विरहे पाण्डुता युक्तैवेति प्रकृतार्थः। "रूपं स्वभावसौन्दर्याकारेषु पशुशब्दयोः" इति **हट्टचन्द्रः**। "हरिणः स्यात्कुरङ्गेऽपि हरिणः पाण्डुरेऽन्यवत्। हरिणी हरितायां च चारुस्त्री वृत्तभेदयोः।।" इति **विश्वः**। श्लेषोक्त्या तु सापि त्वद्विरहेण हरिणीरूपायते मृगीरूपमिवाचरति। हरिणीशब्देन कृशत्वं त्रस्तत्वमपि व्यज्यते। यथा मृगी कृशगुणयुक्ता संत्रस्ता तथेत्यर्थः। अस्मिन् पक्षे या त्वया पूर्वं हृष्टपुष्टाङ्गी त्वत्सान्निध्यवशादकुतोभयाऽनुभूता सैवेत्यपिशब्दः व्याख्येयः। केन प्रकारेण हरिणीरूपायत इत्याह - आवासो विपिनायत इति। आवासो वसतिस्थानं तां प्रति अरण्यायते वनमिवाचरति सुरतचेष्टाराहित्येन दुःखजनकत्वात्। तथा प्रियसखीमालापि प्रीतिमुत्पादयन्तीनां सखीनां माला पङ्क्तिरपि जालायते जालमिवाचरति। हरिणीबन्धनाय वने जालं निक्षिप्यत इति भावः। दुःखेनात्मानं राधिका व्यापादयिष्यतीति मत्वा सखीभिरावृतेत्यभिप्रायः। स्वच्छन्दगमने प्रतिरोधात् तासां जालरूपत्वम्। "आनायः पुंसि जालं स्याद्" **इत्यमरः**। "माला तु श्रेणीरावलिः" इति। तथा तापोऽपि गात्रसन्तापोऽपि श्वसितेन निःश्वासेन दावो वनम्, तस्य दहनो वह्निस्तस्य ज्वाला शिखा तद्वत् करालायते भीषणायते, यथा वातेन वनाग्नेरुल्का निर्गच्छतीत्यर्थः। श्वसितेन यस्ताप इति वा। "दवो दावो वनाग्नौ च दवो दाहो वनेऽपि च" इति **कुमुदाकरः**। "करालो दन्तुरे तुङ्गे भीषणेऽप्यभिधेयवत्" इति **मेदिनी**। हा कथं कन्दर्पोऽपि यमायत इति। हा विषादे कथं कन्दर्पोऽपि यम इवाचरति। कृतान्तवन्मारको भवतीति भावः। सर्वसुन्दरीप्रणयकारित्वात् कं ब्रह्माणं दर्पं कारयतीति व्युत्पत्तेर्वा कन्दर्पस्य एतदनुचितं, प्राणान्तश्चेष्टनात्। किंकुर्वन् मारको भवतीत्यत आह , शार्दूलविक्रीडितमिति"। शार्दूलविक्रीडितं विरचयन् व्याघ्रस्य हरिणीहिंसा सुकरीभवति। यमोऽपि मूर्त्यन्तरेण प्राणिनो हन्ति। तद्वदयमपि व्याघ्रक्रीडां विरचयन् यमायत इत्यभिप्रायः। "हा विषादशुचार्तिषु" **इत्यमरः**। पद्येनानेन हरिण्या इव राधायां प्रिये दृढानुरागो दर्शितः। कृष्णे च पशुत्वं सस्नेहायां राधायां विस्नेहः व्यवसायकत्वात्। शार्दूलविक्रीडित-मित्यनेनास्य पदस्य शार्दूलविक्रीडितवृत्तत्वमपि सूचितम्। "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति ।।२५।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२५।। सा त्वां विना कुत्रापि निर्वृतिं न लभते इत्याह; आवास इति। हे श्रीकृष्ण! सा राधिका त्वद्विरहेण हन्त इति खेदे हरिणीरूपायते मृगीवाचरति श्लेषोक्त्या

पाण्डुरवर्णऽपीत्यर्थः। कथं हरिणीरूपायते इत्याह; वसतिस्थानम् अरण्यविवाचरति। प्रियसङ्गममन्तरेण दुःखजनकत्वात् प्रियसखीमालापि जालामिवाचरिति। कुत्रचिद्गमन-शङ्कया जलावद् वेष्टितत्वात्। गात्रसन्तापोऽपि निःश्वासेन तथा सन्तापयति यथा वातेनाग्नेरूल्का निर्दहन्तीत्यर्थः। हा इति विषादे। कन्दर्पोऽपि शार्दूलविक्रीडितं विरचयन् किमिति यम इवाचरति महदेतदनुचितं प्राणहरणचेष्टनादित्यभिप्रायः। यथा वने मृगी दाव ज्वालयोद्विग्ना व्याघ्रत्रासिता जालपतिता क्वापि निर्वृतिं न लभते तथेयमपीत्यर्थः। प्रत्येकेनानेन हरिण्या इव श्रीराधिकायाः प्रियदृढ़ानुरागो दर्शितः श्रीकृष्णस्य च काठिन्यं स्निग्धायामस्नेह व्यवसायात् ।।२५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२५।। सा त्वां विना क्वापि निवृत्तिमलभमाना अशक्यप्रतिकारा दशां अनुभवतीत्याह, आवासेति। हे नाथ! या त्वत्कृतबहुप्रणयोपलालनवर्धितसौभाग्या राधा, साऽपि त्वद्विरहेण तव दूरन्तविप्रयोगेन हन्त खेदे, हरिणीरूपायते। हरिणीरूपमिवाचरति । क्षीणोपाया शोचनीयावस्थामाप्नोतीति भावः। तदनुरूपोपकरणान्याह; आवासेत्यादिना। आवासो विचित्रमणिनिर्मितगीतनृत्यादिविविधसुखसङ्कुलनिजनिवासो विपिनायते। कण्टक-शिलादिसंकीर्णभल्लूकादिनिनदादिभीषणारण्यमिव भवतीत्यर्थः। त्वद् विना दुःखजनकत्वात्। तथा प्रियसखीमालाऽपि समानवयोरूपालङ्कारनिः सीमसौन्दर्यादिहार्द-हृद्यसखीश्रेणिरपि जालायते। जालमिव आचरति। अत्यहिताचरणशङ्कया जालवत् त्वरितवेष्टनात् तथा तापोऽपि त्वत्प्रेमसौभाग्यप्रकाशकतया समुचितोदयः शान्त्ववादात्, आश्वासनैर्हिमजलघनसारमलयजाद्युपचारैः सम्भावितप्रशमो हृत्कायसम्भवसन्तापोऽपि श्वसितेन निरवधिनिःसृतबाधाद्योतकदीर्घोष्मनिःश्वाससमीरणेन दावदहनो वनवह्निस्तस्य ज्वाला प्रज्वलनं तद्वत् करालायते, भयङ्करो भवतीत्यर्थः। 'वने च वनवह्नौ च दवो दावो प्रकीर्त्तितः'' **इत्यमरः**। यथा प्रखरपवनात् प्रज्वलितः वनाग्निरशक्यप्रतिकारः समीपस्थानामपि दाहकः स्यात् तथायमपीति भावः। 'ज्वाला कलापायते' इति क्वचित् पाठः स्पष्टार्थः। तथा कन्दर्पोऽपि कामिनीजनविविधविलासकौशलदेशिकः कामदेवोऽपि 'हा' अतिकष्टं कथमिति महदन्याय्यं शार्द्दूलस्य व्याघ्रस्य विक्रीडितं क्रीडां विशेषेण रचयन् यमायते, यम इवाचरति। व्याघ्रो यथा हरिणीं गृह्णाति, विक्षिपति, विलोडयति, आजिघ्रति, अपसारयति, आसादयते, अनुमोदते, अयमपि तथा कुर्वन् यम इव अतिदारुणः प्राणहरो भवतीत्यर्थः । ईदृशीं दुःसहां तदीयावस्थां त्वमेव श्रोतुं समर्थः। तथाऽहमपि वक्तुम्। न त्वन्यो जन इति भावः। पूर्वं यथा दावानलादिभयात् बहुशः रक्षितवानसि, तथेदानीमपि मन्मथभयाद्रक्षेति वस्तुध्वनिः।।२५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२५।। आवासो विपिनायतोति; श्रीराधा त्वद् विहरेण वाचालवत् भवति। हरिणीवदाचरति सा। वासस्थानं वनवदनुभूयते तया। तद्वद् श्रद्धासुमनगुम्फिता प्रियसखिभिः मालापि जालवज्ज्वाला इवानुभूयते। यतो हि जालबद्धा हरणीयं स्वस्य बन्धनार्थं जालवद् विचिन्त्यते। अतः कुत्रचित् स्वछन्दगमनं निषिध्यते। त्वद् विरहातुरात्मानं हरिणीति मत्वा त्वामन्विष्य कुत्र गमिष्यतीति वयं तस्याः वेष्टनं कुर्मः। स्वस्याः श्वासं तापितमस्ति यत् तद् वनाग्निवद् मन्यते तया। पुनश्च कन्दर्पः यमवत् आचरणं कृत्वा हरिणीं व्याघ्रः क्रीडया आक्रान्तं करोति इति महती भीतिरनुभूयते।।२५।।

।। नवमः प्रबन्धः/गीतम् ९ ।।

।। देशाख्यरागैकतालीतालाभ्यां गीयते।।

**१-स्तनविनिहितमपि हारमुदारम्।**
**सा मनुते कृशतनुरतिभारम्।।**
**राधिका विरहे तव केशव ।। ध्रुवम् ।।१ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।१ ।। हे हरे! हे केशव! तव विरहे सा राधिका स्तनविनिहतमपि हारं भारं मनुतेति योजना। विरहे निष्फलत्वादनङ्गरसस्याभारं हारस्य भारत्वम्।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। इदानीं राधासखी स्वसखीविरहचेष्टितं देवे विनिवेदयति, पूर्वं ध्रुवपदं व्याक्रियते । राधिकेति। हे केशव! राधिका तव विरहे वर्तते। अनुकम्प्या राधा राधिका, तस्यां अनुकम्पां विधेहीत्यनुकम्पार्थेन द्योत्यते। इति ध्रुवः।। विरहे वर्तमाना राधा किं किं करोतीत्यपेक्षायां पदानामारम्भः। स्तनविनिहितमिति। हे केशव! सा कृशतनुः स्तनविनिहितमप्युदारं मनोहरं हारं भारमिव मनुते विरहाधिक्यात्कृशतनोर्हारोऽपि भारोपमो भवति।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। इदानीं सखीपुनरपिराधायादुःखचेष्टितं गीतेनाह स्तनेति। गीतस्यास्य देशाखरागः एकतालीतालः तल्लक्षणं आस्फोटनाविष्कृतरोमहर्षो नियुद्धसन्नद्धः विशालबाहुः हे केशव, कृष्ण, तव विरहे जाते सति सा राधा एवं चेष्टते। कीदृशमित्यत आह! कृशतनुः विरहेण कृशशरीरा सा स्तनविनिहितमपि स्तनयोस्थापितं उदरं बहुमूल्यहारमपि भारमिव मनुते।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। पुनरपि व्याधिरूपामष्टमीमवस्थां संप्राप्य तां च गीतेन कथयतिस्तनेति। गीतस्यास्य देशाखरागः। रूपकतालः। गीतार्थस्तु हे केशव! तव विरहे सा राधिका अनुकम्प्या राधा स्तनविनिहितमपि स्तनयोरुपरि हठात्सखीजनैर्धृतमप्युदारमुत्कृष्टं हारमतिभारं मनुते। तत्र हेतुगर्भं विशेषणमाह, कृशतनुरिति। कृशा तनुरङ्गं यस्याः सा।।१ ।।

## (५) लक्ष्मणकृत-श्रृतिरञ्जनी

।।१ ।। तस्य दुरवस्थामेव वर्णयति। स्तनेत्यादिना देशाख्यरागेण गीयत इत्युक्तं तस्यायमभिप्रायः। मित्रेष्पपि मित्राण्यपि रागोऽप्यस्तूतिसूचयितुं तथोक्तमित्येवमवगन्तव्यम्। रूपकतालेन गेयम्। तलक्षणं तु द्रुतं द्रुयर्द्धविरामान्तं रूपकं परिकीर्त्तितमिति। तत्र राधिकेत्यारभ्य केशवेत्यन्तं ध्रुवपदम्। हे केशव! कृशा विरहवेदनया दुर्वला तनुर्यस्याः सा। कृशा राधिका कृशतनुरिति विशेषणं वा त्वद्विरहे विश्लेषे सति स्तनविनिहितं कुचयोरलंकृतम् उदारमत्युन्नतमपि हारं मुक्ताहारं भारमिव मनुते बुध्यते भवच्चित्तानुरञ्जनैकप्रयोजनस्य हारधारणस्य भवत् विश्लेषणनैरर्थक्यं मन्यत इति भावः। उदारमपित्यत्रापि शब्दः। इतिरेषां तु भूषणानां धारणेऽशक्तिः कैमुतिकन्यायसिद्धेति सूचनार्थः ।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।।अस्य गीतस्य देशाख्यरागः। एकताली तालः। रागलक्षणम्, आस्फोटनाविष्कृतलोमहर्षो विषाणसन्नद्धविशालबाहुः। पाण्डुः कपोतद्युतिहेमगौडो देशाख्यरागः किल मन्दराजः।' एकतालीतालः। भूयोऽपि गीतेन राधायाः स्वरूपमाह सखी, हे केशव! सा राधा तव विरहे विश्लेषे स्तनविनिहितमपि पयोधरार्पितमपि हारम् उदारम् अतिशयितं भारं मनुते मन्यते। मनुरवबोधने। तथा चान्यत्र काचित् प्राग्धृततयाऽनभ्यासेन हारस्य भारवृद्धिर्भवितुमर्हतीति स्तनयोर्निरन्तरं धारणेऽपि तथा बृध्द्या अत्यन्तविह्वलता दर्शिता। कीदृशी ? अतिकृशतनुः त्वद्विरहेण तनुतरशरीरेत्यर्थः। जगद्धरादयस्तु सा कृशतनुः विरहक्षीणदेहा स्तनविनिहितं कुचयोरर्पितमुदारं महान्तं हारमपि अतिभारं मनुते जानातीति व्याचक्षते। तत्पक्षे हारस्योदारत्वविशेषणे प्रकृतानुपयोग इत्यवधेयम्।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

तदेव गीतेनाहस्तनेति। देशाख्यरागे एकतालीताले। रागलक्षणम्,

आस्फोटनाविष्कृतरोमहर्षो नियुद्धसम्बद्धविशाल [२]बाहुः।

प्रांशुः प्रचण्डद्युतिरिन्दुगौरो देशाखरागः [३] खलु मल्लमूर्तिः ।। इति।।

ताल [४]लक्षणमुक्तमेव। ध्रुवपदम्। हे केशव! सा [५] राधा तव विरहे सति कृशतनुरिति हेतोः स्तनविनिहितं [६] कुचधृतमपि उदारं मनोहरं सुन्दरमपि त्वया दत्तमपि हारं भारं मनुते [७] भारसदृशं मनुते [८]। तद्धारणसमर्था त्वया कर्तव्येति भावः।।१ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

इदानीं सखी पुनरपि राधायाः [९] दुःखचेष्टितं गीतेनाह, स्तनेति। [१०]

देशाखरागस्तल्लक्षणम्,

आस्फोटनाविष्कृतरोमहर्षो नियुद्धसन्नद्धविशालबाहुः।

प्रांशुः प्रचण्डद्युतिरिन्दुगौरो देशाखरागः [११]किल [१२]मल्लमूर्तिः ।।

हे केशव कृष्ण! तव विरहे जाते सति राधिका एवं चेष्टते। कीदृशमित्यत आह, कृशतनुः विरहकृशशरीरा [१] सा राधा स्तनविनिहितमपि स्तनयोः [२]स्थापितमुदारं बहुमूल्यं हारमपि [३] मुक्ताहारमपि भारमिव मनुते।।१ ।।

१.देशाकरागेण यतितालेन-इ.२.चारुः-इ.३.किल-इ.फ.ग.ह.ज.४.लक्षणं पूर्ववत्-ग.५.राधिका-इ.फ.ग.ह.ज.६.स्तनधृतमपि-इ.फ.ग.ह.ज.७.तः८.पर्यन्तं नास्ति-इ.फ.ग.ह.ज.९.दुःखिताचेष्टितं-ल.म.१०.देशाक-ड.देशाङ्क-क.११.नास्ति-ड.१२.खिल्लमूर्तिः-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। पुनरपि सखीवचनमेव देशाखरागेण यतितालेन गीयते। स्तनेति। स्तनयोर्विनिहितं पिनद्धं उदारं अमौल्यं हारमपि मुक्ताहारस्त्रजमपि कृशतनुरिव क्षीणेव भारं मनुते जानाति। अतिभारमिति पाठः साधुः। अत्र कृशतनोर्हारासहनं युक्तमिति। ध्रुवाया व्याख्यानम्। हे केशव तव विरहे राधिका।।१ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। देशाख्यरागेण गीयत इति। देशाख्यरागस्य लक्षणं यथा,''आस्फोटनाविष्कृतलोमहर्षो निबद्धसन्नाहविशालबाहुः। प्रांशुप्रचण्डद्युतिरिन्दुगौरो देशाख्यरागः किल मल्लराजः।।'' इति। गीतेनानेन राधाया अष्टमावस्था प्रतिपाद्या। तस्या लक्षणम्, ''सन्तापवेदनाप्रायो दीर्घश्वाससमाकुलः। तनुदेहोऽतनुव्याधिरष्टमो जायते यथा।।'' इति। स्तनेति। हे केशव! तव विरहे सा राधिका इति सर्वत्र योज्यम्। स्तनविनिहितं कुचयोरर्पितं

हारमपि उदारं महान्तं भारमिव मनुते बुध्यत इति योजना। अनङ्गरसावहस्य हारादेर्विरहे निष्फलत्वात् हारस्य भारत्वम्। किंविधा ? कृशतनुरिति। क्षीणदेहा तव विरहेणेत्यर्थात्। कृशतनुतापि हारवहनाशक्तत्वे हेतुः। अत्र हारभारपदयोरुपमानोपमेयभावः वाक्ययोर्वा। तथाहि, सा राधिका हारमप्युदारं महान्तं मनुत इत्युपमेयवाक्यम्। कृशतनुर्जनो भारमिवेत्युपमानवाक्यम्। अनयोरवान्तरवाक्ययोर्मेलकं महावाक्यं भवति।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। पुनस्तेचष्टामेव विशेषतया आह; स्तनेत्यादिना। गीतस्यास्य देशाख्यरागः। यथा, 'आस्फोटनाविष्कृतलोमहर्षो निबन्धसन्नाहविशालवाहुः। प्रांशुः प्रचण्डद्युतिरिन्दुगौरो देशाख्यरागः किल मल्लमूर्त्तिः।' इति। तालश्चैकताली। हे केशवः सा राधा तव विरहे स्तन विनिहित हारमपिभारं मनुते। तथेयं कृशाभूद् यथा हारवहनसामर्थमपि नास्तीत्यर्थः। कीदृशं ? उदारं मनोहरम् ।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

पुनस्तस्या विरहावस्थां विशेषेण वर्णयति, स्तनेत्यादिना गीतेन। देशाख्यरागेण गीयत इत्युक्तम्। अस्य रूपम्,

तत्र प्रथमं तस्या विरहदौर्बल्यमाह, स्तनेति। हे केशव! केशमाधुर्येण विमोहित-राधाहृदय श्रीकृष्ण! सा त्वत्प्रेमैकपरायणा राधिका तव प्रणयभङ्गदुःखानभिज्ञस्य विरहे विविधवाधाविधायिजीवनसन्दोहापादके विप्रयोगे कृशतनुः प्रतिपच्चन्द्रलेखेव क्षीणा सती स्तनविनिहितमपि हारं भारमिव मनुते। न युक्तेदानीं ते भूषणरिक्ततेति सखीभिराग्रहेण वलयाद्यपेक्षया लघुभारं मुक्ताहारं त्वदुपहततया अतिस्पृहणीयं स्तनोपरि विन्यस्तमात्रं न तु प्राप्तकण्ठदेशं चिरमूढगुरुभारमिव मन्यमाना तूर्णमपसारयेति लपन्ती मूर्च्छितेव ललिता सखीजनान् आकुलयतीति भावः।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। स्तनविनिहितेऽपि; हे केशव! माधव! राधिका तव विरहे कृशतनुतया स्तनोपरि हारमपि अतिशयभारमिव मनुते सा तत्र देशाख्यरागः तदयथा,

''अस्फोटनाविष्कृतरो- महर्षो निबद्धसन्नाहविशालबाहुः।
प्रांशुः प्रचण्डद्युतिरिन्दुगौरः देशाख्यरागः किल मल्लराजः।। इति।।१ ।।

**२-सरसमसृणमपि मलयजपङ्कम्**
**पश्यति विषमिव वपुषि सशङ्कम्।। राधिका० ।।२ ।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२ ।। मसृण स्निग्धचन्दनपङ्कं वपुषि सशङ्कं यथा स्यादेवं विषमिव पश्यतीत्यर्थः। ''चिक्कणं मसृणं स्निग्धमित्यमरः'' ।।२ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२ ।। अपि च, सरसेति। सा मत्सखी वपुषि वर्तमानं मलयजपङ्कं सशङ्कं यथा स्यात्तथा विषमिव पश्यति। किंविधम्? सरसमसृणमपि सरसं च तन्मसृणं च सरसमसृणं द्रवरूपात्स्निग्धकोमलमपि।।२ ।।

### (३) जगद्धरकृत- सारदीपिका

।।२ ।। सरसमिति सा राधा सरसमसृणं सार्द्रचिक्कणं द्रवरूपमलयजपंकमपि-चन्दनलेपमपि वपुषि सशङ्कंविषमिवपश्यति तव विरहात्।।२ ।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।२ ।। किंच, सरसेति। मलयजपङ्कं चन्दनपङ्कं वपुषि देहे सशङ्कं शङ्कासहितं यथा स्यादेवं विषमिव पश्यति। कीदृशम्? सरसमसृणमपि, आर्द्रचिक्कणनपीत्यर्थः। 'पङ्कः कर्दमपापयोः' इति विश्वः। 'मसृणः कर्कशे स्निग्धे' इति **मेदिनी**।।२ ।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२ ।। सरसेति। हे केशव! तव विरहे सा राधा सरसः द्रवसहितः। ''श्रृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसे'' **इत्यमरः**। स चासौ मसृणः स्निग्धश्च अनेनातिग्राह्यत्वमुक्तम्। एतादृशमपि मलयजपङ्कः चन्दनरजः वपुषि शरीरे विषमिव कालकूटमिव सशङ्कं कदावा मारयिष्यतीति शङ्कासहितं यथा तथा पश्यति आलोचयति। तात्कालिक तापनिवर्त्त कमपि चन्दनं बिषमिव नेच्छतीत्यर्थः।।२ ।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।२ ।। अपि किङ्करोतीत्यत आहसा राधा सरसः सजलो मसृणः स्तिग्धश्चेति सरसमसृणः। एवम्भूतमपि मलयजपङ्कं चन्दनरूपकर्दम्। शीतलत्व-सुस्पृष्टत्वादिश्चिन्दनं पंकत्वेन निरूपितमित्यवधेयम्। वपुषि शरीरे विषमिव गरलमिव सशङ्कं यथा स्यादेवं पश्यति प्रेक्षते। 'पङ्कः पापे च कर्दम' **इत्यमरः**। 'शङ्का भीतौ च संशय' इति **धरणिः**।।२ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। विरहजनितव्याधिमाहम सरसेति। सा[४]मलयजपङ्कं चन्दनलेपं सरसमसृण मार्द्रमसृणमपि [६] कर्पूरसहितं वा देहे सशङ्कं शङ्कासहितं विषमिव[७]पश्यति[८]गरलमिव पश्यति[९]। एतेन जीविताऽप्यतिसाहसं करोतीति ध्वनिः। [१०]मसृणोऽकर्कशे स्निग्धे इति मेदिनीकारः(१५.७०)। पङ्कः कर्दमपापयोः इति विश्वः(३.४१)।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। सरसेति। सा राधा [११] सरसमसृणं[१२] सान्द्रचिक्कणं मलयजपङ्कमपि चन्दनलेपमपि वपुषि सशङ्कं विषमिव पश्यति तव विरहात्।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। सरसेति। सरसः आर्द्रश्चासौ मसृणः श्लक्ष्णः च तम्। मलयजपङ्कः श्रीगन्धः यक्षकर्दमाद्यङ्गरागः तम्। वपुषि सशङ्कं (स) सम्भ्रमं विषमिव पश्यति। सन्तापजनकत्वरूपधर्मलुप्तोपमा।।२।।

१.नास्ति-क. २.स्थितं-ड. ३.नास्ति-क. ४.नास्ति-अ.ब.इ.फ.ग.ह. ५.चिक्कणमपि-इ.फ.ग.ह.ज. ६.कर्पूरादिसहितं-इ.फ.ग.ह.ज. ७.नास्ति-इ.फ.ग.ह.ज. ८.तः ९.पर्यन्तं नास्ति-अ.ब. १०.मसृणेऽकर्कशे-अ.ब. ११.नास्ति-ड.सान्द्रं चिक्कणं-ड.सार्धचन्दनं-ल. सार्द्रचन्दनं-म.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। सरसेत्यादि। सरसं सद्रवं च तत् मसृणं चिक्कणं चेति खोडखंजादिवत् समासः। सरसमसृणमपि मलयजपङ्कं चन्दनकर्दमं सशङ्कं यथा स्यादेवं वपुषि शरीरे विषमिव पश्यति। सरसमसृणत्वात् मलयजस्य पङ्कत्वारोपः। ''मसृणोऽकर्कशे स्निग्धे त्रिषु मायासु योषिति'' इति **मेदिनी**। सरसमसृणयोर्विरहे चन्दनस्य दाहजनकत्वेन विषसादृश्यम्।।२।।

## (११) पूजारी गोस्वामीकृत- बालबोधिनी

।।२।। न केवलं हारवहनासामर्थ्यमपि तु सरसमपि मसृणं चिक्कणमपि चन्दनपङ्कं वपुषि सशङ्कं यथा स्यात्तथा विषमिव पश्यति।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। अन्यत् किं कथयामि, चन्दनाद्युपचारोऽपि अपचारयतीत्याह; सरसेति । विरहतापोपशान्त्यै सखीजनसम्पादितं मलयजपङ्कं चन्दनानुलेपं सरसं द्रवसहितं मसृणं

सुस्निग्धमपि वपुषि गात्रे स्पर्शमात्रेण विषमिव सशङ्कं लब्धाधिकवेदनं यथा स्यात्तथा व्यथाव्यञ्जकदृष्ट्या पश्यति मात्रम् । न च किञ्चिदपि वक्तुं शक्नोतीति भावः।।२।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। सरसेति; चन्दनमार्द्रं तथा चिक्कणमपि शरीरे तस्याः अगद इव गरल इव अत्यन्तं भीतिप्रदं भवति। शरीरे मृष्टं चन्दनलेपं विषमिव भयातुरेण पश्यति सा।।२।।

**३-श्वसितपवनमनुपमपरिणाहम्।**
**मदनदहनमिव वहति सदाहम्।। राधिका० ।।३।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३।। दाहसहितं निःश्वासवातं कामग्निमिव दहतीत्युत्प्रेक्षा। सन्तप्तान्तःकरणानां निःश्वासोऽपि सन्तप्त एवेत्यभिप्रायः। अनुपमपरिणाहमिति। अनुपमः परिणाहो यस्य इति विशालमित्यर्थः। ''परिणाहो विशालतेत्यमरः।'' ।।३।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। अपि च, श्वसितेति। सा मत्सखी श्वसितपवनं मदनदहनमिव कामाग्निमिव वहति। किंभूतम्? सदाहं दाहसहितम्। विरहेणान्तस्तापो विद्यते तेन सहितम्। किंभूतम्? अनुपमपरिणाहम्; निःश्वासानामतिदीर्घत्वात्।।३।।

### (३) जगद्धरकृत- सारदीपिका

।।३।। श्वतितेति सा राधा श्वसितपवनं निश्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति। वायोरपि दाहकत्वात् कीदृशं अनुपमः उपमारहितः परिणाहं विशालता यस्य तं अतिदीर्घं सदाहं उष्णत्वाद्दाहयुक्तम्।।३।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।३।। किंच, श्वसितेति। सा श्वसितपवनं श्वासवायुं वहति धारयति। कीदृशम्? अनुपमपरिणाहं उपमारहितः परिणाहो दैर्घ्यं यस्य तादृशम्। कमिव? मदनदहनमिव कामाग्निमिव। कीदृशम्? सदाहं दाहसहितम्। 'परिणाहो विशालता' **इत्यमरः**। एषा चला व्याध्यवस्था कथिता। तल्लक्षणं तु प्रागेवोक्तम् ।।३।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३।। श्वसितेति। हे केशव तव विरहे सा राधिका श्वसितपवनं निःश्वासवातम् अनुपमम्। आत्ममविस्तारं सर्वाङ्गीणमित्यर्थः। मदनदहनमिव हुताशनमिव सदाहसतापं यथा तथा वहति धत्ते। तव विरहे निरन्तररसजातनिःश्वासपरम्परा तु तिष्ठतीत्यर्थः।।३।।

## (५) शुक्लध्वजनृपतिकृतसारवती

।।३।। अपि किङ्करोत्य आह, अनुपमपरिणाहम् अतिशयिताभोगं सदाहं दाहसहितं श्वसितपवनं निःश्वासवातं सा वहति। कमिव ? मदनदहनमिव कामसम्बन्ध्यग्निमिव अतएवोपमानोपभेयाभावान्न सदाहमित्यत्रार्थ पुनरुक्तिः। 'आभोगे परिणाहः स्यादि'ति शाश्वतः।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। श्वसितेति। किञ्च सा तव विरहे श्वसितपवनं श्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति। विरहवायोरतिदाहकत्वात्। कीदृशम्? अनुपमपरिणाहं उपमारहितः परिणाहो दैर्घ्यं यत्र। (पुनः) कीदृशम्? सदाहं दाहसहितम्। पदद्वयेन दाहः श्वासाधिक्यं च सूचितम् ।।३।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। श्वसितेति। सा राधा श्वसितपवनं[६]निःश्वासवायुं मदनदहनमिव[११] कामाग्निमिव वहति धारयति। वायोरपि दाहकत्वात्। कीदृशम्? अनुपमः उपमारहितः परिणाहो विशालता यस्य; सदाहमुष्णत्वात् दाहयुक्तम्।।३।।

१.नास्ति-इ.फ.ग.ह.ज. २.नास्ति-अ.ब.इ.फ.ग.ह.ज. ३.कमिव-ग.४.दण्डमिव-ज.५.नयनपद्मैः-इ.फ.ग.ह.६.अल्पवायुं-ड.७-८.नास्ति-ड.१०.विकरति-ड.ल.म.११.गलितनालमिव-ड.गलितमिव-ल.दलितमिव-म.१२.नास्ति-ड.विगलितदण्डमिव पद्मं कमलम्-क. गलितदण्डमिव-ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। श्वसितेति। अनुपमः सादृश्यरहितः परिणाहः दीर्घतारूपः विस्तारो यस्य तम्। श्वसितपवनं निःश्वासवायुं मदनदहनमिव मन्मथानलमिव सदाहं उष्णतायुक्तं वहति। दीर्घमुष्णं श्वसितीति भावः। तेन चिन्ता व्यज्यते ।।३।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। श्वसितेत्यादि ।श्वसितपवनं मदनदहनं कामाग्निमिव वहति। **सदाहमिति**। दाहसहितम्। सन्तप्तोक्तं करणं यं निःश्वासोऽपि सन्तप्त एवेत्यभिप्रायः। किंविधम्? परिणाहमिति। असदृशः परिणाहो विशालता यस्येति विग्रहः। ''परिणाहो विशालता'' **इत्यमरः**। सदाहमिति क्रियाविशेषणं वा।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।। किंच दाहसहितं निश्वासपवनमपि कामाग्निमिव वहतीत्युत्प्रेक्षा। सन्तप्तायाः निःश्वासोऽपि सन्तप्त इत्यर्थः। कीदृशं ? उपमारहितं दैर्घ्यं यस्य तम् ।।३।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। एतदनन्तरावस्थामाह; श्वसितेति। अयि सरले! कथमेवं खिद्यमाना सखीजनं सन्तापयसि, समाश्वसिहि मुहूर्त्तमिति सखीगिरं निशम्य कथमेतासां परिहासपात्रतां याता जीवामीति निर्वेदसूचकमनुपमपरिणाहमतीवदीर्घमित्यर्थः। 'परिणाहो विशालता' **इत्यमरः**। सदाहं दाहं दाहसहितमत्युष्णमित्यर्थः। ईदृशं श्वसितपवनं निःश्वाससमीरणं मदनमदहनमिव वहति, धारयति। कामानलेनात्मानं दिधक्षुरिव इति भावः।।३।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। श्वशितमिति; सा यदा श्वासत्यागं करोति पुनः नयति तदानीं तत् पवनं कामज्वालया अनलस्य दाह इवानुभूयते।।३।।

**४-दिशि दिशि किरति सजलकणजालम्।**
**नयननलिनमिव विगलितनालम् ।। राधिका० ।।४।।**

### (१)नारायणदासकृत-सर्वाङ्गसुन्दरी

।।४।। नयननलिनं दिशिदिशि किरति विक्षिपतीत्यर्थः। किमिह जालकणिका-युक्तमित्याह। विगलितनालमिवेति। विच्छिन्ननालं हि पद्म सस्त्रवं भवतीत्यभिप्रायः। नयननलिनमित्यत्र कालभेदादुभयपदार्थ प्राधान्यं द्रष्टव्यम्। नयननलिनमिवेति गृहव्यापारादिसमासात्पूर्वपदार्थप्राधान्यम्। नलिनमेव नयनमिति विगृह्य मयूरव्यंसकादि-समासात् उत्तरपदप्राधान्यम्। अत्र पूर्वपदार्थप्राधान्ये सजलकणजालं, विशेषमुत्तरपदार्थ-प्राधान्ये विगलितनालमितीत्थं सर्वमनवद्यं यच्च किरतीत्यस्यानन्तरमिव शब्दे प्रष्टव्य इति **धृतिदासः**। प्राह तत् सम्यक्। किरतीवेत्यत्रैव शब्दमन्तरेणाव्यतीतः।।४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, दिशि दिशीति। सा राधा नयननलिनं दिशि दिशि किरति विक्षिपति। त्वद्दर्शनाकांङ्क्षयेति शेषः। सजलकणजालं जलकणसमूहेन सह वर्तमानम्। उत्प्रेक्षते, विगलितनालमिव विक्षिप्तं नयनं विनालेन नलिनेनोपमीयते। अथवाऽत्र उच्छूनत्वा-त्कज्जलरहितत्वाद्दीनत्वाच्च विनालेन कमलेनोपमीयते।।४।।

### (३) जगद्धरकृत- सारदीपिका

।।४।। दिशीति सा राधा सजलकणजालं अश्रुबिन्दु समूह सहितं नयन मेव नलिनं पद्म दिशि दिशि भवदृशं नयाञ्छया विकिरति क्षिपति। कीदृशमिव गलितदण्डमिव सर्वतः पश्यतीत्यर्थः।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। दिशि दिशीति। सा दिशि दिशि नयननलिनं नेत्रपद्मं किरति क्षिपति। कीदृशम्? विगलितनालं विगलितस्त्रुटितो नालो दण्डो यस्य। पुनः कीदृशम्? सजलकणजालं जलकणजालैरश्रुजलकणिकासमूहैः सहितम्। अत्र 'इव'शब्दो वाक्यालंकारे। अत्र नेत्रस्य नलिनत्वेन निरूपणात्स्तिमितत्वं बोध्यम्। तेन जडता नवम्यवस्था ध्वनिता। तदुक्तं रसार्णवसुधाकरे, यत्र ध्यायति निःशङ्कं जडता सा प्रकीर्तिता। अत्र स्पर्शानभिज्ञत्वं वैवर्ण्यं शिथिलाङ्गता।। अक्रीडाङ्गकृतिः स्तम्भनिःश्वासकृशतादयः।।' इति।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। दिशि दिशीति। हे केशव! सा राधिका विगलितं अपगतं नालं वृन्दाबन्धनं यस्य तत्तादृशम्। इदं तु दग्धीकरणसामञ्जस्यायोक्तमित्यवगन्तव्यम्। नयनपक्षे नालपदेन नयनसौष्ठवापादकशोभाविशेषो ग्राह्यः। एतादृशं नयननलिनं नेत्रपद्माख्यं कर्म जलकणा अश्रुबिन्दवः तेषां जालं समूहः तत्सहितं यथा तथा। दिशिदिशि प्रतिदिशं किरणवद्क्षिपतीव। नखाग्रैरश्रुविन्दुप्रक्षेपपूर्वकं त्वदागमनमार्ग दिशावलोकनं कुर्वतीव स्थितेत्यर्थः। सजलकणजालमित्येतन्नयनविशेषणं वा विगलित-नालमीत्येतत् पत्रावशेषद्योतनार्थं तथा च कमलस्य दग्धीकरणनयनोपमानत्वं समञ्जसं भवति। भवदागमनपर्य्यन्तं गलिताश्रुधारैवास्तु इति तात्पर्य्यार्थः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। अपि किङ्करोतीत्यत आह, सा राधिका दिशि दिशि सर्वासु दिक्ष् नयननलिनं नेत्रकमलं किरति[१२] क्षिपति। कीदृशम्? सजलकणजालं जलकणजालेन अश्रु विन्दुनिकरेण सह वर्तमानं तथा चाविरलाश्रुधाराया विरामे तव दर्शनवाञ्छया सर्वतः पश्यतीति वाक्यार्थः। अतएवानुरूपमत्प्रेक्षते, किमिव? नयननलिनं विगलितनालमिव। अन्यस्मादपि भ्रूकुटिलनालपद्माज्जलकणजालं गलतीति अश्रुधारारूपनालेन वर्द्धितजलकणजालान्वितं नयननलिनं विगलितनालत्वेन युक्तमुत्प्रेक्षितमित्य-वधेयम्।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। (दिशि दिशीति।) किञ्च, हे कृष्ण! सा नयननलिनं नेत्रपद्मं जलं वा दिशि दिशि [१]गत्वा त्वदागमनकाङ्क्षया किरति क्षिपति। कीदृशम्? [२]सजलकणजालं अश्रुसमूहैः सहितम्। पुनः[३]कीदृशम्? विगलितनालमिव[४]गलितदण्डमिव। तापबाहुल्या-

दश्रुसंशोषणाभावः सूचित इति। किञ्च भवदागमनेच्छया[५] नयनपद्माभ्यां दिङ्मण्डनं करोतीति भावः। विरोधालङ्कारः। उद्वेगावस्थेयम्।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। दिशि दिशीति। [७]सा[८]राधा सजलकणजालं अश्रुबिन्दुसमूहसहितं[९]नयननलिनं नेत्रपद्मं दिशि भवद्दर्शनवाञ्छाया[१०]किरति क्षिपति। कीदृशमिव ? [११]विललितनालमिव [१२]विगलितदण्डमिव।।४।।

## (८)कृष्ण पण्डडित-जयन्ती

।।४।। (दिशि दिशीति।) जलकणानां बिन्दूनां जालेन सहितं नयनमेव नलिनं कमलं विगलितं च्युतं नालमिव दिशि दिशि किरति। प्रतिदिशं त्वद्रूपविषयाभावान्निरालम्बनतया चक्षुर्भ्रमतीति गलितनालत्वधर्मोत्प्रेक्षा।।४।।

१.पदमिदं त्यजनि न पाणितले इति पदानन्तरं दृश्यते मुद्रिते(नि.सा.)। २.गणयति-ड.क.ल.म.३.विहुतहुताशविकल्पम्-इ.४.विहितसविकृताग्नि-अ.ब.५.दृष्टंस्पृष्टं च सद्वस्त्वपि शरीरे-इ.फ.ग.ह.ज.६.नास्ति-ड.७.नास्ति-ड.८.कृताग्नितर्को यत्र तादृशं-ड.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। दिशीत्यादि। सा दिशि दिशि प्रतिदिशं नयननलिनं किरति विक्षिपतीति योजना। कीदृशम्? सजलेत्यादि। जलस्य कणानां जालेन समूहेन सह वर्तमानम्। ''लवलेशकणाणवः'' **इत्यमरः**। उत्प्रेक्षते। विगलितनालमिव खण्डितनालमिव नालरहितमिति यावत्। विगलितनालं हि पद्मं सस्रवं भवति। नयननलिनमित्यत्र नयनमेव नलिनमिति मयूरव्यंसकादयश्चेति उत्तरपदप्रधानो रूपकसमास एव कार्यः। अस्य च समासस्य विगलितनालत्वमेव साधकम्। यदि नयननलिनमिवेति विगृह्य व्याघ्रादिसमासः क्रियते तदा पूर्वपदार्थप्राधान्येन विधेयाविमर्शदोषो दुर्निवारः। तथाहि, नयनं विगलितनालं नलिनमिवेति वक्तुं युक्तम्। स च नयनशब्दोऽत्र समासे गुणीभूतः। तस्मादुत्तरपदप्राधान्यमेव श्रेयः। ननु विगलितनालमित्यत्र इवशब्दमन्तरेणापि समीचीनार्थसङ्गतिः स्यात्। तत्कथमिवेत्यधिकं पदं विशेषतोऽस्थानपतितमुपादीयते। सत्यमेतत्, किन्तु कवेः शक्त्या पिहितत्वान्नाद्रियते। तथा च, ''अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः। यस्त्वशक्तिकृतो दोषः स झटित्येव भासते।।'' इति **ध्वनिकारः**। यथा **सरस्वतीकण्ठाभरणे**, ''किञ्चिदाश्रयसौन्दर्याऽते शोभामसाध्वपि। कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्। सन्निवेशवशात् किञ्चिदयुक्तमपि शोभते। नीलं पलाशमा-

बद्धमन्तराले स्रजामिव।। इदं हि शास्त्रमाहात्म्यं दर्शनालसचेतसाम्। अपभाषनवद्भाति न च सौभाग्यमृच्छति।।" इति। तेनात्रैवशब्दो यत्र लगति तत्रैव योजनीय:। नयननलिनमिवेति श्रुतं शुभाङ्गीत्वेनाङ्गीक्रियते। किरतीत्यस्यानन्तरामिवशब्दो द्रष्टव्य इति केचिद् वदन्ति।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। सा नयननलिनं दिशि दिशि विक्षिपति। कीदृशं ? जलकणिकाभि: सहितं किमिव विच्छिन्नं नालं यस्य तत् विच्छिन्ननालं हि कमलं सस्त्रवं विक्षिप्तं च भवतीत्यर्थ:।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। पुनरवस्थान्तरमाह; दिशि दिशीति। अयि हितावमानिनि! कथमधीरासि। जानीहि, विरह- कातरमन्तिकमागतं प्रियमिति सखीवचनं यथार्थमवधारयन्ती सा तत् दिदृक्षया दिशि दिशि प्रतिदिशं नयननलिनं नेत्रपद्मं किरति[१२], विक्षिपति। किम्भूतं जलकणजालेन सहितम्। दिदृक्षाद्विगुणितशोकाश्रुकणसंघपूर्णतयाऽतिक्लान्त-मित्यर्थ:। किं वा जलकणजालेन सहितं यथा स्यात्तथानेत्रपद्मं किरति। कनिष्ठाङ्गुलि-नखाग्रेणाश्रुबिन्दुप्रक्षेपपूर्वकं त्वदागमनमार्गं पश्यतीत्यर्थ:। स्त्रीजात्यनुकरणमिदम्। किमिव, विगलितं खण्डितं नालं मृणालं यस्य तदिव। खण्डितमृणालं हि कमलं स्त्रवसहितं दिक्प्रक्षेपणसौकर्याय च भवतीति अभिप्राय: त्वत्कोमलपदसुख-विन्यासार्थं मार्गेषु वृन्तविहीनकमलै: शय्यां प्रकल्पयन्तीवं त्वदागमनमपेक्षत इति भाव:

अत्र नयनं नलिनमिवेत्युपमायां पूर्वपदार्थप्राधान्ये सजलकणजालमिति नयनविशेषणम्। नयनमेव नलिनमिति रूपके उत्तरपदार्थप्राधान्ये विगलितनालमिति नलिनविशेषणं सुगमम्।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। दिशिदिशीति; सा दिशि दिशि चतुर्पार्श्वे दु:खेन किरति नाम निक्षिपति। तस्या: मुखपद्मत: जलधारा इव अश्रुधारा पतति। पद्मपुष्पेभ्य: छिन्ननाल इतस्तत: विचालित: सन् यथा जलं सर्वत्र पतति तथैव राधाया विरहाश्रु चर्तुषु दिक्षु इतस्तत: पतति।।४।।

**५-नयनविषयमपि किसलयतल्पम्।**
**कलयति विहितहुताशविकल्पम् ।। राधिका० ।।५ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।५ ।। चक्षुर्लोचनमपि पल्लवशय्यां तस्यां वह्निभ्रमं करोतीत्यर्थः। ''तल्पं शय्यट्टदारेषु'' ''हुताशोऽग्निरुर्वुधः'' ।।५ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५ ।। अपि च, नयनेति। सा राधा किसलयतल्पं विहितहुताशविकल्पं कलयति हुताशमिव जानाति। किंभूतं तल्पम्? नयनविषयमपि। अनुमितार्थे संसर्गे वा भ्रान्तिर्जायते। नयनविषयेऽपि भ्रमेर्निर्निमित्तत्वान्नयनयोस्त्वव्यारोपितत्वं द्योत्यते।।५ ।।

## (३) जगद्धरकृत- सारदीपिका

।।५ ।। नयनेति सा राधा नयनविषयमपि नात्रगोचरमपि किसलयतल्पं पल्लवशयनीयं न कलयति न जानाति। कथम्भूतं विहितः कृतः हुताशस्याग्नेः विकल्पः संशयो यत्र तं अति सन्तापजनकत्वात् तादृशं गणयति मनुते।।५ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५ ।। नयनेति। किं च, सा नयनविषयमपि चक्षुर्गोचरमपि किसलयतल्पं नवपल्लव-शयनीयं विहितो हुताशनस्याग्नेर्विकल्पः संशयो यत्र तादृशं कलयति। अत्र किसलयेषु ताम्रत्वसंतापकत्वादिसमान धर्मदर्शनादग्नित्वसंशयः। इयं चोद्विग्नावस्था। तल्लक्षणं प्रागेवोक्तम्।।५ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५ ।। नयनेति। हे केशव! सा राधिका तव वियोगे नयनविषयमपि नेत्रगोचरं पुरतः परिदृश्यमानमित्यर्थः किशलयतल्पं पल्लवशयनं विहितः। प्रज्वलितः यो हुताशनः बह्निः तत्कल्पं गणयति कल्पयतीति केषुचित् पाठः। पल्लवानामरुणत्वादुद्दीपकत्वम्। तापकारित्वाच्च हुताशनसाम्यमवगन्तव्यम्। तव वियोगे सुखनिद्राया अभावात् शयनमपि नाङ्गीकरोतीति तात्पर्य्यम्। अनेन चतुर्थ्यवस्था सूचिता ।।५ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५ ।। अपि किङ्करोतीत्यत आह, सा पाणितलेन कपोलं गण्डस्थलं न त्यजति न मुञ्चति। कीदृशम्? अलोलं निश्चलम्। तेन चिन्ताकुलता दर्शिता। कमिव? सायं सन्ध्यासमये बालशशिनमिव द्वितीयाचन्द्रमिव। द्वितीयाचन्द्रास्येन क्षीणत्वं मृगमद-

तिलकादिराहित्यञ्च कपोलस्य दर्शितम्। सायंकालीनत्वप्रतिपादनेन पाणितलस्य लोहितत्वं दर्शितमित्यवधेयम्।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। नयनेति। किञ्च, सा नयनविषयं नेत्रगोचरमपि किसलयतल्पं पल्लवशय्यां-[४]विहितहुताशविकल्पं कृताग्निसन्देहं कलयति; स्पर्शेन जानातीत्यर्थः। एतेन-[५]दृष्टस्पृष्टसद्वस्त्वपि शरीरं त्वद्विरहे सा सुखप्रदं न जानातीति ध्वनिः। उद्वेगावस्था विरोधालङ्कारश्च।।५।।

### (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। नयनेति। सा [६]राधा नयनविषयमपि नेत्रगोचरमपि [७]किसलयतल्पं पल्लवशयनीयं विहितहुताशविकल्पं विहितः कृतः हुताशविकल्पः अग्नितर्को यत्र तादृशं गणयति मनुत।।५।।

### (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। (नयनेति।) नयनविषयं दृश्यतया रमणीयं प्रत्यक्षं वा। किसलयतल्पं पल्लवशयनमपि। विहितः सन्धुक्षितः हुताशनो वह्निः तस्य कल्पः सदृशं कलयति जानाति। विपरीततया जानाति।।५।।

### (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। नयनेत्यादि। नयनविषयमपि चक्षुषोर्गोचरमपि। किसलयतल्पमिति। पल्लवशय्यां विहितः आरोपितो हुताशविकल्पो यत्र एवं यथा स्यादेवम्। कलयति जानाति प्रत्यक्षविषये भ्रान्तिरिति अपिशब्दो विरोधमाभासयति। समाधिस्तु दर्शनमात्रेणैव दाहजननात् निर्धूमाङ्गारवत् पिङ्गाभत्वाच्च किसलयशयने वह्निभ्रम इति भावः। न नयति विहितहुताशविकल्पमिति पाठे। किसलयतल्पं नयनविषयमपि दृष्टिपथमपि न नयति। किमु स्पर्शगोचरमित्यपिशब्दार्थः। किंविधम् ? **विहितेत्यादि**। विहितो हुताशस्य विकल्पो भ्रान्तिर्यत्रेति विग्रहः। ''विकल्पः भ्रान्तिपक्षयोः'' इति विश्वः। ''तल्पं शय्या च दारेषु विषये गोचरे देशे तथा जनपदेऽपि च। प्रबन्धार्थस्य यो ज्ञातस्तत्र रूपादिके पुमान्।।'' इति **मेदिनी** ।।५।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। अपरं च चक्षुर्गोचरमपि पल्लवशय्यां विहितो वह्नेर्विकल्पो भ्रमो यस्मिन् तत् यथा स्यात्तथा पश्यति।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५ ।। अनन्तरचरितमाह; नयनेति। अयि खेदासहनगात्रि! स्वप्नलब्धप्रियतम-समागमकारिणीमिमां शय्यामधिशयाना क्षणमात्मानं विनोदयेति सखीभिर्यत्नेन सम्पादितं किसलयतल्पं नवपल्लवशयनीयं प्रजागरदोषेण तदप्यसम्भावयन्ती नयनविषयमपि आस्तां दूरे स्पर्शः। दृष्टिगोचरमात्रमपि विहितहुताशनकल्पं कृतप्रज्वलनप्रक्षिप्तवस्तु-भस्मसात् करणक्षमवह्नितुल्यं कलयति, मनुते । नवपल्लवानामरुणवर्णत्वात् विरहोद्दीपनत्वाच्च वह्निसाम्यम्।।५ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६ ।। नयनेति - श्रीराधा खलु त्वद्विरहज्वालया कोमलकुसुमशय्यामपि स्वस्य सम्मुखे दृष्ट्वा प्रज्ज्वलिताग्निरिव गणयति।।६ ।।

**६-त्यजति न पाणितलेन कपोलम्।**
**बालशशिनमिव सायमलोलम् ।। राधिका० ।।६ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।६ ।। सा पाणितलेन कपोलं न त्यजतीति योजना। उपमामाह। बालशशिनमिव सायमलोलमिति सायं काल एव चञ्चलत्वे तु हस्तावृतत्वात् कपोलस्यार्द्ध भागदर्शनात् बालचक्र उपमानत्वेनोपात्तः। अताम्रत्वात् पाणितलस्य सन्ध्यायामाविरहपाण्डुत्वात्। कपोलस्य चन्द्रेण साम्यम्।।६ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६ ।। तऽजतीति। सा राधा पाणितलेन कपोलं न त्यजति; चिन्तावशात्। किंभूतं कपोलम्? अलोलम्। क्व? सायम्। सायं हि विशेषविरहोद्रेको भवति। कमिव? वालशशिनमिव। अलोलमिति वालचन्द्रो हि सायं पाण्डुर्निःश्रीकश्च भवति। कपोलस्य हस्तेनाच्छादितत्वाद्बालशशिनोपमा।।६ ।।

## (३) जगद्धरकृत- सारदीपिका

।।६ ।। त्यजतीति सा पाणितलेन हस्ततलेन कपोलं गण्डस्थलं नत्यजति। शङ्कितत्वात् कमिव सायं सन्ध्याकाले अलोलं निश्चलं बालशशिनमिब द्वितीयां चन्द्रमिव हस्तेनाच्छादि तद्वा सन्ध्यासाम्यम् ।।६ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। त्यजतीति। सा सायं संध्यासमये पाणितलेन करतलेन कपोलं न त्यजति। कीदृशम्? अलोलमचञ्चलम्। 'अहस्तु यथाकथंचिन्नीतं, रात्रिस्तु युगायमाना कथं नेतव्या?' इति कपोलतले पाणिं कृत्वा सायं चिन्तयतीति भावः। कमिव? बालशशिनमिव द्वितीयाचन्द्रमिव। मुखार्धस्य करतलच्छन्नत्वेनार्धदृश्यमानतया विरहपाण्डुतया मुखस्य द्वितीयाचन्द्रसाम्यम्। इयमपि जडतावस्था।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। त्यजतीति। हे केशव! सा राधिका स्वयं शुक्लपक्षादिमसायंकाले आलोलम् अचञ्चलम् स्थिरमिति यावत् बालशशिनमिव असम्पूर्णचन्द्रमिव यथा शुक्लपक्षादि समायंकालो बालचन्द्राबिनाभूतः तथा राधापि भवद्वियोगमारभ्य करतलाविना-भूतकपोला जातेत्युपमा। अत्र वदनस्य परिपूर्णचन्द्रकल्पत्वात्तदैकदेशकपोलस्यापि चन्द्रैकदेशसाम्यं युक्तमिति बालशशिनमिवेत्युक्तमवगन्तव्यम्। यद्वा कपोलनिधान व्यग्रहस्ताग्रभागस्य बालशशिकल्पत्वात् तदाक्रान्तकपोलभागस्य वक्राकारत्वात् तस्य बालशशिसाम्यमवगन्तव्यम्। अथवा सायं समये प्राप्ते पाणितलेन कपोलं विरहपाण्डुरं मदग्निनारक्तं च गण्डभागं बालचन्द्रमुद्यच्चन्द्रमसमिव न त्यजतीत्यन्वयः ।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। अपि किङ्करीत्यत आह, नयनविषयमपि लोचनगोचरमपि किशलयतल्पं नवदलशयनं विहितहुताशविकल्पं विहितो हुताशस्य दहनस्य विकल्पो यत्र इत्येवम्भूतं गणयति विकारयतीत्यर्थः। सर्वस्य विचारस्य संशयपूर्वत्वादिति भावः। प्रकृते तु वह्नित्वसाधकहेतूपन्यास एव विचार इत्यवधेयम्। गणसंख्याने धातुः। 'संख्या विचारणा चर्चे'त्यमर।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। (त्यजतीति।) किञ्च, सा सायं सन्ध्यासमये करतलेन कपोलं गण्डस्थलं न त्यजति। कीदृशम्? अलोलं निश्चलम्। दिवसस्तु महता कष्टेन नीतः। रात्रिः युगशतोपमा; कथं नेतव्येति भावः। कमिव? [१] प्रतिपच्चन्द्रमिव। अर्धकरतलाच्छादने मुखस्य बालचन्द्रसाम्यं सूचितम्। सायमित्युभयत्र। [२]जडतावस्थेयम्।
यत्र ध्यायति निस्सङ्गं जडता सा प्रकीर्तिता इति।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। त्यजतीति। सा[६]राधा पाणितलेन हस्ततलेन कपोलं गण्डस्थलं[७]न त्यजति; सचिन्तत्वात्। कमिव? सायं सन्ध्याकाले अलोलं निश्चलं बालशशिनमिव [८]

द्वितीयाचन्द्रमिव। हस्ते नाच्छादितत्वात् अल्पदृश्यतया च बालचन्द्रसाम्यम्; हस्तस्य लोहितत्वात्सन्ध्या॰साम्यम्।।६ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

(त्यजतीति।) अलोलं निश्चलं बालशशिनमिव निश्चलं कपोलं सायं सायङ्काले पाणितलेन न त्यजति। सायमनागत इति चिन्तयति। चिन्ताऽनुभावः। पाणितलन्यस्त-कपोलत्वादिति।।६ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। त्यजतीति। पाणितलेन हस्ततलेन कपोलं न त्यजतीति योजना। उपमानमाह - बालशशिनमिवेति। प्रतिपच्चन्द्रमिवेति यावत्। किंविधम्? सायमित्यादि। सन्ध्याकाले अलोलमचञ्चलम्। सन्ध्यासमय एवाचञ्चलत्वे हेतुः। सन्ध्यासमये हि चन्द्रमा निश्चलो भवतीत्याशयः। हस्तावृतत्वात् कपोलस्य रेखामात्रदर्शनात् विरहे पाण्डुत्वाच्च बालचन्द्र उपमानत्वेनोपात्तः। आताम्रत्वात् पाणितलस्य सन्ध्यया साम्यम्।।६ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६ ।। सा पाणितलेन कपोलं न त्यजति। तत्रोपमा सायमचंचलं वालशशिनमिव कपोलस्यार्द्धभागदर्शनाद्वालचन्द्रेणोपमा। आताम्रत्वात् पाणितलस्य सन्ध्याया, विरहेण पाण्डुत्वात् कपोलस्य चन्द्रेण साम्यम्।।६ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६ ।। अनन्तरचेष्टामाह; त्यजतीति। हन्त। याः खलु सख्यः प्राणसमा भवन्ति, ताभिश्चत् प्रतारिताऽस्मि, तर्हि किं करोमि, को वा अत्र प्रतिकारः इति चिन्तासम्भृतचित्ता पाणितलेन कपोलं न त्यजति, न विमोचयति। सदा पाणितलसक्तकपोला भवतीत्यर्थः। कीदृशं, अलोलं स्थिरम्। इदमयुक्तमिति निरवच्छिन्नाश्रुजलाक्लिन्नतयाऽतिक्लान्तं गण्डमण्डलं कराश्रयं विना पतनशङ्कया शनैः शनैः सखीभिः करतलात् विश्लेषितमपि न चलतत्यर्थः। करतलासक्तकपोलमुपनयति किमिव सायं बालशशिनमिव। करपिहिततया संध्यासमयपरिदृश्यमाना कतिपयकलेन्दुमण्डलमिव दर्शनीयमित्यर्थः। अरुणवर्णत्वात् पाणितलस्य संध्यया साम्यम्। पाणिपिहितत्वेन कपोलस्य बालचन्द्रेण। अथ वा सायंकाले पाणितलेन कपोलं न त्यजति। दिवसस्तु महत्कष्टेन नीतः। कथं नेतव्येयं युगशतायमाना रजनीति चिन्तयेति भावः।।६ ।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।।त्यजतीति, विरहातुरा सा स्वस्य करतले रात्रौ कपोलं गण्डदेशं न त्यजति। सायंकाले मुखचन्द्रमसि स्वस्या मुखमाच्छाद्य पाण्डुरवर्णस्य कपोलं स्थापयति। स्थिरतया तद्दृश्यम् बालचन्द्र इव धवलं गण्डस्थलं शेषस्तु रक्तवर्ण आकाश इव तस्याः रक्तहस्ततलमन्धकारायते। अथवा सायन्तनाकाशस्य रक्तिमामनुकरोति।।५।।

**७-हरिरिति हरिरिति जपति सकामम्।**
**विरहविहितमरणेव निकामम् ।। राधिका० ।।७।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।७।। सकामं काममभिलाषं यथा स्यादेवं हरिरिति हरिरिति योजना। नरो विरहविहितमरणे विनिकाममित्युत्प्रेक्षा। मुमुर्षुर्हि यथेष्टं हरिरिति स्नरतीत्य-भिप्रायः।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, हरिरितीति। सा मत्सखी निकाममतिशयेन सकामं साभिलाषं यथा स्यात्तथा हरिरिति जपति त्वन्नाम गृह्णन्त्यास्ते। किंभूता ? विरहविहितमरणेव विरहेण विहितं मरणं यस्याः सा। अर्थात्तवैव। अन्योऽपि विहितमरणो हरिरिति हरिरिति जपत्येव।।७।।

### (३) जगद्धरकृत- सारदीपिका

।।७।। हरिरिति सा निकाममतिशयेन सकामं साभिलाषं हरि हरिरिति जपति कथं भूतेव विरहेण त्वद्वियोगेन विहितं कृतं मरणं यस्याः सैव अन्येऽपि मरणे हरिरिति मन्त्रं जपन्ति।।७।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। हरिरितीति। सा निकाममतिशयेन हरिरिति हरिरिति जपति। केव ? विरहेण त्वद्विश्लेषेण विधातुमारब्धं मरणं यया सा। कथम् ? सकामं साभिलाषं यथा स्यात् तथा। अभिलाषादिषु नवस्ववस्थास्वतीतास्वपि त्वदौदासीन्यमालक्ष्य मरणाख्यापि दशम्यवस्था अवश्यं भवितव्येति निश्चित्य प्रपन्नानां क्लेशहरणाद्धरिरित्युच्यत इति को वेद प्रसन्नस्तस्मिन्नपि जन्मन्यागत्य मे क्लेशं हरिष्यति, मा आयातु तथापि 'अन्ते या मतिः सा गतिः' इति जन्मान्तरेऽपि स एव वल्लभो भूयादिति साभिलाषं नामान्तरं विहाय हरिरित्येवं जपतीति भावः। विहितेत्यत्र 'आदिकर्मणि क्तः कर्तरि च' (पा. ३/४/७१) इति क्तः।।७।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। हरिरिति। हे केशव! विरहेण दुरन्तं भवद्वियोगेन बिहितमासन्नं मरणं यस्यास्तादृशीव निकामम् अत्यर्थं सकामं भवत्सायुज्याभिलाषसहितं यथा तथा। हरिः हरिरित्यनेन प्रकारेण जपति। ''महत्यादिसम्प्राप्ते स्मर्त्तव्यो भगवान् हरिरिति'' **पुराणवचनार्थं** मनसि निधाय सर्वदुः खपरिहारित्वेनान्वर्थसंज्ञकं भवन्तमेव निरन्तरं स्मरतीत्यर्थः। अत्र च सकामं निकाममिति च शब्दतः यो विरोधः। अर्थतः परिहारस्तु दर्शित एव।।७।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। अपि किङ्करोतीत्यत आह, सकामं साभिलाषं यथा स्यादेवं निकामम् अत्यर्थेन हरिरिति हरिरिति जपति ब्रुते। केव ? विरहेण विश्लेषेण अर्थात्तव, विहितमरणीव निष्पादितमृत्युरिव। अन्योऽप्यासन्नमृत्युर्हरिरिति हरिरिति जपत्येवेति ध्वनिः।।७।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। हरिरितीति। [३]किञ्च, सा निकाममतिशयेन सकामं सातिशयं हरिरिति[४]हरिरिति वारं वारं जपति आवर्तयति। न तु त्वां हरिं मत्वा स्मरति किन्तु त्वां नन्दसूनुमेव जानाति ; [५]केवलं विरहेणेति। एतेन गुणकीर्तनाद्यवस्थोक्ता।।७।।

### (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। हरिरितीति। सा[१०]राधा[११]निकाममतिशयेन सकामं साभिलाषं हरिरिति जपति। कथम्भूतेव ? विरहविहितमरणेव वियोगेन विहितं कृतं मरणं यस्याः सा। अन्योऽपि[१२]मरणे हरिरिति मन्त्रं[१३]जपति ।।७।।

१.नास्ति-अ.२.जडतावस्थेयम्। सा च-इ.३.नास्ति-अ.ब.४.नास्ति-इ.फ.ह.५.नास्ति-अ.ब.६.नास्ति-ड.ल.म.७.नास्ति-क.८.नास्ति-क.९.साम्यमिति-क.१०.नास्ति-ड.ल.म.११.निकामं साभिलाषं-ल.म.१२.मरणसमये-क.१३.जपतीति भावः-क.

### (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। हरिरितीति। विरहेण विहितं प्राप्तं; [१]आसन्ना मरणदशा अवस्था यस्याः सा इव। सकामं साभिलाषं निकामं अत्यन्तम्। हरिरिति वीप्सया सततं जपति संसारमोचकहरिस्मरणमेव करोतीति। विरहप्रलापस्य सम्भावनाज्जपतीति योजना स्पष्टा।।७।।

### (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। हरिरित्यादि। सकामं साभिलाषं यथा स्यादेवम्। हरिरिति हरिरिति निकाममत्यर्थं जपतीति योजना। उत्प्रेक्षते। विरहविहितमरणेवेति। विरहेण विहितं मरणं यस्याः

सा। विरहेण करणभूतेन विहितं मरणं यया सा इति विग्रहः। प्राणान् मुमुक्षुरिव त्वामेव स्मरतीत्यर्थः। अन्योऽपि मरणसमये यथेष्टं हरिं जपतीति।।७।।

**(११) पूजारी गोस्वामीकृत- बालबोधिनी**

।।७।। अपि च साभिलाषं यथेष्टं यथा स्यात् तथा हरिरिति हरिरिति जपति। केव? मरणे या मतिः सा गतिरिति सकामं त्वद्विरहेणारब्धं मरणं यस्याः सेव।।७।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।७।। अनन्तरकृत्यमाह; हरिरिति। एवमुपचारेभ्यः निर्विद्यमाना सती सकामं साभिलाषं निकामं यथेष्टं च यथा स्यात्तथा हरिरिति हरिरिति जपति। सर्वदुःखापहारितया अन्वर्थसञ्ज्ञं त्वामेव स्मृत्वा मुहुर्मुहुः कीर्त्तयतीत्यर्थः। केव विरहेण विहितं सन्निहितं मरणं दशम्यवस्था यस्याः सैव। मरणे या मतिः, सा गतिरिति सकामत्वम्।।७।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।७।। हरिहरीति - विरह जनित मरणं वरमिति ह्युपकल्प्य साभिलाषं हरिः हरिरिति जपं करोति। अपि च कामिनः दशाभाव मरणम। अतः तदुपकल्पं जपं करोति। येन त्वां जन्मजन्मान्तरेपि प्राप्स्यति इत्यैव कामना तस्यास्ति।।७।।

**८-श्रीजयदेवभणितमिति गीतम्।**

**सुखयतु केशवपदमुपनीतम् ।। राधिका० ।।८।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।८।। इति जयदेवभणितं गीतं सुखयत्विति योजना कीदृशं, केशवपदमुपनीतम्। हरिचरणमुपढौकितमित्यर्थः।।८।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।८।। अपि च, श्रीजयदेवेति। श्रीजयदेवभणितं वर्णितं हरेः कृष्णस्य गीतं सुखयतु। भक्तानित्यध्याहारः। किंविशिष्टं गीतम्? केशवपदमुपनीतं गपितम्। इदं श्रीजयदेवभणितं हरिगीतं केशवपदं सुखयतु । केशवः पदं स्थानं यस्यासौ केशवपदः, तं केशवपदं वैष्णवं सुखयतु। किंभूतं गीतम्? उपनीतम्; उप समीपं नीतं प्रापितमित्यर्थः। अत्र मात्राचतुष्पदी छन्दः। सर्वत्रोपमालंकारः।।८।।

**(३) जगद्धरकृत- सारदीपिका**

।।८।।श्रीजयदेवोक्तम् इति पूर्वगीतं केशव एव पदं विश्रान्तिस्थानं यस्य तत् भक्त सुखयतु कीदृशम् उपनीतम् उपस्थितीकृतम्।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।। श्रीजयदेवेति। इत्यमुना प्रकारेण जयदेवेन भणितमुच्चारितं सुखयतु। अर्थाच्छ्रोतृन्नायकांश्च। कीदृशम्? केशवपदमुपनीतम् ।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।। श्रीजयदेवेति। इति पूर्वोक्तं कारणेन जयदेवेन भणितं गदितं केशवस्य पदचरणयुगलम् उपनीतं भक्त्या प्रणीतं तस्मै समर्पितमित्यर्थः। अथ ध्रुवपदे यत्केशबेति पदं तदुपनीतं प्रापितं तदन्तं तमित्यर्थः। एतादृशं गीतं सुखयतु श्रोतृणां गातृणां चानन्दं करोतु इत्यर्थः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितहरिगीतं श्रीयुक्तजयदेवकृतहरिविषयगीतं कर्त्तृ सुखयतु श्रोत्तृजनानामित्यर्थः। कीदृशम्? केशवपदमुपनीतं कृष्णचरणयोः समीपं प्रापितभित्यर्थः। तथा च ध्यानवशाज्जयदेवेन कृष्णचरणे समर्पितमित्यर्थः। यद्वा केशवे पदं ध्यानादिव्यवसायो यस्य स वैष्णवः, तमुपनीतं तं प्रापितमित्यर्थः। 'पदं स्थाने च वाक्ये च सन्निधिव्यवसाययोरि'ति विश्वः।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। जीतार्थं सङ्ग्रहेणाह, श्रीजयदेवेत्यादिना। इत्यनेन प्रकारेण श्रीजयदेवेन भणितमुक्तं श्रीराधासखीगीतं श्रोत्रादीन् केशवपदं प्रति सुखयतु। कीदृशम्? केशवपदं वैकुण्ठं श्रीवृन्दावनं वा प्रत्युपनीतं प्रापितमुपनीयमानं वा। केशवस्य पदं[२]वैकुण्ठस्य वा स्थानं निकुञ्जगृहं वा। [३] पदं स्थानेऽपि वाक्येऽपि सन्निधिव्यवसाययोः इति 'विश्वः' (६३.३)।।८।।

[४]इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां नवमःप्रबन्धः।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। श्रीजयदेवेति। [५]श्रीजयदेवेन भणितं[६]उक्तं इति पूर्वोक्तं गीतं [७]केशव एव पदं विश्रान्तिस्थानं यस्य तं भक्तं[८]सुखयतु। कीदृशम्? उपनीतं[९]उपढौकितं समर्पितमिति भावः[१०] ।।८।।

[११]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां नवमः प्रबन्धः।

१.आसन्नं मरणं दशा अवस्था-इ.२.वैष्णवं वा स्थानं-इ.फ.ग.ह.ज.३.पदं शब्दे च वाक्यं च व्यवसायापदेशयो:-विश्व:। पदं स्थानोपवाक्येऽपि सन्निधिव्यवसाययो:-इ.फ.ग.ह.ज.४.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.५.श्रीजयदेवभणितं-क.६.नास्ति-क.कृतं-ल.म.७.केशवपदं-ड. केशव एवेदं-ल.म.८.सुखयति-ड.ल.म.९.त:१०.पर्यन्तं नास्ति-ड.ल.म.११.नास्तीयं पुष्पिका-ड.क.ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।।श्रीजयदेवेति।श्रीजयदेवभणितं जयदेवकविवचनं इति गीतं गीतरूपं केशवस्य पदमुपनीतं प्रापितं निवेदितं सुखयतु मोदं जनयतु।।८।।

[३]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां नवम: प्रबन्ध:।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेत्यादि।श्रीजयदेवेन भणितमिति पूर्वोक्तं गीतं केशवपदमुपनीतम्। हरिचरणे उपढौकितं सत् सुखयतु गायत: शृण्वतश्चेत्यर्थात्। प्रकरणात् केशवं वा सुखयतु। ''पदं व्यवसितित्राणस्थानलक्ष्म्यांघ्रिवस्तुषु'' **इत्यमर:**।अथवा इति गीतम् उपनीतं सत् केशवपदं केशव: पदं स्थानं व्यवसायो वा यस्य। केशवे वा व्यवसायो यस्य वैष्णव इति यावत्। तं सुखीनं करोतु।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। इत्यनेनोक्तप्रकारेण श्रीजयदेवभणितं गीतं केशवपदमुपनीतं तत्पदयो: समर्पितचित्तमिति यावत् तं जनं सुखयतु अर्थात् श्रोतृन।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।।अथ गीतमुपसंहरति।श्रीरिति, इत्यनेन प्रकारेण श्रीजयदेवेन भणितं वर्णितं गीतमिदं केशवस्य पदमुपनीतं तच्चरणयो: सख्या समर्पितमतिदैन्येन तस्मै निवेदित-मित्यर्थ: सुखयतु। तं केशवं सुखीकरोतु, श्रोतृन् वा।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेव: कवि: खलु यद् वर्णयति तद् गीतं सहृदयानां सुखमानन्दं वा वर्द्धयतु पुन: सानन्दं केशवसमीपं नयतु नि:श्रेयसे। अत्र करुणविप्रलम्भस्य प्रशस्ति:। पुनरुच्यते गीतायां, "योगानां जपयोगोऽस्मि" ।।८।।

**२६-सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति**
**ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मुर्च्छत्यपि।**
**एतावत्यतनुज्वरे वरतनु जीवेन्न किं ते रसात्**
**स्ववैंद्यप्रतिम! प्रसीदसि यदि त्यक्तोऽन्यथा नान्तकः।।२६।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२६।। हे स्ववैंद्यप्रतिम! अश्विनीकुमारवच्चिकित्सक! यदि त्वं प्रसीदसि तद् तावत्यतनुज्वरे तव स्यात् किं सा न जीवेदपितु जीवेदेतद्युक्तम्। रसः औषधान्तरसाधितः पारदो ज्ञेयः। वस्तुतस्तु रूपेणाश्विनीकुमार सम यदि त्वं प्रसीदसि तदैतावत्यतनुज्वरे तव रसात् शृङ्गारात् सा न जीवेदपितु जीबेदपीतिवाक्यार्थः। किदृशी बरतनुः गोपीसहस्रेषु तत्समानात् काप्यस्थितातितस्या रसदानेन रक्षणमुपयुक्तमित्यभिप्रायः। ज्वरलक्षणमाह रोमाञ्चतीत्यादि। शीत्करोति सीदिति अनुकरणात्मकाव्या[२]ब्दोऽयं विलपति परिबेदनं करोति उत्कम्पते। तास्यतीति[१३] ग्लानिं गच्छति ध्यायतीति किमपि चिन्तयतीत्यर्थः। प्रमीलति अक्षिणी संगच्छतीत्थर्थः। पतति भूमौ लुठति उद्याति उत्थातुमिच्छतीत्यर्थः। मूर्च्छति मूर्च्छां प्राप्नोतीत्यर्थः। सन्निपातकज्वरे सर्वा एताःक्रियाः सम्भवत्येव न कामज्वरेति चिकित्सा सात्विकभागाः केचिज्ज्वरप्रकोपजां क्रियाः ननु सान्निपातिकज्वरमात्रके रसादानं नोचितम्। प्राकृतवैद्यहस्तकस्य सम्भवात्।

यदुक्तं,

लंघनं वालुकास्वेदो नस्यं निष्ठीवनं तथा। अवलोहोञ्जनं चैव प्राक् प्रयोज्यं त्रिदोषजे।। इति।

अत आह, त्यक्तोऽन्यथाह स्तक इति। इति अन्यथा अन्यप्रकारेण हस्तको हस्तक्रिया हस्तेन पानादौषधान्तरदानं बैद्येन त्यक्तो दानदानेऽप्यौषधस्य विशेषप्राप्तेरित्यभिप्रायः। कामज्वरपक्षे हस्तको हस्तक्रियैव तस्या जागर्त्ति वक्तुमसमर्थो ह्यर्थः। अन्यथेति यदि त्वं न प्रसीदसि सोऽपि तया त्यक्तमात्रशब्दोऽवधं रणे" स्त्यक्षते। मरिष्यत इति यावत्। आविर्भूतबहूपचारात् भविष्यतीत्यत्र प्रत्ययो ज्ञेबः।।२६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२६।। इदानीं भक्त्याख्या भावितमरणसंशनमिषेण तन्मनः प्ररोचयति, सेति। हे स्ववैंद्यप्रतिम[१४] अश्विनीकुमारसदृशरूप! एतावत्यतनुज्वरे एतावतीमवस्थां

प्राप्तवत्यतनुज्वरे। पक्षे, अतनुज्वरे महति ज्वरे सति यदि प्रसीदसि ततः सा वरतनुः तव रसात् शृङ्गारात्किं न जीवेत्? अपि तु जीवेदेव। अन्यथा चेन्न प्रसीदसि तदा अन्त एवान्तकः मरणमसि, मरणहेतुत्वात्त्वमेव मरणमिति। अथवा, हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य वैद्य! यदि प्रसीदसि ततस्ते रसात्पारदादिनिष्पन्नौषधात्सा वरतनुर्न जीवेत्? अपि तु जीवेदेव। अन्यथा अन्तको यमो नासि? अपि तु यम एव। 'वरतनुः' इति हेतुगर्भं विशेषणम्। तेन सा तनुरूपेति कृत्वाऽवश्यं जीवनीयेति तात्पर्यम्। सा राधा न केवलं बाह्यवृत्त्या त्वय्यनुरक्ता, किंतु सात्त्विकभावेनापि त्वदायत्तजीवितेति दर्शयन्त्याह। तानेव साच्विकान्भावान्विवृणोति सा रोमाञ्चतीती। स्तम्भः खोदोऽय रोमाञ्चः स्वरभङ्गाऽथ। वेपथुः। वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्विका मताः'। सा राधा रोमाञ्चति। रोमाञ्चो विद्यते यस्य स रोमाञ्चः, रोमाञ्चित इत्यर्थः; तद्वदाचरति रोमाञ्चति। अकारोऽत्र मत्वर्थीयः। रोमाञ्चतीत्यादिना रोमाञ्च उक्तः। सीत्करोतीति वैवर्ण्यम्, विलपत्युद्यातिभ्यामश्रु, उद्यातीति निःसरति; उत्कम्पत्युद्भ्रमतिभ्यां वेपथुः, ताम्यतिना[१३] स्वेदः, ध्यायतिपततिभ्यां स्तम्भः, पततीति वैपरीत्येन तपतिर्वैवर्ण्ये योजनीयः। प्रमीलतिना स्वरभङ्गः, मूर्च्छतिना प्रलयः, इत्येवमष्टौ सात्त्विका भावाः प्रदर्शिता भवन्ति। सन्मनस्तत्प्रभवाः सात्त्विकाः। इदमाकूतम्त्वय्यारोपितमनस्का त्वया जीवनीयेति; अन्यथा आश्रितत्यागलक्षणं दूषणमपीति भावः।। शार्दूलविक्रीडितं वृत्तम्। अत्र दीपकमलंकारः। विप्रलम्भाख्यः शृङ्गारो रसः। अत्र पूर्वार्धेन स्थायिभावा उक्ताः। तदुक्तम् 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः।।' इति। सात्त्विकाश्च पूर्वत एव उक्ताः।। अहमित्याद्यनुकूलो नायको दक्षिणो वा। उत्कण्ठिता नायिका। सखी दूतीत्वेन सहायिनी। तल्लक्षणम् 'प्रवृत्तिकुशला धीरा गूढमन्त्रदृढप्रिया। स्वतन्त्रा विधवा दासी दृष्टा प्रव्रजिता सखी। मालाकारादिनारी च कार्या दूतीष्टसिद्धये'।।२६।।

## (३) जगद्धरकृत- सारदीपिका

।।२६।। अधुना सा तव विरहेणावश्यं मृगयत् इति सूचयान्शार्दूल विक्रीडितवृत्तेन श्लोकेनाह। सा रोमाञ्चतीति। हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य यदि त्वं प्रसीदसि प्रसन्नो भवसि वरतनुः सुकुमारांगी सा राधा एतावति अतनुज्वरे सति तव रसात्किं न जीवेत् अपि जीवेदेव रसः श्रृङ्गारः औषधं च अन्यथा प्रसङ्गताभाविहस्तकः हस्तलम्भस्त्यक्तः ज्वरे सति एते व्याधयो भवन्ति। ते तस्यां वर्तन्त इत्याह सा राधा रोमाञ्चति रोमाञ्चं भवतीत्यर्थः, सीत्करोति, सीत्कारशब्दं करोतीत्यर्थः, विलपति,

उत्कम्पते सकम्पाभवति, ताम्यति ग्लानियुक्ता भवति, ध्यायति, चिन्तयति, उद्भ्रमति उच्चैर्भ्रान्ता भवति, प्रमीलति नेत्रनिमीलनं करोति, पतति शय्यादौ गच्छति, उद्याति उच्चैर्गच्छति, मूर्च्छां प्राप्नोति, ज्वरिणः पुरुषस्य एतावद्भ- वतीति।।२६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२६।। सा रोमाञ्चतीति। सा राधा रोमाञ्चति रोमाञ्चानञ्चति प्रफुल्लयति। उद्गमयतीत्यर्थः। यद्वा, रोमाञ्चोऽस्या अस्तीत्यर्शआदित्वादच्प्रत्य रोमाञ्चः सिद्ध इवाचरति रोमाञ्चयति। यद्वा, रोमाञ्चपदं लक्षणया रोमाञ्चवतीपरम्। तथा च ओजस्वीवाचरतीत्या-दिवद्रोमाञ्चवतीवाचरतीत्यर्थः। अनेनाभिलाषः कथितः। सीत्करोति सीत्कारं करोति। अनेन चिन्तास्मृती कथिते। अथ च विलपति, 'सशूरः सुन्दरश्च' इत्यादिनायक-गुणान्विशेषेणालपति। अनेन गुणकीर्तनमुक्तम्। उत्कम्पते कथं विरहदुःखं सोढव्यमिति कम्पयुक्ता भवति। ताम्यति[१३] ग्लाना भवति ध्यायति तव ध्यानं करोति। एतैर्विशेषणैरुद्वेगावस्था कथिता। उद्भ्रमति क्रीडादिस्थलं निर्दिशती भ्रमति ।अनेन प्रलापः कथितः। प्रमीलति ध्यानकल्पिततदालिङ्गनादिजन्यसुखभावेन चक्षुषी निमीलयति। अनेनोन्मादः कथितः। पतति कार्श्येन स्थातुमशक्यतया भूमौ पतति। पश्चाद्भावनया त्वां दृष्ट्वा कथं कथमप्युद्याति त्वदभ्युद्गमनं करोति। अनेन व्याधिः कथितः। ततो मूर्च्छति मूर्च्छां प्राप्नोति। अनेन जडता कथिता। क्रियादीपकोऽय-मलंकारः। तल्लक्षणमुक्तं प्राक्। ननु जडतापर्यन्तावस्था यदि जातैव तदा किमङ्गसङ्गेनेत्यत आह, एतादृशीति। हे स्ववैंद्यावश्विनीकुमारौ तत्प्रतिम तत्सदृश! एतादृश्यतनुज्वरे त्वं यदि प्रसीदसि तदा सा वरतनुः कमनीयदेहा ते तव रसाच्छृङ्गाररसात्किं न जीवेत्? अपि तु जीवेदेव। अन्यथा त्वं चेन्न प्रसीदसि तदा तया हस्तकोऽपि त्यक्तप्राय इत्यर्थः। संप्रति मूर्च्छितायास्तस्या वक्तुमपारयन्त्या हस्तचेष्टयैव सखीषु व्यवहारो भवति, सोऽपि तया त्यक्तव्य इत्यर्थः। अन्यत्रापि ज्वरे सति ज्वरी रोमाञ्चति शीतादिना रोमाञ्चानिवाचरति। वेदनया शीतक्लमात्सीत्कारं करोति। मोहाद्यत्किंचिद्वदति। उत्कम्पते कम्पयुक्तो भवति। ताम्यति विह्वलो भवति। उद्याति वायुवेगाद्धावति। मूर्च्छति मूर्च्छा प्राप्नोति। एतादृश्यतनुज्वरे महति सान्निपातिके ज्वरे कस्यचित्खवैंद्यप्रतिमस्य प्रसादेन रसात्पारदादितो ज्वरी किं न जीवेत्? अपि तु जीवेदेव। ननु सान्निपातिकज्वरे सहसा रसदानं निषिद्धमित्यत आह, अन्यथेति। अन्यप्रकारेण संहितामार्गेण हस्तकोऽपि वैद्यानां हस्तप्रक्रियाविशेषो 'हथवटी' इति लोके प्रसिद्ध उक्तः। संहिताप्रक्रिययोपचारे कृते विशेषप्राप्ते रसदानमुचितमिति भावः।

क्वचित् 'त्वत्तोऽन्यथा नान्तकः' इति पाठः। तदान्यथा यदि न प्रसीदसि त्वत्तवापेक्षयान्तको न, अपि तु त्वमेवान्तक इत्यर्थः। रोमाञ्चति। द्वितीयव्याख्याने क्विप्प्रत्यये तलोपेऽपि रूपं बोध्यम्। 'रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे' इति **विश्वः**।।२६।।

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी**

।।२६।। एवं विरहवेदनायां विज्ञापितायामचलित हृदयं श्रीकृष्णमुपालभते। स्मरातुरामिति। दैवतवृन्देन देवतासमूहेन वन्द्यः नमस्कार्य्यः परमकारुणिकत्वेन सर्वदेवता सेव्य इत्यर्थः। अनेनागतिकानां त्वमेव गतिरिति सूचितम्। क्वचित्दैवतवैद्य-हृद्य इति पाठः। तदा दैवतमिष्टं देवता सा चासौ वैद्यश्च स्वनामद्वारा संसारप्रमुख-निखिलामयनिवर्त्तकागदंकार इत्यर्थः। उक्तं च,

अच्युतानन्तगोविन्दनामोच्चारणभेषजात्।
नश्यन्तु सकला रोगाः सत्यं सत्यं वदाम्यहम्।। इति ।।

अतएव वैद्यः दैवतत्वाद्वैद्यत्वाच्च तस्य हृद्यत्वमित्यवगन्तव्यम्। अथवा दैवतवैद्यइति एकपदं वा तदा दैवतवैद्यौ अश्विनौ ततोऽपि हृद्यः तौ तु व्याधिमात्रमेव निवर्त्तयतः। भवांस्तु संसाररूपमहाव्याधिं च निवर्त्तयतीत्यतस्तस्य ताभ्यामपि हृद्यत्वमित्यर्थः।

अथवा दैवतवैद्यादिवत् हृद्य एतादृश हे उपेन्द्र! हे श्रीकृष्ण! दैवतवैद्येति-पदच्छेदपक्षे हृद्य इति तदङ्गविशेषणं तदायमेवार्थः। हृद्यं रोगिणः सेवाकाले परिणामकाले च हितं लोके हि सर्वमौषधिजातं परिणामकाले हितं इदं तु सर्वदा इत्यस्य हृद्यत्वमवगन्तव्यम्।

एतादृशं यत् त्वदङ्गसङ्गामृतं भवदङ्गाश्लेषसुधा तन्मात्रसाध्यां अनन्यनिवर्त्त्य व्याधिकाम्। न तु शरीरायाससंपाद्यमूलिकाद्यौषधिजालचिकित्सितरोगामित्यर्थः। तत्र मात्रशब्दः गुटिकापरत्वेनापि योजनीयः। वैद्यके मात्रशब्दः औषधिपरिमाणे प्रयोगात्। एतेन प्रकृतागदंकारत्वस्य प्रयासः सूचितः। एतादृशीं राधां विमुक्तबाधां त्यक्तपीडां यदि न कुरुषे क्रियाफलस्य कर्तृगामित्वादात्मनेपदम्। तर्हि वज्रादप्यधिको वज्राधिकः स चासौ दारुणश्चासीत्। वज्रादप्यधिक कठिनहृदयो जातोऽसि इत्यर्थः। तथा च निखिलनिगम पुराणप्रसिद्धभवदीयपरमकारुणिकत्वं व्याहतं स्यात्। ततश्च तद्रक्षणाय स शीघ्रमेव त्वयानुग्राह्या। अन्यथा त्वपकीर्त्तिः स्यादित्यर्थः। वज्रादपि दारुणोऽसीति केषुचित् पाठः न तु सरसः चातुर्य्यार्थं कविविवक्षितस्त्रीलिङ्गान्त छन्दोविरोधात्।

तल्लक्षणम् ''उपेन्द्रबज्रा जतजास्ततोगौरिति।'' अस्मिन् वृत्ते पादान्ते गुरुद्वयं प्रत्ये-कदारुणोऽसीत्यत्र यद्यपि अन्तो गुरुर्न भबति ''नापदान्तर्लघुर्गुरुत्वं चेति'' छन्दो सूत्रात् विकल्पितं गुरुद्वयमनुसन्धेयम्।।२६।।

तिरुपतिसंस्करणे किञ्चिद् भिन्नमस्ति, तद्यथा,

हे स्ववैंद्यप्रतिम, स्ववैंद्ययोर्नासत्योः अश्वनीसुतयोः प्रतिमा साम्यं यस्य तस्य सम्बुद्धिः। स्ववैंद्यावश्वनीसुता वित्य**मरः**। सा राधिका त्वदेकायत्तचित्तेन त्वदागमनार्थिनी सती रोमाञ्चेन आनन्दसञ्जातपुलकेन व्याप्ता भवति। एवं त्वदेकायत्ताचित्तनेति सर्वत्रानुसन्धेयम्। भवन्तं स्मृत्वा स्मरणं प्राप्य विलपति जल्पति। त्वद.......... भाषणतत्परास्तीति; भाषणे इत्यर्थः अत्यासक्तेति भावः। उत्कम्पते त्वदङ्गसङ्गाभावात् उत्कृष्टं वेपते इति यावत्। भ्राम्यति त्वद्विनाभावेन आकुला सती परिभ्रमतीत्यर्थः। ध्यायति निरन्तरचित्तसंस्थत्वात् त्वामेव ध्यायति, उद्भ्रमति द्दग्गोचरजनं भवन्तमिति कृत्वा भ्रान्तिं गच्छति। प्रकृष्टेन मीलति त्वद्ध्यानेन नेन्नोन्मीलनं करोतीत्यर्थः। पतति मेऽन्यो नास्तीति बुद्ध्या भूतले पततीत्यर्थः। किञ्च उन्माद्य उन्मादावस्थां प्राप्य मूर्च्छति, अपि च विसंज्ञा भवति। ईद्दगवस्थामुपगम्य मूर्च्छामाजगाम इत्यपिशब्दार्थः। एताद्दशि पूर्वोक्तगुणसम्पन्ने अतनुज्वरे न विद्यते तनुर्यस्य सोऽनङ्ग तस्य ज्वरः, तस्मिन् विरहज्वर इत्यर्थः। अतनुश्चासौ ज्वरश्चेति कर्मधारयसमासेन अधिकज्वर इति च गम्यते तस्मिन् विषये, वरतनुः, रसैः श्रृङ्गारादिरसैः त्वं प्रसीदसि चेत् जीवेत्। अन्यथा त्यत्त्का यदि अनायका गत्यन्तराभावा सती कथं जीवेत्। न जीवतीत्यर्थः। यथा लोके एतादृशाधिकज्वरे विद्यमानजनः रसं औषधविशेषं विना न जीवति तद्वदियमपि भवत्कटाक्षवीक्षणरसं विना न जीवतीत्यर्थः। स्ववैंद्यप्रतिम इत्येतद्विशेषणं जगन्मोहनाकाररूपद्योतनार्थम्। अथवा स्ववैंद्याः अमृतरुपौषधेन जीवयितुं समर्थाः। तद्वदस्यापि तत्सामर्थ्यं वर्तत इत्यर्थः। वृत्तं तु शार्दूलविक्रीडितम्। सूर्याश्वैर्मसजाः स्ततास्सगुरवश्शार्दूलवित्र्की डितम् इति लक्षणात्।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२६।। त्वदङ्गसङ्गमादवश्यं सा जीविष्यतीति श्रीकृष्णं बोधयति, हे स्ववैंद्यप्रतिम अश्विनीकुमारसदृश! यदि प्रसीदसि प्रसन्नो भवसि तदा सा राधा एतावति ईदृशे। सर्वनामपदीपन्यासेन विशिष्टानिवर्चनीयत्वं दर्शितम्। अतनुज्वरेऽनङ्गतापे ते तव रसात् अनुरागात् किन्न जीवेत् अपितु जीवेदेव। अश्विनीकुमारसादृश्यं कृष्णसौन्दर्येण।

अतनुपदेन कन्दर्पस्योपन्यासेनाशरीरतया अदृश्यत्वेन तज्जनितसन्तापस्याशक्य-निवारणीयत्वं सूचितम्। तथा चान्योऽपि कदाचित् स्ववैद्यप्रतिमस्य[१४] आयुर्वेद-विशारदस्य रसादौषधविशेषाज्जीवतीति सकलप्रसिद्धमेव। किन्तज्जीवनेन हितमित्याशंक्याह, कीदृशी ? वरतनुः। वरा श्रेष्ठा तनुः शरीरं यस्याः सा वरतनुः। श्रेष्ठत्वस्य सावधित्वेनावधेश्चाकथनेन व्युत्पत्तिवलेन जगत एव श्रेष्ठत्वं लभ्यते। तथा च तन्मरणेन जगदेवासारं स्यादिति भावः। अन्यथा त्वद्रसाभावे हस्तको वाद्योपचारो नलिनीपत्रदानादिः त्यक्त उपेक्षितः। तेन न कोऽपि उपकारः स्यादिति तात्पर्यम्। त्यक्तो नान्यथा नान्तक इति बहुषु पाठः। तत् पक्षे अन्यथा यदि न प्रसीदसि तदा अन्तको यमः न त्यक्तः तया भविष्यतीत्यर्थात्। तथा च नायिकान्तरं तामपहाय तय्यनुसूते सापि भवन्तं विहाय यमानुसरणं करिष्यतीति वाक्यार्थः। कामज्वरस्य लक्षणमाह, सा राधिका रोमाञ्चति रोमाञ्चं करोतीत्यर्थः। सर्वधातुभ्यः क्विववा वक्तव्य इति क्विप्। क्ववता धातुत्वं न जहतीति धात्वर्थेन भादयः। तथा च प्रकृते रोमाञ्चं करोतीत्यर्थः। शीदिति अनुकरणशब्दः, तं करोति विदधातीत्यर्थः। भावेनोपनीत-भवत्कृताधरखण्डनादिखेदेनेति भावः। विलपति भवन्तमासाद्य विलापं करोतीत्यर्थः, तन्द्रामुपैतीति यावत्। पतति निपतिता भवतीत्यर्थः। उद्यति ऊर्द्धं याति उत्थिता भवतीति यावत्। मूर्च्छति मोहं प्राप्नोतीति यावत्। महाज्वरेऽप्येतत् सर्वं भवतीति तस्यापि लक्षणमुक्तम्। तदनेन यथासम्भवं स्थायिभावाः सात्त्विकभावाश्च दर्शिताः। तदुक्तम्, 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा। जगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः।। स्तभ्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका मताः।।२६।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।२६।। इदानीं त्वद्विरहव्याधिसन्तप्ता ध्रुवं मरिष्यतीति सूचयन्नाह, सेति। [४]सा राधा[५]रोमाञ्चति रोमाञ्चितदेहा भवति; सीत्करोति सीत्कारं करोति; विलपति विलापं करोति;उत्कम्पते सकम्पा भवति; ताम्यति ग्लानियुक्ता भवति; ध्यायति ध्यानं करोति; उद्भ्रमति शान्तिं न प्राप्नोति;प्रमीलति नेत्रप्रमीलनं कृत्वा सुखमनुभवति; पतति शय्यायां गच्छति; उद्याति अभ्युद्गमनं करोति; मूर्च्छति मूर्च्छां प्राप्नोति। एतैः क्रियापदैरभिलाष-दुःख गुणकीर्तनवियोगग्लानिसुखभ्रान्तिसमागमाभ्युपगमनोद्वेगमूर्छाः क्रमेणोक्ताः। हे स्ववैद्यप्रतिम अश्विनीकुमारतुल्य ! एतावत्येतावन्मात्रे[६]अतनुज्वरे[७]कामज्वरे[८]यदि त्वं वरतनुः सुकुमाराङ्गः [९]प्रसीदसि[१०]प्रसन्नो[११]भवसि[१२]तत्तर्हि ते नवरसात्[१३]शृङ्गाररसात्

औषधाद्वा[१४]किं न जीवत्? अपि तु जीवेदेव। अन्यथा प्रकारान्तरेण [१५]तस्या हस्तकः वैद्यानां कृपाविशेषकः [१६]यदि त्यक्तः तर्हि न जीवेत्। यथा त्यक्तकृपाविशेषे रोगिणोऽन्तकस्तथाऽस्यास्त्वमित्यर्थः हस्तकः [१]कृतनृत्ययोः इति वै जयन्ती। हेतूक्तिरलङ्कारः।।२६।।

१.स्मरातुरां इति पद्यादनन्तरं पद्यमिदं दृश्यते-इ. २.एतावन्त्यतनु-इ. ३.नास्तीयं पुष्पिका-इ. ४.सा रोमाञ्चित देहा भवति-ग. ५.नास्ति-अ.ब.इ.ग.ह. अनङ्गज्वरे-इ. ७.कामे-अ.इ.फ.ग.ह.ज.नास्ति-ब. ८.तः१५.पर्यन्तो भागो नास्ति-अ.ब. ९.प्रसीदति-इ. १०.नास्ति-फ. ११.भवति-इ. १२.तर्हि-ग. १३.नास्ति-ग.फ. १४.किं न न जीवेत्-ग. किं जीवेत-ज. १६.त्यक्तः न जीवेदेव-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२६।। अधुना सा [२]राधा तव विरहेणावश्यं म्रियत इति सूचयन्नाह, सा रोमाञ्चतीति। हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य, [३]यति त्वं प्रसीदसि प्रसन्नो भवसि [४] तर्हि वरतनुः सुकुमाराङ्गी सा राधा एवावति अतनुज्वरे [५]कामज्वरे सति तव रसात् किं न जीवेत्; अपि तु जीवेदेव। रसः शृङ्गार औषधश्च। अन्यथा[६]प्रसन्नताभावे हस्तकः कस्तावलम्बः त्यक्तः। ज्वरे सत्येते व्याधयो भवन्ति; ते तस्यां वर्तन्त इत्याह। सा राधा रोमाञ्चति[७] रोमान् अञ्चति प्राप्नोति सरोमाञ्चा भवतीत्यर्थः सीत्करोति सीत्कारं करोति। विलपति विलापं करोति। उत्कम्पते सकम्पा भवति। ताम्यति[१३] ग्लानियुक्ता भवति। ध्यायति चिन्तयति। उद्भ्रमति[८]उच्चैर्भ्रान्ता भवति[९]। प्रमीलति[१०]नेत्रनिमीलनं करोति। पतति शय्यादौ गच्छति। उद्याति उच्चैर्गच्छति। [११] मूर्च्छति [१२]मूर्च्छां प्राप्नोति। ज्वरिणः पुरुषस्यैतावद् भवति[१३]इति।।२६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२६।। सा रोमाञ्चतीति। सा राधिका रोमाञ्चति ध्यानलयेन पुलकं करोति हर्षं प्राप्नोति। सीत्करोति सीत्कारं करोति। विलपति प्रलापं करोति। उत्कम्पते वेपते। ताम्यति[१३] ग्लाना भवति। ध्यायति चिन्तयते। उद्भ्रमति उत्कृष्टतया घूर्णति इन्द्रियप्रलयं प्राप्नोति। पतति। उद्याति अभिमुखं गच्छति। मूर्च्छति। अपिस्समुच्चायकः। एतेषामप्येकादशतिङां सेति कारकस्यान्वयः। अनेकप्रकाशकत्वाद्दीपकालङ्कारः। एतावन्तीति। हे स्ववैंद्यप्रतिम दस्रतुल्य। अत्रोपमायां रूपातिशयवत्त्वं असाध्यज्वरचिकित्सितत्वं च। त्वं प्रसीदसि यदि प्रसन्नश्चेत् वरतनुः अत्यन्तमृद्वी राधा एतावति रोमाञ्चादिकारिणि अतनुज्वरे कामज्वर एव। अतनुज्वरे महाज्वरे सत्यपि ते रस एव स्नेह एव रसः। रसायनात् किं न जीवेत्? अपि (तु) जीवेदेव।

अन्यथा त्वदनुग्रहदत्तरसाभावे [१४]अन्तकः मरणमिति यावत्; न त्यक्त एव मरणं भविष्यत्येव। अत्र स्ववैंद्यप्रतिमेत्यत्र समासगा आर्थी धर्मलुप्तोपमा। अश्विनीकुमार-तुल्यसौन्दर्यं तदसाध्यज्वरनिवर्तकत्वं चानुपात्तम्। रस इव रसः, रस एव रस इत्यत्र श्लिष्टरूपकम्। श्लिष्टोपमायाश्च वैद्यप्रतिमेत्युपमाप्रतिपादकवचनस्यसत्त्वादुप-मैवालङ्कारः। जीवेदेवेत्यस्य प्रसीदसि यदीति वाक्यार्थः रसादिति पदार्थश्च हेतुतिति पदवाक्यार्थोभयहेतुकं काव्यलिङ्गमलंकारः। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् इति लक्षणस्य वाक्यार्थहेतुकं अनेक पदार्थकं एकपदार्थकं चेति द्वैविध्यं दर्शितं प्राचीनैः। नवीनास्तु पदावयवार्थहेतुकमपि दृष्ट्वा प्राहुरिति।।२६।।

१.कृत्यवृत्ययोः-इ.ग.फ.ह.ज. २.नास्ति-ड.ल.म. ३.यदि प्रसन्नो भवसि-ड.यदि त्वं प्रसीदसि प्रसन्नोऽसि-क. ४.नास्ति-ड.ल.म. ५.नास्ति-क. ६.प्रसन्नत्वाभावे-क.प्रपुऽल्लताभावे-ल.म. ७.रोमं-क. ८.तः ९.पर्यन्तं नास्ति-ड. १०.नेत्रोन्मीलनं-क. ११.नास्ति-ड. १२.अतिशयेन मूर्च्छा-क. १३.इति भावः-क. १४.त्यक्तोऽन्यथा नान्तकः-इति-इ.पाठः

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२६।। सा रोमाञ्चतीत्यादि। हे स्ववैद्यप्रतिमरूपेणाश्विसदृश, यदि त्वं प्रसीदसि प्रसन्नो भवसि तदा सा मम सखी एतावति अतनुज्वरे(ण) अनङ्गपीडायां ते तव रसा(स)वत् रसम् अनुरागं शृङ्गारं वा प्राप्य, "ल्यब् लोपे पञ्चमी", किं न जीवेत्? अपि तु जीवेदित्यर्थः। कीदृशी? वरतनुरिति। सुन्दरी गोपीसहस्रेषु तत्समाना (न) काप्यस्तीति रसदानेन तस्याः रक्षणमुपयुक्तमित्यभिप्रायः। एतावतीत्युक्तम्। तत्र कियतीत्याशङ्क्याह। यावत्यनङ्गदुःखे सा रोमाञ्चति सीत्करोति सीदति, शब्दानुकरणा-व्ययत्वाद्विभक्तिलोपः। विलपति विलापं करोति। उत्कम्पते उत्कटं वेपथुं करोति। ताम्यति[१३] ग्लानिमापद्यते। ध्यायति धैर्यमालम्ब्य किञ्चिच्चिन्तयति उद्भ्रमति। प्रमीलति अक्षिणी निमील्य लयति पतति भूमाविति शेषः। उद्याति उत्थाय गच्छति। मूर्च्छत्यपि मूर्च्छाम् अपि प्राप्नोति। विरहज्वराकुलितचेतसां हि चेष्टा इमाः। ताश्च सान्निपातिकज्वरे सम्भवन्तीत्यभिप्रायेण स्ववैंद्यप्रतिमेत्यामन्त्रणमुचितम्। अत एव सा रसात् जीवेदित्युक्तिविशेषोऽयमलङ्कारः। तथाहि-अस्मिन् पक्षे रसशब्देन औषधान्तरसाधितः। "पारदः रसः ज्ञेयः" इति। यदुक्तं **वैद्यके**, "अल्पमात्रोपयोग्यत्वादनुच्छेच्छाप्रदानतः। क्षिप्रमारोग्यदायित्वाद् भेषजेभ्यो रसोऽधिकः।।" इति। अत्र स्ववैंद्यप्रतिमत्वात् रसदानं समुचितमेव। तथाहि, "रसवैद्यो भवेद् दिव्यः" इत्यादि। अतनुज्वर इति। अतनुरनल्पश्चासौ ज्वरश्चेति स तथा। तस्मिन् सान्निपातिको हि ज्वरः सुतरां भवति।

तत्र च पित्तोत्तरे वमनमप्युक्तमस्ति। तस्मादुद्वमतीत्युक्तम्। तथा च, आयुर्वेदसारे उक्तं च सन्निपातलक्षणे, ''तन्द्रस्तैमित्यकम्पज्वरवमथुशिरोरुक्शिरोलोठकोठ।'' इत्यादि। वरतनुरित्यनेन नातिकार्श्यं लक्ष्यते। ''कृशत्वं नातिगात्राणाम्'' इति सान्निपातिकलक्षणात्। त्यक्तोऽन्यथा हस्तक इति। विरहपक्षे अन्यथा त्वं चेन्न प्रसीदसि तदा हस्तकस्त्यक्त एव। हस्तसङ्केतेन यत्किञ्चित् कथयति तदपि तया त्यक्तः भवतीत्यर्थः। यद्वा हस्तक उपायोऽर्थाश्वावनोपायः शीतोपचारादिरस्माभिः त्यक्तः त्यक्ष्यत एवेत्यर्थः। ''भाविनि भूतवदुपचारः। उपाये हस्तसङ्केते हस्तकं पुंनपुंसकम्'' इति **हट्टचन्द्रः**। व्याधिपक्षे ननु सन्निपातज्वरमात्रके रसदानमनुचितं प्राकृतवैद्यहस्तकस्य सम्भवात्। यदुक्तम्, ''लङ्घनं वालकास्वेदो नस्यं निष्ठीवनं तथा। अवलेहोऽञ्जनं चेति प्राक् प्रयोज्यं त्रिदोषज'' इत्यत आह। अन्यथा रसदानं विना अन्यप्रकारेण यो हस्तक उपायः लङ्घनादिप्रक्रियेति यावत्। स त्यक्त एवास्माभिः। किं वा अन्यथा देववैद्यं विना अन्यो हस्तकः, प्राकृतवैद्यो ''हाथटिआ'' इति प्रसिद्धिः।।२६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२६।। पुनरतीववैकल्यं वर्णयति; सा रोमांचतीति। हे अश्विनीकुमारवत् सुचिकित्सक! त्वं यदि प्रसीदसि तदैतावत्य, तनुज्वरेऽस्मिन्ननल्पज्वरे सा वरतनुस्ते रसप्रयोगात् किं न जीवेदपि तु जीवेदिति छलोक्ति। वास्तवः कामज्वरः, वरतनुरिति तत्सामान्या नास्तीति तस्या रक्षणं युक्तमितिभाव। ज्वरलक्षणान्याह; सा रोमांचति पुलकांचिता भवति। गीतं करोति सीदिति शब्दं करोति। सीदिति अनुकरणं विलपति, उच्चैः कंपते, ग्लानिमाप्नोति, कथं लभ्यत इति चिन्तयति, उच्चैभ्रान्तिमाप्नोति, अक्षिणी संकोचयति, भूमौ लुठति, उत्थातुमिच्छति, मूर्च्छामाप्नोति। अन्यथा अन्यप्रकारेण हस्तकः हस्तक्रिया पाचनादौषधान्तरदानं वैद्यस्त्यक्तः दानेऽपौषधस्य विशेषाप्राप्तेरित्यभिप्रायः। कामज्वरपक्षेऽपि हस्तक्रिया शीतलाद्युपचारः सखीभिस्त्यक्त इत्यर्थः। कृतेऽप्युचारे तद्वृद्धेरिति भावः।।२६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२६।। सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति<br>
भूयो ध्यायति सीदति प्रतपति क्षौणौ प्रमीलत्यपि। (भिन्न पाठः)<br>
एतावत्यतनुज्वरे वरतनुः प्रोद्याति संमूर्च्छति<br>
स्ववैंद्यप्रतिम! प्रसीदसि रसात् किन्तेन जीवेत्तदा।।

उपचारादिभिरसाध्यां यथोत्तरमुपचीयमानां राधाविरहवेदनां निरुपयन्ती वाक्चातुर्येण श्रीकृष्णमुपालंभते। सेति। हे स्ववैद्यप्रतिम! अश्विनिकुमारवत् सुचिकित्सक। पक्षे अतिसुन्दर। त्वं यदि प्रसीदसि, अनुगृह्णासि, तदा एतावति वक्तुमशक्येऽतनुज्वरेऽनल्पज्वरे विविधोपद्रवसंकुलतया अविदितस्वरूपे इत्यर्थः। अनल्पज्वरे पक्षे मन्मथज्वरे सा त्वत्प्रीतिप्रभावलब्धविविधवेदना वरतनुरनवद्याङ्गी राधा ते तव रसाद्यौषधात् पक्षे शृङ्गारात् किं न जीवेत्। अपि तु जीवेदिति छलोक्तिः। यद्वा ते रसात् अभिलाषात् सकाशात् उद्भूतेऽतनुज्वरे यदि त्वं न प्रसीदसि, उपेक्षसे तदा सा किं जीवेत्। न जीवेदित्यर्थः। वैद्यानामिदमपयशो, यन्निजौषधादुदितव्याधिः स्वयमुपेक्षत इति भावः। वरतनुरिति अन्या तत्समाना नास्ति। अतस्तस्या रक्षणं युक्तमिति भावः। ज्वरोपद्रवानाह; रोमाञ्चति। पुलकाञ्चिता भवति, सीत्करोति, सीदति व्यथाव्यञ्जकशब्दविशेषं करोति। विलपति, विधिना किं विहितमित्यादि परिदेवनं करोति। उत्कम्पते, अतिशयेन कम्पते, यत्नेन अवष्टम्भिताऽपि कम्पं न जहातीत्यर्थः। ताम्यति[१३], क्लान्तिमाप्नोति, भूयो ध्यायति, भवान् कथं लभ्य इति सा वारंवारं चिन्तयति। सीदति, उपायमलब्ध्वा विषण्णा भवति। ततो वैकल्यातिशयेन क्षौणौ प्रकर्षेण पतति। निश्चेष्टिता भवतीत्यर्थः। प्रमीलति, तन्द्रामुद्रितलोचना भवतीत्यर्थः। ततः प्रोद्याति, पुनरुत्थातुमिच्छति, तदसक्ता मूर्च्छति, मूर्च्छां प्राप्नोति, मन्ये मूर्च्छासख्याश्वासितेव कियत्कालं सुप्तेवाऽऽस्ते इति भावः।।२६।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।२६।। सारोमाञ्चतीति; कन्दर्पज्वरपीडीतया: श्रीराधायाः अष्टसत्त्वविकारः स्फुटीभवति तस्याम्। तस्याः विकारसमूहस्य वर्णनं, रोमाञ्चं, सीत्कारः, विलापः, उत्कम्पः, ताम्यता, ध्यानम्, उदभ्रमणम्, प्रामीलनम्, पतति, उदयशति, मूर्च्छा इत्यत्र दशविकाराः कविना वर्णिताः। प्रत्युत;

स्तम्भः स्वेदोऽथरोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुः प्रलयवित्यष्टौ सात्त्विका मताः।।

अत्र, श्लोकेऽस्मिन् राधायाः रोमाञ्चं सीत्कारः विलापः उत्कम्पनम् नाम वेपथुः ताम्यता नाम तमु काङ्क्षायाम् -धातौ उत्कण्ठा इच्छा लटि प्रथमे ताम्यति। कृष्णेन मिलितुं इच्छा वलवती भवति। ग्लानिमापद्यते इति धनञ्जयेः धरणिधरः सर्वाङ्गसुन्दरीटीकायाम् (नूतन)। राणाकुम्भस्तु ताम्यति स्वेदः इति, रसमञ्जरीकारः शंकरमिश्रस्तु ताम्यति इत्यस्य विह्वलो भवति इति अर्थं स्वीकरोति। **सञ्जीवनी,**

**पदद्योतनिका जयन्तीति** टीकात्रितयेषु ग्लानियुक्ता भवतीति अर्थः स्वीक्रियते। लक्ष्मणसेनकृतरसिकरङ्गदायां क्लान्तिमाप्नोतित्यर्थः ताम्यतीति ग्लानिं गच्छति इति नारायणदाशः। श्रुतिरञ्जनी ताम्यति स्थाने भ्राम्यति स्वीकरोति। कवेः निरङ्कुशत्वात् अष्टमस्थाने दशभावाः प्रपञ्चिताः कविना। परन्तु अष्टसात्विकभावाः दशकामदशाश्च गण्यन्ते। अत्र अभिलाषादयः दशभावषु गण्यन्ते। पुनः रोमाञ्चादयस्तु अष्ट सात्विकभावषु विचार्यन्ते। परमज्ञान श्लोके सर्वं मीलित्वा वर्णितमस्ति। अलंकारशास्त्रस्य सम्मत नास्त्यपि च ते कथमष्टभावेषु गण्यन्ते तत्खलु कुम्भकर्णेन प्रणीतम्। हे श्रीकृष्ण! इमां दशां परिशील्य त्वं अश्विनीकुमारप्रतिमः तस्याः तूर्णमुपचारं कुरू। नोचेत् तस्य जीवनाशां त्यज। सख्यः पद्मपत्रव्यजनेन तस्याः शीतलोपचारं कुर्वन्ति। परन्तु सा तस्मिन् कामज्वरे जीवेत् वा रसायनादिप्रयोगेण ? वर्द्धते च व्याधिः व्यैद्यान्तरान्विष्यते। अथवा त्वं तस्याः शरीरं परामृश्य रस प्रयोगञ्च कृत्वा जीवय। नोचेत् सा न जीवेत्।

रस इव रसः रस एव रस इत्यत्र श्लिष्टरूपकमिति **जयन्ती**। शिष्टोपमायामुपमेति। वैद्यप्रतिमेति उपमाप्रतिपादकशब्देन उपमालंकारः। अपि च जीवेदेवेत्यत्र प्रसीदसि यदीति वाक्यार्थे रसादिति पदार्थश्च हेतुरिति पदवाक्यार्थोभयहेतुकः काव्यलिङ्गमलंकारः। पुनः लक्ष्यणाश्रयी तेन टीकाकारेणैव प्रतिपादितम्। हेतूक्तिरिति **सञ्जीवनी**।।२६।।

**२७-स्मरातुरां दैवतवैद्यहृद्य त्वदङ्गसङ्गामृतमात्रसाध्याम्।**
**विमुक्तबाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि ।।२७।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२७।। गीतस्य तात्पर्य्यार्थमाह। यतस्त्वदङ्गसङ्गामृतपात्रं साध्यां विमुक्तवाधां न कुरुषे इति वाक्यार्थः। दैवतवैद्यहृदेत्यपि सम्बोधनमश्विनीकुमारसमेत्यर्थः। वृत्ततोपेन्द्रवज्राख्यम्। "उपेन्द्रवज्रा प्रथमे लघौ सा।"।।२७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२७।। तदेव पूर्वसूचितदूषणमुद्भावयति, स्मरेति। हे उपेन्द्र! दैवतवैद्यहृद्य अश्विनीसुतसुन्दर! ततोऽप्यधिकचिकित्सक! यदि स्वं पूर्वोक्तलक्षणां राधां निवृत्तबाधां निवृत्ता बाधा यस्यास्तां न कुरुषे तर्हि वज्रादपि दारुणोऽसि, कठिनोऽसि। कठिनः खलु कथमपि न स्निह्यतीति। किंविशिष्टां राधाम्? स्मरातुराम्। पुनः किंभूताम्? रोगिणां चिकित्सा भविष्यतीत्याशङ्क्याहत्वदङ्गेति। त्वंदङ्गसङ्ग एवामृतकल्पस्तन्मात्र-साध्याम्। अतोऽल्पप्रयासे बहुतरपुण्ये च प्रयोजने महान्तो नावसीदन्तीति। वृत्तमप्युपेन्द्रवज्रा।।२७।।

## (३) जगद्धरकृत- सारदीपिका

।।२७।। पुनरूपेन्द्र वज्रावृत्तेनाह। स्मरातुरामिति हे दैवत ! वैद्यवत् अश्विनीकुमारवत् हृदयमन्दिर हे उपेन्द्र! इन्द्रानुज त्वं राधां विमुक्तबाधां त्यक्तपीडां न कुरुषे अतः वज्रात्कुलिशादपि दारुणोऽसि अधिकविषमोऽसि स्मरातुरां कामार्त्ताम्। पुनः कीदृशीं त्वदङ्गसङ्गत एव शरीरसं बन्ध एवामृतं तन्मात्रेण साध्यां प्रतिकार्याम्।।२७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२७।। स्मरातुरामिति। हे दैवतवैद्यहृद्य! दैवतानां यौ वैद्यावश्विनीकुमारौ तद्हृद्य मनोज्ञ! स्मरातुरां मदनरुग्णां त्वदङ्गसङ्ग एव यदमृतं तन्मात्रसाध्यां राधां विमुक्तबाधां त्यक्तपीडां न कुरुषे। अतो हेतोरुपेन्द्रवज्रादपि दारुणोऽसि कठिनोऽसि । यतो वज्रमिन्द्रेण क्षिप्तमङ्गसंबद्धं सह्यथयति, त्वं तु विश्लेषे सत्येव व्यथयसीति वज्रापेक्षयापि दारुणत्वमिति भावः। उपेन्द्रवज्राछन्दः।।२७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२७।। एवं विरहवेदनायां बिज्ञापितायामचलित हृदयं श्रीकृष्णमुपालभते। स्मरातुरामिति। दैवतवृन्देन देवतासमूहेन वृन्द्यः नमस्कार्य्यः परमकारुणिकत्वेन सर्वदेवता सेव्य इत्यर्थः। अनेनागतिकानां त्वमेव गतिरिति सूचितम्। क्वचित्दैवतवैद्य-हृद्य इति पाठः। तदा दैवतमिष्टं देवता सा चासौ वैद्यश्च स्वनामद्वारा संसारप्रमुखनिखिला-मयनिवर्त्तकागदंकार इत्यर्थः। उक्तं च,

अच्युतानन्तगोविन्द नामोच्चारणभेषजात्। नश्यन्तु सकला रागाः सत्यं सत्यं वदाम्यहम्।। इति ।।

अतएव वैद्यः दैवतत्वद्वैद्यत्वाच्च तस्य हृद्यत्वमित्यवगन्तव्यम्। अथवा दैवतवैद्यहृद्ये त्येकं पदम्। तदा दैवतवैद्यौ अश्विनौ ततोऽपि हृद्यः तौ तु व्याधिमात्रमेव निवर्त्तयतः। भवांस्तु संसाररूपमहाव्याधिं च निवर्त्तयतीत्यतस्तस्य ताभ्यामपि हृद्यत्वमित्यर्थः।

अथवा दैवतवैद्यादिवत् हृद्य एतादृश हे उपेन्द्र! हे श्रीकृष्ण! दैवतवैद्येति-पदच्छेदपक्षे हृद्य इति तदङ्गविशेषणं तदायमेवार्थः। हृद्यं रोगिणः सेवाकाले परिणामकाले च हितं लोके हि सर्वमौषधिजातं परिणामकाले हितं इदं तु सर्वदा इत्यस्य हृद्यत्वमवगन्तव्यम्।

एतादृशं यत् त्वदङ्गसङ्गामृतं भवदङ्गाश्लेषसुधा तन्मात्रसाध्यां अनन्यनिवर्त्त्य व्याधिकाम्। न तु शरीरायाससंपाद्यमूलिकाद्यौषधिजालचिकित्सितरोगामित्यर्थः। तत्र

मात्रशब्दः गुटिकापरत्वेनापि योजनीयः। वैद्यके मात्रशब्दः औषधिपरिमाणे प्रयोगात्। एतेन प्रकृतागदंकारत्वस्य प्रयासः सूचितः। एतादृशीं राधां विमुक्तबाधां त्यक्तपीडां यदि न कुरुषे क्रियाफलस्य कर्तृगामित्वादात्मनेपदम्। तर्हि वज्रादप्यधिको बज्राधिकः स चासौ दारुणश्चासीत्। बज्रादप्यधिक कठिनहृदयो जातोऽसि इत्यर्थः। तथा च निखिलनिगम पुराणप्रसिद्धभवदीयपरमकारुणिकत्वं व्याहतं स्यात्। ततश्च तद्रक्षणाय स शीघ्रमेव त्वयानुग्राह्या। अन्यथा त्वपकीर्त्तिः स्यादित्यर्थः। वज्रादपि दारुणोऽसीति केषुचित् पाठः न तु सरसः चातुर्य्यार्थं कविविवक्षितस्त्रीलिङ्गान्तछन्दोविरोधात्। तल्लक्षणम्, ''उपेन्द्रबज्रा[१५] जतजास्ततोगौरिति।'' अस्मिन् वृत्ते पादान्ते गुरुद्वयं प्रत्येकदारुणोऽसीत्यत्र यद्यपि अन्तो गुरुर्न भवति ''नापदान्तर्लघुर्गुरुत्वं चेति'' छन्दो सूत्रात् विकल्पितं गुरुद्वयमनुसन्धेयम्।।२७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२७।। यदीदृशं सन्तापं सापन्ना तदा चन्द्रादिशीतलद्रव्ये सत्यपि मत्सान्निध्यादेवास्याः कथं स्वास्थ्यं भविष्यतीत्याशंक्याह,अस्याः राधायाश्चेतः कर्त्तृचन्दनचन्द्रमः कमलिनीचिन्तासु श्रीखण्डशीतलभानुनलिनीचर्चासु चिरं बहुकालमव्याप्य संताम्यति सम्यक्प्रकारेण म्लानं भवतीत्यर्थः। किम्भूतायाः ? कन्दर्पज्वरेण कामज्वरजनित- सन्तापेन आतुरा पीडिता तनुः शरीरं यस्याः सा तथा, तस्याः। 'सन्तापः संज्वरः समावि'त्यमरः। किन्तु रहसि एकान्ते क्षान्तिरसेन क्षमारूपरसेन शीतलतनुंत्वामेव प्रियं क्षणं ध्यायन्ती चिन्तयन्ती कृशाङ्गी कथमपि कष्टसृष्टया प्राणिति जीवति। अन प्राणने धातुः। तथा च चन्द्रादिशीतलपदार्थानाञ्च त्वमपि दुःखिता भवति, अक्षमाशीलस्यापि भवतश्चिन्तनेनापि विगतसन्तापी भवतीत्यतो भवत्समागमादेव तस्याः जीवनं भविष्यतीत्यवगम्यत इति भावः। अत्र क्षान्तिरसशीतलत्वेन सजातीयव्यतिरेकालङ्कारः।।२७।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।२७।। स्मरातुरामिति। सम्प्रति शिथिल[२]प्रयत्नमुन्नयन्त्याह। हे दैवतवैद्यहृद्य मनोहर, त्वं स्मरातुरां कामसन्तप्तां राधा विमुक्तबाधां[३] त्यक्तपीडां न कुरुषे न करोषि यदा तदोपेन्द्र! वज्रादपि कठिनोऽसि। यथेन्द्रो वज्रेण वृत्रं हतवांस्तथा त्वं वल्लभामिति ध्वनिः। ननु[४]औषधाद्वा धनदानादपि[५]व्याधीनां प्रतीकारः कर्तव्यः[६]किं[७]मयेत्यत आह, हृद्येति, हृद्यं सुन्दरं त्वदङ्गसङ्ग एवामृतं[८]जीवनोपायस्तेन साध्यां प्रतीकार्याम्। हृद्यमुभयत्र। हृद्यं मनोहरं प्रोक्तं[९] हृद्यं च हृदयप्रियमिति[१०]।।।२७।।

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।२७।। [११]स्मरातुरामिति। हे दैवतवैद्यवत् [१२] अश्विनीकुमारवत् हृद्य सुन्दर, हे उपेन्द्र[१५] इन्द्रानुज, त्वं राधां विमुक्तबाधां त्यक्तपीडां न कुरूषे अतो वज्रादपि दारुणोऽसि[१]कुलिशादधिकविषमोऽसि। स्मरातुरां कामार्ताम्। पुन: [२] कीदृशीम्? त्वदङ्गसङ्गस्तव[३]शरीरसम्बन्ध एवामृतं तन्मात्रेण साध्यां प्रतीकार्याम्।।२७।।

१.सा रोमाञ्चति इति पद्यात्पूर्वंदृश्यते पद्यमिदम्-इ. २.प्रयत्न मुन्नयन्ती स्मरेत्याह-फ.ग.ह.प्रयत्नमुन्नयन्ती स्मरतीत्याह-ज. ३.नास्ति-अ.ब.४.औषधाद्वाधनादानादपि-इ.औषधाद्वा धनादपि-ग.५.नास्ति-अ.ब.६.त:१०.पर्यन्तो भागो नास्ति-फ.७.मयेत्याह-अ.ब.इ.ह. ८.जीवितोपाय:-ज.९.हृद्यं स्वहृदयप्रियम्-इ.११.नास्ति-ड.ल.म. १२.अश्विनकुमारवत्-ड. कुमारवत्-क.

## (९) कृष्णपण्डितकृत- जयन्ती

।।२७।। स्मरातुरामिति। दैवतानां देवानां वैद्यौ अश्विनीकुमारौ तयो: [४]कृत्यं चिकित्सितं च तत् त्वदङ्गसङ्गामृतं त्वदालिङ्गनादिकं तन्मात्रसाध्यां [५]तदतिरिक्ता-चिकित्स्यां स्मरातुरां राधां विमुक्तबाधां न कुरुषे; अङ्गसङ्गमात्रदानेन राधाया: रोगनिवृत्तिर्भवतीति भाव:। दैवतवैद्यकृत्येति सम्बोधनं वा। [६]औषधमात्रापेक्षाराहित्यादिना अर्थव्ययोऽपि न भवति। अङ्गसङ्ग एव अमृतमात्रं यच्छसीति भाव: अत एव ह्युपेन्द्र वज्रादपि कृष्णकुलिशादपि दारुणोऽसि निर्दयोऽसि। स्वसन्निधानाकरणेन हिंससीति वज्राधिक:। अत्र उपेन्द्र[१५] वज्रेति वृत्तनामापि सूचितमिति मुद्रालङ्कार:।।२७।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२७।। हे उपेन्द्र[१५]! श्रीकृष्ण! त्वं वज्रादपि कुलिशादपि दारुणोऽसि कुत:? यतो राधां विमुक्तबाधां विरहितविरहव्यथां न कुरुषे। विशेषणद्वारा राधां प्रकटयति। किंविधाम्? स्मरातुरामिति। स्मरेण रोगिणीं त्वं चेद् बाधानिवारणाय स्वत एव समर्थोऽसीत्यभिप्रेत्य सम्बोधयति। दैवतवैद्यहृद्येति। दैवतवैद्यवत् आश्विनेयवत् हृद्यो हृदयङ्गमश्चिकित्सकत्वेन सौन्दर्येण च। किं वा दैवतवैद्यहृद्ये तत्सम्बोधनत्रयम्। यो हि रोगार्त्तो भवति स दैवतं देवं वैद्यं चिकित्सकं हृद्यं प्रियं च सेवते। राधां किंविधाम्? अत एव त्वदङ्गसङ्गामृतमात्रसाध्यामिति। तवावयवै: संसर्ग एव अमृतं तेनैव साध्या चिकित्स्या नान्येनेति। मात्रशब्दोऽत्रावधारणे। तथा च, ''मात्रा कर्णविभूषायां चि(वि)त्ते माने परिच्छदे। अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे।'' इति **मेदिनी**। साध्यशब्दश्चिकिच्छि(त्सि)ते प्रयुक्त:। तथाहि, ''भिषजामसाध्यम्'' इति **कालिदास**:। ''असाध्यं कुरुते कोपं प्राप्ते काले शब्दो यथा'' इति **माघश्च**। उपेन्द्रवज्रेत्यनेन वृत्तमस्य श्लोकस्याप्युपेन्द्रवज्रा नामेति सूचितम्। ''उपेन्द्रवज्रा[१५] प्रथमे लघौ सा'' इति। ''उपेन्द्रइन्द्रावरज'' **इत्यमर**:।।२७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२७।। तदेवं श्लोकोक्तं साक्षात् कथयति स्मरेति। हे दैवतवैद्य ! हे दैवतवैद्याभ्यामपि हृद्य निपुण ! इन्द्रवज्रादुप अधिकं उपेन्द्रवज्रः तदपि चेत्तावत्तस्मादपि त्वं दारुणोऽसीति मन्ये, यतः इन्द्रक्षिप्तो वज्रः संस्पृश्य व्यथयति, त्वन्तु विश्लेषे। तत्रापि दूरतः अतः उप अधिकदारुणोऽसि। कथमेवं मन्यसे ? यतस्त्वदङ्गसङ्गामृतमात्रसाध्यां स्मरातुरां राधां विमुक्तवाधां न कुरुषे, अङ्गसङ्गमात्रसाध्यकर्माकरणेन काठिन्यमेव पर्य्यवसित-मित्यर्थः।।२७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२७।। स्मरातुरां दैवतवैद्यहृद्य ! त्वदङ्गसङ्गामृतमात्रसाध्याम्।

विमुक्तबाधां कुरुषे न राधामुपेन्द्रवज्रादपि[९५] दारुणोऽसि।।२०।।

अतिकठिनोऽसि त्वं यत् परमप्रेयस्यास्तस्या ईदृश्यवस्थां शृण्वन्नपि न द्रवसीति स्पष्टं भर्त्सयन्त्याह; स्मरेति। हे दैवतवैद्यहृद्य। दैवतवैद्यावश्विनीसुतौ ततोऽपि हृद्यः स्पृहणीयः, किं वा हे दैवत। हे वैद्य ! हे हृद्येति सम्बोधनत्रयम् । व्याधिपीडिते हि जने एषामवश्यमपेक्षणीयत्वात्। इन्द्रवज्रादुप अधिकम् उपेन्द्रवज्रं, तदपि चेत् ततोऽपि त्वं दारुणोऽसीति मन्ये। उपोऽधिकार्थः। कथमेव मन्यसे। यतः स्मरातुरां स्मरव्याधिपीडितां तां राधां मम सखीं विमुक्तबाधां बाधातो विमुक्तां न कुरुषे, ननु सिद्धमन्त्रौषधादिमन्तरेणासाध्यव्याधिमोक्षणं दुष्करमिति चेत्, तत्राह; त्वदङ्गसङ्ग एवामृतं, तन्मात्रेण साध्यां न तु मन्त्रौषधिप्रयोगप्रयत्नेन इति भावः। मात्रं कार्त्स्न्येऽवधारणे' **इत्यमरः**। उपस्यादधिकार्थे च हीनार्थासन्नयोरपीति **मेदिनी**।।२७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२७।। स्मरातुरेति; अत्र पूर्वश्लोकप्रसङ्गस्य विस्तारः क्रियते। सा स्मरातुरा। देववैद्यवत् त्वं हृद्यो भवसि तस्याः। तवाङ्गसङ्गामृतमात्रसाध्यं यदि तव शरीरस्पर्शभूतामृत-प्रयोगेण सा स्मररोगमुक्ता भविष्यति, तर्हि किमर्थं तां कन्दर्पज्वरान्मुक्तिं न ददासि हे श्रीकृष्ण ! उपेन्द्रः इन्द्रस्य कनिष्ठभ्राता। वज्रधारीन्द्रस्य भ्रातृत्वेन तव हृदयमपि वज्रात्कठिनमिति मन्यते। अत्र वज्रधारी इन्द्रादपि उपेन्द्रः अधिककठोरहृदय इव मन्यते। उपस्यादधिकार्थे च हीनार्थासन्नयोरर्पीत **मेदिनी**। उपेन्द्रवज्रा वृत्तेनापि लिखितोऽयं श्लोकः उपेन्द्रस्यनाम

इन्द्रभ्रातुरर्थः श्रीकृष्णस्य कठिनतरं हृदयं द्योतयति।। २७।।

**२८-कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं**
**चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु संताम्यति।**
**किंतु क्लान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं**
**ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति।।२८।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२८।। कन्दर्पज्वर[१६]संज्वराकुलतनोरस्याः राधायाश्चेतः चन्दनादीनां: चिन्तासु स्मरणेषु ताम्यति[१८] ग्लापयतीत्याश्चर्य्यम्। उपभोगस्तु हरपराहत एवेत्याक्षे-पलब्धोऽत्यर्थः। "संतापः संज्वरः समौ" **इत्यमरः**। यद्येवं कष्टजीवतीत्याह। किन्तु क्षान्तिरसनेत्यादि अन्यश्चो वा हरिरेष्यतीत्यादि क्षान्तिः। तत्र यो रसोऽनुरागस्तेन त्वामेकमेव प्रियं रहसि ध्यायन्ती कथमपि प्राणिति जीवतीत्यर्थः। एकमेवेति एतेनान्यगतिः। त्वामेवेति सूचितम् कीदृशं त्वां शीतलतरं चन्दनादयस्तु शीतलतरः स्ववैद्यम्तापहारक इति बुद्ध्या तव ध्यानम्।।२८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२८।। ईदृशीमवस्थां प्राप्तापि त्वत्सङ्गमाकाङ्क्षयैव प्राणितीत्याह कन्दर्पेति, हे माधव! अस्याश्चेतश्चिरं चन्दनचन्दमःकमलिनीचिन्तासु यत्संताम्यति तदाश्चर्यम्। किंविशिष्टायाः? कन्दर्पज्वरसंज्वराकुल तनोर्मदनसंतापाकुलशरीरायाः। तापे सति शीतवस्तुषु स्पृहा नास्तीत्याश्चर्यम्; किंतु आश्चर्यान्तरमपि। क्लान्तिवशेन क्षीणा रहस्येकान्ते स्थिता त्वामेवैकं प्रियं शीतलतनुं कथमपि ध्यायन्ती क्षणं क्षणमात्रं प्राणिति जीवति। अत्र शीतलेषु द्वेषः, शीतलादपि जीवतीति विरोधालंकारः। अद्भुतश्च रसः। शार्दूलविक्रीडितं वृत्तम्।।२८।।

### (३) जगद्धरकृत- सारदीपिका

।।२८।। एवं विधाऽपि राधात्वच्चिन्तनेनैव जीवतीत्याह कन्दर्पेति हे कृष्ण अस्याः राधाया श्चेतो मनः चिरं चिरकालं चन्दनस्य चन्द्रमसः कमलिन्याश्च चिन्ताषु स्मरणे ज्वरेण तापेन यः सञ्वरः पोडितेनाकुला चञ्चलातनुः शरीरं यस्यास्तस्याः किं तु रहसि एकान्तस्थितासौ राधात्वामेव एकं असाधारणं प्रियं वल्लभं ध्यायति। क्षणं मुहूर्त्तं क्षान्तिवशेन क्षान्तायत्ततया त्वकान्तिवशेनेति पाठः। तदा अस्मिन् क्षणेनायातः क्षणान्तरे आगमिष्यतीति अनुरागेण कथं प्राणिति जीवतीति कथमिति प्रश्ने कीदृशी क्षीणा कृशाङ्गी।।२८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२८।। ननु शीतोपचारैरेव तनुज्वरशान्तिर्भविष्यतीति किं शतत्यत आह, कन्दर्पेति। अहो आश्चर्यम्, अस्याश्चेतश्चित्तं चन्दनचन्द्रमःकमलिनीचिन्तासु चन्दनचन्द्रपद्मिनी-वार्तास्वपि सखीभिः क्रियमाणासु संताम्यति ग्लानिं प्राप्नोति। कीदृश्याः? कन्दर्पज्वरेण कामज्वरेण यः संज्वरः संतापस्तेनातुरतनो रुग्णदेहायाः। विरोधोऽयमलंकारः। तल्लक्षणमुक्तं प्राक्। नन्वेतादृशे संतापे कथं जीवतीत्यत आह, किंत्विति। हे इन प्रभो! त्वामेकमेव प्रियं शीतलतनुं ध्यायन्ती सती क्षणं प्राणिति जीवति। कीदृशी? क्षणं रहसि स्थिता। पुनः कीदृशी? उत्क्रान्तिवशा उत्क्रान्तेः प्राणोत्क्रमणस्य वशा आयत्ता। तत्र हेतुगर्भविशेषमाह, क्षीणा कार्श्यादतिदुर्बला । तथा शीतलं चाङ्गस्पर्शीं ध्यायन्ती संप्रति जीवतीति त्वया झटिति गन्तव्यं, पुनस्तस्या दर्शनमपि ते दुर्लभं भवतीति भावः। 'संतापः संज्वरः समौ' **इत्यमरः**। 'इनः सूर्ये नृपे पत्यौ' इति **विश्वः**।।२८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२८।। तस्या एव चेष्ठान्तरं दर्शयति। कन्दर्पेति। हे केशव! कन्दर्पेण कामेन कृतो ज्वरः कन्दर्पज्वरः तेन संज्वरः सम्मक् तापः। उभयत्र तृतीया तत्कृतेत्यादिना समासः, तेन संज्वरेण आकुला तनुर्यस्यास्तथाविधायाश्चेति चित्तं कर्त्तृश्चिरं चिरकालं चन्द्रमः कमलिनीनां चिन्तासु सुविचारगोष्ठीषु सतीषु सन्ताम्यति ग्लानिनिवर्त्तकौषाघजाते सम्मवत्यपि ग्लानिं जहाति परन्तु अधिकां ग्लानिं प्राप्नोतीत्यर्थः। तेषामुद्दीपकत्वादिति भावः।

तर्हि दशमावस्था अस्याः किमित्याशङ्क्याह किन्तु इति। किन्तु क्लान्तिवोशेन ग्लानिहेतुना क्षीणप्राणमात्राविशिष्ठा सा राधा शीतलतरम्। अत्यन्तशीतलम् एवमेवाद्वितीयं न तु पूर्वोक्त चन्दनादिवत् त्रित्वमित्यर्थः। त्वां भवन्तं रहसि एकान्ते विक्षेपराहित्यसूचनार्थम् एतद्विशेषणस्थ तावत् मात्राक्षणं मानाक्षणमल्पकालमेव नतु चन्दनादि चिन्तायामिव चिरकालम्। अत्यन्तसंयोगे द्वितीया। ध्यायन्ती सती कथमपि अति प्रयासेन प्राणिति जीवति एतादाश्चर्य्यमद्भुतम्। चिरकालमतिशीतलचन्दनादि त्रितयचिन्ताया अपि ग्लानिं न जहाति किल सा क्षणमात्र शीतलमेकाकिनीं त्वां ध्यात्वा ग्लानिं जहाति प्राणिति च इत्येतत् महदाश्चर्यमित्यर्थः।

किञ्च लोकेहि पीतं सदौषधं तापनिवर्त्तनद्वारा प्राणिनो जीवयति। अत्र तु औषधिध्यानात्तापोऽपगच्छति प्राणिति च। सर्वदा त्वदेकायत्तं तस्या जीवनमिति

तात्पर्य्यम्। प्राणितीत्यत्र रुदादिभ्यः सर्वधातुक इडागमः। अत्र सामग्रयां सत्यामपि कार्य्यमुत्पत्तेर्विशोषोक्तिः। कारणानि विना कार्य्यस्योत्पत्तेश्च विभावना, तदुक्तम्,

कारणानि विना कार्य्यस्योत्पत्तौ स्याद्धि भावना।
तत्सामग्र्यामनुत्पत्तौ विंशेषोक्तिर्निगद्यते।। इति।।२८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२८।। यदीदृशं सन्तापं सापन्ना तदा चन्द्रादिशीतलद्रव्ये सत्यपि मत्सान्निध्यादेवास्याः कथं स्वास्थ्यं भविष्यतीत्याशंक्याह, अस्याः राधायाश्चेतः कर्त्तृ चन्दनचन्द्रमः कमलिनीचिन्तासु श्रीखण्डशीतलभानुनलिनीचर्चासु चिरं बहुकालम्व्याप्य संताम्यति सम्यक्प्रकारेण म्लानं भवतीत्यर्थः। किम्भूतायाः ? कन्दर्पज्वरेण कामज्वरजनित-सन्तापेन आतुरा पीडिता तनुः शरीरं यस्याः सा तथा, तस्याः। 'सन्तापः संज्वरः समावि'त्यमरः। किन्तु रहसि एकान्ते क्षान्तिरसेन क्षमारूपरसेन शीतलतनुंत्वामेव प्रियं क्षणं ध्यायन्ती चिन्तयन्ती कृशाङ्गी कथमपि कष्टसृष्टया प्राणिति जीवति। अन प्राणने धातुः। तथा च चन्द्रादिशीतलपदार्थानाञ्च त्वमपि दुःखिता भवति, अक्षमाशीलस्यापि भवतश्चिन्तनेनापि विगतसन्तापी भवतीत्यतो भवत्समागमादेव तस्याः जीवनं भविष्यतीत्यवगम्यत इति भावः। अत्र क्षान्तिरसशीतलत्वेन सजातीयव्यतिरेकालङ्कारः।।२८।।

## (७) वनमालि भट्टकृत- सञ्जीवनीनन्वन्यै:

।।२८।। शीतलोपचारैः कामशान्तिः कर्तव्या; किं मदनुग्रहेण, तत्राहं वैपरीत्यं कन्दर्पेति। आश्चर्यमहोऽस्याश्चेत[७]श्चित्तं चिरं चिरकालं चन्दनादीनां चिन्तासु स्मरणेष्वपि, किं पुनर्दृष्टेषु[८]सन्ताम्यति ग्लानिं[९] सन्तापं वा प्राप्नोति। [१०]त्वद्विरहे अदाहकोऽपि दाहकत्वे(न) प्रतीयत इति भावः। नन्वीदृशी सा कथं जीवतीत्यत आह, [११]किन्त्विति। हे [१२] क्लान्तिरससन्तप्तावलोकनरस, हे इन हे विष्णो, किन्तु त्वामेवैकं प्रियं वल्लभं ध्यायन्ती क्षणं क्षणमात्रं [१]प्राणिति जीवति। कीदृशी ? रहस्येकान्ते क्षणमपि स्थिता। पुनः कीदृशी ? क्षीणा[२]कृशाङ्गी। कीदृशं त्वाम्?[३]शीतला तनुर्यस्य तम्। क्षान्तिवशेनेति क्वचित्पाठः। इनः सूर्ये प्रभौ[४] **इत्यमरः** (३.३.१११)। [५]सन्तापः सञ्ज्वरः **इत्यमरः** [६](१.१.५७)। [७]विरोधाऽयमलङ्कारः।।२८।।

१.कुलिशादधिकविषमतरोऽसि-क.अधिकविषमोऽसि, ड.२.नास्ति-ड.३.शरीरसम्बन्धस्यामृतं-ड. ४.दैवतवैद्यकृत्य इति इ.मूलपाठः५.तदतिरिक्तचिकित्स्यां-इ.६.औषधमात्रादिना अर्थव्ययो न भवति-इ.७.नास्ति-अ.ब.८.नास्ति-ग.९.तापं-इ.ग.१०तद्विरहे अदादकं दाहकेन प्रतीयते-ग.ह.ज.११.नास्ति-अ.ब.इ.फ.ग.ह.ज.१२.क्लान्तिरसेन कामसन्तप्तरसेन मनसा त्वामेकमेव प्रियं ध्यायन्ती जीवत्येवेत्यर्थः ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२८।। एवंविधाऽपि राधा[८]त्वच्चिन्तनेनैव जीवतीत्याह, कन्दर्पेति। हे कृष्ण! अस्या राधायाश्चेतो मनश्चिरं चिरकालं चन्दनस्य[९]चन्द्रमसः कमलिन्याश्च चिन्तासु [१०] स्मरणेष्वपि ताम्यति म्लानं भवति; इदं महदाश्चर्यम्। कीदृश्या अस्याः? कन्दर्पज्वरेण कामतापेन यः सञ्ज्वरः पीडा तेनाकुला चञ्चला तनुः शरीरं यस्यास्तस्याः। किन्तु रहसि एकान्ते [११]स्थिताऽसौ राधा त्वामेवैकं असाधारणप्रियं वल्लभं ध्यायन्ती क्षणं मुहूर्तं क्षान्तिवशेन क्षान्त्यायत्ततया। त्वत्कान्तिवशेनेति पाठः। तदा तस्मिन् क्षणे[१२]नायातः क्षणान्तरे आगमिष्यतीति अनुरागेण कथं प्राणिति [१३]जीवतीति; कथमिति प्रश्ने। कीदृशी? क्षीणा[१४]कृशाङ्गी ।।२८।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२८।। कन्दर्पेति। कन्दर्पज्वरः तेन [१५]सज्वरा तापसहिता आतुरा रुग्णा तनुः शरीरं यस्यास्तस्या अस्याः राधायाः चेतः चन्दनं मलयजं चन्द्रमाः कर्पूरं इन्दुश्च कमलिनी च तासां चिन्तासु स्मरणेषु सन्ताम्यति क्लेशं प्राप्नोति। ज्वरातुरस्य चन्द्रचन्दनकमलानां शीतलत्वात्सन्तापजनकत्वं (न); राधा तु [१६] तानि निन्दतीत्याश्चर्यम्। किन्तु [१७]क्लान्तिवशेन क्षीणा रहसि स्थिता शीतलतनुं एकमेव प्रियं वल्लभं एकं पूर्वोक्तप्रकारेण ध्यानलयेन कृष्णं त्वां ध्यायन्ती कथमपि कृच्छ्रेण क्षणं प्राणिति जीवति त्वद्ध्यानवशेन जीवतीति कथनात् त्वदेकचिकित्सितसाध्यत्वं पूर्वश्लोकोक्तचिकित्सितस्य दृष्टप्रत्ययत्वम्। अत्र चन्द्रचन्दनकमलानामप्राकरणिकानां असहनरूपधर्मैक्यप्रतिपादनात्तुल्ययोगितालङ्कारः।।२८।।

१.नास्ति-अ.ब. २.क्षीणाङ्गा-ज. ३.शीतलतनुं विरहिजनस्य अन्तः-कृपालुतया शीतला शान्ता प्रेमास्यदा तनुर्यस्य तम्-ज. ४.इति विश्वः-इ.फ.ग.ह.ज. ५.तः ६.पर्यन्तो भागो नास्तिः-अ.ब. ७.विशेषोयमलङ्कारः-ज. ८.त्वच्चिन्तनेन-क. ९.चन्द्रस्य-ड. १०.स्मरणे यद्यपि-क. ११.स्थिता सा-क.म. १२.नागतः-क. १३.जीवति-क.ल.म. १४.कृशाङ्गीत्यर्थः-क. १५.कन्दर्पज्वरसज्वर इति-इ.मूलपाठः १६.तान्निन्दतीति-इ. १७.क्लान्तिवशेन इति-इ.पाठः

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२८।। कन्दर्पेति। कन्दर्प एव ज्वरस्तापकारित्वात्, तेन यः संज्वरः सन्तापस्तेनाकुला व्याकुला तनुर्यस्याः। एवंविधाया अस्याः राधायाश्चेतश्चित्तं कर्तृ चन्दनचन्द्रमःकमलिनीचिन्तासु चन्दनचन्द्रपद्मिनीनां स्मरणेषु चिरं बहुक्षणं ताम्यति ग्लायतीति। उपभोगस्तु सुदूरपराहत एवेत्याक्षेपलब्धोऽर्थः, तेषां दुःखजनकत्वानुभवात्। यो हि ज्वरसन्तप्तो भवति तस्य एतानि शीतलत्वात् सुखदानि भवन्ति। एतेषां स्मरणमपि

चित्तं व्यथयतीत्याश्चर्यम्। तथा च, सामान्याद्भूतं लक्षणम्, ''प्रकृतिर्विकृतिर्नृणां बुद्धीन्द्रियशरीरजाम्। अकस्माद्दृश्यते यस्य तस्य मृत्युं विनिर्दिशेद्।।'' इति। तदस्मिन् सन्निपाते कथं जीवतीत्याशङ्क्याह - किन्त्विति। केवलं क्लान्तिवशेन रहस्येकान्ते स्थिता सा एकमेव त्वां प्रियं ध्यायन्ती सती कथमपि कष्टकष्टेन क्षणमभिव्याप्य प्राणिति जीवति। सम्यक् निश्वसितीति यावत्। एकमेवेत्यनेनानन्यगतिः सा त्वयैवेति सूचितम्। सा किंविधा ? क्षीणा दुर्बला। त्वां किंविधाम्? शीतलतरमिति। चन्दनादयस्तु शीतलाः भवांस्तु तदपेक्षया प्रकृष्टशीतलः; अतो जीवतीति भावः। स्ववैद्यस्तापहारक इति बुध्वा तव ध्यानम्।।२८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२८।।श्रीकृष्णे तस्या अत्यन्तरागोद्रेकं कथयन्ती त्वदङ्गसङ्गमात्रसाध्यत्वमतिशयेनाह कन्दर्पेति। कन्दर्पज्वरेण यः सन्तापः तेनातुरतनोरस्याः श्रीराधायाः चेतश्चन्दनादीनां स्मरणेष्वपि चिरं संताम्यतीत्याश्चर्य्यं, स्पर्शादिकन्तु दूरे परिहृतमित्यर्थः यद्येवं तर्हि कथं जीवतीत्याह। त्वदागमनप्रतीक्षा क्षान्तिस्तत्र ये रसोऽनुरागस्तेन द्वामेकमेव प्रियं रहसि स्थिता ध्यायन्ती क्षीणापि कथमपि जीवति एकम् एव इति अनन्यगतिकत्वं सूचितम्। कीदृशं ? शीतलतरं चन्दनादयः शीतलाः शीतलतरः त्वत्स्मरणे ताम्यति त्वद्ध्याने जीवति इति आश्चर्य्यतरम् इति अभिप्रायः।।२८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२८।।एतदेव पुनः प्रकारान्तरवर्णनेन द्रढयति; कन्दर्पेति। हे नाथ! कन्दर्पसम्बन्धिनो विरहिजनेषु वर्धमाना ये ज्यरास्तेषां संज्वरः संधीभूतविविधशक्तियुक्तसन्तापः। 'सन्तापः संज्वरः समा' **इत्यमरः**। तेनातुरातिपीडिता तनुः, तानवातिशयेन प्रतिक्षणाविष्टशङ्कापादकं शरीरं यस्याः, अस्या राधायाश्चेतः, चित्तं चन्दनचन्द्रमः कमलिनीनां, मलयजेन्दुपद्मिनीनां सकलसन्तापहरत्वेनाति प्रसिद्धानामपि चिन्तासु, आस्तां तावद्दूरे दर्शनस्पर्शनादिकं प्रसङ्गादन्यकृतप्रस्तावो दितस्मरणमात्रेषु चिरसन्तापमिति अदृष्टपूर्वां ग्लानिमाप्नोति। ननु एवं चेत् तर्हि कथं जीवति तत्राह, किन्तु क्लान्तिवशेन चन्दनादिस्मरणसञ्जातक्लमवशेन शीतलतरं, तेभ्योऽपि अधिकशीतलमेकमेव प्रियं निजावमानकारिणमपि असाधारणप्रेमविषयं त्वां ध्यायन्ती रहसि स्थिता ध्यानभङ्गशङ्कया सखीनामपि अविदिते स्थाने निवसन्ती सती, क्षीणा लावण्यमात्रविशेषा कथमप्यतिकष्टेन क्षणं प्राणिति श्वसिति, श्वासमात्राधिगम्यजीवना भवतीत्यर्थः। चन्दनादिशीतलवस्तूनां ध्यानेन ताम्यति चेत् तर्हि ततोऽप्यधिकशीतलस्य तव ध्याने कथं जीवतीत्याश्चर्यम्।।२८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२८।। कन्दर्पज्वरेति; एतेन पूर्वप्रकटितं सन्तापं तज्जन्यं संज्वरं विवृणोति कविः। हे श्रीकृष्ण! कामज्वरः क्रमशो संज्वरेण; सन्धिज्वरेण परिणमति, अर्थात् क्रमवर्द्धमाने ज्वरे विविधशक्तिलक्षणपूर्णता दृश्यते। तेनातुरस्य प्रतिक्षणानिष्टशंकापादकं शरीरं भवति। तथाभूता श्रीराधा। तस्याः चेतः चित्तवृत्तौ। मलयजरजः चन्दनं इन्दु पद्मिनी इत्येतेषु संतापहारकप्रसिद्धपदार्थेषु चिन्तनेष्वपि मनसि अदृष्टपूर्वा ग्लानिं क्लान्तिमाप्नोति। अस्यां दशायां पुनः कथं कथमपि त्वच्छरीरशीतलतागोपने ध्यानं कृत्वा क्षीणप्राणा जीवति। प्रणयव्यापारे विरहसन्तापेषूपचारोऽपि विषायते इष्ट दर्शन-स्पर्शन-चुम्बनालिगंनादृते। आहोस्वित् परस्परविरुद्धवत् भाति यत प्रणयव्याधिः। अत्र शीतलेषु द्वेषेऽपि शीतलतर तनुं श्रीकृष्णं वाञ्छतीति कुम्भमतेन विरोधालंकारः। अद्भूतो रसः। शार्दूलविक्रीडितम् वृत्तम्।।२८।।

**२९-क्षणमपि विरहः पुरा न सेहे**
**नयननिमीलनखिन्नया यया ते।**
**श्वसिति कथमसौ रसालशाखां**
**चिरविरहेण विलोक्य पुष्पिताग्राम्।।२९।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२९।। हे माधवः! नयननिमीलनखिन्नया यया राधया पुरा ते तव क्षणमपि विरहो न सेहे कथमसौ चिरविरहे पुष्पिताग्रां रसालशाखां विलोक्य श्वसिति जीवत्याश्चर्य्यम्। त्वां कथं विधाता निमिषो निर्मितः येन कान्ति दर्शनं क्षणं क्षणं निहन्यत इति नयननिमीलनखिन्नयेत्यर्थः। "आम्रश्चूतो रसालोऽसा **वित्यमरः**।।" वृत्तं चास्य पुष्पिताग्रा।" लक्षणं तु, "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।।२९।।

इति श्रीकविराजनारायणदासविरचितायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां विरहोत्कण्ठितावर्णने सुस्निग्धमाधवो नाम चतुर्थः सर्गः।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२९।। इदानीं त्वदागमनहेतुं मनसि स्थिरीकृत्य प्राणितीत्याह क्षणमिति। हे माधव! यया राधया पुरा ते विरहः क्षणमपि न सेहे न सोढः। किंभूतया? नयननिमीलनखिन्नया नयननिमीलनेनापि खिन्ना सा तया। भवद्दर्शनान्तरे निमिषेऽपि या दुःखं प्राप्नोति,

असौ सांप्रतं चिरविरहेऽपि रसालशाखां चूतशाखां विलोक्य, कथं श्वसिति प्राणिति तन्न जाने। किंविधां रसालशाखाम्? पुष्पिताग्रां पुष्पिताग्रभागाम्। अत्र पुष्पितया चूतशाखया वसन्तो लक्ष्यते। वसन्ते हि विरहिणो न जीवन्तीत्यत्राकूतम्। सा कथं श्वसितीति चिरविरहेऽपि रसालशाखां विलोक्य। रसालो रससमूहो भवान्, तस्य शाखां अन्तिकं समीपं तां विलोक्य। किंविधां शाखाम्? पुष्पिताग्रां पुष्पितं संजातपुष्पमग्रमुत्तरकालो यस्याः सा ताम्। तवान्तिकं लप्स्ये इत्यभिकाङ्क्षया श्वसिति। अथवा, पुष्पिताग्रां चूतशाखां दृष्ट्वा श्वसितीति युक्तार्थः। एवंविधां चूतशाखां दृष्ट्वा स्मरशरजर्जरितशरीरः सोऽवश्यं मामेष्यतीति।। वृत्तमपि पुष्पिताग्रा।।२९।।

## (३) जगद्धरकृत- सारदीपिका

।।२९।। पुनरपि उद्दीपनविभावेन विरहोद्रेकं पुष्पिताग्रावृत्तेनाह। क्षणमिति हे कृष्ण! यया राधया ते वियोगः पुरा पूर्वं क्षणमपि न सेहे न सोढः। कीदृश्या राधया नयनयोर्नेत्रयोर्निमीलनेन निरन्तरदर्शनघाताच्चक्षुर्निमेषेण खिन्नया दुःखितया असौ राधा चिरविरहेण तव चिरवियोगे न कथं केन प्रकारेण श्वसिति जीवती न ज्ञायते किं कृत्वा वसन्ते पुष्पिताग्रभागो यस्यास्तां रसालस्यांम्रस्य शाखां विलोक्य दृष्ट्वा ।।२९।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२९।। ननु इयन्तं कालं यथा जीवति, तथाग्रेऽपि जीवतीत्यत आह, क्षणमिति। अनया राधया ते विरहः पुरा त्वत्सङ्गदशायां क्षणमपि न सेहे न सोढः। कीदृश्या? नयनयोर्निमीलनं निमेषस्तेन खिन्नया दुःखितया। किमिति धात्रा नयनयोर्निमेषः सृष्टः? यतः क्षणोऽपि जगदीश्वरमुखारविन्ददर्शने प्रत्यूहो भवतीति खेदयुक्तयेति भावः। असौ राधा चिरविरहेण कथं श्वसिति। जीवतीत्यर्थः। किं कृत्वा? पुष्पिताग्रां पुष्पितोऽग्रभागो यस्यास्तादृशीम्। रसालशाखां चूतशाखां विलोक्य दृष्ट्वा। श्वसितीत्यत्र 'वर्तमानसामीप्ये वर्तमानवद्वा' (पा. ३/३/१३१) इति लट्। छन्दोऽपि चेदं पुष्पिताग्रानामकमिति ध्वनितम्। तल्लक्षणं वृत्तरत्नाकरे 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति।।२९।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२९।। पुनरपि तस्या एव वृत्तान्तं साश्चर्य्यमाह। क्षणमपीति। हे केशव! नयनयोः निमीलितं निमेषः भावे निष्ठा तेन खिन्नया भवद्दर्शनप्रतिबन्धकनिमेषदुःखितयेत्यर्थः। एवंविधया यया राधया ते तव विरहो वियोगः। विरहलक्षणं तु,

कालक्षेपस्तु संप्राप्ते कार्य्यद्वारा विलम्बितः।
एकग्रामस्थयोर्यूनोर्विरहःसोऽभिधीयते।।

पुरा प्रथमकाले क्षणं क्षणमात्रमपि ''अत्यन्तसंयोगं द्वितीया'' न सेहे न षोढ़ः सहेः कर्मणि लिट्।

अतएव तन्मध्येन देशे लिटित्येतदभ्यासलोपौ सा राधिका इदानीं तव चिरविरहेऽपि चिरकालं विप्रयोगे सत्यपि पुष्पिताग्रां संजातपुष्पाग्रभागां रसालशाखामुद्दीपिकां सहकारशाखां विलोक्य वीक्ष्यापि कथं श्वसिति प्राणिति, जीवनहेतुभूतभवत्सन्निधानाभावेऽपि विरोधिनि च विद्यमाने प्राणधारणस्याश्चर्य्यकरत्वं सूचयितुं कथं शब्दप्रयोग इति भावः।

अतश्च शीघ्रं त्वया अनुग्राह्या इति भावः। विभावनालङ्कारः। श्वसितीत्यत्र पूर्ववदिड़ागमः। छन्दोऽपि पुष्पिताग्रावृत्तम्।।२९।।

इति श्रीगीतगोविन्दव्याख्याने चतुर्थसर्गविवरणम्।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२९।। पूर्वानुरागस्मरणपूर्वकं राधायाः कष्टजीवनमुपदर्शयति, हे कृष्ण यया राधिकया पुरा पूर्वं ते तव विरहः क्षणमपि न सेहे। कथम्भूतया? नयननिमीलनेन चक्षुर्निमिषेणापि खिन्नया दुःखितया तावत्कालदर्शनविधातदर्शनेनेति भावः। असौ सा सखी राधा चिरविरहेण चिरकालीनभवद्विश्लेषेण पुष्पिताग्रां रसालशाखां दृष्ट्वा कथं केन प्रकारेण श्वसिति जीविष्यति। श्वस प्राणने धातुः, वर्तमानसामीप्ये लट्। छन्दोऽपि पुष्पिताग्रा नामेति छलेनोपदर्शितम्।।२९।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२९।। नन्वे तावत्कालं जीविताऽग्रेऽपि न [१] मरिष्यतीति किं [२]मदनुग्रहेणेत्यत्राह, क्षणमिति। [३] यया श्रीराधया पुरा सङ्गदशायां [४] रहः एकान्ते ते तव विरहः[५]क्षणमपि न सेहे न सोढः। कीदृश्या? [६]नेत्रनिमेषेण खिन्नया प्राप्तदुःखया। असावेवं[७] भूता श्रीराधा रसालशाखां [८]रसालस्याम्रस्य शाखां पुष्पिताग्रां पुष्पितशिखरां विलोक्य[९]चिरविरहेण चिरकालवियोगेन कथं केन[१०] प्रकारेण श्वसिति [११] जीवति। श्वासमात्रेण जीवनं नत्ववयवादिप्रचलनमिति भावः। पुष्पिताग्रामिति [१२]वसन्तागमनेन- [१३]हृत्कामोदयोत्पन्न इति ध्वनिः। श्वसितीति परम [१४]साहसमिति सूचितम्। विरोधालङ्कारः।।२९।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२९।। क्षणमिति। हे कृष्ण! यया राधया ते विरहो [१५] वियोगः पुरा पूर्वं क्षणमपि न सेहे न सोढः। कीदृश्या राधया? नयनयोर्नेत्रयोर्निमीलनात् निरन्तरदर्शनना-

शाच्चक्षुर्निमेषे खिन्नया दु:खितया। असौ राधा विरहेण तव चिरवियोगेन कथं श्वसिति न ज्ञायते। किं कृत्वा ? पुष्पिताग्रां रसालशाखां आम्रशाखां विलोक्य।।२९।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२९।। क्षणमिति। नयननिमीलनेन निमेषेण खिन्नया यया राधया ते तव विरह: क्षणमपि पुरा प्राक् न सेहे असौ राधा पुष्पितानि अग्राणि यस्यां तां रसालशाखां चूतलतां विलोक्य चिरविरहेण बहुकालवियोगेन

कथं श्वसिति जीवति। क्षणविरहमसहमानाया: रसालोद्दीपितविरहाया: जीवनं न स्यादिति भाव:। पुष्पिताग्रामिति वृत्तनाम कथितमिति मुद्रालङ्कार।।२९।।

१.मरिष्यति-इ.फ.ग.ह.ज. २.मदनग्रहेणेति तत्राह-इ.फ.ग.ह.ज. ३.त:५.पर्यन्तो भागो नास्ति-इ. ४.रहसि-ग. ६.नेत्रनिमेषेणावसन्नया-इ.नेत्रनिमीलनेन निमिषेण उन्मेषरहितेन अवसन्नया प्राप्तदु:खया-ज. ७.गता-ज. ८.रसालशाखां आम्रशाखां-इ.फ.ह.ज.रसालशाखां-ग. ९.नास्ति-अ.ब. १०.करणेन-ग. ११.नास्ति-अ.ब. १२.वसन्तोद्गमेन-फ. १३.हृत्कामोदयोत्पत्तिरिति-ज. १४.साहसाचरणमिति-इ.फ.ग. १५.नास्ति-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२९।। क्षणमित्यादि। हे कृष्ण! पुरा पूर्वं यया राधया ते तव विरह: क्षणमपि न सेहे न सोढ:। किं विधया ? नयननिमीलितखिन्नयेति। नयनयोर्निमीलनेन अपि खिन्नया दीनया अर्थात् या चक्षुषो: निमेषकालेऽपि त्वद्दर्शनाभावात् विरहेण खिद्यते। एतस्मात् पूर्वम् इदानीम् असौ मत्सखी चिरविरहेऽपि पुष्पिताग्रां१०३ कुसुमिताग्रभागां रसालशाखां विलोक्य कथं श्वसिति जीवतीत्याश्चर्यम्। कथमाश्चर्ये। सापि साम्प्रतं जीवतीत्याश्चर्यप्रतीति:। वृत्तं चास्य पुष्पिताग्रा। ''अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा'' इति।।२९।।

इति श्रीगीतगोविन्दटीकायां चतुर्थसर्गविवरणम्।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२९।।अति व्याकुलतया सदैन्यमाह- क्षणमिति। हे माधव! नयनयोर्निमेषमात्रेण हा कथं नयने निमेषो निर्मित: येन क्षणं कान्तदर्शनं विहन्यते इति नयननिमीलनखिन्नया यया श्रीराधेया पुरा ते तव विरह: क्षणमपि न सेहे न सोढ़:, असौ चिरविरहेण मुकुलिताग्रभागयुक्तां रसालशाखां विलाक्य कथं जीवति इदमप्याश्चर्य्यं निमेषविरहासहनशीलायाश्चिरविरहसहनमप्याश्चर्य्यमेव इत्यर्थ:।।२९।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।२९।। एवं दुरन्तदशामारूढायास्तस्या सम्प्रति जीवनप्रतीतिरस्माकं न जायत इत्याह, क्षणमिति । हे नाथ! यया राधया पुरा पूर्वस्मिन् काले परमजीवातु भूतस्य ते तव विरहः क्षणमात्रमपि न सेहे, न सोढुं शक्यते स्म। क्षणमिति अत्यन्तसहयोगे द्वितीया। कीदृश्या, नयननिमीलनखिन्नया, हा कथं विधात्रा नयनयोर्निमेषो निर्मितो येन प्रियदर्शनं विहन्यते, इति नयननिमीलनमात्रेण प्राप्तखेदया, सा असौ चिरविरहेण पुष्पिताग्रां, पुष्पितारेपरिभागां रसालस्य शाखां विलोक्य कथं श्वसिति, श्वासमात्रैक-सम्बन्धजीवना सम्प्रति कथं वर्त्तते, न जानामीति भावः। आक्षेपोविभावना च ध्वनिः। छन्दोऽपि पुष्पिताग्रा।।२९।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।२९।।क्षणमपि विरहेति; या राधा कदाचिदपि त्वद्विरहं पलकमात्रं सोढुं न समर्था। यस्यास्तवपलकपातेन जातविरहमपि असहनीया भवति। सा खलु कथंचित् आम्रवृक्षस्य पुष्पं दृष्ट्वा वसन्तागमे त्वमवश्यमागमिष्यसीति आशास्य जीवति।। यथा आम्रवृक्षस्य पुष्पाग्र दर्शनेन फलमवश्यंफलिष्यन्तीति आशास्यते, तथैव श्रीकृष्णागमनहेतुकां वार्तां सखीमुखात् निशम्य आशाकुसुमं सफली भविष्यतीति आशयः। आशाबन्धः कुसुम सदृशमिति कवेः कालिदासेक्तिः विशिनष्टिः। सांकेतिकतया तथा मुद्रालंकारमाश्रित्य पुष्पिताग्रा वृत्तिरेवोपवुयुञ्जतेकविः। पुष्पिताग्रावृत्तम्।।२९।।

**२९-क - वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं**
**विभ्रद्वल्लववल्लभामिरधिकानन्दाच्चिरं चुम्बितः।**
**दर्पेणेव तदार्पिताधरतटीसिन्दुरमुद्राङ्कितो**
**बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः।।२९-क।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।२९-क।। इदानीं 'मङ्गलान्तानि च शास्त्राणि प्रथन्ते' इति न्यायमाचरन् कविराशिष-माह, वृष्टीति। कंसद्विषः कृष्णस्य वाहुर्भवतां श्रोतृणां श्रेयांसि तनोतु । किं कुर्वन्? उद्धृत्य गोवर्धनं गिरिं बिभ्रत् । कस्मात्? दृष्टिव्याकुलगोकुलावनरसात्। वृष्ट्या व्याकुलं यद्गोकुलं तस्य यदवनं पालनं तत्र रसो रागो वीर्य वा तस्मात्। पुनः किंभूतो बाहुः? बल्लववल्लभाभिर्गोपाङ्गनाभिरधिकानन्दाच्चिरं चुम्बितः। पुनः किंभूतो बाहुः?

तदर्पिताधरतटीसिन्दूरमुद्राङ्कित:। ताभिश्चुम्बनार्थमर्पिता या अधरतटी तस्या: सिन्दूरमुम्बदेव शोणिततत्वेनाङ्कित:।उत्प्रेक्षते, गोवर्धनोद्धरणलक्षणजातगर्वेणेव शोणित:। किंविधस्य कंसद्विष: ? गोपतनो: गोपस्य तनुरिव तनुर्यस्य स:; गोपवेषस्येत्यर्थ:। अत्राद्भुतो रस:।उत्प्रेक्षोपमे अलंकृती ।शार्दूलविक्रीडितं वृत्तम्।।२९-क।।

''मालवश्री: स्मृतो रागस्तालो नि:सारसंज्ञक:।
वाग्गेयकारनामाङ्कपदतस्तेन सन्तति:।।
तत: पाटा: पदानि स्यु: पञ्चषाणि रसोऽत्रय:।
शृङ्गारो वासुदेवस्य क्रीडनं रासकादिभि:।।
छन्दोऽपि रासको ज्ञेयं स्वेच्छया वा कृतं भवेत्।
स्निग्धमधुसूदनोऽयं रासावलयनामक:।
प्रबन्ध: पृथिवीभर्त्रा प्रबद्ध: प्रीतये हरे:।।

इति स्निग्धमधुसूदनरासावलयनामा नवम: प्रबन्ध:।'' इत्ययं नवमप्रबन्धस्य टीकांशो ज्ञेय:।।

एकस्तावदनूनधन्विविषयस्वीकारलक्ष्योऽपर:
स्फूर्जद्दुर्जरशूरनायकजयप्रोद्दामिताडम्बर: ।
हृष्यन्मालवमूलकोषणविधौ सर्गस्तृतीय: कृत-
स्तुर्य: कुम्भमहीभृतात्र विवृतौ श्रीगीतगोविन्दत: ।।

इति श्रीगयाविमुक्तिस्थलकल्पितपितृकुलविमुक्तिदेन श्रीचित्रकूटाधिपतिना विरचिते गीतगोविन्द- विवरणे स्निग्धमधुसूदनो नाम चतुर्थ: सर्ग: ।।२९-क।।

## (३) जगद्धरकृत- सारदीपिका

।।२९-क।।इदानीं कथोपक्रमं त्यक्त्वा कविर्भक्तानाशिषयति शार्दूलविक्रीडितवृत्तेन वृष्टीति गोपतनोर्गोपशरीरस्य कंसद्विष: कृष्णस्य बाहुर्हस्त: भवतस्तव भक्तस्येत्यर्थ: श्रेयांसि कल्याणानि तनोतु विस्तारयतु।कथंभूत: बाहु: वृष्ट्या जलवर्षेण व्याकुलस्य दु:खितस्य गोकुलस्य गोपसमुहस्य अवनं पालनं तत्र रसानुरागो वीर्यं वा तस्मात् गोवर्द्धनं पर्वतम् उधृत्य चिरं सप्ताहं बिभ्रत् धारयन् पुन: कीदृश: वल्लवीभि: गोपीभिरधिकानन्दं ददाति ।हर्षाश्रुवित: कन्दर्पेण कामवशात्ताभिर्गोपीभि: अर्पिता: स्थापिता: अधरतर एव सिन्दूरचिह्नातिलोहितत्वात् तैरङ्कितचिह्नित: स्निग्धित: स्नेहवान्।।२९-क।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां स्निग्धमाधव नाम चतुर्थः सर्गः ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२९-क।। वृष्टिव्याकुलेति। कंसद्विषः श्रीकृष्णस्य बाहुः भवताः शुश्रूषोः कल्याणानि श्रेयांसि तनोतु विस्तारयतु। अन्योऽपि हस्तेनैव दित्सितं प्रयच्छतीति बाहोः कर्तृत्वम्; सामर्थ्यसूचनार्थमत्र 'कंसद्विट्' पदोपादानम्। कथं ? तस्य गोपतनोः परमोदारश्रीगोपराज-कुलोत्पन्नस्य दातृत्वं दर्शयति, उद्धृत्य गोवर्धनगिरिं बिभ्रत्। कुतः ? वृष्ट्या व्याकुलं यद्गोकुलं तस्य यदवनं पालनं तत्र रसो रागो वीर्यं वा तस्मात्। कथंभूतो बाहुः ? बल्लववल्लभाभिर्यत्प्रियाभिरधिकानन्दाच्चिरं चुंबितः। पुनः कीदृशः ? दर्पेण सौभाग्यमदेन ताभिश्चुंबनार्थमर्पिता या अधरतटी तस्याः सिन्दूरवद्रक्तमुदास्ता-भिरंकितश्चिह्नितः। शार्दूलविक्रीडितं वृत्तम्।।२९-क।।

क्व सर्वशास्त्रार्थविचारचातुरी क्व काव्यटीकाव्यसनैर्दिनव्ययः।
तथापि कृष्णस्मरणोत्सवो बलाद्विधातुमस्मान्व्यवसाययत्यदः।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जर्याख्यायां चतुर्थः सर्गः।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२९-क।। ग्रन्थप्रक्रमं त्यक्त्वा सर्गान्ते सभासदामाशिषमाह, कंसद्विषः कृष्णस्य बाहुर्भवतः सामाजिकानां श्रेयांसि कल्याणानि वितनोतु विस्तारयतु। कीदृशस्य कंसद्विषः ? गोपतनोः गोपत्वविशिष्टा तनुः शरीरं यस्य स गोपतनुः, तस्य। अत्र कंसमहासुरद्वेष्टत्वस्य गोपशरीरत्वस्य च प्रतिपादनेन हरेर्माहात्म्यविशेषो दर्शितः। बाहुः कथम्भुतः ? वृष्ट्या जलवर्षेण व्याकुलस्य दुःखितस्य गोकुलस्य गोसङ्घस्य वलवशाद्रक्षणीच्छया गोवधनमुद्धृत्य उत्ताल्य चिरं चिरकालं व्याप्य विभ्रद्दधानः। अवनरसादिति क्वचित् पाठः। तत्पक्षे अवणं रक्षणं ततो यो रसः अनुरागः तेनेत्यर्थः। अव रक्षणे धातुः। पुनः किम्भूतः ? अतएव वल्लववल्लभाभिर्गोपवधूभिरधिका-नन्दादतिहर्षाच्चुम्बितः। कीदृश इव ? दर्पेण बलातिरेकेन हेतुना ताभिरर्पितास्तदर्पिताया अधरतट्य ता एव लोहितत्वात् सिन्दुरमुद्रास्ताभिरङ्कित इव चिह्नित इव गोपीभिरित्यर्थात्। तथा चायंसकलापेक्षया दर्पिष्ठ इत्यवधार्य गोपीभिर्निजाधरतटीनामर्पणव्याजेन सिन्दूरमुद्राभिर्मुद्रित इत्युत्प्रेक्षालंकारः। 'वश आयत्ततायां स्याद्वश इच्छाप्रभुत्वयोरि'ति

विश्वः। स्निग्धः सखीकृतानुनयेन स्नेहवान् मधुसूदनो वर्णनीयतया यत्रेति व्युत्पत्या स्निग्धमधुसूदनेति प्रकृतसर्गनाम।।२९-क।।

इति समस्त प्रक्रियावराजमानमहाराज शुक्रध्वजावरचितायां सारवत्यां गीतगोविन्दटीकायां चतुर्थः सर्गः।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२९-क।। सम्प्रति श्री राधावलम्बनाय [१] भक्तावलम्बनाय वा कविवाक्येन सखी श्रीकृष्ण [२] बाहुं स्तौति -[३] वृष्टीति। गोपतनोः श्रीकृष्णस्य बाहुर्भवतः श्रीराधालक्षणस्य [४] जनस्य च शुश्रूषोः-[५] सखी [६] ब्रूतेश्रेयांसि विरहव्याधि[७]नाशकानि कल्याणाति(नि) तनोतु [८]विस्तारयतु। कीदृशस्य ?[९] कंसद्विष : [१०] कंसस्य दैत्यस्य द्विषः शत्रोः। सखीपक्षे श्रीराधाविरहेण सुखवैरिण इति वा। बाहुपदं श्री राधाऽऽलिङ्गनार्थमिति भावः। कीदृशः ? वृष्ट्या व्याकुलस्य [११] दुःखितस्य गोकुलस्य [१२]गोसमूहस्यावनं पालनं स एव रसो रागो वीर्यं वा तस्माद् [१३] गोवर्धनाचलमुद्धृत्य चिरं सप्ताहं बिभ्रत् दधत्। कीदृशो बाहुः ? वल्लववल्लभाभिर्गोप [१४] वधूभिरधिकानन्दादतिहर्षात्[१५] रासरसादौ गोवर्धनोद्धरणसमये वा चुम्बितः। पुनः कीदृशः ? दर्पेण कन्दर्पगर्वेणैव ताभिरर्पिता दत्ता अधर[१६] तट्य एव[१७] सिन्दूरमुद्राः सिन्दूरचिह्नानि तैरङ्कितः। [१८]अधरतट्या-लोहितत्वात् सम्भोगचिह्नाङ्कित इत्यर्थः। [१]तथा श्रीराधानुरागेण चिह्नित इति वा सखीपक्षे।।२९-क।।

तं वन्दे परमानन्दं माधवं भक्तवल्लभम्।
श्रीराधा [२] सखिवाक्येन प्रेम्णा च परिपूरितम् ।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस [३] शिवदासात्मजश्रीवनमालिभट्ट विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां स्निग्धमधुसूदनो नाम चतुर्थः सर्गः।।

१.नास्ति-अ.ब.२.वाक्यं-अ.ब.३.नास्ति-फ.ग.४.नास्ति-इ.फ.ग.ह.ज.५,६. नास्ति-ज.७.नाशनानि-इ.८.विस्तारयतु इति सखी ब्रूते-ज.९.नास्ति-अ.ब.१०.दैत्यवैरिणः-गोवर्धनमुद्धृत्य-ग.१४.सुन्दरीभिः-इ.फ.ग.ह.ज.१५.रासरक्तेः-इ.१६.नद्य-इ.१७.सिन्दूरस्य मुद्राः-इ.फ.ग.ह.ज.१८.अधरलोहितत्वात्-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२९-क।। इदानीं कथोपक्रमं त्यक्त्वा [४] कविः भक्तान् प्रत्याशिषं ब्रूते-वृष्टीति। गोपतनोर्गोपशरीरस्य कंसद्विषः श्रीकृष्णस्य बाहुर्हस्तः[५]भवतां युष्माकं; भक्तानामित्यर्थः; श्रेयांसि कल्याणानि तनोतु। कीदृशो बाहुः ? [६] वृष्ट्या जलवर्षेण व्याकुलस्य दुःखितस्य

गोकुलस्य गोपसमूहस्यावनवशाद्रक्षणानुरागात् गोवर्धनं पर्वतं उद्धृत्य चिरं सप्ताहं बिभ्रत्। पुनः कीदृशो बाहुः? वल्लवसुन्दरीभि [७] र्गोपाङ्गनाभिरधिकानन्दा-दतिहर्षाच्चुम्बितः। पुनः[८]कीदृशः? कन्दर्पेण कामवशात्ताभिः [९]स्त्रीभि रर्पिताः स्थापिता दत्ता अधरतट्य एव सिन्दूरमुद्राः सिन्दूरचिह्नानि लोहितत्वात्तैरङ्कितश्चिह्नितः। [१०]स्निग्धः स्नेहवात् (न्) ।।२९-क।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२९-क।। (वृष्टीति।) वृष्टिभिः व्याकुलं गवां यत्र गोकुलं तत्र व्रजाख्यघोषञ्चास्ति प्राणिमात्रं तस्य अवनं रक्षणं तस्य अवनं रक्षणं तस्य वशात् अधीनतः। गोवर्धनःगाः वर्धयति संरक्षतीति भाविसंज्ञावन्तं पर्वतं बिभ्रत् धरन्। वल्लववल्लभाभिः गोपाङ्गनाभिः अधिकः उद्रिक्तः[११] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां (स्निग्ध मधुसूदनो नाम) चतुर्थः सर्गः।।२९-क।।

१.तथा श्रीराधाया अनुरागेण-इ.तया श्रीराधयानुरागेण-फ.ग.ह.ज. २.सखी-इ.फ.ग.ह.ज. ३.श्री शिवदासपण्डितात्मज-फ.ग.ह.४.नास्ति-ड.ल.म.५.भवतस्तव भक्तस्येत्यर्थः-ड.६.वृष्ट्या व्याकुलं यद् गोकुलं तस्यावनवशाद्रक्षणवशाद् गोवर्धनाख्यं गिरिमुद्धृत्य सप्ताहं बिभ्रत् धारयत्-क.७.गोपीभिः-क.८.नास्ति-ड.९.गोपीभिः-क.१०.नास्तिदं पदद्वयम्-क.११.इति नारायणपण्डितकृते पदद्योतनिके चतुर्थः-ड. गीतगोविन्दटीकायां चतुर्थः सर्गः-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२९-क।। अवश्यमेवास्मद्गोकुलजनरक्षणव्रती श्रीगोपेश कुमाराड़यं मम सख्या विरहतापमपि निवारयिष्यतीति निश्चित्य श्रीराधासखी श्रीगोवर्द्धनधारणलीलां स्मरन्ती स्वसखीसान्त्वनाय चलितैत स्मरन् तल्लीलैकाश्रयं श्रीकृष्णबाहुं वर्णयन् कविराशिष-माशस्ते वृष्टीति। श्रीगोपेन्द्रसूनोर्वाहुर्भवतां श्रेयांसि तनोतु। कीदृशः? दर्पेणाहङ्कारेणैव अर्थाविन्द्रस्य विजिगीषया गोवर्द्धनाचलमुद्धृत्य विभ्रत्। तत्रहेतुः वृष्ट्या व्याकुलस्य गोकुलस्य रक्षणे यो रसः बीररसस्तस्मात्। पुनः कीदृशः? गोपाङ्गनाभिः श्रीकृष्णस्य वैदग्ध्यसौन्दर्य्यादिकमुद्वीक्ष्याधि कानन्दाच्चिरं चुम्बितः। तत्रोत्प्रेक्ष्यते, तच्चुम्बना-ल्लग्नललाटसिन्दूरेण मुद्रयाङ्कित इव अतएव श्रीराधावैकल्यश्रवणेन स्निग्धश्चेष्टारहितो मधुसूदनो यत्र स इत्ययं सर्गः।।२९-क।। इति बालवोधिन्यां चतुर्थः सर्गः।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२९-क।।अथ कविः परमकल्याणगुणवारिधेः श्रीकृष्णस्य व्रजसम्बन्धिजनसामान्येष्वीदृक्प्रणयशालिता किमुत परमप्रेयसीभूतायां श्रीराधायामिति प्रकाशयन् कृष्णौदासीन्यशङ्काकलङ्कितान्तःकरणभक्तजनान् प्रति बोधयितुं श्रीगोवर्द्धनोद्धरणलीलामुपक्षिपन् तेन च तेषामाशिषं प्रयुञ्जानः उत्तरलीलावर्णनोत्सुकः सर्गमुपसंहरति वृष्टीति । गोपशिशोः श्रीनन्दनन्दनस्य कंसद्विषः कंसशत्रोर्बाहुर्वामभुजदण्डः भवतां श्रेयांसि मङ्गलानि तनोतु विस्तारयतु । कीदृशः, वृष्टिभिः इन्द्रकृतातिवृष्टिभिर्व्याकुलस्य गोकुलस्य, गोकुलस्थितजनमात्रस्यावने रक्षणे यो रसोऽभिलाषस्तस्मात् गोवर्धनं गिरिराजमुद्धृत्य बिभ्रत् छत्राकारतया दधत्, पुनः कीदृशः, वल्लववल्लभाभिर्गोपललनाभिरधिकानन्दात्, तन्माधुर्यसौन्दर्यादिदर्शनोच्छलितप्रमोदाच्चिरं चिरकालमभिव्याप्य चुम्बितः । किं च स्निग्धः गुरुभाराक्रान्तोऽपि शोभायुक्त इत्यर्थः। अत एव ताभिः स्व स्वाधरतटे कामवशेनार्पितो योजितः सन् तासां ललाटसिन्दूरमुद्रयाङ्कितश्चिह्नितः। अत एवायं सर्गोऽमन्दः सदा प्रेमसम्पन्नहृदयः मधुसूदनो यत्र स इति नाम । तन्नामाऽयं सर्गः।।२९-क।।

।। इति श्रीगीतगोविन्दव्याख्यायां रसिकरङ्गदाख्यायां चतुर्थसर्गः समाप्तः।।

इति श्रीगीतगोविन्दमहाकाव्ये जयदेवकविरचितोऽमन्दमधुसूदनो नाम चतुर्थसर्गः।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२९-क।। वृर्ष्टिव्याकुलेति; इन्द्रस्य कोपेन प्रवलवारिपातेन भयभीतस्य विक्षिप्तस्य गोपस्य गौगोपालकुलस्य् यः कृष्णः निश्चितरक्षाकारी आसीत्। गोप्यः प्रेम्णा यस्मिन् बाहौ चुम्बनालिङ्गनेन अधरपल्लवरागेण रञ्जितम्, पृथिवीतः स्वस्य बाहुभ्यां गोवर्द्धनमुद्धृत्य इन्द्रस्य औद्धत्यं विनाशाय तथा गोपाङ्गना चुम्बिताभ्यां रञ्जिताधररागपटलाभ्यां रक्षिताः भयार्त्ताः गोपगोपालाः। एवम्भूतस्य रक्षकस्य कंसघातकस्य तद्वाहुद्वयं भवतां भक्तजनानां श्रेयांसि श्रेष्ठवर्गं सर्वश्रेष्ठलक्ष्यं नाम भगवत्प्राप्तिं वितनोतु। इत्येवमाशीर्वचोभिः समाप्यते चायं सर्गः।।२९-क।।

श्रीकृष्णचन्द्रचन्द्राय गोगोपालान् जुगोपने।
सर्वलोकस्य सन्तापप्रशान्ताय नमो नमः।।

इति कवि:श्रीप्रफुल्लमिश्रविरचितायां स्वर्णलताख्यटिप्पण्यां चतुर्थ सर्गः।।

इति श्रीगीतगोविन्दे स्निग्धमाधवो नाम चतुर्थः सर्गः।।

❀ ❀ ❀

# ।। पञ्चमः सर्गः ।।

## साकांक्षपुण्डरीकाक्षः



## ।। पञ्चमः सर्गः ।।

।साकांक्षपुण्डरीकाक्षः।

**३०- अहमिह निवसामि याहि राधाम्**
**अनुनय मद्वचनेन चानयेथाः।**
**इति मधुरिपुणा सखी नितुक्ता**
**स्वयमिदमेत्य पुनर्जगाद राधाम् ।।३०।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३०।। अस्यां गाथायां अभिसारिका वर्णनीया। अस्याः लक्षणम्;

लज्जां हित्वा समाकृष्टा यौवनेन व्रजेत्तु या।
अभिसारगतं कान्तं कीर्त्तिता साभिसारिका।। इति **भरत**।।

पुनरस्याः स्वरूपमुक्तम्;

या दूतिका वचनतः स्वत एव वापि
गाढस्मरज्वरभरार्त्तिपिपासितेव।
निर्याति वल्लभजनाधरपानलोभात्
सा कथ्यते कविवरैरभिसारिकेति।।

कविवरैः सा नायिका अभिसारिकेति कथ्यते। दूतिवचनतःस्वत एव वल्लभजनाधरपानलोभान्निर्याति। उत्प्रेक्षते स्मरज्वरपिपासितेव। उत्तरगीतस्य तात्पर्य्यार्थं श्लोकेन दर्शयति। उपर्य्युक्तवचसा राधिका सख्यनुनीतेन मधुरिपुणा नियुक्ता सखीस्वयमेत्य राधां पुनर्जगादेति वाक्यार्थः। किमुक्त्वा हरिणा नियुक्ता सखीत्याह ।।३०।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३०।। इदानीं सखीनिवेदितो माधवस्तदभिमुखीभूय तदानयनाय सखीं प्रहितवान्। अयमिति। सेत्यध्याहार्यम्। या पूर्वं प्रहिता राधया सखी सैव स्वयमेव पुना राधामेत्य वक्ष्यमाणं जगाद। किंभूता सखी ? मधुरिपुणा इति नियुक्ता इत्यादिष्टा । इतीति किम् ? अहमिह यमुनाकुञ्जे निवसामि। 'यावदागमिष्यति तावत्प्रतीक्षां करिष्ये' इति । त्वं याहि, मद्वचनेन राधामनुनय, अनुनीय च आनयेथाः। पुष्पिताग्रावृत्तम्।।३०।।

### (३) जगद्धरकृत- सारदीपिका

।।३०।। इदानीं कृष्णप्रेरिता सखी राधामाह अहमिति इति मधुरिपुणा कृष्णेन नियुक्ता प्रेरिता सखी स्वयमेत्य इदं वक्ष्यमाणं, राधां पुनर्जगाद उक्ता इतीति । किं हे सखि अहमिह कुञ्जे निवसामि स्थितोऽस्मि त्वं राधां प्रति याहि अनुनय च सान्त्वय मद्वचनेन मद्वचसा राधामानयेथाश्च आनयस्व इति ।।३०।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।३०।।अहमिति ।मधुरिपुणा इति एवंप्रकारेण नियुक्त आज्ञप्ता सखी स्वयमेत्यागत्य राधां वक्ष्यमाणं जगादोवाच। इति किम्? त्वं राधां याहि मद्वचनेन तामनुनय । कृतापराधेन मया साक्षाद्वक्तुं न शक्यते, अतो माधवेनैवमेवमुक्तमित्युक्त्वा त्वमनुनयेति भाव: । तां च मदन्तिकमानयेथा आनय। ननु कुत्र मयानेया इत्यत आह; अहमिह निवसामि, इहैव कुञ्जेऽहं तां प्रतीक्षमाणस्तिष्ठामीत्यर्थ:।।३०।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३०।।अथ सखी विज्ञापनकौशलेन द्रवीभूतचेता माधव: सप्रसादं तामाह।अहमिति। हे सखि! अहं इह वानीरकुञ्जे निवसामि तिष्ठामि। त्वं तु राधां प्रति याहि गच्छताम् अनुनय मद्वचनं प्रीतिपूर्वभवद्वचनेन प्रार्थयस्वेत्यर्थ:।अन्यथा मद्वचनेन अनन्तरं मद्वचने तामानयेथा: आनय।अथवा अनुनयपूर्वकं मद्वचनपरिपाट्येवानुनयेथा इत्यन्वय:। इति पूर्वोक्तप्रकारेण मधुरिपुणा श्रीकृष्णेन सखी नियुक्ता सती प्रेरिता सती पुनर्भूय: एत्य राधासमीपमागत्य राधा स्वयमिदं वक्ष्यमाणं जगाद उक्त-वती।।३०।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।३०।। कृष्णप्रेरिता सखी राधां यत् प्राह तद् वर्णयितुं प्रसङ्गमवतारयति। सैव सखी पुनरेत्य पुनरागत्य इदं वक्ष्यमाणवचनं राधां जगाद। कीदृशी ? अहम् इह यमुनातीरे निकुञ्जे निवसामि तिष्ठामि त्वं याहि गच्छ मद् वचनेन राधामनुनय प्रबोधय पुनरनुनयानन्तरम् आनयेथा: तामित्यर्थात् इत्यनेन प्रकारेण मधुरिपुणा स्वयमात्मनैव नियउक्ता आज्ञप्ता। तदनेन त्वरातिशयेन राधायां कृष्णस्य रागातिरायो दर्शित:। अस्मिन् सर्गे अभिसारिका नायिका। तस्या लक्षणम्, 'लज्जां कृत्वा समाकृष्टा यौवनेन मदेन वा। याभिसारयते कान्तं कीर्तिता साभिसारिका।।' ।।३०।।

गीतस्यास्य देशिवराडिराग:। रूपकताल:। रागलक्षणं; विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन। स्कन्धे दघाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराडी।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३०।। पञ्चमे प्रेम[३]जनितं तद्विश्लेषविचेष्टितम्।
निशम्य प्रेषयामास तत्सखीं च[४]तदन्तिकम्।।

सम्प्रति श्रीकृष्णनियुक्ता सखी राधामाह। अहमिति। इत्येवं मधुरिपुणा[५] श्रीकृष्णेन नियुक्ता प्रेरिता सखी पुनः राधां स्वयमेत्य गत्वा इति वक्ष्यमाणं जगादोवाच। इति किम्? हे सखि! त्वं याहि गच्छ कुञ्जे दुःखश्रवणाद् गन्तुमशक्तोऽहं निवसामि तत्प्रतीक्षां करिष्यामि। ननु सा मानवती स्वयमेव गत्वा[१]प्रार्थ्यताम्; कृतापराधेन मया [२]समक्षं वक्तुं न शक्यते; अत एव त्वं मद्वचनेनानुनय[३]शान्तय। मत्समी पञ्चानयेथाः [४]आनय च। विभावनालङ्कारः।।३०।।

१.यथा तथा-इ.२.इति गीतगोविन्दे स्निग्धमधुसूदनो नाम चतुर्थः सर्गः-इ.पञ्चमः सर्गःसाकाड;क्षपुण्डरीकाक्षः ३.जनित-फ.ज.४.तदन्तिके-ज.५.श्रीराधाकृष्णेन-ग.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।३०।। इदानीं कृष्णप्रेरिता सखी राधामाह। अहमिति। इति मधुरिपुणा कृष्णेन[५]नियुक्ता प्रेरिता सखी स्वयमेवैत्यागत्य इदं वक्ष्यमाणं राधां पुनर्जगाद ऊचे। इतीति किम्? हे सखि! अहं [६] इह [७] निकुञ्जे निवसामि स्थितोऽस्मि त्वं राधां प्रति याहि अनुनय वशं नय मद्वचनेन मम वचसा राधामानयेथाः आनयस्वेति।।३०।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।३०।। एवं चतुर्थसर्गे राधावस्थां वर्णयित्वा कृष्णावस्थां वर्णयितुं राधासखीं प्रति कृष्णवाक्यं रचयति -अहमिति। हे सखि! अहं इह कुञ्जे निवसामि, त्वं याहि; मद्वचनेन मद्वाक्येन राधां अनुनय। प्रणिपातादिना मां निशामय। किञ्च राधां आनयेथाः आनयस्व। इति उक्तप्रकारेण मधुरिपुणा माधवेन नियुक्ता आज्ञापिता प्रेषिता सखी एत्य प्राप्य राधां पुनर्जगाद उवाच। पुनरिति सखीवचने एकवारं कृष्णं प्रत्युक्तं पुना राधां प्रतीति। यद्वा पुनरित्यावृत्यागत्य जगाद। पुष्पिताग्रवृत्तम्। अत्रापि कारकदीपोऽलङ्कारः। याहि अनुनय आनयेति त्रयाणां तिङां त्वमित्यनेन सम्बन्धात्।।३०।।

१.प्रार्थिता-इ.प्रार्थ्यतामिति चेत्-ज.२.नास्ति-अ.ब.३.सान्त्वय-फ.४.आनयस्व-इ.फ.ग.ह.ज. ५.यउक्ता-ड.६,७.नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३०।।अहमिहेत्यादि ।राधिकासख्या पूर्वोक्तौ(क्तिभि)रनुनीतेन मधुरिपुणा इत्यनेन प्रकारेण नियुक्ता सैव सखी पुनरत्रागत्य राधामिदं वक्ष्यमाणं वचः स्वयं जगाद। केन प्रकारेण नियुक्तेत्यत आह। हे दूति! अहम् इह निर्जने यमुनाकूले निवसामि, त्वं

याहि गच्छ। गत्वा च मद्वचनेन राधामनुनय प्रबोधय। न केवलम् अनुनय आनय च। अत्र स्वयंशब्दोपादानात् अनया यथा दृष्टं तथा वहति मलयसमीर इत्यादिकम् उच्यते न तु तद्वचसा। तद्वचनेन प्रेम्णो ग्राम्यत्वापत्तेरनाश्वासापत्तेश्च।।३०।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३०।।अथ तदार्त्तिश्रवणव्याकुलोऽपि स्वापराधचिन्तया अतिभीतः स्वयमगच्छन्नात्म-दुःखनिवेदनपूर्वकानुनयेन तत्कोपशिथिलीकरणाय सखिमेव प्रेषितवानित्याह, अहमिति। मधुरिपुणा नियउक्ता सखी स्वयमेत्य राधिकां पुनरिदमुवाच। किमुक्तवानित्याह; अहमिहैव निवसामि, त्वं राधां याहि। गत्वा किं करोमि ? मद्वचनेन तामनुनय। यदि त्वयैव तन्मानमपनेतुं शक्यते तदा आनयेथाः इत्युक्त्वा। सहसा मम गमनेन मानोऽतिगाढ़े। भवेदित्यभिप्रायः।।३०।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३०।। अथ कृष्णः सखीमुखात् तदार्त्तिश्रवणातिव्याकुलोऽपि स्वापराध-चिन्तयाऽतिभीतः सहसा गमनेन तस्या मानः अतिगाढः स्यात्, इति शङ्कया स्वयमगच्छन् निजार्त्तिनिवेदनपूर्वकानुनयेन कोपशिथिलीकरणाय सखीं प्रेषितवान् इत्याह; अहमिति। हे सखि ! राधाविरहवृत्तान्तश्रवणद्विगुणितशोकसाध्वससमुदितजडतया पदात् पदमपि यातुमसमर्थोऽहमिह राधाप्रणयचेष्टादिस्मारकतया अतिसुरभिते वानीरकुञ्जे निवसामि, त्वदनुनयप्रमुदितप्रियासमागमप्रणीताशावलम्बिजीवनतया यावत्त्वदागमनं तिष्ठामीत्यर्थः। त्वं राधां प्रति याहि, त्वदागमनानन्तरं द्विगुणितोत्कण्ठाकृतविविधा-निष्ठशङ्काकुलितां तामुद्जीवयितुं गच्छ। तथा मद्वचनेनानुनय। मद्वचनप्रतिरूपककथनेन प्रार्थय। नाहमात्मनोऽवस्थां तव पुरतो निवेदयितुं विविच्य शक्नोमि। पश्यसि साक्षात् त्वमेव। यथा सा मामेकान्तनिष्ठुरं न जानाति, नाशङ्कते च, मद् कैतवमङ्गीकरोति च। मत्प्रार्थनां तथा कुर्वित्यर्थः। यदि त्वत्प्रार्थनया प्रसीदति, तदा अत्र आनयेथाः, आनयस्व। प्रार्थनायां विध्यादौ लिङ्। अत्र द्वयोरपि प्राणरक्षणपुण्यभागिनी भवेदिति भावः। इत्यनेन प्रकारेण मधुरिपुणा श्रीकृष्णेन नियुक्ता राधाप्रसादनविधावधिकृता सखी तत्कृतबहुगौरवद्विगुणितोत्साहा स्वयं पुनरेत्य परावृत्त्यागत्य राधामिदं वक्ष्यमाणं जगाद। अवभाषे । सखीलक्षणं यथा **उज्ज्वलनीलमणौ-**

''आत्मनोऽप्यधिकं प्रेमकुर्वाणाऽन्योन्यमच्छला।
विस्रम्भिणी वयोवेशादिभिस्तुल्या सखी मता'' इति।।

अस्याः क्रिया यथा तत्रैव,

मिथः प्रेमगुणोत्कीर्त्तिस्तयोरासक्तिकारिता। अभिसारो द्वयोरेव सख्या कृष्णे समर्पणम्।।

नर्माश्वासननेपथ्यं हृदयोद्घाटपाटनम्। छिद्रसंवृत्तिरेतस्याः पत्यादेः परिवञ्चनम्।।

शिक्षासङ्गमनकाले सेवनं व्यजनादिभिः। तयोर्द्वयोरुपालम्भः सन्देशप्रेरणं तथा।

नायिकाप्राणसंरक्षा प्रयत्नाद्याः सखीक्रियाः।।

दूतीलक्षणं तु यथा तत्रैव-

न विश्रम्भस्य भङ्गं या कुर्यात् प्राणात्ययेष्वपि।
स्निग्धा च वाग्मिनी चासौ दूती स्याद् गोपसुभ्रूवाम्।। इति।।
अमितार्था निःसृष्टार्था पत्रहारीति सा त्रिधा।
ज्ञात्वेङ्गितेन या भावं द्वयोरेकतरस्य वा।।
उपायैर्मेलयेत्तौ द्वावमितार्था भवेदियम्।।
विन्यस्तकार्यभारा स्यात् द्वयोरेकतरेण वा।
युक्त्योभौ घटयेदेषा निःसृष्टार्था निगद्यते।।
सन्देशमात्रं या यूनोर्नयेत् सा पत्रहारिणी।
ताः शिल्पकारी दैवज्ञालिङ्गिनी परिचारिका।।
धात्रेयी वनदेवी च सखी चेत्यादयो व्रजेत्।। इति।।
अत्रेयं सखीरूपा निःसृष्टार्था दूती।।३०।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३०।। अहमिहेति; सखीं प्रति श्रीकृष्णोक्तिः यत्, हे सखि अहमत्र प्रतिपालयामि राधिकाम्। त्वं खलु गत्वा श्रीराधां मत्पक्षतः मद्वाक्येनानुनयवचनं अनुरोधकथामुक्त्वा अत्र आनयनं कुरु। इत्येवं मधुराक्षसस्य मुरस्य च हन्तकः श्रीराधामानयनाय सखीं नियोजयामास। सा सखी श्रीराधासमीपं गत्वा उवाच राधिकाम्।।३०।।

।। दशमः प्रबन्धः/गीतम् १० ।।

दशमगीतम्/प्रबधः देशवराडिरागेण रूपकतालेन गीयते।।

प्रबन्धेऽस्मिन् **पंचसंख्यकानि** पदानि सन्ति।।

**१-वहति मलयसमीरे मदनमुपनिधाय।**
**स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ।।**
**तव विरहे वनमाली सखि सीदति ।। ध्रुवम्।।१ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१ ।। (देशी वराडिरागेण गीयते।) अस्याः स्वरूपं यथा;

आरब्धमौनमुद्रा निद्रालससंघूर्णितनयनाब्जा।
सुरतार्थिनी निजदयिते देशीवराडी भवेद्गौरी।।

पुनरस्याश्च रूपमुक्तम्;

विनोदयन्ती प्रियमेव[१] गौरी चामर चालनेन।
कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराडी।।

गीतेनानेन हरेरुद्वेगावस्था प्रतिपाद्या ।

यस्मिन् रम्यसरम्यं वा न च हर्षाय जायते।
प्रद्वेष प्राणितव्येऽपि य उद्वेगः स्मृतो यथा ।। इति ।।

हे सखि! तव विरहे बनमाली सीदति। इति सर्वत्र वाक्यार्थः। कदा सीदतीत्याह। मलयसमीरे मलयात् समागतः समीरः अत्र मध्यपदलोपि समासः तस्मिन् वहति सती कुसुमानां निकरः तस्मिन् कुसुमनिकरे विरहिणां हृदयस्य दलनाय स्फुटति विकासमाने सति किं कृत्वा मदनमुपनिधाय सन्निहितं कृत्येत्यर्थः।।१ ।।

**(२) राणाकुम्भकृत- रसिकप्रिया**

।।१ ।। तदेव वक्ष्यमाणमाह; अत्राभिसारिका नायिका वर्णनीया; 'संस्कृतात्प्राकृतमिष्टं ततोऽपभ्रंशभाषणम्। ततः प्रियतरा वेश्या सर्वतश्चाभिसारिका' इति "भरतः"।। तल्लक्षणमुक्तं "भरतेन"; 'लज्जां हित्वा समाकृष्टा यौवनेन व्रजेत्तु या। अभिसारगतं कान्तं कीर्तिता साऽभिसारिका।।' अत्र पूर्वं 'तव विरहे' इति ध्रुवः। अथ पदानि। वहतीति। क्व सति? मदनमुपनिधाय मदनस्य स्पृहामुत्पाद्य मलयसमीरे वहति सति । पुनः क्स सति? विरहिहृदयदलनाय कुसुमनिकरे स्फुटति सति विकसति सति।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। यत्सखी जगाद तदेव गीतेनाह वहतीति। गीतस्यास्य वराडीराग: रूपकताल: तल्लक्षणं, विनोदयन्ती दैत्यं सुकेशी सुकङ्कणा चामरचालनेन कर्णे दधाना सुरपुष्पगुच्छं वराङ्गने यं कथिता वराडी। अभिसारिका नायिका वर्णनीया **रसिकरसत्वे** संस्कृतप्राकृतमिश्रा ततोपंभ्रशभाषणा तत: प्रियतरा वेश्या सर्वतश्चाभिसारिका इति। तस्या: लक्षणं **भरते** लज्जां हित्वा समाकृष्य यौवनेन मदेन वा अभिसारयते कान्तं कीर्तीता साभिसारिका गीतार्थस्तु हे सखि राधे त्वद्विरहे त्वद्वियोगे वनमाली कृष्ण: सीदति दु:खितो भवति। कस्मिन्सति मदनं कामम् उपनिधाय साह्ायं कृत्वा मलयसमीरे दक्षिणं सम्बधिनि पवने वहति सति विरहिणां वियोगिनां हृदयदलनाय आस्फोटनाय कुसुमानां निकरे समूहे स्फुटति सति विकसति सति।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। यत्तत्सखीं जगाद तदेव गीतेन कथयति; वह तीति। गीतस्यास्य देशीवराडी रागो रूपकताल:। काललक्षणमुक्तं प्राक्। गीतार्थस्तु; हे सखि! वनमाली कृष्ण: सीदति। क्व सति? मलयसमीरे मलयसंबन्धिवाते वहति, कुसुमनिकरे पुष्पसमूहे विरहिणां हृदयदलनाय विदारणाय स्फुटति विकसति सति। किं कृत्वा? मदनं काममुपनिधाय समीपवर्तिनं कृत्वा। तथा च कुसुमनिकरैरेव बाणैस्तत्संनिहितेन कामेन विरहिणां हृदयं विदारणीयमिति भाव:।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। इदं जगादेत्युक्तम्। तत्प्रकारं गीतेन स्फुटयति। वहतीत्यादि। तत्र सखीत्यारभ्य वनमालीत्यन्तं ध्रुवपदम्। स्फुटार्थ तत्। कस्मिन् सति सीदतीत्याकांक्षायामाह। वहतीति। हे राधे! मलयसमीरे चन्दनपवने मदनं कन्दर्पमुपनिधाय सहायं कृत्वा इत्यर्थ:। वहति प्रवहति वातीत्यर्थ:। किञ्च विरहिणां हृदयदलनाय कुसुमनिकरे केतकीकुसुमसमूहे स्फुटति विकसति। तव विरहे वनमाली सीदती त्यन्वय:। यथा लोके राजानं समीपं निधाय तत चैतत् प्रहरणे च बिजृम्भमाणे रिपुरिव सीदति। तथा मदनमहाराजं समीपे निधाय तत्तटे मलयपवने तत्प्रहरणे कुसुमविकसने सति तत् प्रत्यर्थी विप्रयोगी जन: श्रीकृष्णोऽपि सीदति इत्यौपम्यस्य गम्यमानत्वात् दीपकालङ्कार: यद्वा वनमाली मदनमुपनिधाय वियोगजनितपीडासाक्षित्वेन समीपे विन्यस्य सीदतीत्यर्थ:।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। सखीवचनमेव गीतेन दर्शयति। हे सखि राधिके ! वनमाली कृष्णः तव विरहे सति सीदति व्यथते। कस्मिन् सति ? मदनं कामदेवमुप समीपे निधाय धृत्वा मलयसमीरे दक्षिणवायौ वहति सति। एतेन मदनस्यापि वायोरायतत्वं दर्शयता मलयानिलस्य उत्कर्षो दर्शितः। पुनःकस्मिन् सति ? विरहिहृदयदलनाय विरहिहृदयविदारणार्थं कुसुमनिकरे पुष्पसमूहे स्फुटति सति। अत्र स्वकीयस्फुटनेन विरहि हृदयस्फुटनमुपदिशत्येवेत्युत्प्रेक्षालंकारः।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। ध्रुवपदम्। वराडीरागे रूपकताले। अत्राभिसारिकेयम्। तस्याः लक्षणम्,

लज्जां हित्वा[३]समाकृष्य यौवनेन मदेन वा।
अभिसारयते कान्तं कीर्तिता साऽभिसारिका।। इति।।

रागलक्षणम्-

[४]विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं वाराङ्गनेयं कथिता वराडी।। इति।।

काललक्षणं[५]प्रागेवोक्तम्। श्रीकृष्णस्य विरहोद्रेकमाह [६]वहतीत्यादि (ना)। हे सखि राधे ! तव विरहे वियोगे वनमाली सीदति[७] दुःखीभवति। वनस्य जलस्य वा मालाऽस्तीति [८] वनमाली। अनेन त्वां विनोद्वेगावस्थेति ध्वनिः [९] कस्मिन् सति ? मदनं कामं उपनिधाय समीपवर्तिनं कृत्वा मलयसमीरे मलयानिले वहति सति। किञ्च विरहिणां वियोगिनां हृदयदलनाय मर्मपीडनाय कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति सति [१०] त्वयाऽधरामृतेन [११] स जीवनीय इति मम प्रार्थना। विशेषोक्तिरलङ्कारः।।१ ।।

१.वरालीरागेण रूपकतालेन गीयते-इ.२.सखि हे सीदति राधे-इ.३.समाकृष्टा-इ.समाहृष्य-ह.४.निनादयन्ती-अ.ब.निनोदयन्ती-फ.५.पूर्ववत्-ग.६.वहतीति-ग.७.दुःखितो इ.फ.ग.ह.ज. ८.नास्ति-अ.ब.इ.फ.ह.ज.९.कस्मिन् प्रति-इ.१०.त्वयाऽधरामृतपाने-ग.११.(६) सञ्जीवनीय-इ.फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। अस्य (गीतस्य)[१]वरालीरागस्तल्लक्षणम्,

विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं वाराङ्गनेयं कथिता [२] वराली।। इति।

अत्राभिसारिका नायिका वर्णनीया। तदउक्तं **रसिकसर्वस्वे**,

संस्कृतात्प्राकृतं[३]त्विष्टं ततोऽपभ्रंशभाषणम्।

ततः प्रियतरा वेश्या सर्वतश्चाभिसारिका।।इति।।

[४]तत्रैव लक्षणम्,

लज्जां हित्वा समाकृष्टा यौवनेन मदेन वा।

अभिसारयते कान्तं कीर्तिता साऽभिसारिका।। इति।

वहतीति। हे सखि राधे। तव विरहे वियोगे वनमाली कृष्णः सीदति दुःखितो भवति। कस्मिन् सति ? मदनं काममुप (नि) धाय [५]सहायं कृत्वा मलयसमीरे दक्षिणपवने वहति सति। पुनः [६]कस्मिन्[७] सति ? वियोगिनां हृदयदलनाय हृदयस्फोटनाय कुसुमनिकरे पुष्पसमूहे स्फूटति विकसति[८]सति।।१।।

१,२.वरारी-ड. ३.इष्टं-क.४.नास्तीयं पङ्क्तिः कारिका च-क.५.साहाय्यं-ड.सहयं-क.६,७.नास्ति-ड.८.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। (वहतीति।) मदनं मन्मथ उपनिधाय आदाय मलयसमीरे दक्षिणिवाते वहति सति विरहिणा हृदयदलनाय हृदयस्फुटाय कुसुमानां निकरे समुदाये स्फुटति ध्रुवास्थेनान्वयः। तवेति। हे सखि राधे! तव विरहे त्वाद्वियोगे वनमाली माधवः सीदति दुःखं प्राप्नोति।।१।।

## (१०) धनन्जयधरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१।। देशीवराडीलक्षणं यथा, ''आरब्धमौनमुद्रानिद्रालससंघूर्णितनयनाब्जा। सुरतार्थिनी निजदयिते देशीवराडीह तव गौरी।।'' इति। ''विनोदयन्ती दयितं हि गौरी, सुकङ्कणा चामरचालनेन। कर्णे दधाना सुरपुष्पगुच्छम्, वराङ्गनेयं कथिता वराडी।।'' इति। गीतेनानेन हरेरुद्वेगावस्था प्रतिपाद्या। तस्या लक्षणं प्रागूक्तम्। किमाह सखीत्याह, वहतीत्यादि। हे सखि! तव विरहे वनमाली सीदति। अवसादं प्राप्य ते तत् तस्मात् तव समीपमागन्तुमसमर्थं वनमालिनं त्वमेवाभिसरेति तात्पर्यम्। कस्मिन् सति सीदतीत्याह - मदनमिति। कामम् उपनिधाय सन्निधानवर्त्तिनं कृत्वा मलयसमीरे वहति सति। पुनः कस्मिन् सति ? विरहीत्यादि। विरहिणां हृदयस्य दलनाय कुसुमनिकरे स्फुटं विकसति सति।।१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१।। गीतस्यास्य वराड़ीरागः रूपकतालः। 'विनोदयन्ती दयितं सुकेशी सुकंकणा चामरचालनेन। कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराड़ी' इति रागलक्षणम्।

हे सखि ! तव विरहे वनमाली सीदति त्वत्करकल्पितवनमालावलम्बनेनैव जीवतीति वनमालि; शब्दोपन्यासः। कदा सीदतीति आह; मदनं सन्निहितं कृत्वा मलयसमीरे वहति सति विरहिणां मर्मपीड़नाय कुसुमसमूहे च स्फुटति सति ध्रुवम् ।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ।। यद् जगाद तदेव प्रपञ्चयति, वहतीत्यादिना गीतेन। वराडीरागेण गीयत इत्युक्तम् ।अस्या रूपम्;

''विनोदयन्ती दयितं सुकेशी सुकङ्कणं चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराडी ।। इति ।

ततः वहतीति। हे सखि! वञ्चनानर्हे राधे! अनेन मद्वचनं सत्यमवधारयेति सूच्यते। चिरप्रणयमननुरुध्य अकारणकोपवशेन अन्तरितायास्तव विरहेण तृतीयार्थे सप्तमी, वनमाली श्रीकृष्णः सीदति; विविधबाधाव्याकुलः संताम्यति। वनमालीत्यनेन त्वत्करगुम्फितवनमालाश्वासितहृदयः केवलं जीवतीति सूचितम्। कथय कथय, कथमकाण्ड एवातिगभीरस्य पुरुषप्रकाण्डस्य तादृशः अवसान इत्यत आह, वहतीति। मलयसमीरे कौटिल्यापरपर्यायमालिन्यशालिमलयशैलसम्बन्धिमन्दमारुते, मदनं, निष्करुणं विरहिजनदुरवस्थापादनैकपरायणं मन्मथम् उपनिधाय पश्याद्य मम सामर्थ्यमिति साक्षित्वेन सहायत्वेन वा। समीपे स्थापयित्वा वहति सति अप्रतिहतगतितया प्रसरति सति, किमर्थं, विरहिहृदयस्य कवचीभूतप्रियुकुचमण्डलवियुक्तहृद्वर्मणः दलनाय पीडनाय तथा कुसुमनिकरे, अहमेवास्य हृदयदलने प्रथमपौरुषं सम्पादयामीति अहमहमिकया कृतैकमत्यौ केतक्यादिप्रसूनसंघे स्फुटति सति, अन्तरामोदोद्भेदेन विकसति सति किं न सम्भवेदिति भावः।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। वहतीति; इदानीं वसन्तकाले मलयानिलः प्रवहति। मदनं तोषयितुं कन्दर्पस्यागमनेन तत्कोपं मनसि कल्पना कर्त्तव्या। वसन्तकालोचितपुष्पाण्यपि विकसन्ति कामवर्द्धनाय। हे सखि! त्वद्विरहेऽस्मिन् मधुकाले त्वदर्पितां वनमालामवलम्ब्य शीर्णः कष्टमनुभवतीति।।१ ।।

**२-दहति शिशिरमयूखे मरणमनुकरोति।**
**पतति मदनविशिखे विलपति विकलतरोऽति।। तव वि० ।।२।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।२।। दहतीत्यादि। शिशिराः मयूखाः यस्य तस्मिन शिशिरमयूखे चन्द्रे दहति सति मरणमनुकरोति निश्चेष्टो भवति मृत इति यावत्। मदनस्य विशिखः तस्मिन् मदनविशिखे कामबाणे पतति सति अतिविकलतरः विलपति। बिलापः परिदेवनमित्यमरः।।।२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२।।अपि च दहतीति। शिशिरमयुखे हिमरश्मौ दहति सति मरणमनुकरोति मृतकल्पो भवति। तत एवं मदनविशिखे पतति सति विकलतरोऽतिशयेन विकलः सन्नत्यतीव विलपति।।२।।

### (३) जगद्धरकृत- सारदीपिका

।।२।। दहतीति हे राधे! सः कृष्णः शिशिरमयूखे हिमकरे दहति सति सन्तापं जनयति सति मरणमनुकरोति। दशम्यवस्थां जनितपीडामनुभवति। त्वत्प्राप्त्याशया कष्टेन जीवनं धारयतीत्यर्थः। मदनविशिखे कामबाणे पतति सति अतिविलपति। अतिशयेन विलापं करोति। कीदृशः कृष्णः विकलतरः विह्वलतरः।।२।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।।किं च, दहतीति। शिशिरमयूखे हिमकिरणे दहति सति मरणं मरणावस्थामनु-करोति। मरणावस्थायां यादृशी मूर्च्छादिरूपा चेष्टा तां स्वीकरोति। अथ च, मदनविशिखे कामबाणे पतति सति विकलतरोऽति विह्वलतरोऽति विलपत्यतिशयेन विलापं करोति।।२।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।।दहतीति। हे सखि! राधे! तव विरहे वनमाली शिशिरमयूखे चन्द्रे दहति तापं जनयति मरणमनुकरोति मृतकल्पो भवतीत्यर्थः पततीति क्वचित्पाठः। स तु सुगमः किञ्च तव विरहे मदनविशिखे पञ्चशरजाते जातावेकवचनं पतति प्रविष्टे सति अथवा एकत्वविवक्षितं एकस्मिन् पतति सति किमुत अनेकेषु इत्यर्थः। विलपति हा हतोऽस्मीति पतति। न केवलं स्वयं प्रलपति अपितु विकलीकरोति तत्रत्यान् इतिशेषः। स्वविलापेन तत्रत्यान् विकलचित्तान् करोतीत्यर्थः। अनेन तस्या-

वश्यमनुग्राह्यता सूचिता। अत्र अभूततद्भावेत्यादिना च्वि प्रत्ययः। तस्य च वीतिकारः च। विति दीर्घ पदद्वयमेतत् चातिरुहात् तव तातिङिति भाष्यकारेण समासनियमनात्। एवं प्रभावतीत्यादावप्यूहम्। तत्तत्वं च यत् किञ्चदादिप्रयोगे ज्ञातव्यम्।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। अपि किङ्करोत्यत आह; शिषिरमयूखे चन्द्रे दहति मरणमनुकरोति। अस्माकं मरणमेव वरमिति मरणं स्वीकरोतीत्यर्थः। यद्वा मरणमनुकरोति मरणावस्थां सदृशीकरोति मृतप्रायो भवतीत्यर्थः। अपि किङ्करोति ? विलपति परिदेवनं करोति। कस्मिन् सति ? मदनविशिखे कामबाणे पतति सतीव। कीदृशः ? अति अत्यर्थेन विकलतरः। तदुक्तम्; 'अपिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽप्यति।।' ।।२।।
*'पतति मदनविशिखे' इत्यादि पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। [२]नन्दकिशोरस्यावस्थान्तर[३]राधां प्रत्याह, दहतीत्यादिना। [४]हे राधे! श्रीकृष्णः शिशिरमयूखे चन्द्रे दहति सति मरणमनुकरोति मरणवद्दुःखमनुभवति। अनुमरणमपि तुच्छीकरोति इति वा। किञ्च मदनविशिखे कामबाणे पतति सति अतिशयेन विकलतरो व्याकुलोऽति [६]विलपति अतिविलापं करोति। त्वद्विरहे कामोऽपि तस्य बाणैः प्रहरतीति [७]ध्वनिः।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। दहतीति। हे राधे! हे राधे! [१९]सः कृष्णः शिशिरमयूखे [२०] चन्द्रे दहति सति मरणमनुकरोति [२१] मरणानुकारं करोति। मदनविशिखे कामबाणे पतति सति विलपति अतिशयेन विलापं करोति। कीदृशः कृष्णः ? विकलतरो विह्वलतरः।।२।।

१.मनसिजमनुदुनोति-इ.२.नन्दकिशोरस्यान्तरं-इ.३.सखी राधां-इ.फ.ग.ह.ज.४.नास्ति-ग.५.व्याकुलोऽपि विलपति विलापं करोति-इ.फ.ग.ह.ज.६.नास्ति-ज.७.नास्ति-ग.८.निकरे-इ.फ.ग.ह.ज.९.ध्वनति गुञ्जति सतिः-इ.फ.ह.ग.ज.१०.तः११.पर्यन्तं नास्ति-ग.१२.एतेन श्रवणायातिधैर्य करोति-फ.ग.ह.ज.१३.विरहाग्नौ-इ.१४.नास्ति-फ.ह.ज.१५.अनुभवति-अ.ब.१६.नास्ति-ग.१७.नास्ति-अ.ब.१८.ध्वनिः-अ.ब.१९.नास्ति-क.२०.चन्द्रमसि-क.२१.नास्तीदं पदद्वयम्-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। (दहतीति।) शिशिराः मयूखाः यस्मिन् तस्मिन् शीतरश्मौ दहति सति सन्तापयति सति मरणं अनुकरोति मूर्छां प्राप्नोति। अत्र शीतरश्मेर्दाहकत्वम् ;

गुणक्रियाविरोधालाङ्कार:। विरोधस्सोऽविरुद्धत्वे विरुद्धत्वेन यद्वच: इति **काव्य-प्रकाशकारेण** (उल्लास:-१०. सू. १६६) गुणक्रियाजातिद्रव्याणां परस्परविरोध-कथनात्। मदनस्य विशिखे बाणे पतति सति मनसिजं मन्मथं अनुदुनोति दु:खमाप्नोति। उपालभते।।२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। दहतीत्यादि। शिशिरमयूखे चन्द्रे दहति सति मरणमनुकरोति मृत्युमुपकल्पयति मूर्च्छां गच्छतीत्यर्थ:। मदनविशिखे पतति सति विलपति परिदेवनं करोति। विकलीकरोति च विकलतरो भवतीत्यर्थ:। अविकलो विकलो भवति विकलीकरोति। अभूततद्भावे ''कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि:।'' यद्वा अविकलं विकलं करोति। एतस्य विलापं दृष्ट्वा अन्येऽपि विकला: भवन्तीत्यर्थ:। अत एव स्वयमित्युक्तम् ।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। किंच चन्द्रे दहति सति मरणमनुकरोति निश्चेष्टो भवति मूर्च्छतीति यावत्। कामबाणे च पतति सति अतिविह्वलो विलपति, कुसुमपतने हृदि विध्यत्कामबाण भ्रमादाक्रोशतीत्यर्थ:।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। पुनस्तस्य दशाविशेषस्मरणसमुदितशोकगद्गदिकानिरुप्यकण्ठतया क्षणं स्थित्वा प्रयत्नेनात्मानं संस्तब्द सातङ्कमाह; दहतीति। हे सखि! शिशिरोऽतिशीत: मयूख: किरणो यस्य तस्मिन्, अखिलसन्तापहारिणि चन्द्रमसि दहति सति, दाहं जनयति सति, मरणमनुकरोति मरणसदृशीं मूर्च्छामावहतीत्यर्थ:। किं वा मरणहेतुकं कञ्चन व्यापारं करोतीत्यर्थ:। किं च मदनविशिखे पतति सति, जातावेकवचनम्, किं वा एकत्वं विवक्षितम्। एकस्मिन् विशिखे पतति सति किमुत पञ्चस्विति अर्थ:, विलपति समीपस्थितचूतमुकुलपतने हृद्विध्यत् कामबाणभ्रमेणातिविह्वल: 'हा हतोऽस्मी'त्यादि विलापं करोति। तथा विलपन् समीपस्थितान् विकलीकरोति, व्याकुलयति।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। दहतीति; चन्द्रकिरणानि दहनं करोति। ईदृशं कष्टं मृत्युसदृशं भवति। स:कन्दर्पशराघातेनात्यन्तं पीडित: सन् क्रन्दति।।२।।

**३-ध्वनति मधुपसमूहे श्रवणमपिदधाति।**
**मनसि वलितविरहे निशि निशि रूजमुपयाति।। तव वि० ।।३ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३ ।। मधु पुष्परसं पिवन्तीति मधुपाः। भ्रमरास्तेषां समूहः, तस्मिन् भ्रमरनिचये शब्दायमाने सति कर्णमपि दधातीति, कराभ्याम् आच्छादयतीत्यर्थः। बलितः अतिशयेन प्रादुर्भूतः बिरहो यतस्तस्मिन् बलितविरहे संभक्तविच्छेदे निशायाः मनसि निशि निशि रुजमुपयाति। निशि सुरतकालत्वादप्राप्तसुरतस्य कामपीडा भवती त्यभिप्रायः।।३ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।३ ।। अपि च, ध्वनतीति। मधुपसमूहे ध्वनति सति श्रवणमपिदधाति आच्छादयति । निशि निशि प्रतिरात्रौ मनसि कलितविरहे सति झटिति रुजं पीडामुपयाति प्राप्नोति।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। ध्वनतीति मधुपिवन्तीति। मधुपा भ्रमरास्तेषां समूहे ध्वनतिशब्दं कुर्वति सति श्रवणे कर्णौ अपिदधाति अंगुल्यग्रेणाच्छादयति मनसि वलितविरहे सति निशि प्रतिरात्रिं रूजं पीडां उपयाति प्राप्नोति।।३ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। किंच ध्वनतीति। मधुपसमूहे भ्रमरसमूहे ध्वनति गुञ्जति सति श्रवणं श्रोत्रं हस्ताभ्यामपिदधाति मुदयति। अथ च निशि निशि प्रतिरात्रौ चित्ते रुजं पीडामुपयाति प्राप्नोति। कीदृशे मनसि ? कलित उद्भूतो विरहो यत्र तादृशे।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।।ध्वनतीति। हे सखि! राधे! वनमाली मधुपसमूहे ध्वनति झकृतिं कुर्वति सति श्रवणं कर्णमपि दधाति आच्छादयति। विरहिणां भ्रमरविरुतस्य कर्णशूलायमानत्वादिति भावः। तथा निशि निशि प्रतिनिशं मनसि वलितविरहे प्रवर्धिविश्लेषे सति चरित इति केषुचित्पाठः। तदाप्ययमेवार्थः रुजं दुःखम् उपयाति प्राप्नोति रात्रे विरहिणामति-दुःखकारित्वादितिभावः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।।अपि किं करोत्यत आह; मधुपसमूहे भ्रमरनिकरे ध्वनति सति श्रवणमपिदधाति आच्छादयति।श्रवणमिति सामान्याश्रयादेकवचनम्। 'अपिधानतिरोधानपिधानाच्छादनानि चे'त्यमरः।।अपि किं करोतीत्यत आह; निशि निशि रात्रौ रात्रौ मनसि वलितविरहे

चिन्तितविरहे सति रुजमुपयाति पीडाङ्गच्छतीत्यर्थ:। तथा च ध्यानेन त्वया अविरहीव तिष्ठति, यदा कदाचिद्विरहं भावयति पीडामुपगच्छतीति वाक्यार्थ:। यथाश्र तेर्विरह: सम्बन्धविच्छेद: सर्वत्र गच्छतो मनसस्तदाभावात्।।३।।

**(७) वनमालि भट्टकृत- सञ्जीवनी**

।।३।। किञ्च मधुपसमूहे भ्रमर[८]समूहे[९]ध्वनति गुञ्जति सति[१०]श्रवण मपि दधाति[११]हस्ताभ्यां कर्णावाच्छादयति। [१२]एतच्छ्रवणायाऽति धैर्यं (न) करोति। किञ्च वलितविरहे सन्दीप्त[१३]वियोगाग्नौ निशि निशि रात्रौ[१४]रात्रौ मनसि हृदये रुजं तत्कृतां पीडा[१५] मुपयाति[१६]प्राप्नोति। दिवसस्तु त्वन्मार्गावलोकनेन कथञ्चिन्नीतो ; रात्रिर्नैव गच्छतीति [१७] दीर्घपीडा[१८]ध्वनिता।।३।।

**(८) नारायण पण्डितकृत- पदद्योतनिका**

।।३।। ध्वनतीति। मधुपसमूहे भ्रमर [१] समुदाये ध्वनति शब्दं[२]कुर्वति सति श्रवणं कर्णं[३]अपिदधाति[४] अङ्गल्यग्रेणाच्छादयति। मनसि वलितविरहे सति निशि प्रतिरात्रं रुजं पीडां उपयाति अनुभवति।।३।।

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।३।। (ध्वनतीति।) मधुपानां भ्रमराणां समूहे ध्वनति कूजति श्रवणं अपिदधाति आच्छादयति। मनसि [५]कलित: विरह: येन तस्मिन्। निशि निशि रात्रौ रुजं व्यथां उपयाति।।३।।

**(१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।३।।ध्वनतीत्यादि। मधुपसमूहे भ्रमरनिचये ध्वनति शब्दायमाने सति श्रवणमपिदधाति कराभ्यां श्रवणमाच्छादयतीत्यर्थ:।श्रवणमिति जातावेकवचनम्। मनसि वलितविरह इति। वलितो विरहो यस्मिन् एवंविधे सति। निशि निशि प्रतिरात्रं रुजमुपयाति। निशाया: सुरतकालत्वात् तत्राप्राप्तसुरतस्य कामपीडा भवतीत्यभिप्राय:।।३।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।३।।भ्रमरनिचये शब्दायमाने सति कर्णौ कराभ्याम् आच्छादयति।अत्युद्रिक्तविरहे मनसि सति निशायां क्षणेक्षणे रुजमधिकमाप्नोति, निशायास्त्वत्प्राप्तिकालत्वात् त्वद्प्राप्त्या मधुपध्वनिश्रवणात् पीड़ामनुभवतीत्यर्थ:।।३।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।३।।दैवापयातमूर्च्छानन्तरावस्थामाह; ध्वनतीति। हे सखि! मधुपसमूहे, एकस्यापि मधुपानासक्तस्य चेष्टितं सुदु:सहं स्यात्, किमुत तेषां समूहे। निजोद्वेजनैकमत्यकृतसंघे

इत्यर्थः। तस्मिन् ध्वनति, ध्वनिं कुर्वति सति, तं मन्मथवज्रनिर्घोषं मन्यमानः किमशरणः करवाणीति श्रवणमपि दधाति। पाणिभ्यां कर्णौ आच्छादयतीत्यर्थः। किं च निशि निशि निशायाः क्षणे क्षणे इत्यर्थः, मनसि वलित उद्दीप्तः विरहः यत्र तादृशे सति, त्वत्सङ्गमाशाविघटनातिमांसल वियोगदुःखे सतीत्यर्थः, रुजं पीडामुपयाति, दिवसापेक्षया अधिकमाप्नोतीत्यर्थः। निशायास्त्वत्सम्भोगयोग्यसमयत्वात्।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। ध्वनतीति; स श्रीकृष्णःमधुमक्षीणां गुञ्जने कर्णपीडया कर्णौ पिदधाति। चित्ते विरहव्याधिमनुभूयो भूयः प्रतिरात्रं ज्वरपीडित अथवा रोगाक्रान्तो भवति।।३।।

**४-वसति विपिनविताने त्यजति ललितधाम।**
**लुठति धरणिशयने बहु विलपति तव नाम।। तव वि० ।।४।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।४।। वसति विपिनविताने त्यज्यति ललितधामेति। रुचिर गृहं त्यक्त्वा वनमाश्रयतीत्यर्थः। विरहाकुलत्वादेकत्र स्थित्यभावाद्वितानशब्दोपादानम्। लुठति धरणितलेव शयनं तत्र शयते इति भूमिशय्यां करोतीत्यर्थ। बहुविलपति तव नामेति। तव नामधेयादन्यतरस्य मुखान्न निःसरतीत्यर्थः।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, वसतीति। विपिनविताने वनविस्तारे चण्डविषकल्पे वने वसति संतिष्ठते। त्वद्विरहेण ललितं मनोहरमपि धाम त्यजति। पुनः किं करोति ? धरणिशयने तव नाम कृत्वा परिदेवनं करोति।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। वसतीति स विपिनविताने अरण्यविस्तारे वसति तिष्ठति। अरण्ये ललितं धाम सुन्दरं गृहं त्यजति पृथ्वीशय्यायां लुण्ठति। विचेष्टते तव नाम बहु अनेकवारं विलपति अथवा धामशरीरम् आखिललावण्यास्पदं श्रीविग्रहमपि त्वां विना नाशास्त इत्यर्थः।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। किंच, वसतीति। स विपिनविताने वनविस्तारे वसति तिष्ठति। ललितं मनोहरं

धाम मन्दिरं त्यजति। 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः। किंच, स धरणीशयने भूशय्यायां लुठति। तव नाम 'हे प्राणेश्वरि, हे प्रिये, हे राधे!' इत्येव बहु वारं वारं विलपति विशेषेण जल्पति।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। वसतीति। हे सखि! वनमाली विपिनविताने वनविस्ताते विस्त्रीर्णवने इत्यर्थः। वितानग्रहणं विरहिणः श्रीकृष्णस्य विरहवेदनापकरणहेतुभूत यथेष्टसंचारार्थमुक्तमित्यवगन्तव्यम्। वसति तिष्ठति। न केवलं वनवासमात्रम् अपितु ललितधाममनोहरमन्दिरं त्यजति त्वां विना तादृशे मन्दिरे किमिति स्थातव्यमिति मुञ्चतीत्यर्थः।

अनेन नात्याशक्तिः सूचिता। न केवलं विरहे मन्दिरत्यागः अपितु धरणिशयने भूप्रदेशे लुठति विरहवेदनावशात् गात्रपरिवर्त्तनं करोति इत्यर्थः। न केवलं भूलुण्ठनमात्रमपितु तव नामधेय भवन्नामधेयं बहु बहुवारं विलपति। हे राधे! मां त्यक्त्वा गता शीघ्रमागत्य मामालिङ्ग्य इत्यादिप्रकारेण तव नामग्रहणपूर्वकं जल्पतीत्यर्थः। अत्र यथा लोके पुत्रादिवियोगदुःखितः स्वधामत्यागपूर्वकमतिदुःखकरमहारण्यादौ अटति लुठनादिकं च करोति तदूत् कृष्णोऽपि इत्युपमाध्वनिरूह्यः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। अपि किं करोतीत्यत आह; ललितधाम शोभनगृहं त्यजति। विपिनविताने अरण्यविस्तारे वसति। अत्रारण्यविताने वसतीत्यनेन वनेऽप्येकत्र न तिष्ठतीति दर्शितम्। त्यजति ललितधामेत्यत्र सामान्यत एव वर्तमानायां लट् न तु गृहत्यागवनवासयोरेक कालत्वमित्यवधेयम्। वसतिर्निवासस्थानम्, वसतिश्चासौ विपिनवितानश्चेति स तथा। तथा च वसति विपिनविताने तन्निमितं शोभनगृहं त्यजति। निमित्तात्कर्मयोगे सप्तमीति केचिदाचक्षते। 'धाम गेहे च देहे च तथा रश्मौ प्रकीर्तितमिति।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। किञ्च विपिनविताने वनविस्तारे समूहे वा वसति तिष्ठति ललितं सुन्दरं धाम[६]गृहं त्यजति। नैतादृशस्य त्वामन्तरा सुखलेश इति भावः। धामशब्द[७]वाच्यानर्थान् त्यजतीति ध्वनिः। किञ्च[८]शय्यादिकं विहाय धरणिशयने[९]भूमितल्पे लुठति। [१०]बहु वारं वारं तव नामाऽऽवर्तयति च[११]। [१२]त्वच्चरणालङ्कृतभूमौ सर्वाङ्गैश्चेष्टम् इति भावः। [१३]धाम देहे गृहे[१४]रश्मौ स्थाने जन्मप्रभावयोः इति **विश्वः** (७१.१२१)।।४।।

१.समूहे-क. २.कुर्वाणे सति-क. ३.अति-४.अङ्गुल्येनाच्छादयति-ड.५.कलितविरहे इति इ मूलपाठः६.नास्ति-अ.ब.७.वाच्यान् सर्वान्-इ.फ.ग.ह.ज.८.सर्पादिकं-अ.ब.९.नास्ति-अ.ब.१०.तः११.पर्यन्तं नास्ति-अ.ब.११.बहुवारं-इ.वारं वारं-ग.ह.१२.तच्चरण-अ.ब.१३.धामं

देहे गृहे वस्त्रे चेति विश्वः-अ.ब.१४.वस्त्रे वेति-इ.वस्त्रे चेति-फ.ग.ह.ज.

### (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। वसतीति। सः विपिनविताने [१] अरण्यविस्तारे वसति [२] तिष्ठति। अपरं ललितं धाम सुन्दरं गृहं त्यजति। धरणीशयने पृथ्वीशयने लुठति विचेष्टते। तव नाम बहु अनेकवारं विलपति।।४।।

### (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। (वसतीति।) विहितविताने कलितोल्लोचे गेहे वसति विद्यमाने सति ललितं धाम गृहं त्यजति। धरणौ क्षितावेव शयने लुठति परिवर्तते। तव नाम बहु विलपति।।४।।

### (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। वसतीत्यादि। वनविस्तारे वनमाली वसति। ललितधाम त्यजतीति। रुचिरगृहं त्यक्त्वा वनानि श्रयतीत्यर्थः। विरहाकुलत्वादेकत्र स्थित्यभावाद् वितानशब्दोपादानम्। धरणिशयन इति। धरणी एव शयनम्। शय्या तत्र लुठति। उद्वर्त्तनविवर्त्तनाभ्यां कालयापनं करोतीत्यर्थः। तव नाम राधेत्यक्षरद्वयं बहु विलपति। तव नामधेयादन्यत् तस्य मुखान्न निस्सरतीत्यर्थः। यद्वा बहु नाम राधे, प्राणेश्वरि, निर्व्याजे, सुन्दरि, प्रिये इत्यादि विलपति ।।४।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

वसतीति। रूचिरमपि गृहं त्यक्त्वा अरण्यमध्ये त्वत्प्राप्त्याशया वसतीत्यर्थः। विरहवैकल्यादेकत्रस्थित्यभावात् वितानशब्दोपादानम्। त्वदप्राप्त्या भूमौ लुठति, वहु यथा स्यात्तथा तव नाम विलपति, तव नामधेयादन्यत्तस्य मुखे न निःसरतीत्यर्थः ।।४।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। न च तस्य सुहृदादिसन्निधानात् दरोऽप्यस्ति, येन क्षणमात्रमपि आश्वासितो धैर्यमवलम्बते, इत्याह; वसतीति । हे सखि! वनमाली ललितं धाम त्यजति, सङ्गीतसाहित्यादिरसविनोदशालिसुहृज्जनसङ्कुलतयाऽतिमनोहरं विविधमणिसंघटिततया नयनानन्दकरं गृहं त्वां विना बहुतरोद्वेजकं मत्वा मुञ्चति। तर्हि क्वाऽऽस्ते, विपिनविताने वनविस्तारे वसति। पिकमाकन्दादिबहुविधप्रतीपयुक्ततया एकस्यापि प्रदेशस्य क्षणमात्रमपि सुखहेतुत्वाभावात् विरहवैकल्येन क्षणमेकत्र वसन् पुनरन्यत्र पुनश्चापरत्र निवसतीति निमेषमात्रमपि कुत्रापि स्वास्थ्येन स्थातुं न शक्नोतीति। किं च धरणीशयने

भूमिशय्यायां लुठति निमीलितलोचनो भूमौ पतितः, स्मृत्वा पार्श्वस्थितां त्वामवलोकयितून्मीलितनेत्रस्तत्रापश्यन् ततः पार्श्वं परिवर्त्तयन् तत्राप्यपश्यन् एवं त्वद्दिदृक्षया पार्श्वयोः परिवर्त्तनावर्त्तनं मुहुर्मुहुः करोतीति भावः। ननु बहुवल्लवस्य इदं चेष्टितं कस्याश्चिदन्यस्य विरहेण भवेत्, कथं मद्विरहेण इति आशंक्याह; तव नाम बहुप्रकारेण विलपति। अपि निरनुरोधे राधे कथमसम्भाव्य एवं माऽऽगताऽसि। हे प्रिये ! वार्षभानवि ! नैतादृशमुपेक्षितुं युक्तोऽयं दुःखितो जनः। हे राधिके ! कथमकाण्ड एव ईदृशं नैष्ठुर्यं जातं सुशीलायास्तव, इत्याद्यनेकविधत्वन्नामग्रहणपूर्वं सकरुणं वदतीति भावः।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। वसतीति; यमुनातटारण्यकुञ्जे वासं करोति। स्वस्य सुन्दरावासस्थानं न रोचते विरहजन्यास्थिरत्वात्। अतः ललितं सुन्दरं कलाकुशलं सकलं परिहिय वने तिष्ठति। तले नाम मृदि स्थण्डिले वा स लुठति नाम उन्मत्तवत् त्वन्नामजपपूर्वकं भूमौ लुठितः भवति। अर्थात्तस्य कामीवत् विलापः परिलक्ष्यते। विलापः यथा;

अभिलाषः चिन्ता श्रुतिः गुणकथनोद्वेगसंप्रलापितैश्च।
उन्मादोऽथ जडता व्याधिरपस्मारः मृतं तथा।।
अस्मिन पदे उद्वेगः प्रलापश्च प्रकटितौ। व्याधिरपि पूर्वगीते वर्तते।।४।।

**५-भणति कविजयदेवे विरहिविलसितेन।**
**मनसि रभसविभवे हरिरुदयतु सुकृतेन ।। तव वि० ।। ५ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।५ ।। विरहविलसितेन कविश्चासौ जयदेवश्चेति कर्मधारयः। कवि जयदेवे भणति सति सुकृतेन मनसि हरिरुदयत्विति योजना। हरितिति विरहविलापेन हेतुना यदुत्पन्नं सुकृतं पुण्यं तेन गायतां श्रृण्वतां च हृदि हरिरुदितो भवत्वित्यर्थः।।५ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५ ।।अपि च, भणतीति। कविजयदेवे भणति सति विरहविलसितेन वियोगविलासेन रभसविभव उत्साहसंपन्ने मनसि। अर्थात्तव सुकृतेन हरिरुदयतु उदयं प्राप्नोतु तव मनसि हरेरनुरागो वसतु अत्र वाक्यौचिती **सङ्गीतराजे**; 'निःसारतालरचितो रागे केदारसंज्ञके। कविनामाङ्कितपदात्पाटैः स्वल्पतरैश्चितः।। ततः पद्यं विलासे सोल्लासते जगतीपतेः। इत्थं हरिसमुदयागरुडपदसंज्ञकः। प्रबन्धः पृथिवीभर्त्रा हरिभक्तेन वर्णितः।।'
इति हरिसमुदयागरुडपदनामा दशमः प्रबन्धः।।५ ।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। भणतीति कविजयदेवे इति विरहिणां वियोगिनां विलसितेन भणति सति वियोगिचेष्टितं कथयति सतीत्यर्थः। हरिः कृष्णः मनसि जयदेवसम्बन्धिचित्ते सुकृतेन पूर्वेणार्जितपुण्येन हेतुना उदयतु उदयं प्रान्पोतु। कीदृशे मनसि रभसस्य हर्षस्यविभव अधिक्यं यस्मिन् ।।५।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। भणतीति। श्रीजयदेवकवौ भणति कथयति सति यत्सुकृतं पुण्यं जातं तेन मनसि। अर्थाद्गायतां शृण्वतां च हरिः कृष्ण उदयत्वाविर्भवतु। कीदृशे मनसि ? रभसस्य कृष्णकीर्तनविषयोत्साहस्य विभवः प्राचुर्यं यत्र तादृशे हरिविरहविलसितेन विलासेनोपलक्षिते। वस्तुगत्या तस्य कालान्तर्यामिरूपतया न केनापि सह विश्लेषः, अपि तु लीलया तस्य विरहविलासमात्रमिति भावः। विरहिविलसितेत्यत्र 'कर्तृकरणयोः' (पा. २/३/१८) इति सूत्रेण तृतीया।।५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। भणतीति। विरहस्य हरेर्वियोगरूपश्रृङ्गारस्य विलसितं विलासः भावे क्तः तेन ''इत्थंभावे तृतीया'' विरहविलसितरूपमित्यर्थः गीतमिति वा शेषः। अथवा सहार्थे तृतीया वा कवि जयदेवे भणति वदति सति रभसः गीतश्रवणजनितसन्तोषस्तस्य विभव आधिक्यं यस्मिन् परिपूर्ण तु हर्षे इत्यर्थः एतादृशे मनसि श्रोतृणां मनसि अधिकरणे सुकृतेन गीतश्रवणजन्यपुण्येन हरिः गदितः गीतवर्णितः श्रीकृष्णः उदयतु आविर्भवतु प्रत्यक्षीभवतु इति यावत् तथा च हरिसाक्षात्कारकामिभिरिदं गीतमवश्यं श्रोतव्यं पठनीयं चेति भावः। तात्पर्य्यं चायं पञ्चपदीप्रबन्धः संकीर्णप्रबन्धपरिगणनस्थले तस्यापि संग्रहात् ।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। जयदेवके भणति सति सुकृतेन प्रकृतगीतगानश्रवणादिजन्यपुण्येण मनस्यर्थात् गायतां श्रुण्वताञ्च हरिरूदयतु व्यक्त्तीभवतु। मनसि कथम्भूते ? रभसविभवे रभसस्य हर्षस्य विभवो यत्र। हरिः कीदृक् ? विरहविलसितेन लक्षितः। इत्थम्भूतलक्षणे तृतीया। 'उत्साहे सहिते वेगे प्रवाहे रभसोऽर्थवदिति कोषः।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। [३] कविजयदेवे विरहिणां वियोगिनां विलसितेन[४]विलासेनैवं भणति सति हरिः श्रोतृणां[५]मनस्युदयतु उदयं प्राप्नोतु। कीदृशे मनसि ? सुकृतेन पुण्यनिचयेन सुष्ठु

कृतेन गीतेन वा। रभसस्य हर्षस्य विभवे पूरे। उत्साहवेगयो: प्रोक्तो रभस: इति-[६]**हलायुध**: स्वभावोक्तिरलङ्कार:। [७]परमप्रेष्ठ दु:खश्रवणासहिष्णुतया व्याकुलचित्तां श्रीराधां दृष्ट्वा सखी स्थगितवाग्बभूवेति पञ्चपदीयं दशमी।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। भणतीति। कविजयदेवे विरहिणां वियोगिनां विलसितेन[९]विलासेन भणति सति वियोगिचेष्टितं कथयति सतीत्यर्थ:। हरि: कृष्ण: मनसि जयदेवमनसि[१०]सुकृतेन पूर्वोपार्जित[११]पुण्येन[१२]हेतुना उदयं प्राप्नोतु। कीदृशे मनसि? रभसस्य हर्षस्य विभव: आधिक्यं यस्मिन्।।५।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। (भणतीति।) कविजयदेवे भणति सति रभस एव विभवो यस्मिन् तस्मिन् मनसि विरहेण विलसितेन विरहचरित्रेण सुकृतेन करणेन हरि: उदयतु। ध्रुवायाभोगाभ्यां षट्पदी।।५।।

१.विस्तारे-ड. २.नास्ति-ड. ३.कवि: जयदेवो-अ.ब. ४.विलासेनेव-अ.ब. ५.मनस्युदयतु हृदयं प्रोप्नोतु-फ.ग.ह.ज. ६.नास्ति **हलायुधे** ७.त: ८.पर्यन्तो भागो नास्ति-अ.ब.इ.ग.ह. ९.विलासितेन-क. १०.कृतेन-ड. ११.पुण्यौघेन-क. १२.नास्ति-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। भणतीत्यादि। कविजयदेवे भणति सति विरहविलसितेन विशिष्टो हरि: सुकृतेन पुण्येन मनसि उदयतु आविर्भवतु। गीतेन हरेर्नामकीर्तनात् पुण्योपचय:। मनसि किंविधे? रभसविभव इति। रभसो हर्षस्तस्य विभवो विभूतिर्यत्र। हर्ष एव विभूतिर्यस्य वेति विग्रह:। अनेन कामक्रोधलोभमोहमदमात्सर्यदोषाभावो मनस: सूचित:। शुद्धेऽन्त:करणे विष्णु: स्वयमेव प्रकाशते" इति **स्मृते**:।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। कविजयदेव भणति सति हरिविरहविलसितेन सुकृतेन मनसि हरिरुदयतु। हरिविरहविलसितेन हेतुना यदुत्पन्नं सुकृतं तेन गायतां शृण्वतां च हरिरुदितो भवतीवत्यर्थ:। किदृशे मनसि? रभसस्य प्रेमोत्साहस्य विभवो यत्र तस्मिन् एवं प्राणपरार्द्धनिर्मन्य नीयचरणस्य निजप्राणनाथस्य विरहवैकल्यश्रवणेन मूर्च्छितायां स्वसख्यां तस्या अपि वाक्स्तम्भोजात इति पञ्चपदै: समाप्ति:।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। एवं प्राणपरार्धनिर्मन्थनीयाचरणस्य निजप्रियतमस्य विरहवैकल्यश्रवणेन मूर्च्छितायां स्वसख्यां तस्या: सख्या अपि वाक्स्तम्भो जायत इत्यनुस्मरन् कवि:

पदचतुष्टयेनैवं विरहं वर्णयन् गीतमुपसंहरति। भणतीति। विरहस्य, हरिविरहस्य विलसितं विलासस्तेन, इत्थम्भावे तृतीया। विरहविलसितरूपमित्यर्थः। गीतमिति शेषः। सहार्थे वा तृतीया। विरहविलसितेन सहितमित्यर्थः। कविजयदेवे भणति सति मनसि, आस्वादकानां चेतसि सुकृतेन तदास्वादजनितमहापुण्येन हरिरुदयतु, आविर्भवतु। सुष्ठु कृतेन वर्णितेन इति विरहविलसितविशेषणं वा। कीदृशे मनसि, तदास्वादोच्छलित-हर्षस्य विभवाधिक्यं यत्र तादृशे।।५ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५ ।। भणतीति; जयदेवस्तु विरहिविलासितेन भगवतः श्रीकृष्णचन्द्रनामोच्चारणं करोति। अस्मिन् संसारे भक्तानां तस्य कवेरपि उत्साहसमये श्रीकृष्णगाथां श्रुत्वा जातभक्तिः प्रकारसुकृतं मनसि स भगवान् सदा वासं करोतु। अत्र वाक्यौचिती **संगीतराजे** केदरारागेण निःसारतालरचित प्रबन्धः इति कथ्यते। इति हरिसमुदया गारुडपञ्चपदानां दशमः प्रबन्धः अष्टपदीषु अष्टपदानि सन्ति परन्तु प्रथमप्रबन्धे एकादशपदानि दशम प्रबन्धे पञ्चपदानि सन्तीति अववादः।।५ ।।

**३१-पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्**
**तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।**
**ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं**
**भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति।।३१ ।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।३१ ।। शेषार्थं श्लोकेन सूचयति। पूर्वमिति। राधे पूर्वं यत्र निकुञ्जे रतिपतेः कामस्य सिद्धयः आश्लेषादिकास्त्वया सार्द्धमासादितास्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थेषु माधवो भूयः प्रचुरस्त्वत्कुचकुम्भनिर्भरतपरिरम्भामृतं वाञ्छतीति वाक्यार्थः स्थिरं भूयश्च भूरि चेत्यमरः। तस्मिन्नेवेत्येवकारोऽवधारणेऽपि सिद्धस्थानमिदमेवेति कृत्वा तत्रेव तच्चरतमुद्यतमित्यर्थः। नन्वेतदिति दुर्ल्लभं कर्म कथमल्पश्रमेण स महातीर्थगमनमात्रेण विनेष्टदेवताराधनेन सम्पद्यत इत्याह। ध्यायंस्त्वामनिशमिति त्वमेवेष्टदेवतेत्यभिप्रायः। इष्टदेवता च विनामन्त्रेणाप्रत्यक्षा न भवति यदुक्तं ''मन्त्राधीनाश्च देवता'' इत्यादि। जपन्निति। जपन्नपि तवैवालापमन्त्रावलीमिति।।३१ ।।

## (२) राणाकुंभकृत-रसिकप्रिया

।।३१।। इदानीं त्वय्येव माधवमनोऽस्तीति तां राधां प्रगुणीकरोति; पूर्वं यत्रेति। हे राधे! माधवस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे भूयो बाहुल्येन पुनरपि त्वत्कुचकुम्भनिर्भर-परीरम्भामृतं वाञ्छति। त्वत्कुचयोर्निर्भरो यः परिरम्भः स एवामृतमिव तत्तीर्थादमृतं जलम्। जलं हि कुम्भेनैव ग्राह्यं भवतीत्युक्तिलेशः। किं कुर्वन्? अनिशमनवरतं त्वां ध्यायंस्तवैवालापमन्त्रावलीं जपन्। एकान्तध्यानजपाभ्यां हि देवताग्रतो जाग्रतः पुरः स्फुरत्येव। तस्मिन्निति कस्मिन्? यत्र निकुञ्जमन्मथमहातीर्थे कामतीर्थे पूर्वं रतिपतेः कामस्य त्वयोपलक्षितास्त्वय्येव प्रसन्नायां लभ्याः सिद्धयः समं समकालमविलम्बेनैव प्राप्ताः। 'रतिपतेः' इत्यत्र कामत्याभिलषितस्येति वक्तव्ये रति' ग्रहणं तस्यामतिशयित-प्रीत्युपादानार्थम् ।अथवा, रतिपतेः कामात्त्वया कामात्त्वया सहायभुतया समं सिद्धय आसादिताः। तदाप्तये पुनः सहायभतां त्वामेव वाञ्छति। अथ च यन्न निकुञ्जादौ कामपुरकतीर्थे येन यस्मात्सिद्धिराप्ता स तमेव ध्यायञ्जपन् निर्भरपरीरम्भामृत मोक्षं वाञ्छतीत्युक्तिलेशः। शार्दूलविक्रीडितं वृत्तम्। अत्र काव्यलिङ्गमलंकार।।३१।।

## (३) जगद्धरकृत- सारदीपिका

।।३१।। किं च त्वत्प्राप्त्यर्थं तपः करोतीत्याह पूर्वमिति श्रीकृष्णः तस्मिन्नेव निकुञ्जमन्मथ महातीर्थे निकुञ्जमेव लतागृहे मन्मथमहातीर्थं कामतीर्थं। तत्र पुनस्त्वाम् अनिशं वारंवारं ध्यायन् तवैव आलापमेव सम्भाषणमेव मन्त्राक्षरसमूहं जपन्निव भूयः पुनरपि त्वत्कुचकुम्भनिर्भरपरिरम्भामृतं त्वदीयस्तनकलशगाढालिङ्गनं पीयूषमिवा-मृतमिव वाञ्छति तस्मिन्कस्मिन् यत्र महातीर्थे त्वया समं पूर्वं रतिपतेः कामस्य सिद्धये मनोरथाः असादिताः प्राप्ताः तस्य ता सिद्धिप्राप्त्यनन्तरं मोक्षामृतं प्राप्यते तद्वत्।।३१।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३१।। पुनः कृष्णस्य राधाविषयिणीमुत्कण्ठां श्लोकेनाह; पूर्वमिति। हे सखि! माधवः कृष्णो भूयस्त्वदीयौ यौ कुम्भाविव कुचौ स्तनौ तयोर्निर्भरं गाढं यः परिरम्भ आलिङ्गनं तदेवामृतं मोक्षस्तं वाञ्छति। सान्द्रानन्दसन्दोहाविर्भावजनकत्वेन तत्कुचकुम्भपरिरम्भस्य मोक्षत्वेन निरूपणम् । **वेदान्तिनां भाट्टानां** च मते परमानन्दा-वाप्तेरेव मोक्षत्वात्। किं कुर्वन्? तस्मिन्नेव निकुञ्जरूपे मन्मथस्य कामस्याधिष्ठानभूते महातीर्थेऽनिशं निरन्तरं त्वामेवेष्टदेवतां ध्यायन्। तवैवालापास्त एव मन्त्रास्तेषामेवावलीं पङ्क्ति जपन्। महातीर्थे हेतुगर्भं विशेषणमाह; पूर्वमिति। पूर्वं पुरा यत्र त्वया सह

रतिपतेः कामस्य चुम्बनालिङ्गनादिरूपाः सिद्धय आसादिता माधवेन प्राप्ताः। तथा झटिति वाञ्छितफलप्रदत्वेन महातीर्थं तदपि बोध्यम्। अन्योऽपि साधको मोक्षममृतं वाञ्छन् यत्र सिद्धिं पूर्वं प्राप्नोति तत्रैव सिद्धनिकुञ्जादिमहातीर्थे कस्याश्चिद्देवताया मन्त्रावलीं जपति, तामेव देवतां ध्यायति। अत्र आवली'पदोपादानान्मालामन्त्रत्वमस्य प्रतिपादितम्। तत्प्रयोजनं च सिद्धसुसिद्धत्वादिऋगधनादिशोधनमन्त्रेणेव फलसामर्थ्यं प्रतिपादितम्। तदुक्तं **योगरत्नावल्याम्**; 'स्वप्ने प्राप्ते स्त्रिया दत्ते मालामन्त्रे तथैव च। वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत्।।' इति । निकुञ्जादिमहातीर्थे मन्त्रादि जपञ्झटिति फलसिद्धिर्भवतीति ध्वनितम्। तदुक्तं **"मञ्जूषायाम्"** 'गृहगोष्ठवनारामनदीनग-सुरालये। समीपे वा गुरोस्तस्य सिद्धिः स्यादुत्तरोत्तरा' इति। 'मुक्तिः कैवल्यनिर्वाण-श्रेयोनिःश्रेयसामृतम्' **इत्यमरः**।।३१।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३१।। गीतशेषाशं श्लोकेन पूरयति। पूर्वमिति। यत्र यस्मिन् वानीरकुञ्जे येन माधवेन त्वया समं भवत्या सह, अथवा येन माधवेन समं त्वया वा रतिपतेः कामदेवस्य सकाशात् सिद्धयः कामक्रीडाः आराधिताः प्राप्ताः। अथवा कामदेवस्य सिद्धयः युवयुवतीघटनासामर्थ्यरूपकार्य्यसिठ्ठयः आराधिताः सम्पादिताः आपादिता इति पाठे तद्वत्। इदानीं स एव माधवः तस्मिन्नेव एकाधिकवारं कार्य्यसिद्धेर्हृष्टत्वात् तस्मिन्नेवेत्युक्तमित्यवगन्तव्यम्। निकुञ्जमन्मथमहातीर्थे लतामन्दिररूपे कामदेव-स्यात्यन्तविहारयोग्ये पुण्यक्षेत्रे। यद्वा मन्मथस्य महः स्त्रीपुंसानुकूलमेतदित्युद्भवो यत्र तच्च तत्क्षेत्रं च तस्मिन् रहः क्रीडानुकूलसमस्त्यमस्त्यत्येतदर्थद्योतनार्थमाकारः महातीर्थेत्वखण्डं वा मन्मथेति योगिकं सर्वमखण्डं वा पुनः भूयोऽपि त्वामनिशं सर्वदानत्येकदा, इदं तु तदेकायत्तता सूचनार्थमित्यवगन्तव्यम्। ध्यायन् चिन्तयन् न केवलं ध्यानमात्रमपितु तवैवालापः रहस्यवार्त्ताः एव मन्त्राः गुप्तभाषणानि तेषामावलिं परस्परं जपन् तया रहसि मां प्रत्येवमुक्तमित्यनेनाकारेण मधुरं भवद्वचनमीष-दुच्चारयान्नित्यं भूयः पुनरपि तव कुचकुम्भयोर्निभर परिरम्भः गाढालिङ्गनम्।

''उपसर्गस्य घञमनुषेध बहुलमिति'' दीर्घः स एवामृतं मोक्षं तं वाञ्छति काङ्क्षति लोके यथाशक्तिपुरुषः क्वचित्तीर्थविशेषे एकवारं कार्य्यसिद्धिं प्राप्य स तस्मिन्नेव तीर्थे पुनरिष्टान्तरसिद्धये इष्टदेवतां ध्यायन् तस्या एव नामावलिं जपंश्चामृतमेव वाञ्छति। तथा कृष्णोऽप्युक्तविशेषणविशिष्टः सन्नालिङ्गनामृतं वाञ्छति। धर्मतौल्यादौपम्य प्रतीते दीपकानुप्राणितरूपकालङ्कारः।

प्रस्तुतानां च सामर्थ्येतुल्यधर्ममतम्। औपम्यं गम्यते यत्र दीपकं तन्निगद्यत इति लक्षणात्। तेन च यथा उक्त धर्माचरणेन सन्तुष्टा देवता क्षिप्रमेव ध्यातुरमृतं प्रयच्छति। तथा क्षिप्रमेव त्वयाप्यालिङ्गनामृतं दातव्यमिति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनि:।।३१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३१।।एवं सति हरि: कुत्र किङ्कुर्वन् तिष्ठतीत्यत आह, हे राधे तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे निकुञ्जमेव मन्मथस्य महातीर्थम्। तत्र पुन: माधव: त्वत्कुचकुम्भयोर्निभरोऽतिगाढो य: परिरम्भ: स एवामृतम्, अमृतमिव नि:शेषतापशम-कत्वात्। तद्वाञ्छति। कस्मिन्? यस्मिन् स्थाने पूर्वं त्वया रतिपते: सिद्धय: कामसम्बन्धिन्यो मनोरथनिष्पत्तय: आसादिता: प्राप्ता:, तेनेत्यर्थात्। किं कुर्वन्? त्वामनिशं वारम्वारं ध्यायन् तवैवालापमन्त्राक्षरं जपन्। तवैवालाप: सम्भाषणं मन्त्राक्षरमिव, तदपि जपन्। तथा च ध्वनिरन्योऽपियत्राणिमादिसिद्धिं लभते तत्रैव महातीर्थे किञ्चिद्ध्यायन् किञ्चिदपि जपन् अमृतं मोक्षं वाञ्छतीत्युचितमेव। 'अयाचितं स्यादमृतं पीयूषमोक्षयोरपि। भोजने यज्ञशेषे च मरणाभावतोययोरपी'ति।।

+'विरहिविलसितेन' इति पाठान्तरम्।

*'तवैवालापमन्त्रवलीभि'ति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३१।।[१]किञ्च त्वत्प्राप्तये [२] तस्योत्कण्ठामाह, पूर्वमिति। हे सखि हे राधे! माधव: श्रीहरिस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे [(३)]निकुञ्जवरकामतीर्थे भूयो वारं वारं त्वत्कुचकुम्भयो: परिरम्भो[४]गाढालिङ्गनं वाञ्छति। कुम्भपदं रतिजलधितरणायेति भाव:।[५] किं कुर्वन्? पुनस्त्वामेव नान्यां इह[६] तीर्थे ध्यायन्। अनिशं निरन्तरं तव आलाप एव मन्त्रा: परमसिद्धिप्रदा मन्त्रास्तेषामावलिं परम्परां जयन्नावर्तयन् त्वामिष्ट[७]देवतारूपेणावर्तयन्नि (ति) स्नेहातिशय: सूतित:। तीर्थप्रभावमाह यत्र निकुञ्जसिद्धतीर्थे पूर्वं [८] प्रथमं समं सार्धं रतिपते: कामस्य सिद्धय: [९] कामसुखानि [१०] त्वया आसादिता: प्राप्ता:। एतेनात्र सङ्ग: कामो[११]दृष्टप्रयत्नेन सेव्यत इति ध्वनि:। स्वभावोक्तिरलङ्कार:।।३१।।

[१२]इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां दशम: प्रबन्ध:।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३१।।[१३] किञ्च त्वत्प्राप्त्यर्थं तपः करोति (इत्याह) पूर्वमिति। हे राधे! माधवः श्रीकृष्णस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थेनिकुञ्ज मेव लतागृहमेव मन्मथमहातीर्थं[१५] कामतीर्थं तत्र पुनस्त्वामनिशं ध्यायंस्तवैवालापमन्त्रावलीं(७)सम्भाषणमेव मन्त्राक्षरसमूहं[२] जपन्नपि जपन्नेव भूयः पुनरपि त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं [३]त्वदीयस्तनकलशयो-र्गाढालिङ्गनं पीयूषमिवामृतमिव वाञ्छति।[४] तस्मिन् कस्मिन्? यस्मिन् महातीर्थे त्वया समं पूर्वं रतिपतेः कामस्य सिद्धयो मनोरथा आसादिता : प्राप्ताः। तपस्यता सिद्धिप्राप्त्यनन्तरं मोक्षामृतं प्राप्यते तद्वत्।।३१।।

[५] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां दशमः प्रबन्धः।

१.नास्ति-ग. २.तस्यौत्कण्ठ्यमाह-ग. ३.निकुञ्जवरे कामतीर्थे-अ.ब. ४.गाढालिङ्गनामृतं-इ.फ.ग.ज. ५.किञ्च पुनस्त्वामेव-अ.ब. ६.नास्ति-अ.ब. ७.देवतात्वेन-इ.फ.ग.देवत्वेन-ज.ह. ८.प्रथमं सार्धं-इ.ग.ह. ९.सुखानि-ग. १०.तया-अ.ब. ११.दृढप्रयत्नेन-अ.ब. १२.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. १३.किञ्च पूर्वमिति-क. १४.तः १५.पर्यन्तं नास्ति-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३१।। (पूर्वमिति।) यत्र निकुञ्जे त्वया समं रतिपतेः कामस्य सिद्धयः आन्तरबाह्यसम्भोगरूपाः आसादिताः अनुभूताः तस्मिन्नेव निकुञ्ज एव? मन्मथस्य महातीर्थं तस्मिन् पुण्यक्षेत्रे माधवः पुनः अनिशं अविच्छिन्नं त्वां ध्यायन् तवैव आलापा एव शब्दा एव मन्त्रावलिं मन्त्रग्रामं जपन् भूयः त्वत्कुचकुम्भयोर्निर्भरः गाढः परीरम्भः आलिङ्गनमेव अमृतं वाञ्छति काङ्क्षते। अत्र निकुञ्जादीनां तीर्थत्वाद्यारोपणात्तदङ्गानां तीर्थाङ्गत्वारोपणात्सावयवरूपकालङ्कारः। तत्र तीर्थे तन्माधवस्य योगित्वारोपादेक-देशविवर्ति। शब्दाः आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तदिति लक्षणात्।।३१।।

[६]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां दशमः प्रबन्धः।

१.नास्ति-क. २.नास्ति-क. ३.त्वदीयस्तनकलशगाढालिङ्गनामृतं-क. ४.नास्ति-क. ५.नास्तीयं पुष्पिका-ड.क.ल.म. ६.नास्तीयं पुष्पिका-इ.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३१।। पूर्वमित्यादि। पूर्वं पूर्वस्मिन् काले रतिपतेः कामस्य सिद्धयः नखक्षतचुम्बनादयः त्वया समं यत्रासादिताः प्राप्ताः तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे निकुञ्जो लतागृहं तदेव मन्मथमहातीर्थं तस्मिन् पुनर्भूयः प्रचुरं त्वत्कुचकुम्भयोर्यो निर्भरपरीरम्भः स एवामृतं निःश्रेयसं मुख्यास्पदत्वात् तद् वाञ्छतीति वाक्यार्थः। ''स्थि(स्फि)रं भूयश्च भूरि च'' **इत्यमरः**। ''श्रेयो निःश्रेयसामृतम्'' **इत्यमरः**।

तस्मिन्नेवेत्यत्रैवकारोऽवधारणेऽपि सिद्धस्थानमेवेति कृत्वा तत्रैव तच्चरितमुद्यत इत्यर्थः। नन्वेतदतिदुर्ल्लभं कर्म कथमल्पश्रमेण महातीर्थागमनमात्रेण विनेष्टदेवताराधनेन सम्पद्यत इत्याह। किंकुर्वन्? त्वामनिशमिति। अनवरतं ध्यायन्निति। त्वमेवेष्टदेवतेत्यभिप्रायः। नन्विष्टदेवता च विना मन्त्रेण प्रत्यक्षा नाचिराद्भवति। यदुक्तम्, "मन्त्राधीनाश्च देवताः" इति। किंकुर्वन्? तवैवालापमन्त्रावलीमिति। आलापो भाषणं तदेव मन्त्रावली मन्त्रमाला तां जपन्। अन्योऽपि यत्र तीर्थे प्राप्तसिद्धिर्भवति तत्रैव जपध्यानपरायणः मोक्षमाकाङ्क्षते। वस्तुतस्तु पूर्वसंभुक्तस्थाने तां विचिन्त्य त्वन्नाम धृत्वा त्वदालिङ्गनं वाञ्छति।।३१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३१।। अथ मूर्च्छाविघटनायोपायान्तरमनवेक्ष्य सखी श्रीकृष्णचरितमेव पुनः वर्णयितुम् आरब्धेति श्रीराधिकाया अभिसारिकावस्थां सखीवचनेनैव वर्णयिष्यन्नाह पूर्वमिति । हे सखि ! पूर्वं यत्र कुञ्जे कन्दर्पस्य सिद्धयः आश्लेषादिकाः त्वया सह प्राप्ताः तस्मिन्नेव निकुंजे मन्मथकेलिसिद्धक्षेत्रे तस्मिन् पुनः माधवः त्वत्कुचकुम्भ-निर्भरपरीरम्भामृतं भूयः प्रचुरं वाञ्छति। नन्वेतदितिदुर्लभं तीर्थागममात्रेण इष्टदेवताराधनं विना कथं सिध्यति तत्राह, निरन्तरं त्वामेव ध्यायन् त्वमेव इष्टदेवता इत्यभिप्रायः। मन्त्रजपमन्तरेण इष्टदेवता नाचिरात् प्रत्यक्षा भवतीत्यत आह, निरन्तरं तवैवालापमन्त्राक्षरं जपन्।।३१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३१।। एवं श्रीकृष्णस्य विरहार्त्तिविज्ञापनेन स्वसखीमपगतमानां विधाय पुनरभिसरणाय प्रसादाभिमुखीं कर्त्तुं तस्योत्कण्ठावस्थामाह; पूर्वमिति। हे सखि! माधवः पूर्वं पूर्वस्मिन् काले कालस्य सन्निकृष्टत्वेऽपि विरहान्तरिततया चिरविप्रकृष्टत्वेन प्रतीयमानत्वात् पूर्वमित्युक्तम्। यत्र वासभवनसौभाग्यभाजि निकुञ्जे त्वया सम्भोगाभिलाषाभिव्यंजकविलासशालिन्या समं सार्धं रतिपतेः सिद्धयश्चुम्बनालिङ्गनादि-सम्भोगानन्दसंदोहा आसादिताः प्राप्ता आसन्, तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे, निकुञ्जस्य सङ्केतवसतितया मन्मथसम्बन्धिमहातीर्थत्वं झटिति तत्तत्कामनासफलसाधकत्वात्। पुनरपि भूयोविश्लेषरहितं तव कुचकुम्भयोर्ये निर्भरपरिरम्भा गाढाश्लेषास्त एव विरहसन्तापहन्तृत्वान्निरतिशयानन्ददातृत्वात् च अमृतं सुधा तत् वाञ्छति कामयते। भूयः प्रचुरं वाञ्छतीति वा। परिरम्भेति उपसर्गस्य घञ् मनुष्ये बहुलमिति दीर्घः। ननु अतिदुर्लभं हि वाञ्छितमिष्टदेवताराधनं विना तीर्थगमनमात्रेणापि कथं सिद्ध्येत्। अत आह; माधवः कीदृशः आनिशं निरन्तरं त्वां ध्यायन् चिन्तयन्, त्वमेव

तस्याभीष्टफलदात्री देवतेति अभिप्रायः। मन्त्रपुरश्चरणमन्तरेण ध्यानमात्रेणापि स्वेष्टदेवतापि झटिति कथं प्रसीदतीत्यत आहतवैव। न त्वन्यस्या ये आलापास्त्वदा-भिमुख्यसंपादकवचनानि, राधे! माधवि! माधवप्रियतमे! गान्धर्विके! राधिके! इत्यादि रूपाणि, तान्यैव त्वत्प्रसादजनकत्वात् मन्त्राः, तेषामावलिः परम्परा, तां जयन्, प्रणयगौरवाभ्यामावर्त्तयन् एवेत्यर्थः। लोकेऽपि हि यथा कश्चन साधको यस्मिन् तीर्थे श्रेयः प्राप्तवान् तमेव तीर्थं पुनरभीष्टप्राप्त्यर्थं गच्छन् जातविश्वासतया जपादिकं करोति, तथायमपि प्राप्तनत्वत्सम्भोगसुखसम्पादकप्रदेशं प्राप्य पुनरपि तथैवात्र तत्तत्सुखमनु-भविष्यामीति द्विगुणितोत्कण्ठातुरो भवतीति भावः।।३१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३१।। पूर्वं यत्रेति; मूर्छाद्यवस्थामभिलक्ष्य तस्योपचाराभावात् सखी तस्यावस्थां वर्णयन्त्याह; हे सखि! इतः प्राग् यदा त्वया कामपीडया कामक्रीडा तेन कृष्णेन विहिता। यतः स खलु कामसिद्धः सत्पुरुषः त्वया साकं चुम्बनालिङ्गनादिकृतम्। तस्यां खेलायां कामव्यापारं साधयितुं स खलु कुचविमर्दनादिषु व्यापारेषुः सिद्धः इदानीं स त्वां अनिशं ध्यानं करोति। त्वन्नामाक्षरे जपोपि करोति। वारम्बारं तव कुचकुम्भालिङ्गनजन्य रसपानमिछति। अतः प्रेम्णा जपः ध्यानं योगादिकंञ्च करोति कृष्णः। शार्दूलविक्रीडितं छन्दः।।३१।।

।। एकादशः प्रबन्धः/गीतम् ११ ।।

।।गुर्जरी रागैकतालाभ्यां गीयते।।

**१-रतिसुखसारे गतमभिसारे मदनमनोहरवेशम्।**
**न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम्।।**
**धीरसमीरे यमुनातीरे वसति वने वनमाली।। ध्रुवम् ।।१।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।१।। गुर्ज्जरीरागेण गीयते। अभिसारिकेयं नायिका तथा चोक्तम्,

या च निर्लज्जिता वाचं मदेन मदनेन वा।
अभियाति प्रियं साभिसारिकेति प्रकीर्त्तिता।।

रतीति। यमुनातीरे वनमाली वसतीति योजना। कीदृशे, धीरसमीरे धीरो मन्दः समीरो यत्रेति विग्रहः। ''सुगन्धं शीतलं मन्दं वर्णयन्ति समीरणमिति'' "कविसम्प्रदायः"।

तत्र धीरशब्दोपादानात् मान्द्यं यमुनातीरोपादानाच्छैत्यं पवनशब्दोपादानाद् वा क्षेपात्सौगन्ध्यं च वायोर्शैत्यम्। वसन्ते सर्ववनानामुत्पन्न-कुसुमत्वाम् इत्यभिप्रायः। रतिसुखेत्यादि। हे नितम्बिनि! गमनविलम्बनं न कुरु, तं हृदयेशं प्राणनाथमनुसरेति योजना कदाचित्सुरताभिलाषुको न स्यादित्याह। अभिसारे न गतमिति अकामुकस्य किमभिसारगमनेनेत्यभिप्रायः। "आकल्पवेशो नेपथ्यमि**त्यमरः**"।।१।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।१।। सांप्रतं तमभिसुखमभिसर्तुं राधां त्वरयति। तत्र पूर्वं ध्रुवपदं व्याक्रियते; धीरसमीर इति। इति पदार्थपाठः कुत्रचिदस्ति। गोपीपीनपयोधरमर्दनचपलेन करयुगलेनाढ्य इत्यर्थः। 'आढ्यः शालिनि विख्यातः'। हे राधा! यमुनातीरे वने। यमुनातीरविषये वने। अथवा; वेतसवने वनमाली श्रीकृष्णो वसति। किंभूते वने? धीरसमीरे मन्दवायुनि। एतेन वायोस्त्रैविध्यमुक्तम्। तस्याश्च स्थानेनोत्कण्ठा जनिता। इति ध्रुवः।। रतिसुखेति। हे नितम्बिनि! तं वनमालिनमनुसर। गमनविलम्बनमभिसाराय कालातिक्रमं न कुरु, नितम्बिनी हि बृहन्नितम्बत्वाच्चलितुं न शक्नोतीति तां त्वरयति। किंभूतम्? अभिसारे संकेतस्थाने गतम्। किंभूतेऽभिसारे? रतिसुखसारे रति-सौख्यप्रधाने। किंभूतं तम्? मदनवत्कामवन्मनोहरवेशम्। पुनः किंभूतम्? हृदयेशं मनस ईशम्। तव मनस्तदधीनामेत्यर्थः। अथवा; हृदये वर्तमानं तं वनमालिनमिति योज्यम्। किंभूतम्? आयुरेवेदमितिवत्सुखहेतुत्वाच्छमेव।।१।।

## (३) जगद्धरकृत- सारदीपिका

।।१।। इति पदार्थपाठः कुत्रचिदस्ति गोपीपीनपयोधरयोर्मर्द्दनेन चपलेन करयुगेनाढ्यः आढ्यः शालीति विख्यातः हे राधे यमुनातीरे वने यमुनातीर विषये वने अथवा वेतस्य वने वनमाली श्रीकृष्णोवसति किम्भूते वने धीरः मन्दः सभीरः वायुर्यत्र एतेन वायोस्त्रैविध्यमुक्तं तस्याश्चस्थानमुत्कण्ठिता जनिता इति ध्रुवपदं हे नितम्विनि त्वं तवलम्बनमालिनमनुसर अनुगच्छ गमनविलम्बनं अभिसाराय कालातिक्रमं न कुरु मा कृथाः नितम्बिनि। हे वृहन्नितम्ब त्वाचलितुनशक्नोतीति। त्वां त्वरयति किम्भूतं रतिसम्भोगसुखं सारमुत्कृष्टं यत्र अभिस्त्रियतेऽस्मिन्नित्यभिसारः सङ्केतस्थानं तत्रगतं प्राप्तं पुनः सः इश्वरः तव मनस्तदधीनमित्यर्थः अथवा हृदये वर्त्तमानं तं वनमालिनमिति योज्यं किम्भूतं आयुरेवेदानीं केवलं सुखहेतुत्वात्शममेवं अपि च।।१।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। किंचित्प्रसादोन्मुखीं राधां वेगेन गमनाय त्वरयितुमाह; रतिसुखेति। गीतस्यास्य गुर्जरीराग: एकतालीताल:। गीतार्थस्तु हे नितम्बिनि प्रशस्तनितम्बवति! हृदयेशं कृष्णमनुसर गच्छ। गमनविलम्बनं गमने कालक्षेपं मा कुरु। कीदृशं तम्? अभिसारेऽभिसरणस्थाने गतं प्राप्तम्। कीदृशेऽभिसारे ? रतिसुखस्य सारमुत्कृष्टफलं यत्र तादृशे। पुन: कीदृशम् ? मदनस्य कामस्येव मनोहरश्चित्तहरणक्षमो वेशो यस्य तम्। 'आकल्पवेशौ नेपथ्यं' **इत्यमर**:। 'वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके' इति विश्व:।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। गुज्जरीरागेण गीयते। पुनरपि कृष्णस्य राधाविषयवाञ्छामेव वर्णयति। यतीति। गुज्जरीरागेण गीयत इत्युक्तम्। तस्यायमभिप्राय:। जयदेवकवेर्गुज्जरदेशत्वात्? देशस्थानां तस्या: प्रियत्वं पुनरपि गुर्जरीराग उत्क्षिप्त इत्यवगन्तव्यम्। एकतालीतालेण गेयम्। तत्र धीरसमीरेत्यादि वनमालीत्यन्तं ध्रुवपदं तु अत्र केषुचित् पुस्तकेषु वनमालीत्यस्योपरि गोपीपीनपयोधरमर्द्दनचञ्चलकरयुगशालीति ध्रुवपदान्तर्गतं लिखन्ति। केचित् प्रक्षिप्तमिति वदन्ति। तदयुक्तम्। तत्र कविप्रसिद्धनियमाभावात् समाप्तपुनरात्तता-रूप काव्यदोषस्यापि सम्भवाच्च। तथापि तेन सहैव ध्रुवपदं वाञ्छ्यते। अस्यामष्टपद्यां यथायोगं यत्तच्छप्तरं ध्रुवपदं योजनीयं योजनाप्रकारस्तु व्याख्यानादवगन्तव्यम्।

गोपीनां गोपकामिनीनां पीनौ पीवरौ पयोधरौ तयो: मर्द्दनं कराग्रै: संस्पर्श तत्र चञ्चलं चपलं यत्करयुगं तेन शाली रमणीय: अनेन त्वया शीघ्रमेव तदनुसरणं कर्त्तव्यम्। अन्यथा अन्यासक्तो भविष्यतीति भयं सूच्यते। अथवा वहुवल्लभोऽपि ता: परित्यज्य त्वामेकामेव प्रणीयावस्थित इति तव सौभाग्यं किमु वर्ण्यत इति व्यज्यते। एतादृशो यो वनमाली श्रीकृष्ण: धीर उद्दीपकत्वेन गभीर: अथवा धियं बुद्धिं राति गृह्णाति इति धीरो मनोहर: रा आदान इत्यस्माद्धातोरातोऽनुपसर्गेकेत्रीतिक:। एतादृशो समीरो मलयानिलो तत्र तादृशे यमुनातीरे कालिन्दीतटे भुवि वसति तिष्ठतीति तमनुसरेत्यन्वय:। कीदृशे यमुनातीरे कीदृशं तमित्याकाङ्क्षायां द्वयं विशिनष्ठि, रतीति। हे नितम्बिनि! पृथुजघने! राधे! निषिध्यमानं बिलम्बप्रसत्ति:, अनेन पदेन सम्बोधनमित्यवगन्तव्यम्। रतिसुखस्य सुरतजन्यसौख्यस्य सारो बलं यस्मात्तादृशे सततसुरतसुखसम्पादनसमर्थ इत्यर्थ:। अथवा रतिसुखसारे सुरतसुखसारनिमित्ते अभिसारे अभिसरणक्रियायां गतमित्यर्थ:। भवत्कर्मकाभिसरणशालिनमित्यर्थ:। अतएव

जनमनोहरवेशमितिसमन्वयः। किञ्च अभिसरन्ति रतार्थमभिसारिका अत्रेत्यभिसारः। अभिसारिका विहारयोग्य इत्यर्थः। एतादृशे तीरे गतं स्थितमित्यर्थः। किञ्च्च मदनस्य कामदेवस्य मनोहरः अनुकूलो वेशो यस्य तादृशो मन्मथोद्दीपकवेशधारिणमित्यर्थः।

अत्र भाषान्तरे षशयोर्भेदाभावादन्त्यानुप्रासोपपत्तिरवगन्तव्या। अथवा मदनस्य मनो तद्धरतीति मनोहरः एतादृशो वेशो यस्य तादृशं मन्मथस्यापि स्पृहणीयवेशमित्यर्थः। उक्तं च साक्षान्मथन्मन्मथ इति **श्रीभागवतादो**। अथवा मनोहरतीति मनोहरः। तादृशश्चासो वेशश्च मदनस्य मनोहर वेशो यस्य तादृशं प्राप्तमदनवेशमित्यर्थः। एतादृशं तं हृदयेशमनुसर शीघ्रं कृष्णमुद्दिश्य गच्छेत्यर्थः। गमनविलम्बनं यमुनातीरप्रयाणे कालक्षेपं न कुरु। आलस्यात् अमृतं विषमिति मनसि निधाय नायकगुणांश्चाकलस्य गमनविलम्बनं मा कृथा इत्यन्वयः। सुखसार इत्यत्र सुस्थिर इति घञ प्रत्ययः। अत्र अभिसार इत्यत्र कर्त्तरि च कारकेत्यादिना घञ् प्रत्ययः।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। गीतस्यास्य गुर्जरी रागः। एकताली तालः। रागलक्षणन्तूक्तमेव। सम्प्रति सखी कृष्णसङ्गमाय राधां त्वरयति। वनमाली श्रीकृष्णः वने वसति तिष्ठति। कीदृशे वने? यमुनातीरे यमुनासमीपस्थे। पुनः कीदृशे? धीरसमीरे। धीरो मन्दः समीरो यत्र एवम्भूते। वनमालीत्यनेन नागरवेशधारणेन श्रृङ्गारित्त्वं दर्शितम्। यमुनातीरधीरसमीर इति विशेषणद्वयेन सन्तप्तायास्तव तापशान्त्यर्थमपि तत्र गमनमुचितमिति दर्शितम्। तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे इत्यनेन कृष्णस्यावस्थितिस्थानकथनेऽपि यमुनातीरे वने वनमाली वसतीत्यनेन यत्पुनस्तदभिधानं तत्तु नानास्थाने पूर्वं कृष्णेन राधया समं रतिपतेः सिद्धय आसादिता इति तदवस्थितिस्थानानियमेन तन्नियमार्थमुक्तमित्यवधेयम्। 'गोपीपीनपयोधरमर्दनचञ्चलकरयुगशालीति क्वचित् पाठः। स तु प्रामादिकः, तथा सति पदसाम्येन ध्रुवत्वव्याघातः। अन्यथा गोपीपीनपयोधरमर्दनशालित्व-स्मरणेनेर्ष्योत्पादनेन प्रकृतानुपयोगश्च। हे नितम्बिनि! प्रशस्तश्रोणीयउक्ते। प्रशंसायामिनिः। गमनविलम्बनं न कुरु। प्रशस्तनितम्बगौरवादेव गमनं विलम्बेन भविष्यतीति किमर्थं विलम्बनमिति वाक्यार्थः। तं कृष्णमनु लक्षीकृत्य सर गच्छ। किम्भूतम्? हृदयेशं हृदयस्य मनसः तवेत्यर्थात्, ईशं नियन्तारम्। तथा च तदधोनहृदया त्वमवश्यं यास्यसि। संप्रत्यगमने सनैरपेक्ष्यमात्रमिति ध्वनितम्। पुनः किम्भूतम्? मदनमनोहरवेशं मदनवन्मनोहरः कमनीयो वेशः शरीरसन्तानं यस्य। पुनःकीदृशम्? अभिसारोक्तम् अभिसरत्यत्रेतितत्र व्युत्पत्या अभिसारः संकेतस्थानं तत्र गतम्। कीदृशे अभिसारे? रतिसुखसारे रतिजनितसुखं रतिसुखं

तदेव सारमुत्कृष्टं यत्र एवम्भूते। एतेन तत्र गतस्य कृष्णस्य रतिव्यतिरिक्तं नान्यदुद्देश्यमिति ध्वनितम्।।१।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१।। एवं स्वानुरागश्रवण [१] प्रसन्नां तां श्रीकृष्णं प्रति सखी प्रेरयतिरतिसुखेत्यादिना। [२] गीतस्य गुर्जरीरागः रूपकतालश्चोभयोर्लक्षणं पूर्वमेवोक्तम्। [३] ध्रुवपदस्यापि। हे [४] नितम्बिनि पृथुनितम्बयुक्तो। तस्या उत्कर्षदर्शनाय नितम्बवतीति ध्वनिः। हृदयेशं तव हृदयानुवर्तिनं तं[१]श्रीकृष्णं अनुसर अनुगच्छ। गमनायाभिसाराय[५]विलम्बितं न कुरु [६]मा कुरु। यावद्वनमाली यमुना[७]तीरे तिष्ठति तावदेवानुसर। कीदृशे ? रतिसुखसारे रतिसुखं सुरतसुखमेव सारो यत्र। [८]त्वदागमनकाङ्क्षयाऽभिसारे [९] तिष्ठन्तम् [१०]। कीदृशं तम् ? मदनमनोहरवेशं कामस्य मनोहरो वेशः शरीराकारो यत्र। कीदृशे ? धीरो मन्दः[११] समीरो वायुर्यत्र। त्वद्विरहनिवारणाय धृता वनमालेति ध्वनिः। यमुनातीरधीरसमीराभ्यां शैत्यमान्द्यसौगन्ध्यान्युक्तानि। [१२]धीरा मन्दगते धीर इति **यादवः**[१३]। प्रेङ्खो नामालङ्कारः। कीदृशो वनमाली ? गोपीनां पीनपयोधराणां वर्तुलस्तनानां मर्दनेन चञ्चलं चपलं यत् करयुगं हस्तयुगलं तेन शाली शोभमानः। वशीकृतयुवतिसमूहो [१४]वा ।।१।।

१.प्रसन्नं श्रीकृष्णं प्रति-ग. २.गीतस्यास्य-फ.ज. ३.ध्रुवस्यापि-ग.ह. ४.नास्ति-ग.इ. ५.नास्ति-अ.ब.ह. ६.विलम्बनं-इ.फ.ग.ह.ज. ७.मा कुरु नास्ति-अ.ब.ह. ८.तीरे वने-इ.फ.ग.ह.ज. ९.तः९.पर्यन्तं नास्ति-अ.ब. १०.तिष्ठति-ग. ११.समीरो यत्र-ग. १२.तः१३.पर्यन्तं नास्ति-ड. १४.इत्यर्थः-ग.नास्ति-फ.ज.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।१।। इदानीं सखी राधां कृष्णं प्रति गन्तुं प्रेरयति [१] गीतेन रतीति। हे नितम्बिनि महान्नितम्बयुक्ते राधे! यमुनातीरे यद्वनं [२] तस्मिन् वनमाली कृष्णो वसति तिष्ठति। कीदृशे तीरे ? धीरसमीरे मन्दमारुते। हे सखि! गमनविलम्बं अभिसारे गमनविलम्बनं न कुरु [३] मा [४] कुरु। तं हृदयेशं कृष्णं प्रति अनुसर अनुगच्छ। कीदृशम् ? [५] हृदयेशं मनस ईश्वरं त्वन्मनस्तदधीनमित्यर्थः। कथम्भूते अभिसारे [६] ? रतिसुखसारे सुरतसुखमेव सारो मुख्यं यस्मिन्। एतादृशे अभिसारे सङ्केतस्थाने गतं स्थितं मदनवत्कामवन्मनोहरवेषः शरीराकारो यस्य[७]तम् ।।१।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। गुर्जरीरागेण एकतालीतालेन गीयते इति।

प्रवर्जितारिग्रहांशन्यासा षाडविका मता।
कदाचिदवरोहेऽपि[८]सपयुग्गुर्जरी भवेत्।।

(रतिसुखेति।) रतिसुखमेव सम्भोगानन्द एव सारः उत्कर्षो यस्मिन्। अभिसरत्यस्मिन् जन इत्यभिसारः। कुञ्जादिसंज्ञकं तत्स्थलं तस्मिन् गतं स्थितं, मदन इव मनोहरः वेशः आकृतिरित्यर्थः। तं हृदयेशं प्राणनाथं माधवं अनुसर तं प्रति याहि। गमनविलम्बं गमने आलस्यं न कुरु मा विधेहि शीघ्रं याहीत्यर्थः। हे नितम्बिनि बृहन्नितम्बवति। राधासम्बोधनम्। तं हृदयेशं प्राणनाथं समनुसर आर्जवं कुरु। तेन नितम्बभारेणालस्यं स्यादिति। विशेष्यस्य साभिप्रायत्वात्परिकराङ्कुरालङ्कारः। ध्रुव (या व्याख्या)। क्व तिष्ठतीत्यत आह, (धीरेति।) धीरो गम्भीरः मन्द इत्यथः; समीरः यस्मिन् तस्मिन्। यमुनायास्तीरे वने। गोपीनां पीनौ पयोधरौ तयोः मर्दनं पीडनं तस्मिन् चञ्चलौ चपलौ करौ हस्तौ तयोः युगेन शालत इति शोभत इति शाली वनमाली आपदप्रसृतस्त्रग्वी वसति।।१ ।।

१.गीतेनाह-क.२.तस्मिन्वने-ड.३-४.नास्ति-ड.५.तः६.पर्यन्तं नास्ति-ड.७.नास्ति-ड.सः-क.८.सपयुता-इ.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।।अस्यां हि गाथायाम् अभिसारिका वर्णनीया। तल्लक्षणं यथा, ''या दूतिका वचनतः स्वतः एव वापि, गाढस्मरज्वरभरार्त्तिपिपासितेव। निर्घातवल्लभजनाधर-पानलोभात्, सा कथ्यते कविवरैरभिसारिका।।'' इति। रतिसुखेति। हे राधे ! यमुनातीरे वने यमुनायास्तीरे यद्वनं तत्र वनमाली वसतीति योजना। किंविधे ? धीरसमीर इति। धीरो मन्दः समीरो यत्रेति विग्रहः। [गोपीपीनपयोधरमर्दनचञ्चलकरयुगलस्मितशाली इति दाशरथीपुरपोथी।] ''सुगन्धं शीतलं मन्दं वर्णयन्ती समीरणम्'' इति कविसम्प्रदायः। तत्र धीर- शब्दोपादानान्मान्द्यम्। यमुनातीरोपादानाच्छैत्यम्। वनशब्दोपादानादाक्षेपात् सौगन्ध्यं च वायोर्ज्ञेयं, वसन्ते सर्ववनानाम् उत्पन्नकुसुमत्वात्। रतिसुखेत्यादि । ततो हेतोः हे नितम्बिनि ! गमनस्य विलम्बनं न कुरु। तं हृदयेशं हरिमनुसर। हृदयेशमित्यनेन तव मनस्तदायत्तमिति सूचितम्। कदाचित् सुरताभिलाषुको न स्यादित्याह। किंविधम् ? अभिसार इति। अभिसारनिमित्तं गतमुपस्थितम्। अकामुकस्य किमभिसार-गमनेनेत्यभिप्रायः। कदाचिदभिसारो हृदयाह्लादको न स्यादित्याह। किंविधे ? रतिसुखसार इति। रतिसुखमेव सारो यत्रेति विग्रहः। यद्वा हरिं किंविधम् ? रतिसुखाय सारे उपादेये अभिसारे अभिसारस्थाने गतं मिलितम्। सारशब्दस्य क्लीबत्वम् उपादेयत्वं च दृश्यते। यथा-''सारं सारङ्गलोचना जपति'' इति। कदाचित् संसारविरक्तो यमुनातीरे तपस्यति नाभिसारगत इत्याह। मदनमनोहरवेशमिति। मदनस्येव मनोहरो वेशो यस्येति

विग्रहः। तपस्विनः किं कामस्येवाकल्पग्रहणेनेत्यभिप्रायः। ''आकल्पवेशौ नेपथ्यम्'' इति।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। एवं तच्चरितश्रवणेन किञ्चिदुच्छ्वसितायां तस्यामत्युत्सुकतया त्वन्वर्त्मनिरीक्षकः स आस्ते। अतस्त्वदभिसरणं युक्तमित्यभिसाराय प्रार्थयते रतिसुखेत्यादिना। अभिसारिकालक्षणं यथा, 'याऽभिसारयते कान्तं स्वयं वाभिसरत्यपि। सा ज्योत्स्नी तामसी यानयोग्यवेशाभिसारिका।' अस्यापि गुर्ज्जरीरागः एकतालीतालः। यमुनातीरे वने वनमाली वसति। कीदृशे ? मन्दः समीरो यत्र तस्मिन्। अनेन सुखदत्वं निविड़त्वात् निर्जनत्वञ्चोक्तम्। वने त्वद्गमनं सहजमेवस्यादत आहः; अभिसारे गतं प्राप्तमभिसृतमित्यर्थः। कीदृशे ? रतिसुखस्य फलरूपे। कदाचित् कार्य्यान्तरार्थं गतः स्यात् न। मदनेन मनोहरो वेशो यस्य तम्। अतो हे नितम्बिनि गमनविलम्बनं न कुरु। प्रशस्तनितम्बतया सहजगमनवैलम्ब्यादिदमुक्तम्। तर्हि किं करोमि ? तम् अनुसर। कीदृशम् ? हृदयेशम्, अतस्त्वद्विरहे दुःखितस्यानुसरणे विलम्बो न युक्त इत्यर्थः।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ।। सम्प्रति त्वन्मुखनिरीक्षणैकधृतजीवनः स आस्ते। अतस्त्वदभिसरणं युक्तमित्यभिसाराय प्रार्थयते। रतिसुखेत्यादिना गीतेन। अस्यापि गुज्जरीरागः। रूपन्तु उक्तमेव रतीति। हे सखि! वनमाली वने वसति। त्वत्प्रसादाकाङ्क्षी त्वां प्रतीक्षते इति। कुत्र प्रदेशे, यमुनातीरे धीरसमीरणाढ्यः यः प्रदेशस्तत्र। धीरो मन्तसंचारी समीरो यत्र इति वनविशेषणं वा। धीरसमीरस्य तीरसम्बन्धात् शैत्यं वनसम्बन्धात् सौगन्ध्यं च । वन इति निर्जनत्वात् निःशङ्कविहारास्पदत्वम्। यमुनातीर इति क्रीडासुखोद्दीपकत्वम्। धीरसमीर इति रतिश्रान्तिहरत्वं सूचितम्। वनमालीति त्वत्प्रहितवनमालधारणादुत्कण्ठातिरेकत्वं च। कुत्रचित् पुस्तके 'गोपी पीनपयोधरमर्दन चञ्चलकरयुगशाली' इति ध्रुवान्तर्गतं लिखितमस्ति। तत्तु प्रक्षिप्तमिति केचिद् वदन्ति। तत् युक्तमेव। समाप्तपुनरात्तरूपवाक्यदोषस्य सम्भवात्। प्रस्तुतरसस्याप्य-पोषकत्वाच्च। अतो न व्याख्यातम्। ननु वने तद् गमनं साहजिकमेव तद् वसतु नाम, तत्राहं किं करोमीत्यत आह, तमनुसर। तत्र हेतुः कीदृशं यतो हृदयेशं, तव हृदयस्याधीश्वरम्। सर्वावस्थासु निरन्तरनिवासेन वशीकृतत्वद्हृदयम् इत्यर्थः। कदाचित् कार्यान्तरार्थं वा गतः स्यादत आह अभिसारे, विविधोत्कण्ठानिर्भरतायां स्पृहणीकयां

त्वदभिसरणक्रियायां गतं, तत्कालीनविविधभावशालितया त्वदेकतानमित्यर्थः। किं वा अभिसरन्ति प्रियमुपगच्छन्ति, अभिसारिका अस्मिन्निति अभिसारः, सङ्केतस्थलं तत्र गतं, प्राप्तं, त्वदर्थमभिसृतमित्यर्थः। कीदृशे, रतिसुखस्य सम्भोगसौख्यस्य सारे, निरुपाधिकप्रेमबन्धातिभूमिकाव्यंजकतया फलरूपे। किं च मदनस्यापि मनोहरो वेशो यस्य तम्। औत्सुक्याधिक्येन परिमितालङ्कारधारितयाऽपि मन्मथस्यापि आनन्दजनकमित्यर्थः। अतो हे नितम्बिनि! गमने विलम्बं न कुरु। न च निर्गतया त्वया नितम्बभाराक्रान्तया शीघ्रं गन्तुं शक्यते, तावदेव सः कां दशां समेष्यतीति न जाने। तत् विलम्बेन गमनं नोचितमिति भावः।।९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। रतिसुखसारेति; गीतगोविन्दे अष्टपदीषु सुकुमारताऽस्ति। परन्तु अस्मिन् एकादशपद्ये सुकुमाराधिक्यमस्ति। फलतः नृत्याभिनाये हृद्यं भवति। श्रीकृष्णस्येमां दशां श्रावयित्वा सखी पुनः तस्यसमीपमभिसरणं कर्त्तुं प्रेरयति। त्वन्मार्गं प्रतिपाल्यास्ते स नागरः। सोऽपि मनोहरसुन्दरवेशेन वर्त्तमानोऽस्ति। अतः सुन्दरवेशधारी श्रीकृष्णस्य समीपं शृंगारनिमित्तमानन्दवोधार्थं तस्य निकटं गच्छ। स खलु यमुनातटे लतावेश्मनि तवोन्नतस्तनमण्डलस्य मर्दनार्थमादिपर्यन्तं परामर्ष्टुमुद्विग्नः व्यग्रकरयुगलौ त्वदभिसारं प्रतिपाल्यास्ते। तत्र च यमुना नद्यास्तीरे पवनोपि धीरं वाति। मन्दमलयपवने तव वर्त्तुलस्तनयोः पर्यन्तमर्द्दनशीलः अत्युद्विग्नहस्तौ यस्य स तव हृदयेश तव प्रणयी तस्य समीपं गमने विलम्बं मा कुरु। आजानु लम्बितामाला वनमाला प्रकीर्त्तिता। आजानु लम्बितस्य वनमालस्य शोभा य वनमालाधारी स वनमाली श्रीकृष्णः श्रीजयदेवकविः प्रसिद्धे उत्कलभूमौ नीलाचलेक्षेत्रान्नातिदूरे केन्दुविल्वाख्याते ब्राह्मणग्रामे अजनि। लक्ष्मीधरः श्रुतिरञ्जनीटीकारः न खलु जानाति ह्येतत् तथ्यम्। गुज्जरीरागस्य गीतानुकुल्येन ग्रहणं न तत् गुज्जरदेशप्रीत्या इति मन्तव्यम्।।१।।

**२- नामसमेतं कृतसंकेतं वादयते मृदुवेणुम्।**
**बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुम्।। धीर०।।२।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२।। कदाचिदन्याङ्गना कामुकोऽभिसारगत इत्याह। नामेति। नामसमेतं यथा स्यादेवं कृतसङ्केतं स कृष्णो मृदु यथा स्यादेवं वेणुं वादयत इति वाक्यार्थः कृतः सङ्केतो यस्येति विग्रहः। इहाहं तिष्ठामि राधे त्वामत्रागच्छेति नामसमेतं कृतसङ्केतमित्यस्यार्थः।

कदाचिद् सुशिक्षितत्वादन्यथावादमानो वेणुरन्यथा वदतीत्येतदाह। ते तव तनुसङ्गतपवनचलितमपि रेणुं बहुमनुत इत्यर्थः। धन्योऽसौ रेणुर्यस्तस्याः शरीरस्पर्शसुखमन्वभूदिति वहुमाननार्थः त्वदन्यनपेक्षस्य हरेः किं तव तनुसङ्गत वायुचलित धूल्याबहुमानेनेत्यभिप्रायः। तनुसङ्गतपवनचलितमिति पूर्वं तनुसङ्गतः पश्चात् पवनेन चलित इति वा विग्रहः।।२।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।२।। अपि च नामसमेतमिति। हे राधे! स हरिर्मृदुवेणुं कोमलवंशीं वादयते। मृद्विति क्रियाविशेषणं वा। कथम्? नामसमेतं यथा स्यात्तथा च नामाक्षरसंयुक्तं कृतसंकेतं यथा स्यात्तथा च। पुनस्ते तव तनुः शरीरं शरीरसंगतपवनचलितं रेणुमपि बहु मनुते। कथम्? अतनु अनल्पं यथा भवति तथा।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। नामसमेतमिति हे राधे हरिः मृदुवेणुं कोमलवंशीवादयते मृद्वितिक्रिया-विशेषणान्तः कथं यथा स्यात् तव नामाक्षरसंयुक्तं कृतसङ्केतं यथा स्यात्तथा च पुनः ततो वने तनु संगीतपवनचलितुं रेणुमपि बहुमनुते कथं यथा भवति अतनुतं पुनः ततो वने तनुसङ्गीतपवनचलितं रेणुं मयि बहुमनुते कथं यथा भवति अतनु अनल्पं यथा भवति।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।।अभिसारस्थलमेवाह; धीरसमीर इति। यमुनातीरे वने वनमाली वनमालाशाली कृष्णो वसति। कीदृशे वने? धीरो मन्दः समीरो वायुर्यत्र तादृशे। अत्र 'धीरे' इति पदेन वायोर्मन्दत्वं, 'यमुनातीर' इत्यनेन शैत्यं, 'वने' इत्यनेन सौगन्ध्यमुक्तम्। कीदृशो वनमाली? गोपीनां पीनपयोधरमर्दनेन चञ्चच्चञ्चलं यत्करयुगं तेन शालते शोभत इति तथा। पाठान्तरे तु गोपीपीनपयोधरपरिसरस्य मांसलस्तनप्रान्तस्य मर्दनं यत्करयुगं हस्तयुगलं तेन शालितं शोभितं शीलं यस्य तादृशः। 'समीरमारुतमरुज्ज-गत्प्राणसमीरणाः' "**इत्यमरः**" । 'धीरः पण्डितमन्दयोः' इति "**धरणिः**" ।। इति "**ध्रुवः**" ।। यदि मद्वचने न प्रत्येषि तदा कृष्णेन वाद्यमानं वेणुमेवाकर्णयेत्याह; नामसमेतमिति। नामसमेतं त्वन्नामाक्षरसहितं यथा स्यादेवं मृदुवेणुं वादयते । हे राधे, प्राणेश्वरि, हे सुन्दरि! इत्येवं कृष्णेन वाद्यमानोद्वेणोः स्वर आविर्भवतीत्यर्थः। कीदृशं वेणुम्? कृतसंकेतं यदा यत्र मया वेणुर्वाद्यते तदा तत्र त्वं राधां नयेत्यर्थः। यद्वा, मया कृतो यः संकेतस्तं त्वन्नामसमेतं त्वन्नामाक्षरसहितं वेणुं वादयते। अहमेतस्मिन्निकुञ्जे

तिष्ठामि, राधे! त्वरितमेहीति कृष्णेन वाद्यमानो वेणुर्वदतीत्यर्थः। किं च नन्विति संबोधने। ते तनुसंगतस्त्वदङ्गसंबन्धी यः पवनो वायुस्तेन चलितमागतमपि रेणुं धूलीं बहु मनुतेऽधिकं यथा स्यादेवमाद्रीयते। अयं रेणुर्धन्यो वस्तदङ्गसङ्गिना मरुता स्पृश्यते, अहमपि धन्यो यस्तेन रजसा स्पृश्ये' इत्येवं बहु मनुत इति भावः। 'रेणुर्द्वयोः स्त्रियां धूलिः' **इत्यमरः**।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। नामेति। हे राधे! यः वनमाली नाम्ना भवदभिधानेन समेतमङ्कितं यथा तथा कृतः सङ्केतस्त्वदागमनसमयो वा यस्मिन् कर्मणि तद्यथा तथा वेणुं वंशनालं मृदुश्रुतिसुखं यथा स्यात्तथा वादयते वाचयति। अथवा कृतसङ्केतः स्वैरावस्थानसमयो यत्रेति व्युत्पत्त्या इदं वेणुविशेषणं वा। किञ्च ननु हे राधे! यश्च वनमाली ते तव तन्वा शरीरेण सङ्गतः यः पवनः तेन चलितमानीतं रेणुमपि भूपरागमपि किमुत भवतीमित्यर्थः। वहुमतुते ननु गौरवेण पश्यति खलु इत्यर्थः। तनुसङ्गतः पवनश्चलितश्चेत्युभयं रेणुविशेषणं अस्मिन् पक्षे रेणुशब्देनाङ्गाराः चन्दनपरागो विवक्षितः। परम्परया भवत्तनुसम्बन्धेऽप्यादरः किल साक्षात्तव तनुसम्बन्धे किमु वक्तव्यमितिभावः। स वनमाली यमुनातीरे वसतीत्यन्वयः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। तत्र गतः कृष्णः किं करोतीत्यत आह। नामसमेतं तव संज्ञाक्षरसहितम् अतएव कृतसंकेतं यथा स्यात्तथा। मृदु कोमलं यथा भवति तथा वेणुं वादयते शब्दायते। अहमिह निवसामि राधिके त्वरितमिहागम्यतामिति कृत्वा कृतसंकेतमित्यर्थः। ननु हे राधे ते तव तनुसङ्गतं शरीरसम्पृक्तं रेणुमपि धूलिमपि पवनचलितं वातेन नीतं बहु मनुते आद्रियते। पूर्वं निकुञ्जे युवयोः केलिरभूत्, तत्रत्यं भवदीयतनुसम्बन्धिरेणु पवनेन चलितं बहु मनुत इति वाक्यार्थः। यद्वा ते तव तनुसङ्गतपवनचलितं रेणुमपि बहु मनुते किम्पुनस्त्वामित्यर्थः। एतेन राधायामनुरागातिशयो दर्शितः।।२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। (नामेति।)[१] मृदुवेणुं मृदुशब्दयुक्तवेणुं वादयते। कीदृशम्? नामसमेतं हे राधे! हे वल्लभे! हे प्राणेश्वरि इति यत्त्वन्नाम तद्युक्तम्। वाद्यमानाद्वेणोस्त्वन्नामैवाविर्भ-वतीति [२] भावः। रामकरी असावरी धनाश्री इति [३] नामरागत्रयं तद्युक्तं वा। कीदृशं नाम? कृतः सङ्केतो यत्र तादृशम्। [४] यर्हि त्वन्नामसमेतो वेणुर्वाद्यते [५] मया तर्ह्येव [६] त्वयाऽऽगन्तव्यमिति सूचितम्। किञ्च [७] हे तनु! अम्बार्थनद्योर्ह्रस्वः [८](पा.

सू.७.३.१०३) ।ते तव तनुसङ्गतपवनचलितमपि रेणुं बहु मनुतेऽत्यादरेण धत्ते बहुश्लाघ्यं आत्मानं मनुते मन्यते वा। यदा वायुना प्राप्तं रेणुमपि धृत्वा धन्योऽहमिति [९] भाव मन्यमानस्तदा त्वदङ्ग[१०]सङ्गेनानन्दो [११] भवतीति [१२] किन्ते वक्तव्यमिति भावः ।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। नामेति। हे राधे! [१३] सः कृष्ण[१४]स्तव नाम्ना समेतं युक्तं मृदुवेणुं मदुशब्दयुक्तं वेणुं कृतसङ्केतं यथा स्यात्तथाऽहमिहाभिसारे तिष्ठामि त्वमत्रैवागच्छेति कृतः सङ्केतो यस्यां क्रियायाम्। [१५] वादयते। तन्वीति सम्बोधने। ते तव तनुसङ्गतपवनचलितं शरीरसम्बन्धि [१६] वायुप्रेरित रेणुमपि बहुसाधु [१७]मनुते।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। (नामेति।) नाम्ना वा राधेति वाऽभिधानेन समेतं युक्तं स्यात्तथेति कृतसङ्केतविशेषणं तदपि कृतं सङ्केतितं अहमत्र वसामीति सूचनं यस्मिन् कर्मणि तद्यथा। मृदृ मन्दं इतरासां अश्रवणं यथा स्यात्तथा वेणुं मुरलीसंज्ञं वादयते। वेणुविशेषणत्वेन सङ्केतं प्रतिदृक्तेन क्लिष्टं न तु अभिमुखीकरणम्। ते तनुसङ्गतः त्वद्दिश्यः पवनः वायु तेन चलितं उत्क्षिप्तं रेणुं धूलिमपि तनु सूक्ष्ममपि बहु मनुते सत्करोति ।।२।।

१.नास्ति-अ.ब.२.ध्वनिः-ग.३.नामत्रयं-ग.४.यदि-ग.५.नास्ति-ग.६.तया-अ.७.तः ८.पर्यन्तं नास्ति-अ.ब.९.नास्ति-ग.फ.१०.सङ्गमेन-इ.फ.सङ्गादेव-ग.११.भवितेति-इ.ह.फ.१२.किं-इ.फ.ग.ह.१३.नास्ति-क.१४.त्वन्नाम्ना-क.१५.तथा वादयते-क.१६.वायुना प्रेरितं रेणुमपि धूलिं-क.१७.मन्यते-व

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। कदाचिदन्याङ्गनाकामुकोऽभिसारगत इत्याह, नामसमेतमित्यादि। नामसमेतं यथा स्यादेवं कृतसङ्केतं वेणुं स कृष्णो मृदु कोमलं यथा भवति तथा वादयते इति वाक्यार्थः। इहाहं तिष्ठामि राधे! त्वमत्रागच्छेत्येवंकारं नाम्ना त्यक्तं यथा स्यात्तथा कृतः सङ्केतो यत्रेति नामसमेतं कृतसङ्केतमित्यस्यार्थः। कदाचित् सुशिक्षितत्वादन्यथा वाद्यमानो वेणुरन्यथा वदतीत्यत आह, ते तनुसङ्गतेत्यादि। ते तव तनुसङ्गतेन पवनेन चलितमु(ञ्छापि)द्रावितं रेणुमपि बहु मनुते। ननु बहु मन्यत एव। ननुशब्दोऽत्रावधारणे। "प्रश्नावधारणाव(नु)ज्ञानुनयामन्त्रणे ननु" **इत्यमरः**। पूर्वं तनुसंङ्गतः पश्चात् पवनचलित इति वा विग्रहः। धन्योऽसौ रेणुः यस्तस्या शरीरस्पर्शमन्वभूदिति बहुमाननार्थः।

त्वदन्यापेक्षस्य हरेः किम् ? तव तनुसङ्गतवायुचलितधूल्या बहुमानेनेत्यभिप्रायः। अथवा नु प्रश्ने, ते तनुसङ्गतपवनचलितमपि रेणुं न बहु मनुते किं न जानसि ? त्वं पूर्वं यत्र कुञ्जे तव तस्य च केलिरभूत्तत्र तव तनुस्पर्शपवनचलितरेणुमपि यथा बहु मन्यते इत्यर्थः। अत्र नुकारः शिरश्चालनार्थः ।।२।।

## (१०) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। कदाचिदन्यासक्तः स्यादत् आह। कृतः सङ्केतो यत्र तं वेणुं एवं नामसमेतं मृदुवत् यथा स्यात्तथा वादयते। कदाचित् प्रतारणायैवं करोति न। तव तनुसङ्गतवायुना युक्तं रेणुं वहु मनुते। धन्योऽयं रेणुः यतस्तस्याः शरीरस्पृष्टवायोः स्पर्शसुखमन्वभून्ममेदृशं भाग्यं नास्तीति वहुमानार्थः। नामसमेतं यथा स्यां एवं कृतसङ्केतं वेणुं स कृष्णः मृदु यथा स्यादेवं वादयते इत्येव वाक्यार्थः। कृतः सङ्केतो येनेति विग्रहः इहाहं तिष्ठामि त्वमत्रागच्छेति नाम समेतकृतसङ्केतार्थः इति **सर्वाङ्गसुन्दरी** ।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। अपि नाम कदाचित् अन्यासक्तः स्यादत आह, नामेति। आनयामि तामिति प्रतिज्ञया निर्गतायां मयि त्वदागमनबिलम्बमसहमानः नाम समेतं राधे! हे प्राणेश्वरि! इत्यादि त्वन्नाममुद्राङ्कितमित्यर्थः, तद् यथा स्यात् तथा, कृतसङ्केतम्, अन्येनाविभाव्यमानाभिप्रायं निजावस्थाव्यञ्जकं मृदु श्रोत्रानन्दकरं च यथा स्यात् तथा वेणुं वादयते ।

'अयि सुधाकरमण्डल! मण्डय त्वमटवीं मृदुपादविसर्पणैः।
उदयशैलतटीनिहितेक्षणो ननु चकोरयुवा परितप्यते।।'

इत्यादि वेणुगानेन त्वदागमनं प्रतीक्षते इति भावः। महाधूर्त्तः कदाचित् प्रतारणाय एवं करोतीति चेत् तत्राह, ननु सम्बोधने, हे राधे! किं वदामि तस्य त्वदागमनोत्कण्ठातिशयं ते तव तनुसङ्गतेन पवनचलितं तनु सूक्ष्मं रेणुं धूलिमपि बहु मनुते, श्लाघते। त्वदागमनसम्भावनया इति भावः। यद् वा बहु मनुते, धन्योऽयं रेणुः, यः खलु तदङ्गस्पर्शातिसुभगस्य समीरणस्य स्पर्शसुखमनुभूय सात्त्विकादुत्कम्पते। नेदं भाग्यं मम जातमिति भावः। 'प्रश्नावधारणानुज्ञाऽनुनयामन्त्रणे ननु' **इत्यमरः**।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। नामसमेतमिति; त्वन्नाम्ना पुनरभिसरणार्थं संकेतस्यानं वंशीस्वरेणोच्चते। तस्य वेणुवादनमतीव मृदुस्वरेण संघटते। त्वत्सङ्गलाभेन पवनेन उड्डीयमानां धूलिं स वहुमानं करोति।।२।।

**३-पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम्।**
**रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ।। धीर० ।।३ ।।**

## (१) नायणदासकृत-सर्वाङ्गसुन्दरी

।।३ ।। परमप्यमनुरागातिरेकमाह। पतत्रे पक्षिणि पतति सति बृक्षात् भूमावित्यधिगन्तव्यम्। पतत्रेपलाशे विचलति प्राक्भूमौ पतति इत्यर्थादवगन्तव्यम्। शङ्कितभवदुपयानं यथा स्यादेवं शयनं शय्यां रचयति निर्मिमीते। शङ्कितं भवदुपयानं भवदागमनं यत्रेति विग्रहः। तथा सचकितनयनं यथा स्यादेवं तव पन्थानं पश्यति। सचकिततयनं यत्रेति विग्रहः।।३ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।३ ।। अपि च; पततीति। हे राधे! हरिः शयनं रचयति। तव पन्थानं पश्यति। कथम्? सचकितनयनं यथा भवति तथा। किंभूतं पन्थानम्? शङ्कितभवदुपयानम्। शङ्कितं भवत्या उपयानमागमो यस्मिंस्तत्। क्व सति ? पतत्रे पक्षिपत्रे पतति सति। पुनः क्व सति पत्रे वृक्षपत्रे विचलति सति।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। पततीति हे राधे कृष्णः शयनं रचयति तव पन्थानं पश्यति कथं भवति सचकितनयनं यथास्यात् किम्भुतं तव पन्थानं शङ्केतं भवत्या उपयानं आगमो यत्र तं पुंवद्भावः भवतिती शब्दस्य पुंस्त्वं क्व सति पतत्रे पक्षिणि पतति वृक्षान्तरं गच्छति सति पुनः क्व सति वृक्षपत्रे चलति सति ।।३ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। किं च; पततीति। स कृष्णं शयनं शय्यां रचयति। कथम्? यथा पतत्रिणि पक्षिणि पतति गच्छति सति शङ्कितं तर्कितं भवत्या उपयानं समीपे गमनं यत्र एवं यथा स्यात् तथा। कीदृशे पतत्रे ? विचलितं पतत्रं पत्रं यस्मात्तत्र। क्वचित् 'विचलति पत्र' इति पाठः सुगम एव। सचकितनयनं यथा स्यादेवं तव पन्थानं त्वदागमनवर्त्म पश्यति। पत्रे मर्मरचञ्चलताभ्यामायाता मे प्राणेश्वरीति शङ्कया चकितं पन्थानं पश्यतीति भावः। 'पतत्रं पक्षपक्षिणोः' इति **धरणिः**। तदुपयानमित्यत्र 'सर्वनाम्नो वृत्तिमात्र' (वा. १३७६) इति पुंवद्भावः।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। पततीति। हे सखि! राधे! स वनमाली पतत्रे वृक्षेषु सञ्चरत् पक्षिपक्षैकदेशे गरुति इत्यर्थः। पतति अधोगलति सतीत्यर्थः। अथवा पतत्रे पक्षिणि अत्र

अवयवेनावयवविलक्षणा पतति सशब्दमुत्पतति। किञ्च पत्रे शुष्कपत्रे विचलति वायुना चलति सतीत्यर्थः शङ्कितं भवत्या उपयानम् आगमनं यस्मिन् कर्मणि तत्तथा भवति तथा शयनं रचयति। क्रीड़ोचितकुसुमशय्यां रचयतीत्यर्थः निर्माति। अथच चकितमपराधजनितं यद्भयं तेन सहिते स चकिते तादृशे नयने यस्मिन् कर्मणि तद्यथा भवति तथा तव भवत्याः पन्थानम् आगमनमार्गं पश्यति। कदा वा सम्यगागमिष्यतीति भवदागमनमार्गं वीक्षत इत्यर्थः। स वनमाली यमुनातीरे वसतीत्यन्वयः। भवदुपयानमित्यत्र सर्वनाम्नो पुंवद्भावः। विचलितपत्रे इति क्वचित्पाठः। तदा चलनकर्मीकृत पत्र इत्यर्थः। पतत्रविशेषणं चैतत् ।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। अपि किङ्करोतीत्यत आह। शङ्कितभवदुपयानं यथा स्यात्, शंकितं तर्कितं भवत्या उपयानं समीपागगनं यथा स्यादेवं शयनं शय्यां रचयति निर्माति। सचकितनयनं यथा स्थात्तथा तव पन्थानं पश्यति। कदेत्याह, पतत्रे पक्षे अर्थात् पक्षिणां पतति सति, पत्रे अर्थात् वृक्षस्य विचलति सति। शङ्कितभवदुपयानं पन्थानमित्यस्य विशेषणमिति **भगीरथादयः** ।।३ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३ ।। किञ्च सर्वकरणवृत्तिरपि त्वय्यर्पिता तेनेत्याह, प त तीत्यादिना। पतत्रे पक्षिणि पतति वृक्षाद्वृक्षान्तरं गच्छति सति; किञ्च वृक्षात् [१] पत्रे विचलति सति कम्पमाने सति सः श्रीकृष्णः [२] शयनं शय्यां रचयति;[३] त्वत्सुरतसम्भोगार्थं निर्मातीत्यर्थः। तव पन्थानं मार्गञ्च सचकितनयनं कदाऽऽगमिष्यतीति सभयनेत्रं यथा स्यात्तथा दिशः प्रति पश्यति। कीदृशं पन्थानम्? [४] शङ्कितभवदुपयानं शङ्कितं भवत्या उपयानं समीपागमनं यत्र तादृशम्। सर्वनाम्नः [५] इति **सि. कौ. ७२८** पुंवद्भाव इति। प्रेङ्खगर्भितो भ्रमालङ्कारः।।३ ।।

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।३ ।। पततीति। सः कृष्णः शयनं शय्यां रचयति[६]निर्माति। तव पन्थानं मार्गं सचकितनयनं यथा स्यात्तथा पश्यति। कीदृशं[७]मार्गम्? पतत्रे पक्षिणि[८]पतति[९]सति गच्छति[१०]सति; [११]पत्रे पर्णे विचलति कम्पमाने सति शङ्कितं सम्भावितं भवत्या उपयानं समीपगमनं यस्मिन् सः। राधा प्रायः समागच्छतीति[१२]। पतत्रं पक्षिणं पतत्रपक्षस्तद्विद्यते यस्येति अर्श आदित्वात् अच् ।।३ ।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।३।। पततीति। विचलितपत्रे विचलनशीले पतत्रे पक्षिणि। पतत्रपत्रिपतगपतत्पत्रिर-थाण्डजाः **इत्यमरः** (२.५.३३१।) पतति उड्डयनं कुर्वति शङ्कितं भवत्या : उपयानं आगमनं यथा तथा। शयनं पल्लवास्तरणं रचयति। शङ्किताविशेषणं विप्रकृष्टहृदयेशविशेषणत्वे शयनानुपयोगः स्यात्। चकितं भयसम्भ्रमस्तेन सहिते नयने नेत्रे यथा तथा तव पन्थानं पश्यति। उड्डयनानुमितत्वदागमनमदृष्ट्वा मार्गमालोकत इत्यर्थः।।३।।

१.पतत्रे-फ.ज.२.नास्ति-अ.ब.३.त्वत्सम्भोगार्थं-ग.त्वत्सुखसम्भोगार्थं-फ.ज.४.नास्ति-ग. ५.नास्ति-अ.ब.६.नास्ति-ड.७-८.नास्ति-ड.१०.इति-ड.११.तः१२.पर्यन्तं नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। अनुरागातिरेकमाह, पततीत्यादि। पतत्रे पक्षिणि पतति सति दशा भूत्यावित्यधिगन्तव्यम्। तस्य हेतुमा, विचलति पत्र इति। पत्रे पलाशे विचलति प्राक् भूमौ पतति सति इत्यर्थादवगन्तव्यम्। किं वा पतत्रे पतति उड्डीयमाने सति तथा पत्रे विचलति सतीत्यर्थः। पतत्र इति। पतत्रं पक्षस्तदस्यास्तीति "अर्शआदित्वादच्।" "गरुवत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम्" **इत्यमरः**। शङ्कितभवदुपयानं यथा स्यात्तथा शयनं शय्यां रचयति निर्मिमीते। शङ्कितम् उपयानं समीपगमनं यत्रेति विग्रहः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। तथा सचकितं सचमत्कारं ससंभ्रान्तं वा नयनं यत्र क्रियायाम् एवं यथा स्यात्तथा तव पन्थानं त्वदुपगमनसरणिं पश्यति।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।। त्वदेकपर एव स इत्याह। पक्षिणि पतति सति वृक्षाद्भूमौ इत्यर्थात् ज्ञेयम्। पत्रे च वातेन विचलित सति शङ्कितं भवत्या उपगमनं यत्र तद् यथा स्यात्तथा शय्यां निर्मिमीते। तथा सचकितनयनं यथा स्यात्तथा पन्थानं पश्यति अत्र नागत्य के पथा गतेति पथावलोकनमित्यर्थः।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। पुनरुत्कण्ठातिशयं वर्णयति, पततीति। हे सखि! पतत्रे, पतत्रिणि पक्षिणि, अवयवेनावयवी लक्ष्यते, पतति वृक्षात् भूमौ विशति सति तथा पत्रे विचलति सति, पवनाघातेन सशब्दं शुष्कपर्णे चलति सति, किं वा पतत्पक्षि पतत्रास्फालनेन पर्णे कम्पमाने सति शङ्कितं तर्कितं भवत्यास्तव, उपयानं, समीपागमनं, यत्र तद् यथा स्यात्तथा, शयनं रचयति।औत्सुक्येन त्वदुपवेशाय शय्यां सज्जीकरोतीत्यर्थः। तदनन्तरं

त्वदागमनमपश्यन्, न खलु मया किञ्चित् एतन्मध्य एवापराद्दम्, कथं परावृत्त्य गतेति सचकितनयनं भयसहितलोचनं यथा स्यात्तथा तव पन्थानं त्वदागमनमार्गं पश्यति। औत्सुक्य विषादयो: साङ्कर्यम्। भवदुपयानमिति 'सर्वनाम्नो वृत्तिमात्रे पुंवद् भाव:' इति पुंवद्भाव:। 'गरुत् पक्षच्छदा: पत्रं पतत्रं च तनूरुहम्' **इत्यमर:**। 'पत्रं पलाशं छदनं दलं पर्णं छद: पुमान्' इति च ।।१०।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। पततिपतत्रेति; श्रीकृष्ण: त्वदागमनार्थमित्थं कातरो भवति यत् वृक्षात् यदि पत्रं पतति अथवा उड्डीयमाने पक्षिणि तवागमनं जातमिति शंक्यते। त्वन्निमित्तं शय्यां निर्माय सचकितं व्याकुलनयनेन तव मार्गं प्रतिपाल्य तिष्ठति। अत: तव गमने विलम्बं मा भू:।।३।।

**४-मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलम्।**
**चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ।। धीर० ।।४।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।४।। हे सखि! मञ्जीरं त्यज कुञ्जं चलेति वाक्यार्थ:। 'मञ्जीरोऽस्त्रियामित्यमर:। कथं नूपुरं त्याज्येत्याह। मुखरमिति सशब्दमित्यर्थ:। नीचैरपि शब्दस्यादित्याह। अधीरं धैर्य्यरहितमित्यर्थ:। छलतस्त्वपण्डितम्। पुन: कीदृशं, केलिषु लोलं क्रीड़ासु चञ्चलं रतौ व्यस्ततादायकमिति यावत्। मुखरत्वात्। लोलत्वाच्चेष्टार्थप्रतिघातकतान् नूपुरस्योक्तातिपुरपिष्टार्थप्रतिघातको भवतीति रिपुमिवेत्युक्तम्। कीदृशं कुञ्जं, यदृच्छाभ्रमणार्थमागमिष्यतां जनानां दृष्ट्युपघातार्थमेतदुक्तम्। स्यान्निकाय: पुञ्जराशित्यर्थ:[१]। पथि तावदन्यजननिर्लक्षताहेतुमुपदेशं प्राह। शीलय नीलनिचोलमिति नीलवसनं परिधेहीत्यर्थ:। ''निचोल: प्रच्छदपट **इत्यमर:**।'' अभिसारिकेयम्,

दुर्वारदारुणमनोभवबह्नितप्ता
पर्य्याकुलाकुलितमाननमुद्बहन्ती।
नि:शङ्किनी व्रजति सा प्रियसङ्गमानं
सा नायिका खलु भवेदभिसारिकेति ।।४।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।४।। अपि च, मुखरमिति। हे सखि राधे! कुञ्जं चल। अभिसारानुरूपां सामग्रीं शिक्षयति, मञ्जीरं नूपुरं त्यज। किंभूतं मञ्जीरम्? अधीरमज्ञम्। अत एव मुखरं

वाचालमभिसारोचितं न जानाति। अथवा, साध्वेतन्मञ्जीरस्य मुखरत्वं यतो निमित्तनैमित्तिकं, कुतो मञ्जीरध्वनावित्यत उत्पत्तेः। पुनः किंभूतम्? केलौ क्रीडायां सुलोलमतिलोलम्। अत एव रिपुमिव। अपि च, नीलनिचोलं नीलं रक्तकृष्णं वस्त्रं शीलय परिधेहि। किंभूतम्? कुञ्जे तिमिरपुञ्जेन सहितं। अथवा, सतिमिरपुञ्जं यथा स्यात्तथा चल।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। हे सखिराधे त्वं कुञ्जञ्जलम् अभिसारानुरुपां सामग्रीं शिक्षयसि। मञ्जीरं नुपुरं त्यज किम्भूतं नृपुरम् अधीरम् अज्ञम् अत एव मुखरं वाचालम् अभिसारोचितं न जानाति अथवा साध्व्येतन्मञ्जीरस्य मुखरस्य यत्ते निमित्तवन्नैमितकं कुतः मञ्जीरम् अधुनावित्युप्तते: पुनः किम्भूतं केलौ क्रीडायां सलोलम् अत एव रिपुमिव अपि च नीलनिचोलं नीलं कृष्णं वस्त्रं शीलय परिधेहि किंविशिष्टं कुञ्जं तिमिरपुञ्जेन सहितम् अथवा सतिमिरं पुञ्जेन यथा स्यात्तथा चल उद्योतं ही नाभिसारोऽयुक्तः ।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। गमनोत्कण्ठितां दृष्ट्वाह; मुखरमिति। हे सखि! मञ्जीरं नूपुरं त्यज। कीदृशम्? केलौ सुलोलं चञ्चलमत एवाधीरममन्दं यथा स्यादेवं मुखरं शब्दायमानम्। कमिव! शत्रुमिव । रिपुरप्यधीर उत्तरलो मुखरो वाचालः केलौ सुलोलश्च भवतीति मञ्जीरे तत्साम्यम्। हे सखि! तिमिरपुञ्जेनान्धकारसमूहेन सहितं कुञ्जं चल गच्छ। नीलं निचोलं प्रच्छदपटं शीलय परिधेहि । 'मञ्जीरो नूपुरोऽस्त्रियाम्' **इत्यमरः** । 'निचोलः प्रच्छदपटः' इति यादवः।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। इदानीमभिसारिकागमनानुकूलसामग्रीमाह। मुखरमिति। हे सखि! राधे! यमुनातीरे यो वनमाली तिष्ठति तदभिसरणानुकूल्याय मुखरं नादशीलम् अधीर गमनकाले चञ्चलं केलिषु रतिक्रीडासु लोलं पलायनपरम् एतादृशं मञ्जीरं नूपुरं त्यज। चलेति।। तिमिरपुञ्जोऽन्धकारपटलः तेन सह वर्त्तत इति सतिमिरपुञ्जम् अनेन जारविहारयोग्यता सूचिता। एतादृशं कुञ्ज कृष्णस्य वासभूतलतागृहं प्रतिचल गच्छेत्यर्थः अन्यथा तमयो व्यर्थः स्यादितिभावः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनरभिसारानुरूपवेशोपदेशपूर्वकं त्वरयति, हे सखि मञ्जीरं नुपूरं त्यज। कीदृशम्? मुखरं वाचालम्। अधीरं चञ्चलं गमनक्रियायामित्यर्थात्। पुनः कीदृशम्?

केलौ क्रियायां बन्धविशेषेण सुलोलम् अतिचञ्चलम्। एतेन गुह्यकार्यं लोकेषु विज्ञापयतीति रिपुमिव शत्रुमिव अन्योऽपि यो मुखरोऽधीरः स तु त्यजत इत्युचितमेवेति नीलनिचोलं श्यामप्रच्छदपटं शीलय परिधेहि। नीलत्वप्रच्छदकत्वाभ्यां अभिसारोपयोगित्वं दर्शितम्। तथा च रिपुपरिहारेणोपकारिस्वीकरणमुचितमेवेति भावः। कुञ्जं लतागृहं गच्छ। किम्भूतं कुज्जम्? सतिमिरपुञ्जम् अन्धकारसमूहसहितम्। एतेन संकेतोपयुक्तगाढान्धकारो दर्शितः। तदनेन कुलजाभिसारसामग्री दर्शिता। तदुक्तम्, 'विलीला स्वेषु गात्रेषु मूकीकृतविभूषणा। अवगुण्ठनसम्वीता कुलजाभिसरेत्प्रियमि'ति।* ।।४।।

*'संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा।
अवगुण्ठनसम्वीता कुलजाभिसरेद्यदि।।' इति लक्ष्मीविराजिते **साहित्यदर्पणे**।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। सुप्रसन्नामालक्ष्याहमुखरेत्यादिना। हे सखि हे राधे! मञ्जीरं नूपुरं त्यज। कीदृशम्? मुखरं अधीरञ्च गमनसूचकमित्यर्थः। पुनः कीदृशम्? केलिषु सुरतक्रीडासु लोलं चञ्चलम्। कमिव? रिपुमिव। किञ्च कुञ्जं कुञ्जमन्दिरं चल गच्छ। कीदृशम्? सतिमिरपुञ्जं अन्धकारसमूहयुक्तम्। साहसमालक्ष्य गमनोपायमाहनीलनिचोलं नीलवस्त्रं शीलय परिधेहि। एवं [१] मदनुशिक्षितमतेन; सखी राधामशिक्षयदिति भावः। मञ्जीरो नूपुरोऽस्त्रियाम् **इत्यमरः** (२.६.१०१)। निचोलः प्रच्छदपटः इत्यपि (**अमरः** २.६.२२६)।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। मुखरमिति। हे सखि राधे! मुखरं शब्दयुक्तं मञ्जीरं नूपुरं त्यज। कीदृशं मञ्जीरम्? अधीरं शब्दादिकरणत्वात् गमनसूचकमित्यर्थः। केलौ क्रीडायां सुलोलमतिचञ्चलं; [२] अतः रिपुमिव शत्रुसमम्; [३]रिपुरपि मुखरोऽधीरश्चञ्चलश्च भवति। मञ्जीरं त्यक्त्वा सतिमिरपुञ्जं अन्धकारसमूह [४] युक्तं कुञ्जं लतागृहं चल गच्छ। नीलनिचोलं श्यामवस्त्रं शीलय परिधेहि। अभिसारस्य अदर्शनार्थं नीलवस्त्रपरिधानं [५]क्रियते।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। (मुखरेति।) अधीरं चञ्चलं अत एव मुखरं केलिषु लोलं चञ्चलं रिपुमिव नादेन सुरतप्रकाशकत्वात्। मञ्जीरं त्यज मुञ्च। हे सखि राधे! (स) तिमिरपुञ्जं अन्धकारसहितं कुञ्जं प्रति चल आगच्छ। नीलनिचोलं कृष्णप्रावरणाम्बरं शीलय प्रावरणं कुरु। अन्धकारे नीलवस्त्रस्याप्रकाशात्। कृष्णाभिसारप्रकारोपदेशः।।४।।

१.महत्शिक्षितकौशलेन-इ.फ.ग.ह.ज.२.अतश्च-क.३.रतिसुखरोधि अधीरं चञ्चलं च भवति-क.४.सहितं-क.५.क्रियते इति भाव:-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। मुखरमित्यादि। हे सखि! मञ्जीरं नूपुरं त्यज। कुञ्जं कृष्णेनाध्युषितं चल गच्छेति वाक्यार्थ:। चलिरत्र गमनार्थ इति कृत्वा सकर्मक:। ''मञ्जीरो नूपुरोऽस्त्रियाम्'' इत्यमर:। कथं नूपुरस्त्याज्य इत्याह। यतो मुखरं सशब्दमित्यर्थ:। नटे(नीचै)रपिशब्द: स्यादित्याह। पुन: किंविधम्? अधीरं धैर्यरहितमित्यर्थ:, गमनकाले चञ्चलत्वात्। यस्तु मुखरो भवति अधीरोऽपण्डितश्च भवति स त्यागयोग्य एवेति ध्वनि:। पुन: किंविधम्? केलिसुलोलमिति । क्रीडायां सुलोलं सुतरां चञ्चलम्, रतौ व्यस्ततादायकमिति यावत्। मुखरत्वात् चञ्चलत्वाच्च इष्टार्थप्रतिघातकता नूपुरस्योक्ता। रिपुरपीष्टार्थप्रतिघातको भवतीति रिपुमिवेत्युक्तम्। कुञ्जं कीदृशम्? सतिमिरपुञ्जमिति। तिमिरपुञ्जेन सहितम्। यदृच्छाभ्रमणार्थमागमिष्यतां जनानां दृष्ट्युपघातार्थमेतदुक्तम्। ''स्यान्निकाय: पुञ्जराशी'' इत्यमर:। पथि अन्यजनविलिक्ष्यताहेतुमुपदेशं प्राहशीलय नीलनिचोलमिति। नीलवसनं परिधेहीत्यर्थ:। ''शील उपधारणे'' इति। ''नीचोल: प्रच्छदपट:'' इत्यमर:। कृष्णपक्षाभिसारिकेयम्। यथा **गोविन्दाभ्युदये** - ''कस्तुरी घनपङ्कलेपमलिनालङ्कारसम्भाविता, कृष्णेनागुरुणाऽतिकृष्णतिलक प्रोल्लासिपत्रावलि:। नीलेनापि निचोलकेन पिहिता नि:शङ्कमेकाकिनी, प्राणेशं प्रति याति हन्त तिमिरे कामाधिका राधिका ।।'' इति ।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। अतो हे सखि! मञ्जीरं त्यज चल। कथं मञ्जीरस्तज्य: यतोहयधीरम् अतो मुखरं सशब्दं तथा केलिषु अतिचञ्चलम् अतोऽभिष्टभिरुऽत्वात् रिपुमिव। कीदृशं कुञ्जं? तिमिर पुञ्जेन सह वर्त्तमानम्। गौराङ्गया मम कथं गमनं स्यादिति तमस्यभिसारिकोचित वेशमाह; नीलं निचोलं नीलप्रच्छदपटं पिधेहि ।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। एवं प्रियस्य औत्सुक्यातिशयश्रवणेन सुप्रसन्नमुखीं समीक्ष्य सम्प्रति अभिसारानुरूपं वेशमुपदिशति, मुखरमिति। हे सखि! हितोपदेशविषयभूते राधे! मञ्जीरं नूपुरं त्यज, चरणात् बहिष्कुरु। किमर्थम्, यतो मुखरम्। चरणोत्क्षेपनिक्षेपयो-र्वाचालत्वेन गमनसूचकातङ्कापादनमधीरं धीरतया धारयितुमशक्यम्। केलिषु लोलम्, रतिक्राडासु निजस्थानपरित्यागेन यथा तथा सञ्चारितया रतिवेगप्रतिबन्धकमित्यर्थ:।

किमिव, रिपुमिव, अभीष्टविरोधित्वादिति भावः। एतत्प्रयोजनमाह, कुञ्जं कृष्णैकनिवासभूतं लतागृहं चल, अभिसर। जनसञ्चारशङ्कापरिहाराय कुञ्जं विशिनष्टि, कीदृशं, तिमिरपुञ्जेन गाढान्धकारेण सहितम्। अतो नीलनिचोलं शीलय, परिधेहि। नीलवर्णावगुण्ठनवस्त्रं विदधाना गौरकान्तिमुद्गिरन्तं निजदेहं तिरोधेहीति भावः। 'निचोलः प्रच्छदपटः' **इत्यमरः**। 'मञ्जीरो नूपुरोऽस्त्रियाम्' इत्यपि।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। मुखरमधीरेति; तव मञ्जीरस्य नूपुरस्य शब्देन स व्यग्रःस्यात्। अतः तस्य परिहारं कुरु। नूपुरं खलु रतिक्रीडायां वाधां जनयिष्यति। सखि! अतः अन्धकाराछन्नं कुञ्जं लतावेश्म गच्छ। तत्र नीलवस्त्रस्य परिधानं कुरु। सकलमन्धकारेण श्रीराधां कृष्णाभिसारिकानिमित्तं कविरत्र प्रस्तौति।

**५- उरसि मुरारेरुपहितहारे घन इव तरलबलाके।**
**तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ।। धीर० ।।५।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।५।। हे गौराङ्गि! रतिविपरीते रतिविपरीतावुपहितहारे मुरारेरुरसिराजिष्यसीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवत्, भविष्यति अर्थे लट्। सुकृतविपाके इति सप्तमी। पुण्यपरिपाके सतीत्यर्थः येनाशेषपुण्यं कृतं तेन हरेर्वक्षसि राजिष्यतीति यावत्। कस्मिन्नेवोरसीत्याह। घन इव तरलवलाक इति तरला चञ्चला वलाकापंक्तिर्यत्रेति विग्रहः। केवलं मुरारेरुरसि राजसीत्याह। तडिदिवेत्याह। अत्र कृष्णरसो येन राधायास्तडिताहारस्य बलाकया साम्यम्। अनेकेव शब्दत्वात्[१]। वाक्यार्थोपमेयम्। यदुक्तम्,

वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते।
एकानेकेव शब्दत्वे सा वाक्यार्थोपमास्मृता।। इति ।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। उरसीति। हे राधे! हे पीते पीतवर्णे गौरि! त्वं मुरारेरुरसि सुकृतविपाके पुण्यपरिणामे राजसि राजिष्यसि। वर्तमानसामीप्ये वर्तमानवत्। किंभूत उरसि? उपहित आरोपितो हारो यस्मिन्। का कस्मिन्निव? तरलबलाके चञ्चलपक्षिविशेषे घन इव मेघ इव। केव? तडिदिव। कदा? रतिविपरीते पुरुषायितरतिसमये। उपहितहारमुरस्तरलबलाकघनेनोपमीयते। सा पीता तडित्। तस्याः पुरुषायिते चञ्चलत्वम्।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। हे पीते पीतवर्णे गौरि त्वं मुरारेः उरसि सुकृतविपाके दुरापपरिणामे राजसि राजयिष्यसि वर्तमानसामीप्ये किं विशिष्टे उरसि उपहितहारे आरोपितहारे कथं कस्मिन्निव तरलबलाके घन इव मेघ इव चञ्चलपक्षिविशेषे किमिव तडिदिव कदा रतिविपरीते पुरुषायितसुरतसमये उपहितहारे उरः तरलबलाकाद्यनेनोपमीयते साऽपि तडिता तस्या पुरुषायितत्वे चलत्वम्।।५।।

## (३) शंकरमिश्रकृत-रसमञ्जरी

।।५।। राधाया अत्युत्कण्ठां जनयितुमाह; उरसीति। हे पीते गौराङ्गि। पुनः कीदृशे? सुकृतविपाके सुकृतस्य पुण्यस्य विपाकः परिणामो यस्यास्तादृशी। पुनः कीदृशे? उपहितहारे उपहितोऽर्पितो हारो यया तादृशे। रतिविपरीते रतौ सुरते विपरीते वैपरीत्यें पुंसीभवनाय त्वं मुरारेरुरसि हृदये राजसि। अधुनैव राजिष्यसि। राजसीत्यत्र भविष्यत्सामीप्ये वर्तमानः। यद्वा; 'सुकृतविपाके', 'उपहितहारे' इति द्वयमपि 'उरसि' इत्यस्यैव विशेषणम्। तदा त्वत्सुकृतस्य विपाकस्वरूपे, उपहितः हारो यत्र तादृशे उरसीत्यर्थः। केव? तडिदिव विद्युदिव। उरसि कीदृश इव? तरलबलाके। तरला चञ्चला बलाका बकपङ्क्तिर्यत्र तादृशे। घन इव मेघ इव। अत्र पीतविद्युतो राधाया उपमानान्मेघस्य सजलत्वं विवक्षितम्। तदुक्तम् 'पीता वर्षाय विज्ञेया' इति। अत्र कृष्णहृदयस्य श्यामत्वेन सजलमेवसाम्यम्। राधायाश्चञ्चलहारस्य चञ्चलबलाकापङ्क्ति साम्यम्। राधायाश्च तदानीं तरलतया पीततया पीतविद्युत्साम्यम्। अत्र यद्यपि बलाकाया मेघस्याधः स्थितत्वाद्विद्युतश्चोपरि वर्तमानत्वाद्धारविशिष्टकृष्णोरःस्थलसाद्राधोपमानं च तरल वकपङ्क्तिविशिष्टमेघोपरि-स्थितविद्युतो विरुद्धं, तथापि मेघोपरि बकपङ्क्तिर्यदि भवति तदुपरि च विद्युत्तदैतादृशं राधाया उपमानं भवतीत्यभूतोपमा बोध्या। तदुक्तं **दण्डिना** (का. २/३८), 'सर्वपद्मप्रभाारः समाहृत इव क्वचित्। तवाननं विभातीति तामभूतोपमां विदुः।।' यद्वा; 'तरलबलाके' इत्यपि राधाया एव विशेषणम्। तथा च हे तरलबलाके! हे चञ्चलकामुकीत्यर्थः। तस्मिन्कोटिकन्दर्पलावण्ये दृष्टे त्वमेव कामुकी सती पुरुषायितमाचरिष्यसीति भावः। 'बलाका बकपङ्क्तौ स्याद्बलाका बिसकण्ठिका। बलाका कामुकी ज्ञेया बलाकश्च बको मतः' इति **शाश्वतः**।।५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। उरसीति। हे पीते! सुवर्णवर्णे! उपहिता धृता न्यस्ता इति यावत्। एतादृशा हारा यस्मिन् तादृशे उपहितेति क्वचित्पाठः। तदोपहिता आनीता हारा यस्मिन् तादृशे प्रातहारे इत्यर्थः। अतएव तरलाश्चञ्चला वलाका यत्र तादृशे, अथवा तरलो हारमध्यगः। तत्कल्पा वलाका यस्मिन् तादृशे घन इव नीलमेघ इव स्थिते यस्य मुरारेरुरसि वक्षस्थले सुकुतस्य त्वया पूर्वार्जितपुण्यस्य विपाके परिपाके फलोन्मुखे सतीत्यर्थः अथवा सुकृतलक्षणस्य परिपाकफलं यस्मिन् तादृशे रतिविपरीते उपरि सुरत इत्यर्थः। तडिदिव विद्युल्लतेव राजसि राजिष्यसि। वर्त्तमानसामीप्ये वर्त्तमानवद्वा इति लट्। यथा वलाकामालापरिवृत्ते नीलमेघे विद्युल्लता भासते तथा हारपरीते मुरारेरुरसि विपरीते भवत्यपि प्रकाशिष्यत इत्यर्थः। स वनमाली यमुनातीरे वसतीत्यन्वयः। तथा च शीघ्रमेव तत्समीपं प्रतिगच्छेति तात्पर्य्यम्।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। सुरतकर्मस्मारणेनोत्कण्ठां वर्धयति। हे पीते गौरि त्वं मुरारेरुरसि वक्षसि राजसि शोभां करिष्यसि। वर्तमानसामीप्ये वर्तमानत्वेति लट्प्रत्ययः। कदेत्याकांक्षायामाह, रतिविपरीते विपरीतसुरतकाले। कस्मिन् सति ? सुकृतविपाके पुण्यपरिणामे सति। उरसि कथम्भूते ? उपहितहारे। उपहितः सम्बन्धः हारो यत्र, राधाया इत्यर्थात्। कुत्र केव ? घने मेघे तडिदिव विद्युदिव। घने कीदृशे ? तरलबलाके। तरला चञ्चला बलाका बकपंक्तिर्यत्र एतादृशे। तरला बलाका कामुकी यत्र एतादृश इति हृदयविशेणतयाऽपि योज्यम्। अत्र विद्युत्पीतवर्णा, चञ्चला राधाऽपि गौराङ्गी विपरीतरत्या। चञ्चलकृष्णहृदयोपहितहारस्य रतिकर्मणा चाञ्चल्यं स्वभावतः। इत्थञ्च। बलाकाया अपि तदुभयं कृष्णहृदयस्य श्यामत्वं मेघस्यापि तथात्वमिति युक्तं सर्वत्र साम्यम्। अत्र कृष्णहृदयोपहितहारस्य रतिचाञ्चल्येनावस्थितबलाकसाम्य-सम्भवेऽपि राधा कृष्णोरसि स्थिता तडित् धनावस्थितेति तत्र दृष्टान्तदार्ष्टान्तिकवैषम्यं स्यादेवेति वदन्ति तत्र सम्बन्धमात्रे दृष्टान्त इति बहवः। वस्तुतस्तु अभुतोपमेयम्, यथा **मालतीमाधवे** राहोश्चन्द्रकलामिवाननचरीमि त्यादिः। यथा च **चण्डिकायाम्**, यथा मेरुगिरेः श्रृङ्गं तोयवर्षणेन तोयद इति। यद्वा रतिविपरीते रतिविरोधिनि राधिके त्वं मुरारेरुरसि राजसि शोभां करिष्यसीत्यर्थः। तथा च मुरारेर्हृदयस्य शोभाधिकरणत्वं प्रकृते द्रष्टव्यम्। न राधाधिकरणत्वमिति प्रकृतरतवर्णनमेवेदं न तु विपरीतरतवर्णनम्। अतएव न रतिविपरीत इत्यत्राविमृष्टविधेयांशकता, न वा रतिमात्रविमुखतायां

विपरीतरत्यर्थमत्यर्थेन विरोध इत्याभाति। 'बलाका बकपंक्त्तौ स्याद् बलाका बिसकण्ठिका। बलाकाङ्कमुकीमाहुर्बलाकस्तु बको मत' इति **शाश्वतः** ।।५ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५ ।। नन्वलङ्कारत्यागेन शोभा न स्यादित्यलौकिकीं शोभासम्पत्तिमाह, उरसीत्यादिना। हे पीते दाहोत्तीर्णकनकगौराङ्गि ! हे सुकृतविपाके पूर्वजन्मार्जितपुण्यफले ! मुरारेः श्रीकृष्णस्य उरसि वक्षसि राजसि राजिष्यसि;[१] वर्तमानसमीप इतिवत्। कदा ? रतिविपरीते पुरुषायितनायिकारतिकाले सुरतान्ते वा। कीदृशे उरसि ? उपहितहारे समर्पितमुक्ताहारे आलिङ्गनायापसारित [२] मुक्ताहारे वा। पुनः[३]कीदृशे ? [४] घन [५] इन मेघसदृशे। कीदृशे घने ? तरलाश्चञ्चला बलाका बकपङ्क्तयो यत्र। केव ? [६]तडिदिव। यथा नानावर्णविचित्रचमत्कारवती तडिद् घनस्योपर्यधः [७] स्फुरति राजते तथा त्वमपीति ध्वनिः। तत्र हारोराधानां बलाकमेघ[८]तडितां च क्रमेण साम्यम्। बलाका बकपङ्क्तौ स्यात् इति **विश्वः**। [९] पाकः कीर्त्यते स्वादौ परिणामे च दुर्गतौ इति **विश्वः**। पीतो गौरो हरिद्राभः **इत्यमरः** [१०] (१.५.१४) ।।५ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५ ।। उरसीति। हे पीते गौराङ्गि ! हे सुकृतविपाके ! [११] पूर्वजन्मार्जितस्य सुकृतस्य विपाकः फलं यस्यां तत्सम्बोधनम्। अन्यथा श्रीकृष्णाविपरीतसुरतं कथं प्राप्यते ? कृष्णस्योरसि वक्षसि त्वं रतिविपरीते [१२]परुषायितनायिकारतिकाले तडिदिव[१३] विद्युदिव राजसि [१४] शोभसे; वर्तमानसामीप्य इति लट् कथम्भूते उरसि ? उपहित आरोपितो हारो मुक्ताहारो यस्मिन्। [१५]पुनः कीदृशे ? घन इव मेघसदृशे। कीदृशे घने ? तरलबलाके चञ्चलबलाकसमूहे। हारस्य बलाकासाम्यम्; उरसो मेघसाम्यम्; राधायास्तडित्साम्यम् ।।५ ।।

१.वर्तमानसामीप्ये वर्तमानवद्वा निर्देशः-फ.ज. २.हारे-इ.फ.ग. ३.कीदृशे उरसि-इ.फ.ग. ४.५.नास्ति-अ.ब. ६.नास्ति-ब. ७.स्फुरन्ती राजते-फ.ह.ज. ८.तडितामनुक्रमेण-इ.फ.ह.ज. ९.पर्यन्तो भागो नास्ति-अ.ब. ११.पूर्वजन्मार्जितसुकृतस्य विपाकः-क.पूर्वजन्मार्जितस्य सुकृतविपाकः-ड. १२.पुरुष इव नायिका-ड. १३.नास्ति-क. १४.शोभिष्यसे-क. १५.पुनः कथम्भूते उरसि-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५ ।। (उरसीति।) सुकृतस्य पूर्वजन्मकृतशुभकर्मणः विपाकः कृष्णसम्भोगरूपः यस्या (स्त) त्सम्बोधनम्। हे पीते गौरवर्णे ! उपहितः पिनद्धः हारो मुक्तागुम्फितमाला

यस्मिन् तस्मिन् मुरारेः उरसि वक्षसि तरलाः बलाकाः पङ्क्तिरूपा यस्मिन् घन मेघ इव। रतिविपरीते पुरुषायिते काले तडिदिव विद्युदिव राजसि प्रकाशसे। अत्र घन इवेति उपमालङ्कारः तडिदिवेत्युपमायाः अङ्गमिति सङ्करः ।।५ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५ ।। उरसीत्यादि। मुरारेरुरसि कृष्णस्य वक्षसि त्वं राजसि राजिष्यसीत्यर्थः। "वर्तमानसामीप्ये वर्तमानवच्च" इति भविष्यति लट्। कस्मिन् सति ? रतिविपरीत इति। सुरतस्य विपर्यासे सति विपर्ययो विपरीतमिति भावे क्तः। किं वा हे रतिविपरीते! रतौ सुरते विपरीता पुरुषायिता तत् सम्बोधने तथा। उरसि किंविधे ? उपहितहार इति। उपहितो हारो यत् येन वा तव राधायाः इति शेषः। अन्यथा अधः स्थितस्य कृष्णस्य हारचाञ्चल्यानुपपत्तिः। तरलबलाकासाम्येन चाञ्चल्यस्येष्टत्वात्। पुनः कस्मिन् सति ? राजसीत्यादि। सुकृतविपाके पुण्यस्य परिपाके सतीत्यर्थः। तव सत्कर्मणो विपाकस्तदैव यदा तत्र स्थित्वा राजिष्यसि। कस्मिन्नेवोरसीत्याह - तरलबलाके घन इवेति । तरलाश्चञ्चला बलाका यत्रेति विग्रहः। एवंविधे मेघ इव। अत एव सम्बोधयन्ति। तडिदिव पीते इति। हे पीते ! हे गौराङ्गि ! त्वं तडिदिव विद्युल्लतेवेति योजयन्ति। अत एव ब्रूमः। पीते इत्यस्य सम्बोधनसम्भावितस्य विशेषस्य तडितो विशेषणत्वं न घटते। तडिदपेक्षायाः साधार्म्यप्रतिपादनाय पीता इति स्यात्। अतस्तडिदिव पीते इति सम्भवमेकपदम् इवेन नित्यसमासः। पूर्वपदप्रकृतिस्वरत्वं चेति समासः। तथा च **वररुचेः** सूत्रमपि- "इवेन नित्यमलोपः स्याद्" इति। यथाग्निरिव राजा शतक्रतुरिव सखा तथानेन तडिदिव पीते इति। अत्र कृष्णस्य नीलत्वादुरसो मेघेन विशदत्वान्मुक्ताहारस्य बलाकाभिः गौराङ्गत्वाद्राधायास्तडिता साम्यम्। अनेकेवशब्दाः, वाक्यार्थोपमेयम्।।५ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५ ।। तत्र गमने किं स्यादत आह, हे गौराङ्गी ! विपरीतरतौ मुरारेः उरसि राजसि राजिष्यसि, वर्त्तमान सामीप्ये लट्। कीदृशे ? उपहितो अर्पितो हारो यत्र तस्मिन्। तथा सुकृतस्य विपाके फलस्वरूपे। कस्मिन् केव ? चञ्चला वकपंक्तिर्यत्र तस्मिन् घने विद्युदिव, उरसो घनेन, हारस्य वलाकया, गौर्य्यास्तड़िता साम्यम्।।५ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५ ।। गमनानन्तर फलाविष्कारेण प्रोत्साहयति उरसीति । हे पीते ! गौराङ्गि ! मुरारेरुरसि वक्षसि रतिविपरीते, विपरितरतिसमये राजसि, राजिष्यसि। वर्त्तमानसामीप्ये लट्।

उरसि किम्भूते। उपहितो धृतो हारो मुक्ताहारो यत्र तस्मिन्। उपहतेति क्वचित् पाठः, तदा समर्पितो हारो यस्मिन्। तरला चञ्चला वलाका विसपंक्तिर्यत्र तादृशे, घने सुस्निग्धनीलमेघे तडिदिव, विद्युल्लेखेव, कस्मिन् सति सुकृतस्य बहुजन्मार्जित-प्रेमलक्षणपुण्यपुञ्जस्य विपाके, फलोन्मुखत्वे सति, उरसो विशेषणं वा। तव सुकृतस्य फलरूपे इत्यर्थः। किं वा विपरीतरतेर्विशेषणमिदम्। चपलवकपंक्तिय-उक्तनीलमेघ दर्शनीयहरिवक्षसि संचितपुण्यफलाय मानपुरुषायितरतिसञ्जात-स्फुरणाद् विद्युल्लतेव शोभमाना तमानन्दयिष्यसीति भावः। 'वलाकावकपंक्तौ स्यात् वलाका विसकिण्ठिका' इति विश्वः। 'पाकस्तु कीर्त्तितः स्वादे, परिणामे च दुर्गतौ' इति च।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। उरसिमुरारेति; मुरारेरुरसि श्रीकृष्णस्य वक्षस्थले तव हारः घनमेघाछन्ने ह्याकाशे वकपंक्तिरिव शोभमानः भविष्यति। यदा त्वं श्रीकृष्णस्योपरि विपरीतरतिक्रीडायां रमणं करिष्यसि। तव सुकृतस्य परिपाकफलस्वरूपं रतिसुखं भविष्यति। त्वं कृष्णस्य मेघोपमशरीरे तडिदिव पीतवर्णशरीरं अत्र 'पीते' इति सम्बोधनम्। विद्युल्लतिकेव क्रीडिष्यसि।।५।।

**६-विगलितवसनं परिहृतरसनं घटय जघनमपिधानम्।**
**किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ।। धीर०।।६।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।६।। किशलयशयनेन पल्लवशय्यायां पङ्कजनयने श्रीकृष्णे जघनं घटयेति वाक्यार्थः। कीदृशं विगलितवसनं, पुनः कीदृशं परिहृतरसनं दूरीकृतकाञ्चिकमित्यर्थः। अतएवापिधानं तिरोधानरहितम्। ''अपिधानतिरोधानपिधानाच्छादानिच'' **इत्यमरः**। पुनः कीदृशं निधिमिव हर्षनिधानं प्रमोदस्थानमित्यर्थः। अपनीत तिरोधानस्य निधेरपि दर्शनाद्हर्षो जायते इत्यभिप्रायः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। विगलितेति। हे राधे! किसलयशयने शय्यायां वर्तमाने पङ्कजनयने पुण्डरीकाक्षे जघनं घटय। किंभूतं जघनम्? विगलितवसनम्, स्वयमेव ततः परिहृतरसनं त्यक्तमेखलम्। अत एव वसनपिधानरहितम्। अत एव निधिना उपमीयते। कमिव? निधिमिव। किंभूतं निधिं जघनं च? हर्षनिदानं हर्षस्यादिकारणम्।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६ ।। हे राधे ! किसलयशयने यं वर्तमाने पङ्कजनयने पुण्डरीकाक्षे जघनं घटंय योजय किम्भूतं विगलितबसनं स्वयमेव तत एव त्यक्तमेखलम् अत एव वसनाभावान्परिधानरहितम् अत एव निधिनोपमीयते किमिव निधिमिव किम्भूतं निधिधनं च हर्षनिधानं हर्षस्य आदिकारणम् ।।६ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६ ।। पुरुषायितुसुखोत्कण्ठां कारयित्वा संप्रति नायककृतरतोत्कण्ठां जनयितुमाह, विगलितमिति। हे पङ्कजनयने पद्मनयने राधे ! किसलयशयने नवपल्लवशय्यायां कृष्णेन रचितायां जघनं घटय आरोपय। कीदृशं जघनम् ? विगलितं कोटिकन्दर्पलावण्य-श्रीकृष्णदर्शनेन स्वयमेव स्खलितं वसनं यस्य तत्। अत एव पिधानमावरणं तद्रहितम्। पुनः कीदृशम् ? परिहृता दूरीकृता रसना क्षुद्रघण्टिका येन तादृशम् । पुनः कीदृशम् ? हर्षस्यानन्दस्य निधानं गृहम्। कमिव ? निधिमिव। 'रसना काञ्चिजिह्वयोः' इति **विश्वः** ।।६ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६ ।। गमनान्तरं किं कर्त्तव्यमित्याकांक्षायामाह। विगलितेति। हे पङ्कजनयने ! कमललोचने ! राधे ! विगलितं श्रस्त वसनं वहिःप्रावरणं वस्त्रं यस्मिन् तादृशम्। किञ्च परिहृता त्वयोवृता रसना किङ्किणी काञ्ची यस्मिन् तादृशम्। रसनोद्धरणं गीतरद ? गोपनार्थमित्यवगन्तव्यम्। अपगतं पिधानं अन्तःप्रावरणवस्त्रं यस्मिन् तादृशं देशान्तरे हि कान्ताजघनप्रदेशे एकं स्वल्पवस्त्रं बध्वा तदुपरि समीचीनं दुकूलादिकं बध्नन्तीति प्रसिद्धम्। हर्षस्य सन्तोषस्य निधानम् आस्पदम् एतादृशं जघनं श्रेणीविभागं विगलितवसनं परिहृतरसनमिति द्वयं बिधेयविशेषणं वा तदाकृष्णेनेति शेषः। क्रियाविशेषणं वा किशलयशयने मुरातिविरचितपल्लवतल्पे निधूवननिधानमिव घटय कृष्णेन योजय इत्यर्थः। यः वनमाली वने वसति तेन जघनं घटय इत्यन्वयः। यथा धनातुरः सन्तोषनिधानं निधिं प्राप्य परिपूर्ण कामो भवति तथा विरहातुरः कृष्णोऽपि भवदीयश्रोणीभागमवलोक्य निर्ब्यथो भवतु इति तात्पर्य्यम्। देशान्तरे शसयोर्भेदा-भावादन्त्यानुप्रासोपपत्तिः ।।६ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६ ।। उत्कण्ठावृध्यर्थमवस्थाविशेषस्मारणं कुर्वन्त्येव सखी राधामभ्यर्थयति, हे पङ्कजनयने पद्मलोचने राधे ! किसलयस्य शयनं शय्यां यस्य स किसलयशयनः

श्रीकृष्णः। तस्मिन् जघनं घटय सङ्गमय। किसलयशयनपदेन कृष्णस्योपन्यासेन कृष्णसन्तापातिशयो दर्शितः। किम्भूतं जघनम्? प्रियदर्शनजनितभावोदयात् विगलितं वसनं यत्र तत्तथा। अतएव वस्त्रपतनात् परिहृता रसना काञ्ची येन तत्तथा, तम्। अपिधानमाच्छादनरहितम्। अतएव निधिमिव हर्षनिधानम् आनन्दाश्रयम्। अन्योऽपि शंखादिनिधिराच्छादन रहितः प्राप्तो हर्षमुत्पादयतीत्युचितमेव। 'क्षुद्रघण्टा तु रसना रसना रसजिह्वयोरि'ति **धरणिः**। 'अपिधानतिरोधानपिधानाच्छादनानि च' 'निधिर्नाशेवधिरिति' **चामरः**। 'निधानं त्वाश्रये निधाविति' **विश्वः**।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। एवं [१] नायकार्पितरतोत्कण्ठां कारयित्वा पुनस्तस्या उत्कण्ठां जनयितुमाह, विगलितेत्यादिना। हे पङ्कजनयने कमलाक्षि! [२]किसलयशयने नवपल्लवतल्पे जघनं घटय आरोपय। कीदृशम्? विशेषरसावेशे गलितं स्खलितं वसनं[३]नीलवस्त्रं यत्र। पुनः कीदृशम्? परिहृता दूरीकृता रसना क्षुद्रघण्टिका यत्र। नीलाम्बुदसुन्दर-श्रीनन्दकिशोरदर्शनेन स्खलित [४] वसनरसनमिति ध्वनिः। अत एवापिधानं आवरणशून्यम्। किञ्च हर्षनिधानं परानन्दस्थानम्। कमिव? निधिमिव [५]नायकस्याभीष्टनिधिमिव। यथा निधिरुद्घाटितस्सुखाय भवति तद्वत्। जघनं कटेरधोभागे इति हारावली। [६] निधानं निधिगेहयोः इति हैमे[७]।।६।।

१.नायिकां रतोत्कण्ठां-अ.ब.२.किसलयतल्पे शयने नवपल्लवतल्पे-अ.३.नास्ति-अ.ब.४.वसनमिति-ग.५.नायिकस्याभीष्टं निधिमिव-अ.ब.फ.ह.ज.६.तः७.पर्यन्तं नास्ति-अ.ब.७.हैमः-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। विगलितेति। हे राधे! त्वं किसलयशयने पल्लवशय्यायां पङ्कजनयने [१] पुण्डरीकाक्षे कृष्णे जघनं घटय सङ्गमयेति विपरीतसुरतं सूचितम्। कीदृशं [२] जघनम्? विगलितवसनं [(३)]त्यक्तवस्त्रम्; परिहृतरसनं त्यक्ता क्षुद्रघण्टिका येन। अत एव अपिधानं आवरणरहितं, हर्षनिधानं आनन्दस्थानं निधिमिव निधिसदृशं, उद्घाटितमुखो निधिरपि हर्षाय[४] भवति ।।६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। विगलितेति। हे पङ्कजवन्नयने यस्याः तत्सम्बोधनम्। विकसितशब्दा-भावाद्धर्मलुप्तोपमा। किसलयानां शयने पल्लवास्तरणे परिहृतरशनं त्यक्तकाञ्चीकं अत एव विगलितवसनं विमुक्ताम्बरम्। अत एव निधिमिव हर्षस्य निदानं आनन्दकारणं

माधवं प्रति जघनं स्वीयनाभेरधोभागं अपिधानं आच्छादनं घटय। पुरुषायिते जघनमेव आच्छादकं भवतीति भाव:। अत्र निधिरुपमानं, हर्षकारणत्वं साधारणधर्म:, इव शब्दो वाचक:, माधव: उपमेयमिति चतुर्णामुपादानात्पूर्णोपमालङ्कार:। यद्वा, जघनं नाभेरधोभागं अपिधानं आच्छादनरहितं घटय कुरु हर्षकारणं निधिमिव। निधेराच्छादनेन कार्पण्यं भवेत् तदनाच्छादनेन उदारता ।।६ ।।

१.नास्ति-ड. २.नास्ति-ड. ३.नास्ति-ड. ४.भवतीति भाव:-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। विगलितेत्यादि। किसलयशयने नवपल्लवशय्यायां पङ्कजनयने पुण्डरीकाक्षे जघनं घटयेति योजना। किसलयशयन इति। किसलयं शयनं यस्येति हरिविशेषणं वा। कैश्चित् हे पङ्कजनयने! राधे! किसलयशय्यायां जघनं कटिं संश्लेषयेति व्याख्यायते। "जघनं च श्रोणिपूर्वभागे न कटिमात्रके" इति **कुमुदाकर**:। जघनं किंविधम्? विगलितं वसनं यस्मात् तथा परिहृता त्यक्ता रसना येनेति कर्तृत्वोपचारात्। अत एवापिधानं तिरोधानरहितम्। पुन: किंविधम्? निधिमिव हर्षनिधानमिति। यथा विघटितपिधानो निधि: प्रमोदास्पदं भवति तथा जघनप्रदेशो वसनरसनाभ्यां रहितकृष्णस्य हर्षनिधानं भावीति भाव:। "अपिधानतिरोधानच्छादनानि च" **इत्यमर**:।।६ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६ ।। अतो गत्वा हे पङ्कजनयने। किशलयशयने जघनं घटय। कीदृशं? श्रीकृष्णेन हेतुना विगलितं वसनं यस्मात्तत् तेनैव दूरीकृता रसना यस्मात्तत् अतएवापिधानं आवरणरहितं ततश्च तस्यैव हर्षनिधानम्। कमिव? निधिमिव। गतावरणस्य निधे: दर्शनेन हर्षो जायत एवेत्यर्थ:।।६ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६ ।। पुनरुत्कण्ठातिशयवर्धनाय प्राह; विगलितेति। हे सखि! किसलयशयने कोमलपल्लवशयनीयोपरि पङ्कजनयने त्वदङ्गशोभादर्शनोत्फुल्ललोचने श्रीकृष्णे जघनं कट्यधोभागं प्रदेशं घटय, योजय । कीदृशम्, कृष्णेन विगलितमुत्सारितं वसनं यस्मात्तत्। किञ्चिदावरणमसहमानेन तेनैव परिहृता रशना किङ्किणीयउक्तकाञ्ची यस्मात्तत्। अत एव अपिधानमावरणशून्यं तस्यैव हर्षस्य सन्तोषस्य निधानमास्पदम्। किमिव, निधिमिव। यथोद्घाटितो निधि: हर्षमातनोति, तद्वत्। ईदृशं जघनं तस्मिन् घटयन्ती आत्मानं सफलयेति भाव:।।६ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। विगलतवसनेति; विपरीतरतिक्रीडायां तव वस्त्रं स्खलितं भविष्यति। तव कटिसूत्रमपि अधः पतिष्यति। त्वं नवपल्लवतल्पे रतिक्रीडायां जघनं विवृतं कुरु। वस्त्रकटिसूत्रयोः स्खलनेन नवपल्लवशय्यायां हे कमलाक्षिनायकस्य महार्घरत्नमिव हर्षविधानमेतेन कुरु।।६।।

**७-हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।**
**कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ।। धीर० ।।७।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।७।। हरिरतिमानीति। "मानश्चित्तसमुन्नतीरित्यमरः" अतिबिलम्बात् त्वामनादृत्य कदाचिदन्यामभिसरिष्यतीत्यर्थः। रजनीरिदानीमियमपि याति विरामम्, इति अतिविलम्बादात्रिरप्यवसानं न यास्यतीत्यभिप्रायः।

तस्मान्मम वचनं कुर्विति वाक्यार्थः। कीदृशं सत्वररचनं सत्वरा रचना परिपाटी यत्रेति विग्रहः किं तत्तव वचनमित्याह। पूरय मधुरिपुकाममिति। कोऽसौ मधुरिपुः काम इत्याह ।।७।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।७।। हरिरभिमानीति। हे राधे! सत्वररचनं शीघ्रसाधनं यथा स्यात्तथा मम वचनं कुरु। किंभूतं वचनम्? मधुरिपुकामं कृष्णवाञ्छां पूरय। न पूर्यते चेत् किं स्यात्? हरिरभिमानी, त्वत्तो लाघवं न सहते, पश्चात्त्वां त्यक्ष्यति। पश्चादपि करिष्यसि चेद्दिानीमेव कुरु। अन्यथेदानीमियं रजनिरपि विरामं याति। अभिसारकालोऽपि यास्यति। वर्तमानसामीप्याद्वर्तमानवत् ।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। अपि च हारि रिति हे राधे सत्वररचनं शीघ्रसाधनं यथा स्यात्तथा मम वचनं कुरु किं तन्मम वचनं मधुरिपुकामं श्रीकृष्णवाञ्छां पूरय पूरयते नोचेत् किं स्यात् हरिरभिमानी ततो लाघवं न सहते पञ्चात्त्वां त्यक्षति पश्चादप करिष्पसे चेत् इदानीमेव कुरु अन्यथेयं रात्रिरपि विरामम् अवसानं याति गच्छति अभिसारिककालोऽपि यास्यति वर्तमानं यथा स्यात्।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। हरिरिति। हरिः कृष्णोऽभिमानी मनस्वी। तथा चैतावता दैन्येनापि दुर्ग्रहमत्यजन्त्यां त्वयि को वेदौदास्यमेवाचरेदिति भावः। इयं रजनिरपि रात्रिरपीदानीं

विराममवसानं याति। तथा च म्रम वचनं 'चल सखि कुञ्जम्' इत्यादि मद्वाक्यं कुरु। कीदृशम्? सत्वरं त्वरया वेगेन सहितं गमनं रचयेति सत्वररचनम्। मधुरिपोः कृष्णस्य कामं वाञ्छां पूरय। नायिका चात्राभिसारिका। तल्लक्षणं च **रसार्णवे** 'मदनानलसंतप्ता याऽभिसारयति प्रियम् । ज्यौत्स्नीतमस्विनीयानयोग्याम्बरविभूषणा।। स्वयं चाभिसरेद्या तु सा भवेदभिसारिका ।। इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। तर्हि वनमाल्येवात्रागच्छतु इत्याकांक्ष्यायामाह। हरिरिति। हे राधे! यः वनमाली यमुनातीरे वसति स हरिः सर्वतापहरः। श्रीकृष्णः अभिमानी अहमेव सर्वदुःखहरः मद्दु :खशमनार्थम् अन्यत्र गच्छामि किमित्यहं कारसम्पन्न इत्यर्थः, अतएव स तु न यास्यतीत्यर्थः। तर्हिः सर्वेषु पश्यत्सु मया कथं गन्तव्यमित्याकांक्षायामाह। इयमिति इयं रात्रिरपि विरामं निवृत्तं याति गमिष्यति। भविष्यति लट्। शीघ्रमेव रजनिरपि निवर्त्तिष्यत इत्यर्थः। तथा च त्वया विलम्बं न कार्य्यम् इति तात्पर्य्यम्। हरेरभिसरणविषयवेशः, त्वरया सहित सत्वरा अभिसरणविषये त्वया प्रतिपादिकेत्यर्थः। तादृशी रचना निर्माणं यस्मिन् तादृशं कुरु। अनन्तरं च मधुरिपोः श्रीकृष्णस्य काममभिलाषं पूरय परिपूर्णं कुरु। अन्यथा तव हानिरेव स्यादितिभावः।

अत्र मधुरिपुशब्देन श्रीकृष्णस्य ग्रहणं तत्कामपूरणे विरहसमये राधातापकारि वसन्तादिरिपुक्षयं स एव विधास्यतीति द्योतनार्थमित्यवगन्तव्यम् ।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। इदानीं गमनविलम्बेन गमनमपि विफलमिति दर्शयन्ती त्वरयति। हरिः कृष्णः अभिमानी मनस्वी तथा च तत्कृतापमानभिया नात्र स्वमागमिष्यतीति भावः। भवतु विलम्बेनाहमेव यास्यामीत्याशंक्याह, अन्याः सर्वाः रजन्यो विरामं गता। इदानीमियमपि विद्यमाना रजनिर्विरामं याति। तत् तस्मात् मम वचनं कुरु मम वचनविषयोभूतार्थं निष्पादयेत्यर्थः। किन्तद्वचनं तदाह, सत्वरा त्वरया सहिता रचना कर्त्तव्यता यत्र एवं यथा स्यात्तथा मधुरिपोः कृष्णस्य काममभिलाषं पूरय पूर्णतां नय। अत्र मधुरिपुपदेनोपन्यासः प्रायो वीररता स्त्रिय इति राधायाःकृष्णेऽनुरागदृढायार्थम्।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। एवं शिथिलप्रयत्नां राधां प्रति [१]रजनीभेदमुपपादयन्ती आहहरिरित्यादिना। हरि : कामतापहरोऽभितस्सर्वतः सर्वभावेन वा त्वामेव मानयति नान्यामित्यभिमानी यतस्त्वय्येवातिशयेन प्रेम्णाऽभिमानवानतः मधुर्वसन्तो रिपुः क्षोभकत्वेन यस्य तस्य

मधुरिपोः कामं कामाभिलाषं [२]पूरय पूर्णं कारय। रिपुपीडितः [३]प्रियस्त्वत्सहायेन वशीकृतो भविष्यतीति भावः। किञ्च सम्प्रति इयं रजनी रात्रिः विराममवसानं याति यास्यति। अपि यावद्याति तावन्मम वचनं सत्वररचनं त्वराशीघ्रं प्रगमनसहितं कुरु। रतिमानी इति क्वचित्पाठस्तदा श्रीराधारतिपूर्णः। अत्रा[४]भिसारिकानायिका। तल्लक्षणम् **(रसार्णवे)** मदनानलसन्तप्ता याऽभिसारयति प्रियम् इति। एवं सुरतसमये समुपस्थिते गमनविलम्बनमयुक्तमिति भावः। रसवदलङ्कारः।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। हरिरिति। हे राधे ! हरिरपि अभिमानी लघुत्वं न सहत इत्यर्थः। इदानीमधुना रजनिरपि विराममवसानं [५] उपयाति। वर्तमाने लट्। मम वचनं कुरु। शीघ्रमागच्छेत्यर्थः। कीदृशं मम वचनम् ? सत्वरा शीघ्रा रचना यस्मिन् गत्वा च मधुरिपुकामं श्रीकृष्णाभिलाषं पूरय [६] पूर्णं कुर्वित्यर्थः[७]।।७।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। एवं सुरतकथाकर्णनविदितभावां त्वरयितुं बिभीषयति (हरिरिति।) हरिः अभिमानी त्वया अनागतं चेदन्यां गमिष्यतीति भावः। इदानीमियं रजनिरपि रात्रिरपि विरामं याति। प्रातःकालसमय इत्यर्थः। इदानीं न यास्यति चेत्साभिमानत्वात् हरिस्त्वां न प्रेक्षिष्यतीति भावः। त्वरासहितरचनं अनुष्ठानं यथा तथा मम वचनं करु। मधुरिपुकामंमाधवमनोरथं पूरय मम इत्यलं सकलं भवति। तदभीष्टपूर्तिरिति-[१]परोपकारार्थं गच्छेति भावः।।७।।

१.भेदमुपपादयन्ती-ब.रजनीभेदमुपादायाह-ग.ह.फ.ज. २.नास्ति-ग. ३.प्रियस्त्वया सहायेन-अ.ब.ग.ह.प्रियेण-इ.फ.ज.४.अभिसारिकेयं-ग.५.याति यास्यति-क.ल.म.६.तः७.पर्यन्तं नास्ति-ड.ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। हरिरित्यादि। हे सखि ! हरिः श्रीकृष्णः अति[भि]मानी चित्तसमुन्नतिमात्यन्तिकीं धत्ते। ''मानश्चित्तसमुन्नतिः'' **इत्यमरः**। अतिविलम्बात् त्वामनादृत्य कदाचिदन्याम-भिसरिष्यतीति भावः। अतिविलम्बादियमपि रजनिरिदानीं विराममवसानं याति गमिष्यतीत्यभिप्रायः। तस्मान्मम वचनं कुर्विति वाक्यार्थः। किं तद्वचनमित्यत आह, सत्वररचनमिति। शीघ्रं प्रधानं यथा स्यादेवं मधुरिपुकामं पूरयेति।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। किंच, हरिरतिशयेन त्वां मानयितुं शीलं यस्य सः त्वदेकपर इत्यर्थः। अभिमानीति अन्याभिसारशङ्कामप्या पादयति। इयं प्रत्यक्षं दृश्यमाना रजनिरेवावसानं

यातीति भावयति तस्मात् मम वचनं सत्वरा रचना परिपाटी यत्र तत्र यथा स्यात्तथा कुरु । किं तत् इत्याह, मधुरिपोः मनोरथं पूरय।।७।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। एवं प्रोत्साहितामपि वेशादिव्याजेन विलम्बितामालक्ष्य भेदगर्भप्रकारान्तरेण त्वरयति। हरिरिति; हे सखि! हरिः स्पृहणीयरूपगुणतया सर्वचित्तहरः श्रीकृष्णः अतिमानी, अतिशयेन त्वां मानयितुं सम्मानयितुं शीलं यस्य सः एवं वर्त्तते इति शेषः। रजनिः, उभयोः संघटनसम्पादयित्री रात्रिः, इयमपीत्यूर्ध्वाऽवलोकनेन दर्शयति इदानीमेव न तु विलम्बेन विराममवसानं याति, प्राप्नोति । रात्रिविरामं दृष्ट्वा अतिमानी स तु हरिः, 'सा नागता चेत्, नागच्छतु', सर्वकामिनीचित्तहरोऽस्मीति प्ररूढमानः सन्, अन्यमभिसरति चेत् किं भावीति भेदगर्भार्थोऽपि व्यञ्जकः। अतस्त्वत् प्रियैषिण्या मम त्वरासहिता रचनापरिपाटी यत्र तादृशं वचनं कुरु। स्वीकुरु इत्यर्थः। किं तत् कथयेत्याह; मधुरिपोः श्रीकृष्णस्य कामं त्वत्सम्भोगाभिलाषं पूरय, पूर्णं कुरु। अन्यथा मधुर्वसन्तस्त्वद्विरहे रिपुर्भूत्वा तस्य दुःसहदुःखप्राप्तिनिदानं भविष्यतीति श्लिष्टमधुशब्देन आक्षेपोक्तिर्ध्वनिता।।७।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। हरिरभिमानीति; हरिः कामसन्तापेन त्वद्विना अन्यसङ्गविवर्जितेन अनुरागेण त्वामपेक्ष्यमाणः कुञ्जे प्रतिपालयति। इदानीं रात्रि शीघ्रातिशीघ्रं प्रयाति। अतः विलम्बेनालं। मम वाक्यानुसारं तस्य समीपं गत्वा श्रीकृष्णस्याभिलाषं परिपूरय। तस्येछायाः- कामनायाःसम्यग्तर्पणं कुरु। सन्दर्भेऽस्मिन् बहुविलम्बो जातः। श्रीकृष्णोऽपि अतिव्यग्रः। तस्य कामनां पूरय।।७।।

**८-श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम्।**
**प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ।। धीर० ।।८।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।८।। श्रीजयदेवे कृतहरिसेवे परमररमणीयं भणति सति, हे जनाः प्रमुदितहृदयं यथा स्यादेवं हरिं नमतेति योजना। परमरमणीयमित्युत्कृष्टरसं गीतमिति यावत्। कीदृशं सुकृतकमनीयं ''स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष **इत्यमरः**''।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।श्रीजयदेवेति। हे वैष्णवाः! हरिं नमत नमस्कुरूत। किंभूतं हरिम्? जयदेव अतिसदयम्। किंभूते जयदेवे? परमरमणीयमिदं पूर्वोक्तं भणति। तत एव प्रमुदितहृदयम्। पुनः किंभूते जयदेवे? कृतहरिसेवे। किंभूतं हरिम्? सुकृतमिव कमनीयं मनोहरम्।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।हे वैष्णवाः हरिं नमत नमस्कुरुत किम्भूतं हरि जयदेव अतिसदयं किं विशिष्टे जयदेवे परमरमणीयम् इदं पूर्वोक्तं भणति तदेव प्रमुदितहृदयं किम्भूते कृतहरिसेवे किम्भूतं हरि सुकृतमिवकमनीयं सुकृते इव कमनीयम् आभिलक्षणीयम्।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।।श्रीजयदेवेति। श्रीजयदेवे कवौ। कृता हरेः सेवा येन तादृशे परमरमणीयं यथा स्यादेवं भणति सति। हे जनाः! हरिं कृष्णं नमत। कथम्? प्रमुदितमानन्दयुक्तं हृदयं यथा स्यात्तथा तादृशम्। कीदृशं हरम्! सदयं दयासहितम्। पुनः कीदृशम्? सुकृतेन पुण्येन कमनीयं वाञ्छनीयम् ।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। कृता हरिसेवा येन तादृशे श्रीजयदेवे परमरमणीयमत्यन्तमनोहरं गीतं भणति गदति सति प्रमुदितहृदयं सन्तुष्टचित्तं दयया सहितः सदयः लोकोत्कृष्टदया-सम्पन्नः इत्यर्थः। अथवा दयाया सहिताः सदयाः तानतिक्रान्तोऽतिसदयः। अत्यादय क्रान्ताद्यर्थे द्वितीयया इति समासः। दयावतां मध्ये परमोत्कृष्टदयासम्पन्नमित्यर्थः। एतेन तस्य सर्वथा सेव्यत्वमुक्तमित्यवगन्तव्यम्। त्यागशीलो दयापर इति। एतादृशं किञ्च, सुकृतं पुण्यमेषामस्तीति सुकृता, अर्श आद्यच्प्रत्ययः। तेषां कमनीयम् अभिलषणीयं सुकृतपरिपाकैकलभ्यमित्यर्थः। एतादृशं हरिं श्रीकृष्णं हे नराः नमत नमस्कुरुत येन भवतामिष्टसिद्धिर्भवेदिति भावः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। कृतहरिसेवे विहितकृष्णाराधने श्रीजयदेवे परमरमणीयमिति मनोहरमर्थाङ्कितं भणति सति प्रसुदितहृदयं अतितुष्टहृदयम् अर्थात् गीतेनैव। हरिं कृष्णं नमत सज्जना इत्यर्थात्। हरिं पुनः किम्भूतम्? अतिसदयम् अतिकृपालुमित्यर्थः। अथवा सन् विशिष्टोऽयं शुभावहो विधिर्यस्मादेतादृशम्। पुनः किम्भूतम्। सुकृतेन पुण्येन कमनीयं वाञ्छनीयमित्यर्थः। अथवा सु उत्कृष्टं कृतं कार्यं येषां ते सुकृताः पुण्याः, तेषां कमनीयं वाञ्छनीय-मित्यर्थः।'अयः शुभावहो विधिरि'**त्यमरः**।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। गीतार्थसङ्ग्रहं [२] मङ्गलेन योजयति, श्रीजयदेवेत्यादिना। हे हरिभक्ता: ! श्रीजयदेवे परमरमणीयं [३] निरुपममनोहरं भणति कथयति सति हरिं नमत नमस्कुरुत। किदृशे (कृतहरिसेवे) कृता हरिसेवा चिन्तनादिरूपा येन। कीदृशं हरिम्? प्रमुदितं प्रहर्षेणानन्दितं हृदयं यस्य तम्। पुन: (कीदृशम्? अतिसदयं) अतिशयेन [४]भक्तेषु दयायुक्तम्। पुन: कीदृशम्? [५]सुकृतै: [६]पुण्यराशिभि: सुकविभिर्वा प्रार्थनीयं सुन्दरं वा। प्रस्तुतोक्तिरलङ्कार:।।८।।

इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामेकादश: प्रबन्ध:।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। श्रीजयदेव इति। कृतहरिसेवे कृता हरिसेवा कृष्ण [७]चिन्तनादिर्येन: तस्मिन् जयदेवे। परमरमणीयं अतिशयमनोहरं इदं गीतं भणति [८]कथयति सति; प्रमुदितहृदयं सन्तुष्टचित्तं [९] नमत नमस्कुरुतेति भक्तान् प्रत्युक्ति:। कीदृशम्? [१०] अतिसदयमति-करुणासहितम्। प्रसन्नहृदयो [११] दयावांश्च शीघ्रं[१२]प्रसीदतीति नमनं कर्तव्यमिति भाव:। पुन: कीदृशम्? सुकृतकमनीयं [१३]पुण्येन वाञ्छनीयम्।।८।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामेकादश: प्रबन्ध:।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।। (श्रीजयदेव इति) श्रीजयदेवे कृतहरिसेवैकपूजके परमरमणीयं अतिमधुरं भणति सति प्रमुदितं सत् हृदयं अन्त:करणं यस्य तम्। अतिसदयं बहुकृपालुं सुकृतै: कमनीयं अभिलषणीयम्। सुकृतं चैतस्मिन् भावो भवती (ति) भाव:। हरिं नमत हे भक्ता: ! य (श) स्यमिति शेष: ।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकादश: प्रबन्ध:।

१.परोपकारार्थायागच्छ-इ. २.मङ्गलत्वेन-इ.फ.ग.ह.ज. ३.निरूपणमनोहरं-ग. ४.नास्ति-अ.ब. ५,६.नास्ति-अ.ब. ७.चिन्तनं-क. ८.नास्ति-क. ९.नास्ति-क. १०.अतिदयायुक्तं-क.ल.म. ११.दयां करोतीति-क. १२.प्रसीदतीति भाव:। अत: अत एव नमनं कर्तव्यमिति खल-क. १३.अतिपुण्येन वाञ्छनीयमित्यर्थ:-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।। श्रीजयेत्यादि। कृता हरिसेवा येन एवंविधे श्रीजयदेवे भणति सति हे जना: ! प्रमुदितहृदयं, प्रकृष्टहर्षयुक्तमानसम् अत एवातिसदयम् अतिशयेन दयालुम् अत

एव परमरमणीयम् उत्कृष्टरम्यम् अत एव सुकृतकमनीयं शोभनकर्मभिः वाञ्छनीयं सुकृतीनां मनस्तत्र वलतीति कृत्वा ईदृशं हरिं नमत नमस्कुरु चेति यावत्। प्रमुदितहृदयमिति नमनक्रियाविशेषणं वा। परमरमणीयं गीतं भणति सति सम्बन्धो वा। ''विशेषणात् विशेष्यप्रतिपत्तिः क्वचिद्'' इति न्यायात्। यथा उदितवह्निः सागराम्बरा पृथिवीति। एवमिहापि परमरमणीयमिति प्रकरणाद् गीतं विशेष्यतया प्रतिपन्नम् ।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। कृतहरिसेवे श्रीजयदेवे भणति सति भोः साधवः! प्रमुदितहृदयं यथा स्यात्तथा हरिं नमत। कीदृशं ? अतिसदयं तथा परमरमणीयं यतः सुकृतेन शोभनचरितेन कमनीयं सर्वैर्विशेषेण वाञ्छनीयम्।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। हे भक्ताः! श्रीजयदेवे परमरमणीये निरुपममनोहरं पूर्वोक्तक्रमं भणति सति प्रमुदितं प्रकर्षेण मुदितमानन्दितं हृदयं यत्र तद् यथा स्यात्तथा हरिं नमत, नमस्कुरुत। कीदृशम्, अतिशयेन दयासहितं किंवा, यावन्तः सदया देवा मनुष्यादयश्च सन्ति तानतिक्रामतीत्यतिसदयस्तम्। अनेन नमस्कारमात्रेणापि परमरहस्यप्रेमरसास्वादरूपां कृपां करिष्यतीति भावः। कथमस्येदृशस्मरणीय वर्णनं शक्तिरित्यत आह कीदृशे कृता हरेः सेवा येन तादृशे, हरिसेवयैव ईदृशी शक्तिरिति भावः। अन्ये कथं तादृशं न सेवन्ते, अत आह; ईदृशं सुकृतं भक्तिलक्षणं भाग्यमस्यास्तीति सुकृतः, तस्यैव कमनीयमभिलषणीयं न त्वन्येषामिति भावः।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्रीजयदेवेति; हरिसेवार्थं श्रीजयदेवकविनात्यन्तं शोभनीयं वचनं तस्य नतिपूर्वकमुच्यते। स्वस्य सुकृतवलेन हरिः तेभ्यः सदयः दयाशीलो भवतु हरि सेवाया अङ्गभूतं कीर्त्तनं खलु कवेः कृष्णलीलामृतस्य वर्णनं स्वस्य हरि सेवां विधते।।८।।

**३२-विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते**
**प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति।**
**रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते**
**मदनकदन क्लान्तः कान्ते प्रियस्तव वर्तते।।३२।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३२।।श्रीराधायाः शीघ्रगमनार्थमाह विकिरतीत्यादिश्लोकचतुष्टम्। हे कान्ते! राधे! तव प्रियः कृष्णो मदनकदनक्लान्ता वर्त्तत इति योजना। मदनः कदनं पापमिवेति विग्रहः। ''कदनं पापकृष्णयोरिति विश्वः।'' क्लान्ततामाह। विकिरतीत्याह। विकिरति मुहुः श्वासान्निति नागतैव सा प्रियेति कृत्वा मुहुः पुनः पुनः ''शश्वदभीक्ष्णमसकृत्समाः'' **इत्यमरः**। आशाः पुरो मुहुरीक्षते इति अधुना आगमिष्यतीति कृत्वा। ''आशाश्च परितश्चताः'' ''स्यात्पुरः पुरतोऽग्रतः'' **इत्यमरः**। प्रविशति मुहुः कुञ्जं इति कदाचिदन्येव पथा समागत्य वा तिष्ठतीति कृत्वा गुञ्जन्मुहुर्वहुताम्यतीति वाष्पावृतकण्ठत्वादव्यक्तशब्दं कुर्वन् ग्लापयतीत्यर्थः।

कुञ्जं प्रविश्य त्वामपश्यन् हा कथं गुरुजनादिभयान्नागतेति कृत्वा रचयत मुहुः शय्यामिति मयि ह्यनुरागवशात्केन प्रकारेण गुरुजनान् प्रतार्य्य साम्प्रतमेष्यतीति कृत्वा पर्य्याकुल मुहुर्निरीक्षते। इति चतुर्द्दिशमवलोक्यत इत्यर्थः। मच्चित्तजिज्ञासार्थं क्वचिदिहागत्य नित्यं वा तिष्ठतीति कृत्वा। हरिणी नाम वृत्तम्।।३२।।

## (२) राणाकुंभ कृत-रसिकप्रिया

।।३२।। इदानीं सत्वरागमनाय प्रोत्साहयति, विकिरतीति। हे कान्ते! तव प्रियो मदनकदनक्लान्तो वर्तते मदनेन क्लान्तिं प्राप्तो वर्तते। तथाविधः सन्किं करोतीत्याह, त्वं नागतैवेति कृत्वा मुहुं श्वासान्विकिरति निःश्वासधारां मुञ्चति। नागतैवेति कृत्वाग्रे मुहुर्वारंम्बारमाशा ईक्षते विलोकयति। व्याकुलतया कस्या दिशः समेष्यतीति सर्वा एककालमिवावलोकयति। तत्राप्यदृष्ठ्वा भ्रान्तः सन्कुञ्जं प्रविष्टा भविष्यतीति मुहुर्वारंम्बारं कुञ्जं प्रविशति। मुहुर्मुहुरिति कोऽर्थः? तत्राप्यदृष्ट्वा वहिर्निर्यातस्तत्रैव निह्नुत इव तिष्ठतीति मुहुर्मुहुः प्रविशतीति। मुहुर्मुहुर्वारंम्बारं 'कुतो नागता, किं केनचिन्निवारिता, उत कुतो भयाद्वा?' इत्यादि तस्या अनागमनहेतुं विमृश्य मुहुर्वारंवारं वहु वहुविधं गुञ्जन् अव्यक्तशब्दं कुर्वन् ताम्यति ग्लायति। अथवा; वृथेदं विमर्शनम्, आगमिष्यत्येवेति मुहुः शय्यां रचयति। तथाप्यदृष्ट्वा पर्याकुलं यथा स्यात्तथा

ममानुरागादागमिष्यत्येवेति मुहुरीक्षते इति 'कदन' शब्दतात्पर्यम्। हरिणी छन्दः। दीपकालंकारः।।३२।।

## (३) जगद्धरकृत- सारदीपिका

।।३२।। इदानीं सत्वरगमनाय प्रोत्साहयति हे कान्ते तव प्रियः मदनेन कदनेन कदनं ग्लानिः क्लान्तः प्राप्तो वर्तते तथाविधः सन् किम्करोतीत्याह त्वं नागतैवेति कृत्वा पुरः अग्रे मुहुर्वारं वारम् आशाः दिशः ईक्षते विलोकयति व्याकुलतया कस्यां दिशि आगमिष्यतीति। सर्वा दिशः एककालमवलोकयति तत्राप्यदृष्ट्वा बहिर्निर्यातस्तत्रैव निह्नुत इव तिष्ठतीति। मुहुर्मुहुःप्रविशति वारंवारं कुतो नागता किं केन विनि वारिता उत कुतोभयाद्वा इत्यादि तस्यागमनहेतुं विमृश्य मुहुर्वारंम्बारम् अव्यक्तशब्दे ताम्यति ज्ञापयति अथवा वृथेदं विमर्शनम् आगमिष्यत्येवेति मुहुः शय्या रचयति तथाप्यदृष्ट्वा पर्याकुलं यथा स्यात्तथा ममानुरागादधुनागमिष्यत्येवेति मुहुरीक्षते इति कदनशब्दस्य तात्पर्यं हरिणी छन्दः दीपकालङ्कारः।।३२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३२।। श्लोकेनापि नायकस्योत्कण्ठामाह, विकिरतीति। हे कान्ते! तव प्रियो मदनकदनक्लान्तः। मदनः कामस्तज्जनितं कदनं दुःखं तेन क्लान्तो ग्लानी वर्तते । मुहुर्वारंवारं श्वासान्संतापनिःश्वासान्विकिरति क्षिपति। नासापुरो नासाग्रं मुहुर्वारंवारंमीक्षते। ध्यानेनापि प्रियां पश्यामीति नासाग्रं वीक्षमाणस्त्वां ध्यायतीति भावः। ध्यानसमये नासाग्रवीक्षणेन मनःसंयमो भवतीति 'नासापुट' इत्युक्तम्। क्वचित् 'श्वासानाशा' इति तालव्यशकारवान्पाठस्तदा श्वासान्विकिरति। अथ पुर आशाः पुरोभागस्थदिशः अनेन वर्त्मनागमिष्यतीत्याशयेन दृष्ट्वा मुहुरीक्षत इत्यर्थः। मुहुर्वारंवारं कुञ्जं प्रविशति गुञ्जञ्शब्दं कुर्वन्कदाचिदनेन वर्त्मनागत्य निलीय तिष्ठतीत्याशयेन ध्याने त्वां दृष्ट्वा केलये वा कुञ्जं प्रविशतीत्यर्थः। मुहुर्वारंवारं बह्वधिकं यथा स्यादेवं ताम्यति ग्लानी भवति। ध्यानविच्छेदे त्वां तत्रापश्यंस्ताम्यतीति भावः। क्वचित् 'कूजन्मुहुस्ताम्यति' इति पाठः। तदा कूजन्नार्तनादं कुर्वंस्ताम्यतीत्यर्थः। मुहुर्वारंवारं शय्यां रचयति। एतावत्कालं गुरुजनभीत्या नायातोऽतः परमायास्यतीति शय्यां रचयतीति भावः। मुहुर्वारंवारं परित आकुलं यथा स्यादेवमीक्षते। 'नासा तु नासिकायां स्यात्' इति **विश्वः**। 'आशास्तृष्णा दिशः प्रोक्ताः' इति च ।।३२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३२।। पुनरपि कृष्णस्य विरहप्रकारमेवाह। विकिरतीति। हे कान्ते वल्लभे राधे तव प्रियः श्रीकृष्णः प्रियग्रहणं शीघ्रगमनसूचनार्थम्। श्वासान् विरहवेदनाजनितनिःश्वासान्

मुहुरत्यन्तं विकिरति दिक्षु विक्षिपति पुरोऽग्रभागे आशां त्वदागमनपदवीं दिशं मुहुरीक्षते। कदा राधा आगमिष्यतीति त्वदागमनमेव पश्यतीत्यर्थः। अथ च मुहुः पुनरपि कुञ्जं आवासलतागृहं प्रविशति। कुञ्जं निर्विशतीत्यर्थः। मुहुर्गुञ्जन् प्रलपन्नित्यर्थः। बहु अधिकं यथा तथा ताम्यति ग्लानिं प्राप्नोति। ''तमेशमामष्टाना (७-३-७४) मित्यादिना ण्यनि दीर्घः। किं मुहुः शय्यां तल्पं रचयति आगते सज्जीकरोतीत्यर्थः। मुहुः पर्य्याकुलं यथा तथा ईक्षते, तदश्रुदृष्टिप्रसारं पश्यतीत्यर्थः तदा मदनस्य कदनं तस्मै सुरताक्षेपः सन्नित्यर्थः। चतुर्थी तदर्थे (७-२-४३) त्यादिना समासः। अथवा मदनस्य कामदेयवस्य कदनं बाणप्रयोगरूप युद्धं तेन क्लान्तः खिन्नः सन्नित्यर्थः। वर्त्तते तथा च विरहवेदनया प्रियः विकृतविविधचेष्टः आलोच्यापि त्वया अवश्यं गन्तव्यमिति तात्पर्य्यम् ।।३२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३२।। पुनरपि सखी राधां त्वरयितुं कृष्णावस्थामाह। हे कान्ते सुन्दरि राधिके! तव प्रियः कृष्णः मदनात् कामात् कदनं पीडा तया क्लान्तः सन् वर्तते। एतादृशः सन् किं कुरुत इत्याह, बहुशो वारं वारं श्वासान् विकिरति त्यजति। कथं राधा समागच्छतीति प्रत्याशया पुरो या आशाः दिशः मुहुः वारम्बारम ईक्षते विलोकयति। एकवारप्रवेशेऽपि कदाचित्तिरोहिता राधा नोपलब्धेति शङ्कया मुहुर्वारम्वारमेव कुञ्जं प्रविशति। मुहुर्वारम्बारं गुञ्जन् वास्पाकुलकण्ठतया अव्यक्तप्रियतमाभिधानरूपशब्द प्रयोगं कुर्वन् प्रतिवचनालाभेन बहु यथा स्यादेवं ताम्यति ग्लानिं प्राप्तोति। पुनरपि दृढवासनावशेन राधामालोक्य मुहुर्वारम्बारं शय्यां रचयति विस्तारयति। अत्र मुहुरिति पदेन राधामालोक्य शय्यां रचयति। पुनर्विशेषादर्शनेन प्रद्वेषेण शय्याम् उत्थापयति पुनस्तथैव रचयति चेति दर्शितम्। सर्वथा मयि दृढा मयि दृढानुबन्धा राधा समागत्य क्वचित् लीना तिष्ठतीति विचिन्त्य पर्याकुलं यथा भवति तथा मुहुर्वारम्बारं सर्वत्रेक्षते। तदनेन कृष्णस्य उन्मादावस्था दर्शिता। तथा च **भावलता**, 'श्वासप्ररोदनोत्कम्पवसुधालेखनैरपि। व्यापारो जायते यत्र स उन्माद स्मृतो यथा।।' ।।३२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३२।। एवं नानोपायैरनभिसरन्तीं श्रीराधां पुनः[२] प्रत्याह विकिरतीत्यादिना। हे कान्ते स्वप्रदीप्त्या वशीकृतवल्लभे! तव प्रियो वल्लभः श्रीकृष्णो मदनस्य [३] कामस्य त्वद्विरहेण कदनं पीडनं तेन क्लान्तः सन्तप्तो वर्तते। सन्तप्ततामेवाह मुहुर्वारं वारं त्वदागमनचिन्तया श्वासान् सन्तापनिःश्वासान् विकिरति विक्षिपति। मुहुः

पुरोऽग्रे[४]आशाः दिशः ईक्षते पश्यति। केनापि मार्गेण कुञ्जगताऽऽगमिष्यतीति मुहुर्वारं वारं कुञ्जं[५]लतामन्दिरं प्रविशति। कीदृशं कुञ्जम्? गुञ्जन्तो भ्रमरा यत्र तत् गुञ्जत्। [६]तत्राऽप्यलब्धमनोरथो मुहुस्ताम्यति अतिग्लानिसन्तप्तो भवतीत्येवंविधोऽपि त्वदालिङ्गनाय शय्यां विविध [७] किसलयैस्तल्पं रचयति। तल्पं कृत्वा नागतेयमिति विज्ञाय त्वदागमनाय मुहुः परित आकुलं व्याकुलमीक्षते। एतेन त्वय्यनुरागातिशयः प्रोक्तः। दीपकालङ्कारः।।३२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३२।। अधुना शीघ्रं गन्तुं प्रेरयति, विकिरतीति। हे कान्ते! तव प्रियः कृष्णः मदनकदनक्लान्तः कामपीडोपतप्तो वर्तते तिष्ठति। केन प्रकारेणेत्यत आह, विकिरतीत्यादि। इदानीमपि नागतेति श्वासान्मुहुर्वारं वारं विकिरति विक्षिपति। एकाग्रचित्ततया त्वामेव ध्यातुं नासापुरो नासाग्रं मुहुरीक्षते पश्यति। ध्याने अदृष्ट्वा मुहुः कुञ्जं लतागृहं प्रविशति अत्र भविष्यतीति; अत्राप्यदृष्ट्वा मुहुः गुञ्जन् हे राधे[२]क्वासीत्यादि जल्पन्[३] बहु ताम्यति दुःखितो भवति। त्वामागतां दृष्ट्वैव मुहुः [४] शय्यां शयनीयं रचयति ; शय्यां कृत्वा त्वामनागतां विज्ञाय मुहुः[५]पर्याकुलमीक्षते दिशः पश्यति। इदानीमेव दृष्टा पुनः कुत्र गतेति[६]मत्वाऽतिशयेन चिन्तातुरो भवतीति भावः [७]।।३२।।

१.श्वासान्नासां-इ.श्वासान्नासापुरो-ड.२.सख्याह-इ.फ.ग.ह.३.नास्ति-फ.ग.ह.ज.४.आशां दिशं-ग.५.नास्ति-अ.ब.६.तत्राप्य लब्धमानो-फ.ग.ह.ज.७.किसलयतल्पं-ब.किसलयपुष्पतल्पं-इ.फ.ग.ह.ज.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३२।। अष्टपद्यर्थं सङ्गृह्णाति, (विकिरतीत्यादिना।) हे कान्ते राधे! तव प्रियः माधवः मुहुः श्वासान् विकिरति मुञ्चति। मुहुः पुनः नासां वीक्षते। दशमावस्था-प्राप्तिशङ्कया नासाग्रावलोकनं कुरुते। तद्दर्शनं मृत्युसूचकमिति। मुहुः कुञ्जं प्रविशति मुहुः प्रवेशान्निर्गत्य विशतीत्यर्थः। कूजन् विलासेन पक्षिरुतं कुर्वन् मुहुः बहु ताम्यति। कालस्याक्रमणात् मुहुः शय्यां रचयति मुहुः पर्याकुलं व्याकुलतया ईक्षते पश्यति। एवं मदनकदन निमित्तसम्भोगार्थं क्लान्तः आतुरः वर्तते। ईक्षत इत्यस्य पुनरुक्तदोषो नाशङ्कनीयः सख्या विरहनिवेदनेन पर्याकुलत्वात्। कारकदीपकम्। हरिणी-वृत्तम्।।३२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३२।। विकिरतीत्यादि। हे कान्ते! तव प्रियः कृष्णो मदनकदनक्लान्तो मदनपापोपहतः। यद्वा मदनेन यत् कदनं कष्टं तेन क्लान्तो वर्तते। "कदनं पापकष्टयोः" इति **विश्वः**। यद्यपि कान्ते इत्यत्र सखीवचनत्वेन सखीत्येवमुक्तं युक्तं तथापि कान्ते सुन्दरी न तु नायिके इत्यर्थे तात्पर्यम्। एतेन कृष्णस्यानुराग उचितः। केचित्तु कृष्णस्येत्यध्याहृत्य कृष्णस्य कान्ते इति योजयन्ति। तन्मतेऽपि अनुरागातिशयः सूचितः। मदनक्लान्ततामेव प्रतिपादयन्नाह, मुहुरिति । वारंवारं श्वासान् विकिरतीति नागतैव सा प्रियेति कृत्वा। "मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समाः" **इत्यमरः**। पुरः आशाः दिशः मुहुरीक्षते इति अधुना वागमिष्यतीति कृत्वा। "आशातृष्णादिशोर्मता" इति। "पुरः पुरतोऽग्रतः" **इत्यमरः**। मुहुः कुञ्जं प्रविशतीति कदाचिदन्येन पथा समागत्य वा तिष्ठतीति कृत्वा। गुञ्जन्मुहुर्बहु ताम्यतीति। बाष्पावृतकण्ठत्वादव्यक्तशब्दं मुहुः कुर्वन् ग्लायतीत्यर्थः। कुञ्जं प्रविश्य त्वामपश्यन् हा कथं गुरुजनादिभयान्नागतेति कृत्वा मुहुः शय्यां रचयति। मयि दृढानारागैव सा केन प्रकारेण गुरुजनान् प्रतार्य साम्प्रतमेष्यतीति कृत्वा। आकुलतया शय्यारचनमपि सम्यक् न भवतीति प्रतिपादनार्थमत्र मुहुःशब्दोपादानम्। पर्याकुलं यथा स्यादेवं मुहुरीक्षत इति चतुर्द्दिशमवलोकत इत्यर्थः। मच्चित्तजिज्ञासार्थं क्वचिदिहागत्य निह्नुत्य वा तिष्ठतीति कृत्वा। हरिणीनाम वृत्तम्।।३२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३२।। तथातिशीघ्रमभिसारयितुं प्रियदुःखमेव वर्णयति विकिरतीति। हे कान्ते! तव प्रियः मदनकदनक्लान्तः सन् वर्त्तते। क्लान्ततामाह, नागतैषा प्रियेति कृत्वा मुहुर्वारंवारं श्वासान् विशेषेणोच्चैः किरतीत्यर्थः। अधुना आगमिष्यति इति कृत्वा अग्रे दिशो मुहुरीक्षते। कदाचित् अन्येन पथागत्य तिष्ठति इति मुहुः कुञ्जं प्रविशति, कुञ्जं प्रविश्य त्वाम् अपश्यन् कथं नागता इति मुहुः अव्यक्तशब्दं कुर्वन् ग्लायति। मयि वद्धदृढ़ानुरागा एवं सा सांप्रतम् एव आगमिष्यति इति मुहुः शय्यां रचयति। मच्चित्तजिज्ञासार्थं कदाचिदितो निर्गत्य तिष्ठति इति पर्य्याकुलं यथा स्यात्तथा मुहुरीक्षते।।३२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३२।। पुनस्तस्य उत्कण्ठातिशयवर्णनेन प्रोत्साहयति; विकिरतीति। हे कान्ते! कमनीयरूपगुणसम्पन्नतया कृष्णोत्कण्ठाविषयभूते! राधे! तव प्रियः निरुपाधित्वात्

प्रणयविषयभूतः श्रीकृष्णः मदनस्य कदनेन पीडनेन क्लान्तः सन्तप्तः सन् वर्त्तते। क्लान्तत्वं विवृणोति विकिरतीत्यादिना। अद्यापि नायाति सा, नागमिष्यति वा इत्यादि चिन्ताकुलो मुहुर्वारं वारं श्वासान् निःश्वाससमीरणान् विकिरति, विशेषेण मुञ्चति। तथा किमागतैव सा विनोदिनी, कुत्रचित् निलीनाऽऽस्ते इति आशां दिक्प्रदेशं पुरोऽग्रे पुनः ईक्षते, पश्यति। तथा कदाचिदन्यपथेन निभृतमागत्य कुञ्जे तिष्ठति वेति कुञ्जं मुहुः प्रविशति। तत्राप्यपश्यन् पुनर्बहिरागच्छति। पुनरन्तर्यातीति वारंम्बारं प्रविशति। तथा गुञ्जन् मुहुर्बहु ताम्यति। अतिकठिना खलु राधा यदीदृशीं दशामापन्नमपि मां मानुकम्पते। तस्याः सखी चानृतभाषिणी, यया वञ्चितोऽहमित्यादि जल्पन् कदाचित् आगच्छन्ती श्रोष्यतीति अव्यक्तं बहुप्रकारं लपन् पुनः पुनः ताम्यति, ग्लानिमाप्नोति। तथा कलहंसकूजितं मञ्जीरशिञ्जितं विभाव्य त्वदागमनधिया शय्यां क्रीडातल्पं मुहुः रचयति। पुनः पुनः सज्जीकरोति। ततस्त्वामदृष्ट्वा पर्याकुलमुदश्रुदृष्टिप्रसरं यथा स्यात्तथा तरुलतादिकं मुहुरीक्षते। अहमशरणोऽस्मीति सकरुणमवलोकते इति भावः।।३२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३२।। विकिरतीति; त्वद्विरहेण प्रतिमूहुर्त्तं श्वसति। तव मार्गं पश्यति। वारम्बारं लतागृहे प्रविश्य पुनः वहिरागत्य बाहुल्येन ग्लानिमनुभूय किमर्थं नागता किमसौविध्यं जातमिति व्यग्रताप्यनुभूयते। रचितां शय्यामुद्विग्नतया वीक्षते। हे राधे! तव प्रियो मदनकामवाधया क्लान्तः शीर्णोऽभवत्। क्षिन्नोऽपि भवति। अतः विलम्बं विहाय शीघ्रं गच्छ।।३२।।

**३३- त्वद्बाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो**
**गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।**
**कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना**
**तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः।।३३।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३३।। त्वदिति। त्वद्वाष्पेण समं समग्रमधुना तिग्मांशुरस्त गत इति। सहोक्तिरलङ्कारः। न केवलं सूर्य्योऽस्तंगतः त्वद्वाष्पमपूययाद्योतकं त्वत्प्रातिकुल्यं चास्तं गतं तव मानभङ्गो जायत इत्यर्थः। गोविन्दस्य मनोरथेन च समं प्राप्तं तपः सान्द्रतामिति न केवलमन्धकारोनैविड्यं प्राप्तः गोविन्दस्य मनोरथोऽपि त्वत्समागम-

प्रत्याशयेत्यर्थः। कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थनेति यथा चक्रवाकानां दीर्घः करुणस्वनो जातः तथा मम प्रार्थना दीर्घेत्यर्थः। तन्मुग्धे विफलं बिलम्बनमसौ रम्योऽभिसारक्षणः इति ''यद्यतस्ततोहेताविवत्यमरः''। प्रियतमः उत्कण्ठतो रम्यश्चाभिसारक्षणः चिरमभ्यर्थनापरा प्रियसखी तथा गमनविलम्बनमिति राधायाः मूढत्वे हेतुः।।३ ३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ३।। इदानीं सांप्रतमेव गन्तुं सांप्रतमिति हेतुमाहं, त्वद्वाम्येनेति। हे मुग्धे ! समग्रं यथा स्यात्तथाधुना त्वद्वाम्येन समं तव वक्रतया सहितं रविरस्तं गतः (रविः) तवाभिमानश्चोभयमेवाभिसारविलम्बकर्तृ गतमित्यर्थः। च पुनर्गोविन्दस्य मनोरथेन सह तमः सान्द्रतां प्राप्तम्। तिग्मांशावस्तं गते चन्द्रे चानुदिते तमः सान्द्रं भवत्येव। अयं कालोऽभिसारत्वरायै। अनु च सान्द्रे तमसि मत्प्रियाऽऽगमिष्यतीति गोविन्दस्य मनोरथो वृद्धिं प्राप्तः। अनु च मम प्रार्थना कोकानां चक्रवाकानां करुणस्वनेन सदृशी दीर्घा जाता। सदृशीति विरहाधिक्यात्करुणनिवेदकस्वरत्वाच्च। तत्तस्मात्कारणाद्विलम्बनं विफलम्, अभिसरणक्षणातिपातो निरर्थकः। असावभिसारक्षणो रम्यो वर्तते। ईदृशी प्रियवादिनी प्रियसखी, सान्द्रान्धतमसं चानुकूलं, नीलनिचोलादि साधनं, प्रियतमस्त्वदेकतानः। एवं सति गमनविलम्बने 'मुग्धे' इति संबोधनमौचितीमावहति। सहोक्तिरलंकारः। शार्दूलविक्रीडितं वृत्तम् ।।३ ३।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ३।। इदीनीं साम्प्रतमेवगन्तुं साम्प्रतमिति हेतुमाह त्वद्वाक्येनेति हे मुग्धे ! मूढे ! त्वद्वाक्ये नासूयामानसहिते न समं सह तमः अन्धकारः सान्द्रातां निबिडतां प्राप्तं तमसि अभिसरणयोग्यमित्यर्थः। दीर्घा मदभ्यर्थना शीघ्रं गम्यतामिति मदीया प्रार्थना कोकानां चक्रवाकानां करुणस्वनेन विरहदयाशब्देन सदृशी यथा कोकानां करुणस्वनप्रकारः श्रूयते तथा मदीयाः काकूक्तयः संप्रतिवायौ भवन्तीत्यर्थः। तस्माद्धेतोर्विलम्बनं विफलं असौ अभिसारक्षणो अभिसारकालो रम्यो गमनयोग्य इत्यर्थः। सहोवितलंकारः शार्दूलविक्रीडितं वृत्तं।।३ ३।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ३।। पुनरपि त्वरयितुमाह; त्वद्बाष्पेति। हे मुग्धे ! असावभिसारक्षणोऽभिसारयोग्यः क्षणो रम्यस्ततो विलम्बनं विफलं निष्फलम्। रम्यत्वहेतुमाह; त्वद्बाष्पेण त्वदीयनेत्रजलेन सह तिग्मांशुः सूर्यः यथा स्यात्सामस्त्येन यथा स्यादेवमस्तं गतः। त्वदीयबाष्पमप्यस्तं

गतं सूर्योऽप्यस्तं गत इत्यर्थः। क्वचित् 'वाक्येन समम्' इति पाठः। तदा त्वदीयवाक्येन त्वदीयवचनेन समं तिग्मांशुरस्तं गतः। मयि गमनाय त्वरयन्त्यामुत्तरमप्रयच्छन्त्यास्ते वाक्यं मुखान्नोपलभ्यत इत्यर्थः। तमस्तिमिरं गोविन्दस्य मनोरथेन समं वाञ्छया सह सान्द्रतां निबिडतां प्राप्तं गतम्। गोविन्दस्य मनोरथोऽन्धकारश्च निबिडो जात इत्यर्थः। कोकानां चक्रवाकानां करुणस्वरेण करुणरसगर्भेण (ध्वनिना) सदृशी दीर्घा विस्तीर्णा मदभ्यर्थना संपन्ना। यथा कोकानां करुणस्वरो नानाप्रकारः श्रूयते, एवं मदीया वागुक्तयोऽपि संप्रति तवाग्रे भवन्तीति भावः। अयं सहोक्तिनामालंकारः। तदुक्तं **दण्डिना** (का. २/३५१), 'सहोक्तिः सहभावेन कथनं गुणकर्मणाम्' इति ।।३३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३३।। इतो विलम्बनं न कार्य्यमित्यत आह। त्वद्वाम्येनेति। हे मुग्धे! कार्य्याकार्य्यविचारशून्ये! यस्मात्कारणात् तव वाम्येन वक्रभावेन समं सहेत्यर्थः ''प्रत्ययोत्तरपदयोश्चेति (७-२-९८) युष्मदस्मदादेशश्च। ''गुणवचनेत्यादिना ष्यङ्'' (५-१-१२४) प्रत्ययः। तीक्ष्णांशुः सूर्य्यः अधुना इदानीं समग्रं सम्पूर्णं यथा भवति तथा अस्तम् अदर्शनभावं गतः। तवाभिसारणानङ्गीकारवक्रभावो गतः तदनुकूलः सूर्य्यास्तसमयोऽपि जातः, इत्यर्थः। किञ्च यस्मात् गोविन्दस्य श्रीकृष्णमनोरथेन भवत्या समं सम्भोगवाञ्छया समं तमोऽन्धकारः सान्द्रतां निविडभावं प्राप्तम्। कृष्णस्य भवत्सम्भोगवाञ्छा उद्बेजका जाता तत्ससूहकारीभूतोऽन्धकारोऽपि उद्बेजो जात इत्यर्थः। अनेन प्रियानुसरणमवश्यकर्त्तव्यमिति सूचितम्। किञ्च यस्मात् कारणात् समाभ्यर्थना कृष्णसमीपं प्रति सर्वथा गन्तव्यमित्यादिर्भवद्विषयप्रियोक्तिपरम्परा। कोकानां ''कोकश्चक्रवाक **इत्यमरः**''। करुणस्वनेन श्रोतृणां करुणरसोत्पादकेन स्वनेन रुतेन सदृशाी समा सती दीर्घा बहुकालव्यापिनी वर्त्तत इतिशेषः। अत्र रसपरकत्वात् करुणशब्दः पुलिङ्गः यथा सर्वरात्रिवियोगिकोकरुताकर्णनेन जनानां मनसि दया जायते, तथा भवद्विषयमत्प्रार्थनावाक्यपरम्पराकर्णनादपि श्रोतृणां करुणा जायते। तव तु केवलं न जातेति मत्प्रार्थना निष्फला स्यादितिभावः। किञ्च यस्मादसौ परिदृश्यमानः अभिसारक्षणः कृष्णं प्रत्यभिसरणसमयः रम्यः सर्वजनसम्मत इत्यर्थः। तस्मात्कारणा-द्विलम्बनं न युक्तमितिभावः।।३३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३३।। अनुनयेन प्रसादमुपलभ्य पुनरपि त्वरयति, हे मुग्धे विवेकशून्ये तस्माद्धेतोः विलम्बनं विफलम् असावभिसारक्षणः। अभिसरणम् अभिसारः, सङ्केतस्थानगमनम्।

तस्य क्षणोऽवसर: रम्यो योग्य इत्यर्थ:। कस्मात्? तद्वाम्येन त्वद्वामतया समं तिग्मांशु: सूर्य: समग्रमस्तं गत:। तदनेनानुनयकृत मानापगमनप्रदर्शनेन राधाया उत्तमनायिकात्वं सूचितम्। तथा चोक्तम्, 'दोषानुरूपकोपाया अनुनीता च तुष्यति। वमते च भृशं कान्ते गुणहार्योत्तमेति सा।।' गोविन्दस्य मनोरथेन समं तम: सान्द्रतां निविडतां प्राप्तम्। तथा च दूतीवचनादिदानीं राधा समागच्छतीति। तथा च कृष्णस्य सम्बन्धो मनोरथ:। तथा च तम:सम्बन्धत्वमित्यनेन गमने त्वराबीजमउक्तम्। कोकानां चक्रवाकानां करुणस्वनेन सदृशी तुल्या दीर्घा महती मदभ्यर्थना तत्र त्वरया गच्छेति मम प्रार्थनेत्यर्थ:। तदनेन कोकस्वनस्मारणरूपमुद्दीपनविभावं दर्शयन्त्या मदीयाम्यर्थना तव न लङ्घनीयेति दर्शितम्। 'कोकश्चक्रश्चक्रवाक' **इत्यमर**:।।३३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३३।। (त्वद्वाक्येनेति।) हे मुग्धे! [८] स्वकार्यविदिनि अधुना सम्प्रति त्वद्वाम्येन समं सार्धं तिग्मांशु: सूर्य: [९]समग्रं सामस्त्येन अस्तङ्गतोऽदर्शनं प्राप्त:।[१०] अथ वा समग्रमधुनाऽखिलमधुसमूहेनेति[११]वाक्येन। किञ्च गोविन्दस्य श्रीकृष्णस्य मनोरथेन श्रीराधा गमिष्यतीति वाञ्छया [१] समं सार्धं तम: अन्धकार: सान्द्रतां स्निग्धतां प्राप्तम्। [२] निबिडान्धकारमनोरथयोस्साम्यमित्यर्थ:। एषा दीर्घा मदभ्यर्थना शीघ्रं गम्यतामिति मदीयप्रार्थना। कीदृशी? कोकानां चक्रवाकानां करुणस्वनेन करुणरसाश्रयविरहकूजितेन सदृशी। यथा चक्रवाकानां करुणस्वनो नानाप्रकार: श्रूयते तथा मदीया [३] उक्तयस्तवाग्रे[४]भवन्तीत्येकान्त-वैदग्ध्यमिति भाव:। तत्ततो विलम्बनं गमनाय विफलं हस्तगतसौख्यप्रतिबन्धकमित्यर्थ:। अतोऽसावभिसारक्षण: अभिसरणसमयो रम्यो गमनाय मनोहरोऽयमिति। सहोक्तिरलङ्कार: [५] यथा:-

सह दीर्घा मम श्वासैरिमा: सन्त्यतिरात्रय: इति **दण्डी** ।।३३।।

१.त्वद्वाष्पेण-इ. २.क्वासीति-ड. ३.नास्ति-क. ४.त: ५.पर्यन्तं नास्ति-ड. ६.त: ७.पर्यन्तं नास्ति-ड.ल.म. ८.स्वकार्यार्थविदिति-फ.ह.ज. ९.नास्ति-अ.ब. १०.यद्वा-ग. ११.त्वद्वाक्येन-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३३।। त्वद्वाम्येनेति। हे[७]मूढे मुग्धे! त्वद्वाम्येन असूयामानसहितेन[८] समं[९] सह समग्रं सामस्त्येनाधुना इदानीं तिग्मांशु: सूर्योऽस्तङ्गत:। असूयामानसहितस्सूर्योऽस्तं [१०] प्राप्तोऽभिसारकालोऽयमित्यर्थ:। गोविन्दस्य कृष्णस्य मनोरथेनेदानीं राधा आगमिष्यतीति [११]बुद्धयात्या समं सह तमोऽन्धकारस्सान्द्रतां निबिडत्वं प्राप्तम्। तमस्यभिचरणं योग्यमित्यर्थ:। दीर्घा मदभ्यर्थना शीघ्रं गम्यतामिति मदीया प्रार्थना

कोकानां चक्रवाकानां करुणस्वनेन विरहदयाशब्देन सदृशी। यथा कोकानां करुणस्वनो नानाप्रकार: श्रूयते तथा मदीया: काकूक्तय: सम्प्रति तवाग्रे भवन्तीत्यर्थ:। तत्तस्माद्धेतोविलम्बनं [१२]विफलम्। असौ अभिसारलक्षणोऽभिसरणकालो रम्यो गमनयोग्य इत्यर्थ:।।३३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३३।। (त्वद्बाष्पेति।) त्वत् तव बाष्पेण अश्रुणा समं सह अधुना इदानीं तिग्मांशु: भानु: अस्तं गत:। न दृश्यत इत्यर्थ:। सहार्थेन बाष्पमपि अत्यन्त अस्त गतं तव अद्यापि करुणा नोदेतीति भाव:। यद्वा तव बाष्पेण ऊष्मणा दाहे(ने) त्यर्थ:। गोविन्दस्य मनोरथेन त्वदालिङ्गनकामेन समं तम: सान्द्रतां प्राप्तम्। गोविन्दमनोरथ इव निबिडोऽन्धकार इति भाव:। कोकानां चक्रवाकपक्षिणां करुणस्वनेन दैन्यध्वनिना सदृशी दीर्घा पूर्वकृता मदभ्यर्थना मत्कृतप्रार्थना दीर्घा जातेति शेष:। सहसत पाठे तृतीययैव सहार्थता। तस्मात्कारणात् हे मुग्धे स्वहितानभिज्ञे विलम्बनं झडित्यनिर्गमनं विफलं व्यर्थम्। असौ अभिसारक्षण: प्रियनिकट (गमन) काल: सूक्ष्मत्वात्क्षण:। क्षणान्तरे नैतावत्सुक (र) मित्यर्थ:। अत्र सहोक्त्यलङ्कारत्रयम्। निरपेक्षत्वात्त्रयाणां संसृष्टि:।।३३।।

१.समर्थित:-अ.ब. २.निबिडान्धकाराभिसरणं योग्यमित्यर्थ:-इ.फ.ग.ह.ज. ३.यउक्तय:-ग.फ.ह.ज. ४.भवन्तीत्यवैदग्ध्यमिति-इ.ग.ह.ज.फ. ५.त:, ६.पर्यन्त नास्ति-अ.ब. ७.मुग्धे मूढे-क. ८.नास्ति-क.ल.म. ९.नास्ति-ल.म. १०.गत: अभिसरणं-क.ल.म. ११.वाञ्छाया-क.ल.म. १२.विफलमिति जानीहि-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३३।। त्वद्वाम्येनेत्यादि। त्वद्वाम्येन तव कृष्णं प्रति वाम्येन वक्रभावेन प्रातिकूल्येनेति यावत्। समं तीग्मांशु: सूर्य: अधुना समग्रं सम्पूर्णम् एवास्तं गत: एतद् युक्तं भवति। कृष्णं प्रति तवानुपस्थितिरेव वाम्यम्। अभिसारसमयश्च रात्रिरेव। साम्प्रतं सूर्यस्त्वद्वाम्यं च सममेवास्तं गतम्। त्वद्वाम्यस्यास्तं गमने तीग्मांशोरस्तं गमनमेव हेतु:। तथा गोविन्दस्य मनोरथेन समं तम: सान्द्रतां प्राप्तं च। यथाऽन्धकारो नैबिड्यं प्राप्त: गोविन्दस्य मनरथोऽपि त्वत्समागमप्रत्याशया तथेत्यर्थ:। गोविन्दस्य मनोरथनैबिड्ये अन्धकारनैबिड्यं हेतु:। तथा कोकानां करुणस्वनेन कारुण्ययुक्तेन रुतेन सदृशी तुल्या मदभ्यर्थना मम प्रार्थना दीर्घा। यथा कोकानां करुणस्वन: सम्प्रति वर्द्धते तथा ममापि त्वदभ्यर्थनेति भाव:। अत्रापि हेतुहेतुमद्भावो गवेषणीय:। तथाहि, कोकानां करुणरुतस्याभिवृद्धिर्मदभ्यर्थना दैर्घ्ये हेतु:। तस्मादमी विरहिणश्चक्रवाका:

प्रियाविरहेण यथा स्वनं कुर्वन्तितराम् एवं कृष्णोऽपि करिष्यतीति बुद्ध्वा त्वामहं सुतरामभ्यर्थये। असौ अभिसारक्षणः अभिसारसमयो रम्यः रमणीयः तत्तस्माद्धेतोः हे मुग्धे! मूढे! तव विलम्बनं विफलं कार्यसिद्धिरहितम्। कालक्षेपो निरर्थक इत्यर्थः। "फललोभे कार्यसिद्धौ वृक्षादिप्रसवे फलम्" **इत्युत्पलिनी**। "यत्तद्यतस्ततो हेतौ" **इत्यमरः**। तस्या वाम्यां चरणसूर्यावस्थितिश्च उभयमपि अभिसरणविलम्बहेतु तन्निर्गतं तमसोऽपि नैबिड्यजातम्। प्रियतम उत्कण्ठितः, अभिसारसमयश्च रम्यः; तस्माच्छीघ्रं याहि याहीति चिरमभ्यर्थनापरा प्रियसखी, तथापि गमनविलम्बनम् इति राधायाः मूढत्वे हेतुः। अत्र सहोक्तिनामालङ्कारः कथितः। "सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इति **काव्यप्रकाशः**।।३३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३३।। ततः संप्रत्येव गमनं सांप्रतमिति समयानुकुल्यामाह त्वदिति। तव वक्रयोः सह अधुना सूर्य्यः समग्रमस्तं गतः, गोविन्दस्य मनोरथेन अविच्छिन्नस्मर्य्यमाणतया धैर्य्योन्मूलकाभिलाषेण च सह तमोऽन्धकारं निविड़तां प्राप्तं, चक्रवाकानां करुणस्वनेन तुल्या मदभ्यर्थना युवयोर्दशां विलोक्य प्राप्तदैन्यं दीर्घा जाता । तत्तस्मात् हे मुग्धे! विचारानभिज्ञे! विलम्बनं विफलम्। यतोऽसौ क्षणोऽभिसारे रम्यः। प्रियतमः उत्कण्ठितो रम्यश्चाभिसारक्षणश्चिरमभ्यर्थनपरा सखी तथापि वेशादिव्याजेन गमनविलम्बनमिति अहो मौग्ध्यम्।।३३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३३।। एवं स्वजीवितनाथस्य उत्कण्ठातिशयश्रवणोच्छलितप्रेमाधिनिमग्नचित्तायाः स्वसख्या राधाया वेशादिविलम्बमप्यसहमाना गमनसमयानुकूल्यमाह, त्वद् वाम्येनेति। हे मुग्धे! यस्मादधुनाऽसौ सकलकारणसमवेतोऽभिसारस्य क्षणः समयः, अभिसारोत्सवः इति वा कारणसम्पन्नत्वात्। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' **इत्यमरः**। रम्यो रमणीयः स्पृहणीय इत्यर्थः। तत्तस्माद् विलम्बनं केशप्रसाधनाङ्गमार्जनादिना विलम्बकरणं विफलं, फलविघातकमित्यर्थः। अभिसारक्षणस्य रम्यत्वे कारणान्याह, त्वद् वाम्येनेत्यादिना। अकारणरोषवशीकृतचित्तायास्तव वाम्येन समं, प्रियान्तिकगमन-विरोधितयाऽतिदारुणेन वक्रत्वेन सार्धं तथा गमनविघ्नकारितया अतिक्रूरकर्मा तिग्मांशुः सूर्यः समग्रं साकल्येन अस्तं गतः। अदर्शनं प्राप्तः। सधर्मणोरनयोः सहनिर्गमनमुचितमिति भावः। प्रायशस्तरुणीनां रात्रौ कोपशैथिल्यं, तत्रानङ्गस्योदयात्। उक्तं च,

परिपतति पयोनिधौ पतङ्गः, सरसिरुहामुदरेषु मत्तभृङ्गः।
उपवनतरुकोटरे विहङ्गो युवतिजनेषु शनैः शनैरनङ्गः।।इति।।

तथा गोविन्दस्य, वशीकृतत्वत्सकलेन्द्रियवृत्तेः श्रीकृष्णस्य मनोरथेन, मयि गाढानुरागिणी सा अवश्यमेवागमिष्यति, आश्लेषचुम्बनादिना मद्विरहक्लेशमपनेष्यतीत्यादिवाञ्छया च समं तमः अन्धकारः सान्द्रतां त्वदभिसरणयोग्यनिविडत्वं प्राप्तम्। तथा च दीर्घा बहुकालव्यापिनी मदभ्यर्थना तामवश्यमानयामीति कृतप्रतिज्ञाया मम 'चल सखि! कुञ्जमिति पूरय मधुरिपुकाम्' इत्यादिना प्रार्थना। कोकानां रात्रिविरहिचक्रवाकाख्यपक्षिणां करुणस्वनेन दैन्यसूचकाव्यक्तशब्देन सदृशी यातेति शेषः। निष्फले खलु ममोद्यमे इतः परं युवयोः कां दशां द्रक्ष्यामि मन्दभाग्येति दैन्यव्यञ्जिका ।कथमसौ मद्वचनं न गृह्णातीति शोकगद्गदिका निरुद्धकण्ठतया अव्यक्तशब्दाच्चेति भावः।।३३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३३।। त्वद्वाम्येनेति; त्वद्वाम्येन वैपरीत्येन श्रीकृष्णविरोधेन कुण्ठितव्यवहारेण मुधा अयथार्थतया विलम्बो जातः। फलतः सूर्यः अस्ताचलमवाप। गोविन्दस्य मनसि त्वन्मिलनवाञ्छा गाढतरा रात्र्याः सान्द्रतया वर्द्धते कोकपक्षिणां चकोराणां रात्र्यागमजन्यविरहातुरकारुण्यमपि मां पुनःपौन्येन दुःखीकरोति। हे मुग्धे! हे अनभिज्ञे! कथं चिरयसि। रमणीयोऽभिसारस्य क्षणं आगतः।अतः त्वरया आगछ।।३३।।

**३४-आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-**
**प्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः।**
**अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्**
**दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः।।३४।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३४।। सम्प्रति अभिसारिकागमनोचितम् अन्धकारं बर्णयन्नाह। आश्लेषादिति। इह तमसि दम्पत्योर्व्रीड़ाविमिश्रस्तु या, सम्बलितो रसः श्रृङ्गाररूपः केनाभूत् को नामोऽभूदिति तु सर्वत एवाभूदित्यर्थः। एतेनाभिसरन्तुं राधिकायाः प्रोत्साहनमुक्तम्। कीदृश्योः दम्पत्योः। अन्यार्थं गतयोः परस्त्री परपुरुषार्थं गतयोरित्यर्थः। उक्तं **श्रृङ्गारतिलके,**

परस्त्री गमनोपाय: कविभिर्नोपदिश्यते।

सुन्दरं किन्तु दिव्याङ्गनैतत्तेनो- पदिश्यते।।

पुन: कीदृशो: भ्रमेण भ्रान्त्या मिलितयो:, पुन: कीदृशो: आश्लेषादिना प्रीतयो: स्वान्तजप्रोद्बोधादिति कामप्रकाशनादित्यर्थ:। सुप्त: खलु काम: अश्लेषादिना प्रबोधितक्षणमपि बिलम्बं न ददतीति रतारम्भे सम्भ्रम:। रतारम्भादन्विति रतारम्भस्य पश्चात्प्रवृत्ते रते इत्यर्थ:। ''अनु हीने सहार्थे च पश्चात्सादृश्ययोरपीति विश्व:।'' कथं क्रीडाविमिश्रतारसस्येत्याह। सम्भाषणैर्जानतोरिति ननु चाज्ञानं यातत्प्रीतिरुपयुक्ता ज्ञानादनन्तरं तु अपुरुषस्य स्त्रीजारपतौ स्त्रियाश्च पुरुषाद्यङ्गनारतौ द्वेष्यात्सजागरुकत्वात्। उच्यते समदोषत्वाद्वेषाभाव:। केचिदन्यार्थमन्दकार्य्यर्थैति व्याचक्षु:। तदसम्यक् रसस्य ब्रीडाविमिश्रतानुपपत्ते:।।३४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३४।। तत्रागतायास्ते बहुविधकामकौतुकं भविष्यतीति प्रलोभयति; आश्लेषादिति। इह तमसि वर्तमाने दम्पत्योर्व्रीडाविमिश्र: क: को रसो न इति न, अपि तु सर्व एव रसो भवतीति। व्रीडाविमिश्रत्वे हि सर्वमपि सर्वरसागमं भवतीति। किंभूतयोर्दम्पत्यो: ? अन्यार्थं गतयो: परस्त्रीपरपुरुषत्वेन प्राप्तयो:। पुन: किंभूतयो: ? भ्रमान्मिलितयो: प्रतिकुञ्जमितस्तत: परिभ्रमणान्मिलितयो:। सान्द्रे तमसि परस्परालापैरेव जानतो:। अथवा; आलापैरित्यत्र सात्विकभावेन स्वरभङ्गादेवावगमात्। अथवा; अन्यमर्थं प्रयोजनमुद्दिश्य गतयो:। परस्त्रीपरपुरुषौ हि व्याजान्तरेणैव मिलत:। अन्येषां भ्रान्तिमुत्पाद्य मिलितयो:। तमेव रसमाह; आश्लेषादनु भयस्थायिभावो भयानक: प्रादुर्भावमासादयति। चुम्बनादनु मा मेति क्षामाक्षरोल्लापिनीं कान्तां कामलप्य कृतं हठवृत्त्येति शोकमिवानुभवन्करुणाकलितान्त:करणो भवति। तदनु प्रोत्साहनार्थ-मुत्साहात्मा नखोल्लेखादनु वीरोऽवतरति। एवं साधने संमिलिते किमिदमपूर्वं सुखमन्वभवमिति भावान्तरं गमितयोर्विस्मयसहचरोऽद्भुत उद्भटतामाटीकते। एवं च कोमोद्बोधे नानाविलासविलसितादनु हाससहावस्थानो हास्य: समुल्लसति। एवं कृतपरिकरसंकर: सकलरसचक्रवर्ती आनन्दमधुसन्दोहमधुरो रतिसहचर: शृङ्गाररस: समुन्मिषति। तव्द्यतिकरादनु प्रीतयोरुक्तरस: सर्वोऽपि व्रीडासंवलित: शृङ्गारत्वे समुन्मिषति। अत्राश्लेषानन्तरं चुम्बनं, ततो नखक्षतं, तत: कामविकारा:, ततो मैथुनं, तत: प्रीति:, ततो रसभावनेति क्रमोऽपि कामशास्त्रकथित:। तदुक्तं **भरतेन** 'आश्लेषचुम्बननखक्षतका मबोधशीघ्रत्वमैथुनमनन्तसुखप्रबोधम्। प्रीतिस्ततोऽपि

रसभावनमेव कार्यमेवं नितान्तचतुराः सुचिरं रमन्ते।।' शार्दूलविक्रीडितं छन्दः। दीपकमलंकारः समुच्चयो भ्रान्तिमांश्च।।३४।।

## (३) जगद्धरकृत- सारदीपिका

।।३४।। अभिसारे रसाधिक्यं भवतीत्याह आश्लेषादिति दम्पत्योर्जायापत्योस्तमसि अन्धकारे व्रीडाविमिश्रो लज्जायुक्तः कः कः रसो न भवेत् इति न अपितु सव्रीडः सर्व एव श्रृंगारादिः रसो भवत्येव कथम्भूतयोर्दम्पत्योः अन्यार्थे परस्त्रीपरपुरुषार्थे गतयोः सङ्केतस्थानं प्राप्तयोः पुनः कीदृशयोः भ्रमद्भ्रान्तः गाढान्धकारे रसान्मिलितयोः सङ्गतयोः अनन्तरम् आश्लेषादिविशेषणानि योजनीयानि तत्र एवं सम्भोगक्रमः प्रथमम् आलिङ्गन तत श्चुम्बनं ततो नखक्षतं ततः कामोद्बोधः ततः सत्वरः ततो मैथुनं ततः प्रीतिस्ततो भावनामिति क्रममाह आश्लेषादालिङ्गनादनुपश्चान्नखोल्लेखादनु नखक्षतात् पश्चाद्रतारम्भानु सुरतोद्योगात् पश्चात्प्रीतयोः पुनः कीदृशयो सम्भाषणैरालापैर्जानतोः न ममेयं भार्या नायं मम पतिरिति ।।३४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३४।। पुनरप्यन्धकारस्य नैबिड्यकथनेनाभिसारक्षणस्यातिरम्यतामेवाह, आश्लेषादिति। इह तमसि दम्पत्योर्जायापत्योः को न व्रीडाविमिश्रो लज्जासमन्वितो रस आविर्भवतीत्यर्थः। कीदृशोर्दम्पत्योः ? अन्यार्थं गतयोरन्यां नायिकामन्यनायकं चोद्दिश्य गतयोः। पुनः कीदृशोः ? आश्लेषादनु आलिङ्गनात्पश्चाच्चुम्बनं, तदनु यो नखोल्लेखः, तदनु यः संभ्रमः संभोगादरः कामोद्वेगः, तदनु यो रतारम्भः सुरतारम्भः, तदनु प्रीतयोर्लब्धानन्दयोः संभाषणैर्जानतोरन्यनायिकानामग्राहिपत्युरन्यनायकनामग्राहि-पत्न्याश्चालापैः कथं पतिः कथमियं मे पत्नीति स्वरविशेषेण जानतोरित्यर्थः। रतान्ते परस्परं ज्ञातेऽपि न तुल्यापराधात्परस्परदोषोद्भावनम्। किंतु लज्जासहितः शृङ्गाररस एवाविर्भवतीत्यर्थः। अथ प्रथममाश्लेषः, ततश्चुम्बनं, ततो नखक्षतं, ततः कामोद्रेकः, तत : संभ्रमः, ततो रतान्तः, ततः प्रीतिः, ततो रसभावनमिति कामशास्त्रसिद्धः क्रमोऽपि कथितः। तदुक्तं **भरतीये**; 'आश्लेषचुम्बननखक्षतकामबोधशीघ्रत्वमैथुनमनन्तसुख-प्रबोधम्। प्रीतिस्ततोऽपि रसभावनमेव कार्यमेवं नितान्तचतुराः सुचिरं रमन्ते' इति। नन्वष्टधा सुरतरतमप्युक्तं कामशास्त्रे, तत्र च दन्तक्षतकूजितकेशग्रहणादिकमप्युक्तम्। तथा च कामशास्त्रोक्तक्रमरक्षा नेति न वाच्यम्। तस्य निःशङ्ककेलिक्रमाधायकत्वात्; इह तु परपुरुषं परनारीं चोद्दिश्य गतयोः शङ्काकुलचित्तत्वात्संक्षिप्तपूर्वोक्तक्रमेणैव सुरतारम्भ उचित इति भावः। तथाह **रुद्रः** (शृं.ति. १/६९), 'ईर्ष्या कुलस्त्रीषु न

नायकस्य निःशङ्ककेलिर्न पराङ्गनासु' इति। तस्मादेतादृशे गाढान्धकारे ते गमनविलम्बनमनुचितमिति भावः। 'दम्पती जम्पती जायापती भार्यापती च तौ' **इत्यमरः**।।३४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३४।। पुनरपि तमेव वर्णयति। अश्लेषादिति। हे राधे! इह तमसि प्रतीयमाने अन्धकारे अन्यार्थं प्रत्येककार्य्यान्तरार्थं वा गतयोः भ्रमात् अन्धकारजनित निजप्रयोजनादिसङ्केतमार्गापरिज्ञानरूपभ्रान्तेः।

मिलितयोः परस्परसंश्लिष्टगात्रयोः अतएव आश्लेषात् सम्बन्धनिमित्तालिङ्गनात् अनन्तरं चुम्बनादालिङ्गनान्तरभावाधरास्वादनात्। अनन्तरं नखोल्लेखात् अधरस्वादनान्तरभाविप्रेक्षत्करणात्। अनु पश्चात् स्वान्तजस्य कामस्य कान्तरतारम्भात्। उद्बोधानन्तरभाविसुरतकरणात्। अनु अनन्तरं प्रीतयोः कथमयत्नसिद्धः सम्भोगो जात इति परितुष्टचित्तयोरित्यर्थः। अनु अनन्तरं सम्भाषणैः सुरतानुकूलमधुरालापैः जानतोः परस्पररवमवबुद्धय जायमानपरिचययोः अनेनान्धकारस्य गाढ़त्वं सूचितम्। उक्तं च,

विश्वं चाक्षुषमस्तु वस्तु हि तमः कैवल्य मौपाधिकं
प्राच्यादिव्यवहारहेतुविरहाद्दिङ्मात्रमेव स्थितम्।
लिह्यन्तोभयहेतवः पटुभिरपेक्षोभरैर्भाति च
ध्वान्तानापघनेन वस्तु वसुना ज्ञातः स्वरेणा मूकः।।इति।।

एतादृशोर्दम्पत्योर्जायापत्योः जायायाजम्भावोदम्भावो वेति दम्भावः। क्रीड़ाविमिश्रः इति क्वचित् पाठः। तदा लज्जासम्बलितः, अस्मिन् पक्षे मुख्यदम्पत्वोरनुचितकार्य्याचरणाल्लज्जाया युक्तत्वादितिभावः। कोड कोनुकः कः रसः श्रृङ्गारादिर्नभवतीति शेषः। सर्वोऽपि भवत्येवेत्यर्थः।

अत सम्भवतो रसस्य लोकोत्तरतासूचनार्थं कः क इत्युक्तमिति ज्ञेयम्। तथा च एतादृशरसानुभवार्थमपि अस्मिन्नेव समये त्वयावश्यं यातव्यमिति तात्पर्य्यम्। पदार्थहेतुकं काव्यलिङ्गमलङ्कारः।।३४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३४।। पुनरप्यभिसारानुरूपान्धकारवर्णनमभिसारोत्कण्ठामुत्पादयति। इह समये तमसि दम्पत्योः जायापत्योः को न को न रसो व्रीडाविमिश्रोऽपितु सर्व एव रसो लज्जासहितो भवतीत्यर्थः। दम्पत्योः कथम्भूतयोः ? अन्यार्थं परस्त्रीपुरुषार्थं गतयोः। भ्रमात् भ्रान्ते र्मिलितयोः। ततः कथम्भूतयोः ? आश्लेषादाङ्गिनादनु पश्चात्, चुम्बनादनु

तत: पश्चात्, नखोल्लेखादनु तन: पश्चात्, स्वान्तजप्रोदबाधात् कामोद्रेगादनु तन: पश्चात्, सम्भ्रमात् त्वराविशेषाद् अनु पश्चात्, रतारम्भात् सुरतारम्भात् प्रीतयो: तुष्टयो:। पुन: किम्भुतयो: ? तदनन्तरं त्वराविरामात् सम्भाषणै: प्रत्येकालापै: जानतो: ममेयं जाया ममायं पतिरित्येवगच्छतो:। अत्र यद्यपि आलिङ्गनोऽपि प्रत्त्येकप्रत्येकानन्तरमपि प्रीतिरुत्पद्यत एवेत्याश्लेषादनुप्रीतयोरित्येबंक्रमेण व्याख्यातुमुचितं तथाप्येवंक्रमेण या प्रीतिरुत्पद्यते सा परमा प्रीतिरिति सैवात्र विवक्षितेत्यवधैयम्।तथा च कामशाश्त्रे, 'आश्लेषचुम्बननखतकामबोधशोघ्रत्व मैथुनमनन्तसुखप्रबोधम्। प्रीतिस्ततो विवशभावनमेव कार्यमेवं नितान्तचतुरा: सुचिरं रमन्ती'ति। अतएव प्रकृते प्रथमोत्पन्नालिङ्गनादिजनिता एव रसाभाव्यमानलज्जया विमिश्रीभूता भवन्तीति वर्णितम्। न तु परिचयेजाते लज्जाया: तिरोधानात् रसा: प्रवृत्ता इत्यवधेयम्। एतस्मिन् काले सर्व एवाभिवसन्तीति तवापी दानीमभिसारोऽतिसमुचति इति दर्शितम्।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३४।। अभिसार [२]रम्यत्वमेवाह, (आश्लेषादिति)। इह निबिडे तमसि दम्पत्यो [३] र्जायापत्योर्व्रीडाविमिश्रो लज्जासमन्वित: [४] को न रस: [५] शृङ्गाररसैरभिसाररम्यतां प्रथयति ? अपि तु सर्वोऽपि रसो भवत्येव। कीदृशयो: ? अन्यार्थं सुरतमुद्दिश्य व्याजेन सुरतं प्रति गतयो:। कीदृशयो: ? भ्रमात् भ्रमत: परिभ्रमणतो वा सान्द्रे तमसि मिलितयो: सङ्गतयो:। परस्परालापै: स्वरभङ्गाद्यालापैर्वा सुरताभिप्रायं जानतो:। [६]कीदृशयो: ? आलिङ्गनचुम्बननखक्षतकामाद्बोधककामोद्रेकसुरतारम्भै: क्रमादेतैरनु पश्चात् प्रीतयोर्लब्धानन्दयोस्तृप्तयोरित्यर्थ:। आश्लेषादिक्रमं विनैव प्रीतयोरिति वा।।३४।।

१.नु-इ. २.रसत्वमेवाह-अ.ब.रम्यत्वमेव सख्याह-इ.फ.ग.ह.ज. ३.नास्ति-अ.ब.ग. ४.कोन को न रस:-फ.ग.ह.ज. ५.शृङ्गाररसोऽभिसाररम्यतां-इ.फ.ग.ह.ज. ६.नास्ति-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३४।। अभिसारे रसाधिक्यं भवतीत्याह, आश्लेषादिति। दम्पत्योर्जायापत्योस्तमसि अन्धकारे [१] क: व्रीडामिश्रो लज्जायुक्त: [२] रसो न भवेत्। अपि तु सव्रीडस्सर्व एव [३] शृङ्गाररसो भवत्येव। कथम्भूतयोर्दम्पत्यो: ? अन्यार्थं परस्त्रीपुरुषार्थं गतयो: सङ्केतस्थानं प्राप्तयो:।[४] पुन: [५] कीदृशयो: ? भ्रमात् भ्रान्त्या गाढान्धकारे रसात् मिलितयो: [६]सङ्गतयो:। अनन्तरं आश्लेषादिति विशेषणानि योजनीयानि। तत्रैव सम्भोगक्रम:, प्रथमालिङ्गनं ततश्चुम्बनं ततो नखक्षतं तत: [७] कामोद्बोधस्ततस्सम्भ्रमस्ततस्त्वरा ततो मैथुनं तत: प्रीतिस्ततो भावनमिति।[८] तं क्रममाह, अश्लेषादिति।

पुनः कीदृशयोः ? आश्लेषादालिङ्गनादनु पश्चात् चुम्बनादनु पश्चान्नखोल्लेखादनु नखक्षतात्पश्चात्स्वान्तजप्रोद्बोधादनुकामबोधात्पश्चात्सम्भ्रमादनु वेगात्पश्चाद्रतारम्भादनु सुरतोद्योगात्पश्चात्प्रीतयोस्तृप्तयोः। पुनः कीदृशयोः ? सम्भोषणै रालापै र्जानतो [९] र्ममेयं चेति ।।३४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३४।। एवं गूढतयागतं चेद्विनोदः स्यादिति प्रलोभयतिआश्लेषादित्यादिना। आदावाश्लेषः तस्मादनन्तरं अनु चुम्बनम्। तस्मादनु पश्चात् नखैः उल्लेखः। तल्लक्षणं रतिरहस्ये द्रष्टव्यम्। तस्मादनु सम्भ्रमः सन्तोषविशेषः। इतरविस्मारकत्वाद्भ्रमः। तस्मादनु रतारम्भः सुरतस्योपक्रमः। तस्मादनु प्रीतयोः सुरतजनित [१०] परस्परानुरागयुक्तयोः, अन्यार्थं गतयोः रमणमुद्दिश्य यातयोः, भ्रमात् मार्गच्युतेः मिलितयोः सङ्घटितयोः सम्भाषणैः त्वं कः, इति प्रश्नपूर्वकवाक्यैः जानतोः सा त्वं इति प्रत्यभिज्ञातयोः दम्पत्योः स्त्रीपुंसोः इह वने तमसि व्रीडाविमिश्र : लज्जया मिलितः कः को नु रसः हास्याद्भुतादिर्न भवेत्। अनेकरसो भवतीत्यर्थः। अत्र एवम्प्रकारंगमनार्थवस्तुना कुञ्जे एव न गन्तव्यं, तस्मिन्वने किञ्चिदुद्देशेन गमने तमसि तत्सङ्गो भविष्यतीति वस्तु व्यज्यते इति वस्तुना वस्तुध्वनिः। अत्र प्रियमभिसारयति स्वयं वाऽभिसरति साऽभिसारिका इति लक्षणादभिसारिका नायिका ।।३४।।

१.नास्ति-क.ल.म. २.रसःकः-क. ३.शृङ्गारादि-क.ल.म. ४,५.नास्ति-ल.म. ६.नास्ति-क. ७.कामोठ्ठोधः-ततस्त्वरा-ड.कामोद्बोधस्ततो मैथुनं-ल.म. ८.तत्क्रममाह-ल.म. ९.ममायमिति-क.ममेयमिति-ल.म. १०.परस्परानुरक्तयोः इ.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३४।। इदानीमभिसारिकागमनसमुचितमन्धकारं वर्णयन्नाह, आश्लेषादिति। इह बृन्दावने तमसि निशि दम्पत्योर्जायापत्योः, नु प्रश्ने वितर्के वा कः को रसो न व्रीडाविमिश्रः अपितु सर्व एव रसो लज्जाविमिश्रिततया निर्वचनीयो जातः। रसोऽत्र रागः, परस्परप्रीतिलक्षणः। किंविधयोः ? अन्यार्थं गतयोरिति। परस्त्रीपरपुरुषार्थं गतयोरित्यर्थः। पुनः किंविधयोः ? भ्रमान्मिलितयोरिति। भ्रमादन्धकारे भ्रान्त्या मिलितयोः। पुनः किंविधयोः ? सम्भाषणैर्जानतोरिति। परस्परस्य भाषणैः स्वपतिस्वस्त्रीत्वेन जानतोः। एतावता कथमनयोः व्रीडा भवत्यत आह, आश्लेषादित्यादि। मेलने सति आश्लेषादनु आलिङ्गनात् पश्चात् प्रीतयोः तथा चुम्बनात् पश्चात् प्रीतयोरिति सर्वत्रान्वयः। एतेन कः क इति वीप्साप्युपपद्यते। स्वान्तज-

प्रोद्बोधादिति। स्वान्तजो मनोजः कामस्तस्य प्रोद्बोधात् प्रकाशनादित्यर्थः। सुप्तः खलु कामः आलिङ्गनादिना प्रबुध्यते। क्षणमपि विलम्बं न ददातीति रतारम्भाय संभ्रम.....पश्चात् प्रवृत्ते रते इत्यर्थः। आश्लेषादितः सुरतपर्यन्तं परिचयाभावो दर्शितः। तथाह्याश्लेषादनु प्रीतयोरिति सम्बन्धद्वयादालिङ्गनान्तरमेव कश्चिद्रसः परस्परानुराग-लक्षणस्तयोः प्रतिपादितो भवति। एवं चुम्वनादनु प्रीतयोरेव नानाविधाः सम्भूताः रसास्तत्र को रसः न व्रीडाविमिश्रः सम्भाषणैरन्योन्यप्रत्यभिज्ञानादपि तु सर्व एव रस आलिङ्गनादिसमनन्तरभावी स्मर्यमाणो लज्जया विमिश्रितः अज्ञानं यावत्तावत् प्रीतिरुपयुक्ता। ज्ञानानन्तरं तु द्वेषे जाते सति सा अयुक्ता। पुरुषस्य स्त्री जारपतौ स्त्रियाश्च पुरुषान्याङ्गनारतौ द्वेषस्य जागरूकत्वात् उच्यते समदोषत्वात्, द्वेषाभावेन रसस्य लज्जाविमिश्रितत्वम्। एतेन तमसो निबिडता महती प्रतिपादिता। ततश्च निःशङ्कमभिसर्तुं राधायाः प्रोत्साहने तात्पर्यम्। अन्यथा दम्पत्योरन्यार्थं गमनकथनमनुचितं स्यात्। ननु जायायाः अभिसारकथनमनुचितम्। यदस्यां स्वयं जायत इति जायापदव्युत्पत्तेः। तथा च महाभारते, ''जायायास्तद्विजयात्वं नीयात्[त्या] यदस्या जायते पतिः'' इति। अनौचित्यकथने रसभङ्गो जायते। तदउक्तं महिमाचार्येण, ''अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्'' इति। तस्मादस्मिन् समये सर्व एव भ्रान्ता भवन्तीत्यन्धकारनिबिडाताप्रतिपादनेन निःशङ्काभिसरणे तात्पर्यमिति मन्तव्यम्। सम्वृतिबहिर्भूतयोर्दम्पत्योर्वर्णनमिति न दोषः। ''अनु हीने सहार्थे च पश्चात्सादृश्ययोरनु'' **इत्यमरः**। केचित्तु अन्यार्थम् अन्यकार्यार्थम् इति व्याचख्युः। तदसम्यक्। रसस्य व्रीडाविमिश्रितानुपपत्तेः।।३४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३४।। अथोत्कण्ठावर्द्धनार्थं तन्मनोरथमेव विवृत्याह, आश्लेषादिति। इह तमसि दंपत्यो आवयोः व्रीड़या कथं सहसा एवं कर्त्तुम् आरब्धम् इत्येवंभूतया लज्जया मिश्रितो रसः शृङ्गाररूपः को न को न अभूदपि तु सर्वतैवाभूदित्यर्थः। पूर्वकालीने मेघैर्मेदुरम् इत्याद्युक्तगामान्धकारे यथाभूंत तथा इव गोविन्दस्य मनोरथकथनेन अभिसर्त्तुं श्रीराधिकाप्रोत्साहनमुक्तम्। पूर्वकालीनानुभवमेवाह। कीदृशोरन्यार्थं अन्योन्य प्राप्त्यार्त्तिभरेण अवस्थाविशेषविधानार्थं गतयोः। कीदृशोः ? पुनः भ्रमद्भ्रमणं विधाय मिलितयोः, तर्हि कथं ब्रीड़ाविमिश्रितस्य रसस्य सम्भाषणैर्जानतोः, ततः प्रथमाश्लेषात्तदनु चुम्बनात्तदनु नखोल्लेखात्तदनु कामस्य प्रकाशनात्तदनु संभ्रमात् तत्कालोचितवेगात्तदनु रतारम्भात्तदनु प्रीतयोः तस्मादीदृशोत्कण्ठिते तस्मिन् तव गमनविलम्बो न युक्त इत्यभिप्रायः, पूर्वानुभूतस्फूर्त्यासौ मनोरथः।।३४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३४।। कोपनायाः स्वयमभिसरणं लघुतापादकमिति शङ्कामन्थरितामालक्ष्य उपायकुशला सखी चिरविरहोत्कण्ठयोर्निजनिजगौरवं संरक्षतोः अभिसरतोः कामिनोर्वृत्तान्तकथनव्यपदेशेन गमनमुपदिशति, आश्लेषादिति। हे सखि! इहाभिसारानुरूपे निविडतरे तमसि अन्धकारे अन्यार्थं गतयोः परस्परविरहा सहमानतया निजनिजदूतिकान्वेषणार्थं पर्यटतोर्भ्रमान्मिलितयोर्भ्रमणवशात् क्वचिदेकान्तस्थाने यदृच्छया मिलितयोः सङ्गतयोः परस्परसंश्लिष्टगात्रयोरित्यर्थः। ईदृशोर्दम्पत्योः कामिनोः कः को रसः आश्लेषादिशृङ्गारः व्रीडाविमिश्रो लज्जासम्बलितो नेति न। अपि तु सर्व एव व्रीडासम्बलितोऽभूदिति अर्थः। व्रीडाविमिश्रो रसः को न को नाऽभूत्। अपि तु सर्व एवाभूदिति वा योजना। कथं परिचितिमनिश्चित्य सहसैवमाचरितमिति व्रीडाविमिश्रत्वम्। केषां रसानां व्रीडाविमिश्रमित्यपेक्षायां तानाह आश्लेषादित्यादि। प्रथममाश्लेषमालिङ्गनम्। तस्मादनु, अनन्तरं कपोलादिस्थले चुम्बनम्। तस्मादनु नखोल्लेखः स्तनजघनादिषु नखाग्रचालनं, तस्मादनु स्वान्तजस्य मदनस्य प्रोद्बोधः प्रकर्षेणोदयः। तदनु सम्भ्रमः, सुरतार्थं वैराग्यम् । तदनु रतारम्भः, सुरतव्यापारः, तदनु प्रीतयोः सन्तुष्टयोस्ततः सम्भाषणैस्तत्कालोचितप्रेमसंलापैर्जानतोरन्योन्यस्वरूपं निश्चितवतोरित्यर्थः।।३४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३४।।आश्लेषादनु इति, अन्धकारे कुञ्जमध्ये नायिकानायकयोः लज्जामिश्रचुम्बनालिङ्गनाधरपानादनु नखच्छेदः संघटितो भवति। अनन्तरं कामोद्रेको जायते। फलतः रतिरङ्गे निमज्जितौ भ्रमात् दम्पती परस्परालापे परस्परमभिज्ञाय लज्जामिश्रभावेन कामभावात् रतिक्रीडाजन्यरसस्यानुभवो जायते। राणाकुम्भानुसारं श्लोकेऽस्मिन् शृङ्गारः रतौ चुम्बनालिङ्गनेन , आश्लेषेण भयोः भयानकरसस्य प्रादुर्भावमासादयति। चुम्बनादनु शोकःनखक्षतेन वीरः रसः। एवं शृङ्गारे अपूर्वसुखं प्रापयता विस्मयेनाद्भूत रसः। कामोद्वोधे नाना वाग्विलासेषु हासः तज्जन्य हास्यरसः समुलसति। अतः कविना आहत्य सर्वरसानां समवायं समुत्पादयति सत्यमुक्तं भोजेनं, शृङ्गार एव रसनाद्रसमामनामः। अत्र सर्वरसानामनुभव समुच्चयेनैव श्रृङ्गारः पृष्टः भवति। परन्तु कवेः बाहुल्यं तावत् श्रृङ्गमारोहति अर्थात भावस्य शीर्षे सकलं निमज्जितं भवति। आस्वादन शरीरत्वान् अखण्डप्रतीते अनिर्वचनीयत्वं प्रतीयते। कामशास्त्रदृष्या आश्लेषानन्तरं चुम्बनं, ततो नखक्षतं, ततः कामविकाराः, ततो मैथुनं, ततः प्रीतिः ततो रसभावनाक्रमः **कामशास्त्रे**

कथितः। **भरतेनापि** मतमिदमङ्गीक्रियते। दीपकमलंकारः, समुच्चयो भ्रान्तिमांश्च। शार्दूलविक्रीडितम् छन्दः ।।३४।।

**३५-सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि**
**प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्।**
**कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः**
**सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ।।३५।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।३५।। हे सुमुखि! सखि! सुभगः कृष्णस्त्वां पश्यन् कृतार्थतामुपैत्वितियोजना। कीदृशीं सभयं चकितं यत्स्यादेवं यथा स्यादेवं कथि तिमिरे दृशं नेत्रे विनस्यन्तीं केनचित् कुत्रचित् निष्ठताद्रक्षेऽहमिति नेत्रस्य सभयचकितत्वम्। पुनः कीदृशीं प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीं प्रतितरु इति तरौ तरावित्यर्थः। तमसि बृक्षेपु पुरुषभ्रमात् मन्दता पदस्य ज्ञेया। पुनः कीदृशीं, कथमपि रहप्राप्ताम्। अङ्गैरिति इत्थंभूतलक्षणे तृतीया। अनङ्गतरङ्गिभिः अङ्गैरुपलक्षिता इत्यर्थः।

इति श्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्याम् अभिसारिका वर्णने साकाङ्क्षसुन्दर्य्याम् अभिसारिका वर्णने साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ।।३५।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।३५।। इदानीं त्वत्प्राप्तिरेव श्रीकृष्णस्य सर्वस्वमिति दर्शनन्त्याह, सभयेति। हे सुमुखि राधे! स सुभगः श्रीकृष्णस्त्वां पश्यञ्जानन्कृतार्थतामुपैतु कृतकृत्यो भवतु। अत्र दृशिर्ज्ञाने वर्तते। किंभूतां त्वाम्? तिमिरे तिमिरवति पथि मार्गे सभयचकितं यथा स्यात्तथा दृशं विन्यस्यन्तीम्। सभयचकितमिति भयविस्मयस्थायिभावौ भयानकाद्भुतावुक्तौ भवतः। निबिडे हि तमसि भयं भवत्येव। तादृशो च भावितभयानके पथि संकेतस्थानं यामीति विस्मयः। एवं प्रियस्यापि प्रियतमेन समं समागमो भविष्यति न वेति शङ्कावकाशोऽपि। किंभूतां त्वाम्? प्रतितरु तरुं तरुं प्रति स्तननितम्बभार-भरालसतया मुहुर्वारंवारं स्थित्वा कोऽपि मां मा द्राक्षीदिति मन्दं पदानि वितन्वतीम्। प्रतितरु अत्र वा स मे प्रियो भविष्यतीत्याशङ्कया मुहुः स्मित्वेति योजनीयम्। किंभूताम्? कथमपि केनचित्प्रकारेण पूर्वोक्तसखीवचननील निचोलादिसाधनसंपत्त्याऽभिमान-

परित्यागेन मय्यनुकम्पया वा रहःप्राप्ताम्। पुनः किंभूताम्? अनङ्गतरङ्गिभिः कामकल्लोलकलैरङ्गैरुपलक्षिताम्। अत्र तमसो नैबिड्याद्दर्शनायोग्यत्वेऽङ्गस्पर्शनादेव ज्ञातेति कृत्वा दृशेर्ज्ञानार्थो व्याख्यात इत्याकूतम्। अत्र हरिणी वृत्तम्। अतिशयोक्तिरलंकारः।।३५।।

## (३) जगद्धरकृत- सारदीपिका

।।३५।। इदानीं त्वल्लाभात्कृष्णः कृतार्थो भवतीत्याह सभयेति हे सुमुखि! सुवदने राधे! सुभगः सौभाग्यवान् सः कृष्णस्त्वां पश्यन् कृतार्थता उपैतुतां प्राप्नोतु कीदृशीं त्वां तिमिरे अन्धकार सहिते पथि मार्गे सभयचकितं भयविस्मयाभ्यां सहितं यथा स्यात्तथा दृशं नेत्रं विन्यस्यन्ती निरीक्षयन्ती निबिडान्धकारदर्शनाद्रूपम् अन्धकारो निःशकाङ्गमनां ताद्विस्मयः पुनः कीदृशी प्रतितरु वृक्षे मुहुः पुनः पुनः स्थित्वा मन्दं शशनैर्पदानि चरणव्यापारान् वितन्वतीं मे प्रियतमो अत्रैवागमिष्यतीति मन्दं चरणारविन्दं धारयन्तीतिभावः। पुनः कीदृशीं कथमपि अन्धकारस्य निबिडत्वात्केनापि प्रकारेण रहः एकान्तस्थलं प्राप्तां पुनः कीदृशीं कामस्य यस्तरङ्गः पुनरुद्बोधको ये इषुकमोल्लसाः यैर्वातरङ्गैः हस्तपादादिभिरुपलक्षित उपलक्षणेतृतीया।।३५।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां
सारदीपिकायां साकाङ्क्षापुण्डरीकाक्ष नामः पञ्चमः सर्गः।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३५।। पुनरपि त्वरयितुं कृष्णोत्कण्ठामाह; सभयेति। हे सुमुखि! सुभगः शोभनः श्रीकृष्णस्त्वां पश्यन्कृतार्थतामुपैतु प्राप्नोतु। कीदृशीम्? तिमिरेऽन्धकारे सति पथि वर्त्मनि तदा भयचकितं भयसहितं यथा स्यादेवं दृशं नेत्रं विन्यस्यन्तीमर्पयन्तीम्। पुनः कीदृशीं त्वाम्? प्रतितरु तरुं तरुं प्रति मुहुः पुनः पुनः स्थित्वा मन्दं यथा स्यादेवं पदानि वितन्वतीम्। गाढान्धकारे तमालविटपेषु को वेदात्र कृष्णः स्थितो भविष्यतीत्याशयेन वाऽयमेव कृष्ण इति भ्रमात्तदन्तिकमुपेत्य पश्चाद्विशेषदर्शने सति तत उत्थाय पुनरग्र तथेत्येवं प्रतितरु स्थित्वा गच्छन्तीमिति भावः। पुनः कीदृशीम्? कथमपि शनैः शनैश्चरणक्षेपादिना रह एकान्तस्थलं प्राप्ताम्। पुनः कीदृशीम्? अनङ्गतरङ्गिभिरनङ्गस्य कामस्य यस्तरङ्गः पुनःपुनरुद्बोधस्तद्युक्तै-रङ्गैरुपलक्षिताम्। अङ्गैरित्यत्र विशेषणे तृतीया।।३५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३५।। पुनरप्यन्धकारमेववर्णयनभिसरणस्य फलमाह। सभयचकितमिति। हे सुमुखि! राधे! प्रार्थनादिमानापगमनात् सुमुखित्वोपपत्तिः। तस्यास्तिमिरेऽन्धकारे

अभिसरणमार्गे सभयं भयेन मार्ग गतः निम्नोन्नतादिप्रदेशजनितभीत्या यच्चकितं वैक्लव्यं तत् सहितं यथा तथा। अथवा चकितशब्दोऽपि भयपरः। तथा च भयचकितमित्यन्तं भयमिति यावत् तत् सहितं यथा तथा। अथवा भयं का वा द्रक्ष्यति इति साध्वसं सख्येकसहाया कथं गच्छामीति चकितमाश्चर्य्यम् आभ्यां सहितं यथा दृशं विन्यस्यन्ती सावधानेन मार्गं पश्यन्तीत्यर्थः। प्रतितरु प्रतिवृक्षं मुहुरत्यर्थं स्थित्वा मन्दं शनैः पदानि पादन्यासान् वितन्वतीं। वस्तारेण विक्षिपन्तीं यथा अत्यन्धकारमार्ग चिह्नभूतानि कुड्याकैरित्यर्थः। एतादृशैरङ्गैश्चरणादिभिः करणैः कथमप्यन्तप्रयासेन रहः एकान्तं प्राप्तां त्वां भवन्तीं सुभगः भाग्यसम्पन्नः स कृष्णः पश्यन् वीक्ष्यमाणः सन् कृतार्थतामुपैतु प्राप्नोतु। यथा लोके स्वोद्देशेनातिप्रयासेनागतं जनोत्तममबलोक्यात्मनः कृतार्थतां मन्यते तथोक्तबिधमवलोक्य कृतार्थी भवतु इत्यर्थः। अतश्च प्रियचितोल्लासार्थं त्वयाधुनैव अवश्यगन्तव्यमिति तात्पर्य्यम्।।३५।।

इति श्रीगीतगोविन्दव्याख्यायां श्रुतिरञ्जिनीसमाख्यायां पञ्चमः सर्गः।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३५।। त्वमेव तावदेवमावेदयसि न तु कृष्णस्यापि मयि तादृशः अनुबन्ध इति राधावचनमाशंक्य तल्लाभेनैव तस्य कृतार्थता स्यादिति दर्शयति, हे सखि राधे सुभगः सुन्दरः कृष्णस्त्वां पश्यन् कृतार्थतामुपैतु। त्वां किम्भूताम्? तिमिरे तिमिरयुक्ते पथि। तिमिरमस्यास्ति इत्यर्थे अर्शाद्यच्प्रत्ययः मत्वर्थीयः। सभयं सत्रासम्, अतएव सचकितञ्चेति तत्सभयचकितम्, एवं, यथा स्यात्तथा दृशौ विनस्यन्तीम् अपर्यन्तीम्। पुनः किम्भूताम्? वृक्षतलस्थितनिविडान्धकारे कृष्णभ्रमेण प्रतितरु वृक्षे वृक्षे मुहुर्वारम्बारं स्थित्वा लज्जया चिन्तया वा मन्दरं मन्थरं यथास्या देवं पत्तिः पदमिति भावव्युत्पत्त्या पदानि गमनानि वितन्वतीं विस्तारयन्तीम्। पुनः किम्भूताम्? कथमपि कष्टसृष्टया रहःप्राप्तां निभृतस्थानमागताम् अत एव प्रियदर्शनादनङ्गेन कामेन तरङ्गिभिरुल्लसितैरङ्गैर्ल्लक्षिताम्। इत्थम्भूतलक्षणे तृतीया। यद्वा कथमपि तमोनैविद्यात् केनापि प्रकारेणानङ्गतरङ्गिभिः कामकल्लोलशालिभिरङ्गैरवयवैर्हेतुभूतैः रहःप्राप्तां तथा च निभृते तवाङ्गस्पर्शने लब्धां न तु प्रथमतो दृष्टामिति वाक्यार्थः। तथा च तदर्थमुपागतां भवतीमालोक्यैव कृष्णस्य कृतार्थतेति दर्शितम्।।३५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३५।। पुनरपि तां त्वरयितुं श्रीकृष्णोत्कण्ठामाह, सभयेति। हे सुमुखि सुन्दरि! सुभगः सुन्दरावधिः सः श्रीकृष्णस्त्वां पश्यन् कृतार्थतां जन्मसफलत्वं समुपैति [४]

प्राप्नोति। कीदृशीं त्वाम्? तिमिरेऽन्धकारसहिते पाथि मार्गे सभयचकितं भयसहितं चकितं यथा स्यात्तथा शृङ्गाररससम्भ्रमेण दृशौ नेत्रे विन्यस्यन्तीं [५] क्षिपन्तीम्। अनेन दृशोरलौकिकसौन्दर्यमुक्तम्। पुन: कीदृशीम्? मुहुर्वारं वारं [६] प्रतितरु प्रतिवृक्षं स्थित्वा [७] स्थित्वा वृक्षव्याजेन प्रियागमनं[८] समीक्षमाणा पदानि मन्दं शनैर्वितन्वतीं[९]दधतीम्। पुन: कीदृशीम्? कामतरङ्गै: कथमपि महता कष्टेनाङ्गै रह एकान्त [१०]गृहे प्राप्ताम्। सुमुखीत्यन्धकारे प्रकाशबहुलत्वमुक्तम्। रसवदलङ्कार:।।३५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३५।। [११] त्वल्लाभा [१२] त्कृष्ण: कृतार्थो भवत्वित्याह, सभयेति। हे सुमुखि सुवदने राधे! सुभग: सौभाग्यवान् स कृष्ण: त्वां कृतार्थतां समुपैतु प्राप्नोतु। कीदृशीं त्वाम्? [१३] तिमिरेऽन्धकारसहिते पथि मार्गे सभयचकितं [१] भयविस्मयाभ्यां सहितं यथा स्यात्तथा दृशं नेत्रं न्यस्यन्तीं[२] क्षिपन्तीम्।[३] निबिडान्धकारदर्शनाद्भयं, अन्धकारे निश्शङ्कगमनाद्विस्तय:। पुन: कीदृशीम्? प्रतितरु वृक्षे [४] वृक्षे मुहु: पुन: पुन: स्थित्वा मन्दं शनै: पदानि चरणव्यापारान् वितन्वन्तीं, वृक्षे कृष्णभ्रान्त्या [५] स्वचरणापातभयात्। [६] पुन: कीदृशीम्? कथमपि अन्धकारस्य निबिडत्वात् केनापि प्रकारेण रह एकान्तस्थलं प्राप्ताम् [७]। [८] पुन: [९] कीदृशीम्? अनङ्गतरङ्गिभि: कामस्य यस्तरङ्ग: पुन: पुनरुद्बोधस्तद्युक्तैरङ्गैर्हस्तपादादिभिरुपलक्षिताम्।।३५।।

१.दृशं-इ.क.ल.म. २.उपैतु-इ.फ.ह.ज. ३.समुपैतु प्राप्नोतु-इ.फ.ग.ह.ज. ४.नास्ति-अ.ब. ५.नास्ति-अ.ब. ६.प्रतितरुं-ब.इ.ग.ह.ज.नास्ति-फ. ७.नास्ति-फ.ग.ह.ज. ८.समीक्ष्यमाणा-अ.ब.ग. ९.नास्ति-अ.ब. १०.गृहं-इ.फ.ह.ज.गृहप्राप्ताम्-ग. ११.त्वल्लोभात्-ल.म. १२.कृष्णोऽपि कृतार्थोभवतीत्याह-क.ल.म. १३.तिमिरेऽन्धकारे-ड.सतिमिरेऽन्धकारसहिते-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३५।। (सभयेति।) हे सुमुखि! भयचकिताभ्यां सहितं यथा तथा तिमिरे अन्धकारे दृशं दृष्टिं विन्यस्यन्ती विक्षिपन्ती पथि मार्गे प्रतितरु तरौ तरौ प्रतितरु, मुहु: स्थित्वा पदानि पादप्रक्षेपस्थलानि वितन्वती कुर्वन्ती कथमपि अतिकष्टेन रह:प्राप्तां मिलितां, अनङ्गस्य तरङ्गा इव तरङ्गा: विलासा: एषु सन्तीति अनङ्गतरङ्गिभि: अङ्गै: यक्तामिति शेष:। त्वां पश्यन् अवलोकयन् सुभग: सुन्दर: माधव: कृतार्थतां धन्यतां उपैतु प्राप्नोतु। अभिसरणक्रियोपदेशवर्णनादभिसरणोद्योगादभिसारिका।।३५।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३५।। सभयचकितमित्यादि। हे सुमुखि! शोभनमुखि, स सुभग: सुन्दर: शोभन: भाग्यो वा श्रीकृष्णस्त्वां पश्यन् कृतार्थतामुपैतु कृतकृत्यो भवत्विति योजना। त्वां

किंविधाम्? सभयचकितं यथा स्यादेवम्। तिमिरे दृशं विन्यस्यन्तीं भयेन यच्चकितं तेन सह वर्तत इति विग्रहः। केनचित् कुत्रचित् तिष्ठता द्रक्ष्येऽहमिति नेत्रस्य सभयचकितत्वम्। पुनः किंविधाम्? पथि प्रतितरु मुहुः स्थित्वा मन्दं यथा स्यादेवम्। पदानि वितन्वतीं चरणन्यासान् विस्तारयन्तीम्। "पदं तु चरणन्यासे प्रतिष्ठापादयोरपि" इति हट्टचन्द्रः। तरौ तरौ प्रतितरु वीप्सायामव्ययीभावः। तरुतले तिमिरमतितरां निबिडमिति कृत्वा वृक्षशिफासु पादाभिघातभयान्मन्दं पदानि वितन्वतीमिति भावः। अथवा लक्षणेनाभिप्रती आभिमुख्ये इति समासः। तदा मार्गशाखिनं लक्षीकृत्याभिमुखेन स्थित्वा तिमिरे पुरुषभ्रमात् किमयं मम प्राणनाथो भवेदन्यो वेति शङ्कया मन्दं पदानि वितन्वतीमित्यभिप्रायः। पुनः किंविधाम्? कथमपि कष्टकष्टेन रहः विजनं विहारस्थानं प्राप्तां प्राप्तवतीम्। कष्टस्य कारणमाह, अनङ्गतरङ्गिभिरिति । कामलोलशालिभिरङ्गै-रुपलक्षिताम्। "इत्थंभूतलक्षणे तृतीया।" यद्वा रहसि अनङ्गतरङ्गिभिर्भुजोरस्थलाद्यवयवैः प्राप्तामासादिताम्। न पुनरक्ष्णा दृष्टामित्यर्थः। तदा दृशेर्ज्ञानार्थत्वात् पश्यन्निति स्पर्शेनानुभवन्निति व्याख्येयम्।

इति श्रीगीतगोविन्दटीकायां पञ्चमसर्गविवरणम् ।।३५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३५।। अथैतत् श्रवणव्यग्रतया गमनयोद्यतामालक्ष्य गमनप्रकारमाह सभयेति। हे सुमुखि! भाग्यवान् स कृष्णः त्वां पश्यन् कृतार्थो भवतु। कीदृशीं? सभयचकितं यथा स्यात्तथा तिमिरे पथि नेत्रे विन्यस्यन्तीं केनचित् कुत्रचित् तिष्ठता द्रक्ष्येऽहमिति नेत्रस्य सभयचकितत्वम्। तथा प्रतितरु तरौ तरावित्यर्थः स्थित्वा मन्दं पदानि वितन्वतीं दौर्वल्यात् शीघ्रगमनाशक्त्या पादयोर्मन्दविन्यासत्वम्। अतः कथमपि रहः प्राप्तां यतोऽनङ्गतरङ्गभि रङ्गैरुपलक्षितामुत्कण्ठयनङ्गतरङ्गित्वमङ्गनानाम्।।३५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३५।। इति सकौतुकवृत्तान्तश्रवणोत्फुल्लवदनां तां गमनोद्यतां समालक्ष्याभीष्टफल-सूचनेन प्रोल्लासयति, सभयेति। हे सुमुखि! मानापगमे सुष्ठु लब्धप्रसादत्वात् सुमुखीति सम्बोधनम्। सः त्वन्निष्ठसत्प्रणयशालितयाऽतिप्रसिद्धः सुभगस्त्वन्निरुपमप्रैमेकविषयतया लब्धसौभाग्यः श्रीकृष्णः त्वां तन्नेत्रचकोरचन्द्रिकारूपां पश्यन् सफलेन्द्रिय-वृत्तिर्दृगिन्द्रियवृत्तौ अध्यास्य साक्षात् कुर्वन् कृतार्थतामुपैतु। प्राप्नोतु। कृत्यकृत्यो भवत्वित्यर्थः। त्वां कीदृशीं, सतिमिरे पथि, तमसावृत्तमार्गे सभयचकितं न खलु कोऽपि मां द्रक्ष्यतीति भयं, कथं सख्यैकसहाया व्रजामीति चकितं, विस्मयः आभ्यां

सहितं यथा स्यात्तथा दृशौ, विविधविभ्रमयुक्ते नेत्रे, कृष्णदर्शन लालसया किञ्चित् विषयान्तरमगृहणन्त्यौ अपि निम्नोन्नतप्रदेशनिरीक्षणाय विशेषेण न्यस्यन्तीं बलात् क्षिपन्तीमित्यर्थः। पुनः कीदृशीम्; प्रतितरु प्रतिवृक्षं मुहुर्वारं वारं स्थित्वा कियद्दूरे कश्चन वृक्षं निरीक्ष्य अयमेव सङ्केतकुञ्जचिह्नभूत इति सत्वरगमनश्रान्तिवशेन तत्र तत्र स्थायं स्थायं श्रमलब्धस्तब्धतया गमनकुण्ठितानि पदानि पादन्यासानि मन्दं सालसं वितन्वतीम्। मद्वचनगौरवरक्षणार्थं विस्तारेण क्षिपन्तीमित्यर्थः। अत एव कथमप्यतिकष्टेन रहः एकान्तकुञ्जवसतिं प्राप्ताम्। रहःप्राप्तौ हेतुः; यतोऽनङ्गतरङ्गिभि रनङ्गतरङ्गवद्भिरनङ्गतरङ्गितैरिति पाठे, सञ्जातानङ्गतरङ्गैरङ्गैरुपलक्षितं, दर्शनालिङ्गनचुम्बनसौरभाभिरामं नर्मोक्तिश्रवणादिषु प्रत्येकमहमहमिकामुत्कूलयद्भिश्चक्षुरादिभिरवयवैः कलितकरावलम्बामिव सङ्केतकुञ्जमुपनीतामिति भावः। अभिसारिकालक्षणं यथा,

'याऽभिसारयते कान्तं स्वयं वाऽभिसरत्यपि।
सा ज्योत्स्नी तामसी यानयोग्यवेशाऽभिसारिका।।
लज्जया स्वाङ्गलीनेव निःशब्दाखिलमण्डना।
कृतावगुण्ठा स्निग्धैका सखीयुक्ता प्रियं व्रजेत्।। इति।।३५।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३५।। सभयचकितेति; श्रीकृष्णस्योत्कण्ठावर्णने श्रीराधा त्वरया अभिसरिष्यतीतिधिया व्रवीति, हे सुन्दरी ! त्वां दृष्टवा श्रीकृष्णः स्वकीयं जन्म सार्थकं मन्यतेति धिया त्वां द्रष्टुं वहु व्यग्रतां प्रकटयति। त्वमपि रात्रौ अन्धकारे भीता सति चकिताऽपि भवसि। अतः सावधानतया अन्धकारे गमिष्यसि। अपि च क्लान्तासि प्रति वृक्षमूले किञ्चिद् विश्रम्य धीरं धीरं चलिष्यसि। गोपने त्वां प्राप्य श्रीकृष्णः अनङ्गकेल्यां त्वां प्राप्य जीवनं सार्थकं करिष्यति। अन्धकारेऽपि तव शरीरस्य रङ्गेन प्रकाशमयमिति मन्यते।। रसवदलंकारः।।३५।।

**३५-क - राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली**
**नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः।**
**स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषोदयः**
**कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः।।३५-क।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी (टीकानास्ति)

### (२) राणाकुम्भकृत- रसिकप्रिया

।।३५-क।। इदानीं संभोगाख्यं शृङ्गारमवतारयंस्तदापातनिकाद्वारेण सर्गान्ताशिषमाह राधामुग्धेति। देवकीनन्दनः श्रीकृष्णस्त्वामवतु रक्षतु। किंभूतो देवकीनन्दनः? राधामुग्धमुखारविन्दमधुपः। मुखमरविन्दमिव मुखारविन्दं, मुग्धं च तत् मुखारविन्दं च मुग्धमुखारविन्दम्। राधाया मुग्धमुखारविन्दं तस्मिन्मधुप इव मधुपः। अनेन भावी संभोगो द्योतितः। पुनः किंभूतो हरिः? त्रैलोक्यमौलिस्थलीनां किरीटदेशादीनां नेपथ्योचितं भूषणोचितं नीलरत्नमिव। पुनः किंभूतो देवकीनन्दनः? अवन्या भूमेर्भारायावतारो जन्म येषां शिशुपालदन्त-वक्त्रादीनां तेषामन्तक इवान्तकः। यमसदृशोऽभूदित्यर्थः। पुनः किंभूतो देवकीनन्दनः? व्रजे सुन्दर्यः व्रजसुन्दर्यः। व्रजसुन्दरीणां जनस्तस्य मनस्तोषप्रदोषोदय इव। पुनः किंभूतो हरिः? कंसध्वंसनधूमकेतुः कंसस्य ध्वंसनं विनाशस्तत्र धूमकेतुरिव विनाशसूचकस्ताराविशेष इव। जातमात्र एव कंसविनाशं सूचितवानित्यर्थः। अत्र कंसध्वंसने गोपीनां परमेश्वरादन्यत्र गतिविनाशे धूमकेतुर्बृहद्भानुरिव प्रकाशकत्वात् । प्रकाशे हि स्वेच्छाविहारभङ्गो जायते। अथवा; कसेः शातनार्थत्वाद्राधायाः कामेन यच्छातनं तत्र धूम केतुरिव। स्वच्छन्दप्रदोषोदय इति यदा यदा प्रदोषोदयं वाञ्छति तदा तदा स एवेति। अथवा, प्रगतो दोषोदयो यस्मात्तेन सह क्रीडतीनां दोष एव नास्तीति। अथ च राधामुग्धमुखारविन्दे मधु माधुर्यं पाति रक्षतीति। चिरं विप्रलम्भे हि प्रियदर्शनान्मा-धुर्यमुपपद्यत एवेति पदानामौचिती। अत्र श्लेषलुप्तोपमापरिकरवर्णोपमालंकाराः। शार्दूलविक्रीडितं वृत्तम्। पाञ्चाली रीतिः। आरभटी वृत्तिः। गीत्यादि पूर्वोक्तमेव।।३५-क।।

प्रत्याहवं पञ्चतयारिसैन्यं यो योजयत्याहवकुम्भकर्णः।
स कुम्भकर्णो रसिकप्रियायाः समस्करोत्पञ्चतयात्र सर्गम्।।

इति कुम्भकर्णेन विरचितायां गीतगोविन्दटीकायां रसिकप्रियायां सर्गोऽगात्पञ्चमः

### (३) जगद्धरकृत- सारदीपिका (टीकानोपलव्धा)

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३५-क।। सर्गावसाने कविरा, शिषमाशास्ते, राधेति। देवकीनन्दनः श्रीकृष्णस्त्वामवतु रक्षतु। कीदृशः ? राधाया मुग्धं रमणीयं यन्मुखारविन्दं तत्र मधुपः भ्रमर इव। मुखारविन्दे माधुर्य पाति रक्षति, नित्यानुकूलतया वृद्धिं प्रापयतीत्यर्थः। माधुर्यमात्रं तृष्णया, पिवतीति वा। त्रैलोक्यस्य या मौलिस्थली वृन्दाटवी तदलंकारायोचितनीलरत्नं, श्यामसुन्दरतामित्यर्थः। त्रैलोक्य एवाखिलकान्तानां मौलिस्थलीति वा। उक्तं च, 'अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी।' इति। पृथिव्या भाररूपोऽवतारो येषामसुराणां तेषामन्तको नाशकः; अत एव कंसध्वंसने धूमकेतुस्तद्विनाशपिशुनग्रहः, जातमात्र एव तस्य नाशं सूचितवानित्यर्थः। तदेव, स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषाय चित्ताभिलाषपूरणाय चिरमपारं प्रदोषो रजनीमुखमिव। चिरं नित्यमेवाववत्विति वा ।।३५-क।।

नो भूपाः कति सन्ति तेषु विरला विद्वद्गुणग्राहिण-
स्तन्मध्येऽपि नवप्रबन्धगणनानिर्बन्धिनो दुर्लभाः।
द्वित्रास्तेष्वपि कैटभद्विडुदयत्प्रेमानुबन्धाः क्षिता-
वेतेषां धुरमेक एव वहति श्रीशालिनाथप्रभुः।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां
गीतगोविन्दटीकायां रसमञ्जर्याख्यायां पञ्चमः सर्गः।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३५-क।। पुनरप्यन्धकारमेववर्णयनभिसरणस्य फलमाह। सभयचकितमिति। हे सुमुखि! राधे! प्रार्थनादिमानापगमनात् सुमुखित्वोपपत्तिः। तस्यास्तिमिरेऽन्धकारे अभिसरणमार्गे सभयं भयेन मार्गं गतः निम्नोन्नतादिप्रदेशजनितभीत्या यच्चकितं वैक्लव्यं तत् सहितं यथा तथा। अथवा चकितशब्दोऽपि भयपरः। तथा च भयचकितमित्यन्तं भयमिति यावत् तत् सहितं यथा तथा। अथवा भयं का वा द्रक्ष्यति इति साध्वसं सख्येकसहाया कथं गच्छामीति चकितमाश्चर्य्यम् आभ्यां सहितं यथा दृशं विन्यस्यन्ती साबधानेन मार्गं पश्यन्तीत्यर्थः। प्रतितरु प्रतिवृक्षं मुहुरत्यर्थं स्थित्वा मन्दं शनैः पदानि पादन्यासान् वितन्वतीं। वस्तारेण विक्षिपन्तीं यथा अत्यन्धकारमार्ग चिह्नभूतानि कुड्याकैरित्यर्थः। एतादृशैरङ्गैश्चरणादिभिः करणैः कथमप्यन्तप्रयासेन रहः एकान्तं प्राप्तां त्वां भवन्तीं सुभगः भाग्यसम्पन्नः स कृष्णः पश्यन् वीक्ष्यमाणः सन् कृतार्थतामुपैतु प्राप्नोतु। यथा लोके स्वोद्देशेनातिप्रयासेनागतं जनोत्तममबलोक्यात्मनः कृतार्थतां मन्यते

तथोक्तबिधमवलोक्य कृतार्थी भवतु इत्यर्थ:। अतश्च प्रियचितोल्लासार्थं त्वयाधुनैव अवश्यगन्तव्यमिति तात्पर्य्यम् ।।३५-क।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३५-क।। त्वमेव तावदेवमावेदयसि न तु कृष्णस्यापि मयि तादृश: अनुबन्ध इति राधावचनमाशंक्य तल्लाभेनैव तस्य कृतार्थता स्यादिति दर्शयति, हे सखि राधे सुभग: सुन्दर: कृष्णस्त्वां पश्यन् कृतार्थतामुपैतु। त्वां किम्भूताम्? तिमिरे तिमिरयुक्ते पथि। तिमिरमस्यास्ति इत्यर्थे अर्शाद्यच्प्रत्यय: मत्वर्थीय:। सभयं सत्रासम्, अतएव सचकितञ्चेति तत्सभयचकितम्, एवं, यथा स्यात्तथा दृशौ विनस्यन्तीम् अपर्यन्तीम्। पुन: किम्भूताम्? वृक्षतलस्थितनिविडान्धकारे कृष्णभ्रमेण प्रतितरु वृक्षे वृक्षे मुहुर्वारम्बारं स्थित्वा लज्जया चिन्तया वा मन्दरं मन्थरं यथास्या देबं पत्ति: पदमिति भावव्युत्पत्त्या पदानि गमनानि वितन्वतीं विस्तारयन्तीम्। पुन: किम्भूताम्? कथमपि कष्टसृष्टया रह:प्राप्तां निभृतस्थानमागताम् अत एव प्रियदर्शनादनङ्गेन कामेन तरङ्गिभिरुल्लसितै-रङ्गैर्ल्लक्षिताम्। इत्थम्भूतलक्षणे तृतीया। यद्वा कथमपि तमोनैविद्यात् केनापि प्रकारेणानङ्गतरङ्गिभि: कामकल्लोलशालिभिरङ्गैरवयवैर्हेतुभूतै: रह:प्राप्तां तथा च निभृते तवाङ्गस्पर्शने लब्धां न तु प्रथमतो दृष्टामिति वाक्यार्थ:। तथा च तदर्थमुपागतां भवतीमालोक्यैव कृष्णस्य कृतार्थतेति दर्शितम्।।३५-क।।

।।३५-क।। ग्रन्थप्रक्रममपहाय सर्गान्ते श्रोतुराशिषमाह, दैवकीनन्दन: त्वां श्रोतारं स्वच्छन्दं यथा स्यादेवमवतु रक्षतु। अव रक्षणे धातोर्लोट्। किम्भूतो दैवकीनन्दन:? त्रैलोक्यमौलिस्थलीनां चूडाप्रदेशानां नेपथ्योचितं प्रसाधनयोग्यं नीलरत्नमिव। कान्तिविशेषत्वात् सकलावाध्यत्वाच्च त्रैलोक्यमौलिस्थितेन्द्रनीलेन रूपणमित्यवधेयम्। पुन: कीदृश:? अवनी पृथिवी, तस्या विविधदुष्टदैतादिकृतो यो भारस्तस्यावतारोऽवतरणं तत्र क्षम: समर्थ इत्यर्थ:। पुन: कीदृश:? व्रजसुन्दरीजननां मनस्तोषे चित्तप्रमोदे सन्ध्यासमय इव। प्रदोषसमये कामिनीनां प्रियजनसङ्गमाशया प्रमोदो भवतीति सकलसिद्धमेवेति प्रीतिजनकत्वात् सानुरागत्वात् कृष्णवर्णत्वाच्च दैवकीनन्दनस्य प्रदोषसाम्यम्। पुन: किम्भूत:?कंसधंसने कंसासुरविनाशने धुमकेतुरूप: तत्सूचकग्रहविशेष इव। रूपकमत्रालंकार:। 'आकल्पवेशो नेपथ्यं प्रति कर्म-प्रसाधनमि'**त्यमर**:। राधानयनार्थं सखीं प्रस्थाप्य साकांक्ष: पुण्डरीकाक्ष: कृष्णो यत्रेति व्युत्पत्त्या साकांक्षपुण्डरीकाक्षेति सर्गनाम।।३५-क।।

इति श्रीगीतगोविन्दे अभिसारिकावर्णनेसाकांक्षपुण्डरीकाक्षो नाम पञ्चम: सर्ग:।।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्द-टीकायां पञ्चमः सर्गः।।

**(७) वनमालि भट्टकृत- सञ्जीवनी** (टीका नोपलब्धा)

**(८) नारायण पण्डितकृत- पदद्योतनिका** (टीका नोपलब्धा)

**(९) कृष्ण पण्डितकृत- जयन्ती** (टीका नोपलब्धा)

**(१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी** (टीका नोपलब्धा)

**(११) पूजारी गोस्वामीकृत- बालवोधिनी** (टीका नोपलब्धा)

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।३५-क।। अथ विरहं वर्णयन् व्याकुलः कविस्तयोमिथो मिलनकालस्मरणजातहर्षः आशिषमातनोतिराधेति। देवकी श्रीयशोदा तस्याः नन्दनस्त्वां चिरमवतु। द्वे नाम्नी नन्दभार्य्याया यशोदा देवकी चेति पुराणप्रसिद्धेः। यतः श्रीराधायाः मनोहरमुखकमलस्य मधुपः यतस्त्रैलोक्यमौलिस्थल्याः श्रीवृन्दावनस्यालंकाराय योग्यं नीलरत्नं अतएव व्रजसुन्दरीजनस्य मनस्तोषाय रजनीमुखम् किंच कंसध्वंसनाय धूमकेतुः यतोहयवनेः भारावतारान्तकः। अतएव श्रीराधाया गमनाकांक्षया सहितः पुण्डरीकाक्षो यत्र स इति।।३५-क।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३५-क।।- राधामुग्धेति; सः देवकीनन्दनः कंसासुरस्य ध्वंसकारणरुपधूमकेतुः। अपि च व्रजयुवतीनां मनोहरणकारी आह्लादजनकश्चन्द्रः श्रीकृष्णः मुग्धायाः श्रीराधामुखकमलस्य भ्रमरः मधुपानेन मोदमानः मधुपः त्रैलोक्यमुकुटस्थली वृन्दावनं तस्य मुकुटस्य नीलरत्नभूतः श्रीकृष्णः त्वां तुभ्यं रक्षाविधानं करोतु इति आशीर्वादात्मक श्लोकः सहृदयेभ्यः कविना वितीर्यते।।३५-क।।

शृङ्गारे ललितोद्गारे यमुनातटकानने।
लीलानायकलीलां नः वितनोतु तनुं लीलाम्।।

इति कविः श्रीप्रफुल्लमिश्रविरचितायां स्वर्णलताटिप्पण्यां पञ्चमसर्गः।।

❀ ❀ ❀

# ।। षष्ठः सर्गः ।।

## कुण्ठवैकुण्ठः



# ।। षष्ठः सर्गः ।।

। कुण्ठवैकुण्ठः ।

**३६-अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा।**
**तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ।।३६।।**

**।। सोत्कण्ठवैकुण्ठः।। १।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।३६।। अस्यां गाथायां वासकसज्जा वर्णनीया। तस्या लक्षणम्-

सा कान्ताभरणोपेता वासवेश्मनि संस्थिता।
सम्भोग ललिता या च वासकसज्जा तु सम्मता।।

पुनश्च,

वासवेश्मनि सुकल्पिते तल्पे या समागमविधिं विदधाना।
तिष्ठति प्रियसमागमसज्जा तां मुनिर्वदति वासकसज्जाम् ।।

अपिच,

नानाविभूषणविभूषितचारुगात्रा
तल्पांशुको मतमतीव करोति यत्नात्।
या नायिका गमनमार्गवतीव नेता
सा कथ्यते कविवरैरिह वासकसज्जा।।

यण्डमहजत्स्वं वच्छेलछि मुहुं कोष्द्रु हस्मि संकान्तम्।
दिसइ मिय परिर्हणं सर्वस्वं सुरबिम्बं च।।
तं नमत यस्य वक्षसि लक्ष्मीमुखं कौस्तुभे संक्रान्तम्।
दृश्यते मृगपरिर्हणं शशिविम्बं सूर्य्यविम्बमिव।।

अत्र कौस्तुभे प्रतिफलितलक्ष्मीमधुसूदनयोः संमुखोपशमनालिङ्गनादिसम्भोगलालनात् वासवेश्मनि सज्जीभूते सति समुदायार्थः। शशिविम्बसूर्य्यविम्बोपमानेनापि चन्द्रमूर्य्यसमागत परमानन्दासम्मोहलक्षणं नाम मोक्षभावः सन्दर्शितः। चन्द्रसूर्य्यसमागमः कोऽर्थः शिवशक्तिसमागमः।

राधां लतागृहे दृष्ट्वा तच्चरितं गोविन्दे सखी प्राहेति योजना कीदृशीं, चिरमनुरक्तां यद्ये वं कथं तर्हि नागच्छतीत्याह। गन्तुमशक्तामिति कीदृशे गोविन्दे मनसिजमन्दे कामेन निरुत्साहिकृते इत्यर्थः। आर्य्या नाम छन्दः।।३६।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३६।। इदानीं कुत्रचित्कुञ्जे राधां संस्थाप्य दूती तच्चेष्टितं कृष्णे विनिवेदयति, अथ तामिति। अथानन्तरं राधासखी तच्चरितं राधायाश्चरितं गोविन्दे निवेदयामास। किंभूते गोविन्दे? मनसिजमन्दे। किं कृत्वा? तां राधां गन्तुमशक्तां ज्ञात्वा। शरीरान्तर्वातन्याः शक्तेर्दर्शनाविषयत्वेन दृष्ट्वेति दृशिरत्र ज्ञानार्थः। किंभूताम्? तां चिरं गोविन्देऽनुरक्ताम्। अथवा! लतागृहे इति तस्याधिकरणत्वेन व्याख्येयम्। अत्रैव लतागृहे सङ्केतस्य कृतत्वात्। आर्याछन्दः।।३६।।

### (३) जगद्धरकृत- सारदीपिका

।।३६।। अथेति अथ शब्दोमङ्गलार्थः अनन्तरं वा सखी गोविन्दे कृष्णान्तिकमागत्येत्यर्थः तच्चरितं राधाचरितं प्राह किं कृत्वा लतागृहे तां राधाम् आगन्तुम् अशक्तां दृष्ट्वा कीदृशीं राधां चिरम् अनुरक्ताम् अनुरागिणीं कीदृशे गोविन्दे मनसिजेन कामेन मन्दे पीडिते।।३६।।

।। गुण्डकिरी रागेण रुपकतालेन च गीयते।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।३६।।अथेति। अथानन्तरं सखी तच्चरितं गोविन्दे गोविन्दं विषयीकृत्य प्राहोवाच। कीदृशे गोविन्दे? मनसिजेन कामेन मन्दे मन्दगतौ। किं कृत्वा? तां राधां लतागृहे क्वचिल्लतामण्डपे चिरं बहुकालं व्याप्यानुरक्तां दृष्ट्वास्मिन्नेव लतागृहे केलिः कर्तव्येति चिरकालीनं तस्यानुरागं ज्ञात्वेत्यर्थः। पुनः कीदृशीम्? गन्तुमशक्तां कृष्णान्तिकं प्रयातुमसमर्थाम्। 'मन्दः खले मन्दगते मूर्खे स्वैरेऽल्परोगिणाः' इति **विश्वः**।।३६।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३६।। एवं राधां कृष्णाभिसरणे उन्मुखीकृत्य सखी कृष्णमाह अथेति, अथास्मिन् सर्गे वासकसज्जा वर्ण्यते। तल्लक्षणं तु पश्चात् कथ्यते। अथ राधायाः कृष्णाभिसरणोन्मुखीकरणानन्तरं सखी गन्तुं कृष्णसमीपं प्रतियातुम् अशक्तां विरहकृताङ्गकार्श्येनासमर्थां चिरं चिरकालम् अनुरक्तां अनुरागसमेतां राधां लतागृहे कुञ्जकुटीरे दृष्ट्वा तस्या राधायाश्चरितं विरहवेदनाप्रकारं मनसिजेन कामदेवेन कुण्ठमाणे कामशरपीड़िते इत्यर्थः। एवं विधे गोविन्दे श्रीकृष्णेः प्राह ब्रूते। ब्रूवः पञ्चनामादित

आह ब्रुवं इति तावत ब्रुव आहादेशश्च। अत्र वर्त्तमानार्थ एव ग्राह्यः न भूतार्थप्रयोगः। तत् प्रतीते भ्रान्तित्वात्। तदुक्तं **वामनेन,** ''अहो भूते शलन्तमत्त्रमादिति।।३६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३६।। अथ सखी तामनुनीय क्वचिल्लतागृहे कुञ्जे धृत्वा तच्चरितं कृष्णाय कथितवतीति तद्वर्णनाय प्रसङ्गमवतारयति। अथानन्तरं गोविन्दे राधायाः सखी तच्चरितं राधाव्यापारं प्राह कथयाम्बभूव। गोविन्दे कथम्भूते ? मनसिजेन कामेन मन्दे ग्लाने चैतन्यरहिते वा। तदुक्तं भावलतायाम् 'ग्लानो मुक्ताश्रुरुद्विग्नः स्रस्ताङ्गः नष्टचेतनः। अचिन्त्यो दैन्यभागस्मिन्नेवंप्रायो जनो भवेत्।। किं कृत्वा ? तां राधां स्तम्भाल्लज्जया वा गन्तुमशक्ताम् अर्थात् मुकुन्दे लतागृहे लतोपलक्षिते गृहे धृत्वा। त्वमत्र तिष्ठ, अहमेव कृष्णमानयामीत्युदीर्य स्थापयित्वेत्यर्थः। अत्र सर्गे वासकसज्जा नाम नायिका। तल्लक्षणम् "सैब वासकसज्जा स्यात् स्वयं वासगृहङ्गता। आर्ता मृगयते कान्तं मदनेन मदेन वा।।"।।३६।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३६।। षष्ठे कामशर [१]त्रासखिन्नां राधां विलोक्य [२]सा।
न्यवेदयत्सहचरी श्रीकृष्णं [३]गमनाक्षमम्।।

एवं कृष्णाभिसरणं निरूप्य तां लतामन्दिरे स्थापयित्वा तच्चरितं श्रीकृष्णं प्रत्याह, अथेति। अथेत्यनन्तरं मङ्गलं वा। सखी श्रीगोविन्दं विषयीकृत्य तच्चरितं[४]राधाचरितं प्राहोवाच। किं कृत्वा ? लतामन्दिरे चिरकालम[५]नुरक्तां[६]तां दृष्ट्वा। कीदृशम् ? [७]गन्तुमशक्तां चलितुमसमर्थाम्। कीदृशे ? मनसिजेन[१२१] कामेन मन्दे व्यथितहृदये। मनसिजो मन्दः तुच्छो यस्मादिति वा। [८]मन्दः खले [९]मन्दरते मूर्खे[१०] स्वैरेऽल्परागिणोः इति **"विश्व"**: [११](६३.१०)। हेतूक्तिरलङ्कारः।।३६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३६।। अथेति। अथाऽनन्तरं सखी गोविन्दे कृष्णविषये कृष्णान्तिक[१२]मागत्येत्यर्थः। तच्चरितं राधाचरितं प्राह उक्तवती। किं कृत्वा ? लतागृहे तां राधां गन्तुमशक्तां दृष्ट्वा। कीदृशीम् ? चिरमनुरक्तामनुरागिणीम्। कीदृशे गोविन्दे ? [१३] मनसिजेन कामेन मन्दे विह्वले ।।३६।।

१.त्रासां खिन्नां-इ. २.ताम्-इ.फ.ग.ह.ज. ३.गमनाक्षमम्-इ.फ.ग.ह.ज. ४.नास्ति-ग.ज. ५.अनुरक्ता-मासक्तां-ग. ६.नास्ति-अ.ब. ७.अनङ्गेन गन्तुमशक्तां-इ.ग.ह.ज. ८.तः११.पर्यन्तो भागो नास्ति-अ.ब. ९.मन्दगतौ-इ.फ.ग.ह.ज. १०.स्वैराल्परागिणोः-इ.फ.ग.ह.ज. १२.आगतेत्यर्थः ड.ल.म. १३.मनसिजमन्दे कामविह्वले-क.मनसिजेन मन्दे विह्वले-ल.म.

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।३६।। एवं माधवस्य सङ्केतस्थत्वं परिकल्प्याभिसारोपायं प्रदर्श्य वासकसज्जात्वं राधाया वक्तुमाह अथेति। सखी गन्तुं सङ्केतस्थलं यातुं अशक्तां चिरं अनुरक्तां लतागृहे कुञ्जे दृष्ट्वा तस्या: राधाया: चरितं अवस्थां गोविन्दे मनसिजेन मन्दे अलसे सति प्राह। आर्यासंज्ञक मात्रागणच्छन्द:। (तल्लक्षणञ्च, )

लक्ष्मैतत्सप्तगणा गोपेता नेह भवति विषमे ज:।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्याया:।।३६।।

**(१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।३६।। अत्र सर्गे वासकसज्जा वर्णनीया। तस्या: लक्षणम्, वासवेश्मनि सुकल्पिततल्पे, या समागमविधिं विदधाना तिष्ठति प्रियसमागमसज्जा, तां मुनिर्वदति वासकसज्जा।। इति। अथ तामिति। अथ अनन्तरं तां राधां चिरमनुरक्तां कृष्णं प्रति चिरमनुरागवतीं गन्तुमशक्तां कृष्णसविधं गमनासमर्थां लतागृहे दृष्ट्वा सखी सैव सहचरी तच्चरितं तस्या: राधायाश्चरितं गोविन्दे कृष्णे प्राह। लक्षणया गोविन्दसमीपे कथितवतीति योजना। गङ्गायां घोष: प्रतिवसतीतिवत्। गोविन्दे किंविधे ? मनसिजमन्द इति। मनसिजेन कामेन मन्दे मूढे निरुत्साहीकृते। मन्द: खले मन्दर(ग)ते मूढे स्वैरेऽल्परा(रो)गिणो: इति **"विश्व"**:। किं वा मनसिजमन्दते स्तौतीति कर्मण्यण्। तस्मिन्मनसिजमन्दे। "मदिस्तुतिमोदमदस्वप्नगतिषु।" आर्या नाम छन्द:।।३६।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।३६।। एवं प्रियतमवैकल्यश्रवणेन दशमीदशोन्मुखीमिव तामालक्ष्य अतिव्यग्रा सखी पुनरागत्य श्रीकृष्णं प्राहेति तस्या वासकसज्जावस्थां वर्णयिष्यन् आह, अथेति। अथानन्तरं तां लतागृहे दृष्ट्वा तच्चरितं गोविन्दे सुखी प्राह। कीदृशीं ? चिरमनुरक्ताम्। यद्येवं तर्हि कथं नागच्छति ? गन्तुमशक्ताम्। तर्हि कृष्ण: कथं नागत: ? मनसिजेन प्रियार्त्तिश्रवणज मनोदु:खेन मन्दे निरूत्साहीकृते। 'स्ववासवशां कान्त: समेष्यति निजं वपु:। सज्जीकरोति गेहञ्च या सा वासकसज्जिका' इति वासकसज्जालक्षणम्।।३६।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।३६।।अथ कविस्तस्या वासकसज्जावस्थां सखीमुखेन वर्णयितुमुपक्रमते। अथेति। अथ विविधोपायप्रोत्साहनानन्तरं तां गमनोद्यतां राधां गन्तुमशक्तां प्रियमभिसर्त्तुं विरहपरिक्षीणाङ्गतया अस्पष्टसामर्थ्याम्। एवं चेत् तर्हि मा यातु, तत्राह, चिरमनुरक्तां

कृष्णदर्शनं विना क्षणमपि स्थातुमशक्तामित्यर्थः। एवं गन्तुं स्थातुं चासक्तां लतागृहे स्वयमुषितकुञ्जे दृष्ट्वा किं वा लतागृहे चिरमनुरक्तां तत्रैव कुञ्जे समागमाभिलाषिणी-मवगत्य तदुभयोः सम्मेलनातिव्यग्रा सखी तस्याश्चरितं वासकसज्जावृत्तान्तं गोविन्दे प्राह प्रकर्षेणाह। कृष्णोऽपि कुतस्तत्र नागतवान्, यतो मनसिजमन्दे, कन्दर्पशराभिभूततया एकपदमपि चलितुमसमर्थे इत्यर्थः।।३६।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३६।। अथेति; एतदनन्तरं चिरकालपर्यन्तं यस्यानुरागः श्रीकृष्णेस्ति तथा भूता श्रीराधा कुत्रचिच्चलितुमशक्या आसीत्। अतः लतावेशमनि राधां दृष्ट्वा सखी श्रीकृष्णसमीपं गत्वा व्रवीति। भो! सा कुञ्जे वर्त्तते। कुत्रच्चिदपि गन्तुमसमर्थाऽस्ति। गोविन्दोऽपि तत्र संकेतस्थलीं विवृणोति। आर्याच्छन्दः।।३६।।

।। द्वादश प्रबन्धः / गीतम् १२।।

।। नटराग / गुण्डकिरी राग रूपकतालाभ्यां गीयते ।।

**१-पश्यति दिशि दिशि रहसि भवन्तम्।**
**तदधरमधुरमधूनि पिबन्तम् ।।**
**नाथ हरे सीदति राधा वासगृहे ।। ध्रुवम् ।।१।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।१।। गुण्ड़किरी मल्लाररागेण गीयते। श्लोकोक्तमर्थं गीतेन प्रतिपादयन्याह। पश्यतीति। हे हरे! हे नाथ! सा राधा वासगृहे सीदतीति योजना। स्वपतावप्यतिनिरपेक्ष्या त्ववप्यवानुरक्तेति द्योतनार्थं नाथशब्दोपादानं तच्चरितमित्याह। पश्यतीत्यादि। सर्वत्र त्वां पश्यतीत्यर्थः। यो यस्य भावेन लिप्तः सुखेनेतरेतावास तदाहितसंस्कारात्सर्वं पश्यति तन्मयमित्यर्थः। भवन्तं कीदृशं, तदधरमधुरमधूनि पिवन्तम्। तस्या अधरस्तदधर, तस्य मधुरं मधुनीति षष्ठीसमास। यदि मय्येव चासौ अनुरक्ता, तत्कथं मत्सकाशं नायातीति कृष्णप्रतिवचनमाशङ्क्याह ।।१।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।१।। पूर्वं ध्रुवपदं व्याक्रियते, नाथ हरे इति। हे नाथ! आवासगृहे सङ्केतस्थाने राधा सीदति अवसादं प्राप्नोति।। अथ पदानिपश्यतीति। सा राधा रहसि रहोनिमित्तान्तरनिमित्तं

एकान्तनिमित्तं वा दिशि दिशि भवन्तं पश्यनि। सर्वा दिशस्तस्यास्त्वन्मया एव जाता इत्यर्थ:। त्वदद्वैतमभवदित्यर्थ:। 'सङ्गमविरहविवेके वरमिव विरहो न सङ्गमस्तस्या:। सङ्गे सापि तथैका त्रिभुवनमपि तन्मयं विरहे।।' किं कुर्वन्तम्? तदधरमधुरमधूनि पिन्तम्। तस्या, राधाया एव अधरमधूनि पिबन्तम्, एवमवस्थामेवेत्यर्थ:। तदधर-संसर्गान्मधुराणि मधूनि यान्यक्षराणि तानि शृण्वन्तम्। अत्यादरं श्रवणं पानमुच्यते । तस्यादरश्रवणेन तस्यालीकत्वं द्योत्यते। प्रतिवञ्चनाभावात्।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। गुणकरीराग: रागलक्षणं ''रतोत्सुका कान्तपथं प्रतीक्ष्यमालापयन्ती मृदुपुष्यतल्प इतस्तत: प्रेरितदृष्टिरार्त्ता श्यामातनुर्गौणकरी प्रदिष्टा'' इति अस्मिन्वासकशय्यावर्णनं वासवेस्मनि कल्पिततल्पे वासमागमविधि विविद्धानापश्यति प्रियसमागम शय्यापश्यती स्म । प्रियवासकशय्याम् इति पश्यतीति । हे नाथ हे हरे द्विरूक्ति: सा राधा तव वासगृहे साङ्केतिक निकुञ्ज मन्दिरे त्वत्त: हेतो: सीदति: अवसन्ना भवति कथमित्यत आह सा राधा एकान्ते स्थितासती दिशि दिशि भवन्तं त्वां पश्यति अवलोकयति कीदृशं त्वाम् अधरवत् नायकाधरामृतवत् मधुराणि मधूनि माध्वीकानि पीबन्तम्[३] ।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। भाषया यदुवाच तद्गीतेन कथयतिपश्यतीति। गीतस्यास्य गुण्डकिरी रागो रूपकताल:। गीतार्थस्तु-हे नाथ हे हरे! राधा वासगृहे त्वद्भवत: सकाशात्सीदत्यवसन्ना भवति। विशेषतस्त्वमेव तस्या अवसादकारणमिति भाव:। रहस्येकान्ते दिशि दिशि भवन्तं पश्यति। कीदृशं भवन्तम्? त्वदधरमधुरमधूनि त्वदीयाधररूपाणि मधुरमधूनि पिवन्तमरस्वादयन्तं, भावनया स्वकीयाधरपानं कुर्वन्तं त्वामेव दिशि दिशि पश्यतीति भाव:। यद्वा, त्वच्छब्दस्त्वन्यवाचक:। तथा चत्वदधरमधुरमधूनि त्वत्तोऽन्यस्या नायिकाया अधरमधुरमधूनि पिवन्तं दिशि दिशि पश्यतीति भाव:। त्वच्छब्दस्त-कारान्तोऽन्यपर्याय: सर्वनामगणे पठित:। तदुक्तं सर्वादिगणव्याख्याने प्रक्रियाप्रसादे 'त्वच्छब्दोऽन्यवाची द्वि:पठित: स्वरभेद एक उदात्तोऽनुदात्त:' इति काशिकाकारमतम्। ग्रन्थान्तरमते तु 'एकोऽकारान्तोऽन्यस्तकारान्तो द्वावप्यानुदात्तौ' इति। 'भोगावासो वासगृहम्' इति हारावली ।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। कृष्णे प्राहेत्युक्तं तत्प्रकारमेव विषदयति। पश्यतीत्यादि। गुण्ड़किरीरागेण गेयमित्युक्तं तस्यायमभिप्राय:। गुण्डक्रियया गुर्ज्जरी सपत्नीत्वात्तदवस्थानानन्तरं

तस्यावस्थानं युक्तमिति षट्तालेन गेयम्। अत्र नाथ! हरे! इत्यादि वासगृहे इत्यन्तं ध्रुवपदम्। तस्यार्थः। हे नाथ! दीनरक्षक! हरे! सर्वदुःखहारिन्! कृष्ण! अथवा नाथ हरिः पशुः तस्य सम्बोधनम्। तस्य पशुकल्पसम्वोधनं च सातिशयं क्लिश्यन्तीं राधां श्रुत्वापि तत्समीपानभिसरणादवगन्तव्यम्। प्रक्रिया तु हरतेर्वृत्तिनाथयोः (३-२-२५) पशाविति नाथोपपदाद्धरतेरीन् प्रत्ययः। पशोः पराधीनसञ्चरणात् उपाधिकत्वयुक्त-मित्यवगन्तव्यम्। तथा च हे पशुकल्प कृष्ण! वासगृहे क्रीडामन्दिरे राधा सीदति क्लिश्यति। पाघ्राध्मा (३-१-१२७) इत्यादिनासीदादेशः। अवसादनप्रकार मेव विषदयति पश्यतीति। हे कृष्ण! तस्या राधायाः अधरमेवमधुरः मधुरपदार्थः तस्य मधूनि मधुरसान् रहसि एकान्ते पिवन्तं पातारं पातेः पिवादेशः। एतादृशं भवन्तं त्वां दिशि दिशि प्रतिदिशं पश्यति। निरन्तरत्वद्भावनया असन्निहितमपि सन्निहितमिव पश्यतीत्यर्थः। अतएवसीदतीत्यन्वयः।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। गीतस्यास्य गुर्ज्जरी रागः। यतीतालः। लक्षणन्तूक्तमेव। गोविन्दे यदुक्तं तद्दर्शयति, हे नाथ प्रभो हरे! राधा वासगृहे भग्नदेवालये गर्भागार इति प्रसिद्धेसीदत्यवसन्ना भवति। अतएवाभिसंस्थानकथनप्रकरणे 'क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम्। आलयश्च श्मशानञ्च नदीनाञ्च तटन्तथा।।' इति **साहित्यदर्पणः**। 'गर्भागारम्वास-गृहमि'त्यमरः। किं करोतीत्याशंकायामाह, दिशि दिशि भवन्तं पश्यति। ध्यानेन सर्वासु दिक्षु भवन्तमवलोकत इत्यर्थः। कीदृशम्? तस्या अनन्यनायिकाया अधरं मधुरं मधु, तत् पिवन्तम्। अत्र मधुत्वेनैव माधुर्यप्राप्तौ मधुरपदोपादानं तदाधिवाद्योतनार्थम्। त्वदधरेति क्वचित् पाटः। तत्रापि तच्छब्दस्य सर्वादिगणपठित्वात प्रकृतेऽन्यगोपीवाचकत्वमिति योजयन्ति। वस्तुतस्तु तदधरमधूनि राति गृह्णाति। राला दाने धातुः। त्वदधरमधुरोऽन्यनायिकाधरः। स एव मधु तानि पिबन्तम्। अनेन परस्परकर्त्तृकाधरपानावस्था दर्शिता।।१।।

'यतीताल' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१।। सख्युक्तं गीतेन प्रथयति, पश्यतीत्यादि। गुणकरीरागे रूपकताले। रागलक्षणम्,

रतोत्सुकां कान्तकृतप्रतीक्षामालापयन्तीं मृदुपुष्पतल्पाम्।
इतस्ततः प्रेरितदृष्टिमात्रां गुणाकरीं तां[२]कवयो वदन्ति।।[३]इति।।

[४]ताललक्षणं पूर्ववत्। [५]ध्रुवस्यापि। [६]अत्र वासकसज्जेयं (नायिका)। तस्यालक्षणम,

वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना।[७]पश्यति प्रियसमागमलज्जा तामिहाकलय वासकसज्जाम्।।इति।

हे नाथ। हे हरे। राधाऽऽवासगृहे निकुञ्जमन्दिरे त्वद्विरहात्सीदति [८]दुःखिता [९] भवति। [१०] दुःखमेवा, सा रहस्येकान्ते भवन्तं त्वामेव दिशि सर्वदिशासु पश्यति विलोकयति। कीदृशं त्वाम्? तत्तस्या योऽधरस्तदेव मधुरं स्वादु मधु तानि मधून्यमृतानि पिबन्तं धन्योऽहमिति सादरेण पानं कुर्वन्तम्। एतेन अन्याधरमधुपानमधुरत्वादपानमेवेति भावः। त्वदधर इति पाठे त्वच्छब्दोऽन्यवाचकः।।१ ।।

१.सदधर-इ.त्वदधर-ड. २.मनुयो-इ.फ.ग.ह.ज. ३.नास्ति-इ.ग.ह.४.तालः पूर्ववत्-इ.ग.ह. ५.नास्ति-अ.ब. ६.नास्ति-इ.फ.ग.ह.ज.७.वसति-इ.फ.ग.ह.ज.८.९.नास्ति-अ.ब.१०.दुःखमाह ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। [१]गुणकरीरागः। रागलक्षणन्तु,

रतोत्सुका कान्तपथप्रतीक्षा[२]मापालयन्ती मृदुपुष्पतल्पे। इतस्ततः प्रेरितदृष्टिरार्ता श्यामातनुर्गौणकरी[३]प्रदिष्टा ।। इति ।।

अस्मिन् वासकसज्जा [४] वर्णनीया। [५](तल्लक्षणन्तु- - )

[६]वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना।

पश्यति प्रियसमागमसज्जा तामिहाकलय वासकसज्जाम्।।इति[७]।।

पश्यतीति। हे नाथ। हे हरे। आदरे द्विरुक्तिः। राधा तव वासगृहे वासस्थाने[८]त्वद्धेतोः सीदति[१३०] अवसन्ना भवति। कथमित्यत आह, सा राधा रहसि एकान्ते स्थिता सती दिशि दिशि भवन्तं त्वां पश्यति अवलोकयति। कीदृशं त्वाम्? [९] त्वदधरवत् अन्यस्या अपि नायिकाया अधरामृतवन्मधुराणि मधूनि [१०]माध्वीकानि पिबन्तम्।।१ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। गुण्डक्रीरागेण यतिताली गीयते। गुण्डक्रीरागस्तु मालवगौडमेलनेन निष्पद्यते। मालवगौडमेलन, लक्षणम्,

शुद्धास्सरिमपाश्शुद्धो धैवतः स्यात्ततः परम्।

च्युतषड्जो निन्दकः ... ... ... ... ... ...।।

एतैस्सप्तस्वरैर्युक्तः समन्तो गानवेदिनः।

सौराष्ट्रीगुर्जरीसेवा बहुफलकरी सिन्धुरामक्री छायागौडक तस्याः सपत्न्याः(?)

पश्यतीति। सदधरः समीचीनाधर एव मधुरमधूनि अत्यास्वाद्यमधूनि आनन्देन चित्तस्य मोहकत्वेन मधुरमधूनि मिष्टमद्यानि पिबन्तम्। अत्र बहु पाठं पठन्ति। तदधरेति पाठे तस्याः अन्यस्याः गोप्या इति। स चासौ अधरः, तच्छब्दस्य पूर्वपरामर्शित्वेन सक्षतः तादृशाधर इति वा। त्वदधर इति पाठे त्वत् इति निजार्थकम्। स्वाधरमधुरेति युक्तपाठः। माधवं भवन्तं रहसि एकान्ते दिशि दिशि पश्यति। दृक्सङ्ग उक्तः। ध्रुवाया व्याख्यानम्, नाथ स्वामिन् हरे। नास्माकमेव नाथः अपि तु जगन्नाथः। सर्वलोकापदुद्धारकर्ता राधावासगृहे सीदति क्लिश्यति।।१।।

१.गुणकरीरागः रूपकतालः तललक्षणन्तु-क.२.आलापयन्ती-क.३.प्रसिद्धा-क.वर्ण्यते-क.ल.म.५तः६.वासके-क.७.पर्यन्तं नास्ति-ड.८.त्वत्तः हेतोः-क.९.अधरवत् नायिकाधरामृत-वन्मधुराणि-क.ल.म.१०.नास्ति-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१।। पश्यतीत्यादि। किं प्राहेत्याह - नाथेत्यादि। हे नाथ! हे हरे! राधा वासगृहे सीदति। वासवेश्मनि दुःखितास्तीति योजना। त्वदन्तिकमागन्तुं न शक्नोति इत्यर्थः। स्वपतावप्यवमन्यन्त निरपेक्षाः। त्वय्यैवानुरक्तोति द्योतनार्थं नाथशब्दोपादानम्। कथमित्याह - रहसीत्यादि। निर्जने दिशि दिशि प्रतिदिशं भवन्तं पश्यति सर्वत्र त्वां पश्यतीत्यर्थः। यो यस्य भावेन लिप्तः। सुखदे नेतरेण वा स तदाहितसंस्कारात् सर्वं पश्यति तन्मयमित्यभिप्रायः। किंविधम्? तदधरेति। तस्याः राधाया एवाधरस्य मधुराणि स्वादूनि मधूनि पिबन्तम् अधर एव वा मधुरमधूनीति।।१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१।। गीतस्यास्य गोण्डकिरीरागः। यथा, "रतोत्सुका कान्तपथप्रतीक्षा संपादयन्ती मृदुपुष्पतल्पम्। इतस्ततः प्रेरित दृष्टिवार्त्ता श्यामातनुर्गोण्डकिरी प्रदिष्टा।" रूपकतालम्।

हे नाथ! हे हरे! वासगृहे राधा सीदति प्रतिक्षणम् आकुला भवति। त्वय्यनुरक्तया सन्तता एवानुभूतस्तवेति नाथशब्दः। त्वया त्वस्याः लज्जाधैर्य्यादि-कहरणाद्धरिशब्दोद्धपि निर्दिष्टः। तत् प्रकारमाह-दिशि दिशि रहसि सा भवन्तमेव पश्यति, त्वन्मयं जगदभूत्तथापि त्वं मनसापि तां न स्मरसीति सन्तापकत्वमेवेत्यर्थः। कीदृशं? तस्या अधरस्य मधुरं यन्मधु तत्पिवन्तम्। त्वदधरेति पाठे त्वच्छद्वोन्यार्थः अन्याधरमधुपिवन्तमित्यर्थः। अनेनापि लोभहर्षोत्पादकतया तथैवार्थः।।१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१।। चरितं विवृणोति, पश्यतीत्यादिना गीतेन। इदमपि गुण्डक्रियारागिण्या गीयत इत्युक्तम्। प्रस्तुतश्रीराधावस्थासादृश्याभिप्रायेणात्र रागिणीयं प्रयुक्तेति ज्ञेयम्। रूपन्तु

पूर्वमुक्तम्। पश्यतीति। हे नाथ! अनुरक्तजनानुतापक। त्वयि अनुरक्ततया सन्ताप एवानुभूत इति भाव:। नाथ! नाधृयायज्ञोपतापैश्वर्याशि:षु धातु:। एवं चेत् तर्हि विवेकधैर्यवती सा कथं मय्यनुरज्यते, तत्राह, हे हरे! इति तस्या विवेकधैर्यादिकं त्वमेवापहरसीति भाव:। किं वा नाथ हरे इति एकपदम्। 'हरतेर्दृतिर्नाथयो: पशा'विति सूत्रात् नाथोपपदात् हरतेरिन् प्रत्यय:। पूर्वमागत्य मया बहुश: निवेदितामपि राधावस्थां समाकर्ण्यैव पशुवत् अकृतावधान इत्यर्थ:। यद् वा हे नाथ! हे स्वामिन्! बहुशो दृष्टेऽपि त्वदसमीक्ष्यकारित्वे किञ्चिदपि उपालब्धुमशक्योऽसि इति भाव:। ननु किमर्थमेवं कुप्यसे, तत्राह, सीदतीति, राधा त्वदेकाराधनपरा मम सखी वासगृहे त्वदागमननिश्चयेन क्रीडोचित विविधोपहारयुक्तसङ्केतवसतौ सीदति। त्वामपेक्ष्य दुरवस्थामनुभवतीत्यर्थ:। अवसादप्रकारमाह, पश्यतीति। सा रहसि एकान्ते दिशि दिशि प्रतिदिशं भवन्तं त्वां पश्यति। कीदृशम्, तस्या: राधाया अधरसम्बन्धीनि, अत एव मधुराणि, त्वल्लोभजनकानि मधूनि पिवन्तमास्वादयन्तम्। प्रगाढोत्कण्ठास्मृतिविशेषोऽयम्। य: खलु स्वाभीष्टतमं वस्तु साक्षादिवाविर्भावयति। यथाह **श्रीहंसदूते**,

कदाचित् वासन्ती कुधरभुवि धृष्ट: सरभसं
हसन् पृष्ठालम्बी स्थगयति कराभ्यां मम दृशौ।
दिधीर्षौ जातेर्ष्यं मयि सखि! तदीयाङ्गुलिशिखां,
न जाने कुत्रायं व्रजति कितवानां कुलगुरु:।। इति ।

त्वदधरेति पाठे त्वच्छब्दोऽन्यार्थ:। त्वदागमनविलम्बात् हेतो: अन्यस्या गोपस्त्रिय: अधरमास्वादयन्तं भवन्तमुत्प्रेक्ष्य सर्वदिक्षु यावन्ति रह:स्थानानि तत्र तत्र पश्यति, विचिन्वतीत्यर्थ:।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। पश्यतीति; पूर्वस्मिन् श्लेके श्रीराधाया: विरहजन्य शरीरदौर्वल्यं सखीमुखेन श्रीकृष्णं प्रति वर्ण्यते। तत् खलु अस्मिन् गीते सखिना महता क्लेशभूता विरहभावना उच्यतेति। सा खलु प्रतिदिशं गोपनेन त्वां हे श्रीकृष्ण! पश्यति। किम्भूतं त्वां अन्यनायिकाधरसुधापानशीलम्। पुन: त्वया श्रीराधाधरसुधासेवार्थं व्याकुलितचित्तेन सा रतिकुञ्जे अवसादेन तिष्ठति।श्रीराधा इत्थं व्याकुला भवति यत् प्रतिदिशं त्वामेव पश्यति। अत: त्वयाद्वैतभावनया प्रगाढ़प्रेम्णा सर्वं गोविन्दमयं पश्यति । तदर्थं यथार्थतया उच्यते; संगमविरहविवेके वरमिव विरहो न सङ्गमस्तस्या:। सङ्गे सापि तथैका त्रिभुवनमपि तन्मयं विरहे।। अर्थात् विरहदशायां मिथ:प्रणय: ऐकान्तिकेन सर्वदिशं व्याप्नोति। अत्र प्राकृतश्लोक: स्मर्यते गाथासप्तसत्याम् (गा हा सत सन्यास)

पेच्छइ अलद्धलक्खं दीहं णीससइ सुण्णअं हसइ ।
जह जम्पई अफुडत्थं तह से हिअअट्ठिअं किं पि ।।३९६।।
संस्कृतच्छाया;
पश्यत्यलब्धलक्ष्यं विहसति शून्यं श्वसिति दीर्घम् ।
जल्पति यथाऽस्फुटार्थं तथा तु हृदयस्थितं किमप्यस्याः ।।१।।

**२-त्वदभिसरणरभसेन वलन्ती।**
**पतति पदानि कियन्ति चलन्ती ।। नाथ हरे० ।।२।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।२।। त्वदिति। त्वदभिसारहर्षेण चलन्तो पदानि चलन्ति पतति आगन्तुमसमर्थेत्यर्थः।।२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। त्वदभिसरणेति। हे माधव! सा राधा त्वदभिसरणे रभसेन वलन्ती संभजमाना। अर्थादभिसारवेगम्। कियन्ति पदानि चलन्ती सती पतति। तस्मात्स्थानादधिकं गन्तुमशक्तेत्यर्थः।।२।।

### (३) जगद्धरकृत- सारदीपिका

।।२।। नन्वेवं चेत्तर्हि किमिति नागतेत्यत आह त्वदभिसरणे तवा भिसारे रभस उत्साहस्तेन दलन्ती अभिमुखीभवन्ति कियन्ती कतिपयानिपदानि चलन्ति सति पतति त्वद्विरह मूर्छया गन्तुम् असमर्थेत्यर्थः।।२।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।। ननु किमिति सीदति? अत्रैव किमिति नायातीत्यत आह, त्वदिति। तवाभिसारे यो रभस उत्साहस्तेन चलन्ती प्रसाधनादौ व्याप्रियमाणा कियन्ति पदानि कतिपयानि पदानि चलन्ती त्वदन्तिकमागन्तुं गच्छन्ती पतति स्खलति। तथा च त्वद्विरहसंतप्ता त्वदन्तिकमागन्तुमसमर्था।।२।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। त्वदिति। हे कृष्ण! त्वदभिसरणरभसेन तत्समीपगमनवेगेन हर्षेण वा रभसो वेगहर्षयोरित्यमरः। सह वसन्ती वर्त्तमाना। अथवा वसन्ती लतामन्दिरे वर्त्तमाना त्वदभिसरण सभसेन कियन्ति कतिपदानि चलन्ती सती त्वत्समीपमभिसरणोत्कण्ठया

कतिचित् पदानि गच्छन्ती अतश्च त्वद्वियोगदुखेन कृशाङ्गी सती मध्ये गन्तुमसमर्था स्खलद्गतिर्भवतीत्यर्थ:। प्रसीदेति ।।२ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२ ।। पुन: किं करोत्यत आह, त्वदभिसरणरभसेन त्वदभिसारोत्साहेन वलन्ती भजमाना कियन्ति पदानि चलन्ती गच्छन्ती पतति। पदानीत्यनेन पद्भ्यां गन्तव्यानि स्थानानि अभिप्रेतानि। अन्यथा चरणस्य वाच्यत्वे बहुत्वानुपपत्ते:, क्रियाया: वाच्यत्वे पुनरुक्ति: स्यादिति।।२ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२ ।। ननु सा कुतोऽत्र नायाति तत्राह, (त्वदिति।) त्वदभिसरणरभसेन रासोत्साहवेगेन वलन्ती कियद्गन्तव्यमिति वारं वारं गच्छन्ती पतति मूर्च्छया। अनेन त्वयैव [१]तत्र गन्तव्यमिति भाव:। कीदृशी ? [२]कियन्ति पदानि [३] चलन्ती तव [४] दर्शनार्थं नाधिकं गन्तुं पारयन्तीत्यर्थ:।।२ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२ ।। त्यदभिसरणेति। [१०] सा राधा कियन्ति द्वित्राणि पदानि चलन्ती पतति, अधिकं गन्तुं न पारयतीत्यर्थ:। कीदृशी ? त्वदभिसरणरभसेन तवाभिसरणोत्साहेन वलन्ती सज्जमाना।।२ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२ ।। किमर्थं नागतेत्यत आह, त्वदभिसरणं त्वां प्रति अभिसरणं अनुगमनं तस्मात् रभसो वेग: तेन वलन्तीं सती निर्यान्तीं कियन्ति कानिचित् अन्यानि पदानि पादप्रक्षेपान् चलन्ती व्रजन्ती पतति। पतिताऽभूदित्यर्थ:।।२ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२ ।। यद्यपि त्वय्येवासौ अनुरक्ता तत् कथं मत्सकाशं नायाति कृष्णप्रतिवचन-माशङ्क्याहत्वदभीत्यादि। लुलन्ती निर्भरालसतया अर्थाद् वासगृहे उद्वर्त्तनपरिवर्तनभङ्ग्या लुठन्ती राधा त्वदभिसरणरभसेन त्वमभिसर्तुमौत्सुक्येन कियन्ति पदानि चलन्ती गच्छन्ती सती पतति अधिकं गन्तुमक्षमेत्यर्थ: ।।२ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२ ।। यद्येतादृशी सा तत् कथं नागच्छतीत्याहत्वदभिसारोत्साहेन वलन्ती वलयुक्ता कियन्ति पदानि चलन्ती पतति आगन्तुम् असमर्था इत्यर्थ:।।२ ।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।२।। एवं चेत्तर्हि कथमत्र नानीतां, तत्राह, त्वदिति। सखि! कथमेवं खिद्यसे। उत्तिष्ठ! गच्छाव: प्रियसन्निधानमिति मद्वचनेनाङ्गीकृतस्वास्थ्या, त्वदभिशरणाय त्वामभिसर्त्तुं यो रभसो वेगो हर्षो वा तेन वलन्ती शीघ्रमुत्थाय कृतचमत्करावलम्बा कियन्ति पदानि, कतिपयानि पदानि चलन्ती, गच्छन्ती सती पतति। गमनौत्सुक्यमपरित्यजन्ती एव नि:सहतया भूमौ पतिता मूर्च्छिता एव जायते, इत्यत: कथं तामानयामि कथ्यतामिति भाव:।।२।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।२।। त्वदभिसरणेति; त्वामभिसरणचिन्तया शीघ्रमागच्छति। परन्तु झटित्येव कियन्ति पदानि गत्वा मार्गे सा पतति।।अयन्तं दुर्वला सञ्जातेति ।।२।।

**३-विहितविशदबिसकिसलयवलया।**
**जीवति परमिह तव रतिकलया।। नाथ हरे० ।।३।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।३।। सा परं केवलं तव रतिकलया जीवतीति वाक्यार्थ:। कीदृशी, विरहविषदविष-किशलयबलया। विहित विषदानां सितानां विषकिशलयानां मृणालपल्लवानां वलया: कङ्कण्यानि ययेति विग्रह:। वाह्यसन्तापं विषकिशलवलयैरपनुदन्तीत्यन्त:सन्तापं स्मर्य्यमाणया तव रतिकलयेत्यभिप्राय:।।३।।

**(२)राणाकुम्भकृत-रसिकप्रिया**

।।३।। विहितेति। सा परं तव रतिकलया रतिविज्ञानेन रतिशिल्पेन परं जीवति, नान्य उपाय:। किंभूता सा? कृतपाण्डुरमृणालाङ्कुरकटका।।३।।

**(३) जगद्धरकृत- सारदीपिका**

।।३।। हा कष्टमेवञ्चेदशक्ता तर्हि कथं जीवतीत्यत आह हे कृष्ण! सा राधा तवरते: कलयासुर तलेखचितने न इहसमये परं केवलं जीवति जीवनहेतुरन्यो नास्तीत्यर्थ:। कीदृशी विहिता: कृता: विशदा: शुभ्रबिशकिशलया: मृणालाङ्कुरा एव वलया: कङ्कणानि यस्या: सा।।३।।

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।३।। नन्वेवं चेदशक्ता तर्हि कथं जीवतीत्यत आह-विहितेति। सा परं केवलं तव रतिकलया पूर्वानुभूतायास्तव रतेराकलनेन जीवति। कीदृशी? विहितानि विशदैर्निर्मलैर्बिसै-

मृणालै: किसलयैर्नवपल्लवैश्च वलयानि कङ्कणानि यस्या: सा। 'कलनाकालयो: कला' इति विश्व:। 'वलयं कङ्कणेऽपि च' इत्यपि ।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। बिहितेति। तर्हि पतनेन कथं हानि: इत्याशङ्क्याह। हे कृष्ण! सा राधा इह अस्मिन् पतनसंशये विहितानि विषदविषकिशलयानाम् अच्छमृणालपल्लवानां बलयानि यस्या: तादृशी सती तव रतिकलया रतिकेलिलेशेन सुरताभिलाषेणेति यावत् परं जीवति। पतने सत्यपि समनन्तरं सम्भविष्यद्रतिलेशेन सा परं जीवति न तु प्रकारान्तरेण इत्यर्थ:। एवं विधासीदतीत्यन्वय:।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। पुन: कीदृशी तत्राह, विहिता: कृता विशदा: शुभ्रा: बिसकिसलया मृणालाङ्कुरा एव वलया यया एतादृशी। तव रतिचिन्तनेन परं जीवति। परञ्च तत्कालपर्यन्तं तस्या जीवनमेव न स्यादित्यर्थ:।।३ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३ ।। [५]तर्हि कथं जीवति तत्राह, (विहितेति।) सा तवानुरागलेशेन [६]इह तव गुणानुकथनेन वा परं केवलं जीवति। जीवनहेतुरन्यो नास्तीत्यर्थ:। कीदृशी ? विहिता: कृता: विशदा: शुभ्रा: बिसकिसलय(स्य) मृणालसूत्रस्य वलया: कङ्कणानि [७] यया। [८]वलयं कङ्कणेऽपि च इति विश्‍व: (९५.६५)। पल्लवोऽस्त्री किसलयम् **इत्यमर**: (२.४.१४)। मृणालं बिसम् इत्यपि(**अमर**: १.१०.४२)। कला लेशकलासु च इति त्रिलोचन:[९] ।।३ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३ ।। विहितेति। हे कृष्ण सा राधा तव रतिकलया[११]तव सुरतलेशचिन्तनेन इह समये परं केवलं जीवति। जीवनहेतुरन्यो नास्तीत्यर्थ:। कीदृशी ? विहिता:।।३ ।।

१.नास्ति-अ.ब.२.नास्तीदं वाक्यम्-ज.३.वलन्ति-अ.ब.४.दर्शनार्थे-इ.फ.ग.ह.५.त: ६.पर्यन्तं नास्ति-ज.७.ययेत्यर्थ:-अ.ब.८.त:९.पर्यन्तं नास्ति-अ.ब.१०.सा राधा त्वत् त्वदीयाभिसरणत: रतिसुखं प्राप्तुं रभसेन प्रीत्या चलन्ती गच्छन्ती। कीदृशी ? कामातां नान्त:करणेन देहविस्मृत्या पदानि चलन्ती गन्तुं अशक्ता भवतीत्यर्थ:। सा राधा कियन्ति द्वित्राणि चलन्ती गच्छन्ती पतति पथि अधिकं गन्तुं न पारयतीत्यर्थ:। कीदृशी ? त्वदभिसरणोत्साहेन वलन्ती सज्जमाना-क.११.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३ ।। विहितेति। अत एव विहितानि विशदानां बिसानां कमलतन्तूनां किसलयानां पल्लवानाञ्च वलयानि कङ्कंणानि यया सा। परं तव रति: प्रीति: तस्या: कलया लेशेन सुरतचातुर्याभिलाषेण वा परं जीवति। शरीरे बलं नास्ति, वासनावशात् श्वसितीति भाव:।।३ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। यद्येतादृशमसामर्थ्यं तस्यास्तत् कथं जीवतीत्याह, विहितेत्यादि । इह विरहे परं तव रतिकलया जीवतीति योजना। अयमभिप्राय:। राधाया: जीवने अन्यत् कारणं नास्ति ; केवलं सा तव रतिकलया सुरताकलनया कृष्णो मया सह रतिं करिष्यतीति प्रत्याशया जीवति इत्याशाबन्ध एव तज्जीवने हेतु: यत् कालिदासोऽप्याह, आशाबन्ध: कुसुमसदृशं प्रायेशो ह्यङ्गनानाम्। सद्य:पाति प्रणयिहृदयं विप्रयोगे रुणद्धि। इति। किंविधा ? विहितानां विशदानां सितानां बिसकिसलयानां मृणालपल्लवानां वलया: कङ्कणानि ययेति विग्रह:। बाह्यसन्तापं बिसकिसलयवलयै: अपनुदन्त्यन्त:सन्तापं स्मर्यमाणया तव रतिकलयेत्यभिप्राय:।।३ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३ ।। यद्येवं तर्हि कथं जीवतीत्याह। सा केवलं तव रतिकलया त्वत्कर्त्तृकरमणावेशेन जीवति। कीदृशीं ? कृता विशदमृणालानां पल्लवानां च वलया: कंकणानि यया सा।।३ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३ ।। तर्हि सम्प्रति कथं वर्त्तते, तत्राह, विहितेति । विरहदुर्वहानि मणिमण्डनानि त्यक्त्वा विहितानि कृतानि विशदविसानां स्वच्छमृणालानां तथा किसलयानां पल्लवानां च वलयानि कङ्कणानि यया सा। इह जीवनसंशयापादकदशावसरे तद्हृदयसन्निधानं मुञ्चतस्तव रतिकलया त्वन्मुखचन्द्रमदृष्ट्वा एव कथं कृतार्थतां गमिष्यामीति एवं रूपा या रतिस्तस्या: कलया कौशलेन परं केवलं जीवति। न तूपायान्तरेणेति भाव:। त्वत्प्रीतिर्मरणमपि निरुणद्धि इति भाव:।।३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३ ।। विहितेति; यदि एवं क्षीणा खिन्ना च सञ्जाता तर्हि कथं जीवतीति आशय:। श्रीराधा खलु त्वदभिसारेच्छया त्वया रमणाभिलाषया मृणालनालेन तथा वलय: नवपल्लवेन रचितरुपेण सा एवमाशास्य जीवति ।।३ ।।

४-मुहुरवलोकितमण्डनलीला।
मधुरिपुरहमिति भावनशीला ।। नाथ हरे० ।।४।।

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।४।। मुहुर्वारम्बारमवलोकितमण्डनेन लीला प्रियानुकृतिर्ययेति विग्रहः। प्रियेनुकृतिर्लीलेति नाट्यालोचने। मधुरिपुरहमिति भावनशीलेति ध्यानेन त्वन्मयत्वादित्यभिप्रायः।।४।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।४।। मुहुरिति। सा मुहुर्वारम्बारमवलोकिता मण्डनानां लीला विलासो यया सा। इमानि तानि मण्डनानि तत्सुरतसमारम्भयोग्यानीति मुहुर्मुहुः कानिचित्परिदधाति। किंभूता सती ? अहं मधुरिपुरिति भावनशीला ध्यानस्वभावा । एतेन स्त्रीयोग्यानि मण्डनानि मुक्त्वा त्वद्विरहदुःखापनोदाय पुरुषायितसुरतयोग्यानि मण्डनानि दधाना स्वयमेव त्वद्रुपीभूय कालमतिवाहयतीत्यर्थः। अथवा त्वदलाभात्स्वयमेव त्वं च राधा च भूत्वा। 'स्त्रीणां प्रियालोकफलो हि वेशः' इति त्वच्चेतोहराणि मण्डनानि आदधाना वर्तते ।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। मुहुरिति सा कीदृशी पूर्वपदेनान्वयः पुनः पुनः अवलोकिताया मण्डनलीला अलङ्कारविलासो यया तेन विना निरर्थकमिति पुनः पुनः वदति इति कीदृशो अहं मधुरिपुः कृष्ण इति भावनं ध्यानमेव शीलं स्वभावः सद्वृत्तं यस्याः सा ।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। पुनः कीदृशी ? मुहुरिति। मुहुर्वारम्बारमवलोकिता वीक्षिता मण्डनैर्मुकुटकुण्डलवनमालाभिर्लीला तवानुकृतिर्यया सा। पुनः कीदृशी ? अहं मधुरिपुरिति भावनशीला चिन्तनपरा। रहसि तव वेशं विधायानुरागातिशयेनाहमेव मधुरिपुरिति चिन्तयन्तीति भावः। लीला च हावविशेषस्तदाह **वात्स्यायनः** 'प्रयोजनस्य चेष्टा याऽनुरागातिशयेन या। क्रियतेऽनुकृतिः सेयं लीलोक्ता मुनिसत्तमैः' इति।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। मुहुरिति। हे कृष्ण! सा राधा! मुहुः अवलोकितानि कृष्णमनोरञ्जनार्थम् एतानि अलङ्करणानीति बुद्ध्या वीक्षितानि यानि मण्डनानि हारकेयूरादीनि तेषु लीला क्रीडा यस्याः सा तादृशी अथवा अवलोकितानि कृष्णसमागमाभावादेतानि व्यर्थानि जातानि यस्यास्तादृशी। पुनः किम्भूता मधुरिपुः श्रीकृष्णः अहमहमेव अत्राहं त्वं.... अहं मधुरिपुरेव। अत्र मधुरिपुत्वं

विधेयम्। अनेन प्रकारेण भावनशीला पूर्वमावयोरभेद एव इदानीं। किमिति नयतीत्यविंविधभावनस्वभावेत्यर्थः। अतएव भवता विना जीवनं वृथेति सीदतीत्यन्वयः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनः कीदृशी तत्राह, मुहुः वारम्बारम् अवलोकिता मण्डनस्य लीला यया एतादृशी, अतएवालङ्कारसादृश्यादहं मधुरिपुः कृष्ण इति भावनं स्वभावो यस्या एतादृशी। एतेनाभिमानिकविलासो दर्शितः। तथा च भावलतायाम् लीलेष्टजनचेष्टानुकरणां स्वस्वभाषया। विशेषालापनं किञ्चिद्विलासः सद्भिरुच्यत' इति विपरीतसुरताभिलाषो दर्शित इत्यवधेयम्।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। (मुहुरिति।)[३]किञ्च मुहुर्वारं म्बारं वीक्षितो बर्हावतंसकुण्डलकङ्कणादीनां मण्डनस्य अलङ्कारस्य लीला विलासो यया। तामेवाहमधुरिपुरहमिति भावने ध्याने शीलं स्वभावो यस्याः। भ्रान्तिनामायमलङ्कारः।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। मुहुरिति। [४]सा कीदृशी ? [५]पूर्वोक्तेनान्वयः। मुहुः पुनः अवलोकिता [६]ईक्षिता मण्डनलीला अलङ्कारविलासो यया [७] सा, तेन विना निरर्थकं मण्डनमिति। पुनः कीदृशी ? अहं मधरिपु(रि) ति कृष्ण इति भावनं ध्यानमेव शीलं स्वभावः सद्वृत्तं यस्याः [८]सा।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। मुहुरिति। मुहुः वारं वारं अक्लोकिता मण्डनायाः मकरिकादिकस्य वेणीरचनादेः भूषणादेश्च लीला चातुर्यविशेषा। अहं राधिका मधरपिः कृष्णः इति भावनाशीला चिन्तन स्वभावा।तव ध्यानादेव त्वत्स्वरूपाऽभूदिति। मम तस्य च भेद एव नास्ति। औपचारिकोपचारादिकं किमर्थमिति वा। मयागतं चेत् किमपि नास्ति, तेन मन्निकटे आगतं चेत् किमपि नास्तीति तत्रैवावस्थितेति भावः।।४।।

१.तः२.पर्यन्तं नास्ति-क.३.नास्ति-इ.फ.ग.ह.ज.४.नास्ति-क.५.पूर्वश्लोकेनान्वयः-क.ल.म.६.वीक्षिता-क.ल.म.७.नास्ति-ड.ल.म.८.नास्ति-ड.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। मुहुरित्यादि। मुहुर्वारम्बारम् अवलोकिता दृष्टा मण्डनेन लीला प्रियाऽनुकृतिर्ययेति विग्रहः। तथा चाहुः, "प्रियानुकृतिलीला" इति **नाट्यलोचने**। तद्यथ, "वेणीबन्धकपर्दनी

सिततनुः श्रीखण्डपांशूत्करैः, केतकैः कदलेन्दुभृद्बिसलताव्यालोपवीतिन्यपि। प्राक्पाणिग्रहणादनङ्गरभसात् सख्याः पुरो लीलया, कुर्वाणानुकृतिं हरस्य दिशतु श्रेयांसि वः पार्वती।।" इति। पुनः किंविधाः ? मध्वीति। मधुरिपुरहमिति भावनं चिन्तनं तदेव शीलं स्वभावे यस्याः, भावनं शीलयतीति वा। ''शीलिकामिभिक्षाचारिभ्योऽण्''। ध्यानेन त्व(त)न्मयत्वादित्यभिप्रायः।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। तत्प्रकारमेवाह। मुहुर्वारंवारं अवलोकितमण्डनेन स्वस्मिन् वर्हगुञ्जादिभिः कृतत्वत्सदृशवेशेन तवानुकृतिर्यया सा। अतएवाहं मधुरिपुरिति भावनपरा तन्मयात्मकस्फूर्त्येत्यर्थः। प्रियस्यानुकृतिः लीलेति च नाट्यालोचनम् ।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। पुनरुत्कण्ठातिशयस्मृतिविशेषं वर्णयति, मुहुरिति। हे नाथ! श्रूयतां तस्या उत्कण्ठाचरितम्। मुहुरवलोकितानि, कथमद्यापि नायाति निर्घृणः, यदर्थं सम्पादितानैतानीति वारंवारमीक्षितानि यानि मण्डनानि, वनमालादीनि, तैर्लीला प्रियानुकरणं यस्याः सा। अत एव मधुरिपुरहमिति भावनशीला। कृष्ण एवाहमिति त्वदभेदचिन्तनस्वभावेत्यर्थः। आस्तां तावत् स्वरूपचिन्तनेन, त्वदर्थसम्पादितमण्डन-वीक्षणाध्यासेनापि प्राप्तत्वादेकात्मभावेति भावः। लीलालक्षणं तु, 'प्रियानुकरणं लीला रम्यैर्वेशक्रियादिभिः'। सा यथा **छन्दोमञ्जर्याम्,**

मृगमदकृतचर्च्चा पीतकौशेयवासा,
रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा।
अनृजुनिहितमङ्गे वेणुमुत्क्वाणयन्ती
कृतमधुरिपुवेशा मालिनी पातु राधा।।इति।

किं च **श्रीदशमे,**

कस्यांचित् स्वभुजं न्यस्य चलन्त्याहपरा ननु।
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मना।। इति।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। मुहुरीति; श्रीराधा त्वद्विरहेण त्वादृशमयूरपुच्छादिवेशेनालंकृता सती वारम्बारं स्वकीयां तनुं श्रीकृष्णस्य तनुरिति मन्यमाना पश्यति। सा आत्मानं कृष्णाभिन्नतनुमन्यमाना आत्मरतौ रमते।।४।।

**५-त्वरितमुपैति न कथमभिसारम्।**
**हरिरिति वदति सखीमनुवारम् ।। नाथ हरे० ।।५।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।५।। द्रुतं कथमभिसारं हरिर्नायातीति अनुलक्षणं सखीं वदतीति वाक्यार्थः। ध्यानभङ्गात् कृष्णात् पृथगात्मानं कृत्वेत्यभिप्रायः।।५।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। त्वरितमिति। सा राधा अनुवारं वारंवारं सखीमिति वदति। इतीति किम्? हे सखि! हरिस्त्वरितं शीघ्रं अभिसारं सङ्केतस्थानं कथं नोपैति कथं न याति?।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। तदेवाह त्वरितमिति हरिः मच्चित्तापहारि अभिसारं सङ्केतस्थलं त्वरितं शीघ्रं कथं कस्माद्धेतोः नोपैतिनागछतीत्यनुवारं सखीं वदति।।५।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। त्वरितमिति। हरिस्त्वरितमभिसारकुञ्जं कथं नोपैत्यागच्छतीति सखीमनुवारं सा वदति ।।५।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। त्वरितमिति। हे श्रीकृष्ण! राधा हरिः कृष्णः अभिसारं प्रत्यागमनं अथवा मयाधिष्ठितं सङ्केतस्थानं वा त्वरितं शीघ्रं कथं नोपैति न प्राप्नाति इति सखी माम् अनुवारं पुमः पुनः वदति अहमशकत्या न गच्छामि स एव समर्थः। कथं नायातीति मामनुवारं मामनुवारं भणतीत्यर्थः। पुरातनीमावयोः प्रीतिं इदानीन्तनीं मदीयावस्थां न जानन्नपि किमिति नायातीति अत्यन्ताश्चर्य्यं सूचयितुं किमिति शब्दप्रयोग इति भावः। सर्वथावयोर्वावगन्तव्यमिति तात्पर्य्यम्। अतएव दूषणाभिप्रायेण नाथ हर इति सम्बोधनोपपत्तिः। अतएव सीदतीत्यन्वयः।।५।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। पुनः किं करोति तत्राह, हरिः त्वरितमभिसारं संकेतस्थानं कथं नोपैति अनुवारं वारम्बारं सखीं वदति।।५।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। (त्वरितमिति।) एवं त्वत्सङ्गं विना न तस्या [१] विरहोपहानिरित्याह। हरिः कामतापहरोऽपि त्वरितं शीघ्रं [२]अभिसारं सुरतस्थानं कथं नोप(पै)ति [३]स्वयमेव कुतो नागच्छति [४]इति सखीं [६]प्रति अनुवारं (वारं) वदति।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। त्वरितमिति। सा सखीं[११]इति अनुवारं पुनः पुनर्वदति। इतीति किम्? हरिः कृष्णः त्वरितं शीघ्रं [१२] अभिसारं [१३]अभिसरणस्थानं कथं नोपैति नागच्छति।।५।।

१.विरहतापशान्तिरित्याह-इ.फ.ग.ह.ज.२.तः३.पर्यन्तं नास्ति-अ.ब. ४,५,६.न सन्ति-अ.७.नास्ति-इ.फ.ग.ह.ज.८.साम्यमिति-इ.फ.ग.ह.ज.- ९.तः१०.पर्यन्तं नास्ति-अ.ब.कल्पं शास्त्रे विधौ न्यासे संवर्ते ब्रह्मणो दिने-मे.को. ११.नास्ति-क.१२.नास्ति-क.अभिसारस्तानं-क.चुम्बतीत्यर्थः-क. १५.मेघसदृश-मित्यर्थः-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। स्वरितमिति। हरिः अभिसरत्यस्मिन्निति अभिसारः सङ्केतीभूतकुञ्जः तं कथं किमर्थं त्वरितं नोपैति इति सखीं अनुवारं वदति गमनविलम्बहेतुं पृच्छति इति प्रलापः।।५।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। त्वरितमुपैतीति। हरिः श्रीकृष्णस्त्वरितं शीघ्रमभिसारं कथं न उपैति न आयातीति अनुवारं प्रतिक्षणं सखीं वदति पृच्छतीति वाक्यार्थः। ध्यानभङ्गात् श्रीकृष्णात् पृथगात्मानं ज्ञात्वेत्यभिप्रायः। अभिसारमिति भावे घञन्तात् कर्मणि द्वितीया, ओदनपाकं दीव्यतीतिवत्। ''वासरः सूर्यादिदिवसे वासरोऽवसरबृन्दयोः। कुब्जवृक्षे हरे नागे सव्यभागे क्षणेऽपि च।।'' इति **विश्वः**।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। पुनः स्फूर्त्त्यपगमे त्वत्त आत्मानं पृथङ्मत्वा द्रुतमभिसारं हरिः कथं नोपैतीति अनुवारं सखीं मां प्रति वदति।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। पुनः स्मृत्यपगमानन्तरावस्थामाह, त्वरितमिति। हे नाथ! दुर्वारदैवव्यापारान्तरिताभेदभ्रमा सा, कथं केन हेतुना हरिर्मद्विवेकधैर्यादिहरः श्रीकृष्णः अभिसारं मद्वसतिं प्रति आगमनं त्वरितं नोपैति, न प्राप्नोति। अहमशक्ता न गच्छामि। स तु समर्थ एव कथं तूर्णं नागच्छतीति सखीमनुवारं वदति। उन्मत्ता एवोत्तरमनाकर्ण्य पुनः पुनः पृच्छतीत्यर्थः।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। त्वरितेति; परस्मिन् मूहुर्त्ते राधा सखीं वारम्बारं पृच्छति , यदा प्रकृतिस्था आत्मनः सज्ञां लभते । भो कथं श्रीकृष्णः नाभिसरतीति ।।५।।

**६-श्लिष्यति चुम्बति जलधरकल्पम्।**
**हरिरूपगत इति तिमिरमनल्पम् ।। नाथ हरे० ।।६।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।६।। कृष्ण आगत इतिकृत्वा मेघसदृशं प्रचुरमन्धकारं श्लिष्यति चुम्बति चेति वाक्यार्थः। एकतानेन चिन्त्यमानं वस्तु परितः स्फुरतीत्यभिप्रायः।।६।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।६।। श्लिष्यतीति। हे हरे ! सा हरिरुपगत इति कृत्वा स्निग्धनीलत्वसाम्यादनल्पं स्थूलं तिमिरमन्धकारं श्लिष्यति चुम्बति च। किंभूतं तिमिरम् ? किंचिज्जलधर-सदृशम्।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।।अपि च श्लिष्यतीति सा हरिरूपगतः प्राप्त इति बुध्याऽनल्पं बहुतिमिरमन्धकारं श्लिष्यति आलिङ्गति चुम्बति चा किदृशं तिमिरं जलधरकल्पं मेघसदृशं स्निग्धत्वान्नीलत्वाच्च कृष्णसाम्यं तिमिरस्य ।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। श्लिष्यतीति। सा हरिः कृष्ण उपगत आगत इति बुद्ध्याऽनल्पमधिकं तिमिरमन्धकारं श्लिष्यत्यालिङ्गति चुम्बति च। कीदृशं तिमिरम् ? जलधरकल्पं श्याममेघसदृशम्। यदा यदोत्थाय तवान्तिकं चलति तदा तदा निकुञ्जद्वारि पुञ्जीभूतमन्धकारं दृष्ट्वा त्वद्भ्रमात्तस्यैव चुम्बनालिङ्गनादिकमाचरतीत्यागन्तुमेव न पारयतीति भावः। भ्रान्तिमानयमलंकारः। तलक्षणं प्रागेवोक्तम्।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। श्लिष्यतीति। हे नाथ! हे कृष्ण! जलधरकल्पं नीलमेघसमानच्छायम् अनल्पं बहुलं प्रभुमित्यर्थः। एतादृशं तिमिरम् अन्धतमसम्, सादृश्यात् हरिः श्रीकृष्ण उपगतः मत्समीपं प्रत्यागत इति बुद्ध्या श्लिष्यति परन्तु चुम्बति तथा च तिरन्तरं त्वदाकारभावन-शीलां तां त्वम् उपेक्षितुं नार्हसीति तात्पर्य्यम्।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६ ।। हरिरुपगत इति मत्वा अनल्पम् अधिकं यथा स्यादेवं तिमिरं श्लिष्यति चुम्बति। कीदृशम् ? निविडत्वाज्जलधरकल्पं मेघसदृशमित्यर्थः। अत्रोपमानोत्था रतिः। तथा च भावलतायाम्, 'चित्तसाम्यञ्च यत्किञ्चित् तस्यावयवतुल्यकम्। तदेव सुखदन्तस्या उपमानोत्थेति कीर्त्यत' इति।।६ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६ ।। श्लिष्यतीति। अनुलक्षीकृत्य भ्रमेण स्वयमेवाह। हरिः उपगतः प्राप्तः इति अनल्पं गाढं तिमिरमन्धकारं मेघतुल्यं श्लिष्यति आलिङ्गति चुम्बति च। स्निग्धनीलत्वाच्च श्री कृष्ण[८]साम्यमित्यर्थः। [९]कल्पं समूहे सदृशे शक्ते श्रेष्ठेऽपि (इति) मेदिनीकारः [१०] (१०२.२)।।६ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६ ।। श्लिष्यतीति। सा राधा हरिः कृष्ण उपगतः प्राप्तः इति अनल्पं बहु मिमिरं अन्धकारं श्लिष्यति [१४] चुम्बति च। कीदृशं तिमिरम् ? जलधरकल्पं [१५]मेघसदृशं, स्निग्धत्वान्नीलत्वाच्च कृष्णसाम्यं तिमिरस्य।।६ ।।

१ .विरहतापशान्तिरित्याह-इ.फ.ग.ह.ज. २ .तः ३ .पर्यन्तं नास्ति-अ.ब.४,५,६ .न सन्ति-अ.७ .नास्ति-इ.फ.ग.ह.ज.८ .साम्यमिति-इ.फ.ग.ह.ज.९ .तः१० .पर्यन्तं नास्ति-अ.ब.कल्पं शास्त्रे विधौ न्यासे संवर्ते ब्रह्मणो दिने-मे.को.११ .नास्ति-क.१२ .नास्ति-क.अभिसारस्तानं-क.चुम्बतीत्यर्थः-क.१५ .मेघसदृशमित्यर्थः-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६ ।। श्लिष्यतीति जलधरस्य मेघस्य कल्पं सदृशं अनल्पं गाढं तिमिरं अन्धकारं श्लिष्यति चुम्बति। किमिति ? हरिः कृष्णः उपगत इति। कृष्णस्य नीलत्वसाम्यादन्धकारे तद्भ्रान्तिवर्णनात् तद्भ्रान्तिमदलङ्कार।।६ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। श्लिष्यतीत्यादि। सा मत्सखी हरिरुपगतः कृष्णः समागत्य मिलित इति कृत्वा जलधरकल्पं मेघतुल्यम् अनल्पं प्रचुरं तिमिरमन्धकारं श्लिष्यति चुम्बति चेति वाक्यार्थः। कृष्णवर्णत्वसाम्यद् भ्रान्तिः। एकतानेन मनसा चिन्त्यमानं वस्तुपरितः स्फुरतीत्यभिप्रायेण तिमिरस्य प्रचुरत्वोपादानम्।।६ ।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६।। पुनश्च अत्यावेशेन त्वयि च स्फुरति सति श्रीकृष्ण आगत इति कुत्वामेघ-तुल्यं प्रचुरम् अन्धकरं श्लिष्यति चुम्बति च।।६।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। पुनरुत्कण्ठातिशयचेष्टितमाह, श्लिष्यतीति। समागत एवायमिति सखीसमाश्वासवचनं यथार्थमधिगम्य जलधरकल्पं नीलमेघसन्निभमनल्पं तिमिरं गाढान्धकारं, हरिर्मत् सन्तापहरः श्रीकृष्णः उपगतः मामनुरोद्धुं मदन्तिकमागत इति कदाचित् आलिङ्गति, कदाचित् चुम्बति। अनेन उत्कण्ठायाः पराकाष्ठा दर्शिता भवतीति।।६।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। श्लिष्यतीति; त्वां मेघश्यामं मन्यमाना घनान्धकारं आलिङ्गति चुम्बति च अत्यावेशेन विह्वलतया।।६।।

**७-भवति विलम्बिनि विगलितसज्जा।**
**विलपति रोदिति वासकसज्जा ।। नाथ हरे० ।।७।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।७।। भवति त्वयि बिलम्बिनी सति सा विगलितलज्जा सती विलपतीति चेति वाक्यार्थः कीदृशी वासकसज्जा। वासगृहे सुसंभृतेत्यर्थः।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। भवतीति। हे हरे! सा वासकसज्जा नाम नायिका। भवति त्वयि विलम्बनकारिणि सति विलपति विलापान्करोति ।रोदिति अश्रूणि विमुञ्चति ।'दूतीमहरहः प्रेष्य सज्जिते वासवेश्मनि। यस्या न मिलति प्रेयान्सा हि वासकसज्जिका ।।' इति ।।७।।

### (३) जगद्धरकृत- सारदीपिका

।।७।। भवतीति, भवति त्वयि विलम्बिनि विलम्बं कुर्वति सति विगलितलज्जा गतलज्जा सा राधा विलपति हे निकृपः कथमेतावदादौ दास्यमपि त्वयाचरितमिति विलापं करोति रोदिति अश्रूणिमुञ्चति कीदृशी वासकसज्जा विहितसम्विधानेत्यर्थः तलक्षणन्तुक्तमेव ।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। भवतीति। पश्चाद्विशेषदर्शने सति, भवति त्वयि विलम्बिनि विलम्बं कुर्वति सति विगलितलज्जा सती सा वासके लीलागृहे कान्ताभिसरणाय सज्जा संभृतसकललीलोपकरणा विलपति। हे निष्कृप! कथमेता यदौदास्यं मयि त्वया रचितमिति विलापं करोति। रोदिति रोदनं करोति। वासकसज्जालक्षणं तु **रसार्णवसुधाकरे**, 'भरताद्यैरभिदधे स्त्रीणां वासस्तु वासकः। स्ववासकवशात्कान्ते समेष्यति गृहं प्रति। सज्जीकरोति चात्मानं या सा वासकसज्जिका' इति। **शृङ्गारतिलके** (१/७६), 'भवेद्वासकसज्जासौ सज्जिताङ्गरतालया' इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। हे नाथ! हे श्रीकृष्ण! वासको नाम प्रियसङ्गमहेतुर्वा भावः तदुक्तं,

वारश्च ऋतुकालश्च प्रवासादागतक्रिया।
प्रसाधनं चतुष्टया नायिकायास्तथोत्सवः।।
नवोढाभ्युपपत्तिश्च षडेते वासकाः स्मृताः।। इति तान्

सज्जीकरोतीति वासकसज्जिका नाम काचिन्नायिका तस्या लक्षणं तु,

प्रत्यागमनबेलायां भूषयन्ती मुहुर्मुहुः।
केलिगृहमथात्मानं सा स्यात् वासक सज्जिका।।इति।।

एवं विधा सा राधा विलम्बिनि त्वयि सङ्केतमन्दिरागारे कालक्षेपं कुर्वती सति विगलित लज्जा सती विलपति परिवेदनं करोति। बिलापः **परिदेवनामत्यमरः**। न केवलं बिलपति परं तु रोदिति अश्रुमोचनं करोति। बिलापो नाम वियुक्तप्रियवस्तुगुणानुवर्णनात्मकवाक्योच्चारणम्। तदनन्तरकृत्यं रोदनम्। रोदितीत्यत्र रुदादिभ्यः सार्वधातुकमिडागमः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। पुनः किं करोति तत्राह, भवति त्वयि विलम्बिनि विलम्बकाले वासकसज्जा राधा विलपति रोदितीति। कीदृशी ? विगलिता प्रच्युता अत्यन्तार्तनादादिना लज्जा यस्या एतादृशी। वासकसज्जालक्षणन्तु **भारते**, 'वासवेश्मनि स्वकल्पिततल्पे या समागमविधिम्विदधाना। पश्यति प्रियसमागमसज्जा तामिहाकलय वासकसज्जामि'ति।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। (भवतीति।) [१]भवति त्वयि विलम्बिनि विलम्बं कुर्वति सति गतलज्जा [२] सा विलपति[३] विलापं करोति। [४]रोदित रोदनं[५]करोति। कीदृशी ? वासकसज्जा सुरतकृत [६]सन्धाना।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। भवतीति। [७]भवति त्वयि विलम्बिनि विलम्बनं कुर्वति सति विगलितलज्जा सा राधा विलपति विलापं करोति रोदिति। कीदृशी[८]राधा? वासकसज्जा [९] विहितसन्धानेत्यर्थः [१०] लक्षणं तूक्तमेव[११]।।७।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। भवतीति। भवति त्वयि विलम्बिनि त्वरितमनागच्छति सति विगलिता लज्जा ह्रीः यस्याः सा वासकं निवासस्थानं सज्जं स्रक्चन्दनताम्बूलालङ्करागादिभिः सन्नद्धं यस्याः सा सती विलपति रोदिति च। वासकसज्जेति नायिकाभिधानञ्च। तल्लक्षणम्

,

प्रियागमनवेलायां मण्डयन्ती मुहुर्मुहुः।
केलीगृहमथात्मानं सा स्याद्वासकसज्जिका।। (प्रतापरुद्रीये - नायक प्र...श्लो- -४४)

कैश्चित् द्वारनियतत्वमुक्तम्, तदपेक्षया वेलाग्रहणमेव सम्यक्।।७।।

१.किं वा भवति-इ.किञ्च भवति-फ.ग.ह.ज.साऽपि-ग.३.रोदिति-इ.फ.ग.ह.ज.४.तः-५.पर्यन्तं नास्ति-इ.६.सन्धानेत्यर्थः-अ.ब.७.तः९.पर्यन्तं नास्ति-म.८.नास्ति-क.ख.१०.तः.-११.पर्यन्तं नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। भवतीत्यादि। भवति विलम्बिनि सति त्वयि गमनविलम्बनं कुर्वति सति सा विगलितलज्जा सती विलपति परिदेवनं करोति, रोदिति अश्रुपातं करोति चेति वाक्यार्थः। किंविधा? वासकसज्जेति। वासगृहे सम्भृतेत्यर्थः। त्वत्समागमत्येति भावः।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। पुनः तदपगमे त्वयि विलम्विनि सति विगलितलज्जा साति विलपति रोदिति च ।कीदृशी ? वासकसज्जावस्थां प्राप्ता।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। ततश्चुम्बनालिङ्गनयोर्वैफल्यमवगत्य कथं भ्रान्ताऽस्मि मूढेति शोचन्ती, भवति विलम्बिनि त्वयि विलम्बमाने सति विगलितलज्जा, लज्जामनादृत्य इत्यर्थः। विलपति, हते इमे लोचने, याभ्यां नालोक्यते, तन्मुखारविन्दम्। दग्धोऽयमधरः, नास्वाद्यते येन तच्चुम्बनसुखम्। विफलं चेदं कुचमण्डलं येन न प्राप्यते तदालिङ्गनपीडनमित्यादि

सदैन्यं वदति। रोदिति, हा नाथ! कथमुपेक्षितेवाहं वर्त्तिष्ये इति मुक्तकण्ठं क्रन्दतीत्यर्थः। कीदृशी, वासकसज्जा, वासकसज्जावस्थां प्राप्ता। वासको नाम प्रियसङ्गमहेतुः। तदुक्तम्;

वारश्च ऋतुकालश्च प्रवासादागतस्तथा।
प्रसादनमतुष्टायाः सन्तुष्टाया प्रसाधनम्।।
नबोढाभ्युपपत्तिश्च षडेते वासकाः स्मृताः।। इति ।
वासकेन सज्जा वासकसज्जेति व्युत्पत्तिः। लक्षणन्तु;
कान्तागमनवेलायां भूषयेत् या मुहुर्मुहुः।
केलिगृहमथात्मानं सा स्यात् वासकसज्जिका' इति।।

अन्यच्च, स्ववासकवशात् कान्ते समेष्यति निजं वपुः।
सज्जं करोति गेहं च या सा वासकसज्जिका' इति।।
चेष्टा चास्याः स्मरक्रीडा सङ्कल्पो वर्त्मवीक्षणम्।
सख्या विनोदवार्त्ता च मुहुर्दूतीक्षणादयः।। इति ।

अत्र विलपति रोदितीति विलपनरोदनयोः समसमयतानिरूपणेन द्वयोः परस्परकार्य-कारणतासूचनात् श्लोकस्य प्रगाढत्वेनास्माभिः सान्त्वनावसरोऽपि न लब्ध इति ध्वनितम्।।७।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। भवतीति; पुनः तवागमनविलम्बे पश्य वासकसज्जा नायिका इव लज्जां विहाय उच्चस्वरैः विलापं करोति।।७।।

**८-श्रीजयदेवकवेरिदमुदितम्।**

**रसिकजनं तनुतामतिमुदितम्।। नाथ हरे०।।८।।**

### (१)नारायणदासकृत-सर्वाङ्गसुन्दरी

।।८।।श्रीजयदेवकवेरिदमुदितं, कर्त्तृरसिकजनमतिमुदितं कुरुतामित्यर्थः।।८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। श्रीजयदेवेति । श्रीजयदेवकवेरिदमुदितं रसिकजनं अतिमुदितं हृष्टतरं तनुताम् ।अथवा, रसिकजने मुदितं हर्षं तनुताम् ।तथा च **सङ्गीतराजे**, 'मालवीयः

स्मृतो गौडो रागस्तालोऽड्डतालकः। शृङ्गारो विप्रलम्भाख्यो रसो देवादिवर्णनम्। पदसंततितस्तेनाः पाटाः स्वरसमुच्चयः।। ततः पद्यानि यत्र स्युर्लयमध्यममानतः। स प्रबन्धवरो ज्ञेयो धन्यवैकुण्ठकुङ्कुमः।।' इति धन्यवैकुण्ठकुङ्कुमनामा द्वादशः प्रबन्धः। शठो नायकः ।गूढविप्रियकृच्छठः।चिन्तात्वरावती वासकसज्जा नायिका।तल्लक्षणं, 'केलीगृहमथात्मानं मण्डयत्येष्यति प्रिये।सखी दूती···समाप्तिं समगादिति' ( ?)।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीजयदेवेति श्रीजयदेवकवेः उदितं भाषितम् इदं गीतं रसिकजनं श्रृंगाररसभावना भावितान्तः करणम् अतिमुदितम् अतिशयेन हर्षयुक्तं तनु तां करोत्वित्यर्थः।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।। श्रीजयदेवेति। श्रीजयदेवकवेरिदमुदितं कथितम् । रसिकजनं शृङ्गार-रसास्याद्पुरः सरभगवद्भक्तिरूपरसास्वादग्राहिणमतिमुदितमतिशयेनानन्दितं तनुतां विस्तारयतु।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति।उदितमुक्तं श्रीजयदेवकवेरिदं गीतं रसिकजनं सङ्गीतसाहित्य-सारस्येवेदिनम् अतिमुदितम्। अत्यन्तसन्तुष्टं तनुतां कुरुताम्। आमेऽत (३-४-९०) इत्यामादेशः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।।कीर्त्यर्नुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति।श्रीजयदेवकबेरिदमुदितं भाषितं कर्तृ रसिकजनमतिमुदितं तनुताम् अतिहृष्टं करोत्वित्यर्थः।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। [१]गीतार्थसङ्ग्रहमाह -[२]श्रीजयदेवेति।श्रीजयदेवकवे[३]रुदितं भणितं इदं गीतं रसिकजन- श्रीराधाकृष्णशृङ्गार[४]रसास्वादमुदितान्तःकरण [५]अतिशयेन मुदितमानन्दितं तनुतां विस्तारयतु।।९।।

[६]इति श्री कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविर-चितायां वनमालिसञ्जीवन्यां श्री गीतगोविन्दटीकायां द्वादशः प्रबन्धः।।८।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।।श्रीजयदेवेति।श्रीजयदेवकवेरुदितं भाषितं[७]इदं गीतं रसिकजनं भक्तजनं[८]अति-मुदितं हर्षयुक्तं तनुतां करोत्वित्यर्थः।।८।।

[९]इति श्री गीतगोविन्दटीकायां नारायणपण्डितविरचितायां द्वादशः प्रबन्धः।

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।८।। श्री जयदेवेति। श्रीजयदेवकवे: उदितं इदं वाक्यं रसिका: काव्यरसज्ञा: सहृदयसंज्ञा: तेषां जने समुदाये अतिमुदितं अतिसन्तोषं तनुतां करोतु[१] ।।८।।

इति श्री गीतगोविन्द व्याख्यायां जयन्त्याख्यायां द्वादश: प्रबन्ध:।

१.गीतसङ्ग्रहमाह-इ.फ.ग.ह.ज. २.नास्ति-अ.ब.इ.ग.ह.ज. ३.उदितं गीतं-ग.उदितं भणितं गीतं-फ.ज. ४.रसान्त:करणं-इ.फ.ग.ह.ज. ५.अतिशयेनानन्दितं-इ.फ.ग.ह.ज. ६.नास्तीयं पुष्पिका-ड.क.ल.म. ७.नास्ति-ड.ल.म. ८.अति शयेन मुदितं-क.ल.म. ९.नास्तीयं पुष्पिका-ड.क.ल.म. १०.एतदनन्तरं गीतगोविन्दे द्वादशाष्टपदी सम्पूर्णा इति दृश्यते-इ.

**(१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।८।। श्रीजयदेवेत्यादि। श्रीजयदेवकवे: इदमुदितं भणितं कर्तृ रसिकजनम् अतिमुदितम् अत्यन्तहृष्टं तनुतां कुरुतामित्यर्थ:।।८।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।८।।श्रीजयदेवकवेरिदमुदितं शृङ्गाररसभावितान्त:करणं अतिशयेनमुदितं करोतु । अनेन शृङ्गाररसाविष्टभक्तैरेवेदमास्वादनीयमित्यर्थ:।।८।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।८।। गीतमुपसंहरति; श्रीति। श्रीजयदेवकवेरुदितं वर्णितमिदं गीतं रसिकजनमतिमुदितमतिशयेन सन्तुष्टं तनुतां कुरुताम्।।८।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।८।।श्रीजयदेवकवेरिदं गीतं रसिकजनानां मनसि चित्ते हर्षोल्लासं वितनोतु विस्तारलाभं करोत्विति।।८।।

**३७-विपुलपुलकपालि: स्फीतसीत्कारमन्त-**
**र्जनितजडिमकाकुव्याकुलं व्याहरन्ती।**
**तव कितव विधायामन्दकन्दर्पचिन्तां**
**रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ।।३७।।**

**(१)नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।३७।। हे कितव! अमन्दकन्दर्पचिन्तां विधाय मृगाक्षी राधा तव रसजलधि निमग्ना विभूवेति वाक्यार्थ:। रसजलधिरिति रस: श्रृङ्गार: स एव जलधिरिति समुद्र: विशालत्वात् तस्मिन् निमग्ना इति विग्रह:। ननु यदि समुद्रपतिता सा तत्कथं तत्राविलम्बं

तेन जीवतीत्याह। ध्यानलग्नेति। तव तत्राप्यनुसन्धानं कत्तेव्यम्। यथा कश्चित् समुद्रपतितः कुशकाशावलम्बं कुरुते तथा साप्युपायान्तराभावेन तव ध्यानलग्नेत्य-भिप्रायः। कीदृशी विपुलपुलकपालिरिति, विपुलपुलकपालिः रोमाञ्च पङ्क्तिर्यस्येति विग्रहः। ''पालिरप्यङ्कपङ्क्ति'' **इत्यमरः**। रसः सात्विकभावः तथा तोमाञ्चः शैत्यजोऽम्बुधौ। पुनः कीदृशी; स्फीत शीत्कारं यथा स्यादेवं व्याहरन्ती रसेरन समुद्रभूतः शीत्कारः शैत्यजोऽत्बुधौ। अन्तजर्नितजडिकाक्विति क्रियाविशेषणम्। अन्तरन्तरे जनितः योऽसौ जड़िमा जडत्वं तेन जाता या काकुः स्त्रीयां व्याकुलध्वनिरित्यर्थः। ''काकुस्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वने'' तित्यमरः। ''रसोऽवस्था विशेषः स्याज्जडिमा जाड्यमम्बुधौ''

उक्तं च श्रृङ्गारतिलके,

अकाण्डे यत्र हुंकारो दृष्टिस्तब्धागतिः स्मृतिः।
श्वासाः समधिकं कार्श्यं जडतेयं स्मृता यथा ।। इति ।।

मालिनीनाम वृत्तम्।।३७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३७।। इदानीं तस्यास्तदेकपरत्वमाह विपुलेति। हे कितव धूर्त ! सा मृगाक्षी तव अमन्दकन्दर्पचिन्तामतिशयितकामचिन्तां कृत्वा विधाय ध्यानलग्ना सती स्मरजलनिधिमग्ना शृङ्गारसागरे लीना। किंभूता सा ? विपुला महती रोमाञ्चपङ्क्तिर्यस्याः सा। अपि किंभूता ? स्फीतसीत्कारं प्रवृद्धसीत्कारं यथा स्यात्तथा। अन्तः अर्थात् विरहेणैव जनिताभ्यां जडिमकाकुभ्यां व्याकुलं यथा स्यात्तथा व्याहरन्ती भाषमाणा । 'ननमयययुतेयं मालिनी भोगिलोकैः' इति मालिनी छन्दः। रसवदलंकारः।।३७।।

## (३) जगद्धरकृत- सारदीपिका

।।३७।। इदानीं तस्याः त्वदेकपरत्वमाह हे कितव धूर्त सा मृगाक्षी मृगशावकलोचना तव रसजलनिधिमग्ना त्वं श्रृंगाररससागरे निमग्ना लीना बभूवेत्यध्याहारः किं कृत्वा अमन्दकन्दर्पस्य महतः कामस्य चिन्तां स्मरणं विधाय हृदिकृत्वा ध्यानेन तवैव चित्ते लग्ना तत्परा रससागरमग्नाया श्चेष्टितमाह विपुला महती पुलकावली रोमाञ्च-पङ्क्तिर्यस्याः सा ध्यानकल्पित तवकरस्पर्शेन रोमाञ्चतीत्यर्थः। किं कुर्वती तव हृदयं दन्तनखक्षतादिकं परिकल्प्य स्फीतसीत्कारं प्रवृद्धसीत्कारं यथास्यात्तथा व्याहरन्ती। ''अन्तरभ्यन्तरेजनित उत्पादितः जडिमाजडत्वं यस्यां क्रियायां तद्यथा तथाकाकुना ध्वनिना ध्वनिविकार विशेषेणाकुलं'' यथास्यात्तथा व्याहरन्ती ध्यानेन तवस्येनाल-

भनाधरपान नीबीबन्धनोन्मोचनासक्तपरिकल्प्य मुञ्चमुञ्चपनम् मामेति निषेधवाक्यं वदन्तीतीत्यर्थ:।।३७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३७।। विपुलेति। इत्यादिकन्दर्पचिन्तां विधाय तथापि त्वं चेन्न मिलसि तदा तव ध्यानसेवाचरतीत्यर्थ:। कीदृशी ? विपुला प्रचुरा पुलकपालि: रोमाञ्चपङ्क्तिर्यस्या:। ध्यानकल्पितत्वत्करस्पर्शोद्भूतरोमाञ्चवतीत्यर्थ:। किं कुर्वती ? काकुव्याकुलं यथा स्यात्काक्वा ध्वनिविकारविशेषेण व्याकुलं यथा स्यादेवं व्याहरन्ती। ध्यानेनैव तव करं नीवीबन्धनोन्मोचनासक्तं परिकल्प्य कुट्टमिताख्यहावमाश्रिता 'मुञ्च माम्' इत्यादिनिषेधकं वाक्यं कथयन्तीति भाव:। पुन: कथं यथा स्यात्? स्फीत: प्रवृद्ध: सीत्कारो यत्र एवं यथा स्यात्। ध्यानेनैव त्वद्दत्तनखक्षतादिकं परिकल्प्य सीत्कारं करोतीति भाव:। पुन: कथं यथा स्यात्? अन्तश्चित्तो जनितो जडिमा जाड्यं यत्रैवं यथा स्यात्। ध्यानकल्पितविलासबाह्यादिसमयस्तब्धाख्य: (स्तम्भाख्य) सात्विको भवति ।अन्यस्यापि जलनिधिमग्नस्यान्तर्जाड्यशीतवशात्सीत्कारो व्याकुलं त्रुट्यद्वर्ण यथा स्यादेवं भवतीति ध्वनि:। इयं च जडताख्या पञ्चम्यवस्था। तल्लक्षणं चोक्तं प्राक्। कुट्टमितलक्षणं **रसार्णवसुधाकरे** 'केशाधरादिग्रहणे मोदमानापि मानसे। दु:खितेव बहि: कुप्येद्यत्र कुट्टमितं तु तत्' इति। 'स्तम्भश्चेष्टा प्रतिध्वनि:' इति **श्रृङ्गार-दीपिका** । 'काकु: स्त्रियां विकारो य: शोकभीत्यादिभिर्ध्वने:' **इत्यमर:**।।३७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३७।।इतोऽपि सा त्वया अनुग्राह्या इत्याह। विपुलेति। हे कितव! धृर्त्त! उन्मत्तकितवो धूर्त्त **इत्यमर:**। कितवत्वं च अन्यापरिचित: सन् चिरपरिचित प्रियापरिभवकारित्वेनावगन्तव्यम्। एतादृश हे कृष्ण! विपुला पुलकपाली रोमोद्गमपरम्परा यस्या: सा तादृशी सती अथवा विपुला पुलकपाली यस्मिन कमर्णि तद्वत् इति वाक्यं च। स्फीत: प्रभूत: सीत्कारो यस्मिन् यथा तथा शीत्कार इत्यनुकरणशब्द:। अन्त:करणं देहान्त: प्रवेशो वा, अत्र जनितो यो जडिमा त्वद्वियोगजनितजाड्यं तेन या काकु हृदि स्थितार्थप्रकाशकस्वरविशेष। कायत्यथान्तरमिति काकु:। यद्वा इषदर्थे चेति कु शब्दस्य का देश:। कु: भूमि:। तत्रत्यस्थितवस्तुप्रतीते ईषद्भूमिस्वरविशेष:। काकुरिति। ''काकु:स्त्रियां विकारो य: शोकभीत्यादिभिर्ध्वनेरित्यमर:। तया काक्वा व्याकुलं यथा भवति तथा व्याहरन्ती भवन्तं ब्रुवाणा, किञ्च रस: श्रृङ्गार: सम्भोगाभिलाषे वा स तस्य जलधि: समुद्र: जलानि धीयन्ते अत्र इति जलधि:। ''कर्मण्यधिकरणे

चेति (३-३-९३) किं प्रत्यय। तत्र निमग्नान्तरारवशा इत्यर्थः। श्रृङ्गारस्य सम्भोगविप्रलम्भभेदेन बहुविधत्वाज्जलधिकल्पत्वमित्यवगन्तव्यम्। अतएव ध्यानलग्ना ध्यानं भवद्विषयचिन्ता तत्र लग्ना असक्ता निरन्तरं भवद्ध्यानपरायणा इत्यर्थः। एवंबिधा सा मृगस्यान्निणी यस्या सा तादृशी, अथवा मन्दा अनल्पा कन्दर्पचिन्तां तां कामकृतमनः पीड़ां विधत्ते विधास्यति। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट्। यदि मद्वाक्याद् इदानीमेव सत्समीपं प्रति त्वं न यासि तर्हि त्वद्वियोगवेदनया तस्यां चरमावस्थायां गतायां समनन्तरमेव तवामन्द कन्दर्प कृतव्यथा भविष्यतीति भावः अथवा रसजलधिनिमग्ना श्रृङ्गाररससमुद्रविरहमाणा अतएव ध्यानलग्ना कोटिकन्दर्पलावण्यभवन्मूर्त्तिध्याना सती कन्दर्पजनिता या चिन्ता कन्दर्पचिन्ता ता कृष्ण एव साक्षात् कन्दर्पः तदतिरिक्तः कश्चन मन्मनः पीडाजनकः कन्दर्पो नास्त्येवंरूपां भावनामित्यर्थः विधत्ते कुरुते। तथा च तथाविधायास्तस्याः मनसि पीडा परिहाराय त्वयां शीघ्रमेव गन्तव्यमिति तात्पर्य्यम्। अत्र ध्यातृसामान्यं च ध्वन्यते। तत्र रोमाञ्चादेस्तु सम्भवत्वात्।।३७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३७।। ध्यानेन सा त्त्वत्समागमनं लभत इति दर्शयति, हे कितव धूर्त्त कृष्ण तवामन्दकन्दर्पचिन्तां विधाय। तवेत्यत्र विषयत्वषष्ठयर्थः। तथाच भवद्विषयकातिशयितकामजनितचिन्तां कृत्वेत्यर्थः। मृगाक्षी राधा ध्यानलग्ना सती रसजलधिनिमग्ना श्रृङ्गारसागरे लीना भवतीत्यर्थात्, सर्वं हि वाक्यं क्रियया समाप्यप इति न्यायात्। श्रृङ्गाररसस्य दुस्तरत्वेन जलधित्वेन निरूपितम्। निमज्जनचिह्नमाहविपुला महती पुलकपालिः रोमाञ्चपंक्त्तिर्यस्या एतादृशी। पुनः कीदृशी ? स्फीतशीत्कारं प्रवृद्धशीत्कारं यथा स्यात् एवमन्तः अभ्यन्तरे जनिताभ्यां जडिमकाकुभ्यां जडद्ध्वनिविकाराभ्यां जडद्ध्वनिवकारविशेषाभ्यां व्याकुलं यथा भवति तथा व्याहरन्ती वदन्ती। 'काकु स्त्रियां विकारोऽथ शोकभीत्यादिभिर्ध्वनेरि'**त्यमरः**। अन्योऽपि निमज्जनकाले शीतेन पुलकितदेहो भवति, जाडयेन स्वरभङ्गेन च व्याकुलः यथा स्यादेवं व्याहरन्तीत्युचितमेव तदत्र ध्यानेनैव श्रृङ्गारं। सा लभत इति तदेकरूपत्वं दर्शितम्।।३७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३७।। गीतार्थं संङ्ग्रहेणाह, विपुलेति। हे कितव धूर्त वञ्चकेति वा। सा मृगाक्षी [२]मृगनयना ध्यानेनाशक्ता सती [३]तवामन्दकन्दर्पचिन्तां [४]करोति, कामस्मरणं विधाय

कृत्वा रसजलनिधौ शृङ्गाररस[५] सागरे मग्ना बभूवेति शेषः। रससागरे निमग्नायाः चेष्टितमाह। विपुलानां बहूनां [६]पुलकानां रोमाञ्चानां पालिः पङ्क्तिर्यस्याम्। पुनः कीदृशी ? स्फीतः समृद्धः सीत्कारो यत्र [७] तथा। अन्तश्चित्ते जनितं उत्पादितं जडिम जाड्यमनङ्गविकाशं (रं) यथा, काकुव्याकुलं ध्वनिविकारविशेषेण आकुलं यथा तथा व्याहरन्ती, भावनया तव करं नीव्युन्मोचनसक्तं विचार्य निषेधवाक्यं वदन्तीत्यर्थः। भ्रमोत्प्रेक्षैवा [८]लङ्कारः।।३७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३७।। विपुलेति। हे कितव धूर्त वञ्चक। सा मृगाक्षी[९]हरिणनयना तव रसजलनिधिमाग्ना [१०]शृङ्गाररसागरे निमग्ना [११]लीना बभूवेत्यध्याहारः। किं कृत्वा ? आमन्दं कन्दर्प चिन्तां [१२] महती (तीं) कामस्य चिन्तां चिन्तनं स्मरणं विधाय कृत्वा। कीदृशी ? ध्याने तवैव चिन्तने लग्ना तत्परा। पुनः कीदृशी ? विपुला महती [१३]पुलकपालिः [१४]रोमाञ्चपंक्तिः यस्यास्या, ध्यानकल्पितस्य तव [१५] करस्य स्पर्शेन रोमाञ्चतीत्यर्थः। पुनः [१६] कीदृशी ? त्वद्दत्तं दन्तक्षतादिकं परिकल्प्य स्फीतसीत्कारं [१७]प्रवृद्धसीत्कारं [१८]यथा स्यात्तथाऽन्तः अभ्यन्तरे जनित उत्पादितो जडिमा जडत्वं यस्यां क्रियायां तद्यथा भवति तथा काकुना ध्वनिविकारविशेषव्याकुलं यथा स्यत्तथा व्याहरन्ती। ध्यानेन तव करं [१९] नीविबन्धनोन्मोचनासक्तं परिकल्प्य निषेधवाक्यं वदतीत्यर्थः।।३७।।

१.विधायामन्दकन्दर्पचिन्तां इति मुद्रित पाठः (नि.सा)-ड.विधत्तेऽमन्दकन्दर्प-चिन्ताज्वरजलनिधि-मग्ना-इ २.मृगनयनी-अ.ब.इ.फ.ग.ह.ज. ३.तदा-अ.ब. ४.कोटिकामस्मरणं करोति-इ.फ.ग.ह.ज. ५.सागर-इ.ग.ह. ६.नास्ति-अ.ब. ७.तं-अ.ब.इ.फ.ह.ज. ८.अलङ्कृती-इ.फ.ग.ह.ज. ९.नास्ति-ड. १०.शृङ्गाररसे-क. ११.नास्ति-ड. १२.महतः कामस्मरणं-ड. १३.पुलकपङ्क्तिः-ड.क.ल.म. १४.रोमपङ्क्तिः-ड.क.ल.म. १५.करस्पर्शेन-क.ल.म. १६.नास्ति-ड. १७.नास्ति-ड. १८.तः. १९.पर्यन्तं नास्ति-ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३७।। विपुलेति। हे कितव धूर्त। मन्द परवेदनानभिज्ञत्वात् मूढ। तव तुभ्यं विरहे इति रोषो वा। विपुलाः पुलकाः रोमाञ्चाः यस्याः सा पालिः कपोलप्रदेशः यस्याः सा। अन्तः मनसि जनित उत्पन्नो जडिमा जाड्यं काकुः ध्वनिविकारः, तया व्याकुलं यथा स्यात्तथा व्याहरन्ती, कन्दर्पचिन्ताज्वरः स एव जलधिः तस्मिन्निमग्ना, तव ध्याने लग्ना मृगाक्षी राधा, स्फीतः स्पष्टः उच्चै सीत्कारो रतिकलासुखं विषयसुखं येन तं ध्वनिं विधत्ते। व्यामोहात्सम्भोगासक्तेव करोतीति भावः। अत्र ज्वरस्य

समुद्रत्वेन निरूपणाद्रूपकालङ्कारः। मृगाक्षीत्यत्र लुप्तोपमा। अनयोस्संसृष्टिः। चिन्त स्मरेति पाठे स्फीतसीत्कारपदस्यापि क्रियाविशेषणत्वम्। चिन्ता विद्यत इत्यन्वय। स्मर एव जलधिः। शेषं पूर्ववत्। अत एव सम्भोगासक्तानुकरणं यउक्तं, तस्य चिन्तानुभवत्वादिति युक्तः पाठः।।३७।।

### (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३७।। **विपुलेत्यादि**। हे कितव! शठ! मृगाक्षी राधा, अमन्दकन्दर्पचिन्ताम् अमन्दा अनल्पा चासौ कन्दर्पचिन्ता कामदेवचिन्तनं चेति। तां विधाय कृत्वा तव रसजलधिनिमग्ना रसः शृङ्गारो जलधिरिव वैपुल्यात् तत्र निमग्ना तदन्तर्लीना बभूवेत्यर्थः। अन्योऽपि अतिशयचिन्तापीडितो मर्तुकामः समुद्रादौ मग्नो भवति। ननु यदि समुद्रपतिता सा तत् कथं तत्रावलम्बनमन्तरेण जीवतीत्याह, **ध्यानलग्नेति**। जीवत्यत्राप्यनुसन्धानं कर्तव्यम्। यथा कश्चित् समुद्रपतितः पुनर्मरणभयात् कुशकाशावलम्बनं कुरुते तथा असावप्युपायान्तराभावेन तव ध्यानलग्नेत्यभिप्रायः। किं कुर्वती? **अन्तरिति**। अन्तः अन्तरे योऽसौ जडिमा जडत्वं तेन जाता या काकुः शोककृतध्वनिविकारः तया व्याकुलं यथा स्यादेवम्। ''काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनिः'' **इत्यमरः**। व्याहरन्ती कथयन्ती, व्याहरणसमकालमेव तव चिन्तां कृत्वा ध्यानलग्नेत्यर्थः। ''रसेऽवस्थाविशेषः स्याज्जडिमा जाड्यमम्बुधौ'' इति। उक्तं च शृङ्गारतिलके, ''अ(आ)काण्डे यत्र हुंकारो दृष्टिस्तब्धा गता स्मृतिः। श्वासाः समधिकाः कार्श्यं जडतेयं स्मृता यथा।।'' इत्यस्ति। व्याहरणक्रियाविशेषणद्वयमाह। विपुला महती पुलकपाली रोमाङ्कुरपङ्क्तिर्यत्र व्याहरणे इति "विग्रह"ः। दृष्टं च लोके यः कश्चिदत्यन्तानुरागस्य देवतादेरनुभावं कथयन्नेव पुलकिताङ्गो भवतीति। किं वा रसे सात्त्विकभावोत्थे? रोमाञ्चः शैत्यजोऽम्बुधौ विपुला पुलकपालिर्यस्या इति "राधाविशेषणं" वा। अत्र पक्षे ''वा शरि'' इति "विसर्गलोप"ः। ''पालिरश्र्यङ्कपङ्क्तिषु'' **इत्यमरः**। तथा स्फीतः प्रवृद्धः सीत्कारो यत्र व्याहरणे। ''रसे हर्षः समुद्भूतः सीत्कारः शैत्यजोऽम्बुधौ'' इति। एतेनाङ्गिकः सात्त्विकश्च कामविकारो दर्शितः। यद्वा ध्यानेन त्वयि लग्ना सती रसजलधिनिमग्नाभूदिति सम्बन्धः। कितवेति शठाख्यो नायकविशेषः। यदुक्तम्, ''प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्। मुक्तापराधचेष्टश्च कुटिलोऽसौ शठो यथा।।'' इति। मालिनी नाम वृत्तम्।।३७।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३७।। स्पख्यार्त्तिस्मरणेन अतिव्याकुला सा सेर्ष्यमिव पुनराहविपुलेति। हे धूर्त्त! कण्ठगतप्राणां तां वनमानीय निश्चिन्तोद्धसीत धूर्त्ततया सम्वोदनम्। अनल्पकन्दर्पचिन्तां

हृदि कृत्वा मृगाक्षी सरलचित्ता श्रीराधा तव रससमुद्रे निमग्ना वभूव चेत् आलम्वनं विना कथं जीवति तवेत्यर्थात् ज्ञेयम्: समुद्रमग्नो यथा काष्ठादिकमेवालम्वते तथेयमप्युपायान्तरा भावात्तवध्यानेलग्नेत्यर्थः। ध्यानप्राप्तसङ्गमविकारमाह-विपुला रेमाञ्चपंक्तिर्यस्याः सा तथा स्पीतसीत्कारं यथा स्यात्तथा व्याहरन्ती, अभ्यन्तरे जनितो योद्धसौ जड़िमा जाड़्य तेन जाता या काकुस्तया व्याकुलमित्यपि क्रियाविशेषणम् । जलधिमग्नस्यापि जाड़्यादयो भवन्तीत्यर्थः।।३७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३७।। न केवलमात्मनश्चिन्तयैव सा सीदति, किन्तु तव चिन्तयाऽपीत्याह विपुलेति। हे कितव ! धूर्त्त ! विरहक्षीणां तां रात्रौ वनमानोयात्र निश्चिन्तोऽसीति कितवत्वेन सम्बोधनम्। मृगाक्षी, अव्याजमनोहराङ्गी राधा, अनेन सा खेदयितुमनर्हेति सूच्यते। तत्प्रेमस र्वस्वभूतस्य, तवामन्दा महती कन्दर्पसकाशात् या चिन्ता किंवा अमन्दः अतितीव्रो यः कन्दर्पस्तत् सकाशात् या चिन्ता, अतिदारुणा खल्वहं, यस्याः कृते सकललोचनलोभनीयमाधुर्यैकसारमूर्त्तिः खिद्यते। किं करोमि कृतपापा, कथमाश्वासयामि मदर्थानुभूतमन्मथ-कदर्थनं परमसुकुमारमित्यादिरूपा भावना। तां विधाय, हृदि कृत्वा ध्यानलग्ना त्वयि समाहितसकलेन्द्रियवृत्तिः सती रसजलधौ, अभिलाषसमुद्रे निमग्ना। मग्नं त्वामुद्धर्त्तुमिव नितरां मग्ना भवतीति भावः। अभिलाषस्य बहुवृत्तित्वात् जलधित्वेन रूपणम्। निमज्जनलक्षणमाह, कीदृशी विपुला सर्वाङ्गसंचारिणी पुलकपालिः, रोमाञ्चश्रेणी यस्याः सा, स्फीतः समृद्धः सीत्कारो यत्र तत् यथा स्यात्तथा। अन्तर्मनसि जनित उद्भूतो यो जडिमा जाड्यं तेन। काकूरन्तःस्थितभावव्यञ्जकस्वरविशेषस्तया व्याकुलं च यथा स्यात्तथा व्याहरन्ती। घनस्वीत्कारान्विता गद्गदिकानिरुद्धकण्ठतया किमपि जल्पन्तीत्यर्थः। वर्त्तत इति शेषः। यद् वा स्वसख्या उत्कण्ठातिशयं विशेषेण वर्णयतीति आभासः। हे कितव! मृगाक्षी स्वतः अनुकम्पनीया राधा शृङ्गाररससर्वस्वभूतस्य तव ध्यानलग्ना, निरवच्छिन्नभावनासक्ता सती अमन्दा बहुविधा या कन्दर्पसम्बन्धिनी चिन्ता, त्वया सह सम्भोगचिन्तनं तां हृदि विधाय अभिलाषसमुद्रे नितरां मग्ना भवतीत्यर्थः। अन्यत् समानम्। प्रेमसरलचित्तां तामेवमुत्कण्ठापयन् विनोदम् आरभस्व इति तव कितवत्वं सत्यमेवेति भावः। रोमाञ्चादयः सात्त्विकाः।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलयः इत्यष्टौ सात्त्विकाः स्मृताः।। इति।।३७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३७।। विपुलेति; मृगाक्षी श्रीराधा इदानीं ध्यानलग्ना भवति। तव छलनाद्वारा सा व्याकुलिता भवति। तेन कामसन्तप्ता रससमुद्रे निमज्जिता सती ध्यानलग्ना भवति। यथा समुद्रमग्नः काष्ठखण्डमवलम्बते तथैव सा त्वन्नामध्यानलयावलम्बनेन जलधिमग्नशैत्यानुभवे यथा जनाः वेपन्ते तथैव सा अस्पष्टमदनव्यथायां रोमाञ्चति कदा च सा उच्चैः सीत्कारं रोमाञ्चजन्यशब्दमपि करोति। विपुलपुलकपालिविस्तारित रोमाञ्चानुभवः।।३७।।

**३८-अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि संचारिणि**
**प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।**
**इत्याकल्पविकल्पतल्परचनासंकल्पलीलाशत-**
**व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ।।३८।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३८।। अङ्गेष्वाभरणं करोतोति समेत्य कृष्णो मादृशीं दृष्ट्वा मन्दमना भविष्यतीति कृत्वा एतेनाकल्पः '' आकल्पवेशौ नेपथ्यमि**त्यमर**''। पत्रेऽपि सञ्चारिणि प्राप्तं त्वां परिशङ्कत इति एतेन विकल्पः। शयिष्यति वितनुते शय्यामिति, आगत्येह कृष्णः शयित इति कृत्वा एतेन तल्परचना सङ्कल्पलीलाशतव्यासक्तापि वरतनूरेषा त्वया विना निशां न नेष्यति मरिष्यतीत्यभिप्रायः। कुतो विरहखिन्नायाः सुरतावाप्तिं विना वेशादिव व्यवशय्यमाना दुःखहानिः। उक्तं च,

कीचके दहति त्वदलाभेन मन्मथो मामवारितः।
प्राप्तकान्तस्य दयित कुतः शान्तिरवारिता ।। इति ।।

इति श्रीकविराज श्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां वासकसज्जावर्णने सोत्कण्ठवैकुण्ठो नाम षष्टः सर्गः।।३८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३८।। इदानीं सा राधा ध्यानादिना त्वया सह रममाणापि साक्षात्त्वामलभमाना न कथंचिन्निर्वृतिमेष्यतीत्याह-अङ्गेष्विति। हे माधव! एषा मत्सखी। एषेति एतत्पदप्रत्यक्षे व्यापाराबुद्धौ प्रत्यक्षीकृत्याह। एषा वरतनुरित्येवंक्रमेण आकल्पविकल्पतल्परचना-संकल्पलीलाशतव्यासक्तापि नेपथ्यवितर्ककिसलयशय्याविरचनत्वत्प्राप्त्युचित-विलासशयनेष्वासक्तापि सती त्वया विना निशां न नेष्यति निशां नेतुं न शक्ता

भविष्यतीति। इतीति किम् ? तान्येव कानिचिदाह, अङ्गेषु अवयवेषु त्वच्चित्तापहारि आभरणं करोति। कथं ? बहुशः। बहुश इति अननुरूपपरित्यागेन त्वच्चित्तप्रीतिकर-परिग्रहो द्योत्यते। अपि च, पत्रे वृक्षपत्रे पतत्रिपक्षेऽपि वा। 'अपि'शब्दात्तृणादिपरिस्पन्दो लभ्यते। तस्मिन्संचारिणि संचरणशीले त्वामेव प्राप्तं परिशङ्कते विचारयति। अत्र एवकारं विनापि 'पार्थो धनुर्धरः' इतिवत्सर्वाणि वाक्यानि सावधारणान्येवेति कृत्वा एवकाराक्षेपः। अपि च अवश्यमागमिष्यतीति कृत्वा शय्यां वितनुते। तत स्त्वामपश्यन्ती चिरं त्वामेव ध्यायति। शय्यां विरचय्य तेन सह मयात्रैव कामकेलयः कर्तव्या इति चिरं ध्यायति। अन्योऽपि यः कश्चिन्मानसव्यथरभिभूतो रजन्यतिवाहनेऽसमर्थः स तदतिवाहनार्थं कार्यान्तरव्यासक्त्या चेतो रमयति। शार्दूलविक्रीडितं वृत्तं, समुच्चयोऽलंकारः।।३८।।

## (३) जगद्धरकृत- सारदीपिका

।।३८।। अङ्गेष्यिति एषावरतनुः सुन्दराङ्गी एषेतिबुध्या प्रत्यक्षीकृत्य वदति राधा अङ्गेषु हस्तादिषु आभरणं अलङ्कारं बहुशः करोति अनेनाकल्पः कथितः पत्रे अपि वृक्षपत्रेपि सञ्चारिणि पक्षादिनाचलतिसति त्वामागतं परिशङ्कतेसर्वतः वितर्कयतीत्यर्थः अनेन विकल्पः अपि च त्वामागतं ज्ञात्वा तव कामकेलिनिमित्तं शय्येयं वितनुते कुरूते अनेन तल्पः कथितः चिरम्बहुकालं ध्यायति त्वदागमनोपायं चिन्तयति। रचनेयं दर्शिता कृष्णसङ्गमे मया इदमिदं कर्तव्यमित्यनेन सङ्कल्पलीलाशतमुक्तम् इति पूर्वोक्त प्रकारेण आकल्पो भूषणं विकल्पस्तर्कः तल्परचना शय्यारचना सङ्कल्पलीला शतम् एतेषु व्यासक्तापि त्वया विना त्वामृतोनिशां रात्रिं न नेष्यति प्रभातं प्रापयितुं समर्था न भविष्यतीत्यर्थः।।३८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३८।। पुनः कृष्णं त्वरयितुमाह, अङ्गेष्विति। हे कृष्ण! त्वया नैका वरतनुः सुन्दरी रात्रिं न नेष्यति न प्रभातं प्रापयिष्यति। कीदृशी ? इति अनेन प्रकारेणा-कल्पोऽलंकारः विकल्पस्त्वदा गमनशङ्का, तल्पं शय्या, तद्रचना संकल्पस्त्वदीयसङ्गा-दिध्यानमित्यादिलीलशतव्यासङ्गेऽपि त्वत्सङ्गाभिलाषिण्यास्तस्या न कुत्रापि मनो रमत इति भावः। अलंकारादिव्यासङ्गमेवाह, अङ्गेष्विति। अङ्गेष्वाभरणं करोतीति भाव। अनेनाकल्प उक्तः। अथ च बहुशो वारंवारं पत्रेऽपि संचारिणि पक्ष्यादौ चरणघातेन चलति सति त्वां प्राप्तमागतं परिशङ्कते। अनेन विकल्प उक्तः। अथ च, शय्यां शयनीयं वितनुते विस्तारयति। अनेन तल्परचनोक्ता ।अथ च, चिरं बहुकालं व्याप्य

त्वां ध्यायति चिन्तयति। अनेनं संकल्प उक्तः। तथा च तवागमनपरत्याशया एतैर्व्यापारैः संप्रति कालं नयति। यदि च सर्वथा त्वया न गन्तव्यं तदा त्वत्सङ्गं प्रति निराशा सती रात्रिं नेतुं न शक्ष्यतीति भावः। अल्पताख्यश्च हावो वर्णितः। तदुक्तम्, 'अल्पता सा तु कथिता प्रियस्यागमने सति। दिदृक्षयोभयोस्तद्वत्ससंभ्रममलंकृतिः' इति। 'आकल्पवेषौ नेपथ्यम्' **इत्यमरः**। 'तर्को विकल्पः शङ्का च' इति च। 'तल्पं च शयनीये स्यात्तल्पमट्टकलत्रयोः' इति **विश्वः**। 'संकल्पः कर्म मानसम्' **इत्यमरः**॥३८॥

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

॥३८॥ पुनरपि एतस्या एवावस्थान्तरं विज्ञापयति। अङ्गेष्विति। हे नाथ! वरतनुर्लिङ्गिताङ्गी एषा राधा बहुशोऽतेकवारम् अङ्गेषु करचरणाद्यवयवेषु आभरणं केयूरादि आभरणानि जातावेकवचनमेव करोति न्यास्यति। स्वस्य वासकसज्जिकात्वात् भवदागमनसम्भावनया अङ्गानि पुनः अलङ्कृतानि आचरतीत्यर्थः। अतएव पत्रे पर्णेऽपि किमुत अन्यस्मिन्नित्यर्थः संचारिणि चलति सति त्वां प्राप्तमागतं परिशङ्कते। तव ध्यानवशात् चलितं तृणादिकमप्यायान्तं भवन्तमेव तनुते इत्यर्थः। अनेनात्यासक्तिः सूचिता। अतएव शय्यामागतः तव स्थानयोग्यं तल्पं वितनुते कुसुमादिभिः सज्जीकरोतीत्यर्थः। अथं चिरं बहुकालं ध्यायति शरणागतं त्वां चिन्तयतीत्यर्थ। अथवा चिरं ध्यायति। अनागतं भवन्तं ज्ञात्वा किमिति नागतमिति विचारयतीत्यर्थः। इत्यनेन प्रकारेण यः आकल्प विकल्पः अङ्गेष्वाभरणारोपविकल्पः तल्परचना संकल्पः शय्यासज्जीकरणोद्योगस्ताभ्यां, यच्चान्यलीलाशतं विलासपरम्परा तेन च त्रिभिर्व्यासक्ता परायत्तचित्तापि किमुत साधनेनेति भावः। त्वया विना भवन्तं विना पृथग्विने (२-३-३०) त्यादिना तृतीया। निशां रात्रिं न नेष्यति नेतुं न समर्था इत्यर्थः। यथा कश्चनवियोगी वियोगकालीनां व्यथां व्यासङ्गादिनापनयति इयं तु व्यासङ्गचित्तापि वियोगकालीनां व्यथामपनेतु समर्या इति तद्व्यतिरेके प्रतीते व्यतिरेकालंकारः

शब्दे वार्थे वाक्षिप्ते औपम्ये वस्तुनोर्द्वयोः।
यद्भेदकथनं योऽयं व्यतिरेक उदाहृतः॥

इति लक्षणात्। अनेनानयोरत्युत्कृष्टं प्रेमरूपं वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः। निशेत्यत्र टापं टे बहुलानामिति टाप्॥३८॥

## (६) शुक्लध्वजनृपतिकृत- सारवती

॥३८॥ अथैवं स्वस्थैव सा तर्हि किमस्माकं प्रयोजनमित्याशंक्य तत्साङ्गमसुखस्य विशेषादर्शानमूलकत्वेन परमार्थतो न भवन्तं विना स्वस्था भवतीति तदार्तिमावेदयति।

एषा वरतनुः उत्तमशरीरा राधा त्वया विना निशां न नेष्यति। अत्र वरतनुपदोपन्यासेनौदासस्यानौचित्यमुक्तम्। यद्येतावत् कालं सुखेन प्राणिति तदा निशामपि नेष्यतीत्याशंक्याह, कीदृशी ? इत्यनेन प्रकारेणाकल्पविकल्पतल्परचनासङ्कल्पलीलाशतव्याशक्तापि तथा चेभिर्व्याशक्तै: कथं कथमपि एकद्वित्रियामयापनेऽपि यामिनीयापने भवन्त: प्रमाणामिति दर्शितम्। आकल्पविकल्पादिकं स्वयमेव दर्शयति, बहुशो वारम्वारम् अङ्गेषु, करचरणादिष्वाभरणमाकल्पं करोति, अहमेव सज्जीभूय माघवसन्निधि गच्छामीत्याशया। तथा च 'आकल्पवेशौ नेपथ्यमि'त्यमर:। पत्रेऽपि सञ्चारिणि चलति सति त्वां प्राप्तमागतं परिशंकते विकल्पयति। तदुक्तम्, 'विकल्प: संशये पक्ष' इति। ततो भवदागमनवुद्धयैव शय्यां वितनुते तल्परचनां करोतीत्यर्थ:। तदुक्तम् 'तल्पं शय्याट्टदारेष्वि'ति। अतो भवदागमनेन चिरं चिरकालं व्याप्य ध्यायति अर्थात् भवन्तम्। तदनेन सङ्कल्पकथनम्। तदुक्तं, 'सकल्प: कर्ममानसमि'ति। प्रियानुकृतिर्लीला, तस्या: शतं लीलाशतम्। तदुक्तम् 'अङ्गै'र्बेशैरलंकारै: प्रेमभिर्वचनैरपि। प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतं विदुरि'ति।। एतदपि मुहुरवलोकितमण्डनलीलामधुरिपुरहमिति भावनशीलेत्यनेनोपदर्शितम्।।३८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३८।। ध्यान[१]लग्नतामेव दर्शयति, [२]अङ्गेष्वित्यादिना। हे हरे। एषा वरतनु: सुन्दराङ्गी, [३]अवरतनु: [४]अस्वस्थाङ्गी वेति च्छेद:। त्वया विना निशां रात्रिं [५]न नेष्यति गमयिष्यति। किञ्च सा अङ्गेषु करचरणादिष्वाभरणं अलङ्कारं बहुशो वारं वारं करोति। पत्रेऽपि सञ्चारिणि [६] चलिते सति त्वां प्राप्तमागतं परिशङ्कते वितर्कयति। त्वामागतं ज्ञात्वा शय्यां शयनीयं वितनुते रचयति। [७]श्रीकृष्णसङ्गमे मयेदमिदं कर्तव्यमिति ध्यायति [८]चिन्तयति। [९] अनेन प्रकारेण (आ) कल्पो भूषणं विकल्पस्तर्क:[१]तल्परचना शय्यारचना सङ्कल्पलीलाशतं बहुविलासशतं एतेषु व्यासक्ताऽपि [२]आसक्ताऽपि।[३] तल्पं तु शयनीये स्यात्तल्पमकलत्रयो: इति विश्व: (७५.८)। आकल्पवेषौ नेपश्यं **इत्यमर:** (२.३.९९)। [४]तर्को विकल्प: शङ्का च इति, सङ्कल्प: कर्म मानसम् इत्यपि[५]।।३८।।

१.लग्नामेव-फ.ज. २.अङ्गेत्यादि-अ.ब.इ.फ.ग.ह.ज. ३.नास्ति-अ.ब.इ.ग.ह. ४.अस्वस्थाङ्गीति-ग.५.न नेष्यति न गमयिष्यति-ग.६.वलिते-इ.७.श्रीनन्दसुनुसङ्गमे-ग.८.नास्त-अ.ब.९.इत्यनेन-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३८।। [६]अङ्गेष्विति। एषा वरतनु: सुन्दराङ्गी। एषेति बुद्धया प्रत्यक्षीकृत्य वदति। राधा [७]अङ्गेषु हस्तादिष्वाभरणं[८]अलङ्कारं बहुश: करोति। एतेनाकल्प उक्त:। [९]पत्रेऽपि

पर्णेपि सञ्चारिणि चलिते सति त्वां प्राप्तमागतं परिशंकते [१०] तर्कयति एतेन विकल्प उक्त:। त्वामागतं ज्ञात्वा शय्यां[११]शयनीयं वितनुते। एतेन तल्परचनोक्ता। चिरं ध्यायति [१२]चिन्तयति, कृष्णसङ्गमे मया इदमिदं कर्तव्यमिति। अनेन सङ्कल्पलीलाशत-[१३]मुक्तम्। इति पूर्वोक्तप्रकारेण आकल्पो भूषणं विकल्पस्तर्क: तल्परचना शय्यारचना [१४]सङ्कल्पलीलाशतं [१५]रतबहुचिन्तनविलास [१६]शतं एतेषु व्यासक्ताऽपि त्वया विना निशां रात्रि नेष्यति न गणयिष्यति।।३८।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३८।। वासकसज्जावस्थां वर्णयतिअङ्गेष्विति। एषा राधा अङ्गेषु कर्णादि। आभरणं बहुश: बहूनि करोति स्थापयतीत्यर्थ:। पत्रेऽपि पक्षिणि दलेऽपि सञ्चारिणि चलति सति त्वां प्राप्तं परिशङ्कते, त्वमागतोऽसि किमति शङ्कते ऊहां करोति। शय्यां वितनुते विस्तारयति। चिरं ध्यायति। इति पूर्वार्धोक्तप्रकारेण आकल्पानां भूषणानां [१७] विकल्पो विशेषकल्पना च, तल्पस्य शय्याया: रचना च, सङ्कल्पलीला: मानसा: रह:-क्रीडाविशेषास्तेषां शतं च तेषु व्यासक्ता व्यापृताऽपि त्वया निशां न नेष्यति। त्वां विना रात्रेर्दीर्घत्वात्सन्तापयतीत्यर्थ:। अत्र त्वां विनेति विनाशशब्दप्रयोगान्न विनोक्तिर-लङ्कार:। रम्यतारम्यतयोरभावात् चारुताया अप्रतिभानात्। यद्यपि व्यसक्ताया निशागमनं यउक्तं तथापि....।।३८।।

१.नास्ति-अ.ब.इ.ग.ह. २.नास्ति-अ.प्रसकतापि-इ.फ.ग.ह.ज. ३.तल्पं च शयनेऽपि स्यात्-इ.फ.ग.ह.ज.४.त:५.पर्यन्तं नास्ति-अ.ब.६.नास्ति-ड.७.अङ्गेष्वाभरणं बहुश: करोति-ड.८.नास्ति-ल.९.पत्रे पर्णे-क.१०.११.१२.नास्ति-ड.१३.उक्तमिति पूर्वोक्तप्रकारेण-ड.१४.नास्ति-ड.१५.बहुचिन्तन-क.१६.शतेषु व्यासक्ताऽपि-ड.१७.विकल्पा:-इ.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३८।। अङ्गैष्वित्यादि। इत्यनेन प्रकारेण आकल्पो वेश: विकल्पो मननं सम्भावनेति यावत्। तल्परचना शयनीयसम्विधानं सङ्कल्प: मानसं कर्म तस्य लीलाशतं शतशोऽवान्तरभेदा:। एतैर्व्यासक्तापि व्यासङ्गयुक्तापि एषा वरतनु: सुन्दराङ्गी त्वया विना निशां न नेष्यति नातिवाहयिष्यतीत्यर्थ:। इत्यस्यार्थमाह। अङ्गेषु बहुश: बहुप्रकारकमाभरणं करोतीति समेत्य कृष्णो मामीदृशीं दृष्ट्वा मन्दमना भविष्यतीति कृत्वा। एतेनाकल्प उक्त:। पत्रेऽपि सञ्चारिणि सति त्वां प्राप्तमागतं परिशङ्कते। एतेन विकल्प उक्त:। शय्यां वितनुत इति। आगत्येह कृष्ण: शयिष्यत इति कृत्वा। एतेन तल्परचना उक्ता। चिरं ध्यायतीति। तस्मिन्नागते किं करणीयमिति कृत्वा। एतेन

लीलाशतमुक्तम्। ''सङ्कल्प: कर्म मानसम्'' **इत्यमर:**। कामज्वरसन्तप्तानां हि प्रियोपगूहनादिना विना अन्यव्यापारशतैरपि धृतिर्नोपपद्यते। उक्तं च, ''कीचके दहति त्वदलाभेन मन्मथो मामवारित:। तप्ताक्रान्तस्य दयिते कुत: शान्तिरवारिता।।'' इति।।३८।।

इति श्रीगीतगोविन्दटीकायां षष्ठसर्गविवरणम्

१. क. एतदन्तरं 'किं विश्राम्यसि...गिर:।।' इति श्लोक: प्राप्यते।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३८।। पुनरतिशीघ्रगमनाय तस्या वासकसज्जाचेष्टितमाहअङ्गेष्विति ।श्रीकृष्ण: मामेवं पश्यन् मन्दमना भविष्यति इत्यङ्गेष्वाभरणं बहुश: करोति, नागत इति त्यजति, पुन: करोतीति अनेनाकल्पवाहुल्यमित्याकल्प:। पत्रेडपि पक्ष्यादिना संचारिणि सति प्राप्तमागतं त्वां परिशङ्कते, अनेन विकल्प:। आगत्य श्रीकृष्णोडत्र शयिष्यत इति शय्यां वितनुते, अनेन तल्परचना चिरं ध्यायति तव सङ्गमरसं स्मरति, अनेन संकल्पलीलाशतमिति। अनेन प्रकारेण आकल्पविकल्पतल्परचना संकल्पलीला-शतव्यासक्तापि वरतनुरेषा त्वया विना निशां न नेष्यति।।३८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३८।। पुनश्च वासकसज्जावस्थां विशेषेणाह, अङ्गेष्विति। एषा वासक-सज्जावस्थामापन्ना वरतनुर्विरहक्षीणाऽपि अनपहतसौन्दर्या राधा त्वया विना त्वत्सङ्गमन्तरेणातिदीर्घतमां निशां रात्रिमपि सम्भावनायां न नेष्यति, गमयितुं समर्था न भविष्यति इत्यर्थ:। अतो न जाने कां दशामवाप्स्यतीति भाव:। तत् चेष्टितमाह, त्वदागमनसम्भावनया अङ्गेषु करचरणादिषु आभरणं वलयनूपुरादिभूषणं बहुशो बहुवारं करोति। त्वन्नयनोत्सवापादकमिदं न भवतीति पूर्वधारितमपि अलङ्कारमुत्सार्य पुनरन्यं, पुनरन्यतरं पुनरन्यतममिति बहुप्रकारं करोतीत्यर्थ:। इत्याकल्प:। पत्रेऽपि किमुतान्य-स्मिन्निति भाव:। सञ्चारिणि सति पवनवशेन चलिते सति त्वां प्राप्तं समीपमागतं परिशङ्कते। तर्कयतीति विकल्प:। 'तर्को विकल्प: शङ्का च' इत्यभिधानम्। तत: औत्सुक्येनापर्यवसितमण्डनैव शय्यां शयनीयं वितनुते। सज्जीकरोति। इति तल्परचना। चिरं ध्यायति। भाविसम्भोगचेष्टितानि एवं करोमि, एवं करोमीति चिन्तयति। इति सङ्कल्पलीलाशतम्। इत्यनेन प्रकारेणाकल्पविकल्पतल्परचना: करोति। सङ्कल्पलीला-

शतेषु व्यासक्तापि त्वया विना रात्रियापनमसम्भवम् 'आकल्पवेशौ नेपथ्यम्' **इत्यमरः**। सङ्कल्पः कर्ममानसमित्यपि। तल्पं च शयनीये स्यात् तल्पमद्रिकलत्रयोरिति विश्वः।।११।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३८।। अङ्गेष्वेति; हे श्रीकृष्ण तवानुगमनमभिलक्ष्य सा वारम्बारमाभरणेनात्मानमलंकरोति। पुनः यदा त्वदागमने विलम्बो जातः सा तत् सर्वमवतारयति। पुनरपि यदि पत्रमेकं पतति तर्हि सा तत्क्षणात् त्वमागच्छसीति मत्वा पुनरपि आभरणेन सज्जीकरोति वासरशय्यामपि समीकृत्य प्रस्तुवति। शयनीया शय्यां रचयति। त्वया सह रतिमेकान्ततः ध्यायति। परमियं दशा कतिकालपर्यन्तं स्थास्यति ? इयं तस्यारसहनीया भवति। अतः त्वया विना सा रजनीं न यापयितुं क्षमा भविष्यति। शार्दूलविक्रीडितम् छन्दः। समुच्चयोऽलंकारः। अत्रापि अभिलाषः चिन्ता उद्वेगरिति तिस्रः कामदशा कविना प्रपञ्चितमस्ति।।३८।।

**३८- क - किं विश्राम्यासि कृष्णभोगिमवने भाण्डीरभूमीरुहे**
**भ्रातर्यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम्।**
**राधाया वचनं तद्ध्वगमूखान्नेन्दान्तिके गोपतो**
**गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः।।३८-क।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)

### (२)राणाकुम्भकृत-रसिकप्रिया

।।३८-क।। इदानीमाशीर्व्याजेन सर्गान्तमाविष्करोति, किमिति। गोविन्दस्य गिरो जयन्ति सर्वोत्कर्षेण वर्तन्ते। भावगर्भतया वक्तुर्वैदग्ध्यख्यापनेन सर्वोत्कृष्टत्वम्। तत्त्वेन च नमस्कार्यत्वम्। किंभूता गिरो वाचः ? सायमतिथिप्राशस्त्य गर्भाः। सायंकालेऽतिथयः सायमतिथयः तेषां प्राशस्त्यं स्वागतादिसंभारेण प्रशंसा, तद्गर्भे यासां ताः। तथा, किंविशिष्टस्य गोविन्दस्य ? नन्दान्तिके नन्दसमीपे तत्तादृक्सङ्केतसूचनारूपमध्वगमुखान्निःसृतं राधाया वचनं जोपतः गोपायितुः। गां पालयतीति गोपः, गोपायतेः पचाद्यच्। 'आदायः' इति तलोपे सार्वविभक्तिकस्तसिः। तस्य गोपतः। अत्र पितुः सङ्केताशङ्का मा प्रासांक्षीदिति गोपने तात्पर्यम्। अत्र तदपह्नवादपह्नुतिरलकारः। प्रशंसाछद्मना व्याजोक्तिरपि। पितुः समीपे तादृग्वचो लज्जावहमिति तदपाकरणार्थं अप्रस्तुतप्रशंसापि।

तदिति किम्? हे भ्रातः पथिक! भाण्डीरभूमीरुहि इतः वटवृक्षे। किं विश्राम्यसि? अत्र विश्रामं मा कृथाः। कुत इति हेतुगर्भविशेषणमाह। किंविशिष्टे वृक्षे? कृष्णभोगिभवने। कृष्णश्चासौ भोगी च कृष्णभोगी, तस्य भवनं तस्मिन्। कृष्णसर्पावासे इत्यर्थः। अत्र 'भ्रातृ'पदेन भ्रातृव्यत्वम्। तेन च मत्सङ्केतस्थानमेतदिति व्यज्यते। पक्षे, कृष्णश्चासौ भोगी शृङ्गारी च तस्य निवासः। अत्रार्थद्वयाश्लेषिकृष्णशब्देन श्लेषोऽलंकारः। तर्हि किं कुर्वित्याशङ्क्याहइतो वटात्सानन्दनन्दास्पदं न यासि अपि तु याहि इति लोडर्थलक्षणो लट्। सानन्दमृद्धिमच्च तन्नन्दास्पदं चेति। अनेनात्र अन्यपरित्यागेन यत्प्रार्थ्यते तत्सुलभमिति। तर्हि दूरे भविष्यतीशङ्क्याह,दृष्टिगोचरं आसन्नमेव। सानन्देति पथिक विशेषणं वा। सांप्रतमानन्देऽपि सर्पदंशादकुशलतामाप्स्य-सीति औचितीमाह। अत्र कृष्णवटाद्यैरालम्बनौर्विभावैस्तदपाकृतिनिषेधाभिव्यक्तो रतिस्थायी विप्रलम्भाख्यः शृङ्गारो रसः। आशीरुत्तरे अलंकृती।

निसर्गचित्रोज्ज्वलयुक्तिसर्गं व्याचष्ट षष्टं रसिकप्रियायाः।
सर्गं नृपग्रामकिरीटरत्नं श्रीकुम्भकर्णस्तृणितस्मरोऽत्र।।

इति श्रीमहाराजाधिराजामिनवभरतश्रीकुम्भकर्णविरचिते श्रीकुम्भस्वामि मन्दरस्यादरे गीतगोविन्दविवरणे वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठः सर्गः।।३८-क।।

## (३) जगद्धरकृत- सारदीपिका

।।३८-क।। अधुना कविः सर्गान्ते भक्तानाशिचति किमिति गोविन्दस्य कृष्णस्य गिरः वाचः जयन्ति सर्वोत्कर्षेण वर्तते कीदृशः गिरः सायंकालेऽतिथिनां प्राशस्त्यं प्रशंसः तद्गर्भे आशये यासान्ताः व्याजोक्तिनामालङ्कारः कथंभूतस्य गोविन्दस्य नन्दान्तिके नन्दगोपपार्श्वेतत्तादृक्सङ्केत सूचनारूपं अध्वगमुखान्निः सृतं राधायाः वचनं गोपसङ्गोपनं कुर्वतः श्रृण्वतः किं तद्वचनं तत्राह हे भ्रातः पथिक इति कोमलान्तरेण भाडीर भूमिरूहि भाण्डीरनाम्निवटवृक्षे किं विश्राम्यसि विश्रामं मा कृथाः तत्र हेतुः कृष्णश्चासौ भोगी च तस्य भवने कालसर्पवासे पक्षे कृष्णस्य भोगिनः श्रृंगारिणो, विलासगृहे पक्षद्वयेन हस्तेयमिति भ्रातृपदोपादानं श्लेषालङ्कारश्चात्र तर्हि क्व यामीत्यत आह इति वटात्दृष्टितोगोचरं प्रत्यक्षी क्रियमाणं तत्सानन्दं सकलर्द्धिमन्तेन दस्यास्पदं नेदं गोपगृहं न यासि अपितु याहीति राधावचनं अध्वगमुखान्नन्दति अतो गोविन्दस्य गिरोजयन्तीत्यर्थः सोत्कण्ठ उक्तण्ठासहितो वैकुण्ठश्रीकृष्ण यत्र ।।३८-क।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां सोत्कण्ठवैकुण्ठ नाम षष्ठः सर्गः ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३८-क।। सर्गान्ते जयदेवः शमाशास्ते, गोविन्दस्येति। गोविन्दस्य गिरो वाण्यो जयन्ति सर्वोत्कर्षेण वर्तन्ते। कीदृशाः ? सायमतिथिप्राशस्त्यगर्भाः सायंकाले येऽतिथयस्तेषां प्राशस्त्यं स्वागतादिप्रशंसा 'धन्योऽयमतिथिर्गृहिणां पुण्योत्पादकः' इतिरूपा। वस्तुतस्तु प्रियाभिसारसंकेतज्ञापनादयं बहुसुखप्रदातेति गर्भेऽभ्यन्तरे यासां ताः। प्रशंसयाऽभ्यन्तरेऽभिप्रायविशेषयुक्ता इत्यर्थः। व्याजोक्तिरलंकृतिः। कीदृशस्य गोविन्दस्य ? नन्दान्तिके पितुः समीपे तादृक्संकेतसूचनारूपं अध्वगमुखान्निःसृतं श्रीराधाया वचनं गोपतः संगोपनं कुर्वतः। किं तत् ? हे भ्रातः पथिक! 'भ्रातः' इति कोमलामन्त्रणे, भाण्डीरभूमीरुहि वटवृक्षे किं विश्राम्यसि ? विश्रामं मा कृथाः। तत्र हेतुः कृष्णभोगिभवनेति। कृष्णश्चासौ भोगी च कृष्णभोगी, तस्य भवने बालसर्पवासे। पक्षेशृंगारिणः श्यामसुन्दरस्य विलासगृहे। पक्षद्वये नेह स्थेयमिति वेति 'भ्रातृ' पदोपादानम्। श्लेषालंकारश्च। 'कृष्णः केशवकृष्णयोः' इति **धरणिः**। 'भोगी कामुकसर्पयोः इति **विश्वः**। तर्हि क्व यामि इत्यत आह-इतो वटात् सानन्दं आनन्दसहितं नन्दगृहं न यासि, अपि तु याहि इति शून्यसर्पावासपरित्यागेन श्रीमद्गृहातिथ्येन च निर्वृतो भविष्यसीत्यर्थः। तद्दूरे भविष्यतीत्यत आह, दृष्टिगोचरमिति। आसन्नमेव पथिकवचनेन संकेतसूचनात् श्रीकृष्णस्य तादृग्भावप्रकटनेन श्रीराधाया वचांसि (८) जयन्तीत्यपि ध्वनितम्। अत्र चातुर्यादिगुणविशिष्टौ राधामोहनावालम्बनौ, स्वयं दूती नायिका, वटाद्युद्दीपनविभावाः। एवं रसराट् शृंगारो निरूपितः ।।३८-क।।

गुणेषु ये दोषदृशः परेषां ब्रूमः स्वदोषावरणाय किं तान्।
स्वतः पिधास्यान्ति मामत्र दोषान्सन्तस्ततस्तनपि किं ब्रवीमि।।

इति श्रीमहामहोपाध्यायश्रीशकंरमिश्रविरचितातां श्रीशालिनाथकारितायां गीतगोविन्द-टीकायां षष्ठः सर्गः।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३८-क।। एकोऽतिथिर्नन्दगोपग्रहं गच्छन् पथि भाण्डीरनामकवटवृक्षतटे विश्रामं कुर्वन् सङ्केतस्थानमागतया राधया किमप्युक्तः तद्वचनं नन्दान्तिके कथयन् लज्जापरवशेन कृष्णेन वारित इति वर्णयन् कविः ग्रन्थप्रक्रमं विहाय सर्गशेषे जनानामाशिषमाह। सायं सन्ध्यासमये गोविन्दस्य गिरः वचनानि जयन्ति वैष्णवानां विघ्ननिवारणं कुर्वन्त्वित्यर्थः। किम्भूता गिरः ? अतिथेः प्राशस्त्यमेव गर्भे यासां ताः। केचिद्

गोविन्दस्य गिरो वाचो जयन्ति उत्कर्षेण वर्धन्ताम् किम्भूता: ? सायमतिथिप्राशस्त्यगर्भा:। सायं सन्ध्यासमये यदतिथीनां प्राशस्त्यं प्रशंसा, तद् गर्भे आशये यासां तास्तथा। 'दिनातिथौ तु विमुखे गते यत् पातकं नृणाम्। तदेवाष्टगुणां पुंसां प्रदोषे विमुखे गते।।' इति स्मृतौ यत् प्राशस्त्यं सन्ध्यातिथीनामुक्तं तदन्विता भारतीति भाव: इति व्याचक्षते।। गोविन्दस्य कथम्भूतस्य ? राधाया: तद्वचनम् अध्वगस्य तस्यैवातिथेर्मुखात् नन्दान्तिके नन्दसमीपे गोपत: प्रकृतार्थिस्तव व्याजेन प्रच्छादयत इत्यर्थ:। राधाया: किं तद्वचनम् ? हे भ्रात: पथिक ! भाण्डीरभूमिरुहि भाण्डीर नामवटवृक्षप्रदेशे किं विश्राम्यसि विश्रामं करोषीत्यर्थ:। कीदृशे ? कृष्णभागिन: कालसर्पस्य भवने निवासस्थाने। तदनेनात्रावस्थाने भीतिरुत्पादिताछलतस्तु कृष्णस्य भोगिन: शृङ्गारादिभोगशालिन: भवने निवासस्थाने इत्यनेन संकेतस्थानत्वं दर्शितम्। इतो दृष्टिगोचरं सानन्दनन्दास्पदम् उत्साहसहितं नन्दावासं न यासि न गच्छसीति लोकक्तौ। अत्र नन्दास्पदस्य साननिकटत्वप्रतिपादनेना तत्र गमनेऽध्वगस्य उत्कण्ठा जनिता। भोग: स्याच्च सुखे अहेश्च फणकाययोरि'ति **"विश्व"**:। 'भोगी कामुकसर्पयोरि'त्यपि। सोत्कण्ठाराधाचरितज्ञानेन वैकुण्ठो यत्रेति व्युत्पत्त्या सोत्कण्ठैकुण्ठेति सर्ग नाम।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लजविरचितायां सारवत्यां गीतगोविन्दटीकायां सौत्ककण्ठवैकुण्ठो नाम षष्ठ: सर्ग:।।३८-क।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३८-क।। सर्गान्ते कविराशिषमाशास्ते, किमिति। गोविन्दस्य [२]गिरो वाण्यो जयन्ति। कीदृशा: ?[३] सायमतिथिप्राशस्त्यं [४]सायङ्कालागतातिथिस्वागतादिस्तुति[५]वचन गर्भेषु यासां ता:। केचिन्नन्दग्रामस्थाया राधाया वचनं अध्वगमुखाच्छ्रुत्वा नन्दन्ति हर्षातिशयं प्राप्नुवन्ति। मुहुवार वारम्[६]। वचनमेवाह-हे भ्रात: ! पथिक। भाण्डीरभूमीरूह भाण्डीखटे किं विश्राम्यसि ? विश्रामं मा कृथा:[८]। विश्रामाभावे हेतुमाह-कृष्णस्य[९] भोगिभवने सम्भोगमन्दिरे। किञ्च आनन्दसहितं [१०] नन्दगृहं[११]किमिति न यासि ? [१२] तच्च दृष्टिगोचरं सन्निहितमेव। शून्यगृहत्यागेन महद्गृहातिथ्येन च कृतार्थो भविष्यसीति भाव:। व्याजोक्तिरलङ्कार:।।३८-क।।

यावन्न साक्षात्तु तवाङ्गसङ्ग स्तावढवृथैवाथ परिश्रमोऽस्या:।
ध्यानेन किं हन्त मुहुस्सरस्या- [१३]स्तृष्णोपशान्तिर्ननु पानसाध्या ।।इति ।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस [१४] शिवदासात्मज श्रीवनमालिभट्ट-विरचितायां वनमालि सञ्जीवन्यां श्रीगीतगोविन्दटीकायां [१५] वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठ सर्ग:।।

१.नन्दान्तिके शृण्वतो-इ.२.नास्ति-अ.ब.३.नास्ति-अ.ब.इ.ग.ह.४.सन्ध्याकालीना-इ.फ.-ग.ह.ज.५.त:६.पर्यन्तं नास्ति-ग.७.त:८.पर्यन्तं नास्ति-अ.ब.९.भोगिन: भवने-इ.फ.ह.ज.-१०.नन्दास्पदं नन्दगृह-फ.ज.११.किमितो-ग.किमिति इतो-इ.फ.ह.ज.१२.तव दृष्टि गोचरमभिहि (त)-मेव-इ.१३.तृष्णोपशाम्यत्यनुपानसाध्येति-इ.फ.ग.ह.ज. १४.शिवदासपण्डितात्मज-ह.१५.नास्ति-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३८-क।। [१]सर्गान्ते मङ्गलमाह, [२]किं विश्राम्यसीति। कञ्चित् पथिकं प्रति [३] राधाया वचनम्। हे पथिक! [४] भाण्डीरभूमीरुहि भाण्डीरनाम वटवृक्षसमीपे किं विश्राम्यसि [५] किमित्यास्थीयते [६]? विश्रामाभावे हेतुगर्भविशेषणमाह। कीदृशे वृक्षे? [७]कृष्णभोगिभवने श्यामसर्पस्थाने। तत: श्रीकृष्णस्य [८] हरेर्भोगवत: स्थानमिति राधावचनाभिप्राय: सायंकालीनातिथिनिवारणजनितदोषभिया तं प्रत्या, हे भ्रात: बन्धो! [९]सानन्दनन्दास्पदं कथं न यासि [१०] गच्छसि। कीदृशम्? इत: स्थानात् दृष्टिगोचरं चक्षुर्विषयं; तस्यानन्दजननान्न दोष इत्यभिप्राय:। तत: केचिन्नन्दग्रामस्था: अध्वगमुखात् राधायास्तद्वचनं श्रुत्वा नन्दन्ति हर्षं प्राप्नुवन्ति। मुहु: पुन: [११] गोविन्दस्य कृष्णस्य गिरो वाण्य: जयन्ति सर्वोत्कर्षेण वर्तन्ते। उत्कर्षे हेतुगर्भविशेषणमाह। कीदृश्यो गिर:? सायङ्कालीनस्यातिथे: सुस्निग्धगर्भा: सुस्निग्धत्वमतिथ्यादरो [१२] गर्भ आशयो यास्वत एव ग्रामस्था: गोविन्दस्य गिरो वाणी: श्रुत्वा जयन्ति आनन्दपूर्णा भवन्ति। विशेषणं तथैव।[१३]किं विश्राम्यसीति क्षेपक: [१४]।।३८-क।।

[१५] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां धन्यवैकुण्ठो नाम षष्ठ: सर्ग: ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३८-क।। किमिति। हे कृष्ण! भोगिनां सर्पाणां भवने निलये भाण्डीसंरक्षक: भूरूह: वृक्ष: तस्मिन् किं किमर्थं विश्राम्यसि ; सर्पनिवासस्थले न स्थेयमित्यर्थ:। हे भ्रात: इति लोकानां पुर: प्रच्छादनार्थ सम्बुद्धि:। इत: अस्मात् प्रदेशात् दृष्टिगोचरं दृश्यमानं समीपवर्तीत्यर्थ:। आनन्देन सहित: नन्द: तस्य आस्पदं निवासस्थानं न [१६] यासि न गच्छसि। काकु:। न गच्छेत्यर्थ:। इति राधाया वचनं तदध्वगा: तन्मार्गगा: पान्था: तेषां मुख्यात् नन्दान्तिके नन्दसमीपे शृण्वत: गोविन्दस्य अतिथिवन्त्य: प्रशस्तस्य भाव: प्राशस्त्यं गर्भे मध्ये यासां ता: गिर: सायं जयन्ति।।३८-क।।

इति श्रीगीतगोविन्दव्यास्व्यायायां जयन्त्यास्व्यायां वासकसज्जावर्णनेधन्यवैकुण्ठो नाम षष्ठ सर्ग:

१.सर्गान्तमङ्गलमाह-ल.म.२.नास्ति-ड.३.राधाह-ड.४.नास्ति-ड.५.तः६.पर्यन्तं नास्ति-ड.७.नास्ति-ड.८.नास्ति-ड.९.सानन्दास्पदं-क.सानन्दनन्दस्य-ल.म.१०.न गच्छसि-क.११.नास्ति-ड.१२.गर्भ आशये यासां ताः अथवाऽत एर-ल.म.१३.तः१४.पर्यन्तं नास्ति- -क.ल.म.१५.नास्तीयं पुष्पिका-ड.क.ल.म.१६.यास्यसि-इ.

## (९) धनन्जय धरणीदेवकृत

## (९) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३८-क।। अथः कविरेतद्वर्णनव्याकुलस्तस्याभिसारात् पूर्वचरितं कथयन्नाह किमिति। गोविन्दस्य गिरो जयन्ति, श्रीराधिकाया मनोरथं पूरयन्ति इत्यर्थः। कीदृशस्य ? श्रीनन्दस्य समीपे पथिकस्य मुखात् श्रीराधायास्तद्वचनं गोपतः गोपयतः। किं तद्वचनं ? हे भ्रातः पथिक ! भाण्डीरनामतरुतले किं विश्राम्यसि, विश्रामं मा कृथा इत्यर्थः। कथं कृष्णभोगिनः कालसर्पस्य शयनस्थाने, पक्षे संभोगविशिष्टस्य श्रीकृष्णस्य। तर्हि इदानीं क्व यामि ? नन्दस्य आस्पदं गृहं किं न यासि ? कीदृशं ? आनन्देन सह वर्त्तमानं कियति दूरे इतः स्थानात् दृष्टिगोचरमितो दृश्यत इत्यर्थः। कीदृश्यो गिरः ? सायंकाले अतिथिस्तस्यैव प्राशस्त्यं प्रशंसादिरूपं तदेव गर्भोऽद्धभिप्रायो यासां ताः। अतएव धृष्टः प्रगल्भो वैकुण्ठो यत्र सः इति।।३८-क।।

इति बालवोधिन्यां षष्ठः सर्गः।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

अथ कविरीदृशोत्कण्ठाभिवर्णनव्याकुलस्तस्या अभिसारपूर्ववृत्तान्तवर्णनेन रसान्तरमुपक्षिपन् सर्गं समापयति। किमिति; गोविन्दस्य गिरो वाचो जयन्ति। कीदृशस्य सायं सन्ध्यासमये नन्दस्य स्वपितुः व्रजराजस्य समीपे अध्वगस्य पथिकस्य मुखात् राधायास्तत् साभिप्रायवचनं गोपतः गेपायतः। गिरः कीदृश्यः, अतिथेस्तस्यैव प्राशस्त्यं प्रशंसादिरूपं, तदेव गर्भोऽभिप्रायः, यासां ताः। तथा किं तद् राधाया वचनमिति अपेक्षायामाह, किमिति। हे भ्रातः! सोदर इति अनुकम्पोक्तिः। भाण्डीरभूमीरुहे भाण्डीरनामकवटवृक्षे, अर्थात्तस्य तले किं विश्राम्यसि, विश्रामं मा कृथा इत्यर्थः। अविश्रामे हेतुमाह, कीदृशे, कृष्णभोगिनां कालसर्पाणां भवने निवासभूते, रात्रौ अत्र कालसर्पाः आगच्छन्तीत्यर्थः।

पक्षे कृष्णस्य सम्भोगक्रीडास्पदे इत्यान्तरार्थः। तर्हि क्व यास्यामि, इतो दृष्टिगोचरं नातिदूरं सानन्दं कृष्णाधिष्ठितत्वादानन्दसहितं यन्नन्दास्पदं व्रजराजस्य

मन्दिरम्, अनेन अतिथिविश्रामयोग्यत्वं सूचितम्। अत्रायं भावः, राधाया अभिप्रायमजानन् कश्चित् पान्थः समागत्य नन्दसमीपे कृष्णस्य समक्षं यथाश्रुतं कथितवान् । कृष्णस्तदभिप्रायं विदित्वा तत्कथनसमय एव तस्य प्रशंसावचनव्याजेन तत् वचनार्थं गुप्तं कृतवानिति।।३८-क।।

इति श्रीगीतगोविन्दे अकुण्ठवैकुण्ठनाम षष्ठसर्गः।

अत एव अकुण्ठः प्रगल्भः वैकुण्ठो यत्र तन्नामाऽयं सर्गः।

।। इति श्रीगीतगोविन्दव्याख्यायां रसिकरङ्गदाख्यायां षष्ठसर्गः समाप्तः।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३८ (क)।। किमिति; कृष्णस्य वाणी जयति। कुञ्जे स्थातुं कश्चित् अतिथि श्रीराधायाः वचनं वक्तुं श्रीकृष्णसमीपं प्रेरितः। तस्मै वक्तव्यं यत्, हे पथिक! त्वं भाण्डिर नाम वटवृक्षस्याधः न स्थातुं शक्तः। यतो ह्यत्र श्रीकृष्णः भोगी श्रीकृष्णसर्पस्य भवनम्। अर्थात् एतत्स्थानं श्रीकृष्णनामधेयस्य भोगार्थं निरुपितमस्ति। अत्र सर्पस्थाने विश्रामं वृथा भविष्यति। त्वं नातिदूरस्थे नन्दस्य नाम आनन्दस्य गृहे सुखं रात्रिं यापयिस्यसि। शून्यगृहत्यागेन मद्हृद्गृहातिथ्येन कृतार्थो भविष्यतीति व्याजवचनं श्रुत्वा नन्दात् केलीकलापं संगोप्य दूताय धन्यवचनं प्रशस्तिं ञ्च दत्तवान्। एवं भूतः श्रीकृष्णचन्द्रस्य जयो भवतु।। व्याजोक्तिरलंकारः।।३८-क।।

हे बन्धो दिनबन्धो हे! कार्याकारणकारण।
तारयस्व महादुःखात्सर्वताप- विनाशक!।।१ ।।
लाभलोभप्रदेशेन मनो दन्दह्यते सदा।
ऋजुताज्ञान भावेन विषयभोगतारणम्।।२ ।।
इति।। कविः श्रीप्रफुल्लमिश्रविरचितायां स्वर्णलताटिप्पण्यां षष्ठसर्गः।।

❁ ❁ ❁

# ।। सप्तमः सर्गः ।।

## नागरनारायणः



# ।। सप्तमः सर्गः ।।

।नागरनारायणः।

**३९- क-हारावलीतरलकाञ्चनकाञ्चिदामा**

**केयूरकङ्कणमणिद्युतिदीपितस्य।**

**द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष**

**व्रिडावतीमथ सखीमियमित्युवाच।।(१जयन्ती)**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया (टीकानास्ति)**

**(३) जगद्धरकृत- सारदीपिका (टीकानास्ति)**

**(४) शंकरमिश्रकृत- रसमञ्जरी(टीकानास्ति)**

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी(टीकानास्ति)**

**(६) शुक्लध्वजनृपतिकृत- सारवती (टीकानास्ति)**

**(७) वनमालि भट्टकृत- सञ्जीवनी(टीकानास्ति)**

**(८) नारायण पण्डितकृत- पदद्योतनिका**

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।३९।। हारावलीति। हारावलीषु तरलाः मध्यमणयः काञ्चनकाञ्चिदामा केयूरौ च कङ्कणानि च तेषु मणयः तेषां द्युतिभिः कान्तिभिः दीपितस्य उज्ज्वलीकृतस्य (नि) कुञ्जनिलयस्य द्वारे व्रीडावतीं ह्रीणां समागतमिति शेषः। सखीं इति वक्ष्यमाणप्रकारेण उवाच ? किं कृत्वा ? क्रीडावतीमित्यवेक्ष्य हरिं अन्यासक्तं निरीक्ष्य विनैवागतामित्यर्थः।।३९।।

**(१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)**

**(११) पूजारी गोस्वामीकृत- बालवोधिनी (टीकानास्ति)**

**(१२) लक्ष्मणकृत- रसिकरङ्गदा (टीकानास्ति)**

**(२३) प्रफुल्लमिश्रकृत-स्वर्णलता टिपणी नास्ति।**

**३९- अत्रान्तरे च कुलटा कुलवर्त्मपात-**
**संजातपातक इव स्फुटलाञ्छनश्री:।**
**वृन्दावनान्तरमदीपयदंशुजालैर्**
**दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दु:।।३९-क।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३९-क।। अत्मिन्सर्गेऽपि विप्रलब्धा वर्णणीया। तथाहि तल्लक्षणमुक्तं नायिका-लक्षणे;

अहरहरनुरागाद्दूतिकां प्रेष्यपूर्वं
सरभसमभिधाय क्वापि सङ्केतकं वा'।
न मिलति खलु यस्या वल्लभो दैवयोगात्
प्रवदति भरतस्तां नायिकां विप्रलब्धाम्।।

इति **भरताचार्य्य:**। तां विप्रलब्धां वदति उत्तरगीतार्थं श्लोकद्वयेनावतारयति। अत्रान्तरे वृन्दावनान्तरमंशुदिपैरिन्दूरदीपयदिति योजना। कीदृक् दिक्सुन्दरीवदन-चन्दनविन्दुरिन्दु: ''विन्दु: स्यादप्यनुस्वारे विज्ञातरि च विप्रुषि'' इति **विश्व:**। पुन: कीदृक् स्फुटलाञ्छनश्री:, एतेन चन्द्रस्य परिपूर्णता प्रतिपादिता। अत्र कुलटाकुलवर्त्मपात संजातपातक इत्युत्प्रेक्षा कुलटा नाम सतीनां कुलवर्त्म पातेन वर्त्मविरोधेन जातं पातकं यस्येति विग्रह:। य: पातकी भवति स खलु लाञ्छनेत्यभिप्राय:[१]। वसन्ततिलकं वृत्तम्।।३९।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३९-क।। इदानीं मानिनीमानखण्डनाखण्डमण्डलं चन्द्रोदयं वर्णयन्नाह; अत्रान्तर इति। अत्रान्तरे एतस्मिन्नवसरे इन्दुर्वृन्दावनान्तरमंशुदीपैरदीपयत् प्रकाशितवान्। किंविशिष्ट? स्फुटलाञ्छनश्री: स्फुटकलङ्कशोभ:। उत्प्रेक्षते, कुलटा कुलवर्त्मघात-संजातपातक इव। अन्योऽपि य: कश्चन यस्य कस्यचन मार्गघातं करोति स कलङ्की भवत्येव। किंभूत इन्दु:? दिक्सुन्दरीवदनश्रीखण्डतिलक इव। वसन्ततिलका। अत्र रूपकोत्प्रेक्षे अलंकृती।।३९।।

## (३) जगद्धरकृत- सारदीपिका

।३९-क।। अथ तस्याः विप्रलब्धावस्थां वर्णयितुं कविः कृष्णस्यानागमनशङ्काहेतु-कचन्द्रोदयं वर्णयति अत्रेति। अत्रान्तरे स्वप्राणेश्वरीश्रीराधाया विरहोत्कण्ठार्त्तिश्रवण-द्विगुणितोत्साहं श्रीकृष्णं सखी यावन्नानीतवती, एतदभ्यन्तरे इन्दुः पूर्णचन्द्रः अंशुदीपैः किरणप्रदीपैः वृन्दावनस्यान्तरं मध्यमदीपयत्, दीप्तं चकार। अंशुवृन्दैरिति पाठे स्पष्टोऽर्थः। कीदृशः, दिक्सुन्दर्याः प्राचीरमण्याः वदनस्य वदनैकदेशललाटस्य तिलकायमानचन्दनबिन्दुरिव दृश्यमान इत्यर्थः। किं च स्फुटाव्यक्तीभूता कलङ्कस्य श्रीः शोभा यत्र सः। चन्द्रस्य पूर्णत्वात् कलङ्कस्य स्फुटत्वमुत्प्रेक्षते। कुलटानां, नायकानुरागिणीनां कुलस्य समूहस्य वर्त्मपातेन अभिसारमार्गनिरोधने सञ्जातं पातकं यस्य स इव। पातकसादृश्यत्वात् कृतरोगविशेषो ग्राह्यः। कार्येण कारणमनुमीयते इति न्यायात्। यः खलु पातकीभवति, सः कुष्ठादिरोगविशेषचिह्नितो भवति। धातूनामने-कार्थत्वात्, पातकस्य निरोधार्थत्वम्। घात इति क्वचित्। तदा स्पष्टार्थः। फलोन्मुखकार्यस्य विघातनाच्चन्द्रमसि कवेः परुषोक्तिरियम्।।३९।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३९-क।। अत्रान्तर इति। अत्रान्तरेऽस्मिन्नवसरे। इन्दुश्चन्द्रोंऽशुजालैः किरणसमूहै-र्वृन्दावनान्तरं वृन्दावनमध्यमदीपयत्प्रकाशितवान्। दिक् पूर्वा, दिक्सैव सुन्दरी कामिनी तस्या वदनस्य मुखस्य चन्दनविन्दुर्मण्डलाकारचन्दनतिलकम्। अत्र पूर्णचन्द्रो वर्ण्यत्वेन बोध्यः; खण्डचन्द्रे चन्दनविन्दुसादृश्याभावात्। पुनः कीदृशः ? स्फुटीभूता प्रकटिता लाञ्छनस्य कलङ्कस्य श्री शोभा यत्र तादृशः। कुलटाकुलस्य व्यभिचारिणीसमूहस्य यो वर्त्मपातः संकेतगमनमार्गप्रतिरोधस्तेन संजातं पातकं यस्य सः। अपरस्यापि कृतपापस्य कलङ्कः स्फुटीभवतीति ध्वनिः।।३९।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३९- क।। अथ कृष्णे आगमनविलम्बनं कृतवति प्रभूतं राधायाः विरहं गीतेन वर्णयितुं मदनोद्दीपकं चन्द्रोदयं वर्णयति। अत्रान्तरे इति। अस्मिन् सर्गे विप्रलब्धा नायिका। तस्याः लक्षणं तु,

क्वचित्संकेतमावेदयितेनाथ वीक्षिता।
स्मरार्त्ता विप्रलब्धेति सूरिभिः परिकीर्त्तिता।। इति।।

अत्रान्तरे अस्मिन् सर्गे राधाया अङ्गालङ्करणन्याससज्जीकरणकाल इत्यर्थः। कुलटानां पुंश्चलीनां ''पुंश्चलीधर्षणी बन्धक्यसती कुलटाः समाः'' **इत्यमरः**। कुलस्य

वृन्दस्य वर्त्ममार्गः तत्र पातः पतनं तदनुकरणं तद्व्यभिचारदूषितत्वमित्यर्थः। तेन संजातमुत्पन्नं पातकं यस्य स तादृश इव उक्तं च चन्द्रोपालम्भे,

गुरुकलत्रमवाच्यमहोरतौ
गुरुकलत्रमसोनिरपत्रपः।
मुनिवधूपपतेर्दिशि जृम्बते
रमत एव हिता दृशितादृश।। इति।।

अथवा धातूनामनेकार्थत्वादिति न्यायेन कुलटा कुलबंर्त्मनः पातो निरोधस्तेन संजातपातक इव चन्द्रोदये जारिणीनां सङ्केतमन्दिरगमनविरोधात् चन्द्रसमस्तवर्त्मघातुकत्वमित्यर्थोऽवगन्तव्यः। कुलटाकुलवर्त्मघात इति केषुचित् पाठः। तदास्फुटम्। तादृश इव स्फुटं लाञ्छनश्रीः कलङ्कशोभा यस्य पातककलङ्कयोर निर्मलत्वात्तथोक्तमित्यवगन्तव्यम्। श्रीरित्यत्र समान्तः क प्रत्ययेन अदित्वात् तस्य, किञ्च दिक्सुन्दर्य्याः दिगङ्गनायाः वदनस्य वदनैकदेशललाटस्य चन्दनविन्दुः तिलकं जटिलतटललाटिकायमान इत्यर्थः। इन्दुश्चन्द्रः अंशुवृन्दैर्मयूखजालैः आशुदीषैरिति केषुचित् पाठः। तदास्फुटम्। वृन्दावनमध्यदेशमदीपयत्। बृन्दावनवर्त्ति राधा वासभूतमन्दिरसमीपे चन्द्रकिरणप्रसारो जात इत्यर्थः।।३९।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३९-क।। अथाभिसारिकाया विरहातिरेकवर्णनया चन्द्रोदयं वर्णयति। चकारः पुनरित्यर्थे। अस्मिन्नेवावसरे इन्दुः वृन्दावनान्तरं वृन्दावनमध्यम् अंशुजालैः किरणनिकरैरदीपयत् प्रकाशितवान्। किम्भूतः ? दिगेव सुन्दरी, तस्या वदने चन्दनबिन्दुः चन्दनकृतवर्तूलाकारतिलक इव, अतएव पूर्णमण्डलत्वेन स्फुटा प्रव्यक्ता लाञ्छनश्रीः कलङ्कशोभा यस्य एतादृशः अत्रोत्प्रेक्षते; कुलटानामसतीनां कुलं समूहः, तस्य वर्त्मघातो वत्मर्निरोधः, तेन सञ्जातपातक इव। अन्योऽपि पातकी कलङ्कवान् भवतीत्युचितम्। 'श्रीर्वेशरचनाशोभाविभूतिरुदधेः सुते'ति। 'कलङ्कांकौ लाञ्छनमि**त्यमरः**।।३९।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३९-क।। एवमुभयोरनुरागं निरूप्य रसान्तरं प्रकटयन्[३] चन्द्रदर्शनेन राधाविरहमाह- अत्रान्तर इत्यादिना। अत्रान्तरे[४] कृष्णविरहकाले इन्दुश्चन्द्रोंऽशुजालैः किरणसमूहैः बृन्दावनान्तरं मध्यमदीपयत् प्रकाशितवान्;[५] कामदीप्तं चकारेति वा। कीदृशः ? दिश एव सुन्दर्यो नायिकोत्तमास्तद्वदने[६] चन्दनबिन्दुस्तिलकः।[७] अथवा दिक्सुन्दरी

श्रीराधा तद्वदने चन्दनबिन्दुः। कीदृशः? स्फुटा व्यक्ता लाञ्छनस्य कलङ्कस्य श्री शोभा यत्र। कीदृश इव? कुलटाकुलस्य अभिसारिकासमूहस्य वर्त्मपातेन सङ्केतमार्गप्रतिरोधेन सञ्जातमुत्पन्नं पातकं यस्य तादृश इव। इन्दुः कुमुदबान्धवः **इत्यमरः** (१.३.१३)। चिह्नं लक्ष्म च लाञ्छनम् [१]**इत्यमरः** (१.३.१७)। किरणोऽस्त्रम-यूखांशु....**इत्यमरः** (१.४.३३)।।३९।।

१.इति गीतगोविन्दे वासकसज्जावर्णनरूपो धन्य वैकुण्ठो नाम षष्टः सर्गः-इ. २.ज्योत्स्नाभिसारं कलयन्निन्दुरुद्गतस्सप्तमे-इ.फ.ग.ह.ज. ३.चन्द्रदर्शनराधाविरहमाह-इ.फ.ग.ह.ज. ४.अस्मिन् कृष्णविलम्बे इ.फ.ग.ह.ज. ५.कामदीप्तिं-इ.फ.ग.ह.ज. ६.चन्दनस्य बिन्दुः-इ.फ.ग.ह.ज. ७.यद्वा-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३९-क।। अधुना चन्द्रोदयेन [२]राधाया विरहव्यथाधिक्यं वर्णयन्नाह-अत्रान्तर इति। अत्रान्तरे अस्मिन्नवसरे इन्दुश्चन्द्रोंऽशुजालैः किरणसमूहैः [३] वृन्दावनान्तरं वृन्दावनस्य मध्यप्रदेशं अदीपयत् प्रकाशितवान्। कीदृशः इन्दुः? स्फुटा व्यक्ता लाञ्छनश्रीः कलङ्कशोभा यस्य[४]सः। कथम्भूत[५] इव? कुलटानामभिसारिकाणां कुलस्य सभूहस्य[६] वर्त्मपातेन मार्गप्रातिरोधेन सञ्जातपातक इवोत्पन्नपाप इव। पातकिनः कलङ्को व्यक्तो भवति। पुनः कीदृशः? दिश एव सुन्दर्यः नायिकास्तासां [७] वदनस्य मुखस्य चन्दनबिन्दुः श्रीखण्डतिलक इव; स्त्रीतिलको वर्तुलो भवतीति। असतीनां चन्द्रोदये गमनाभावा[८] द्वर्त्मपातः[९]। अत्र विप्रलब्धा नायिका वर्ण्यते। तल्लक्षणं [१०] भरते,

प्रविलसदनुरागा दूतिकां प्रेष्य पूर्वं। [११] सरभसमपिधाय क्वापि सङ्केतभूमौ।।

न मिलति खलुचास्या वल्लभो दैवयोगात्प्रवदति भरतस्तां नायिकां विप्र-लब्धाम्।।१।।३९।।

१.इत्यपि-इ.फ.ग. २.नास्ति-ड. ३.वृन्दावनस्यान्तरं मध्यप्रदेशम्-ड.वृन्दावनान्तरं वृन्दावनमध्यप्रदेशम्-क. ४.नास्ति-ड.ल.म. ५.नास्ति-क. ६.वर्त्मघातेन-क. ७.वदनचन्दनबिन्दुः मुखे श्रीखण्डतिलक इव-क. ८.वर्त्मघातोऽपि भवति-क. ९.एतस्मादनन्तरं मार्गस्था गमनं कर्तुन शक्नुवन्ति;जनस्य विदितं भवति अमुकाऽमुकेण सह व्यभिचार कर्तं गच्छतीति भावः इत्यधिकता दृश्यते-क.पुस्तके १०.यस्या दूतीं प्रियः प्रेष्य दत्त्वा सङ्केतमेव वा। नागतः कारणेनेह विप्रलब्धा तु सा भवेत्(ना.शा.२८.१२८)। ११.सरभसमपि या सा प्राप्य सङ्केतभूमौ-क. सरभसमपि चारु क्वापि सङ्केतभूमौ-ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३९-क।। अत्रान्तर इति। हरिं विना सख्यागमनसमये कुलटानां स्वैरिणीनां कुलस्य समुदायस्य वर्त्मघातेन मार्गरोधेन सञ्जातं पातकं यस्य स इव स्फुटलाञ्छनस्य व्यक्तकलङ्कस्य श्रीरिव (श्रीः) शोभा यस्य सः। दिक् प्राच्यो सुन्दरी रमणी तस्याः वदने चन्दनबिन्दुः श्रीगन्धतिलकः इन्दुः चन्द्रः। अंशव एव किरणा एव दीपाः तैः वृन्दावनान्तरं अदीपयत् प्रकाशयामास। चन्द्रोदये गन्तुमशक्यत्वेन विरहोऽधिको-ऽभूदित्यर्थः। अत्र स्वतस्सिद्धलाञ्छनाहेतोः कुलटामार्गरोधस्य हेतुत्वेन सम्भावना, हेतूत्प्रेक्षा। दिगङ्गनातिलकत्वरूपकेण संसृष्टिः।।३९।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३९-क।। अस्मिन् सर्गे विप्रलब्धा वर्णनीया। तस्याः लक्षणम् ''अहरहरनुरागाद्दूतिकां प्रेष्य पूर्वम्, सरभसमभिधाय क्वापि सङ्केतकं वा। न मिलति खलु यस्या वल्लभो दैवयोगात्। प्रवदति भरतस्तां नायिकां विप्रलब्धाम्।।'' इति। अत्रान्तर इत्यादि। च शब्दो भिन्नक्रमे। अत्रान्तरेऽस्मिन्नवसरे इन्दुश्चन्द्रोऽपि अंशुदीपैर्बृन्दावनान्तरं बृन्दावननाम्नोऽरण्यस्यावकाशम् अदीपयत् प्रकाशयामासेति योजना। अंशुदीपैरिति। अंशव एव दीपा इति विग्रहः। किंविधः ? दिक्सुन्दरीति। दिश एव सुन्दर्यः तासां वदनस्य चन्दनबिन्दुरिव। एतेन इन्दोः पूर्णत्वं कथितम्। अभिप्रायस्तु दिक्सुन्दरीणामेव वदनचन्दनबिन्दुः न पुनः राधायाः वदनमाह्लादयन्तीं बिन्दुर्मण्डलाकारः सम्पूर्ण इति यावत्। प्रायेण हर्षशोकयोः वदनोल्लासग्लानिभ्यामभिव्यक्तेर्वदनपदग्रहणम्। ''चदि आह्लादने दीप्तौ'' चेति धातुः। ''बिन्दुः स्यादप्यनुस्वारे विज्ञातरि च विप्रुषि'' इति **विश्वः**। पुनः किंविधः ? स्फुटलाञ्छनश्रीरिति। स्फुटा व्यक्ता लाञ्छनश्रीः यस्येति विग्रहः। एतेनापि चन्द्रस्य परिपूर्णता प्रतिपादिता। अत्रोत्प्रेक्षामाह कुलटाकुलवर्त्मपात-सञ्जातपातक इवेति। कुलटानामसतीनां कुलं समूहस्तस्य वर्त्मपातेन मार्गनिरोधेन सञ्जातपातकं यस्येति विग्रहः। ''पुंश्चली धर्षणी बन्धक्यसती कुलटेत्वरी'' **इत्यमरः**। कुलटेति साभिप्रायमुक्तम्। तथाहि, कुलान्यटतीति कुलटा। ''पचाद्यच्'', ''शकन्ध्वादिश्च'' इति। कुलं गृहमुच्यते। ''कुलं गोत्रे गणे गेहे'' इति। बन्धक्यो हि व्यभिचारार्थं स्वकुलान्युत्सृज्य कुलान्तराणि गच्छन्ति। अत एव तासां कुलवर्त्मनः गृहगमनमार्गस्य पातः पतनं निरोधनमिति सम्यक् व्याख्यानम्। ''या खलु पातकी भवति तस्य शृगालादिलाञ्छनं राज्ञा क्रियते'' इति दण्डनीतिः। ''अन्तरं तु पराधीनभेदे रन्ध्रावकाशयोः। आत्मान्तर्द्धिविनात्मीयबहिर्मध्यावधिष्वपि।।''इति विश्वः।।३९-क।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३९-क।। पुनरुत्कण्ठिताचरितं वर्णयिष्यन् श्रीकृष्णस्यानागमनकारणमाह अत्रेति। अस्मिन्नवसरे इन्दुः किरणसमूहैः वृन्दावनान्तरमदीपयत्। कीदृशः ? दिक् पूर्वा सैव सुन्दरी तस्या वदने चन्दनविन्दुरिवेति लुप्तोपमा । पुनः कीदृशः ? प्रकटीभूता कलङ्कस्य श्रीः शोभा यस्मिन्। अनेन चन्द्रस्य पूर्णप्रायता उक्ता। आत्रोत्प्रेक्ष्यते, कुलटानां कुलस्य वर्त्मविरोधेन संजातं यत् पातकं तस्माज्जातो रोगविशेषो यस्य, सः खलु पातकी भवति स रोगविशेषचिह्नितो भवतीत्यर्थः।।३९।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३९-क।। अथ तस्याः विप्रलब्धावस्थां वर्णयितुं कविः कृष्णस्यानागमनशङ्काहेतुकचन्द्रोदयं वर्णयति। अत्रेति। अत्रान्तरे स्वप्राणेश्वरीश्रीराधाया विरहोत्कण्ठार्त्तिश्रवणद्विगुणितोत्साहं श्रीकृष्णं सखी यावन्नानीतवती, एतदभ्यन्तरे इन्दुः पूर्णचन्द्रः अंशुदीपैः किरणप्रदीपैः वृन्दावनस्यान्तरं मध्यमदीपयत्, दीप्तं चकार। अंशुवृन्दैरिति पाठे स्पष्टोऽर्थः। कीदृशः, दिक्सुन्दर्याः प्राचीरमण्या वदनस्य वदनैकदेशललाटस्य तिलकायमानचन्दनबिन्दुरिव दृश्यमान इत्यर्थः। किं च स्फुटा व्यक्तीभूता कलङ्कस्य श्रीः शोभा यत्र सः। चन्द्रस्य पूर्णत्वात् कलङ्कस्य स्फुटत्वमुत्प्रेक्षते। कुलटानां, उपनायकानुरागिणीनां कुलस्य समूहस्य वर्त्मपातेन अभिसारमार्गनिरोधने सञ्जातं पातकं यस्य स इव। पातकसादृश्यत्वात् कृतरोगविशेषः ग्राह्यः। कार्येण कारणमनुमीयते इति न्यायात्। यः खलु पातकीभवति, सः कुष्ठादिरोगविशेषचिह्नितो भवति। धातूनामनेकार्थत्वात्, पातकस्य निरोधार्थत्वम्। घात इति क्वचित्। तदा स्पष्टार्थः। फलोन्मुखकार्यस्य विघातनाच्चन्द्रमसि कवेः परुषोक्तिरियम्।।३९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३९-क।। अत्रान्तरेति; अतः परं चन्द्र उदेति। केन प्रकारेणेति कुलटा वेशवनितानामथवा उपनागरिकानुरागिणीनां कुलस्य समूहस्य मार्गावरोधः संघटितः। चन्द्रालोके अभिसारिकाः नाम कृष्णाभिसारिकाः न गच्छन्ति। अतः तासां मार्गावरोधकृत:पातकेन चन्द्रस्य कलंकरेखापि स्पष्टतया दृश्यते। अपि च एतेन किरणेन अथवा किरणप्रदीपेन वृन्दावनस्यारण्यं दीप्तमकरोत् चन्द्रः। पुनश्च दिगङ्गना शोभमानानां रमणीनां ललाटे चन्दनविन्दुरिव इन्दुः प्रकटितोऽभूत्। वसन्ततिलकावृत्तम्। रूपकोत्प्रेक्षा।।३९।।

**४०-प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा।**
**विरचितविविधविलापं सा परितापं चकारोच्चै:।।४०।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४०।। उच्चैर्विरचितविविधविलापं यथा स्यादेवं परितापं चकारेति योजना। कोदृशीवेत्याह। प्रसरति शशधरविम्बे विहितविलम्बे माधवे विधुरेति। ''विधुरं तु प्रविश्लेषे दु:खिते चाभिधेयवत्''। आर्य्याछिन्द:। विप्रलब्धा वर्णनीया। तस्या: स्वरूपमाह,

संकेतकं प्रियतम स्वयमेव दत्वा नैवागत: समुचिते समये च यस्या:।
दूतीवचोऽमृतरसस्नपिताङ्गयष्टि: सा वर्णिता कविवरैरिह विप्रलब्धा।।

श्लोकोक्तमर्थं गीतेनाह।।४०।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४०।। इदानीं विप्रलब्धायास्तस्या विधुरत्वं कथयति; प्रसरतीति। सा राधा उच्चै: परितापं चकार खेदं चकार। कथं यथा भवति ? विरचितविविधालापं यथा स्यात्तथा। किंभूता सा ? अतिशयविधुरा। क्व सति ? शशधरविम्बे प्रसरति उद्गच्छति सति। माधवे च कृतविलम्बे सति। 'प्रेष्य दूतीं स्वयं दत्त्वा निकेतं नागत: प्रिय:। यस्यास्तेन विना दु:स्था विप्रलब्धा तु सा मता'। आर्या।।४०।।

## (३) जगद्धरकृत- सारदीपिका

।।४०।। अनन्तरचरितमाह, प्रसरतीति। शशधरविम्बे कलङ्कितया परत्र्यसनसञ्जात प्रसादेन्दुमण्डले प्रसरति, विरहविषण्णराधामुखदर्शनसमुदितहर्षादिव प्रकर्षेण सरति, उदयति सति, माधवे च विहितविलम्बे निजसौभाग्यादिभूमिकानिदानभूवतया:, प्रियाया: प्रणयनिर्भरव्यापारादि दिदृक्षया आगत्य निलीनावस्थानेन बुद्धिपूर्वं कृतविलम्बे सति, सा निर्निमेषतया कृष्णागमनं प्रतीक्षमाणा राधा विधुरा सती कृष्णागम- ननैराश्यसञ्जात- बैक्लव्या सती उच्चै: मुक्तकण्ठं विरचित: कृत: वक्ष्यमाणात्मोपालम्भादिरूप- विविधविलापो बहुप्रकारपरिदेवनं यत्र तद्यथा स्यात्तथा परितापं साकल्येन तापं विषादं चकार। कृतवती। विप्रलब्धालक्षणम्,

कृत्वा सङ्केतमप्राप्ते दैवाज्जीवितवल्लभे।
व्यथमानान्तरा प्रोक्ता विप्रलब्धा मनिषिभि:।।
निर्वेदचिन्तास्वेदाश्रुमूर्च्छानि:श्वसितादिभाक्, इति।।४०।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४०।। प्रसरतीति। शशधरविम्बे चन्द्रबिम्बे प्रसरति सति। माधवे कृष्णे विहितविलम्बे कृतकालक्षेपे सति। विधुरा दु:खिता राधोच्चै: परितापं चकार। विरचितो विविधो नानाविधो विलापो वत्रैवं यथा स्यात्। पूर्वं तदागमन शङ्काप्यासीत्। चन्द्र उदितेऽभिसारिकाणां कुत्र संचार इति तदागमनं प्रति निराशयाधिकं विललापेति भाव:।।४०।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४०।। अनन्तरं कृत्यमाह, प्रसरतीति। विधुरा सा राधा शशधरविम्बे चन्द्रमण्डले प्रसरति स्वावासभूत- मन्दिरसमीपे किरणद्वारा प्रवर्त्तिनि सति विलसतीति यावत्। किञ्च माधवे श्रीकृष्णे विहितविलम्बे अस्यासक्तिरूपमराधं सूचयितुं माधव इत्युक्तमिति ज्ञेयम्। यद्वा माधव इति श्लिष्टम्। माधवे वसन्ते प्रसरतीति योज्यम्। उच्चै-र्विरचिता कृता: विविधा: नानाप्रकारा: विलापदु:खोद्गारिवचनानि यस्मिन् कर्मणि तथा परितापं चित्तक्षोभं चकार निर्मितवान्। नानाबिधैर्विलापैस्तत्रत्यान् प्राणिन: प्राप्तखेदानकार्षदित्यर्थ:।।४०।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४०।। अधुना राधाविलापवर्णनाय प्रसङ्गमवतारयति। सा राधिका विरचितविविध-विलापं यथा स्यात्तथा उच्चैरत्यर्थेन परितापं चकार। अत्र यद्यपि वह्यादि वद्राधाया: परितापं कर्त्तुं न शक्यते, तथापि परितापपदेन लक्षणया तदाविष्करणमुक्तमिति **भगीरथ:**। तन्न, अन्यहेतुकस्यापि परितापस्य खेदविशेषकस्यावच्छेदकतया राधाजन्यत्वसम्भवात्। यद्वा सा राधिका परितापं विरचितो विविधो विलापो यत्र स विरचितविविधविलाप:। एतादृशम् उच्चैरत्यर्थेन चकारेत्यन्वय:। कीदृशी ? विधुरा विकला विश्लिष्टा वा कृष्णोत्यर्थात्, कस्मिन् सति विलापं चकार ? शशधरविम्बे चन्द्रमण्डले प्रसरति सति। अत्र विम्बपदोपादानं चन्द्रस्य पूर्णत्वप्रतिपादनेन सन्तापाधिक्यसूचनार्थं माधवे कृष्णो विहितविलन्बे कृतकालातिपाते च सति। 'विधुरन्तु परिश्लेषे विधुरो विकलेऽन्यवदि'ति शाश्वत:। स्वभावोक्तिरलङ्कार:।।४०।।

*'कुलवर्त्मपात' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४०।। एवं विप्रलम्भरसमुक्त्वा विप्रलम्भहेतुं प्रपञ्चयति प्रसरतीत्यादिना। सा राधां उच्चैरत्यर्थं परितापं [२]श्रीकृष्णानागमनविषयं दु:खं चकार। कीदृशम्? विरचित: कृत:

विविधो नानाप्रकारो धूर्त शठ [३]वञ्चकोऽसीत्यादि गुणकीर्तनरूपो वा विलापो यत्र कीदृशी ? नायातो धूर्त इति विधुरा[४]विकला। कस्मिन् सति ? शशधरबिम्बे चन्द्रमण्डले प्रसरति उद्गच्छति सति; माधवे राधाधरप्रिये वसन्तप्रिये वा विहितविलम्बे[(५)]कृतविलम्बे च सति।।४०।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४०।। प्रसरतीति। सा राधा विरतितः कृतोः[६]विविधो नानाप्रकारो विलापो यस्मिंस्तमुच्चैर्महान्तं परितापं दुःखं चकार। कस्मिन् सति ? शशधरबिम्बे चन्द्रमण्डले प्रसरति उद्गच्छति सति। माधवे च कृष्णे च विहितविलम्ब [(७)] कृतविलम्बे सति विधुरा[८]विकला।।४०।।

१.विविधालापं-इ. २.श्रीकृष्णानागमनविरहदुःखं-इ.फ.ग.ह.ज. ३.वञ्चक क्वासीत्येवंरूप-गुणकीर्तनरूपो-इ.फ.ग.ह.ज. ४.विह्वला-इ.फ.ह.ज. ५.नास्ति-अ.ब. ६.नास्ति-ड.फ. ७.नास्ति-ड. ८.विह्वला-ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४०।। प्रसरतीति। शशधरस्य चन्द्रस्य बिम्बे प्रकाशे प्रसरति सति व्याप्नोति सति गगनतलमारोहति सति; बिम्बपदेन किरणसमुदायो लक्ष्यते वा। माधवे विहितः विलम्बः चिरकालः येन तस्मिन् सति विधुरा सुखरहिता सा राधाः विरचिता विविधा आलापाः प्रलापा यस्मिन् तम्ः परितापं रुदितं उच्चैः चकार। इयञ्च नायिका विप्रलब्धा-

क्वचित्सङ्केतमावेद्य दयितेनाथ वञ्चिता।
स्मरार्ता विप्रलब्धेति कलाविद्भिः प्रकीर्त्यते।।

इति **(प्र.रु. नायक प्र.श्लो.४७)** लक्षणात्।

अत्र परितापकार्यस्य माधवविलम्बः कारणम्।

शशधरबिम्बप्रसरस्यापि तत्कारित्वात्समुच्चयः। आर्यावृत्तम्।।४०।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४०।। प्रसरतीत्यादि। शशधरविम्बे चन्द्रबिम्बे प्रसरति सति। माधवे विहितविलम्बे सति। विधुरा विकला सा राधा। ''विधुरं तु प्रविश्लेषे दुःखिते चाभिधेयवत्'' इति विश्वः। उच्चैः विरचितो विविधो नानाप्रकारो विलापः परिदेवनं यत्र एवं यथा स्यादेवं परितापं चकार। ''विविधः स्याद् बहुविधो नानारूपः पृथग्विधः'' **इत्यमरः**। आर्या नाम छन्दः।।४०।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४०।। तामेवावस्थामाह प्रसरतीत्यादिना। सा उच्चै कृतो नाना प्रकारो विलापो विधिशङ्कारूपा तद्यथा स्यात् तथा परितापं चकार। कीदृशी कदा ? इत्यत आह, शशधरविम्बे प्रसरति सति माधवे च विहितविलम्बे सति विधुरा व्याकुला।।४०।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४०।। अनन्तरचरितमाह, प्रसरतीति। शशधरबिम्बे कलङ्किततया परत्र्यसनसञ्जात-प्रसादेन्दुमण्डले प्रसरति, विरहविषण्णराधामुखदर्शनसमुदितहर्षादिव प्रकर्षेण सरति, उदयति सति, माधवे च विहितविलम्बे निजसौभाग्यातिभूमिका निदानभूतायाः प्रियायाः प्रणयनिर्भरव्यापारादिदिदृक्षया आगत्य निलीनावस्थानेन बुद्धिपूर्वं कृतविलम्बे सति, सा निर्निमेषतया कृष्णागमनं प्रतीक्षमाणा राधा विधुरा सती कृष्णागमननैराश्य-सञ्जातवैक्लव्या सती उच्चैः मुक्तकण्ठं विरचितः कृतः वक्ष्यमाणात्मोपालम्भा-दिरूपविविधविलापो बहुप्रकारपरिदेवनं यत्र तद् यथा स्यात्तथा परितापं साकल्येन तापं विषादं चकार। कृतवती। विप्रलब्धालक्षणम्,

''कृत्वा सङ्केतमप्राप्ते दैवाज्जीवितवल्लभे।
व्यथमानान्तरा प्रोक्ता विप्रलब्धा मनीषिभिः।।
निर्वेदचिन्तास्वेदाश्रुमूर्च्छानिःश्वसितादिभाक्'' इति।।४०।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४०।। प्रसरतीति; अस्मिन् चन्द्रोदितकिरणे व्याप्ते सति श्रीराधायाः विरहसन्तापः बहुगुणितो जातः। नायातश्च माधवः। अतः विरहविधुरा श्रीकृष्णस्यागमनविलम्बे उच्चैः विललापः सा। विविधविलापं कृतवती। तद्विलापं वर्णयति त्रयोदशप्रबन्धे। सा खल्वत्र विप्रलब्धा नायिका। तस्य लक्षणं यथा; प्रेष्य दूतीं स्वयं दत्त्वा निकेतं नागतः प्रियः। यस्यास्तेन विना दुस्था विप्रलब्धा तथा मता।। आर्या च्छन्दः।।४०।।

।। त्रयोदशः प्रबन्धः/गीतम् १ ३ ।।

।। मालवगौडारागेण[१] गीयते।।

**१-कथितसमयेऽपि हरिरहह न ययौ वनम्।**
**मम विफलमिदममलरूपमपि यौवनम्।।**
**यामि हे कमिह शरणं सखीजनवचनवञ्चिता।। ध्रुवम्।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। मालवगौड़ारागेण गीयते। कथितसमयेऽपि यस्माद्वनं वृन्दावनं हरिर्नययौ। अतः मम यौवनं विफलमिति वाक्यार्थः। प्रिये सौभाग्यानुकूलं हि यौवनमित्यभिप्रायः। ''अहहेत्यद्भुते खेद'', तारुण्यं यौवनं समे'' **इत्यमरः**। संकेतकाले कथितः समयः शपथेऽपि चेति'' **विश्वः**। ययावित्यागत इत्यर्थः। विनाप्युपसर्गयोगात् या धातुरा-गतिमाचष्टे धातुरेव वाचकत्वान्न चोपसर्गे वाचक इति वाच्या, तस्य धातुमन्तरेण विचिकितार्था प्रत्यायकत्व न चोद्यं धातुरप्यवाचक इति वाच्यम्। तस्योपसर्गमन्तरेणापि विवक्षितार्थादन्यत्र गगपठितेऽर्थे वाचक अदृष्टा तस्माद्वाचकतायां दृष्टसामर्थ्यात् धातुरेव विवक्षितार्थवाचको नोपसर्गो विपर्य्यायावत्युपसर्गस्य पर्य्यवसितं द्योतकत्वम्। दृश्यते च। तद्द्योतकमन्तरेऽपि तद्योत्यार्थाभिधायको धातुः। यथा **रघौ** ''नात्यायतकृष्टशार्ङ्ग''। अत्राकृष्टार्थे कृष्टेत्युक्तम्।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। पूर्वं ध्रुवः। यामीति। हे सखि! इह अस्मिन्नवसरे कं शरणं यामि? किंभूताहम्? सखीति। सख्य एव जन इतरजनवत् तद्वचनेन 'त्वमत्र संकेतस्थाने तिष्ठ तमहमानयामि' इति कथनेनात्रैव स्थिता या विप्रलब्धा। इति ध्रुवः।। अथ पदानि, कथितेति। आत्मगतं कथयति, मम इदं यौवनं विफलम्। किंभूतम्? अमलरूपमपि। अथवा, यौवनं रूपं च द्वयमपि निष्फलम्। अत्र 'अपि'शब्दो भूषणकलादीनामनुक्तानां समुच्चयार्थः। अत्र कारणमाह; 'अहह' इति कष्टे। हरिः कथितसमयेऽपि संकेतितकालेऽपि वनं न ययौ न प्राप्तवान्। यतः 'प्रियेषु सौभाग्यफला हि योषितः' ।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। विलापप्रकारमाह, कथितेत्यादिना गीतेन । गौरीरागेण गीयते इति प्रयुक्तायाः गुण्डक्रियारागिण्याः सपत्नीत्वप्रसङ्गादस्यास्तत्समीपावस्थानस्य युक्तत्वात् साधूक्तम् कथितेति । अतिदुःखिततया सर्वेषामपि ताताम्बाभ्रातृबान्धवादीनां सम्बोधनाय हे

इत्युपक्रम्य तेषां तादृशदशाभिज्ञानाक्षमतया, किं ते कुर्युरिति सूचनाय विशिष्य सम्बोधनम्। अतोऽदृष्टसम्भावितदैवमात्रादीन् प्रति स्वगतसम्बोधनम् । हे मयि दयालवो देवादयः। इह दशावसरे कं शरणं यामि, यतः प्राणतुल्यसखीजनस्य वचनेनार्थशून्य-प्रलोभनरूपेण वञ्चिता, प्रतारिताऽहम्। अतो नास्ति अवलम्बनं प्रतिकुलात्मीकया इति भावः। कथं वञ्चिताऽसि, समयं प्रतीक्षतामिति चेत् तत्राह कथितेति। कथितसमयेऽपिमामतिदुःखितामनवधार्य स्वतो नागत इति किं वदामि । अपि तु सखीमुखेन उक्तेऽपि सङ्केतसमये हरिर्मद्धैर्यादिसर्वस्वापहारचातुरीधुरीणः श्रीकृष्णः, सङ्केतस्थानं तु दूरे तिष्ठतु, वनं जनसञ्चारादिप्रतिबन्धकरहितं विपिनमपि न ययौ। नागतवानित्यर्थः। परितापमेवाह अहह। अतिकष्टं मम तदुपेक्षिताया इदं तदर्थमेव परिष्कृतममलं लावण्यं जाज्ज्वल्यमानरूपं तथा यौवनमपि तदभिमततया धन्यत्वेन सम्भावितम् तारुण्यमपि विफलं निष्प्रयोजनमित्यर्थः। सखी प्रेषणादिना प्रारब्धसमागम-कार्यस्यानिर्वाहत् उदितेन विषादेन हृत्तापजननात् अनौचित्यापरपर्यायदैन्यध्वनि।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। विविधविलापमेव गीतेन कथयति कथितेति। गीतस्यास्य गौडमालवरागः। प्रतिमण्ठतालः। गीतार्थस्तु, इह विपिने कं जनं यामि शरणम्? यद्वा, कं जलमग्निं यमं च शरणं यामि। तेन विना जलप्रवेशमग्निप्रवेशं यमगृहं यामीत्यर्थः। कीदृशी? सखीजनानां वचनेन वञ्चिता प्रतारिता। मया हरिरानीयत एवेति सखीजनेन प्रतारितेत्यर्थः। सख्योऽप्येवं प्रतारिकास्तदा कोऽन्यो विश्वासपात्रं भवेदिति भावः। 'को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च। पावके च मयूरे च मुखशीर्षजलेषु कम्।।' इति **विश्वः**। 'शरणं गृहरक्षित्रोः' **इत्यमरः**। सखीवचनमेवाहकथितेति। कथित समयेऽपि सख्यग्रे स्वयमेव कथितो यः समयः कालोऽस्मिन्नवसरे मया सङ्केतस्थलमागन्तव्यमिति। यद्वा, सख्या मदग्रे यः समयः कथितस्तदपि वनं सङ्केतनिकुञ्जं न ययौ न गतवान्। इदमारूढमेव मे यौवनं तारुण्यममलरूपमपि निर्मलसौन्दर्यमपि विफलम्। पूर्वं तदागमनप्रत्याशया स्थितं, संप्रत्यवधिलङ्घने निरवधिदुःखाहं भोगेऽसमर्था शरीरं त्यक्ष्याम्येव, मम यौवनं यास्यतीति भावः।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। मालवगौड़रागेण गीयते। विलापप्रकारमवस्फुटयति। कथितेत्यादि। मालवगौलीरागेण गीयत इत्युक्तम्। तस्यायमभिप्रायः। गौलीरागस्य गुण्डक्रिया

सपत्नीत्वात् तदनन्तरं तत्स्थापनं युक्यमित्यपि तालेन गेयम्। तत्र यामीत्यादि वञ्चितेत्यन्तं ध्रुवपदमिदम्। तत्र हे इति अदृष्टसम्भावितदैवमात्रादिसम्बोधनम्। हे देव! सखीजनस्य वचनैरिदानीमेव भवत्समीपं कृष्णं प्रत्यानेष्यामि। त्वया क्षणमात्रं प्राणान् धृत्वा स्थातव्यमित्यादिप्रकारैः प्रलापैः वञ्चिता प्रतारिता कृष्णस्यानयनाभावात् प्रतारणमवगन्तव्यम्। एवं बिधोऽहं कं शरणं रक्षणं कं विलासगृहं चेति गम्यते। यामि प्राप्नोमि गृहपक्षे यामि प्रविशामि इत्यर्थः। लोकानुसारादेर्विमुक्तसाक्षमित्यवगन्तव्यम्। ''शरणं गृहरक्षित्रोरित्यमरः''। विलापे मूलमाह। कथितेति। हरिः कृष्णः कथितसमये सङ्केतकालेऽपि वनं वृन्दावनं प्रति न ययौ नागत। अहह खेदे कष्टमित्यर्थः। ''अहहेत्यद्भुते खेदे'' **इत्यमरः**। समयभङ्गात्कष्टमित्यवगन्तब्यम्। अतएव तद्योतकाहेशब्दः प्रयुक्त इत्यर्थः। कृष्णस्यानागमने कथं कष्टमित्याशङ्क्याह ममेति। न केवलं समयभङ्ग एव कष्टत्वहेतुः अपि तु मम इदं परिदृश्यमानममलं लोकोतरसौन्दर्य्यसम्पन्नरूपं स्वरूपं यौवनमपीत्यपि शब्दार्थः। यौवनं च विफलं निष्फलं जातमिति शेषः। सम्भवतो बस्तुनो न भोक्त्यन्तभावेनैष्फल्यम्। अतएव महत्कष्टमितिभावः। उक्तं च,

वर्षाकाले प्रयाणं यौवनकाले च दारिद्यम्।
बाल्ये स्नेहवियोगस्त्रीणि च दुःखानि भवन्ति लोके।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। अत्र सर्गे विप्रलब्धा नायिका। तल्लक्षणम्; 'प्रेष्य दूतीं स्वयं गत्वा सङ्केतं नागतः प्रियः। यस्यास्तेन विनाश्लिष्टा विप्रलब्धा तु सा स्मृते'ति।। गीतस्यास्य गौडमालवरागः। प्रतिमण्ठतालः। रागलक्षणमुक्तमेव। प्रदोषाभ्यन्तरेऽहमेव कृष्णमत्रानयामीति सख्या लतागृहे धृता राधा विलपति। हे इत्यदृष्टसम्बोधने। इहावस्थायां सखीवचनवञ्चिता कं जनं शरणमाश्रयं यामि। तथा चात्रावस्थायां सखीजन आश्रयो भवितुमर्हति। स एव यदि वञ्चकः तदान्यः क आश्रय इति भावः। सखीजनवञ्चितत्वमेव प्रकटयति; कथितसमयेऽपि सखीकथितप्रदोषकाले हरिर्वनं न ययो। यद्यपि प्रदोषसमयः सन्ध्या क्वापि न पदार्थविधेया कथिता, तथापि पूर्वापरग्रन्थैकवाक्यतया लभ्यत इत्यवधेयम्। तेन ममेदं यौवनमनुरूपमपि योग्यमपि विफलं निरर्थकमित्यर्थः। नन्वत्र नाययाविति वक्तुमुचितमिति कथं न ययावित्युक्तर्मित चेत्? न, अवस्थितिस्थाना-परिज्ञानेन राधाया व्यग्रचित्तत्वप्रतिपादनार्थं तथाभिधानात्। यद्वा कथितः समयः सिद्धान्तो यया सा कथितसमया। अपि निश्चये। हे कथितसमये दूति! निश्चितं हरिः श्रीकृष्णः वनं 'पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय' इति श्लोकेनोक्तं

निकुञ्जस्थानं न ययौ न गतः। अन्यथा तव गमनान्तरमेतावता कालेन सर्वथा समागमिष्यतीति भावः। इहावस्थायां कं जनं शरणं यामि ? कीदृशी ? सखीजनवचनेन त्वमत्र तिष्ठाहमेव कृष्णमानयामीति सिद्धान्तवाक्येन वञ्चिता प्रतारितेत्यर्थः। 'समयाः शपथाचारकालसिद्धान्तसम्विद' **इत्यमरः**।।१।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१।। पूर्वं यथा श्रीकृष्णः किं गृहेन धनेन इति कृतवान् तथा राधाऽपि कृतवती इति निरूप्यते। किञ्चोक्तं विलापमेव दर्शयति -कथितेति [३] कथ्यते विप्रलब्धा नायिकेयम्,

प्रेष्य दूतीं स्वयं गत्वा सङ्केतं [४] नागते प्रिये।

[५] या स्यात्तेन विना [६] दुःस्था विप्रलब्धा तु सा मता।। इति।

गौडमालवरागे प्रतिमण्ठताले। इहास्मिन् समये [७]निर्जने [८] वा कुञ्जे कं प्रति शरणं यामि कं जलं वा प्रविशामि। किं विशिष्टाऽहम् ? सखीजनवचनैः श्रीकृष्णः [९] आगमिष्यति इति वञ्चिता [१०] प्रतारिता। वञ्चनमेवाह अहहेति खेदे। हरिः कथितसमयेऽति-निबिडान्धकाररूपे सङ्केताख्ये वनं न ययौ नाजगाम। तदागमनं विना इदं मम यौवनम[१]मलरूपं स्वच्छरूपमपि विफलं निरर्थकम्। [२] कः पावके मयूरे च सुखशीर्षजलेषु च इति विश्वः (२.२४)। शरणं गृहरक्षित्रोः **इत्यमरः** (३.३.५३)। विरोधोक्तिरलङ्कारः।।१।।

१.मालवगौडेन अडतालेन गीयते-इ. २.विफलमेतदनुरूपमपि-ड. ३.नास्ति-इ.फ.ग. ४.नागतप्रियः-अ.ब.इ.नागतः प्रियः-फ.ग.ह. ५.यस्यां तेन-अ.ब.इ.फ.ग.ह. ६.दुःखा-ग. ७.निर्जने वाऽहह करताडनेन कं जनं प्रति शरणं-ग. ८.च-इ. ९.शीघ्रं स्वयमेवागमिष्यतीति-इ.फ.ग. १०.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१।। विलापमेवाह [३]गीतेन, कथितेति। हे इति[४]स्वचित्तसम्बोधनम्। इह निर्जने वने सखीजनस्य वचनैः कृष्णागमनवेदकै [५] र्वञ्चिता प्रवञ्चिताऽहं कं पुरुषं शरणं रक्षितारं यामि गमिष्यामि। [६] किन्तु कमेव जलमेव शरणं यामि ; जलप्रवेशो वरमित्यर्थः। [७]किमितीत्यतः आह अहहेत्याश्चर्ये। हरिः कृष्णः कथितसमयेऽपि उक्तकालेऽपि वनं बृन्दावनं सङ्केतस्थानं न ययौ [८]न जगाम। कृष्णोपभोगाभावात् ममैतदनुरूपं योग्यमपि यौवनं विफलं[९]निरर्थकम्।।१।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। कथितेति। कथितसमयें सङ्केतसमागमोक्तकालेऽपि हरिः माधवः। वनं सङ्केतकुञ्जं न ययौ न प्राप्तः। अहह इति दुःखानुकरणशब्दः। अत एव मम अमलं रूपं यस्मिन् तस्मिन्नपि इदं यौवनं विफलं व्यर्थम्। ध्रुवाया व्याख्यानम्। हे इति हा

कष्टम्। हा इति पाठे क्लिष्टम्। आभिमुख्यार्थसम्बोधनम्। सखीनां जनः तस्य वचनेन वञ्चिता। सखीभिः कथितं किल कुञ्जगृहं गतः कृष्णः इति तन्मिथ्येति वचनं मम। अहं इह निर्जने कं शरणं रक्षितारं यामि व्रजामि। प्रवासे माधवं विना न कोऽपि रक्षेदित्यर्थः। अत्र प्रतिदलं पुष्पसंज्ञकमात्रागणचतुष्टयमिति गुच्छसंज्ञकच्छन्दः।।१ ।।

१.अमलं सुन्दररूपं-इ.फ.ग.ह. २.पावके च मयूरे च सुखशीर्षदलेषु कम् विश्व (बना-१९११) कं मयूखे च-फ.क.पावके मयूखे च-ह. ३.गीतेन गीयते-क ४.सखिचित्तसम्बोधनम्-क. ५.वञ्चिताऽहं कं पुरुषं-ड. ६.नास्ति-ड. ७.किमित्यत आह-क.ल. ८.नाज गाम-क.ल.म. ९.निरर्थकमित्यर्थः-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। विलापप्रकारमाह, कथितेत्यादि। हे इति अदृष्टसम्बोधनम्। हे दैव! सखीसम्बोधनं वा। इह समये वने वा। कं शरणं यामि कं जनं रक्षितारं प्रपद्ये? ''शरणं गृहरक्षित्रोः'' **इत्यमरः**। किंविधा? सखीजनवचनवञ्चितेति। सखीजनवचनेन प्रतारिता। कुत इत्याह। कथितसमयेऽपि सख्या निवेदितसङ्केतेऽपि कृतशपथेऽपि वा। यस्माद्वनं बृन्दावनं हरिर्न ययौ तस्मान्मम इदं यौवनम्, अमलरूपमपि अहह खेदे, विफलं निष्फलमिति वाक्यार्थः। प्रिये सौभाग्यफलं हि यौवनममलरूपं चेत्यभिप्रायः। ननु कथितसमयेऽपीत्यत्र कथितश्चासौ समयश्चेत्यत्र न कर्मधारयो बहुव्रीहिप्रतिपत्तिकर इति दोषः। किं च विधेयाविमर्शोऽपि। तथाहि, ''कथितसमये न ययौ'' इति। कथितशब्दानन्तरमपिशब्दो वाच्यः। स च विधेयः कथितशब्दः समासे गुणीभूतत्वाद-विमृष्टः। तथा च, सत्यपि शब्दस्याप्यस्थानपतितत्वं दोषः। अत्र ब्रूमः। कथितं कथनम् अर्थात् सङ्केतस्य एतावति क्षणे त्वयागत्य अमुकस्मिन् वने स्थातव्यमित्येवकारं सखीमुखेन सङ्केतीकृत्य कथितस्य समयेऽपि कालेऽपि सति वनं सङ्केतितं हरिर्न ययाविति न कश्चिद्दोषः। ''अहहेत्यद्भुते खेदे'', ''तारुण्यं यौवनं समे'' **इत्यमरः**। ''सङ्केतकाले न कथितसमये शपथेऽपि च'' इति **विश्वः**। ययावित्यागत इत्यर्थः। विनाप्युपसर्गयोगे यो धातुरागतिमाचष्टे धातोरेव वाचको नोपसर्गे विपर्ययादित्युपसर्गस्य पर्यवसितं द्योतकत्वम्। दृश्यतेऽत्र द्योतकमन्तरेणापि तद्योत्यार्थाभिधायको धातुः। यथा **रघौ**। ''नात्यायतकृष्टशार्ङ्ग'' इति। अत्र कृष्टार्थे कृष्टेत्युक्तम्।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। परितापमेवाह कथित्येदिना, अस्यापि मालवरागयतितालौ। हे इति स्वागतसम्बोधनम्। इह समये कं शरणं यामि? सखीं शरणं याहि सखीजनस्य तेनाश्वासवचनेनैव वञ्चिता तर्हि समयः प्रतीक्ष्यताम्, यावत् स्वयमायाति हरिः कथितसमये

चन्द्रानुदयकाले यस्मात् अहह खेदे हरिर्मम मनोहरः मन्मनो हृत्वा इत्यर्थः। वनमपि न ययौ कुतोऽत्र आगमिष्यतीत्यर्थः। तस्मान्ममेदं यौवनं निर्मलं रूपमपि विफलं व्यर्थम्।।१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१।। विलापप्रकारमाह, कथितेत्यादिना गीतेन । गौरीरागेण गीयत इति प्रयुक्तायाः गुण्डक्रियारागिण्याः सपत्नीत्वप्रसङ्गादस्यास्तत्समीपावस्थानस्य युक्तत्वात् साधूक्तम्। कथितेति। अतिदुःखिततया सर्वेषामपि ताताम्बाभ्रातृबान्धवादीनां सम्बोधनाय हे इत्युपक्रम्य तेषां तादृशदशाभिज्ञानाक्षमतया, किं ते कुर्युरिति सूचनाय विशिष्य सम्बोधनम्। अतोऽदृष्टसम्भावितदैवमात्रादीन् प्रति स्वगतसम्बोधनम् । हे मयि दयालंवो देवादयः। इह दशावसरे कं शरणं यामि, यतः प्राणतुल्यसखीजनस्य वचनेनार्थ-शून्यप्रलोभनरूपेण वञ्चिता, प्रतारिताऽहम्। अतो नास्ति अवलम्बनं प्रतिकूलात्मीयाया इति भावः। कथं वञ्चिताऽसि, समयः प्रतीक्षतामिति चेत् तत्राह, कथितेति। कथितसमयेऽपि मामतिदुःखितामनवधार्य स्वतो नागत इति किं वदामि। अपि तु सखीमुखेन उक्तेऽपि सङ्केतसमये हरिर्मद्धैर्यादिसर्वस्वापहारचातुरीधुरिणः श्रीकृष्णः, सङ्केतस्थानं तु दूरे तिष्ठतु, वनं जनसञ्चारादिप्रतिबन्धकरहितं विपिनमपिन ययौ। नागतवानित्यर्थः। परितापमेवाह, अहह। अतिकष्टं मम तदुपेक्षिताया इदं तदर्थमेव परिष्कृतममलं लावण्यं जाज्ज्वल्यमानरूपं तथा यौवनमपि तदभिमततया धन्यत्वेन सम्भावितम्। तारुण्यमपि विफलं निष्प्रयोजनमित्यर्थः। सखीप्रेषणादिना प्रारब्धसमागम-कार्यस्यानिर्वाहात् उदितेन विषादेन हृत्तापजननात् अनौचित्यापरपर्यायदैन्य-ध्वनिः ।।१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। कथितमिति; अनागते श्रीकृष्णचन्द्रे तत्र संकेतकाले ह्यतिक्रान्ते नागतोऽसौ। इति मत्वा तस्याः मिलनेच्छा तिरोहिता। आहोस्वित् का कथा गमनस्य। सन्दर्भेऽस्मिन् श्रीराधा हताशा व्रवीति दुःखेन खेदेन असह्यामन्तर्वाष्पं व्यञ्जयन्ती। यदि सखी मां प्रतिवचनं श्रीकृष्णपक्षतः दत्तमासीद्यद्धरिरागमिष्यति यथाकालमिति। परं ह्यतिक्रान्ता वेला नागतोऽसौ। स वनं नागत आसीत्। फलतः सख्या अथवा सखीवाक्येनाहं वञ्चिता। मम स्वकीयजनानां वञ्चनेन पुनःकस्य वा शरणं गच्छामि ? एतेन रात्रिः आगता। उदिते हि शशांके तस्य वने उपस्थितिरभविष्यत्। परं तस्याभावेन मम स्फुटमलुनममलिन वा "यौवनं तारुण्यं विफलतामेति। यथा कालिदासेनोक्तं प्रियेषु सौभाग्यफला हि चारुता।" अत्र श्रीराधा स्वस्याः रूपयौवनं निनिन्द।।१।।

**२-यदनुगमनाय निशि गहनमपि शीलितम्।**
**तेन मम हृदयमिदमसमशरकीलितम्।। यामि हे।।२।।**

## (१)नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। यदनुगमनाय सङ्गमाय निशि गहनं वनमपि शीलितं वाञ्छितं तेन कृष्णेन हेतुना ममेदं हृदयमसमशरकीलतं कामबाणप्रतिपूर्वमित्याह। सेवावैरीहरिः। उक्तं च अयं च पूर्वप्रतिमाविशेषो यः सेव्यमानो रिपुतामुपैतीति।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।।अपि च, यदिति। यद्यस्माद्धेतोर्निशि रात्रौ अनुगमनाय। अर्थात् हरेरनुगमनाय। गहनमपि, 'अपि'शब्देन यत्कथमपि न क्रियते तदपि शीलितमनुभूतम्। तेन कारणेन मन इदं हृदयमसमशरकीलितं वर्तते। अथवा, यदित्यव्ययं सर्वनामप्रतिरूपकं यस्येत्यर्थे। यस्यानुस्मरणाय एवं कृतं तेन हेतुना तमेव हेतुं कृत्वा मम हृदयमसमशरकीलितं वर्तते। अथवा, वदिति यद्वचनेनाव्यवहितमेव सखीवचनं परामृश्यते। यद्वचनानुसरणाय गहनं शीलितं तेन तद्वचनहेतुना मम हृदयमसमशरपीडितं। वर्तते।अत्र यच्छब्दस्याप्राधान्यात्समासेन निर्गुणत्वाच्च न प्रधानत्वेनान्वयः संभवी, विवक्षितार्थासमर्पकत्वात्।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। हन्त! सखीवचनविश्वासेन एव दुर्विदग्धया मयाऽऽपादितोऽयमनर्थः इत्याह यदिति। पूर्वं खलु हे सख्यो! दुरासदोऽयमिति, वञ्चकोऽयं बहुवल्लभोऽयमिति बहुधोदीरितोऽपि मया, त्वयैव निरुपाधिप्रेमवानसौ, त्वामपेक्ष्य एव पुरतः एवाभिसरन् निकुञ्जे वसति। कथमसौ वञ्चक इत्यादिवचनैः सत्यतया प्रतियमानै यदनुगमनाय, यस्यानुसरणाय निशि तमिस्रायां गहनमपि झिल्लीझङ्कारादति भीषणं दुर्गमविपिनम् अपि, किं वदामि, मया गतमिति, अपि तु शीलितं, निजगृहादाधिक्येनालोचितमित्यर्थः। तेन कृष्णेन निःसहायाया ममेदमसम्भावितमनोरथ परिततयाऽतिमूढं हृदयं चित्तमसम-शरेण दुर्बोधमन्मथेन कृत्वा कीलितम्, खण्डितं कारितमिति अर्थः।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।। यस्य कृष्णस्यानु गमना यानुसरणाय निशि रात्रौ गहनमपि शीलिनं तेन कृष्णेन निमिभूतेन मम हृदयर्मसमशरेण कामशरेण किलिनं विद्धम्।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। यदेति। किञ्च यस्य श्रीकृष्णस्यानुगमनायानुनसरणायान्वेषणायेति यावत्। निशि रात्रौ गहनमरण्यमपि शीलितमालोचितमित्यर्थः। एतेन तदनुसरणायानुचितमिति कार्य्यं कृतमिति सूचितम्। स्त्रीणां रात्रावरण्यादिभ्रमणस्य लोकविरुद्धत्वादितिभावः। तेन कृष्णेन इदं परिदृश्यमानं मम हृदयम् असमशरेण कामेन शीलितं विद्धम् अथवा शर इति तन्त्रेणोपपत्तिः। सकृदुच्चरितमनेकोपकारकमपि तद्विदः। तेनायमर्थः। सम्पन्नः असमशरस्य कामस्य शरैः बाणैः कीलितं खण्डितं वल्लभकृतापेक्षायां सङ्गतसमये असमशरपीडनाद्ल्लभेनैव तत्कृत्यमित्यवगन्तव्यम्। तथा च अनुसर्त्तुप्रहरणमत्यन्तानुचितम्। अतएव कं शरणं यामीत्यन्वयः। अत्रानुगमशब्देऽश्लीलदोषो देशभेदात् परिहर्त्तव्यः। अनित्यत्वेन वा अनुसरणायेति वा पाठः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। आविष्कारेण किञ्चिद्दुःखनिवृत्तिर्भवतीति प्रसिद्धया स्वकीयां दुरवस्थामाह; यदनुगमनाय यस्य कृष्णस्यानुगमनाय निशि रात्रौ गहनमपि वनं शीलितम् अनुभूतं तेन कृष्णेन मम हृदयमसमशरेण कामेन हेतुभूतेन कीलितं बिद्धम्। यदर्थमहमागता तेनैव मम हृदयं कीलितमिति कृष्णस्य दुरात्मता दर्शिता। यद्वा तेन कृष्णेनासमशरेण विषमवाणेन मम हृदयं कीलितमिति कृष्णस्य दौरात्म्यं कन्दर्पाभेदश्च दर्शितः। गहनं काननं कष्ट' इति।।२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। (यदिति।) किञ्च यस्य श्रीकृष्णस्यानुगमनायान्वेषणाय सुरतेन सन्तोषयितुं निशि रात्रौ गहनमपि [१]निर्जनवनमपि मया शीलितं सेवितमनुभूतं वा। तेन श्रीकृष्णेन निमित्तभूतेन[२] मम हृदयं असमशरेण कामबाणेन कृष्णागमनाभावात् कीलितं[३] विद्धम्।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। यदिति। मया यदनुगमनाय कृष्णस्यानुगमनाय सुरतेन सन्तोषयितुं निशि रात्रौ गहनमपि निर्जनवनमपि शीलितं सेवितं तेन कृष्णेन हेतुना ममेदं हृदयं चेतः असमशरेण [(४)] कामेन कीलितं विद्धम्। कृष्णागमनाभावात्।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। यदनुगमनायेति। यस्यानुगमनाय अनुसरणाय निशि रात्रौ गहनं काननं शीलितमभ्गा(भ्य)स्तं प्रविष्टमिति यावत्। गहनं काननं वनम् **इत्यमरः** (२.४.१)।

तेन वनप्रवेशेन इदं मम हृदयं असमाः पञ्च शराः अरविन्दादिरूपाः तैः कीलितं प्रोक्तम्। प्रकरणवशात् मन्मथस्येत्यर्थः। "अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः।।" **इत्यमरः** (१.१.२७)।।२।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। यदन्वित्यादि। यस्य कृष्णस्यानुगमनाय अर्थात् सङ्गमाय निशि रात्रौ गहनं वनमपि शीलितं वाञ्छितं मयेति शेषः। धातूनामनेकार्थत्वादिच्छायामपि शीलयति वर्तते। तेन कृष्णेन मदन्तिकमनागच्छता हेतुना ममेदं हृदयम् असमशरेण[१४१] कामेन कीलितं यन्त्रितम्। ''कील प्रतिबन्धे'' इति धातुः। कामबाणयन्त्रितमित्यर्थः। उक्तं च ''अयं त्वत्पूर्वप्रतिमाविशेषो यः सेव्यमानो रिपुजा(ता)मुपैति'' इति।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। किं च इतस्ततो भ्रष्टास्मीत्याह यस्यानुगमनाय निरन्तरं सङ्गमाय रात्रौ वनमपि सेवितम्, तेन श्रीकृष्णेनेहेतुना ममेदं हृदं कामबाणेन विद्धं महत्कष्टमित्यर्थः।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। हन्त! सखीवचनविश्वासेन एव दुर्विदग्धया मयाऽऽपादितोऽयमनर्थः इत्याह, यदिति। पूर्वं खलु हे सख्यो! दुरासदोऽयमिति, वञ्चकोऽयं बहुवल्लभोऽयमिति बहुधोदीरितोऽपि मया, त्वयैव निरुपाधिप्रेमवानसौ, त्वामपेक्ष्य एव पुरतः एवाभिसरन् निकुञ्जे वसति। कथमसौ वञ्चक इत्यादिवचनैः सत्यतया प्रतीयमानैः यदनुगमनाय, यस्यानुसरणाय निशि तमिस्रायां गहनमपि झिल्लीझङ्कारादतिभीषणं दुर्गमविपिनम् अपि, किं वदामि, मया गतमिति, अपि तु शीलितं, निजगृहादाधिक्येनालोचितमित्यर्थः। तेन कृष्णेन निःसहायाया ममेदमसम्भावितमनोरथपरीततयाऽतिमूढं हृदयं चित्तमसमशरेण दुर्बोधमन्मथेन कृत्वा कीलितम्, खण्डितं कारितमिति अर्थः।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। यदनुगमनाय निशितेति; यस्य मिलनाशया गहने कानने अरण्ये वा इतस्ततःभ्रमामि। अरण्येऽपि आत्मानमुस्थापयामि सेवे वा। येन खलु मम हृदयं मदनशरेण विद्धम्। अहो महतीयं पीडा मा तस्याधीने वध्नाति।।२।।

**३-मम मरणमेव वरमतिवितथकेतना।**
**किमिह विषहामि विरहानलमचेतना।। यामि हे० ।।३ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। वितथं केतनं गृहं यस्या इति विग्रहः। विरहिणानलवत् चेतना संज्ञा यस्याः सा तथा।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।।अपि च, ममेति ।इहाचेतनाहं चैतन्यरहिता विह्वलत्वमाप्ता विरहानलं विषहामि। कथमिति विषंहामीति। धात्वन्तरमप्यस्तीत्यवधार्यताम्। तदसद्भावे भ्रान्तिर्मास्तु। तत्संदेहनि, राकरणार्थं कामधेनावीक्ष्यताम्। अत्र विषह्य किं शक्ताविरत्यस्य (?) दिवादित्वधुरादित्वभ्वादित्वपरस्मैपदिनो न सन्ति। किंविशिष्टा अहम्? इतीव हेतोः वितथकेतना वितथं केतनमावासो यस्याः। प्रियशून्यत्वात्। अथवा, वितथं निमन्त्रणं यस्याः सा। सखीमात्रवचनेन हि तामनुसरणेन वा ईदृशस्य साहसस्यानुपघातात्। अथवा, वितथं केतनं देहो यस्याः प्रियाप्राप्तेः।। एवं सति मम मरणमेव वरं, न देहधारणम्।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। एवं सखीषु दोषं समारोप्य सनिर्वेदमाह, ममेति प्रियकृतप्रणयभङ्गतया लज्जितजीवनाया मम वञ्चकसखीजनपादपतनादिदैन्यापेक्षया मरणमेव वरम्, श्रेष्ठम्। कथमेव निर्विण्णासि, इत्यतः आह-श्रीकृष्णागमनाभावादतिवितथमतिशयेन व्यर्थं केतनं तदर्थं सम्पादित विविधोपहारान्वितवासगृहं यस्याः। अतोऽचेतना, पूर्वोपायान्तर-विचारमूढतया शून्यहृदया अहमिह दशायां विरहानलं विच्छेदाग्निं किं विषहामीति, किमर्थं कल्पितधैर्यावलम्बनेनात्मानं कदर्थयामीत्यर्थः।।३ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। मम मरणमेव वरमुत्कृष्टम्। तत्र हेतुमाह, इह वनेऽचेतना समूर्च्छा। यद्वा, अचेतना मूर्च्छया ज्ञानरहिता। यद्वा, अः कृष्णस्तत्र चेतना बुद्धिर्यस्वास्तादृशी। विरहानलं विरहाग्निं किमिति विषहामि सहे। तथा च इह मम दुःखस्य कोऽपि ज्ञातापि न, इत्यरण्यरुदितं किमित्याचरामीति भावः। कीदृश्यहम्? अतिवितथकेतनातिशयेन वितथं मिथ्याभूतं केतनं गृहं यस्यास्तादृशी। यद्वा, अतिवितथं केतनं शरीरं यस्याः सा। तथा च निरुपमसौन्दर्यालयमपीदं शरीरं तेन विना विफलमित्यर्थः।

अतिवितथकेतनमिमं स्वपतिं विहायान्यपुरुषमभि-सृतवतीत्येवंरूपलाञ्छनं यस्यास्तादृशी। तस्मिन्मिलिते लक्षणमपीदं न मे दुःखाय स्यात् । संप्रति तु मृषालक्षणमात्रं मे दुःखदमिति भावः। 'केतनं लाञ्छने काये गृहे चोपनिमन्त्रणे।' इति **विश्वः**। 'षह मर्षणे' इति चुराद्यन्तर्गणयुजादौ परस्मैपदी विकल्पेन णिजन्तः पठितः। तस्य णिचोऽभावे विषहामीति प्रयोगः।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। ममेति। अतिवितथं कृष्णागमनाभावात् अत्यर्थं व्यर्थं केतनम् आवास मन्दिरं यस्याः सा तादृशी अतएव अचेतना विवेकहीना अहं विरहानलं कृष्णवियोगबह्निम् इह लतामन्दिरे स्थिता सति इति शेषः। किमिति विषहामि विशेषण सहामि कृष्णागमनसम्भावनाभावाविरहानलसदनं वृथेवेति भावः। अतश्च विरहानलसहनात् मम मरणमेव वरं दुःखानुषक्तंबहुकालजीवनात् एकदैव मृत्युरेव श्रेयस्कर इत्यर्थः। अतएवादृशदुःखनिवारणाय कं शरणं यामीत्यन्वयः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। कृष्णसमागममलभमाना विरहवह्निनिर्वापनोपायमववाधरयति। इहावस्थायाम-चेतना ज्ञानशून्या विरहानलं किं विषहामि ? सह मर्षणे धातुः अत्र। प्रकरणस्यानित्यत्वात् नात्मने पदम्। यदि न सोढव्यः तदा किं विधेयमित्यत आहमम मरणमेव वरं श्रेष्ठकर्म, विरहाग्नि निर्वापकत्वात्। एवं सति त्रैलोक्यकमनोयदेह-परित्यागः कथं सोढव्यमित्यभिप्रेत्याह, अहं कीदृशी ? अतिवितथमतिव्यर्थं कृष्णाङ्गपरिष्वङ्गाभावेन केतनं शरीरं यस्या एतादृशी। 'केतनं लाञ्छने गात्रे कार्ये चोपनिमन्त्रण' इति **विश्वः**।।३ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३ ।। (ममेति।) एवं श्रीकृष्णेन वञ्चिताया मम मरणमेव वरं श्रेष्ठम्। मरणे विरहानलाभावात्। किञ्च अहं किमिति विषहामि विरहानलं सहामि ? कीदृश्यहम् ? अतिवितथकेतना अतिशयेन[४]वितथं मिथ्याभूतं गृहं शरीरं वा यस्याः। कीदृशी ? अचेतना ज्ञानशून्या [५] बुद्धि [६] र्यस्याः श्रीकृष्णागमनप्रत्याशारहितत्वात् वितथं त्वनृते व्यर्थे इति **हेमः**। केतनं लाञ्छने [७] श्रृङ्गे गोत्रे गेहापमन्त्रणे इति **विश्वः** (७१.५७)। [८] प्रतिपज्ज्ञप्तिचेतनाः **इत्यमरः** (१.५.१)। विरोधोक्तिरलङ्कारः।।३ ।।

१. नास्ति-अ.ब. २. ममेदं हृदयं-इ.फ.ग.ह ३. बद्धम्-अ.ब.ह.४.कामबाणेन-क.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३ ।। ममेति। इह वनेऽचेतना ज्ञानशून्या [९] विरहानलं विरहाग्निं किमिति विषहामि सहामि। तस्मान्मम मरणमेव [(१०)] वरं [११] श्रेष्ठम् ; [१२]मरणे [१३] विरहानलाभावात्। [१४] कीदृश्यहम्? अतिवितथमतिव्यर्थं केतनं शरीरं यस्याः; कृष्णेन [१५] सौन्दर्योपभोगाभावात् [१६] ।।३ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३ ।। ममेति। अत एव मम मरणमेव वरं इति। वितथं व्यर्थं केतनं कुञ्जगृहं यस्याः सा। इह अचेतना इतिकर्तव्यताज्ञानशून्या विरहानलं विषहामि; तस्मात् मरणमेव वरम्; विरहदुःखाननुभवात्। किमिति किं विरहानलं विषहामि अपि तु विषहाम्येव ; अतो मरणमेव वरमिति काकुर्वा।।३ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। ममेत्यादि। अधुना मम मरणमेव वरं प्राणत्याग एव श्रेयान्। वरमिति। (हीनोत्कर्षो) कष्टापेक्षया मरणं वरमित्यर्थः। तथापि किमिति किमर्थमिह बृन्दावने वितथकेतना सती विरहानलं विषहामि किमित्यनुभवामि। अत एवाहमचेतना विशिष्टज्ञानशून्या मरणेन विरहानलसन्तापः शमयितुं किं न शक्यते इति भावः किं वा अचेतना मृतकल्पा सती वरहानलं किं वि[स](ष)हामि? यद्यपि मरणेऽग्निः सन्निहितो भवेत् तथापि तत्र तदनुभवाभावान्मरणमेव वरम्! अतिवितथकेतनेति। अतिशयेन वितथं मिथ्यावाचकं केतनं सङ्केतनं निमन्त्रणं वा यस्याः। ''केतनं तु विमन्त्रणे।। गृहे केतौ च कृत्ये च'' इति **मेदिनी**। ''वितथं त्वनृतं वचः'' **इत्यमरः**।।३ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३ ।। अतो मरणमेव मम बरं श्रेष्ठ यतोऽतिवितथं व्यर्थं केतनं देहो यस्याः सा अचेतनाहं विरहानलमिह समये किमर्थं विषहामि।।३ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३ ।। एवं सखीषु दोषं समारोप्य सनिर्वेदमाह, ममेति। प्रियकृतप्रणयभङ्गतया लज्जितजीवनाया मम वञ्चकसखीजनपादपतनादिदैन्यापेक्षया मरणमेव वरम्, श्रेष्ठम्। कथमेव निर्विण्णासि, इत्यतः आह, श्रीकृष्णागमनाभावादतिवितथम्, अतिशयेन व्यर्थं केतनं तदर्थसम्पादितविविधोपहारान्वितवासगृहं यस्याः। अतोऽचेतना, पूर्वोपायान्तर-विचारमूढतया शून्यहृदया अहमिह दशायां विरहानलं विच्छेदाग्निं किं विषहामि, किमर्थं कल्पितधैर्यावलम्बनेनात्मानं कदर्थयामीत्यर्थः।।३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

३- ममेति; अतिशयव्यर्थतया कन्दर्पपीडां षोढुमशक्या भवामि। अतः तेन ममाचेतनायाः निमज्जनत्वात् अचेतनेन भवामि। इतोऽपि वरं मरणम्। विरहानलस्य पीडातः मोक्षः भविष्यति।।३।।

**४-मामहह विधुरयति मधुरमधुयामिनी।**
**कापि हरिमनुभवति कृतसुकृतकामिनी।। यामि हे।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। कापि कामिनी हरिमनुभवति, मां तु मधुरमधुयामिनी विधुरयतीति वाक्यार्थः। या निशा दूरस्थमपि प्रियं सङ्गमयति, सैव मामतिविघटयतीत्यभिप्रायः। कथं हरिमनुभवतीत्याह। कृतसुकृतेति। साधारणत्वात् सर्ववाक्यानामर्थाक्षेपाद्वाहमकृतेति खेदः। ''मधुश्चैत्रेदैत्यभेदे मधुरौ स्वादुशोभनावित्**यमरः**''।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, मामहहेति। मधुरमधुयामिनी कोमला सरसा वसन्तरात्रिर्मां विधुरं करोति। अपि च, कापि कृतसुकृतकामिनी कृपया हरिमनुभवति। एता वताऽहं मन्दभाग्या यतस्तत्प्राप्त्यर्थ मया प्रयत्नः कृतः, अन्यया च हरिरतसुखमनुभूयते।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। केवलमत्र नागतमात्रमिति न, किन्तु अतिचञ्चलऽन्यां कामपि रमयतित्याह मामिति ।कापिमदपेक्षयाधिकसौभाग्यवती कृतमनुष्ठितं सुकृतं प्रेमलक्षणपुण्यविशेषो यया सा चासौ कामिनी श्रीकृष्णसम्भोगभाग्यशालिनी रमणीत्यर्थः, हरि निजचित्तानुरञ्जन-चतुरकृष्णमनुभवति। तेन क्रीडासुख-मास्वादयतीत्यर्थः, मां तु मधुरा, कृष्णसम्भोग-सुखौचित्यसम्भावनयाऽतिस्पृहणीया मधुयामिनी, विविधोन्मा,

हेतुवसन्तसम्बन्धिनी रात्रिरहह, कष्टं विधुरयति, विकलयति। विधुरं विकलेऽपि च, इति **विश्वः**। अतो मरणमेव श्रेय इतिभावः।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। मामित्यादि। अहहेति खेदे। इयं मधुरा मनोहरा मधुयामिनी वसन्तरात्रिर्मां विधुरयति विकलयति। कापि कृतंपुण्यं यया एतादृशी कामिनी हरिं कृष्णमनुभवति। केलिसमये पश्यति। 'विधुरं स्यात्प्रतिश्लेषे विधुरो विकलेऽन्यवत्' इति **विश्वः**।

'मधुरं सरसे ज्ञेयं स्वादुन्यपि मनोहरे' इति **धरणि**:। 'स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः' **इत्यमर**:।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। मामिति। स दैव मधुरा मनोहरा या मधुयामिनी वसन्तरात्रिः अथवा मधु पुष्परसः तद्रात्रि गृह्णाति इति मधुरं मकरन्दहेतुरित्यर्थः, स चासौ मधुः वसन्तः तद्रात्रिरिति वा माम्, इहास्मिन् समये विधुरयति दुःखितां करोति दुःखवचनात् बिधुरशब्दात् तत् करोति णिचि टि लोपः। किं च कृतं पूर्वजन्मन्यनुष्ठितं यत्सुकृतं पुण्यं तेन कृतो यः कामः कृष्णविषयाभिलाषः सोऽस्यास्तीति तादृशी पूर्वपुण्यपरिपाकवशात् कृष्णविषयाभिलाषवतीत्यर्थः। अथवा आहिताग्न्यादिष्वपि निष्ठायाः पर निपाते सति सुकृतेन पुराकृतपुण्येन कृतो निध्यादितो यः कामः कृष्णविषयाभिलाषः सोऽस्यास्तीति कामिनी न चात्र कर्मधारयात् मत्वर्थीय इति निषेधः। तस्यानित्यत्वं च। एकदेशिना एकाधिकरणेनेति सूत्रकारवचनात्। सर्वधनी सर्वकेशीत्यादि भाष्यकारवचनात् च अवगन्तव्यम्। प्रयोगश्च। ''आकैलासाद्विस-किशलयच्छेदपाथेयवन्त'' इति। एवं विधान्यपि लोकोत्तरसौभाग्यसम्पन्ना इहास्मिन्नेव समये हरिं श्रीकृष्णाख्यं मम प्राणेशमनुभवति। अथवा कापि काचित् कृतसुकृता च असौ कामिनी च कापि पुण्याङ्गना इत्यन्वयः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। हृदयोत्पन्नासूयया व्यमिचारिभावमुद्भावयति। अहह इति खेदे। मधुरमधुयामिनी मनोहरवसन्तरात्रिः विधुरयति विकलयति। अत्र मधुरपदोपादानेन स्वभावमनोहराया अपि तापजनकत्वप्रतिपादनेनात्युद्वेगवीजमुपदर्शितम्। कृतं सुकृतं यया सा तथा कृतसुकृता। चासौ कामिनी चेति कृतसुकृतकामिनी हरिं कृष्णं काप्यनिवर्चनीयगुणा आलिङ्गनचुम्बनादिकर्मणाऽनुभवति। अतएव सुकृतकामिनी हरिमनु लक्षीकृत्य भवति विद्यत इत्यर्थ इति **भगीरथ**:।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। (मामिति।)[१७]किञ्च, अहहेत्यादि आश्चर्ये। मधुरमधुयामिनी मनोज्ञा वसन्तरात्रिः परमानन्दप्रदाऽपि मां [१८] विधुरयति विह्वलयति। कापि [१९] कृतसुकृतकामिनी कृतपुण्यपुञ्जा कान्ता हरिं श्रीकृष्णं अनुभवति [२०]भुङ्क्ते भजते वा। [२१] अथ वा काऽपि मादृशी सुकृतं श्रीकृष्णालिङ्गनादिपुण्यं यया तादृशी कामिनी। इदानीं न तादृग्विधाऽहमिति [१]विश्लेषमेवानुभवामीति भावः। इयमुन्मादावस्था सम्भवति।।४।।

१.मामिहह-इ. २.मधुमधुर-इ. ३.अनुभवति-इ. ४.वितथो मिथ्याभूतो-अ.ब.५,६.नास्ति-इ.फ.ग.ह. ७.कार्षेगेहे चोपनिमन्त्रणे-विश्व (बना-१९११)८.चेतनं रूपदेशे स्यातन प्रत्याशायां च चेतनमित्यपि-इ.फ.ग.ह.ज.९.तः१०.पर्यन्तो भागो नास्ति-ड.११,१२,१३.नास्ति-क.१४.तः१६.पर्यन्तं नास्ति-म.१५.शरीरसौन्दर्यो-क.ल.१७.नास्ति-अ.ब.१८.नास्ति-इ.१९.२०.नास्ति-अ.ब.२१.यद्वा-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। मामिति। अहहेति दुःखानुकारे। [२] मधुरमधुयामिनी मनोज्ञवसन्तरात्रिर्मां विधुरयति विकलयति। काऽपि कृतसुकृतकामिनी विहितपुण्या कान्ता हरिं कृष्णं अनुभवति उपभुङ्क्ते।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। मामिति। मधुर्वसन्तः तस्मिन् मधुश्चन्द्रः तेन वा मधुरा अतिरमणीया यामिनी रात्रिः इह कुञ्जे मां विधुरयति क्लेशयति ; हेति खेदे। काऽपि कृतं सुकृतं पुण्यं यया सा च सा कामिनी हरिं सुखत्वादनु भवति भोगसाधनत्वेन साक्षात्करोति। अत्र कृतसुकृतपदार्थ हेतुकत्वाद्धर्यनुभवस्य काव्यलिङ्गमलङ्कारः।।४।।

१.श्चेषमात्रं क्लेशमेवानुभवामीति-फ.क्लेशमेवानुभवामीति-ह. २.मधुयामिनी-ड.ल.म.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। मामित्यादि। कापि कृतसुकृतकामिनीति। कृतं सुकृतं यया सा चासौ कामिनी चेति। सा हरिमनुभवति। मां तु मधुरमधुयामिनी अहह खेदे विधुरयति। या वसन्तनिशादूरस्थमपि प्रियं सङ्गमयेति सैव माममतिविघटयतीत्यभिप्रायः। कथं हरिमनु भवतीत्याह, कृतसुकृतेति। साधारणत्वात् सर्ववाक्यानामर्थाक्षे-पाद्वाऽहमकृतसुकृतेति खेदः। अत्र विधेयाविमर्शदोषो दुर्निवारः।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। न केवलमात्रं नागत इति चञ्चलचित्तोऽयं कामप्यन्यामभिसृत इत्याह। कापि कृतसुकृतकामिनी हरिमनुभवति तेन सह केलिसुखमित्यर्थः। मां तु परमसुखरूपा वसन्तनिशा, अहहखेदे, विकलयति या निशा दूरस्थमपि प्रियं सङ्गमयति, सैव सुकृताभावात् मां विधुरयति। कथं सा अनुभवति कृतं सुकृतं यया सा मम तादृक् सुकृतं नास्तीत्यर्थः। विधुरो विकल इति **विश्वः**।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। केवलमत्र नागतमात्रमिति न, किन्तु अतिचञ्चलोऽन्यां कामपि रमयतीत्याह मामिति। कापि मदपेक्षयाधिकसौभाग्यवती कृतमनुष्ठितं सुकृतं प्रेमलक्षणपुण्यविशेषो

यया सा चासौ कामिनी श्रीकृष्णसम्भोगभाग्यशालिनी रमणीत्यर्थः, हरि निजचित्तानुरञ्जन-चतुरकृष्णमनुभवति। तेन क्रीडासुख्मस्वादयतीत्यर्थः, मां तु मधुरा, कृष्णसम्भोग-सुखौचित्यसम्भावनयाऽतिस्पृहणीया मधुयामिनी, विविधोन्मादहेतुवसन्तसम्बन्धिनी रात्रिरहह, कष्टं विधुरयति, विकलयति। 'विधुरं विकलेऽपि च' इति विश्वः। अतो मरणमेव श्रेयः इति भावः।।४।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। मामहहेति; मधुरेयं रात्रि अहह खेदे हा दुःखं संतापयति। प्रत्युत इयं यामिनी कामपि पुण्यवतीं सुखयति श्रीकृष्णेन। श्रीकृष्णोऽपि तया रमणसुखमनुभवति अहो दुःखम्।।४।।

**५-अहह कलयामि वलयादिमणिभूषणम्।**
**हरिविरहदहनवहनेन बहुदूषणम्।। यामि हे० ।।५।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। वलयादि कलयामि धारणमिति वाक्यार्थः। अहहेति खेदे। कीदृशं मणिभूषणं यस्येति विग्रहः। वलयादिधारणेन कथं श्रम इत्याह। हरिबिरहे एव दहनो बह्निस्तस्य बहनेन धारणेन बहूनि दूषणानि यस्येति विग्रहः। स्त्रीणां प्रियालोकफलो हि बेषः इति। कुमारे अभिप्रायः।।५।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, अहहेति। 'अहह' इति खेदे। हरिविरहदहनवहनेन वलयादिकं मणिभूषणं बहुदूषणं कलयामि। यतः 'स्त्रीणां प्रियालोकफलो हि वेषः' इति।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। एवं निजनाथस्यासक्तत्ववितर्कद्विगुणितविरह सन्तापेन निजाङ्गभूषणं निन्दन्त्याह अहहेति। यदर्थं वलयादिमणिभूषणं कङ्कणप्रमुखरत्नालङ्कारं कलयामि, तस्यान्याशक्तिं जानन्त्यपि धारयामि, अतः निर्लज्जाऽहमिति खेदद्योतकाऽहहशब्दः। कीदृशं, यतो हरिविरह एव अतिसन्तापकत्वात् दहनः अग्निः, तस्य वहनेन धारणेन हेतुना बहूनि दूषणानि यस्य तत्, विरहसन्तप्तायाः खलु मृणालाद्याभरणमुचितम् । न तु रत्नाभरण-मिति दूषणत्वम्। एतेषां विरहाग्निसन्दीपकत्वादितिभावः।।५।।

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।५ ।। अहहेति। अहहेत्यद्भुते। वलयादिमणिभूषणं कटकादिमणिखचितमलंकारं हरिविरहदहनवहनेन कृष्णविरहाग्निधारणेन बहुदूषणमनेकदोषं पश्यामि । स्त्रीणां प्रियाण्याभरणानि, तान्यप्यधुना भारभूतानात्यद्भुतमिति भावः।।५ ।।

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी**

।।५ ।। अहहेति। हे दैव! हरिणा कृष्णेन विरहो वियोगस्तज्जनितयोः दहनः बह्निः तस्य बहनेन धारेणेन हेतुना बलयादिमणिभूषणं कङ्कणमुखान्यलङ्करणानि भूषणमिति जातावेकवचनम्। वहुदूषणं जनापवादरूपो दोषो यस्मिन् तादृशं कलयामि मन्ये अहह कष्टम्। वियुक्ताया भूषणधारणस्यायुक्तत्वात् भूषणानां दूषणमवगन्तव्यम्। पूर्वं यानि भूषणानि सस्पृहं मया धृतानि तान्यपि इदानीं मया दूषणानि कलितानि इति कष्टत्वमवगन्तव्यम्। अथवा दहनबहनेन बहूनि दूषणानि मालिन्यादीनि यस्मिन् तादृशम्। विरहाग्निनिषेधादिति विकृत्य तद्रूपमित्यर्थः। तादृशं वलयादिभूषणं कलयामि धारयामि इव, अहह कष्टम्। असन्निहितवल्लभायास्तरुण्या अङ्गालङ्कारस्य निरर्थकत्वात्कष्ट-मित्यवगन्तव्यम्।।५ ।।

**(६) शुक्लध्वजनृपतिकृत- सारवती**

।।५ ।। वलयादिभूषणेषूद्वेगमुद्भावयति। अहह खेदे। वलयादिमणिभूषणं वलयादिमणिप्रधानालङ्करणं हरिविरहदहनवहनेन हेतुना बहूनि द्रवीभावस्फुटनादीनि दूषणानि यस्य एतादृशं कलयामि अवधारयामि। वह्निसम्बन्धेन हिरण्यघटितवलया-दिद्रवीभावोमणेश्च स्फुटनं भवतीत्युचितमेव। जगद्धरादयस्तु बहुभूषणमतिशयितापराधं कलयामि मन्ये, स्त्रीणां प्रियालोकनफलो हि वेश इति योजयन्ति। तत्पक्षे विरहस्य दहनत्वेन निरूपणमफलमित्यवधेयम्।।५ ।।

**(७) वनमालि भट्टकृत- सञ्जीवनी**

।।५ ।। (अहहेति।) किञ्च अहहेति खेदे। [३] अहो वलयादिमणिभूषणं कङ्कणाद्यलङ्कारं कलयामि धारयामि। कीदृशम्? हरिविरह[४]दहनवहनेन श्रीकृष्णवियोगवह्निधारणेन बहुदूषणमतिशयपापाचारम्। प्रियदर्शने स्त्रीणां[५]शृङ्गारसाफल्यमिति भावः।।५ ।।

**(८) नारायण पण्डितकृत- पदद्योतनिका**

।।५ ।। अहहेति। अहं [१३]वलयादिमणिभूषणं कङ्कणप्रभृति [१४]मणियुक्तालङ्कारं हरिविरहदहनवहनेन कृण्षवियोगवह्निधारणेन हेतुना बहुदूषणं अतिशयापचारं कलयामि म्रन्ये। प्रियदर्शन स्त्रीणां [१५] अलङ्कारसाफल्यमिति भावः।।५ ।।

१.हरिविरहवनजदहनेन-इ. २.मामपि-इ. ३.अहं-इ.फ.ग.ह. ४.दहनेन-फ.ग. ५.शृङ्गाररस-अ.ब. ६.दहति-इ.फ.ह.ग. ७.स्वकरकृता-फ.ह. ८.त:. १०.पर्यन्तं नास्ति-अ.ब. ९.युक्तालङ्कारं-ड.म. १५.अलङ्कारस्य परं साफल्यमिति भाव:-क. १६.नास्तिृड. १७.सुकुमारा-क. १८.हृदि-क.ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। अहहेति। वलयादिकं मणिभूषणं रत्नखचितालङ्कारं कलयामि वहामि। हरे: विरह एव वनजदहनो वह्नि: तेन बहुदूषणं सन्तापकत्वाच्चदोषापादकम्।।५।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। अहहेत्यादि। अहं मणयो भूषणानि यस्य ईदृशं वलयादि कलयामि बिभर्मि। ''अहहेत्यद्भुते खेदे'' **इत्यमर:**। खेदस्य हेतुमाह। किंविधम्? हरिरिति। हरिविरह एव दहनो वह्निस्तस्य वहनेन धारणेन हेतुना बहुदूषणमेव बहूनि दूषणानि यत्र तत्तथा। वलयादिबहुदूषणमाकलयामीति सम्बन्ध:। अग्ने: सन्निधानेन मणीनां रूपान्तरं भवतीति मणिभूषणं दृश्यते इति प्रतीयते। अभिप्रायस्तु यत् कृतसुकृतकामिनी।।'' श्लोकस्य अनन्तरं वर्तते। वलयादिकं प्रीतिजनकं तदिदानीं हरिविरहेण व्यर्थमिति। यदुक्तम्, ''स्त्रीणां प्रियालोकफलो हि वेष:'' इति। अतस्तदपसारणीयमिति भाव:।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। अतोऽद्यापि, अहह खेदे, तत्करकल्पितवलयादिमणिभूषणं धारयामि। तत्र कथं खेद:? हरिविरह एव वह्निस्तस्य धारणेन वहूनि दूषणानि यस्य तत् देहोष्माणा दौष्यादित्यर्थ:। प्रियावलोकफलो हि स्त्रीणां वेश इत्युक्ते:।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। एवं निजनाथस्यासक्तत्ववितर्कद्विगुणितविरहसन्तापेन निजाङ्गभूषणं निन्दन्त्याह; अहहेति। यदर्थं वलयादिमणिभूषणं कङ्कणप्रमुखरत्नालङ्कारं कलयामि, तस्यान्यासक्तं जानन्त्यपि धारयामि, अत: निर्लज्जाऽहमिति खेदद्योतकाऽहहशब्द:। कीदृशं, यतो हरिविरह एव अतिसन्तापकत्वात् दहन: अग्नि:, तस्य वहनेन धारणेन हेतुना बहूनि दूषणानि यस्य तत्, विरहसन्तप्ताया: खलु मृणालाद्याभरणमुचितम्। न तु रत्नाभरणमिति दूषणत्वम्। एतेषां विरहाग्निसन्दीपकत्वादिति भाव:।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। अहहेति; इदानीं नागते श्रीकृष्णे किमनेन भूषणेनालंकरणेन। कटककुण्डलादिषु या: मणय: सन्ति तेषामलंकाराणां श्रीकृष्णविरहेण तदजन्यतापेन ते भूषणं दूषणायते ह हा।।५।।

**६-कुसुमसुकुमारतनुमतनुशरलीलया।**
**स्रगपि हृदि हन्ति मामतिविषमशीलया।। यामि हे० ।।६।।**

## (१)नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।।अत्र पादयोर्वैपरीत्यमपि दृश्यते। हृदि स्थिता स्रक् पुष्पमालाप्यतनुशरलीलया कामबाणविलासेन मां हन्तीति वाक्यार्थः। कीदृशीं कुसुमसुकुमारतनुं कुसुमवत् सुकुमारतनुर्यस्या इति विग्रहः। अतनुशरलीलया, कीदृश्या, अतिविषमशीलया, अन्योहि बाणः क्षतं कृत्वा व्यथयति। कामबाणस्तु अवद्धत्वगप्यन्तर्भिनत्तीति-बिषमशीलत्वम्[१] ।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, कुसुमेति। हे कान्त! हृदि वर्तमाना स्रगपि मामतनुशरलीलया कामबाणस्वाभाव्येन हन्ति। मया पुष्पस्रगिति धार्यते; तस्याश्च स्मरशरमयत्वात् हननस्वभावः। अत एवातिविषमशरलीलया। अति विषमीयते यस्मिन्नित्यतिविषमं तच्छीलं यस्याः सा तथा। अथवा, मां हृदि मनसि हन्ति, मनो विध्यतीत्यर्थः। अत एव विषमशीलया अन्यशरेभ्यो विषमस्वभावया। तथा च 'अपूर्वेयं' धनुर्विद्या मन्मथस्य महात्मनः। शरीरमक्षतं कृत्वा भिनत्त्यन्तर्गतं मनः।।' किंभूतां? कुसुमादपि सुकुमारतनुम्। यो हि यस्माद्धीनबलः स तं सुखेन हन्ति।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। मणिभूषणं किं दूषयामि, प्रभौ मुक्तापेक्षौ व्रजति न हि को वा विमुखताम्, इत्यनुसारेण हृदि स्थिता मालाऽपि अतनुसरलीलया मां हन्ति, हिनस्ति, हन्ति चेत् वेधः कथं न लक्ष्यते, अत आह, अतिविषममतिशयेन वक्रं शीलं स्वभावो यस्यास्तादृश्या, अतनु शरलीलयाऽनङ्गवाणविलासेन हन्ति। अन्ये हि बाणाः क्षतं कृत्वा व्यथयन्ति। अनङ्गसम्बन्धिनस्तु क्षतमकृत्वा एव मर्माणि भिन्दतीति विषमत्वम्। यथाह।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। कुसुमेति। स्रगपि पुष्पमालापि। अतनुशरलीलया अतनुः कामस्तस्य ये शरास्तेषां लीलया मां हृदि हन्ति ताडयति। कामबाणा अपि पुष्पाण्येव स्रगपि पुष्पमयीति तल्लीलया हन्तीति भावः। कीदृश्या अतनुशरलीलया? अतिविषमशीलया अतिशयेन विषमं शीलं स्वभावो यस्यास्तादृश्या। अन्यबाणा हि क्षिप्ताः सन्तः क्षतमुत्पाद्य

घ्नन्ति। कामबाणास्तु हृदि संगताः क्षतमकृत्वैवान्तरे घ्नन्तीति विषमशीलतेति भावः। कीदृशीं माम्? कुसुमसुकुमारतनुं पुष्पकोमलाङ्गीम्।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। कुसुमेति। हे देव। हृदि न्यस्तेति शेषः। अपवाह्यव्यधिकरणे स्त्रगपि कुसुममालिकापि किमुतान्य इत्यर्थः। अतिविषमम् अतिवक्रं शीलं स्वभावो यस्यास्तादृशी तया अतनोरनङ्गस्य शर लीलया बाणविलासहेतुना कृष्णं वदति। कुसुमसुकुमारातिमृदुला तनुर्यस्यास्तादृशीं मां हन्ति हिनस्ति हन्तीति अतीवान्यायः। स्त्रगादीनामुद्दीपकत्वेन विरहिजनतापकारित्वसम्भवात् हन्तीत्युक्तिरववोद्धयेति भावः अतएव कं शरणं यामीत्यन्वयः।।६।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। स्वहस्तनिर्मिता मदीयापि स्त्रक् माला विकलीकरोतीति विस्मयमापन्ना विलपति। इयं मदीया स्त्रगपि पुष्पमालापि मां हृदि हृदयदेशे हन्ति हन्तीव। मां कीदृशीम्? कुसुमादपि सुकुमारा कोमला तनुः शरीरं यस्या एतादृशीम्। अत्र तनोः कुसुमादप्यधिक-सुकुमारत्वप्रतिपादनेन कुसुमघटितमालाया ईर्ष्यासूचनेन हननयोग्यता दर्शिता, न तु सोत्कर्षप्रतिपादने तात्पर्यमित्यवधेयम्। केन प्रकारेण हन्तीत्यत आह अतनुः कामदेवः। तस्य यः शरः तल्लीलया तद्विलासेनेत्यर्थः। कुसुमशरशीलया किम्भूतया? अतिविषमशीलया। अतिविषमस्वभावात् विजातीयं शीलं स्वभावो यस्या एतादृश्या। अन्ये बाणा वहिः क्षतं कुर्वन्ति, कामबाणा वहिःक्षतमकुर्वाणा अपि परमात्मात्मकं चेतो विदारयन्तीति तल्लीलया विषमशीलत्वम्। यद्वा स्त्रक् कीदृशी? अतनुशरशीलया लक्षिता। इत्थम्मृतलक्षणे तृतीयेति व्याख्येयम्। तथा मदीयैव स्त्रक् कामबाणविलासेन मामतिहन्तीति विस्मयनामा व्यभिचारिभावो दर्शितः। तदुक्तं भावलतायाम्; औत्सुक्यं विस्मयो हर्षो व्रीडोन्मादो मदस्तथा। विषादो जडता निद्राऽवहित्था चापलं मतिः। अमी भावाः प्रयोक्तव्याः श्रृङ्गारे व्यभिचारिणः।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। बहुदूषणान्येवाह (कुसुमेति।) न केवलं हरिविरहो [६] हन्त [७] स्वकरधृता स्त्रगपि माला हृदि कृता अतनुशरलीलया अनङ्गबाणविलासेन मां हन्ति। [८] कीदृशीम्? [९] कुसुमसुकुमारतनुं पुष्पवत्कोमलदेहाम् [१०]। कीदृश्या? अतिशयेन विषमं दारुणं शीलं स्वभावो यस्याः। वज्रादप्यतिकठोरयेति भावः। [११] पुष्पं प्रसूनं कुसुमं सुमनो मृगजीवनम् इति रत्नाकरः[१२]।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६ ।। कुसुमेति। स्रगपि पुष्पमालाऽपि अतनुशरलीलया कामबाणविलासेन मां हृदि हन्ति। कीदृशीं [१६]माम्? कुसुमवत् [१७] पुष्पवत्सुकुमारा कोमला तनुः शरीरं यस्याः ताम्। कीदृशी अतनुशरलीला? अतिविषममतिदारुणं शीलं स्वभावो यस्याः। बाणेन [१८] हि क्षतं क्रियते न तु पुष्पादिना।।६ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६ ।। कुसुमेति। कुसुमवत् सुकुमारा कोमला तनुर्यस्यास्तां मामपि स्रगपि पुष्पमालाऽपि विषमे शीलं घातकस्वभावो यस्यास्तया। अतनोः मदनस्य शरलीलया बाणभावेन हन्ति।।६ ।।

१.विगणित-इ. २.तदागमनाय निवसामि किञ्च वसाम्येव-अ.ब.ग. ३.श्रीकृष्णान्वेषणाय-इ.फ.ग.ह.४.नास्ति-अ.ब.५.यया इति भावः-अ.ब.६.वसामि-क.निवसाम्येव-ल.म.७.निवसाम्येव-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। कुसुमेत्यादि। हृदि स्थिता स्रक् पुष्पमालापि अतनुशरलीलया कामबाणचेष्टया मां हन्ति मारयतीति वाक्यार्थः। यतः कामस्य कुसुमान्येव बाणाः। निरुपपदस्रक्शब्दः पुष्पमालामेवाभिधत्ते इति कविप्रसिद्धिः। विरहे पुष्पस्रजो दुःखकरत्वात्। किंविधाम्? कुसुमवत् सुकुमारा तनुर्यस्या इति "विग्रहः"। अतनुशरलीलया किंविधया? अतिविषमशीलयेति। अन्यो हि बाणः क्षतं कृत्वा व्यथयति। कामबाणस्तु अविद्धोऽपि अन्तर्भिनत्तीति तस्य विषमशीलत्वम्।।६ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६ ।। किं वक्तव्यमन्यभूषणानि? तत्प्रीत्यै हृदि धृतापि पुष्ठमाला कामवाणविलासेन मां हन्ति। तर्हि तद्व्यथां सहस्रकुसुमतः सुकुमारा तनुर्यस्यास्तां तत्सहनसामर्थ्यमपि नास्तीत्यर्थः। कीदृश्या? अतिविषमं शीलं स्वभावो यस्यास्तया, अन्यो हि बाणः क्षतं कृत्वा व्यथयति कामवाणस्तु विध्यन्नन्तर्भिनत्तीति विषमशीलत्वम्।।६ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६ ।। मणिभूषणं किं दूषयामि, 'प्रभौ मुक्तापेक्षे व्रजति न हि को वा विमुखताम्'' इत्यनुसारेण हृदि स्थिता मालाऽपि वैरायत इत्याह, कुसुमेति । हृदि वक्षसि स्थिता स्रक् पुष्पमालाऽपि अतनुशरलीलया मां हन्ति, हिनस्ति, हन्ति चेत् वेधः कथं न लक्ष्यते, अत आह, अतिविषममतिशयेन वक्रं शीलं स्वभावो यस्यास्तादृश्या,

अतनुशरलीलयाऽनङ्गबाणविलासेन हन्ति। अन्ये हि बाणाः क्षतं कृत्वा व्यथयन्ति। अनङ्गसम्बन्धिनस्तु क्षतमकृत्वा एव मर्माणि भिन्दतीति विषमत्वम्। यथाह,

अपूर्वेयं धनुर्विद्या मन्मथस्य महात्मनः।
शरीरमक्षयं याति भिनत्त्यन्तर्गतं मनः।।

इति कुसुमस्त्रक्सम्बन्धिनीं व्यथां कथं न सहसे, अत आह, मां कीदृशीं, कुसुमादपि सुकुमारा कोमला तनुर्यस्यास्ताम्। अतस्तत् सहनसामर्थ्यं नास्तीति भावः।।६।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।६।। कुसुमेति; कुसुमसुकुमार इव अत्यन्तं कोमलशरीरं मम कन्दर्पशरघातेन मालापि हृदि सन्नद्धां मां गरलमिव हृदयं हन्तुं समर्था इत्येव राधा विप्रलब्धा इव अधिकाधिकं मन्यते विरहव्यथया कुसुमशरस्य नाम अतनुभूतस्यकन्दर्पस्य बाणान् अक्षतशरीरेऽपि अन्तः प्रविश्य भिनत्ति। तद यथा,

अपूर्वेयं धनुर्विद्या मन्मथस्य महात्मनः।
शरीरमक्षयं याति भिनत्त्यन्तर्गतं मनः।।६।।

**७-अहमिह निवसामि नगणितवनवेतसा।**
**स्मरति मधुसूदनो मामपि न चेतसा।। यामि हे० ।।७।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।७।। व्याघ्रादभीतिमप्यविगणय्य तव सङ्गमसमाकाङ्क्षया अहं तिष्ठामि चेतसापि मधुसूदनोऽपि मां न स्मरतीत्यर्थः। न विगणितवनवेतसेति। न विगणिता बहुबेतसा ययेति विग्रहः। निरनुबन्धकोऽय न शब्दस्तेन न लोपो नञ् इति लोपो न भवति।।७।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।७।। अपि च, अहमिति। हे कान्त! अहमिह कुञ्जा नगणितवनवेतसा निवसामि न गणितानि वनानि वेतसाश्च यया। 'वनवेतस' ग्रहणमन्येषामपि वनस्थविषमाणा मुपलक्षणार्थम्। तेन दुर्लङ्घ्यमप्युल्लङ्घ्य न चिन्तामहमागता, परं मधुसूदनस्तु मां चेतसापि न स्मरति। अतीव युद्धाभिनिवेशः संभोगपराङ्मुखो भवतीति व्यङ्ग्यम्। नगणितेत्यादौ निषेधार्थकनकारेण समासः। 'अनुनीतश्च खगः स नैकधा' इतिवत्। शेषविवक्षाभावान्मां स्मरतीत्यत्र न षष्ठी।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। अभीप्सितवैफल्येनानुशोचति, अहमिह वसामीति। अहं तद्दर्शनाभात्दग्धहृदया, इह सङ्केतस्थाने समयावधिशून्यं वसामि। कीदृशी, न विगणितो नादृतो वनवेतसोऽति-भीषणसत्त्वनिवासभूमिता, यावत् तदागमनम्, अवस्थानमित्याशंक्याह मधुसूदनः श्रीकृष्णः, आस्तां तावद्दूरे, विरहदुःखितायाः मम, प्रणयोपलालनं मां चेतसापि न स्मरति। अहो मे दौर्भाग्यमितिभावः। अत्र मधुस्दनपदोपन्यासेन मधुपः यथा धुत्तुरादिषु समासय्य पद्मिनीं विस्मरति, तथायमिति श्लिष्टार्थः ध्वनितः।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। अहमिति। अहमिह निकुञ्जे वसामि। कीदृशी ? न गणिता न संभाविता वनवेतसा विपिनस्य वेत्रलता यया सा। मधुसूदनः कृष्णो मां चेतसा न स्मरति। अपि च चेतोमात्रसाध्यं त्वया स्वयं स्मरणमपि न करोति, अन्यस्य का वार्तेति 'चेतसा' इत्यनेन ध्वनितम्; अन्यथा स्मरणस्य चेतोजन्यत्वेन चेतसेत्यस्य वैयर्थ्यापत्तेः। नगणितेत्यत्र नशव्देन निषेधवाचकेन समासः, न तु नञ्शब्देन। नञा सह समासेऽगणितेति स्यात्। यद्वा, नञ् शिरश्चालने। तथा च गणिताः प्रतिलतं कृष्णमन्वेषयन्त्या परिसंख्याता वनवेतसा यया सा। यद्वा, अहमिह वने किं नातिवसामि ? अपि तु निवसाम्येव। शेषं पूर्ववत्। विप्रलब्धा चेयं नायिका। तल्लक्षणम्; 'कृत्वा संकेतमप्राप्ते दयिते व्यथिता तु या। विप्रलब्धेति सा प्रोक्ता वुधैरस्यास्तु विक्रियाः। निर्वेदचिन्ताश्चेष्टास्तु मूर्च्छानिःश्वसितादयः' इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

अहमिति।। हे देव, न विगणिता, सहायत्वेनापरिगणिता, वेतसा वञ्जुललता यथा सा, तादृशी एकाकिनीत्यर्थः। न विगणितेत्यत्र न समासः। यत्र सन्निहिता अपि लताः सहायत्वेन न गण्यन्ते तत्र का वार्ता सखीजनस्येति भावः। अत एव एकाकित्वं सुव्यत्कम्। एवंविधा अहं इह बृन्दावने विनिवसामि विषेषेण तिष्ठामि। इह हि निवसामीति क्वचित्पाठः। तदा हिः खल्वर्थः, नित्रसामि खल्वित्यर्थः। अथ च मधुसूदनस्यागमनं तिष्ठतु; स तु मधुसूदनः श्रीकृष्णः चेतसा अतिवेगशालिना मनसा मां न स्मरत्यपि; शौरेरागमनं तु दूरत एवेति भावः। अत एव कं शरणं यामित्यन्वयः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। कृष्णस्यौदास्यं भावयन्ती विलपति; अहमिह वने न गणितो न विचारितो वनवेतसो वनस्थकण्टको वृक्षविशेषो यया एतादृशी सती निवसामि तिष्ठामि। अत्र

नपदस्य सर्वत्र क्रियोपस्थापकपदेनैवानुभावकत्वमिति नियमो नास्त्येव। तत्रैव मुद्राराक्षसेनैकवागस्फूरितमालक इत्यसदद्यपीत्यवधेयम्। भगीरथस्तु गणितवनवेतसा सती अहं न निवसाम्यपितु निवसाम्येवेति शिरश्चालने नकार इति योजयति। मधुसूदनो मां चेतसा मनसा तदीयानुभवस्य तदीयमननादिजन्यतया दृढानुग्रहसाध्यत्वेन मनसानुभंव न करोतु, स्मरणमपि न करोत्यपिरर्थः। अतएवास्मिन् पक्षे स्मरणं चेतसैवेति चेतसेति पदस्य मन्दंप्रयोजनत्वम् अपीरवस्थानपतितत्वञ्चेति दूषणमपास्तमित्यवधेयम्।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। (अहमिति।) इह निकुञ्जेऽहं[२] तदागमनायन निवसामि किम्? वसाम्येव तथापि मधूसूदनो ममाधरपानकर्ता मां चेतसा चित्तेनाऽपि न स्मरति। कीदृश्यहम्? गणिताः परिसंख्याताः [३] श्रीकृष्णान्वेषणार्थ[४] वने वेतसा लता[५]यया।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। अहमिति। गणितवनबेतसा गणिताः प्रतिलतं कृष्णमन्वेषयन्त्या परिसंख्याता वनवेतसा यया सा अहमिह कुञ्जे किं न[६]निवसामि अपि तु [७] वसाम्येव। अत्र तत्र समस्तशिरश्चालने एवंविधाऽपि मां मधुसूदनः कृष्णश्चेतसाऽपि न स्मरति ; आश्चर्यमित्यर्थः।।७।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। अहमिति। अहं इह वने विगणितः भयसाधनत्वे वा लक्षितः; वने वेतसो हिज्जालो यया सा। नगणित इति पाठे न शब्देन समासः। वनवेतसो यया सा। अलक्षितगहनवेतसा सती बिभीषिकारहिता निवसामि। मधुसूदनः माधवः चेतसाऽपि मां न स्मरति। स्मरणाभावे कथं यास्यामि तस्य सिद्धसङ्कल्पत्वात्तेन स्मृताऽहं चेत्तं प्राप्तैव स्यामिति भावः।।७।।

१,२.नास्ति-अ.ब. ३.केव कामिनी युवतिरिव-अ.केवलकामिनी युवतिरिव-ब.४.नास्ति-इ.फ.ग.ह. ५.नास्ति-अ.भारत्या विशेषणं वा-इ.फ.ह.ग. ६.शोभिता-ग.७.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. ८.हरिचरणौ-ल.म.९.तः१०.पर्यन्तं नास्ति- - क.ल.म.११.नास्तीयं पुष्पिका-ड.क.ल.म. १२.नास्तीयं पुष्पिका-इ.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। अहमित्यादि। अहम् इह वने वसामि। किंविधा? न विगणितेति। न विगणिता अनादृता बहवो वेतसा ययेति विग्रहः। निरनुबन्धकोऽयं शब्दः। तेन न लोपो, लोपो न भवति। अर्थात् व्याघ्रादिभीतिमप्यविगणय्य तत्सङ्गमाकाङ्क्षया वसामीति भावः।

मधुसूदनो मां चेतसा न स्मरति। यद्वा अहम् इह विगणितबहुवेतसा सती न वसामि अपि तु वसामीत्यर्थः। वेतसगणनं कालयापनार्थम्। किं वा, यदि मधुसूदन आगमिष्यति तदा एतावन्तो वेतसवृक्षाः भविष्यन्तीति वेतसगणनाभिप्रायः। न वसामीति काक्वाद्यभिधापरो नकारः। ''मथ्नामि कौरवबलं समरे न कोपादितिवत्'' इति। चेतसा न स्मरतीत्यत्र चेतसेति पदमनर्थकं स्यात्। स्मरणस्य चेतोधर्मत्वात्। तथाहि, ''सत्यं स्मरसि मां बाले त्वां पुनर्न स्मराम्यहम्। मरणं चेतसो धर्मस्तान्ममापहृतं त्वया।।'' इति। यदि वा लौकिकी....स्तथाप्यपिशब्दो निरर्थकः। तेन स्मरत्यपीति योजनीयम्। अस्तु तावदपरः स्नेहातिशयः, स्मरणमपि न करोतीत्यर्थः। अथवा मामपिति मामेव न स्मरति; अन्याः पुनः स्मरत्येवेत्यर्थः। अपिशब्दः सम्भावनायाम्। तथा च, ''अपि सम्भावनाप्रश्नगर्हाशङ्कासमुच्चये। तथा युक्तपदार्थे च कामपरक्रियासु च।।'' इति **"धरणिः"**। अपि गर्हायां वामामपि न स्मरति याहं तत्प्रीत्या वेतसवने दुःखं तिष्ठामि। तादृशीं रक्तामपि मां न स्मरतीति गर्हितमेतत्।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। अहमिह निवसामि मम मूर्खतैवावशिष्टेत्याह। भीतिमप्यगणय्य भयङ्करवचने तत्समागमकांक्षया तिष्ठामि, मधुसूदनो अस्थिरसौहृदो मां चेतसा न स्मरति। कीदृशी ? न गणितं वनं वेतसश्च यया सा।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। अभीप्सितवैफल्येनानुशोचति, अहमिह वसामीति। अहं तद्दर्शनाशादग्धहृदया, इह सङ्केतस्थाने समयावधिशून्यं वसामि। कीदृशी, न विगणितो नादृतो वनवेतसोऽति-भीषणसत्त्वनिवास-भूतदुर्गमकण्टकारण्य-सम्भववानीरवृक्षो यया सा। नन्वरागिण्या इयमेव अनुरागस्यातिभूमिता, यावत् तदागमनम्, अवस्थान-मित्याशंक्याह; मधुसूदनः श्रीकृष्णः, आस्तां तावद्दूरे, विरहदुःखिताया मम, प्रणयोपलालनं मां चेतसापि न स्मरति। अहो मे दौर्भाग्यमिति भावः। अत्र मधुसूदनपदोपन्यासेन मधुपः यथा धुत्तुरादिषु समासय्य पद्मिनीं विस्मरति, तथायमिति श्लिष्टार्थः ध्वनितः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। अहमिति; श्रीराधा व्रवीति, अहमत्र वने वेतसकुञ्जे भयं विहाय न किञ्चिद् गणयित्वा तिष्ठामि। मम भावनास्ति यत् भगवान् श्रीकृष्णचन्द्र आगमिष्यति। अतः मम भीतिर्नास्ति। परमाश्चर्यचकितो भवामि यत् श्रीकृष्णचन्द्रः सकृदपि मां न स्मरति।।७।।

**८-हरिचरणशरणजयदेवकविभारती।**
**वसतु हृदि युवतिरिव कोमलकलावती।। यामि हे० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। हरीति। हरिचरणशरणस्य जयदेवकवेर्भारती हृदि युवतिरिव वसन्तीति वाक्यार्थः। उभयं विशिनष्टि कोलकलावतीति तत्र भारती। पक्षे कोमलत्वमनिष्ठुराक्षरत्वं कलावतीत्वं कवित्वशीलत्वम्। युवतीपक्षे कोमला मृद्वङ्गकला चतुःषष्टिरूपाः।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। अपि च, हरिचरणेति। हरिचरणौ शरणं गृहं यस्याः, सा चासौ जयदेवकविभारती च। अथवा, हरिचरणेति जयदेवविशेषणम्। तत्र शरणं रक्षितृ । हृदि वसतु। अर्थाद्भक्तानाम्। किंलक्षणा ? कोमला कलावती च। तथा च सङ्गीतराजे; 'रागः स्यात्स्थानगौडाख्यस्तालो वर्णयती रसः। शृङ्गारो विप्रलम्भाख्यः प्रमदा मदनाकुला।। पक्षनामावलेः पाटा गुम्फिता यत्र गीतके। स्निग्धमधुसूदनोऽयं रासावलयनामकः।। प्रबन्धः पृथिवीभर्त्रा प्रबद्धः प्रीतये हरेः।।' इति स्निग्धमधुसूदनरासावलयनामा प्रबन्धस्त्रयोदशः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।। हरिचरणेति। हरिचरणौ एव शरणं यस्य तस्य जयदेवकवेर्मम भारती ईदृक् वर्णनरूपा वाणी हृदि चेतसि वसतु भक्तानामिति शेषः। तैरास्वाद्या भवत्वित्यर्थः। युवतिरिति। युवतिर्यथा यूनां हृदये सदा वसति, तद्वत्, कीदृशी कोमलकलावती भारती, पक्षे कोमला माधुर्यगुणयुक्ता कलावती, साहित्यसङ्गीतकला-शालिनी, युवतिपक्षे मृदुलाङ्गी रतिकलायुक्ता। अत्र युवतिरिवेति स्त्रियः विटानामिव साधुवार्तेतिवत् बोद्धव्यम्।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।। हरिचरणेति। हरेश्चरणौ शरणं यस्यै तादृशो जयदेवकविस्तस्य भारती वाणी हृदि हृदये वसतु। अर्थात्कृष्णस्य भक्तानाम्। कीदृशी भारती ? कोमलाऽनिष्ठुरवर्णा कलावती विचित्रकलायुक्ता। केव ? युवतिरिव। कीदृशी ? कोमला मृद्वङ्गी। कलावती चतुःषष्टिकलाकुशला।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।। हरिचरणेति। कोमला मृदुला कला तालस्य सप्तमप्राणाः। तदुक्तम्,

कालो मार्गः क्रियाङ्गानि ग्रहोजातिकलालयः।
यतिः प्रसारकश्चेति तालप्राणाः दशस्मृताः।। इति।।

सा अस्यास्तीति तादृशी। अन्यत्र कलाः कामकलाः यस्याः सन्तीति तादृशी। कामकलास्तु

अङ्गुष्ठे पदगुल्फजानुजघने नाभौ च वक्षस्थले
कक्षे गण्डकपोलदन्तवसने तालौ स्तने मूर्द्धनि।
शुक्लाशुक्लविभागतो मृगदृशमङ्गेष्वनङ्गस्थिति-
रूर्ध्वाधोगमनेन कामपथगः पक्षद्वये लक्षयेत्।।
मूर्द्धोरस्थलवामदक्षिणकरे वक्षोरूहेंशद्वये
नाभौ गुह्यललाटजाठरकटी पृष्ठेषु तिष्ठत्यस्यौ।
कक्षश्रोणिभूतेषु च प्रतिपदामारभ्य कृष्णां ततः
श्वेतायं प्रभृति क्रमेण सुदृशां मूर्द्धानमारोहति।।
अङ्गेष्वेषु मृगीदृशां मनसिजप्रस्तावना पण्डिताः
मात्राः षोडशचिन्तयन्ति विपुल ज्योतिस्फुलिङ्गाकृतिरिति।।

एवं विधौ हरिचरणावेव शरणम्। आश्रमभूतं गृहं रक्षकं च यस्य तादृशस्य शरणगृहरक्षित्रोीति**त्यमरः**"। जयदेवकवेः भारती गीतरूपा तालसम्पन्नायुवतिरिव तरूणीवद् हृदि रसिकानां हृदये वसतु सदाविलसनात्। श्लेषोद्दीशितोपमा।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनि बन्धनपूर्वकं प्रकृतगीतमुपसंहरति। हरेश्चरणौ शरणमाश्रयौ यस्य स तथा। हरिचरणशरणश्चासौ जयदेवकविश्चेति स हरिचरणशरण-जयदेवकविः तस्य भारतीयं काव्यरूपा वाणी हृदि वसत्वर्थात् विष्णुभक्तानाम्। कीदृशी ? कोमला चासौ कलावती कवित्वशिल्पयुक्ता चेति सा तथा। कैव ? युवतिरिव तरुणीव। यथा काचित्तरूणी कोमला मृद्वङ्गी कलावती चतुःषष्ठिकामकलायुक्ता हृदि विशति हृदयाङ्गमा भवतीति तद्वदित्यर्थः। 'शरणं गृहरक्षित्रोरि'**त्यमरः**।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। [१] किञ्च, [२] हरीति। हरिचरणौ शरणं यस्य तस्य जयदेवकवेर्भारती वाणी सरसान्तःकरणानां हृदि वसतु। [३]केव ? कामिनां युवतिरिव [४] कामिनीव। कीदृशी ? सुकुमाराङ्गी चतुष्षष्टिकामकलाकुशला वा।[५] भारतीविशेषणं वा। कोमलकलायुक्ता यथा युवतिः प्रणयकलहादिना [६] शोभावती भवति तद्वदत्रापि भारती कोमलसुखोच्चारणा-दितेति भावः।।८।।

[७]इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्चावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां बनमालिसञ्जीवन्यां श्रीगीतगोविन्द टीकायां त्रयोदशः प्रबन्धः।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। हरीति। [८] हरिचरणं शरणं रक्षितृ यस्य स जयदेवकविस्तस्य भारती गीतरूपा सरस्वती हृदि मानसे वसतु। कीदृशी भारती ? कोमलाऽनिष्ठुरवर्णा कलावती कवित्वकलायुता च। केव ? युवतिरिव। यथा नायकहृदये कोमलकलावती सुकुमाराङ्गी चतुष्षष्ठिकामकलायुक्ता [९]च नायिका वसति [१०]।।८।।

[११]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां त्रयोदशः प्रबन्धः।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।। हरिचरणेति। हरिचरणावेव शरणं रक्षिता यस्य स चासौ जयदेवकविः तस्य भारती वाणी हृदि; भक्तानामिति शेषः; वसतु। कोमलाः कलाः यस्यां सा युवतिरिव वसतु। अत्र युवतिरुपमान, भारती उपमेयं, कोम(ल क) लावत्त्वं धर्म इत्युपमा। अत्रोपमालङ्कारः।।८।।

[१२]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां त्रयोदशः प्रबन्धः।

१,२.नास्ति-अ.ब.३.केव कामिनी युवतिरिव-अ.केवलकामिनी युवतिरिव-ब.४.नास्ति-इ.फ.ग.ह.५.नास्ति-अ.भारत्या विशेषणं वा-इ.फ.ह.ग.६.शोभिता-ग.७.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.८.हरिचरणौ-ल.म.९.तः१०.पर्यन्तं नास्ति- - क.ल.म.११.नास्तीयं पुष्पिका-ड.क.ल.म.१२.नास्तीयं पुष्पिका-इ.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।। हरीत्यादि। हरेश्चरणं शरणं रक्षिता यस्य ईदृशो जयदेवकवेर्भारती सरस्वती हृदि वसतु। केव ? युवतिरिव। यथा युवतिर्मनसो नापैति तथेयं भारती भवतु। यद्वा यथा युवतिर्वक्षसि शयाना सुखाय भवति तथेयं मनसि स्थिता सती सुखाय भवत्वित्यर्थः। उभयं विशिनष्टि। कोमलकलावती तत्र कविभारतीति। कोमलाऽनिष्ठुराक्षरा कलावती कवित्वशिल्पशालिनी। युवतिपक्षे कोमला मृद्वङ्गी चासौ कलावती कामकुशला चेति।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। हरिचरणे शरणं यस्या तस्य जयदेवकवेः भारती हृदये वसतु भक्तानामितर्थः। कस्मिन् केव ? यूनां हृदि युवतिरिव। कीदृशी ? कोमला माधुर्य्यगुणयुक्ता पक्षे मृद्वङ्गी कलावती कवित्वशालिनी, पक्षे रतिकलायुक्ता।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। हरिचरणेति। हरिचरणौ एव शरणं यस्य तस्य जयदेवकवेर्मम भारती ईदृक् वर्णनरूपा वाणी हृदि चेतसि वसतु भक्तानामिति शेष:। तैरास्वाद्या भवत्वित्यर्थ:। केव, युवतिरिति। युवतिर्यथा यूनां हृदये सदा वसति, तद्वत्, कीदृशी कोमलकलावती भारती, पक्षे कोमला माधुर्यगुणयुक्ता कलावती, साहित्यसङ्गीतकलाशालिनी, युवतिपक्षे मृदुलाङ्गी रतिकलायुक्ता। अत्र युवतिरिवेति स्त्रिया विटानामिव साधुवार्त्तेतिवत् बोद्धव्यम्।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। हरीति; हरिचरणसेवक जयदेवकवे: वाणी कलावती युवती, कलाप्रवीणा तरुणीव हृदये सदा निवसतु। युवती पक्षे कलाप्रवीणा साहित्य पक्षे साहित्यसंगीतकलायुक्ता अत्रापि कामकला वर्णिता। तद् यथा -

अङ्गुष्ठे पदगुल्फजानुजघने नाभौ च वक्षस्थले
कक्षे गण्डकपोलदन्तवसने तालौ स्तने मूर्द्धनि।
शुक्लाशुक्लविभागतो मृगदृशमङ्गेष्वनङ्गस्थिति-
रूर्ध्वाधोगमनेन कामपथग: पक्षद्वये लक्षयेत्।।
मूर्द्धोरस्थलवामदक्षिणकरे वक्षोरूहेंशद्वये
नाभौ गुह्यललाटजाठरकटी पृष्ठेषु तिष्ठत्यस्यौ।
कक्षश्रोणिभूतेषु च प्रतिपदामारभ्य कृष्णां तत:
श्वेतायं प्रभृति क्रमेण सुदृशां मूर्द्धानमारोहति।।
अङ्गेष्वेषु मृगीदृशां मनसिजप्रस्तावना पण्डिता:
मात्रा: षोडशचिन्तयन्ति विपुल ज्योतिस्फुलिङ्गाकृतिरिति।।।८।।

**४१-तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभिर्**
**बद्धो बन्धुभिरन्धकारिणि वनोपान्ते किमु भ्राम्यति।**
**कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः**
**संकेतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः।।४१।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४१।। प्रियस्यागमनहेतु श्लोकेन कल्पयति। तत्किमिति। सङ्केतीकृत-मञ्जु-वञ्जुललता कुञ्जे यत् यस्मान् कारणात् कान्तो नागतस्तत्तस्मात्कामपि कामिनीमभि-सृतोऽभिसरति इति शङ्के। ''मनोङं मञ्जुलमिति'' **अमरः**। मयि दृढानुरागोऽसौ कथमन्यामभिसरिष्यतीति विचिन्त्य वितर्कान्तरमाह। क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षम इति। अथेति वितर्कानन्तरं क्लान्तमनाः विक्लवचेताः सन्मना मनागल्पमपि प्रस्थातुमागन्तुमक्षमोऽसमर्थः वक्ष्यमाणं गीतं तावत् श्लोकेन संसूचयति।।४१।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४१।। राधा तदनागमने स्वगतान्हेतून्वितर्कयति; तत्किमिति। यद्यस्मात्कान्तः कामुकः सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः मनोहरवेतसलतागृहेऽपि यन्नायासीत्तत्तस्मादहमिति वितर्कयामि। तमेव वितर्कमाह; कामपीति। कांचित्का-मिनीमभिसृतः किमन्यकामिन्यर्थं गतः? अथवा, मामत्र संकेतस्थाने विहाय कथमन्यत्र विहरिष्यतीत्याशङ्क्याह; कलाकेलिभिर्बन्धुभिर्बद्धः किम्। कलेति। विलासक्रीडापरैः। मामभ्युपगच्छन्नन्तरापि क्रीडावशो जातः। अथवा, मां विहाय अन्यत्करोतीति विचारेणाप्यलम्। किंतु मामेवाभिसरन् मामलभमान इतस्ततः सान्द्रेऽन्धकारे वनसमीपे परिभ्राम्यति। अथवा, तदपि न घटते। अथवा, क्लान्तमनाः सन् पथि मार्गे प्रस्थातुमेवाक्षम इति सुस्थितम्। शार्दूलविक्रीडितं वृत्तम्। संशयोऽलंकारः।।४१।।

## (३) जगद्धरकृत- सारदीपिका

।।४१।। एवमात्मानमुपालम्भ्य सम्प्रति श्रीकृष्णस्यानागमनहेतून् तर्कयति। तत् किमिति। कान्तः, मादृशजनकामनापरिपूरणचतुरः कृष्णः, किं वदामि मम गृहमिति सङ्केतीकृते द्वयोः समागमस्थलतया अभिमतेऽपि मञ्जुवञ्जुललताकुञ्जेऽपि मनोहरो वानीरलतागृहेऽपि यद् यस्मात् नागतः, तत् तस्मात् तर्कयामि, कामपि कामिनीं बहुदिवसोपचितातिप्रौढसम्भोगतृष्णावतीं युवतिमभिसृतः किम्। मत्प्रेमनियन्त्रितोऽसौ

मां वनमानीय्य कथमन्यामभिसरिष्यतीति विचिन्त्य हेत्वन्तरमाशङ्कते। किं वा बन्धुभिर्भावनिबन्धनचतुरैः प्रियनर्मसखैः कलाकेलिभिः गीतनृत्यादिविनोदकौतुकैः करणैर्वद्धो निरुद्धो मद्विरहोत्कण्ठातुरस्य प्राप्ताभिसारसमये तदपि न घटत इति अत्रापि अपरितुष्यन्ती पुनर्हेत्वन्तरं तर्कयति। मामभिसरन्, अन्धकारिणि, नीरन्ध्रतरुशाखाच्छत्रतया ज्योत्स्नाप्रवेशाभावात् तमोयुक्ते वनाभ्यर्णे घनतरतरुसंघटतयाऽव्यक्तमार्गे विपिनोपकण्ठे पन्थानमविदित्वा भ्राम्यति। पर्यटति किमु। अधिगतनिखिलमार्गतत्त्वातिनिपुणसखीसहितस्य स्वयमपि बहुशः परिचितवृन्दावनाखिलमार्गप्रवेशस्य चतुरशिरोमणेस्तस्य कुतो मार्गाज्ञानेन भ्रमणमित्यत्रापि अपरितुष्यन्ती, विदितं खलु मद्विरहक्षीणतया सुकुमारैकसारः पदात् पदमपि यातुमशक्त इति। यत्पूर्वं सखीमुखात् श्रुतं, तेनैव नागत इत्याशयेनाह क्लान्तमनाः। सन्तप्तचित्तः पथि मार्गे मनाक् स्वल्पमिति प्रस्थातुमागन्तुमक्षमोऽसमर्थ एव नागत इति, हाहा किमत्र विधेयमितिभावः।।४१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४१ ।। तत्किमिति। कान्तः कृष्णः संकेतीकृतो मञ्जुर्मनोहरो वञ्जुललताकुञ्जो वेत्रलतागृहं तत्रापि यत् यतो हेतोर्नागतस्तत्कामपि कामिनीं किमभिसृतः ? अन्यस्याः कस्याश्चिदभिसारभूमिं प्राप्त इति किमु इत्यर्थः। यद्वा, बन्धुभिर्गोपभूमिं प्राप्तः कलाकेलिभिः कौतुककलाभिर्बद्धो नियन्त्रितः किमु ? यद्वा, अन्धकारिणि घनतरतरुच्छायायां निबिडान्धकारे वनोपान्ते संकेतीकृतविपिनसमीपे संकेतस्थलमप्राप्य भ्राम्यति किमु परिभ्रमणं करोति किम् ? संशयान्तरमाह, क्लान्तमना इति। प्रकृतकिमुशब्दोऽत्रापि संबध्यते। तथा चक्लान्तं मद्विश्लेषे दुःखेनोपतप्तं मनो यस्य एतादृशः। प्रस्थातुमक्षमः। ततश्चलितुमेवासमर्थः इति किमु इत्यर्थः। उत्का चेयं नायिका; **(शृं.ति. १/७५)** 'उत्का भवति सा यस्याः संकेतं नागतः प्रियः। तस्यानागमने हेतुं चिन्तयत्याकुलं यथा।।' इति।।४१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४१ ।। कान्तस्यागमने दोषमाह। तत्किमिति। हे देव! यस्मात् कान्तः श्रीकृष्णः सङ्केती कृतः समयविषयीकृतो यो मञ्जुलवञ्जुललताकुञ्जमनोहरवानीरवल्लीगृहं तस्मिन्नपि अन्यत्र किमुतेति भावः। अथवा अपिशब्दादवश्यमागन्तव्यमिति सूचितम्। यतो नायातः तस्मात् कारणात् अनागमने किञ्चिन्निमित्तं तर्कयामीति शेषः। तदेव निमित्तं विशेषेण दर्शयति। कामपीत्यादि। कान्त इत्यस्य सर्वत्राप्यन्वयः। कान्तः श्रीकृष्णः कामपि लोकोत्तरां कामिनीं अनुसृतः अनुसृतवान् किमित्यर्थः। अन्यथा मां विहायान्यत्रा-

वस्थानयोगादिति भावः। किम्बा बन्धुभिः नर्म्मसखैः कलाः चतुषष्टिकामकलाः तासु केलयो विहरणानि तैर्वद्धः। बन्धुभिः सह कलाकेलिभिः विनोदी सन्नागत इत्यर्थः। अन्यथा कथं मत्परित्यक्तभावः। चतुःषष्टिकलास्तु,

अथेतिहासागमौ च वाक्यालङ्कारनाटकम्।
गायकत्वं कवित्वं च कामशास्त्रं दुरोदरम्।।
देशभाषालिपिज्ञानं लिपिकर्मचराचरम्।
सर्बाणि चोपादानानि स्वरशास्त्रं तु शाकुनम्।।
सामुद्रिकं रत्नकशास्त्रं रथाश्वगतिकौशलम्।
मल्लशास्त्रसूदकर्म्म भूरुहाणां च दोहदम्।।
गन्धवादो धातुवाद खन्यावादी रसस्य च।
कालवादोऽग्निसंस्तम्भः खड्गस्तम्भो जलस्य च।।
वचस्तम्भो वयस्तम्भो दृश्याकर्षणर्मोचनम्।
विद्वेषणोच्चाटनं च मारणं कालबन्धनम्।।
पयसि प्लवचातुर्य्यं पादुकासिद्धिरेव च।
वाक्सिद्धि पुटिकासिद्धिश्चैन्द्रजालकमेव च।।
अटीनं नरदृष्ठैस्तु वञ्चनं स्वरवञ्जनम्।
मणिमन्त्रौषधीनां च सिद्धयश्चौरकर्म च।।
चित्रलोहाश्वमृद्दारु-वेणु-चर्म्माम्बरक्रिया।
अदृश्यं करणं दूरकरणं मृगयारतिः।।
बाणिज्यं पशुपाल्यं च कृषिरासवकर्म्म च।
लावकुक्कुटमेषादियुद्धकरणकौशलम्।।
चतुःषष्टिःकलाश्चैताः कलाविद्भिः प्रकीर्त्तिताः।। इति।।

अन्धकारिणि गाढान्धकारवति वनाभ्यर्णे वृन्दावनसमीपे भ्राम्यति। किमुत अन्धकारवशात् स्वसङ्केतमन्दिरमज्ञात्वा वनमिदं भ्राम्यति किमित्यर्थः।

अन्यथा सत्यव्रतस्याङ्गीकृतपरित्यागस्य अयुक्तत्वादितिभावः। अथवा क्लान्तमना मद्वियोगवशात् खिन्नचित्तः सन् पथि सङ्केतमन्दिरागमनमार्गे प्रस्थातुमागन्तुमेवाक्षमः। असमर्थः किमित्यर्थः। अन्यथा शीघ्रमागामिनो विलम्बायोगादितिभावः। भ्रमतीत्यत्र "शमामष्टाना" (७-३-७४) मित्यादिना श्यनि वा दीर्घः। सन्देहोऽलङ्कारः।।४१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती (टीकानोपलब्धा)

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४१ ।। एवं विप्रलब्धा हरौ नानाशङ्कां जनयन्ती तर्कमाह, तत्किमिति। कान्तः श्रीकृष्णः [३] सङ्केतीकृते मञ्जौ मनोहरे वञ्जुललताकुञ्जे वेतसलतामन्दिरेऽपि यद्यस्मात् क्रीडार्थं नागतः तत्तस्मात्किं वा कामपि कामिनीं कामातुरां कमनीयां वाऽभिसृतः [४]सम्मुखं गतो [५]ऽनुगतो नु वा। किं वा [६] कलाकेलिभिर्व्रजयुवति - [७]हास्यादिभिः क्रीडादिभिर्बद्धो यन्त्रितः। किं वा बन्धुभिर्मित्रैः [८] कार्यान्तरं (प्रति) प्रेषितः। स्वयं विचार्य हेत्वन्तरमाह। अन्धकारिणि निबिडान्धकारे वनोपान्ते वनसमीपेऽभ्यर्णे निकट उद्भ्राम्यति। [९]उपान्ते वा पाठः[१०]। कीदृशः ? क्लान्तं मद्वियोगेन दुःखितं मनो यस्य। पुनः कीदृशः ? मनागप्यल्पमपि पथि मार्गे प्रस्थातुमागन्तुं अक्षमोऽसमर्थः। ततो विलम्ब इति भावः। वितर्के संशये क्षेपे किमु संकीर्त्यते बुधैः इति धरणिः।।४१ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४१ ।। कृष्णस्य [११] विलम्बे तर्कमाह, तत्किमिति। कान्तः कृष्णः सङ्केतीकृतः अभिसरणस्थान सम्पादितः;मञ्जुर्मनोहरो वञ्जुललताकुञ्जो वेतसलतागृहं तस्मिन्नपि यन्नागतो नायातः तत्तस्मात्कारणात् कामपि कामिनीं नायिकामभिसृतः अनुगतः; किं वा अथ वा बन्धुभिर्मित्रैः कलाकेलिभि [१२] र्हास्यक्रीडाभिर्बद्धो यन्त्रितः ; उत अथ वा अन्धकारिणि तमोयुक्ते वनोपान्ते वनसमीपे भ्राम्यति किम्; तमसि [१] मार्ग भ्रमाद्भ्रमणं युज्यत एव। [२]अभ्यस्तस्य भ्रमाभाव इति चेत्तत्राह, क्लान्तमनाः। मन्निमित्तं समाकुलान्तःकरणः सन् पथि मनागपि [३] अल्पमपि प्रस्थातुमा[४]गन्तुमेव क्षमः [५]किं समर्थः ? [६] अत्र अपि शब्दः किमर्थः। उत्का चेयं नायिका।

उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः।
तस्यानागमने हेतुं चिन्तयन्त्याकुला[७]यथा।।१ ।।

१.किमु भ्राम्यति-अ.ब.२.अनागतपथेनागन्तुमेवाक्षमः-इ.३.सङ्केतीकृतः अभिसरणस्थलं सम्पादितः मञ्जुर्मनोहरः वञ्जुर्ममोहरः वञ्जुललताकुञ्जः वेतसलता मन्दिरं, तत्र-इ.फ.ग.ह.४.सम्मुखं गतो वा-ब.५.अनुसृतो वा-इ.अनुगतो वा-फ.ग.ज.नास्ति-ह.६.अबलाकेलिभिः-अ.ब.ह.ज. ७.हास्यादिक्रीडाभिः-इ.फ.ग.ह.ज.८.कार्यान्तरे प्रेरितः-इ.फ.ग.ह.ज.९.तः १०.पर्यन्तं नास्ति-अ.ब.११.विलम्बत्वे कारणमाह-क.१२.हास्यादिक्रीडाभिः-क.ल.म

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४१ ।। तत्किमिति। कान्तः प्रियः कामपि अन्यां कामिनीं अभिसृतः अभिसारं प्राप्तः; अनुसृत्य गत इति यावत्। किं वा अथ वा कलाः केलयः क्रीडाः येषां तैः

बन्धुभिः बद्धः। कलाकेलिभिरिति करणे तृतीया। अन्धकारोऽस्मिन्नित्यन्धकारी तस्मिन् वनाभ्यर्णे वनसमीपे उद्भ्राम्यति। मार्गाणां कलनात्परितो भ्रमति किम्? क्लान्तं क्लमयुक्तं मनो यस्य सः सन्। अनागतः आगतो न भवतीति अज्ञात इत्यर्थः; स चासौ पन्थाः तेन मार्गेण आगन्तुं आयातुं अक्षम एव किम्? सङ्केतीकृताः अहमत्र वसामि त्वमागच्छेति सङ्केतीकृताः मञ्जवः सुन्दराः ते च ते वञ्जुलाः तेषां वञ्जुलानां वेतसानां लतानाञ्च कुञ्जः तस्मिन् अपि यस्मान्नागतः। अत्र उत्तरवाक्यार्थगतत्वात्तच्छब्दाकाङ्क्षा नास्तीति न न्यूनपदत्वम्। अत्र विरहिणी नायिका। कामिन्यनुसारादिचतुर्विकल्पः सन्देहालङ्कारः।।४१।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४१।। तदित्यादि। सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यत् यस्मात् कारणात् कान्तो नागतः तत् तस्मात् कामपि कामिनीं किमभिसृतः अभिसरतीति शङ्का। "कान्तं मञ्जु मनोज्ञं च", "शीतं वानीरवञ्जुला" **इत्यमरः**। मयि दृढानुरागोऽसौ कथमन्यामभिसरिष्यतीति विचिन्त्य वितर्कान्तरम्। किं वा बन्धुभिः कर्तृभिः कलाकेलिभिः शिल्पकृतैः परिहासादिभिः कारणभूतैर्विद्ध इति। बन्धुकेलिषु मत्सुरतादधिकसुखं नास्तीति विचिन्त्य वितर्कान्तरमाह, क्लान्तमना मनागथ पथि प्रस्थातुमेवाक्षमः इति। अथेति वितर्कान्तरं क्लान्तमना विक्लवचेताः सन् मनागल्पमपि पथि प्रस्थातुमागन्तुमक्षमोऽसमर्थ एव नागत इत्यर्थ।।४१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४१।। पूर्वोक्त्तं विकल्पं विवृणोति तत् किमिति। संकेतीकृतमनोहरे बानीरलताकुंजेऽपि यत् यस्मात् कान्तो न आगतस्तस्मात् किं कामपि अभिनवप्रेममन्धुरां कामिनीमभिसृतेति शङ्के। मयेवदृढ़ानुरागोऽसौ कथमन्यामभिसरिष्यतीति वितर्कान्तरमाह, किम्वा मित्रैः क्रीड़ाकौशलैः निरुद्धः कृताभिसारसमये अस्मिंस्तदपि न सम्भवतीति विचिन्त्य वितर्कान्तरमाह मामभिसरन्नीरन्ध्रतरुतया गाढ़ान्धकारिणि वन समीपे किमुद्भ्राम्यति पन्थानमविदित्वेर्थः। चतुरशिरोमणेः सहस्रशोऽनुभूतस्थले भ्रमः कथं स्यादिति विचिन्त्य निश्चिनोति क्लान्तं मद्विश्लेषदुःखेन चन्द्रोदयानन्तरं तस्याः का दशा भवेदिति चिन्तया चोपतप्तं मनो यस्य सः पथि अल्पमपि प्रस्थातुमसमर्थ एवं नागत इति।।४१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४१।। एवमात्मानमुपालम्भ्य सम्प्रति श्रीकृष्णस्यानागमनहेतून् तर्कयति। तत् किमिति ।कान्त:, मादृशजनकामनापरिपूरणचतुर: कृष्ण:, किं वदामि मम गृहमिति सङ्केतीकृते द्वयो: समागमस्थलतया अभिमतेऽपि मञ्जुवञ्जुललताकुञ्जेऽपि मनोहरवानीर-लतागृहेऽपि यद् यस्मात् नागत:, तत्, तस्मात्तर्कयामि, कामपि कामिनीं बहुदिवसोप-चितातिप्रौढसम्भोगतृष्णावतीं युवतिमभिसृत: किम्। मत्प्रेमनियन्त्रितोऽसौ मां वनमानाय्य कथमन्यामभिसरिष्यतीति विचिन्त्य हेत्वन्तरमाशंकते। किं वा बन्धुभिर्भावनिबन्धनचतुरै: प्रियनर्मसखै: कलाकेलिभि: गीतनृत्यादिविनोदकौतुकै: करणैर्वद्धो निरुद्धो मद्विरहो-त्कण्ठातुरस्य प्राप्ताभिसारसमये तदपि न घटत इति अत्रापि अपरितुष्यन्ती पुनर्हेत्वन्तरं तर्कयति । मामभिसरन्, अन्धकारिणि, नीरन्ध्रतरुशाखाच्छन्नतया ज्योत्स्ना-प्रवेशाभावात् तमोयुक्ते वनाभ्यर्णे घनतरतरुसंघटतयाऽव्यक्तमार्गे विपिनोपकण्ठे पन्थानमविदित्वा भ्राम्यति। पर्यटति किमु। अधिगतनिखिलमार्गतत्त्वातिनिपुणसखी-सहितस्य स्वयमपि बहुश: परिचितवृन्दावनाखिलमार्गप्रवेशस्य चतुरशिरोमणेस्तस्य कुतो मार्गाज्ञानेन भ्रमणमित्यत्रापि अपरितुष्यन्ती, विदितं खलु मद्विरहक्षीणतया सुकुमारैकसार: पदात् पदमपि यातुमशक्त इति। यत्पूर्वं सखीमुखात् श्रुतं, तेनैव नागत इत्याशयेनाहक्लान्तमना:। सन्तप्तचित्त: पथि मार्गे मनाक् स्वल्पमिति प्रस्थातुमागन्तुमक्षमोऽसमर्थ एव नागत इति, ह हा किमत्र विधेयमिति भाव:।।४१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४१।। तत्किं कामपीति; यथा पूर्वस्मिन् गीते वर्णितं श्रीराधा वेतसलताकुञ्जे खिन्ना सति श्रीकृष्णस्यागमनं प्रतिपाल्य कृष्णस्यानागमनस्य विकल्पकारणानि चिन्तयित्वा प्रव्रवीति। प्रथमत: कामपि तरुणीं प्रति गत्वा रतिकलाकौतुकेनावद्धा: तस्या: शृङ्गारलीलात: न प्रत्यागन्तुं शक्नोति। अथवा मित्रगणे कुत्र क्रीडालौल्ये मां विस्मरति। अथवा मत्समीपमागतेन तेनान्धकारे मार्गान्विेषणे विफल: कुत्रचिद् भ्रमति। अथवा विरहव्याधिना पीडित: क्लान्त: श्रान्त: मत्समीपमागन्तुमशक्य: स्यात्। कला नाम शार्दूलविक्रीडितम्। संशयालंकार: चतुषष्ठीकला तद् यथा,

अथेतिहासागमौ च वाक्यालङ्कारनाटकम्।
गायकत्वं कवित्वं च कामशास्त्रं दुरोदरम्।।
देशभाषालिपिज्ञानं लिपिकर्मचराचरम्।
सर्बाणि चोपादानानि स्वरशास्त्रं तु शाकुनम्।।
सामुद्रिकं रत्नकशास्त्रं रथाश्वगतिकौशलम्।
मल्लशास्त्रसूदकर्म्म भूरुहाणां च दोहदम्।।

गन्धवादो धातुवाद खन्यावादी रसस्य च।
कालवादोऽग्निसंस्तम्भः खड्गस्तम्भो जलस्य च।।
वचस्तम्भो वयस्तम्भो दृश्याकर्षणर्मोचनम्।
विद्वेषणोच्चाटनं च मारणं कालबन्धनम्।।
पयसि प्लवचातुर्य्यं पादुकासिद्धिरेव च।
वाक्सिद्धि पुटिकासिद्धिश्चैन्द्रजालकमेव च।।
अटीनं नरदृष्ठैस्तु वञ्चनं स्वरवञ्जनम्।
मणिमन्त्रौषधीनां च सिद्धयश्चौरकर्म च।।
चित्रलोहाश्चमृद्दारु-वेणु-चर्म्माम्बरक्रिया।
अदृश्यं करणं दूरकरणं मृगयारतिः।।
बाणिज्यं पशुपाल्यं च कृषिरासवकर्म्म च।
लावकुक्कुटमेषादियुद्धकरणकौशलम्।।
चतुःषष्टिःकलाश्चैताः कलाविद्भिः प्रकीर्त्तिताः।। इति।।।४१।।

**४२-अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम्।**
**विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह।।४२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४२।। अथेत्युक्तवितर्कानन्तर माधवमन्तरेण विनागतां सखीं वीक्ष्य आहेति वाक्यार्थः। कीदृशीं सखी विषादमूकां, अकृतकार्यत्वाद् विषादः, कीदृशी राधा जनार्द्दनं कयापि रमितमिति दृष्टवद्विशङ्कमाना दृष्टवदिति दृष्टमिवेत्यर्थः। रमितमत्र विपरीत-मभिप्रेतं रमणे स्त्रियाः प्रयोजकत्वात्। उपेन्द्रवज्रावृत्तम्।।४२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४२।। अथ सखीविषादानुमितं कृष्णस्यान्यासक्तत्वं वितर्कयन्नाह; अथेति। इयं राधा अथानन्तरं कृष्णं विना आगतां सखीं वीक्ष्य दृष्ट्वा तत्प्रत्यक्षीकृतमिव यथा स्यात्तथा तद्वक्ष्यमाणमाह; किंभूतां सखीम्? विषादमूकामकृतकार्यत्वाद्विषण्णतया प्रतिवक्तुमक्षमाम्। किंभूता राधा? जनार्दनं कयापि कान्तया रमितं विशङ्कमाना। सखीविषादान्यथानुपपत्त्याऽन्यासङ्गो व्यज्यते। उपेन्द्रवज्रावृत्तम्।।४।।

### (३) जगद्धरकृत- सारदीपिका

।।४२।। एवं जीवितनाथस्यागमनविलम्बेनातिव्याकुलाया राधायाः प्रणयोत्तरङ्गभूतेषु असम्भवोक्तकदम्बमुद्घाटयितुं कविरुपक्रमते। अथेति। अथ श्रीराधायाः वितर्कानन्तरं

सखीमवश्यमेवासौ श्रीकृष्णं समानिय मद्विरहदुःखमपनेष्यतीति सम्भावितां सहचरीं माधवमन्तरेण आगतां, कृष्णं विनोपस्थितां विषादमूकां, समानीतः खलु मज्जीवनौषधिरिति बहुशः पृच्छ्यमानापि कृष्णागमनगोपनाय कल्पितविषादेन मुखवैवर्ण्यमभिनीय तूष्णीं स्थितां वीक्ष्य, अश्रुभरितनेत्रमार्जनपूर्वं दृष्ट्वेयं विविधशङ्काकुलिता राधा, पूर्वपक्षान्तरोद्भावनेन निराकृतमपि तत् किं कामपि इति प्रथमपक्षवितर्क निश्चिन्वना जनार्दनम्, अर्द, हिंसायां धातुः अनुरक्तस्त्रीजनहिंसनैकपरायणं श्रीकृष्णं कयापि सरसातिप्रगल्भया कामिन्या रमितं, सम्भोगवशीकृतं विशङ्कमाना सम्भावयन्ती दृष्टवत् उपपन्नमिव एतद्वक्ष्यमाणमाह, वदति स्म ।।४२ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४२ ।। अथेति। अथानन्तरमियं राधा एतद्वक्ष्यमाणं दृष्टवदाह उक्तवती। यथा कस्य कियद्वृत्तान्तः केनचित्साक्षाद्दृष्टः कथयति तद्वदित्यर्थः। किं कृत्वा ? सखीं माधवमन्तरेण कृष्णं विनाऽऽगतां वीक्ष्य दृष्ट्वा। अत एव विषादेन मूकां मौनाम्। कीदृशी ? जनार्दनं कृष्णं कयाचिन्नायिकया रमितं शङ्कमाना तर्कयन्ती। जनस्यार्दनस्वभावोऽयं, अतस्तस्य मम संतापकत्वमुचितमित्यभिप्रायेण 'जनार्दन' इत्युचित पदोपादानम्। तथा च जनानामर्दनस्वभावो यस्तस्य मम तापजनकत्वमुचितमेवेति भावः।।४२ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४२ ।। एवं सखी प्रेक्षणानन्तरं राधायाः परितापगमकमुपर्ण्य प्रेषितसखीबृत्तान्तमाह। अथेति अथ वल्लभानागमने निसित्ताभ्युहान्यनन्तरम् इयं राधामाधवं श्रीकृष्णमन्तरेण विना ''अन्तरान्तरेण युक्तेति (२-३-४) द्वितीया। आगतामायाताम् अतएव विषादेन सखीमनोरथसाफल्यासम्पादनजनितखेदेन मूकां प्रतिवचनासमर्थां बीक्ष्य अवलोक्य जनानर्द्दयति पीड़यति इति जनार्द्दनः श्रीकृष्णस्तम्। अर्दपीडायामित्यस्माद्धातोर्ल्युट् प्रत्ययः।

अत्र राधाविषयपीडाकरत्वसूचनाय जनार्द्दनशब्दप्रयोगः। कयापि नायिकया रमितं क्रीड़ितं रमेर्ण्यन्तात् कर्मणि निष्ठा यद्वा कया सह रमितं रन्तारमिति कर्त्तरि निष्ठा वा। रमितुमिति तुमुलन्तः क्वचित् पाठः। तदा कया सह रमितुं क्रीडितुं गतमितिशेषः। विशङ्कमाना सती दृष्टवत् दृष्टे अर्थे सर्वं प्रत्यक्षेण पश्यन्तीवेत्यर्थ। अथवा दृष्टबत् उपपन्नमिव एतद् वक्ष्यमाणमाह ब्रूते।।४२ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४२ ।। पुनरपि राधायाः प्रलापवर्णनाय प्रसङ्गमवतारयति। अथानन्तरमियं राधा जनार्दनं कृष्णं कयापि रमितं विशङ्कमाना वितर्कयन्ती दृष्टवद् यथादृष्टमवधीयते

तथैतदग्रेतनगीतेन वक्ष्यमाणं प्राह। कि कृत्वा? माधवमन्तरेण कृष्णं विनाऽऽगताम् अत एव कार्यासिध्द्या मूकां वक्तुमक्षमां सखीं वीक्ष्य दृष्ट्वेत्यर्थः।।४२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४२।। एवं [८] बहुधा वितर्कयन्ती सखीमाह, (अथेति।) अथानन्तरं इयं राधा दृष्टवत्सुदृष्टार्थमिव एतद्वक्ष्यमाणं उक्तवती।[४]किं [४]कृत्वा? माधवमन्तरेण श्रीकृष्णं विनाऽऽगतां वीक्ष्यं दृष्ट्वा। कीदृशीम्? विषादमूकां दुःखातिशयेन वक्तुमसमर्थाम्। [६]कीदृशी? जनार्दनं कयाऽपि नायिकया रमितमिति[७] विशङ्कमाना। जनार्दनस्य विरहिजनस्य[८] सन्तापकरत्वमुक्तमिति शब्दार्थः। [९]अर्द हिंसायाम्; जनानर्दयतीति।।४२।।

१.मार्गे-क.ल. २.अभ्यस्ते भ्रमाभाव इति तत्राह-क. ३.नास्ति-क. ४.गन्तुमक्षमः-क.ल.म. ५.किमसमर्थः-क. ६.किमत्र-ड.क.किमपि अत्र-ल.म. ७.हृदि-क. ८.बहुविधं-फ.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४२।। अथेति। अनन्तरं इयं राधा माधवं कृष्णमन्तरेण विना आगतां सखीं वीक्ष्य[१०] दृष्ट्वा एतद्गीतेन वक्ष्यमाणमाह। कीदृशीं[११] सखीम्? विषादेन कार्यासिद्ध्या मूकां वक्तुमक्षमाम्। कीदृशी[१२] राधा? जानर्दनं कृष्णं कयाऽपि कामिन्या रमितं क्रीडितं विशङ्कमाना तर्कयन्ती। दृष्टवत् कामिन्या सहितं कृष्णं दृष्ट्वेवेत्यर्थः। यथा दृष्ट्वाऽभिधीयते तथा प्राहेत्यर्थः। एषा उन्मादिन्या उक्तिः।।४२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४२।। अष्टपदीमवतारयति, अथेति। अथ चन्द्रोदयानन्तरं विहितविलापानन्तरं माधवं गोविन्दं अन्तरेण विना इयं अङ्गना अत एव विषादेन मूकां प्रकृतकार्यत्वरालम्बितमौनां अनीर्यद्वचनामिति भावः। सखीं वीक्ष्य आलोक्य कयाऽपि स्वान्यगोपिकया रमितं क्रीडन्तं जनार्दनं विशङ्कमाना दृष्टवत् दृष्टवतीव एतत् आह।।४२।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४२।। अथेत्यादि। अथेत्युक्तवितर्कानन्तरं माधवमन्तरेण माधवं विना आगतां सखीं वीक्ष्य इयं राधा एतद्वक्ष्यमाणं वच आहेति वाक्यार्थः। सखीं किंविधाम्? विषादमूकामिति। विषादेन मूकां निर्वचनाम् अकृतकार्यत्वाद् विषादः। इयं किंविधा? जनार्दनमिति। जनार्दनं कयापि कामिन्या रमितमिति दृष्टवत् दृष्टमिव विशङ्कमाना सम्भावयन्ती। रमितमत्र विपरीतमभिप्रेतं रमणे स्त्रियाः प्रयोजकत्वात्। माधवमन्तरेणेत्यत्र अन्तरान्तरेण युक्ता द्वितीया। अन्तरेणेत्वव्ययम्। ''अन्तरेण पदं विद्याद्विना मध्यार्थयोरपि'' इति **"विश्वः"**।।४२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४२।। चन्द्रोदयेन श्रीकृष्णगमनप्रतिबन्धे सति तं विना सखा आगमने तस्या विप्रलब्धावस्थां वर्णयितुमाह अथेति। अथानन्तरं नाथं विना आगतां सखीं वीक्ष्य श्रीराधा एतद्वक्ष्यमाणमाह। कीदृशीं दुःखातिशयेन वक्तुमसमर्थाम् अकृतकार्य्य-त्वादित्यर्थः। कीदृशं जनार्द्दनं ? कयापि कर्त्तृभूतया रमितं दृष्टवद्विशंकमानम्। विप्रलब्धालक्षणं यथा,

अहरहरनुरागात् दूतिकां प्रेष्य पूर्वं
सरभसमभिधाय क्वापि सांकेतिकं या।
न मिलति खलु यस्या वल्लभो दैवयोगात्
वदति हि भरतस्तां नायिकां विप्रलब्धाम्।। इति।।४२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४२।। एवं जीवितनाथस्यागमनविलम्बेनातिव्याकुलाया राधायाः प्रणयोत्तरङ्गभूतेषु असम्भवोक्तकदम्बमुद्घाटयितुं कविरुपक्रमते। अथेति। अथ श्रीराधाया वितर्कानन्तरं सखीमवश्यमेवासौ श्रीकृष्णं समानीय मद्विरहदुःखमपनेष्यतीति सम्भावितां सहचरीं माधवमन्तरेण आगतां, कृष्णं विनोपस्थितां विषादमूकां 'समानीतः खलु मज्जीवनौषधि' रिति बहुशः पृच्छ्यमानापि कृष्णागमनगोपनाय कल्पितविषादेन मुखवैवर्ण्यमभिनीय तूष्णीं स्थितां वीक्ष्य, अश्रुभरितनेत्रमार्जनपूर्वं दृष्ट्वेयं विविधशङ्काकुलिता राधा, पूर्वपक्षान्तरोद्भावनेन निराकृतमपि तत् किं कामपि इति प्रथमपक्षवितर्कं निश्चिन्वाना जनार्दनम् 'अर्द' हिंसायां धातुः अनुरक्तस्त्रीजनहिंसनैकपरायणं श्रीकृष्णं कयापि सरसातिप्रगल्भया कामिन्या रमितं, सम्भोगवशीकृतं विशङ्कमाना सम्भावयन्ती दृष्टवत् उपपन्नमिव एतद्वक्ष्यमाणमाह, वदति स्म।।४२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

४२ - अथागते इति, श्रीकृष्णं प्रति प्रेषिता सखी यदा विषण्णवदना निर्वाक्तया समागता श्रीकृष्णं विना,तदा श्रीराधा जनार्दनम् अर्थात् जनस्य अथवा जनानां अर्दनं यः पीडकः जनान् पीडाप्रदानकारी श्रीकृष्णः कयापि रमणं करोति इत्येवं शंकया यथा पश्यति तथैव सखीमाह। विप्रलब्धालक्षणं यथा,

अहरहरनुरागात् दूतिकां प्रेष्य पूर्वं
सरभसमभिधाय क्वापि सांकेतिकं या।

न मिलति खलु यस्या वल्लभो दैवयोगात्
वदति हि भरतस्तां नायिकां विप्रलब्धाम्।। इति।।४२।।

उपेन्द्रवज्रावृत्तम्। अनागते प्रियतमे प्रोषितभर्तृका निजाश्वासनपरां मातुलानीं यथा ब्रवीति **हालस्य** रचनायाम्।

कै अवरहिअं पेम्मं णत्थि व्विअ मामि माणुसे लोए।
अह होइ कस्य विरहो विरहे होत्तम्मि को जिअइ।।२।२४
संस्कृतच्छाया; कैतवरहितं प्रेम मातुलानि मानुषे लोके।
अथ भवति कस्य विरहो विरहे भवति को जीवति।।४२।।

।।चतुर्दश प्रबन्धः / गीतम् १४।।
।।वसन्तराग यतितालाभ्यां गीयते।।

**१-स्मरसमरोचितविरचितवेशा।**
**गलितकुसुमदरविलुलितकेशा।।**
**कापि मधुरिपुणा विलसति युवतिरधिकगुणा।। ध्रुवम्।।१।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१।। वसन्तरागेण गीयते। किमाहेत्याह कामपीति। कापि युवतिः मधुरिपुणा समं विलसति इति योजना। कीदृशेन मधुरिपुणा मत्सकाशादधिकगुणा इत्यवगन्तव्यम्। कीदृशी भूत्वा विलसतीत्याह। स्मरसमरेत्यादिः। स्मरसमरः कामसंग्रामः तदर्थमुचिते वेशो ययेति केचिद् विजगृहु, तदसम्यक्, निष्ठेत्यनेन विरचितशब्दस्य पूर्वनिपातः स्यात्। तस्मात् स्मरसमरोचितं यथा स्यादेवं विरचितो केशो ययेति विग्रहः कार्य्यः। पुनः कीदृशी। गलितकुसुमदरविलुलितकेशा, गलितेन श्रस्तेन कुसुमेन दर विलुलिता केशा यस्य इति विग्रहः विपरीते रतौ हि नार्य्या गात्रे लोलना भमत्येव। पुष्पश्रंसनं श्रस्ते च कुसुमे केशबन्धस्य नैपुण्यापगमादुपयुक्तमेव विलुलितत्वम्।।१।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।१।। इदमेव प्रथयतितत्र पूर्वं ध्रुवपदम्।। कापीति ।सखि! कापि युवतिः मधुरिपुणा सह विलसति। किंभूता? अधिका गुणाः सौन्दर्यादयो यस्याः। अर्थान्मत्सकाशात्। मां विहाय यया रमत इति। 'मधुरिपुः' इत्यनेन तस्य माधुर्यानभिज्ञत्वं द्योत्यते ।तेन 'अधिकगुणा' इत्यनेन मत्तो हीनेति व्यज्यते।। अथ पदानि। स्मरेति। किंभूता कापि?

स्मरसमरोचितो विरचितो वेषः प्रसाधनं यया सा। स्मरसमरः कामकेलिः। अथवा, स्मरोपलक्षितः समर इव समरः। अपि किंभूता ? रतिविमर्दनेन विगलितपुष्पैरीषद्विलुलिताः केशा यस्याः सा। अनेनोक्तेनास्याः पुरुषायितत्वं व्यज्यते।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। यदाह तत् विशदयति, स्मरेत्यादिना गीतेन। तत्र स्मरेति। काऽपि लोकोत्तरसौभाग्यसम्पन्ना युवतिः विविधसुरतसम्पादनैकनिदानयौवनधन्या तरुणी, अधिकगुणा, मदपेक्षयाधिकगुणा यस्याः सा, कामशास्त्रोदिताति प्रौढरति कलाभ्यासकुशलेत्यर्थः, मधुरिपुणा विकटबन्धरचितविविधरताटोपटीयः पुरुषरत्नेन कृष्णेन विलसति, स्वाभीप्सितसुरतसुखमनुभवतीत्यर्थः। रतिप्रौढं पुरुषायितेन प्रतिपादयति, स्मरेत्यादि सप्तभिः कीदृसी, स्मरमरसमरः, परस्परसुरतसम्मर्दः, तस्य उचितमनुरूपं यथा भवति तथा विरचितः, कृतो वेशो यया सा। सुरतसम्मर्दानुगुणपरिमितमणिभूषणमसृणतरचतुः समानुलेपनसुदृढ केशप्रसाधनकर्पूररजः सहितताम्बूलचर्वणादिसम्पादिसम्पादिताङ्गश्रृङ्गारेत्यर्थः। पुनः कीदृशी, गलितानि कचाकर्षणादिबन्धविशेषोपयुक्तगात्रपरिवर्तनादिना स्त्रस्तानि कुसुमानि यस्मात् तादृशः। दरविलुलितः, श्लथन्, स्कन्धदेशावशावधिपतित इत्यर्थः। तादृशः केशः, कुन्तलबन्धो यस्याः, सा। दरविलुलितत्वन्तु मध्ये मध्ये यथा तथा त्वरासंयमितमितिभावः।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति, स्मरेति। गीतस्यास्य वसन्तरागः। एकताली तालः। गीतार्थस्तु, कापि युवतिर्मधुरिपुणा कृष्णेन विलसति रमते। अत एवाधिकगुणा अधिकः सौन्दर्यादिगुणो यस्याः सा। मत्संकेतागमनोत्सुकमपि कृष्णं गुणैरपहृत्य रमितवती । मत्तोऽप्यधिकगुणेति भावः। 'युवती विलसति' इत्यनेन कामिकर्तृकविलासाकथनाद्विपरीतरतमुक्तम्। कीदृशी ? स्मरसमरः कामसंग्रामः। सुरतमिति यावत्। तत्रोचितो योग्यो विरचितः कृतो वेश आभरणं यया सा । पुनः कीदृशी ? गलितः स्खलितः कुसुमभरो यस्यास्तादृशी। विलुलिताः कृष्णेन कचग्रहपूर्वकं चुम्बनादानेन स्त्रस्ताः केशा यस्याः सा। विपरीतरते च नायिकायाः केशग्रहणपूर्वकमेव चुम्बनं कार्य मित्युक्तं प्राक्। 'अस्त्रियां समरानीकरणाः' **इत्यमरः**। 'वेशो वेश्यागृहे प्राक्तो नेपथ्ये गृहमात्रके।' इति **विश्वः**।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। आहेत्युक्तं तत्प्रकारमेव वर्णयति स्मरेत्यादि। अष्टतालिरागेण गेयम्। अत्र कापीत्याद्यधिकगुणेत्यादि ध्रुवपदम्। स्मरसमरो रतिः तस्या उचितमनुगुणं यथा तथा

विरचित: घटित: वेशो यया सा तादृशी धृतसुरतानुगुणपरिकरेत्यर्थ:। देशान्तरेशषयोर-भेदादन्त्यानुप्रासोपपत्ति:। वेशवाची वेशशब्दोऽप्यस्त्री केषांचित् सम्प्रदाय:। गलितानि सम्भोगसमयसमाकर्षणेन बन्धविशेषोपयुक्तगात्रपरिवर्त्तनादिना च स्रस्तानि कुसुमानि येभ्य: ततो दृशा समुत्कतया वस्त्राकर्षणेन अतएव दरमीषद्- विलुलिता इतस्ततश्चलन्त: तथाविधाश्च ते केशाश्च। गलितकुसुमदरविलुलिता: केशा: यस्या: तादृशी अतएवाधिका लोकोत्कृष्टा गुणा: सौन्दर्य्यमधुरालापादयो यस्या: सा तथोक्ता एतादृशी कापि लोकोत्तरसौभाग्यसम्पन्ना तद्भोगो लोकोत्तरतां सूचयितुं कापीत्युक्तम्। अनिर्द्धारणे वा किमु शब्द: युवतिस्तरुणी मधुरिपुणा सह कृष्णेन सह विलसति इदानीं विहरतीत्यर्थ:।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। गीतस्यास्य वसन्तराग:। एकतालीताल:। रागलक्षणमुक्तमेव। दृष्टवदेन दाहेत्यनेन यदुक्तं तद्दर्शयति; हे सखि। कापि युवति: अधिकगुणा मत्तोऽधिकगुणा अत एव मधुरिपुणा कृष्णेन समं विहरति क्रीडति। कीदृशी? स्मरसमरोचित: कामयुद्धयोग्या विरचित: कृतो वेश: किङ्किणीदृढबन्धनादिर्यया सा तथा। एतेन पुंभावसाहसारम्भो दर्शित:। वक्ष्यमाणविशेषणैरपि तद्वर्णनमेव पर्यवसतीत्यवधेयम्। कीदृशी? गलितकुसुमा स्रस्तपुष्पाश्च ते दरविलुलिता ईषदस्तव्यस्ताश्च वेशा यस्या: सा तथा।।१।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१।। [१३]दृष्टार्थं [१४]गीतेनाहस्मरेति। वसन्तरागे एकतालीताले। [१५]रागतालध्रुवाणां लक्षणमुक्तमेव। हे सखि काऽपि [१] युवतिर्व्रजवधूर्मधुरिपुणा श्रीकृष्णेन सह विलसति २ क्रीडति। कीदृशी? अधिकगुणा मत्तोऽधिका नृत्यकुशलसौन्दर्यादयो गुणा यत्र। मद्विलासमन्दिरगमनोत्कण्ठितमपि श्रीकृष्णं स्वगुणैराकृष्यान्यत्र नीतमिति तद्गुणाधिक्यं सूचितम्। कीदृशी। स्मरसमरे कामसङ्ग्रामे उचितो योग्यो विरचित: कृतो वेशोऽलङ्कार: [३] स्रक्चन्दन[४]संयोगादिर्यया सा। [५]चिबुकमुद्धृत्य चुम्बितेति ध्वनि:। अथ वा स्मरसमरोचितो विरचित: कृत:। श्रीकृष्णेन वेषो[६] यस्यां सा। अलङ्कार [७]विधानेनैव कृतस्मरसङ्ग्रामायाश्चिह्नमाहगलितकुसुमै: पतितपुष्पै:[८] दरविलुलिता ईषद्व्यस्ता केशा यस्या: [९]सेत्यर्थ:।।१।।

१ .वेषां-ड. २ .ललित-इ. ३ .काऽपि चपला मधुरिपुणा विलसति युवतिरधिकगुणा सखि-इ. ४,५ .नास्ति-अ.ब. ६ .पुन: कीदृशीम्-अ.ब. ७ .शङ्कमाना शङ्काप्राप्ता-ग. विशङ्कां प्राप्ता-फ. विशङ्कमाना शङ्कां प्राप्ताडह.-

८.सन्तापकत्वमुचितमिति-फ.ग.ह.ज. ९.अर्दधातुर्हिंसार्थे-इ.ग.ह.अर्दधातुर्हिंसार्थः-फ.ज. १०.नास्ति-ड.ल.म. ११,१२.नास्ति-ड. १३.इश्टार्थं-अ.ब. १४.गानेनाह-इ. १५.तालध्रुबाणां-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१।। वसन्तरागः। दृष्टवदिति[११] यदुक्तं तद्गीतेनाह-स्मरेति। हे सखि काऽपि युवतिः कामिनी मधुरिपुणा कृष्णेन सह विलसति क्रीडति। कीदृशी सा? अधिकगुणा मत्तोऽतिशयितसौन्दर्यादिगुणयुक्ता। पुनः कीदृशी? स्मरसमरोचितः कामयुद्धे योग्यः विरचितः[१२] कृतो वेषो [१३]ऽलङ्कारादिर्यया सा। पुनः कीदृशी? गलितकुसुमेन पतितपुष्पस्रगादिना दरविलुलिता ईषदितस्ततो व्याप्ताः केशाः यस्याः सा।।१।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। स्मरेति। स्मरस्य समरः रतः तस्मिन् उचितः योग्यः विरचितः निर्मितः वेशः संवेशविशेषो यस्याः सा मकरिकापत्रवस्त्राद्यलङ्कारादियुक्ता। ललितैःसुन्दरैः कुसुमैः मल्लिकादिभिः दर ईषत् विलुलिताः निम्नोन्नतीकृताः केशाः चिकुराः यस्याः सा। कुसुमगुम्फनेन केशानां क्वचिन्निम्नीभावो भवति। ध्रुवाया व्याख्यानम्। सखी काऽपि मधुरिपुणेति द्विवारं पठनीयम्। मधुरिपुणा गोविन्देन अधिकाः गुणा सौन्दर्यसौभाग्यादिगुणाः यस्याः सा युवतिः तरुणी विलसति।।१।।

१.युवतिर्वधू-ग. २.नास्ति-अ.ब. ३.पदमिदं नास्ति-फ. ४.सम्भोगादि-अ.ब.इ.ग.ह. ५.तः. ६.पर्यन्तं नास्ति-फ. ७.यस्याः सा-ग. ८.दरं-इ. ९.नास्ति-इ.फ.ग.ह.ज. १०.वसन्तरागेण गीयते एकतालीतालं-ल.म. ११.यदुक्तं तर्कं-क. १२.नास्ति-ड. १३.अलङ्कारो यया सा-क.अलङ्कारादिर्यथा स्यात्तथा-ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१।। किमाहेत्याह, स्मरेति। कापीत्यादि। कापि युवतिर्मधुरिपुणा सह विलसतीति योजना। किंविधा? अधिकगुणेति। गुणैः मत्तोऽतिरिक्ता मां सङ्केतस्थानं प्रेष्य यां हरिरभिसृतः सा खलु भवत्येव मत्तोऽधिकगुणा। कीदृशी भूत्वा विलसतीत्याह - स्मरसमरेत्यादि। स्मरसमरो कामसङ्ग्रामस्तदर्थमुचितो विरचितो वेशो ययेति केचिद् विजगृहुः। तदसम्यक्। निष्प्रत्यनेन विरचितशब्दस्य पूर्वनिपातः स्यात्। तस्मात् स्मरसमरे उचितं योग्यं यथा स्यादेवं विरचितो वेशो ययेति विग्रहः कार्यः। पुनः किंविधा? गलितेति। गलितकुसुमाः श्र(स्र)स्तगर्भकाः। अत एव दरविलुलिता वस्ती(क्री)भूताः केशाः यस्या इति विग्रहः। "विपरीते हि नार्याः गात्रोल्लोलनात् भवत्येक पुष्पश्रं(स्रं)सनम्।" श्र(स्र)स्ते च कुसुमे केशबन्धस्य नैरपगमादुपयुक्तमेव विलुलितत्वम् इति।।१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। वसन्तरागयतितालौ। किमेतदित्याह। हे सखि! कापि युवतिर्मधुरिपुणा सह विलसति यतः मत्तोऽपि अधिका गुणा यस्या इति। अधिकेत्यनेन मत् संकेतमागतं तं वशीकरणं विलसतीति गुणाधिक्यं तेन सह इत्यनेन तत्कर्त्तृकरणं च ध्वनितम्। गुणानेवाह स्मरेत्यादिना। कामसंग्रामस्य वाहुयुद्धस्य उचितो विरचितो वेशो यया सा। ततः च रणावेशेन गलितानि कुसुमानि येभ्यस्ते केशाः यस्याः सा। अनेन लीलाविशेष सूचितः।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ।। यदाह तत् विशदयति, स्मरेत्यादिना गीतेन। तत्र स्मरेति। काऽपि लोकोत्तर-सौभाग्यसम्पन्ना युवतिः विविधसुरतसम्पादनैकनिदानयौवनधन्या तरुणी, अधिकगुणा, मदपेक्षयाधिकगुणा यस्याः सा, कामशास्त्रोदितातिप्रौढरतिकलाभ्यास-कुशलेत्यर्थः। मधुरिपुणा विकटबन्धरचितविविधरताटोपपटीयः पुरुषरत्नेन कृष्णेन विलसति, स्वाभीप्सितसुरतसुखमनुभवतीत्यर्थः। रतिप्रौढं पुरुषायितेन प्रतिपादयति, स्मरेत्यादि सप्तभिः, कीदृशी, स्मरसमरः, परस्परसुरतसम्मर्दः, तस्य उचितमनुरूपं यथा भवति तथा विरचितः, कृतो वेशो यया सा। सुरतसम्मर्दानुगुणपरिमितमणिभूषणमसृणतरचतुः समानुलेपनसुदृढकेशप्रसाधनकर्पूररजः सहितताम्बूल, चर्वणादिसम्पादिताङ्ग-शृङ्गारेत्यर्थः। पुनः कीदृशी, गलितानि कचाकर्षणादिबन्धविशेषोपयुक्तगात्रपरिवर्त्तनादिना स्रस्तानि कुसुमानि यस्मात्, तादृशः। दरविलुलितः, श्लथन्, स्कन्धदेशावधिपतित इत्यर्थः। तादृशः केशः, कुन्तलबन्धो यस्याः सा। दरविलुलितत्वन्तु मध्ये मध्ये यथा तथा त्वरासंयमितमिति भावः।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। स्मरसमरेति; कापि तरुणी मत्तः उत्तमा अधिकगुणवती मधुरिपुणा अर्थात् मधुमासस्य नाम वसन्तकालस्य शत्रुरुपेण मम हन्तारूपेण वा तेन सा रमते विलासकलायां मोदते। अत्र मधुरिपुशब्देन शृङ्गारकलाविमुखत्वमपि व्यज्यते अथवा शृङ्गार कलायाःवैरी रूपेणकल्पते। कथं भूता युवतिः सा इति आकाङ्क्षायां व्रवीति; शृङ्गारानुकुलवेशधरिणी शृङ्गारयुद्धे उपयुक्तवेशसंरचना यस्या सा विलसति तया। तस्याः केशतः पुष्पस्तवकानि स्खलितानि तथा तस्याः अलुलायितं केशपाशं शृङ्गारे निमग्नैव व्यज्यते। अथवा स्मरोपलक्षितः समर इव समरः। अपि किं भूता ? रतिविमर्दनेन विगलित पुष्पैरीषद-विलुलिताः केशपाशाः यस्याः सा। अथवा विलुलिता कृष्णेन कचग्रहपूर्वकं चुम्बनादानेन स्रस्ताः केशाः यस्याः सा। विपरीतरतौ नायिकायाः केशग्रहपूर्वकमेव चुम्बनं कार्यमित्युक्तं प्राक्।। १ ।।

**२-हरिपरिरम्भणवलितविकारा।**

**कुचकलशोपरि तरलितहारा।। कापि० ।।२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। हरिपरिरम्भणेन चलितो विकारो रोमाञ्चादिः यस्या इति विग्रहः। विकारो मानसो भाव **इत्यमरः**। पुनः कीदृशी कुचकलशोपरि तरलितहारा पुरुषायितताया: स्त्रियाः कट्यान्दोलनात् उपयुक्तमेवदोलायमानहारत्वम्।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, हरीति। पुनः किंभूता ? हरिपरिरम्भणेन वलितः संभक्तो विकारः कामोपलक्षितो मानसो भावो यस्याः। कुचकलशयोरुपरि तरलितश्चञ्चलो हारो यस्याः। अत्रापि हारतलत्वं पुरुषायितमभिव्यनक्ति।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। हरिपरिरम्भणेति। हरि परिरम्भणेन, हरिकृतदृढालिङ्गनेन वलिता, उद्रिक्ता विकारा आनन्दसम्मोहसम्भेदापरपर्यायभावविशेषजनितार्धनिमीलितापाङ्गखेलनस्मित-विस्तारिकपोल संस्फुरणघनसीत्करणवचः स्खलनादिसहृदयचारिविविध बिलासविजृम्भणपूर्वदोर्वल्लीनियन्त्रणकपोलाधरचुम्बनवैयग्रोदिततत्कालीन वैजात्यव्यापामयमदनविकृतयो यस्याः सा तथा किञ्च कुचकलसस्योपरि, ऊर्ध्वभागे तरलिता तादात्मिवकसुरतसम्भ्रमवशात् सञ्जाततरला हाराः मुक्तासस्रजो यस्याः सा। घनरसपरि पूरिताधोमुखायमानकनककुम्भयुगमुखनिःसृतधारनिर्वापित चिरोपचितप्रियविरह-वह्निकेवोत्प्रेक्षणीयेति भावः।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।। पुनः कीदृशी ? हरीति। हरेः परिरम्भणेनालिङ्गनेन चलितो जातो विकारो रोमाञ्चादिर्यस्याः। पुनः कीदृशी ? कलशाविव कुचौ तत्र तरलितश्चञ्चलो हारो यस्याः सा।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। हरीति। हरिणा सर्वखेदहारिणा कृष्णेन परिरम्भणम् आलिङ्गनं तेन वलिता उत्पन्ना बिकाराः मदनविकृतयो यस्याः सा तादृशी अतएव कुचकलशोपरि पयोधरकुम्भोपरि तरलितामन्मथहारा यस्याः सा तथोक्ता एवंविधा कापीत्यादि।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। पुन: किदृशी तत्राह, हरे: कृष्णस्य परिरम्भणेनालिङ्गनेन वलित: सम्भोक्तो विकारो रोमाञ्चादिर्यस्या:। पुन: किदृशी। कुचकलसयोरूपरि विपरितकर्मणा तरलितो दोलायितो हारो यस्या: सा तथा।।२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। (हरीति।) पुन: कीदृशी? हरिपरिम्भणेन श्रीकृष्णालिङ्गनेन वलितो [२]जातो विकारोऽनङ्गोद्बोधो यस्या:। पुन कीदृशी? कुचकलशयोरुपरि तरलितश्चञ्चलो हारो मुक्ताहारो यस्या:। तरलित [३]इत्यादिनाऽऽ-लिङ्गनं सूचितम्। कलशशब्देनाऽनङ्गोत्सवाय मङ्गलं स्थूलत्वं चेति ध्वनि:।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। [१५]हरीति। पुन: कीदृशी? हरिपरिरम्भणेन कृष्णालिङ्गनेन वलित: कृतो विकार: कामोब्दोधो यस्या: सा। पुन: [१६] कीदृशी? कुचकलशोपरि स्तन कुम्भोपरि तरलितश्चञ्चल: हारे मुक्ताहारो यस्या: सा।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। हरीति। हरे: परिरम्भणेन आलिङ्गनेन वलिता उद्भूता: विकारा: सात्विकमानसा: स्तम्भादय: हर्षादयश्च यस्या: सा। कलितेति पाठे स एवार्थ:। कुचावेव कलशौ तव तरलित: चञ्चल: हारो यस्या: सा।।२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। हरीत्यादि। किंविधा? हरे: श्रीकृष्णस्य परिरम्भेण परिरम्भाय वा वलित: प्रवलीकृत: विकारो रोमाञ्चादिर्यस्या इति "विग्रह":। पुन: किंविधा? कुचेति। कुचावेव कलशौ कुचौ वा कलशाविव तयोरुपरि तरलितश्चञ्चलितो हारो यस्या इति "विग्रह":। पुरुषायिताया: स्त्रिया: कट्यान्दोलनात् उपयुक्तमेव दोलायमानहारत्वम्।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। न केवलमिव किंच हरे: परिरम्भेण वलितो रचितो रोमांचादि विकारो यस्या: सा ततश्च कुचकलसोपरि तरलितश्चञ्चलितो हारो यस्या: सा अनेनापि लीलाविशेषं सूचित:।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। हरिपरिरम्भणेति। हरिपरिरम्भणेन, हरिकृतदृढालिङ्गनेन वलिता, उद्रिक्ता विकारा आनन्द सम्मोहसम्भेदापरपर्यायभावविशेषजनितार्धनिमीलितापाङ्गखेलनस्मित-

विसारिकपोलसंस्फुरण घनसित्करणवचः स्खलनादिसहृदयहृदयहारिविविधविलास विजृम्भणपूर्वदोर्वल्लीनियन्त्रण कपोलाधरचुम्बनवैयग्रोतितत्कालीन वैजात्यव्यापार-मयमदनविकृतयो यस्याः सा। तथा किञ्च कुचकलसस्य उपरि, ऊर्ध्वभागे तरलिता तादात्मिकसुरतसम्भ्रमवशात् सञ्जाततरला हारा मुक्तास्रजो यस्याः सा। घनरसपरि-पूरिताधोमुखायमानकनककुम्भयुगमुखनिः सृतधारनिर्यापितचिरोपचितप्रियविरह-वह्निकेवोत्प्रेक्षणीयेति भावः।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। हरीति; हरिमतिदृढ़भावेनालिङ्गनं करोति। तदनुगुणं रोमाञ्चादि सात्त्विकविकारः सम्भवति।श्रीकृष्णस्योपरि शायितायाः वक्षदेशस्य हारः दोलायमानः भवति। अस्मिन् संभोगशृङ्गारे विपरीतरतिरनुभूयते। अथवा पुरुषायितत्वं व्यज्यते।।२।।

**३-विचलदलकललिताननचन्द्रा।**

**तदधरपानरभसकृततन्द्रा।। कापि० ।।३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। विचलद्भिरलकैर्ललितो मनोहर आननचन्द्रो यस्या इति विग्रहः। "अलकाश्चूर्ण-कुन्तला **इत्यमरः**"। पुनः कीदृशी तदधरपानरभसकृततन्द्रा तस्य कृष्णस्य अधरस्तदधरस्तस्य पान रभसेम कुततन्द्रा रतिसुखजनितनिद्रा ययेति विग्रहः।।३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। अपि च, विचलदिति। पुनः किंभूता ? विचलदलकैर्ललितो मनोहरो मुखचन्द्रो यस्याः सा तथा। पुनः किंभूता ? तदधरपानरभसेन हर्षेण कृता तन्द्रो सुखजनितालीक-निद्रा यया।।३।।

## (३) जगद्धरकृत- सारदीपिका

।।३।। विचलेति। रतिसंभ्रमातिशयसञ्जातशिरोधूननवशात् विचलन्तो व्यस्तीभवन्तोऽलंकार श्चूर्णकुन्तलयस्मिन् अत एव ललितः, तमोग्रस्त वियत्प्रदेश इव दर्शनीयः कृष्णाह्लादकारी मुखचन्द्रो यस्याः सा। कलितेति पाठे किं च तदधरे तत्समयो-चितान्तरान्तरा कृतं यत् तस्य कृष्णस्याधरपानं तस्य रभसो वेगः, नयननिमीलनसूचिता-लसता इति पौनपुन्यमित्यर्थः, तेन कृता तन्द्रा यस्याः सा। कृष्णाधररसास्वादनसुख विस्तृतेतरकरणीयता व्यञ्जकसञ्जातनयन निमीलनसूचितालसता इत्यर्थः।।३।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३।। पुन: कीदृशी ? विचलदिति। विचलद्भिश्चञ्चलैरधिकैश्चूर्णकुन्तलैर्ललितो मनोहर आननचन्द्रो यस्या: सा। लालित्यं चालकानां कलङ्कसादृश्यान्मुखे चलत्कलङ्कवत्त्वं चन्द्रमस: प्रतीयते। पुन: कीदृशी ? तस्य कृष्णस्याधरपानरभस: तेन कृता चक्षुर्निमीलनेनाविष्कृता तन्द्रा रतिसुखानुभवजनिता निद्रा यया सा।।३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३।। विचलदिति। किञ्च विचलन्त: सुरतवशेन लीलामाना अलका: चूर्णकुन्तला:। ''अलकाश्चूर्णकुन्तला **इत्यमर**:''। तैर्ललितो मनोहर आनन्दचन्द्रो यस्या सा ललिताननचन्द्रेति क्वचित्पाठ:। तदाकलित: व्याप्त:। किञ्च तस्य श्रीकृष्णस्य अधरपानरभसेन दशनवसनास्वादनवेगेन हर्षेण वा कृता व्याप्ता तन्द्रापारवश्यं यस्या: सा तादृशी कापीत्यन्वय:।।३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३।। पुन: कीदृशी तत्राह; विचलद्भिर्विपरीतरत्या कल्प्यमानैरलकै: चूर्णकुन्तलै: ललितो मनोहर: आननचन्द्रो मुखेन्दुर्यस्या: सा तथा। पुन: कीदृशी ? तेन कृष्णेनाधरपानं तस्य कृष्णस्याधर:, तस्य पानं तदधरपानमिति वा। तेन यो रभस आनन्द: तेन कृता तन्द्रा अलीकनिद्रा यया सा तथा। 'रभसी वेगहर्षयोरि'ति विश्व:।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। (विकचदिति, विचलदिति) पुन: कीदृशी ?[४]विचलद्भि: कम्पमानैरलकैश्चूर्ण-कुन्तलैर्ललितो मनोहर आननचन्द्रो [५] मुखमेव चन्द्रो [६]यस्या:। [७]पुन: [८]कीदृशी ? [९]तस्य श्रीकृष्णस्याधरपानरभसेन वेगेन कृता तन्द्रा [१०] सुखानुभव [११] रूपा चक्षुर्निमीलनं वा यया। एतेन तदधरामृत [१२] पानेनैव मूर्छितेति ध्वनि:। [१३]रमसो वेग उत्साह: **इत्यमर**: [१४] (?)।।३।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। विचलदिति। विचलद्भि: कम्पमानैरलकै: चूर्णकुन्तलैर्ललित: सुन्दर: आननचन्द्रो [१७] मुखचन्द्रो यस्या: सा। तदधरपानरभसेन कृष्णस्यौष्ठपानहर्षेण कृततन्द्रा रतिसुखानुभवनिद्रा यस्या: सा।।३।।

१.विकचललिताननचन्द्रा-इ.विकलदलकललिताननचन्द्रा-अ.ब.२.नास्ति-अ.ब.३.इत्यनेन-इ.फ.ग.ह.ज.४.विकचद्भि:-अ.ब.५.त:६.पर्यन्तं नास्ति-अ.ब.इ.७,८,९.नास्ति-इ.१०.सुरत-सुखानुभव-फ.ज.११.रूपो न चक्षुर्निमीलनं यया-अ.ब.१२.पानेन च-फ.ज.१३.त:.१४.पर्यन्तं नास्ति-अ.ब.१५.नास्ति-ड.हरिरिति-क.ल.१६.नास्ति-ड.१७.नास्ति-ड.

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।३।। विकचेति। विकचं विकसितं जलजं पद्मं तद्वत् ललितः आननमेव चन्द्रो यस्याः सा। तदधरः ओष्ठः तस्य पाने चुम्बने कृता तन्द्रा प्रमीला यस्याः सा। अत्र उपमारूपकालङ्कारौ।।३।।

**(१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।३।। विचलदित्यादि। पुनः किंविधा ? विचलद्भिरलकैर्ललितो मन ईप्सितो वा आननचन्द्रो यस्या इति विग्रहः। पुनः किंविधा ? तदधरेति। तस्य श्रीकृष्णस्य अधरस्तदधरस्तस्य पानरभसेन कृष्णस्याधरपानसम्भविना (वेन) हर्षेण कृता तन्द्रेति सुखानुभवलक्षणनिमीलनं ययेति विग्रहः।।३।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।३।। तथा तत् संभ्रमशिरोधूननेन विचलदलकैर्ललितः सुन्दर आननचन्द्रा यस्याः सा, ततश्च कृष्णस्याधरपानरभसेन कृता तन्द्रानन्दनिमीलनं यया सा।।३।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।३।। विचलेति। रतिसंभ्रमातिशयसञ्जातशिरोधूननवशात् विचलन्तो व्यस्तीभवन्तोऽलकाश्चूर्णकुन्तला यस्मिन्। अत एव ललितः, तमोग्रस्त कियत्प्रदेश इव दर्शनीयः कृष्णाह्लादकारी मुखचन्द्रो यस्याः सा। कलितेति पाठे चूर्णकुन्तलविप्रकीर्णवदनेन्दु-बिम्बेत्यर्थः। किं च तदधरे तत्समयोचितान्तरान्तरा कृतं यत् तस्य कृष्णस्याधरपानं तस्य रभसो वेगः, पौनपुन्यमित्यर्थः, तेन कृता तन्द्रा यस्याः सा। कृष्णाधर-रसास्वादनसुखविस्तृतेतरकरणीयताव्यञ्जकसञ्जातनयननिमीलनसूचितालसता इत्यर्थः।।३।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३।। विचलदिति; अत्र तस्याः सम्भोगप्रवणायाः नायिकायाः मुखचन्द्रः चूर्णकुन्तल-समूहेन लम्बमानेन शोभमाना दृश्यते। पुनः सा यदा श्रीकृष्णस्य वेगेन अधरसुधां पिवति तेनानन्दिता सति चक्षूंषि निमीलयति। अत्रापि पुरुषायितत्वं वर्त्तते।

**४-चञ्चलकुण्डलदलितकपोला।**
**मुखरितरसनजघनगतिलोला।। कापि०।।४।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।४।। चञ्चलकुण्डलाभ्यां दलितौ घृष्टौ कपालौ यस्या इति विग्रहः। पुनः कीदृशी, मुखरितरसनजघनगति-लोला, मुखरिता रसना यत्रेति विग्रहः। मुखरितरसनस्य जघनस्य

गत्या गतागतेन उत्पातनिपातेन लीला चञ्चलेत्यर्थः। विपरीत रते हि नार्य्याः कट्यान्दोलनादुपयुक्तमेव। मुखरितरसनत्वं बन्धश्चात्र हंसलोलनामा, लक्षणं तु निभृतनिकुञ्जे चोक्तम्।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, चञ्चलेति। किंभूता ? चञ्चलकुण्डलाभ्यां ललितौ दलितौ कपोलौ यस्याः। पुनः किंभूता ? मुखरितरसना या जघनगतिः जघनस्य गतागतं तया लोला।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। चञ्चलेति। चञ्चलाभ्यां कुण्डलाभ्यां ललितौ सुन्दरौ कपोलौ यस्याः सा। तदधरामृतपान द्विगुणितोत्साहसूचककृतनर्तनताटङ्कानवरतताडितकपोलतया प्रियनयनोत्सव सम्पादिनीतिभावः। किं च मुखरिता रसना यत्र तस्य जघनस्य गत्या लोला चञ्चला च निरन्तरकिङ्किणी कलकलशब्दशालि मेखलाकलापरञ्जितनितम्बबिम्ब-गतागत सम्भ्रम-लोलगात्र-लतिका चेत्यर्थः। अनेन तच्छ्रवणस्यापि सुखसम्पादयित्रीति-भावः ।पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः, **इत्यमरः**।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। पुनः कीदृशी ? चञ्चलेति। चञ्चलाभ्यां कुण्डलाभ्यां दलितौ मृदितौ कपोलौ यस्याः सा। कुण्डलयोश्चाञ्चल्यं पुरुषायितसकलनायिकातनुचाञ्चल्ये भवत्येव। पुनः कीदृशी ? मुखरितेति। मुखरिता शब्दायमाना रसना क्षुद्रघण्टिका यस्य तादृशस्य जघनस्य गत्या गतेन लोला चञ्चला।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। चञ्चलेति। चञ्चलाभ्यामुपरि स्फुरता वेगेन लोलाभ्यां कुण्डमण्डलाभ्यां ललितौ रमणीयौ कपालौ गण्डभागौ यस्याः सा तथोक्ता। किं च मुखरित उपरि सुरतानुकूल चालनेननादितो रसना कलापो यस्य तादृशस्य जघनस्य कटिपुरोभागस्य। पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः **इत्यमरः**। गतिः उपरि सुरतानुकूलव्यापारविशेषः। अत्र लोला तृष्णासमेता, लोलश्च सतृष्णयोरित्यमरः। उपरि सुरतानुगुणं व्यापाराभिलाषवतीत्यर्थः। अथवा मुखरिता नादिता रसना किङ्किणी समेत मेखला यस्याः सा तादृशी च सा जघनगतिश्च तत्र लोलेत्यर्थः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनः कीदृशी तत्राहविपरीतरतिकर्मणा तञ्चलाभ्यां कुण्डलाभ्यां दलितौ संघर्षणेन खण्डखण्डीकृतौ कपोलौ यस्याः सा तथा। दलितकपोल इत्यनेन कुण्डलसंधर्षणजनितः

दुःखापरिज्ञानेन सातिरेको दर्शितः। पुनः कीदृशी ? विपरीतरत्या मुखरिता रसना काञ्ची यत्र स भवति मुखरितरसनः। एवम्भूतो यो जघनस्तस्य गत्या लोला चञ्चला धृष्टा वा। 'लोलश्चञ्चलधृष्टयोरि'ति विश्वः।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। (चञ्चलेति।) पुनः कीदृशी ? हे धूर्त[२]कुण्ठक वञ्चक ज्ञातोऽसीति कथयन् शिरःकम्पनेन क्रीडावशेन वा चञ्चलाभ्यां [३]चपलाभ्यां [४] कुण्डलाभ्यां ललितौ सुन्दरौ कपोलौ यस्याः। पुनः कीदृशी ? मुखरिता शब्दायमाना रसना [५] क्षुद्रघण्टिका यत्र जघने तद्गत्या गतागतेन चञ्चला यस्याः [६]सा। इत्येतैः पदैः सुरतविपरीततोक्तेति भावः।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। चञ्चलेति। [७]पुनः [८]कीदृशी ? चञ्चलाभ्यां कुण्डलाभ्यां दलितौ सङ्घृष्टौ कपोलौ यस्याः [९]सा। पुनः [१०]कीदृशी ? मुखरिता शब्दसहिता रसना काञ्ची यस्मिन् जघने तद्गत्या [११] चाञ्चल्येन लोला चञ्चला।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। चञ्चलेति। चञ्चलाभ्यां कुण्डलाभ्यां कलितौ सहितौ कपोलौ यस्याः सा। मुखरिता शब्दिता रसना काञ्ची यस्मिन् तथा जघनस्य नाभेरधोभागस्य गतिलोला अस्थिरा। अनेन परुषायितं सूचितम्।।४।।

१.कलित-इ.दलित-ड.२.लुण्टक-इ.फ.ग.ह.ज.३.नास्ति-अ.ब.ग.४.कुटिलाभ्यां-फ.ज.५.कुन्दघण्टिका-इ.६.नास्ति-अ.ब.७,८.नास्ति-ड.क.९,१०.नास्ति-ड.११.नास्ति-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। चञ्चलेत्यादि। पुनः किंविधा ? चञ्चलाभ्यां कुण्डलाभ्यां दलितौ घृष्टौ कपोलौ यस्या इति विग्रहः। पुनः किंविधा ? मुखरितेति। मुखरिता रसना यत्र एवंविधस्य जघनस्य गत्या गतागतेन लोला चञ्चला सतृष्णा वा। अनेन पदद्वयेनापि पुरुषायितसूचनम्।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। तथा तदधरपानावेशात् चञ्चलाभ्यां कुण्डालाभ्यां ललितौ कपोलौ यस्याः सा, किंच मुखरिता रसना यत्र तस्य जघनस्य गत्या लोला चञ्चला।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। चञ्चलेति। चञ्चलाभ्यां कुण्डलाभ्यां ललितौ सुन्दरौ कपोलौ यस्याः सा। तदधरामृतपान द्विगुणितोत्साहसूचककृतनर्त्तनताटङ्कानवरतताडितकपोलतया प्रियनयनोत्सवसम्पादिनीति भावः। किं च मुखरिता रसना यत्र तस्य जघनस्य गत्या लोला चञ्चला च निरन्तरकिङ्किणी कलकलशब्दशालिमेखला कलापरञ्जितनितम्बबिम्ब-गतागतसम्भ्रमलोलगात्रलतिका चेत्यर्थः। अनेन तच्छ्रवणस्यापि सुखसम्पादयित्रीति भावः। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः' **इत्यमरः**।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। चञ्चलेति; तथैव तस्याः कुण्डलं कपोले दोलायमानं भवति तेन गण्डयुगं दलितं भवति। तस्याः विपरीतरतिक्रीडायां कटीसूत्रं मेखला च रणितं भवति। अत्यन्त - चञ्चल–जघनघातेन अत्र पुरुषायितशृङ्गारेण सा यदा सम्भोगं करोति तस्याः जघनघातजन्यशरीरचाञ्चल्यं कर्णयोः कुण्डलयुगलं, कटीमेखलाश्च लोलेन चञ्चलतामेति।।४।।

**५-दयितविलोकितलज्जितहसिता।**
**बहुविधकूजितरतिरसरसिता।। कापि०।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। विलोकितेति नपुंसके भावे क्तः। दयितस्य विलोकनेन पूर्वं लज्जिता पश्चाद्धसिता चेति विग्रह। पूर्वकालित्यादिना समासः। अङ्गनायमानस्य हरेरुपरि पुरुषायितया युवतेरुपयुक्तावेव लज्जाहासौ। पुनः कीदृशी बहुविधकूजितरतिरसरसिता, बहुबिध कूजितं दात्यूहपारावतादिसम्भवं बहुबिधकूजितमेव रतिरसे रसितं शब्दितं यस्या इति विग्रहः।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, दयितेति। किंभूता? लज्जिता चासौ हसिता च लज्जितहसिता। दयितविलोकितेन लज्जितहसिता। अपि च 'किंभूता? बहुविधानि कूजितानि पारावतादीनामव्यक्तशब्दानुकरणानि यत्र तद्यथा स्यात्तथा रतिरसेन रतिरागेण रसिता शब्दिता। अथवा, बहुविधं कूजितमव्यक्तः शब्दो यत्र तेन रतिरसेन शब्दिता।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। दयितेति। दयितस्य प्रियस्य विलोकनेन, विशेषावलोकनेन, अननुभूत-चरप्रौढरताटोपदर्शन सविस्मय-हर्षावलोकनेन इत्यर्थः। लज्जिता, कथमीदृशोद्धते

कर्मणि प्रवृतास्मि, सर्वं खलु विदितवानसौ मदाचरितमिति सञ्जातलज्जा, ततश्च प्रियसुखतात्पर्योत्साहवशेन हसिता च। किञ्च बहुविधानि यानि कूजितानि, तत्समयोपयुक्तहुङ्कृतादिध्वनिविशेषाणि, कपोतकोकिलादिकूजितानुकारीणि, तानि यत्र विविधरतिकूजितानि कृतवतीत्यर्थः। रतिकूजितानि यथा **रतिरहस्ये-**

हुङ्कृतिस्तनितकूहुतोत्कृतं फुत्कृतस्वसितरोदनादिकम्।
मुञ्च पीड्य गृहाण जीवय त्राहि हा धिगिति सीत्कृतं विदुः।।५।।
तच्च–लावककपोतकोकिलहंसकेलिविरुतैरुतैरुपक्रमैः।
मिश्रणं प्रहरणं प्रयुज्यतेऽप्यन्यथा विरुतमिष्यते बुधैः, इति।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। पुनः कीदृशी? दयितेति। दयितस्य कृष्णस्य विलोकितेन वीक्षणेन लज्जितहसितं लज्जाहास्यं यस्याः सा। यद्वा, दयितविलोकिते च लज्जिता लज्जावती हास्ययुक्ता चेत्यर्थः। पुरुषायमाणायास्तस्या अधःस्थितस्याङ्गनायमानस्य कृष्णस्य दर्शनेन लज्जा हास्यं च तस्या अभूदिति भावः। लज्जितहसितेत्यत्र प्रथमव्याख्याने नपुंसके भावे क्तः। द्वितीयव्याख्याने लज्जाधातोर्हास्यवाचकस्य धातोश्चाकर्मकत्वात् 'गत्यर्थाकर्मक' (पा.३/४/७२) इत्यादिना क्तः। कीदृशी ? बहुविधं पिकशिखि-कलहंसादीनामिव नानाप्रकारं कूजितं शब्दितं यत्र एतादृशो रतिरसः सुरतरसस्तेन रसिता हृष्टा। यद्वा, बहुविधं नानाप्रकारं पारावतादीनां यत्कूजितं तद्वद्रतिरसे रसितं शब्दितं यस्याः सा। 'रसितं शब्दिते हृष्टे' इति **कोशः**।।५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। दयितेति। दयितविलोकितं सुरतसमये प्रियकर्त्तृकावलोकनं भावे निष्ठा तेन लज्जिता अतएवाचरितं पुरुषायितं वल्लभेन ज्ञातमिति संजातलज्जा। अथवा लज्जिता सलज्जीकृता लज्जतेः कर्म्मणि निष्ठा, अतएव हसिता प्रियेण परिहसिता अतएव कृतकार्य्ये किमिति लज्जितेति कान्तेन हासकर्मणि कृते इत्यर्थः। अथवा दयितविलोकितं प्रियविषयावलोकितं तेन लज्जिता, अथवा दयितेन विलोकिता वीक्षिता अतएव लज्जिता हसिता च उपरि सुरते स्वयमेव प्रवृत्तायामवलोकनमात्रेण कथं लज्जितेति तेन हसितेत्यर्थः। किञ्च बहुविधानि नानाप्रकाराणि यानि कूजितानि कामशास्त्रप्रसिद्ध-कपोतरुतादीनि यस्या सा तथोक्ता तादृशी च सा रतिश्च तत्र रसो अभिलाषः, "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसे" **इत्यमरः**। तेन रसिता संजातरसा रसेन रसिता इत्यत्र

अयं ग्रामः एतै। ब्राह्मणग्रामः कृत इति बहूपपत्तिः। अथवा रतिरसः रतिस्थायिकः श्रृङ्गाररसः तत्र रसिता संजातरसा इत्यर्थः रतिकूजितानि तु **रतिरहस्ये,**

हूंकृति-स्तनित सीत्कोत्कृतं
फुत्कृतश्वसितरोदनादिकम्।
मुञ्च पीडय गृहाण जीवय
त्राहि हा धिगिति सीत्कृतं विदुः।।

तच्च लावुककपोतकोकिलाहंसकेलिविरुतैरुपक्रमैः।
मिश्रितं च ग्रहणं प्रयुज्यते तच्चतद्विरुतमुच्यते बुधैः।।इति।।
और्ध्वमुच्चलितकण्ठनासिका हूंकृत स्तनितमेवघोषवत्।
तच्च विस्फुटनवचस्युत्कृतं फुत्कृतवरदघाति दितं[१]।।इति।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।।पुनः कीदृशी तत्राह। विलोकितमिति भावे क्तः। दयितस्य कृष्णस्य विलोकनेन लज्जितं लज्जा पश्चाद् हसितं हासो यस्याः सा तथा। कथमवस्थितेन कृष्णेन एवं विधं धाष्टर्यं दृष्टमिति लज्जाक्षणं पश्चात् किं मया वञ्चितमित्यभिप्रेत्य हास इत्यवधेयम्। लज्जितहसितेत्यनेन बालालक्षणं दर्शितम्। तदुक्तम्, 'अस्तिभयमस्ति कौतुकमस्ति मन्दाक्षमस्ति चोक्तण्ठा। बालानां प्रणयिनि जने भावः कोऽप्येष अनेकरसः।।' पुनः कीदृशी ? बहुविधमनेकप्रकार' कूजितम् अव्यक्तशब्दो यत्र एतादृशे रतिरसे श्रृङ्गाररसे रसिता हर्षिता रसो जातोऽस्या इति तारकादित्वादितच्। अतएव 'रसितः शब्दिते कृष्टे इति **विश्वः**।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।।(दयितेति।) पुनः कीदृशी ? स्वयं परुषायितमाचरन्त्यधः स्थितस्य दयितस्य वल्लभस्य निरीक्षणेन स्वपुरुषायितविस्मरणेन [१] तदाचरणेन वा यत् हसितं तेन लज्जिता सञ्जातलज्जा। पुनः कीदृशी ? बहुविधं शिखिकलहंसादीनां नानाप्रकारं कूजितं यत्र तादृशेन रतिरसेन क्रीडारसेन रसिता सञ्जातरसा [२] हृष्टेत्यर्थः। [३]एतेन तस्या [४] रसाभिमग्नत्व (मुक्त) मिति भावः। रसितं [५] शब्दितं हृष्टम् इति विश्वः [६]( ?)।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। दयितेति। दयितविलोकितेन कृष्णमुखवीक्षणेन लज्जितं सञ्जातलज्जं सलज्जमित्यर्थः; हसितं हास्यं यस्याः [१४] सा। पुनः [१५] कीदृशी ? बहुविधं पिकशिखि [१६] कलहंसादीनामिव नानाप्रकारं कूजितं यत्र [१७] एतादृशो यो रतिरसः क्रीडारसस्तेन रसिता हृष्टा।।५।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। दयितेति। दयितेन कृष्णेन विलोकितं आलोकनं तेन कज्जिता च सा हसिता च; स्नातानुलिप्त- वत्समासः; पूर्वलज्जिता पश्चाद्धसितेति। बहुविधैः कूजितैः सीत्कारैः रतिरसः सुरतासक्तिः तेन रसिता भाविता।।५।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। दयितेत्यादि। पुनः किंविधा ? विलोकितेति नपुंसके भावे क्तः। दयितस्य विलोकनेन किं वा दयितेन कृष्णेन विलोकिता सती लज्जितहसिता, पूर्वं लज्जिता पश्चाद्धसिता चेति विगृह्य पूर्वकालैकेत्यादिना समासः। अङ्गनायमानस्य हरेरुपरि पुरुषायितायाः युवतेस्तदवलोकनेन उपयुक्तावेव लज्जाहासौ। पुनः किंविधा ? **बहुविधेति**। बहुविधकूजितं दात्यूहपारावतादिसम्भवं बहुविधकूजितमेव रतिरसे रसितं शब्दितं यस्या इति विग्रहः। रस शब्दे इति धातुः। बहुविधकूजितं यथा स्यादेवं रतिरसरसिता सुरतरागानुरक्ता वा। एतेन कृष्णस्य वशीकरणादधिकगुणत्वं सम्यगुत्पादितम्। तथा च रतिसागरे, ''मयूरस्यान्यपुष्टस्य हंसहारीतयोस्तथा। पारावतस्य लावस्य दात्यूहादे रुतानि च।। पततो बदरस्येव जले शब्दायितं भवेत्। वंशस्य स्फुटतो वह्नौ तु रागस्येव ह्रेसि(षि)तम्।। एवं बहुविधान् शब्दान् करोत्यतिमनोहरान्। सुरतोत्सवमासाद्य कामिनो रागवृद्धये।। प्रकारैश्चापरैः कान्ता पुरुषं वशमानयेत्। विशेषतस्तु वारस्त्री कुरुते मुखमैथुनम्।।'' इति।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। ततश्च दयितस्य विलोकितेन वीक्षणेन लज्जिता हसिता च, तथा बहुविधं दात्यूहपारावतादिकूजितवत् रतिरसे रसितं शब्दितं यया सा।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। दयितेति। दयितस्य प्रियस्य विलोकनेन, विशेषावलोकनेन, अननुभूतचरप्रौढरताटोपदर्शनसविस्मयहर्षावलोकनेन इत्यर्थः। लज्जिता, कथमीदृशोद्धते कर्मणि प्रवृत्तास्मि, सर्वं खलु विदितवानसौ मदाचरितमिति सञ्जातलज्जा, ततश्च प्रियसुखतात्पर्योत्साहवशेन हसिता च। किञ्च बहुविधानि यानि कूजितानि, तत्समयोपयुक्तहुंकृतादिध्वनिविशेषाणि, कपोतकोकिलादिकूजितानुकारीणि, तानि यत्र तादृशे रतिरसे रसिता, सञ्जाताभिलाषेत्यर्थः। आस्वाद्यरूपत्वाद्रते रसत्वम्। तत्र विविधरतिकूजितानि कृतवतीत्यर्थः। रतिकूजितानि यथा रतिरहस्ये;

हुंकृतिस्तनितकूहुतोत्कृतं फुत्कृतस्वनितरोदनादिकम्।
मुञ्च पीडय गृहाण जीवय त्राहि हा धिगिति सीत्कृतं विदुः।।

तच्च- ''लावककपोतकोकिलहंसकेलिविरुतैरुपक्रमैः।
मिश्रणं प्रहरणं प्रयुज्यतेऽप्यन्यथाविरुतमिष्यते बुधैः'' इति।।५।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।५।। दयितेति; यदा सा दयितस्य श्रीकृष्णस्य मुखं पश्यति तदा सलज्जहासं करोति। पुनः शृङ्गारलीलाजन्यप्रहारेण सुरतिरसास्वादनदृष्टा सती शब्दं करोति चाष-पारावतशूकमयूरेव वा मधुरध्वनिं करोति। रतिरहस्ये तत् सर्वं कामग्रन्थेषु वहुधा प्रपञ्चितम्।।५।।

हुंकृति स्तनितसीत्कृतो फुत्कृतश्वसितत्कृतंरोदनादिकम्।
मुञ्चपीडय त्राहिं हा धिगिति सीत्कतं विदुः।।
तञ्च- लावककपोत कोकिल हंसकेलि विरतौ रूपकर्मैः।
मिश्रणं प्रहरणं प्रयुज्यतेऽप्यन्यथा विरुतमिष्यतेबुधैः।।
और्ध्वमुच्चलितकण्ठनासिका हूंकृत स्तनितमेवघोषवत्।
तच्च विस्फुटनवचस्युत्कृतं फुत्कृतवरदघाति दित[१]।।इति।।५।।

**६-विपुलपुलकपृथुवेपथुभङ्गा।**
**श्वसितनिमीलितविकसदनङ्गा।। कापि०।।६।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।६।। विपुलः पुलको यस्याः पृथुवेपथुभङ्गो यस्या इति विगुह्य द्वयोः कर्मधारयः। वेगवत्वात् वेपथोर्भङ्गत्वेन निरूपणम्। ''भङ्गस्तरङ्ग उर्मिर्वा'' **इत्यमरः**। वेपथुः कम्प **इत्यमरः** पुनः। कीदृशी श्वसित निमीलित विकसदनङ्गश्वसितेन उपर्य्युपरि निश्वासनिर्गमेन निमीलितेन मुद्रितनेत्रया विकसन्नाविर्भवन्नानङ्गो यस्या इति विग्रहः।।६।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।६।।अपि च, विपुलेति ।विपुला बहवः पुलका रोमाञ्चा यत्र असौ विपुलपुलकः पृथुर्यो वेपथुस्तस्य भङ्गस्तरङ्गो यस्याः, भङ्ग इव भङ्गः । श्वसितनिमीलिताभ्यां विकसन्प्रकटीभवन्ननङ्गः एतल्लक्षणः कामो यस्याः।।६।।

**(३) जगद्धरकृत- सारदीपिका**

।।६।। अत एव विपुलपुलकस्य प्रचुररोमाञ्चस्य पृथु-वेपथोः प्रबलकम्पस्य च भङ्गास्तरङ्गा यस्यां सा । किं च श्वसितं सुरतायासजनितनिःश्वासस्तेन निमीलितः, कियन्मन्दीभूतः, पुनः श्वासोपरमे विकसन् प्रोदबुद्धः अनङ्गः कामो यस्याः सा।

प्रचुरपुरको-त्कम्पव्याजितातिसमृद्धसुरतसञ्जनितप्रखरनिः श्वाससन्ततिमन्थरितविक्रमे मदने, तत्समयोचिताधः स्थितप्रियकृत-व्यापारविशेषाद्विगुणितोत्साह-समुदञ्चितहुङ्का-पूर्वरतिविजृम्भमाणमन्मथाटोप इत्यर्थः। अनेन सुरतावसानसमयः सूचितः।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। पुनः कीदृशी ? विपुलेति। विपुलाः प्रचुरा ये पुलका रोमाञ्चास्तेषां पृथुर्महान्यो वेपथुः कम्पस्तस्य भङ्गस्तरङ्गो यस्याः सा, रोमाञ्चकम्पयोरुत्तरोत्पत्त्या तरङ्गसाम्यम् । 'भङ्गस्तरङ्गे रुग्मेदे भङ्गो जयविपर्यये।' इति **विश्वप्रकाशः** । पुनः कीदृशी ? श्वसितं सुरतायासजनितो निश्वासो निमीलितं परमानन्दावाप्तिजनितं नेत्रनिमीलनं ताभ्यां विकसन्प्रकटीभवन्ननङ्गः कामो यस्याः सा । 'श्वसित-' इत्यनेनानन्दावाप्तिसान्निध्यं कथितम्। तदुक्तं **रतिरहस्ये**; 'मुहुश्च स्वजनाश्लेषः सीत्काराञ्चितलज्जितम् । हुङ्कारोच्छ्वसितं नार्या वीर्यसान्निध्यसूचकम् ।।' इति । 'निमीलित-' इत्यनेन च्युतिकालः कथितः। तदुक्तं तत्रैव; 'मूर्च्छना मीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणम् ।' इति।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। विपुलानां विस्तृतानां पुलकानां रोमाञ्चानां पृथुवेपथोः प्रवलकम्पस्य भङ्गः प्रकारः परम्परा यस्या सा तादृशी अनेन सात्त्विकादय भावाः सूचिताः। तदुक्तम्,

स्तम्भः प्रलयो रोमाञ्चस्बेदो वैवर्ण्यवेपथू।
अश्रुवैस्वर्य्यमित्यष्टौ सात्विकाः परिकीर्त्तिताः।। इति।।

सङ्गे इति क्वचित्पाठः। तदा तैः सङ्गः सम्बन्धो यस्याः सा तादृशी संजातपुलका इत्यर्थः। किञ्च श्वसितेन सुरतवेगजनितनिःश्वासेन मिमीलितस्तिमितस्त-च्छान्तौ विकसन् पुनराविर्भवदनङ्गः कामः यस्याः सा तादृशी, निःश्वाससमये उपरतसुरतव्यापारस्तदपाये पुनरनुसृतव्यापार इत्यर्थः। अनङ्गस्याविर्भावतिरोभावयोः सुरतव्यापारभावैकसमधिगम्यत्वादेव मुक्तमित्यवगन्तव्यम्। श्वसितेन मीलिता मुकुलिताक्षी पुनस्तदपाये विकसिदनङ्गादिना मन्मथेत्यर्थः।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। पुनः कीदृशी तत्राह। विपुलो महान् पुलको रोमाञ्चो यस्याः सा तथा। पृथुः अतिशयितो वेपथुभङ्गः कम्प एव ऊर्मिर्यस्याः सा तथा। तदनन्तरं विपुलपुलका चासौ पृथुवेपथुभङ्गा चेति कर्मधारयः। तदनेन रसातिरेकात् सात्त्विकभावो दर्शितः।

पुनः कीदृशी ? श्वसितं नासावायुः, निमीलितं नयन ङ्कोचः। श्वसितञ्चेति तथा ताभ्यां श्वसितनिमीलिताभ्यां विकसदभिव्यक्ति गच्छन् अनङ्गो यस्याः सा तथा। 'भङ्गस्तरङ्ग ऊर्मि वे'त्यमरः। श्वसितेत्यनेन सान्निध्यस्य लक्षणं दर्शितम्। तदुक्तं रसिकसर्वस्वे; 'मुहुः स्वजघनश्लेषसीत्कारो वीतलज्जता। श्रृङ्गारश्वसितं नार्य्याः च्युतिसान्निध्य-सूचकाः।।' इति। निमीलितेत्यनेन क्रमप्राप्तच्युतिकाललक्षणं सूचितम्। तदुक्तं भारते; 'मूर्च्छना मीलनञ्चैवाक्ष्णोश्चुतिकालस्य लक्षणम्। सर्वमेतत् परिज्ञाय साधयेत्तत् सुखं ततः।।' इति।।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। (विपुलेति।) पुनः कीदृशी ? विपुलं पुलको रोमाञ्चः पृथुर्महान् वेपथुः कम्पस्तस्य भङ्गा [७] स्तरङ्गा [८] यस्यां सा। सुरताम्बुधौ रोमाञ्च [९] कम्पयोस्तरङ्गसाम्यम्। पुनः कीदृशी ? श्वसितः सुरतायासजनितो निःश्वासः; निमीलितं परमाह्लादजनितं [१०] नेत्र ताभ्यां विकसदाविर्भवद [११] नङ्गः कामो यस्याः सा। अन्योऽप्यग्निर्वायुसंसर्गं प्राप्य विकासमेति तद्वदत्रापी (ति) भावः। [१२]निमीलितेत्यनेन च्युतिकालः [१३]सूचितः।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। विपुलेति। पुनः कीदृशी ? विपुलाः बहुलाः पुलकारोमाञ्चा यस्याः सा। [१८]पृथुर्महान् वेपथुः कम्पो भङ्ग [१९]इव तरङ्ग इव यस्याः [२०]; पश्चात्कर्मधारयः। [१] पुनः [२] कीदृशी ? श्वसितं सुरतायासजनितो निःश्वासो निमीलितं [३] परमानन्दावाप्ति-जनितं [४] नेत्रनिमीलनं ताभ्यां विकसन् प्रकटीभवन् अनङ्गः कामो यस्याः सा। निमीलितेत्यनेन [५] रतिकालः [६]सूचितः।।६।।

१.नास्ति-अ.ब.२.दृष्टेत्यर्थः-अ.ब.३.तः.६.पर्यन्तं नास्ति-अ.ब.४.रसनिमग्नत्व-फ.ग.ह.ज.५.शब्दिते हृष्टे-प.ग.ह.ज.७.नास्ति-अ.ब.८.यस्याः सा-फ.ग.ह.ज.९.कम्पस्य-फ.ज.१०.नेत्रं च-फ.ज.११.नास्ति-अ.ब.१२.निमीलितेन-इ.ग.१३.संसूचितः-इ.ग.१४, १५.नास्ति-ड.१६.कलहंससारसादीनामिव-क.१७.तादृशो रतिरसः-क.१८.तः२०.पर्यन्तं नास्ति-क.१९.नास्ति- -ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। विपुलेति। विपुलः पुलकः रोमाञ्चः पृथवः स्थूलाः वेपथवः कम्पाः भङ्गाः यस्याः सा। श्वसितं रतिश्रमेण उच्छ्वसनं निमीलनं नेत्रानुन्मीलनं तेन विकसन् अनङ्गो मन्मथो यस्याः सा। रतिविभावितरोमाञ्चकम्पौ सात्त्विकभावौ सूचितौ।।६।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६।। विपुलेत्यादि। पुन: किंविधा ? विपुला: पुलका यस्या: पृथुर्वेपथुभङ्गो यस्या इति विगृह्य द्वयो: कर्मधारय:। वेगवत्त्वाद् वेपथोर्भङ्गत्वेन रूपणम्। ''भङ्गस्तरङ्ग ऊर्मिर्वा'', ''वेपथु: कम्प:'' इत्यपि। पुन: किंविधा ? श्वसितेति। श्वसितेन उपर्युपरि नि:श्वासनिर्गमनेन निमीलितेन मुद्रितनेत्रा, तया च विकसन्नाविर्भवन्ननङ्गो यस्या इति विग्रह:।।६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६।। अतएव विपुला: पृथुवेपथुश्च तेषां भङ्गास्तरङ्गा यस्या: सा, तथा श्वसितनिमीलिताभ्यां पुनर्विकसन् आविर्भवन् अनङ्गो यस्या: सा।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। अत एव विपुलपुलकस्य प्रचुररोमाञ्चस्य पृथु, वेपथो: प्रबलकम्पस्य च भङ्गास्तरङ्गा यस्यां सा। किं च श्वसितं सुरतायासजनितनि:श्वासस्तेन निमीलित:, कियन्मन्दीभूत:, पुन:श्वासोपरमे विकसन् प्रोद्बुद्ध: अनङ्ग: कामो यस्या: सा। प्रचुरपुलकोत्कम्पव्यञ्जितातिसमृद्धसुरतसञ्जनितप्रखरनि: श्वाससन्ततिमन्थरितविक्रमे मदने, तत्समयोचिताध: स्थितप्रियकृत व्यापारविशेष द्विगुणितोत्साहसमुदञ्चितहुंकार पूर्वरतिविजृम्भमाणमन्मथाटोप इत्यर्थ:।अनेन सुरतावसानसमय: सूचित:।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। विपुलेति; तस्मिन् शृङ्गारक्रीडायां खलु तथा भूता सा तरुणी प्रचुररोमाञ्चिते सति शरीरे कम्पनञ्चानुभूयते। श्वसितनिमीलिताभ्यां विकसन्प्रकटीभवन्ननङ्ग: एतल्लक्षण: कामो यस्या:। चक्षुषि निमील्य दीर्घं दीर्घं खरतरश्वासस्य प्रभावेन किञ्चिद् श्वपितीति कन्दर्प लीलाविलासं मुखरयति विस्तारयति। तत् खलु सुरतायासजनित नि:श्वासो निमीलितं परमानन्दावाप्तिजनितं नेत्रनिमीलनम्। श्वसितादिना तावत् आनन्दस्य प्रकरणम् यथा **रतिरहस्ये**;

मुहुश्च स्वजनाश्लेषे: सीत्काराञ्चितलज्जितम् ।
हुँ कारोच्छ्वसितं नार्या वीर्यसान्निध्यसूचकम् ।।

निमीलित.. इत्यनेन च्युतिकाल: कथित:। तदुक्तं **रतिरहस्ये** च मूर्छना मीलनं चाक्ष्णो श्च्युतिकालस्य लक्षणम् । इति ।।६।।

**७-श्रमजलकणभरसुभगशरीरा।**
**परिपतितोरसि रतिरणधीरा।। कापि० ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। श्रमजलं घर्माम्भ:, श्रमजलकणभरेण सुभगं शरीरं यस्या इति विग्रह:। परिपतितोरसीति अत्यन्तसुरतासहसामर्थ्यात् कृष्णवक्षसि निपतितेत्यर्थ:। रतिरणधीरेति सुरतसंग्रामपण्डितेत्यर्थ:। केचिदत्र रणवीरेति पठित्वा रतिसंग्रामशूरेति व्याचख्यु:। तदसम्यक् परिपतितोरसीतानेन विरोधात्।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, श्रमजलेति। किंभूता ? स्वेदबिन्द्वङ्कितशरीरा। अपि च किंभूता ? उरसि पतिता। अर्थाद्धरे:। रती रण इव रतिरण: तत्र धीरा स्थिरा।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। एतदेव व्यनक्ति, श्रमेति। रतिश्रमोदितजलकणानां स्थूलस्थूलतर स्थूलतमस्वेदबिन्दुसन्दोहानां भरो भरणमतिशय: वा, तेन सुभगं मुक्तफलमण्डली-मण्डितकनकलतिकेव दर्शनीयं शरीरं यस्या: सा। अनन्तरमुरसि, श्रीकृष्णवक्षसि परिपतिता नि:सहतामाच्छादयितुं प्राप्तानन्दमूर्च्छेव सलक्षितेतिभाव:। यतो रतिरणे धीरा, पण्डिता, किं वा रतिरणे मन्दा, श्रीकृष्णापेक्षया कोमलेत्यर्थ:। धीर: पण्डितमन्दयोरिति विश्व:। सर्वमेतत् पूर्वकृतनिजाचरितमन्यस्यांमारोपितवतीति ज्ञेयम्।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। पुन: कीदृशी ? श्रमजलेति। श्रमजलकणेन सुरतायासजनितप्रस्वेदविन्दुसमूहेन सुभगं मनोहरं शरीरं यस्या: सा। त्रुटितहारेऽपि वक्षसि स्वेदबिन्दुभिर्मुक्ताहारशो-भाजननात्सुभगशरीरेति भाव:। पुन: कीदृशी ? उरसि कृष्णस्य वक्षसि परिपतिता। पुन: कीदृशी ? रतिरणे सुरतसंग्रामे धीरा पण्डिता। अनेन सुरतान्तकाल उक्त:। तदुक्तं **रतिरहस्ये**; 'अङ्गे खेद: श्लथत्वं च केशवस्त्रादिसंसृति:। जाते च्युतिसुखे नार्या विरामेच्छा च जायते।।' इति। बन्धश्चायं हंसलीकाख्य:। तदुक्तं **रतिरहस्ये**; 'नारी पादद्वयं दत्त्वा कान्तस्योरुयुगोपरि। कटिमान्दोलयेदाशु बन्धोऽयं हंसलीलक:' इति। 'लवलेशकणाणव:' **इत्यमर:**।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। श्रमेति। श्रमजलकणानामुपरि सुरतखेदजनिति स्वेदोदकविन्दुना भरो भरणमतिशयो वा ''अप्यथातिशयो भरो'' **इत्यमर:**। तेन सुभगं मनोहरं शरीरं यस्या:

सा तथोक्ता श्रमजलकणानां शरीरशोभाहेतुत्वं च मुक्ताफलाकारादवगन्तव्यम्। अनेन चतुर्थ सात्त्विकभावः सूचितः। किञ्च रतिरणे सुरतसंग्रामे धीरा अनपेतधैर्य्यअत्यन्तशूरेत्यर्थः। अथवा रणधियं राति गृह्णातीति तादृशी सुरतसमये पतिचित्तानुमापनादित्यर्थः। उरसि वल्लभवक्षस्थले परिपतिता पतनं गतवति सुरतव्यापारविशेषजनितपारवश्येन तत्र न्यस्ताङ्गदृष्टिरित्यर्थः।। ७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। पुनः कीदृशी तत्राह। श्रमजलकणभरेण विपरीतरतायाः सजलितघर्मकणातिशयेन सुभगं मनोहरं शरीरं यस्याः सा तथा। पुनः कीदृशी ? उरसि अर्थात् कृष्णस्य, परिपतिता सर्वतोभावेन निःसहीभूय पतिता, न तु रतिर्विरतावपि प्रियाश्लेषमपहायान्यत्र गतेत्यर्थः। अतएव रतिरेव रणः संग्रामः, तत्र धीरा पण्डिता। अतएवार्वाचीनानामपि रत्यन्तवर्णनं नाधराद्विगलिताधरपाणिनो बभूव शिथिलो भुजबन्धः कुण्डलादपससार न पाणिः कामकेलिविरतावपि यूनो।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।।(श्रमेति।) पुनः कीदृशी ? सुरतश्रमजलकणभरेणाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा ; इत्यनेन सात्त्विकगुणोदयः सूचितः। पुनः कीदृशी ? सुरतश्रमात् भुजाभ्यां श्रीकृष्णमालिङ्योरसि वक्षःस्थले पतिता; निस्सहत्वं चातुर्येणाच्छादितमिति भावः। [७] कीदृशी ? रतिरणे सुरतसङ्ग्रामे धीराचतुरा कुशला वा स्थिरा मन्दा वा[८]। परिपतितोरसीति हंसलीलाको बन्धश्च कथितः। [९] उक्तञ्च,

नारी पदद्वयं दत्त्वा कान्तस्योरुयुगोपरि।
कटिमान्दोलयेदाशु बन्धोऽयं हंसलीलकः।। इति।

धीरः पण्डितमन्दयोः इति **विश्वः** (?)। सुभगस्सुन्दरश्च इति **विश्वः** (?)। लवलेशकणाणवः [१०] **इत्यमरः** (३.१.६२)।।७।।

१.,२.नास्ति-ड.३.परमानन्देन-.४.नेत्रनिमीलितं-ड.५.च्युतिकालः-क.ल.म.६.सूचित इति भावः-क.७.तः८.पर्यन्तं नास्ति-अ.ब.९.नास्ति-अ.ब.इ.फ.ह.ज.१०.इत्यर्थः-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।।श्रमेति। [१] पुनः [२] कीदृशी ? श्रमजलकणभरेण सुरतायासघर्मजलबिन्द्वाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा। एतेन सात्त्विकभावोत्पत्तिः सूचिता। सात्त्विकभावाः पूर्वमुक्ताः। पुनः [३] कीदृशी ? उरसि वक्षः स्थले परिपतिता वक्षः स्थलं व्याप्य स्थिता; रतिः सुरतं रण इव तत्र धीरा कुशला।।७।।

### (९) कृष्ण पण्डितकृत- जयन्ती

।।७।।श्रमेति। श्रमजलस्य स्वेदस्य कणानां भरेण सुभगं सुन्दरं शरीरं यस्याः सा। उरसि प्रियवक्षसि परिपतिता। रतिरेव रणः युद्धं तत्र धीरा अचञ्चला। रतान्तवर्णनमिदम्। स्वेदोऽनुभावः।।७।।

### (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।।श्रमजलेत्यादि। पुनः किंविधा? श्रमः सुरतायासस्तत्सम्बन्धिजलकणानां भरेण अतिशयेन सुभगशरीरं यस्या इति विग्रहः। पुनः किंविधा? परिपतितोरसीति। अत्यन्तसुरतासक्तत्वासामर्थ्यात् कृष्णवक्षसि परि सर्वतोभावेन पतितेत्यर्थः। पुनः किंविधा? रतिरणधीरेति। सुरतसङ्ग्रामे पण्डितेत्यर्थः। रतिरणवीरेति पाठे, रतिसङ्ग्रामसमर्थेत्यर्थः। रणे वीरस्य पतनम् उचितमित्यपि सूचितं भवति।।७।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। तथा श्रमजलकणभरेण सुन्दरं कलेवरं यस्याः सा तथा निःसहता विस्मृतस्वाङ्गानुसंधानतया प्रियस्य वक्षसि परिपतिता यतः सुरत संग्रामे पण्डिता।।७।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।।एतदेव व्यनक्ति, श्रमेति। रतिश्रमोदितजलकणानां स्थूलस्थूलतरस्थूलतमस्वेद-बिन्दुसन्दोहानां भरो भरणमतिशयः वा, तेन सुभगं मुक्ताफलमण्डलीमण्डित-कनकलतिकेव दर्शनीयं शरीरं यस्याः सा। अनन्तरमुरसि, श्रीकृष्णवक्षसि परिपतिता निःसहतामाच्छादयितुं प्राप्तानन्दमूर्च्छेव संलक्षितेति भावः। यतो रतिरणे धीरा, पण्डिता, किं वा रतिरणे मन्दा, श्रीकृष्णापेक्षया कोमलेत्यर्थः। धीरः पण्डितमन्दयोरिति **विश्वः**। सर्वमेतत् पूर्वकृतनिजाचरितमन्यस्यामारोपितवतीति ज्ञेयम्।।७।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।।श्रमजलेति; तस्याः तरुण्याः शरीरमित्थं शृङ्गाररसभरेण श्रमजलस्य नाम घर्मस्य प्लावनं भवति। तेन तस्याः शरीरं सुभगं मनोरमं भाति। सा खलु रतिरणे शृङ्गारसंग्रामे पण्डिता पत्या उरसि वक्षसि पतिता स्वस्य स्थितिं विस्मरति।।७।।

**८-श्रीजयदेवभणितहरिरमितम्।**
**कलिकलुषं जनयतु परिशमितम्।। कापि०।।८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। श्रीजयदेवेन भणितं हरिरमितं कर्त्तु कलिकलुषं परिशमितं जनयतु। कलिकालपापं विनाशयतु सुखयत्विति यावत् हरिरमितमिति विग्रहः। कर्मणि षष्ठीयं

न कर्त्तृषष्ठी। विशङ्कमाना रमितं कयापि जनार्द्दनमित्युक्तेः हरेः प्रयोजकतानुपपत्तेः। गीतं श्लोकानामवतारयति।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। श्रीति। इदं श्रीजयदेवभणितं विपरीतरताभि (योग) क्रीडितं कलिकलुषं परिशमितं जनयत्विति शान्तिं नयतु। तथात्र **सङ्गीतराजे**, "श्रीरागो यत्र रागः स्यात्तालस्तु द्रुतमण्ठकः। वर्णनं वासुदेवस्य रतिस्ताद्व्यत्यये स्त्रियाः। पदेभ्यः पाटसन्तानं स्वरास्तेनास्तथैव च। प्रयोगश्च भवेद्यत्र स प्रबन्धवरः स्मृतः।"। हरिरमितचम्पक-वर्णेभ्यः शेखराभिधः' इति। हरिरमितचम्पकशेखरनामा चतुर्दशः प्रबन्धः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीति।श्रीभक्तिसम्पत्तिस्तद्युक्तेन जयदेवेन भणितां वर्णितं हरिरमितं हरत्यविद्यां तत्कार्यमतो हरिरिति स्मृत इति विवेचनीयस्य श्रीकृष्णस्य रमितं श्रीराधिकोत्प्रेक्षितं क्रीडितं यत्र तादृशं गीतमित्यर्थः। कलिकलुषं कलिसम्पादितकामादिवासनात्मक-भक्तिविघातककल्मषं परिशमितं परितः साकल्येन शमितं जनयतु। तं नाशयतु इत्यर्थः। एतच्छ्रवणादिपराणामिति शेषः। तथा चोक्तं **श्रीमद्भागवते,**

विक्रीडितं व्रजवधूभिरिदं च विष्णोः,
श्रद्धान्वितोऽनुश्रृणुयादथ वर्णयेद्यः।
भक्तिं परा भगवति प्रतिलब्धकाम,
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः।। इति।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।।श्रीजयदेवेति।श्रीजयदेवेन भणितं कथितं यद्धरेः कृष्णस्य रतिरमितं क्रीडितं कलेः कलियुगस्य कलुषं पापमर्थाच्छ्रोतृणां पाठकानां च परिशमितं जनयतु नष्टं करोतु।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति।श्रीजयदेवेन भणितं गदितं हरेः।श्रीकृन्णस्य रमितं क्रीडितं यत्र तादृशं गीतं कर्त्तु कलौ यत्कलुषं जनानां पाप तत्परिशमितं निवृत्तिं जनयतु करोतु। हरिक्रीडावर्णनात्मकमिदं गीतं गातृणां श्रोतृणां च सकलकलुषमपनयतु इत्यर्थः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।।कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति।श्रीजयदेवभणितं कर्तृ कलिकलुषं कलियुगोत्पन्नप्रत्यवायं परिशमितं जनयतु गायतां श्रृण्वताञ्चेत्यर्थात्।

कीदृशम्? अतिललितं तालगानशुद्धत्वेनात्यन्तमनोहरमित्यर्थः। 'कलहे च युगे कलिरिति **धरणिः**। 'कलुषं वृजिमैनोघमि'**त्यमरः**।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।।श्रीराधावर्णितं हरिरमितं सर्वजनपावनत्वेन निरूपयन् प्रार्थयतेश्रीजयदेवेति। श्रिया युक्तेन जयदेवेन भणितं कथितं यद्धरेः रमितं विपरीतरतौ क्रीडितं तत्कलेः कलुषं वासनात्मकं परदारादिरूपं वा भक्त्यन्तरायरूपं वा पापं परिशमितं सर्वशान्तिं जनयतु करोति। अन्यत्रौपचारिकं[४] रमणं[५] श्रीराधायां पारमार्थिकमिति [६] ध्वनि।।८।।

[७]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां चतुर्दशः प्रबन्धः।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। [८]श्रीजयदेवेति। श्रीजयदेवेन भणितं उक्तं, [९]वर्णितमिति भावः हरिरमितं [१०]कृष्णसम्भोगः कलिकलुषं कलियुगपापं शमयतु। कीदृशं हरिरमितम्? अतिललितं [११] मनोहरम्।।८।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां चतुर्दशः प्रबन्धः।।

१,२.नास्ति-क.३.नास्ति-ड.क.४.नास्ति-ग.५.श्रीराधाया-इ.फ.ग.६.भावः-इ.फ.ग.ह.ज. ७.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.८.नास्ति-ल.म.९.वर्णितमित्यर्थः-क.ल.म.१०.कृष्णभोग-क.११.मनोज्ञम्-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।।श्रीजयदेवेति।श्री जयदेवेन भणितं रमितं श्रीकृष्णसुरतं कलिकलुषं चरमयुगपापं परिशमितं शान्तं जनयतु। पापं नाशयत्वित्यर्थः।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां चतुर्दशः प्रबन्धः।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेति। श्रीजयदेवेन भणितं च तत् हरिरमितं चेति कर्मधारयः। तत्कर्तृ कलिकलुषं परिशमितं जनयतु कलिकालपापं विनाशयत्विति यावत्। हरिरमितमिति कर्मणि षष्ठीयम्, न कर्तृषष्ठी। विशङ्कमाना रमितं कयापि जनार्दनमित्युक्तेः हरेः प्रयोजकतानुपपत्तेः।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।।श्रीजयदेवभणितं हरे: रमितं विक्रीड़ितं कलिकलुषं कामादिकं शमितं जनयतु नाशयतु इत्यर्थ:। एतत् सर्वं स्वस्यां तत्पूर्वाचरितस्फूर्त्त्यार्त्तिजया ईर्ष्यया अन्यत्रारोपितमिति ज्ञेयम्।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। श्रीति। श्रीभक्तिसम्पत्तिस्तद् युक्तेन जयदेवेन भणितं वर्णितं हरिरमितं हरत्यविद्यां तत्कार्यमतो हरिरिति स्मृत इति विवेचनीयस्य श्रीकृष्णस्य रमितं श्रीराधिकोत्प्रेक्षितं क्रीडितं यत्र तादृशं गीतमित्यर्थ:। कलिकलुषं कलिसम्पादितकामादिवासनात्मकभक्तिविघातककल्मषं परिशमितं परित: साकल्येन शमितं जनयतु। तं नाशयतु इत्यर्थ:। एतच्छ्रवणादिपराणामिति शेष:। तथा चोक्तं **श्रीमद्भागवते ;**

विक्रीडितं व्रजवधूभिरिदं च विष्णो:,
श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् य।
भक्तिं परां भगवति प्रतिलब्धकामं,
हृद्रोगमाश्वपहिनोत्यचिरेण धीर:।। इति।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्रीजयदेवेति; श्रीजयदेव: एवम्भूतस्य हरे: रमणं वर्णयति। तत् खलु श्रुत्वा कलिकालस्य पापं दुरितं वा शामयतु।।८।।

**४३-विरहपाण्डुमुरारिमुखाम्बुजद्युतिरियं तिरयन्नपि चेतनाम्।**
**विधुरतीव तनोति मनोभुव: सुहृदये हृदये मदनव्यथाम्।।४३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४३।। चेतनां तिरयन धैर्य्यहेतुविबेकवुद्धिमपि तिरयन् आच्छादयन् सन्तप्तानां देवानां तिरयन्नपि बिधुरयं मम मदनव्यथां तनोतीत्याशय:। कामो मम वैरी उल्लंघितशासनत्वात्। तस्यासं चन्द्र: सौहार्द्दादुपकर्त्तृ कामो मय्यागं विधत्ते। यदुक्तम् ''आत्मवर्गहितमिच्छति सर्व इति।'' किं प्रकारेण कामव्यथां तनोतीत्याह। विरह पाण्डुमुरारिमुखाम्वुजद्युतिरिति। मुरारे सहजकृष्णत्वात्, पाण्डुत्वनिर्वाहार्थं विरहेत्युक्यं मुरारि-मुखस्मारकतया पीडयतीत्यर्थ:। अप्राप्य हि द्रव्यं सततं स्मर्य्यमाणं मनोव्यथां जनयतीत्यभिप्राय:। तिरयन्नतिखण्डयन्नित्यर्थ:। तिर: शब्दात् करोत्यर्थेणिच्।

''तिरोऽन्तर्द्धौतिर्य्यगर्थे**त्यमरः**।'' अस्योपमा,

उदितोऽयं च शुभ्रांशुः विस्तीर्य्य किरणामृतम्।
संयोगदुःखसंजातं दहत्येव वियोगिनम्।। द्रुतबिलम्बितं नाम वृत्तम्।।४३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४३।। इदानीं विरहातुराराधा चन्द्रमुद्दिश्याह; विरहेति। 'अये' कोमलामन्त्रणे। हे सखि! अयं विधुः हृदये अर्थात् मम अतिमदनव्यथां तनोति। किंभूतः? मनोभुवः मदनस्य सुहृन्मित्रम्। मुरारेर्विरहावस्थास्मरणेनाह। किंभूतः? विरहेण पाण्डु यन्मुरारिमुखाम्बुजं तस्य द्युतिरिव द्युतिर्यस्य। अत एव वेदनां तिरयन्नपि आच्छादयन्नपि। एतदुक्तं भवति, पूर्वं मदीयविरहपाण्डुमुरारिमुखकान्तिमत्त्वेन मम वेदनां नाशयन्नपि कामसुहृत्त्वेन वेदनां करोत्येव। तदप्राप्त्यापि मदपेक्षया तस्य स्थितत्वाद्दुःखं नाभूत्, सांप्रतमन्यासक्त्तं तं ज्ञात्वा मया स्थातुं न शक्यत इति भावः। द्रुतविलम्बितं वृत्तम्।।४३।।

## (३) जगद्धरकृत- सारदीपिका

।।४३।। एवं तत् किं कामपि कामिनीमभिलृत इत्यनेन उपक्षिप्तं प्रथमपक्षमुपपाद्य पुरः प्रोजृम्भमाणविधुमण्डलावलोकनेन पुनरासादितभावान्तरा क्लान्तमना इति सम्भावितमपक्षमनुसन्दधाना प्राह विरहेति। अये! इति पुरःस्थितसखीसम्बोधनाय उपक्रम्य किमर्थमेतां मदर्थानुभूतबहुकदर्थानां विषादवचनेन पुनरायायासयामि, किं वा कुर्यात् इयं क्षीणोपायेति विमृश्य विशिष्य सम्बोधनम्। अये! अतिकष्टमिति वा। अये कोपे विषादे च सम्बुधौ स्मरणेऽपि च, इति विश्वः। अयं विधुश्चन्द्रो मद्विरहेण, पाण्डुवर्ण यन्मुरारिमुखाम्बुजं तस्य द्युतिरिव द्युतिः कान्तिर्यस्य तादृशः सन् वेदनां, तदन्यासङ्गशङ्काख्यां माम तिरयन्नपि, तिरस्कुर्वन्नपि, हृदये, मदनसम्बन्धिनीं मदनाभिमतां वा व्यथामतीव तनोति। अत्यन्तं विस्तारयति। उत्तराधिक्येन विपुलीकरोतीत्यर्थः। कुत एवं करोति, यतोऽयं मनोभुवः, हृदयात् सम्भूय हृदयमेव द्वेष्टि। इत्येवं महाक्रूरस्य[११] कामस्यसुहृत्, मित्रं पुनः प्रथमतर्कविनिश्चयेन, यथा राजा भटा इति तस्य मित्रत्वमाविष्कर्तुं मद्विरहविवर्णप्रियमुखसरोजं स्मारयित्वा तदन्यासक्तिचित्तसम्भावं दुखं हृदयादपाकृत्य सौहृदं प्रदर्शयन्नपि दुःसहां दुरन्तव्यथामातन्वन् मां कदर्थयतीतिभावः। विरोधालङ्कारः।।४३।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४३।। संप्रति चन्द्रोऽप्ययमधिकतरं व्यथयतीत्याह; विरहेति। 'अये' इति विषादे। अयं दृश्यमानश्चन्द्रो मम हृदये मदनव्यथां कामपीडां तावदधिकं यथा स्यादेवं तनोति

विस्तारयति। कीदृशः? विरहेण मद्विश्लेषेण पाण्डु धूसरं यन्मुरारेः कृष्णस्य मुखाम्बुजमाननपद्मं तद्वद्द्युयुतिर्यस्य सः। तथा च, तादृशकृष्णमुखाम्बुजसदृश- चन्द्रदर्शने कृष्णमुखाम्बुजस्य स्मरणादतिव्यथा जायत इति भावः। किं कुर्वन्? वेदनामपि तिरयंस्तिरोहितां कुर्वन्। तथा च, चन्द्रदर्शनेन तथा विवेकोन्मूलनं भवति यथा कृष्णमुपायेन कृतापराधमपि तमेव मनः स्मरतीति भावः। व्यथाजनकत्वे हेतुमाह, मनोभुव इति। मनोभुवः कामस्य सुहृन्मित्रम्। तथा च निकटस्थितस्यापि कृष्णस्यानुसरणं मया न कृतमिति मदनाज्ञालङ्घनात्कामो मे वैरी जातः। सख्युस्तस्य साहाय्यं चिकीर्षता चन्द्रेणापि व्यथा जन्यत इति भावः। चन्द्रस्य कृष्णमनोजन्यत्वेन कामस्य मनसिजत्वेनैव प्रसिद्धेः। सोदरत्वेन कामचन्द्रयोः सौहार्दाच्च 'मनोभव'पदेन कामस्योपादानम्। तथा च **श्रुतिः** 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।' इति। 'वेदना ज्ञानदुःखयोः। भये क्रोधे विषादे च संभ्रमे स्मरणेऽपि च' इति **विश्वः**। 'तिरोऽन्तर्धौ तिर्यगर्थे' इति च।।४३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४३।। एवं श्रीकृष्णेऽन्यासर्कित प्रकल्प्य तत्समये भासमानं चन्द्रमवलोक्य सुहृदि निवेदितं दुःखं निवृत्तप्रायमितिन्यायं मनसि निधाय चन्द्रकृतां पीडां सख्यै निवेदयति। विरहेति। अये! सखि! अयं परिदृश्यमानो बिधुश्चन्द्रः विरहेण मद्वियोगेन पाण्डु शुभ्रं यन्मुरारिमुखाम्बुजं श्रीकृष्णवदनारविन्दं तस्य द्युतिः कान्तिरिव कान्तिर्यस्य तादृशः सन् वेदनां श्रीकृष्णवियोगदुःखं तिरयन् तिरस्कुर्वन्नपि विरहपाण्हुरश्रीकृष्णमुख-सादृश्यत्वेन तन्मुखावलोकनजनितसुखसम्पादनद्वारा तद्विरहपरितापं निराकुर्वन्न-पीत्यर्थः। अयमेव बिधुः मनोभुवः कामदेवस्य सुहृन्मित्रं सन् हृदये मम मनसि मदनव्यथां वियोगकाले मदननिष्पादणीयां पीडामतीवत्यन्तं तनोति। यस्तु श्रीकृष्णमुखसदृशत्वेन सुखजनकः स एव विधुस्तदानीमेव दुष्टमदनमित्रत्वेन यथा राजा तथा भट इति न्यायेन तत्कार्य्यां पीडां स्वयमेव करोतीत्यर्थः। पश्येति वाक्यशेः। तिरयन्नित्यत्र तिरस्कारवाचकः तिरः शब्दात् तत्करोतीति णिचि ताविष्ठावदितीष्ठवद्भावाट्टिलोपे लट् तस्य शत्रादेशः। विरोधालङ्कारः व्याघातो वा।।४३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४३।। चन्द्रकिरणमसहमानः निजान्तस्तापमावेदयति। अये इति विषादे सखीसम्बोधने वा। अयम्विधुश्चन्द्रः हृदयेऽर्थात् मम, अतीव मदनव्यथां मदनकर्त्तव्यतां तनोति विस्तारयति। अत्र हेतुगर्भविशेषणमाह-कीदृशः मनोभूवः? कामस्य सुहृत्

सखा ।अन्योऽपि यस्य सखा स तत्कर्त्तव्यम्पल्लवयतीत्युचितमेव। पुनः कीदृशः ? विरहेण पाण्डोः धूसरस्य मुरारिमुखाब्जस्य द्युतिरिव द्युतियस्य एतादृशः। अतएव मदीयां वेदना पोडाम् तादृशमुरारिमुखाब्जस्मरणजनितसुखेन तिरयन्नाच्छादयन्नपि। अत्र स्थले कलावच्छेदेन वेदनातिरोधानजननयो-रुपपत्तिरिति नोभयत्र समानकालत्व, विरोधः। 'अये कोपे विषादे च सम्बुद्धौ स्मरणेऽपि चे'ति **विश्वः**। अत्र रूपकानामालङ्कारः यमकोऽपि। तथा च दण्डी, 'एकाद्वित्रिचतुष्पादैर्यमकानां विकल्पना।* आदिमध्यान्त-मध्यान्तमध्याद्यद्यन्तसर्वतः।।' इति।।४३।।

+'चतुष्पादयमकानां विकल्पनाः' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४३।। चन्द्रदर्शनक्लेशेन सखीं [१] प्रत्यूचे, विरहेति।[२] अये इति खेदे [३]। [४] अयं विधुश्चन्द्रो मम हृदये सुहृदिव श्रीकृष्ण इव [५] अतीव मदनव्यथां तनोति अति कामपीडां विस्तारयति। कीदृशः ? मनोभुवः कामस्य सुहृन्मित्रम्। [६] अथ वा [७] मदनस्य व्यथां करोति मम [८] का वार्ता इति भावः। कीदृशः ? विरहेण वियोगेन पाण्डुमुरारिमुखाम्बुज [९] सदृशद्युतिः समानकान्तिः। कीदृशः ? वेदनां ज्ञानं तिरयन्नपि हरन्नपि। वेदना ज्ञानदुःखयोः इति विश्वः(७१.१३४)। [१०] अये क्रोधे विषादे च सम्बुद्धौ स्मरणे च इति **विश्वः** [११](?)। तिरोऽन्तर्धौ तिर्यगर्थे [१२] **इत्यमरः** (३.४.२५६)। विधुः सुधांशश्शुभ्रांशुरो [१३] निशापतिः **इत्यमरः**(१.३.१४) पीडा बाधा व्यथा दुःखम् **इत्यमरः** (१.१०.३०)।।४३।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४३।। विरहेति। अये सखि! चन्द्रदर्शनविषादेन सखीं प्रति ब्रूते। [१५] अयं विधुश्चन्द्रः मम हृदये मदनव्यथां कामपीडां [१६] अतीवाधिक्येन तनोति [१७] विस्तारयति। उद्दीपकविभावत्वात्। कीदृशो विधुः ? विरहेण वियोगेन पाण्डु [१८] यत् मुरारिमुखाम्बुजं कृष्णमुखकमलं तद्वत् द्युतिः शोभा यस्य सः। पुनः कीदृशः ? वेदनामपि ज्ञानमपि तिरयन्नाच्छादयन्। पुनः कीदृशः ? मनोभवः कामस्य सुहृन्मित्रम्।।४३।।

१.प्रति ब्रूते-इ.फ.ग.ह.ज.२.तः ३.पर्यन्तं नास्ति-अ.ब.४. अये-इ. ५.अतिमदनव्यथां-इ.फ.ग.ह.ज.६.यद्वा-ग.७.मदनव्यथां-अ.ब.८.कामो वर्वर्ति-अ.ब.९.सद्युतिः-ग.१०.तः ११.पर्यन्तं नास्ति-अ.ब.१२.इति च-ग.१३.,१४.नास्ति-इ.फ.ग.ह.ज.१५.अये-ल.म.१६.अतीवात्यर्थेन-क.ल.म.१७.विस्तारयति उद्दीपयति उद्दीपिकभावत्वात्-म.१८.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४३।। पुनरपि राधिका प्राह-विरहेति। अये सखि! विरहतीति विरहः तेन पाण्डु ईषद्रक्तश्वेतं मुरारेः मुखाम्बुजस्य द्युतिरिव द्युतिर्यस्य सः। अत एव वेदनां तिरयन्

नाशयन्। मुरारिमुखसाम्यादस्यालोक ने वेदनाशान्तिरिति भावः। तादृशः सन्नपि मनसि भवतीति मनोभूः तस्य सुहृत् अयं पुरोवर्ती विधुः मम हृदये शरीरे च मदनव्यथां कामपीडां अतीव तनोति सुहृदय इति पाठे अये इति च्छेदः। अये दूति! शृणुष्वेति भावः प्रतीपालङ्कारः। अनुप्रासेन संसृष्टिः। अत्र मनोभू सुहृदपि मन्मथव्यथां करो(ती) ति विरोधः। मम तज्जनितबाधां करो(ती) ति परिहारः। द्रुतविलम्बितं वृत्तम्।।४३।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४३।। विरहेति। अये इति विषादे। ''अये कोपे विषादे च दुःखे चामन्त्रणेऽपि च'' इति विश्वः। अयं विधुश्चन्द्रः वेदनां तिरयन्नपि मम हृदये मदनव्यथां मदनजनितपीडाम् अतीव तनोति अतितरां विस्तारयतीति योजना। तिरयन्निति खण्डयन्नित्यर्थः। तिरःशब्दात् करोत्यर्थे णिच्। ''तिरोऽन्तर्धौ तिर्यगर्थे'' इति विश्वः। ''वेदना ज्ञानदुःखयोः'' इति विश्वः। ननु चन्द्रेण सह तव वैरं नास्ति तत्कथं त्वां पीडयतीत्याहमनोभुव इति। कामस्य सुहृदिति। अयमत्राशयः कामो मम वैरी उल्लङ्घित-शासनत्वात् तस्यायं चन्द्रः सौहार्द्धादुपकर्तुं कामो(चन्द्रो) मत्पीडां विधत्ते। यदुक्तम् , ''आत्मवर्गहितमिच्छति सर्वं'' इति। किंप्रकारेण कामव्यथाम् अतीव तनोतीत्याहविरह-पाण्डुरमुरारिमुखाम्बुजद्युतिरिति। विरहेण पाण्डुरीभूतस्य मुरारेर्मुखपद्मस्येव द्युतिः शोभा यस्येति विग्रहः। यद्यपि अम्बुजचन्द्रयोर्विरोधात् उपमानं न घटते तथापि मुखमम्बुजमिवेति उपमासमासे पूर्वपदार्थप्राधान्यात् न दोषः। मुरारेः सहजकृष्णत्वात् पाण्डुत्वनिर्वाहर्थं विरहे इत्युक्तम्। मुरारिमुखस्मारकतया कामपीडां तनोतीत्यर्थः। अप्राप्यं हि द्रव्यं सन्त(त)तं स्मर्यमाणं मनोव्यथां जनयतीत्यभिप्रायः। वस्तुतस्तु विरहितापकरत्वात् चन्द्रः पीडां वर्धयतीत्यर्थः। अन्येषां सन्तापशालिनां वेदनां तिरयन्नपि मम व्यथां करोतीति अपिशब्दाविरोधः। यद्वा वेदनातिरस्करणे हेतुप्रकटनार्थं विरहेत्यादिना विशेषणेन विधुं विशिनष्टि। तदा(द)यमभिप्रायः। मुरारिमुख-सादृश्यान्मदीयां वेदनां खण्डयन्नपि।।४३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४३।। अथचन्द्रं पश्यन्ती तं श्रीकृष्णमुखत्वेनोद्भाव्य तत्र अन्यया सह वर्त्तमानस्यापि मद्विरहेण पाण्डुत्वस्फूर्त्त्या स्वस्मिन् तस्यातिप्रणयितां स्मरन्ती चन्द्रमाक्षिपति विरहेति। अयं विधुः सन्तप्तानां वेद्नां तिरयन् नाशयन्नपि मम हृदये आये खेदे मदनव्यथाम् अतीव तनोति। पाण्डुवन्मुरारिमुखाम्वुजं तद्वत् द्युतिर्यस्य सः वेदनां नाशयन्नपि। कुतस्तां व्यथयति? मनोभुवः सुहृत् मदनस्तत्र तं व्यथयति। मदनसुहृत्त्वेन तन्मुखस्मारकतया चन्द्रो मां व्यथयतीत्यभिप्रायः। 'अये कोपे विषादे च' इति विश्वः।।४९।।

**( १२ ) लक्ष्मणकृत- रसिकरङ्गदा**

।।४३।। एवं तत् किं कामपि कामिनीमभिसृत इत्यनेन उपक्षिप्तं प्रथमपक्षमुपपाद्य पुरः प्रोजृम्भमाणविधुमण्डलावलोकनेन पुनरासादितभावान्तरा क्लान्तमना इति सम्भावितमन्तिमपक्षमनुसंदधाना प्राह, विरहेति। अये! इति पुरःस्थितसखीसम्बोधनाय उपक्रम्य किमर्थमेतां मदर्थानुभूतबहुकदर्थनां विषादवचनेन पुनरायासयामि, किं वा कुर्यात् इयं क्षीणोपायेति विमृश्य विशिष्य सम्बोधनम्। अये! अतिकष्टमिति वा। 'अये कोपे विषादे च सम्बुधौ स्मरणेऽपि च' इति **विश्वः**। अयं विधुश्चन्द्रो मद्विरहेण, पाण्डुवर्णं यन्मुरारिमुखाम्बुजं तस्य द्युतिरिव द्युतिः कान्तिर्यस्य तादृशः सन् वेदनां, तदन्यासङ्गशङ्काख्यां मम तिरयन्नपि, तिरस्कुर्वन्नपि, हृदये, मदनसम्बन्धिनीं मदनाभिमतां वा व्यथामतीव तनोति। अत्यन्तं विस्तारयति। उत्तराधिक्येन विपुलीकरोतीत्यर्थः। कुत एवं करोति, यतोऽयं मनोभुवः, हृदयात् सम्भूय हृदयमेव द्वेष्टि। इत्येवं महाक्रूरस्य कामस्य सुहृत्, मित्रं पुनः प्रथमतर्कविनिश्चयेन, यथा राजा तथा भटा इति तस्य मित्रत्वमाविष्कर्तुं मद्विरहविवर्णप्रियमुखसरोजं स्मारयित्वा तदन्यासक्तिचित्तसम्भवं दुःखं हृदयादपाकृत्य सौहृदं प्रदर्शयन्नपि दुःसहां दुरन्तव्यथामातन्वन् मां कदर्थयतीति भावः। विरोधालङ्कारः।।४३।।

**( १३ ) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।४३।। विरहपाण्डु; विधुस्तावत् मां पीडयित्वा इदानीमस्ताचलं गच्छति। तस्य तीव्रलेखा विरहिजनान् पीडयित्वा इदानीमस्ताचलचूडावलम्बना इन्दोः मुखं म्लानायते तस्य तेजः। तदवलोक्य श्रीराधा श्रीकृष्णस्य श्रृङ्गारजन्यम्लानमुखे स्मृत्वा कामपीडया हृदये महती व्यथामनुभवति। द्रुतविलम्बित च्छन्दः।। ४३।।

।। पञ्चदशः प्रबन्धः / गीतम् १५।।

।। गुर्जरीराग एकतालाभ्यां गीयते।।

**१-समुदितमदने रमणीवदने चुम्बनवलिताधरे।**
**मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे।।**
**रमते यमुनापुलिनवने विजयी मुरारिरधुना।। ध्रुवम् ।।१।।**

**( १ ) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१।। कापि मधुरिपुणा विलसतीति प्रागुक्तं, सम्प्रति तद्गतचित्तो मधुरिपुस्तदङ्गानि मण्ड़यन् क्रीडतीति प्रतिपादयन्नाह। गुज्जरीरागेण गीयते रूपकताले। समुदितेति।

यमुना पुलिनवने मुरारिरधुना रमत इति वाक्यार्थः। ''तोयोत्थितं तत्पुलिनमित्यमरः।'' निर्ज्जनता प्रतिपादनार्थमत्र वनशब्दोपादानम् निःशङ्ककेलिर्न पराङ्गनासु इत्युक्ते मुरारिविशेषणमाह। विजयीति त्रिभुवनजयिनः कुतः परजनशङ्केत्यभिप्रायः। रमणे प्रकारमाह। समुदितेत्यादि। रमणी वदने सपुलकं यथा स्यादेवं मृगमदतिलकं लिखतीति योजना। कस्मिन् किमिवेत्याह। मृगमिव रजनीकर इत्यत्र वदनस्य चन्द्रेण मृगमदतिलकस्य मृगेण साम्यम्। उभयस्मिन् किंभूते, समुदितमदने, वदनपक्षे समुदितो मदनो यत्र इति विग्रहः। चन्द्रपक्षे समुदितो मदनो यस्मात् इति वा, पुनः कीदृशे, चुम्बनबलिताधरे, मदनपक्षे तिलकं लिखित्वा साध्विदं वदनमित्युक्त्वा चुम्बनाय वलितो बिन्यस्तोऽधरो यत्रेति विग्रहः। चन्द्रपक्षे चुम्बनेन बलितो युक्तोऽधरो यस्मादिति विग्रहः। चन्द्रोदये कामोद्दीपनादित्यभिप्रायः।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। इदानीं राधा विह्वलिते मनसि तत्स्वरूपमेव निरूपयति, अत्र पूर्वं ध्रुवपदम्। रमत इति। अधुना मुरारिर्यमुनापुलिनवने रमते अत्र 'मुरारि'पदं कामुकस्य कार्कश्येन रत्यभावं द्योतयति। किंभूतः ? विजयी मां पराभूय जयवान्। इति ध्रुवः। अथ पद्यानि। तमेव रमणप्रकारमाह समुदितेति। रमणीवदने मृगमदतिलकं कस्तूरीतिलकं लिखति। रमतेऽस्यामिति रमणी। लिखिरत्र लेखनसामान्याद्विन्यासे वर्तते। किंभूते वदने ? अत एव सम्यगुदितः कामो यतः। पुनः किंभूते ? सतिलकं मुखमुद्वीक्ष्य दीप्तस्मरत्वात्सपुलकं यथा भवति तथा चुम्बना द्वलितः संभक्तोऽधरो यत्र। कस्मिन्क इव ? रजनीकरे मृग इव। पूर्णचन्द्रनिभे मुखे कस्तूरीतिलकेन राधानिःश्वासैककाश्मल्यं द्योत्यते। अत्र 'रजनीकर' ग्रहणेन तयोः क्षणरागित्वं द्योत्यते।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। पुनः प्रथमवितर्कविनिश्चयेन निजस्वाधीनप्रेयसीभावसौभाग्यं तस्यामेवारोपयन्ती तद्विनोदवृत्तान्तं दृष्टवत् प्राह, समुदितेत्यादिना गीतेन। मुरारिः पुरा प्रसिद्धासुरनिर्घाते नाप्यसाधितशौर्यकीर्त्तिः श्रीकृष्णः अधुना विजयी। अनन्यगतिकमुग्धस्त्रीजनविश्वासघातेन, सम्पादितविजयः, यमुनायाः पुलिनसम्बन्धिनि, यमभगिनीसम्पर्कात् स्मरणमात्रेणापि खेददातरि वने हरिविरहेण द्रष्टुमपि अनर्हे विविधकुञ्जाकीर्णवृन्दाविपिने रमते, च, इति विश्वः। घटयति, कुचस्पर्शलोभेन यथास्थापितमतिष्ठन्तमिव दृढतरं संश्लेषयतीत्यर्थः। कुचयोर्महत्त्वन्तु, यथोक्तम् परमाणुः परममहानमपि च परमाणु, यदि मध्यं यदि च कुचौ तरलदृशस्तत्त्वदर्शनं पुंसामिति। कीदृशे, सुघने कुचपक्षे निबिडे,

गगनपक्षे शोभनो घनो मेघो यत्र यथा पक्षे मृगमदरुचिभि: कस्तूरीकान्तिभिरुषिते, लिप्ये, कुचयोर्मकरीकादिलेखनानन्तरं मुक्ताहरार्पणमिति ज्ञेयम्। गगनपक्षे, मृगमदरुचिरिव रुचिर्यानीलकान्तिस्तया व्याप्ते, नखस्य पदं, क्षतचिह्नितं, तदेव शशी चन्द्रलेखा, तया भूषिते, मण्डिते, कस्तूरीचित्रिततया श्यामलवर्णे, नखलाञ्छन-चन्द्रकलाविराजिते, अतिविस्तृतकुचमण्डले नक्षत्रपङ्क्तिरुपनिर्मलमुक्ताहारं कुचस्पर्शसुखपूर्वयोजितवानिति समुदायोऽर्थ:। हारो मणिसरोमुक्ता पञ्चकादिविनिर्मित:, इति वैजयन्ती।।१।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१।। पूर्वं गीतेन कस्याश्चिद्वि परीतरतमुक्तम्, अधुना कस्याश्चित्स्वाधीनभर्तृकाया नायककर्तृकां क्रीडामाह, समुदितेति। गुर्जरीरागेऽस्यैकताल:। गीतार्थस्तु; विजयी जयशीलो मुरारिर्यमुनापुलिने वने यमुनाया: सैकते यद्वनं तत्र रमते क्रीडति। नि:शङ्ककेलिप्रतिपादनाय 'विजयी' इत्युक्त। क्रीडामेवाह, समुदितेति। रमणीवदने कामिनीमुखे सपुलकं सरोमाञ्चं यथा स्यादेवं मृगमदतिलकं कस्तूरीतिलकं लिखति। कीदृशे ? चुम्बनाय वलित: संमुखीकृत्य संकोचितोऽधरो यत्र तादृशे । कुत्र कमिव ? रजनीकरे चन्द्रे मृगमिव। कीदृशे चन्द्रे ? समुदित: सम्यगुदितो मदनो यस्मात्तादृशे। पूर्णचन्द्रस्य कामोद्दीपकत्वादिति भाव:। पुन: कीदृशे चन्द्रे ? चुम्बनाय वलित: संमुखीकृतोऽधरो यस्मात्तादृशे। चन्द्रदर्शनाद्यूनोश्चुम्बनादौ प्रवृत्ति:। अत्र मुखस्याह्लाद-कारित्वादिना चन्द्रसाम्यं, कस्तूरीतिलकस्य च मृगसाम्यं बोध्यम्।।१।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१।। गुज्जरीरागेण गीयते। एवं चन्द्रकृतपीडावृत्तान्तं सख्यै निवेद्य पुनरपि कृष्णस्यान्यासक्ततारूपं दृष्टवदेतदाह इत्येतस्यैवावशेषं सख्या: पुरत: प्रलपति। समुदितेत्यादि। रमते इत्यादि अधुनान्तं ध्रुवपदम्। तदादौ व्याक्रीयते। विजयोऽस्यास्तीति विजयी अनङ्गसङ्गरजयशालीत्यर्थ:। न च एकाक्षरात् कृतो जाते: सप्तम्यां च न तौ इनिठनौ **(पा५-२-११५)** सूत्रोपरि भाष्यमतम्, स्मृतौ विजयशब्दात्कृदन्तादिनि निषेध:, तस्य प्रायिकत्वात्। यथा **काव्याप्रकाशकारप्रयोगश्च**। ''इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधै: कथित'' इति स चासौ मुरारि: श्रीकृष्ण: अधुना इदानीं अधुनेति निपातनात् साधु: यमुनाया: पुलिनेषु सैकतेषु यद्वनं वानीरकदम्बकम्। तत्र रमते क्रीडति। केन प्रकारेण रमते, इत्याकाङ्क्षायामाह। समुदितेति। समुदित: उत्पन्न आविर्भूत इति यावत्। एतादृशो मदनो यस्मादिति तादृशे मन्मथोद्दीपके इत्यर्थ:।

अतएव चुम्बनेन संजातः कलितोऽधरो यस्येति तादृशे। मन्मथोद्रेकात् प्रियेण चुम्बने कृते पश्चात् वलिताधर इत्यर्थः। अथवा चुम्बनार्थव्यापारेण वलिताधर ज्ञति वा, एवंविधे रमणीवदने प्रेयसीमुखे प्रविलसतः प्रकर्षेण शोभमानाः अलकाः चूर्णकुन्तलाः यत्रेति तादृशं तिलकं कस्तूरिकापूर्णां रजनीकरे चन्द्रे मृगमिव विलिखति। सोऽनेन प्रकारेण रमते इत्यन्वयः ।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। गीतस्यास्य गुर्ज्जरीरागः। एकतालीतालः। लक्षणन्तूक्तमेव। अत्रापि गीते वक्त्री राधा विप्रलब्धेव। वर्णनीया तु नायिका स्वाधीनभर्तृकेत्यवधेयम्। पुनरपि रतिसङ्गवेगोत्सारितविभूषणानां प्रसाधनङ्करोतीति भावनयोत्थाप्य राधिका प्रलपति; अधुना इदानीं मुरारिः श्रीकृष्णो रमते क्रीडति। कुत्रेत्याकाक्षायामाह; यमुनापुलिनवने यमुनापुलिनसमीपस्थविपिन इत्यर्थः। यद्वा यमुनापुलिने वने वनोपलक्षितप्रदेश इत्यर्थः। यथा श्रुते पुलिनस्य वृक्षसमूहात्मवनाभेदासम्भव इत्यवधेयम्। कीदृशो मुरारिः ? विजयी रतिरणजयवान् इत्यर्थः। अत्र प्रायो वीररता स्त्रिय इति तदनुगुणपुरस्कारेण मुरारिपदोपन्यासः। कथं रमत इत्याहरमणीवदने कान्तामुखे मृगमदतिलकं कस्तूरिकाचित्रं सपुलकं वदनस्पर्शजनितरोमाञ्चसहितं यथा स्यात्तथा लिखति। वदने कथम्भूते ? समुदितो मदनो य स्यात् तत् तथाच तिलकं दत्त्वा वदनमतिसुन्दरमिति कृष्णेन चुम्बितमिति वाक्यार्थः। कस्मिन् कमिव ? रजनीकरे चन्द्रे मृगमिव। मुखस्याह्लादकत्वाच्चन्द्रसाम्यं कृष्णवर्णत्वान्मृगमदतिलकस्य मृगसाम्यमित्यवधेयम्। नायिका गौराङ्गी। तस्याः ललाटे मृगमदतिलकस्यातिरमणीयतया यथायोग्यं कृष्णेन क्रियत इति भावः। 'तिलकं चित्रके बृक्षे मुखेऽपि च मनोहर' इति **धरणिः** ।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। पूर्वोक्तेन गीतेन कस्याश्चिद्विपरीतरतमुक्त्वा [१] सखी तस्या एव नायककृतां क्रीडामाह, समुदितेति। [२]गुर्जरीरागे [३] एकतालीताले। [४] ध्रुवरागतालानां लक्षणमुक्तमेव। स्वाधीनभर्तृकेयम्। तस्या लक्षणम्,

यस्याः रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।<br>विचित्रविभ्रमासक्ता स्वाधीन [५] पतिका यथा।। इति।।

हे सखि ; अधुनाऽस्मिन्नेवावसरे या पूर्वं मधुरिपुणा रमिता तामेव विजयी [६] व्रजयुवतियूथजयेनानङ्गजयेन वा सकलसौन्दर्यादिगुणजयेन वा निःशङ्कं उक्तलक्षणो मुरारिः श्रीकृष्णो यमुनापुलिनवने [७] कृष्णातीरवने रमत इति [८] विरोधोक्तेः; किं

रमते, अपि तु [९] न, [१०] त्वद्विरहाग्निसन्तप्तो यमुनातीरवनं सेवत इति भावः। [११] कीदृशे वदने? [१२] समुदितः उपचितो मदनः कामो यत्र। [१] पुनः कीदृशे वदने? रमणीयायास्तवैव वदनं [२]पुराभिवादनं तत्र। पुनः कीदृशे वदने? चुम्बनाय वलितोऽनु [(४)]कूलितः पुरा तवैवाधरो यत्र तत्रैव [५] वदने रमणीवदने व्रजयुवतिमुखे ध्यानप्राप्ते त्वन्मुखे वा सपुलकं रोमाञ्चसहितं यथा [६] तथा मृगमदतिलकं तव ध्यानेन तस्याः साक्षदलिङ्ग्य लिखति। कीदृशे[७]वदने? समुदितः समुपचितो मदनः कामो यत्र। पुनः [८] कीदृशे [९] वदने? चुम्बनेन वलितश्चुबुकमुद्धृत्य सङ्कोचितः अधरो यत्र। कस्मिन्? कमिव ? रजनीकरे चन्द्रे मृगमिव। मुखस्य चन्द्रसाम्यम्। [१०]तिलकस्य मृगसाम्यम्। [११]वलितं सेवितेऽपि स्याच्चुम्बनाकुञ्चनेऽपि च इति विश्वः। [१२] यमुना [१३] शमनस्वसा **इत्यमरः** [१४] (१.१०.३२)।।१।।

१.नास्ति-अ.ब.२,३.नास्ति-अ.ब.फ.ग.ह.ज.४.ध्रुवतालानां-अ.ब.५.भर्तुका-इ.फ.ग.ह.ज. ६.व्रजयुवतिसूथजयेन वा सकलसौन्दर्यादिगुणेन-ग.७.नास्ति-ग.८.विरोधोक्तिः-अ.ब.विरोधोक्तैः-फ.९.नास्ति-अ.ब.इ.फ.ज.१०.तद्विरहाग्नि-फ.ज.मद्विरहाग्नि-ह.११.कीदृशे वने-ब.इ.वाक्यमिदं नास्ति-ग.१२.नास्ति-इ.फ.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१।। पूर्वस्मिन् गीते कस्याश्चिद्विपरीतरतमुक्तम्। अधुना कस्याश्चित्स्वाधीनभर्तृकाया नायककर्तृकां क्रीडामाह, समुदितेति। स्वाधीनभर्तृकालक्षणम्-

यस्याः रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।
विचित्रविभ्रमासक्ता स्वाधीनपतिका [१५] यथा।

अस्य गुर्जरीरागः। हे सखि! अधुना अस्मिन् काले यमुनापुलिने यद्वनं तस्मिन् विजयी जयशीलो मुरारिः कृष्णो रमते [१६] क्रीडति। कथं रमत इत्यत आह रमणीवदने कान्तामुखे सपुलकं रोमाञ्चसहितं यथा स्यात्तथा मृगमदतिलकं कस्तूरीतिलकं [१७] सकाम इत्यर्थः। चुम्बनेन वलितः सम्मुखीकृत्य सङ्कोचितः अधरो [१८] यस्य [१९] तस्मिन्; चुम्बनं दत्त्वा तिलकं [२०] लिखतीत्यर्थः। कस्मिन्? क इव? रजनीकरे चन्द्रे मृगमिव [२१] लिखतीत्यर्थः।।१।।

१.कीदृशेवने-इ.२.नास्ति-ग.३.कूलीकृतः-इ.फ.ग.ह.ज.४.नास्ति-अ.ब.५.नास्ति-इ.फ.ग.ह.ज.६.वने-अ.ब.७,८.नास्ति-अ.ब.ग.९.मृगस्य तिलकसाम्यम्-अ.ब.इ.फ.ग.ह.ज.१०.तः १३.पर्यन्तं नास्ति-अ.ब.११.कालिन्ती सूर्यतनया यमुनाच यमस्वसा-फ.ज.१२.तु यमस्वसा-इ.ह.च यमस्वसा-ग.१४.यथेति-ल.म.भवेदिति-क.१५.क्रीडते-ड.क.१६.नास्ति-क.म.१७.सकामेत्यर्थः-ड.१८.नास्ति-क.१९.यस्मिन्-क.२०,२१.लिखति-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। समुदितेति। चुम्बने वलितः सङ्कुचितः अधरो यस्य तस्मिन्। समुद्दीपितः मदनो येन तस्मिन्। रमण्याः कस्याश्चिद्वदने मृगमदेन कस्तूर्या तिलकं विशेषकं सपुलकं रोमाञ्चसहितं यथा स्यात्तथा रजनीकरे चन्द्रे मृगमिव लिखति। अत्र बिम्बप्रतिबिम्बभावेन मृगस्य तिलकस्यैक्यात् रजनीकरोपमानेन वदनसाम्यात् उपमालङ्कारः।। ध्रुवाया व्याख्यानम्। विजयीवासौ मुरारिः अधुना चन्द्रिकोज्ज्वल-निशायां यमुनायाः पुलिनस्थवने रमते क्रीडति।।१ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। कापि मधुरिपुणा विलसतीति प्रागुक्तम्। सम्प्रति तद्गतचित्तो मधुरिपुस्तदङ्गानि मण्डयन् क्रीडतीति प्रतिपादन्नाह, समुदितेति। यमुनायाः पुलिनवने विजयी मुरारिरधुना साम्प्रतं रमते क्रीडतीति योजना। ''यदन्तर्वारिणस्तटम्'', ''तोयोत्थितं तत्पुलिनम्'' **इत्यमरः**। निर्जनताप्रतिपादनार्थमत्र वनशब्दोपादानम्। ननु कथमत्र शृङ्गाररसस्याननु-कूलयोर्विजयिमुरारिपदयोरुपादानम् उच्यते। इह स्थाने मामेकाकिनीं चन्द्रमाः पीडयतीति पूर्वश्लोकापेक्षया साभिप्रायत्वं गम्यते। यो वा मुरारिर्मुरनाम्नोऽसुरस्य प्रतिहन्ता विजयी जयनशीलश्च मम रक्षिता सुदूरे रमते। कथं ममेह निस्तारः स्यादिति खल्वभिप्रायेणा, विजयी मुरारिरिति। यद्वा ''निःशङ्ककेलिर्न पराङ्गनासु'' इत्युक्तेः। त्रिभुवनविजयिनो मुरारेश्च कथं परजनशङ्केत्यभिप्रायेण एतत्पदद्वयमुक्तम्। रमणप्रकारमाह। रमणीवदने सपुलकं यथा स्यादेवं मृगमदतिलकं कस्तूरीतिलकं लिखतीति योजना। मुरारिरर्थात् वदन इति वदनैकदेशेऽपि वदनम्। तेन ललाट इत्यधिगन्तव्यम्। समस्तवदने तिलकासम्भवात् मुख्यार्थबाधे तत्सम्बन्धिललाटं लक्ष्यते। कस्मिन् किमिवेत्या, रजनीति। रजनीकरे मृगमिव कलङ्कमिवेति यावत्। अत्र वदनस्य चन्द्रेण मृगमदतिलकस्य मृगेण साम्यम्। उभयस्मिन् किंविधे ? समुदितमदनेति। वदनपक्षे समुदितो मदनो येनेति विग्रहः। दर्शनमात्रेण मदनोदयात्। चन्द्रपक्षे समुदितो मदनो यस्मादिति। पुनः किंविधे ? चुम्बनवलिताधर इति। वदनपक्षे तिलकं लिखित्वा साध्विदं वदनमित्युक्त्वा चुम्बनाय वलितो विन्यस्तोऽधरो यत्रेति विग्रहः। चन्द्रपक्षे चुम्बनेन वलितो युक्तोऽधरो यस्मादिति विग्रहः। चन्द्रोदये कामोद्दीपनादित्य-भिप्रायः।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। पुनस्तस्या एव स्वाधीनभर्त्तृकात्व सूचनपूर्वकं तल्लीलाविशेषमाह, समुदितेत्यादिना। अस्यापि गुज्जरीरागैकतालौ। यमुनायाः पुलिनस्थवने मधुरिपुरधुना

क्रीड़ति। कीदृश: ? विजयी मण्डनादिकौशलेन सर्वातिशायी। रमणप्रकारमाह, रमण्या वदने सपुलकं यथा स्यात् तथा मृगमदतिलकं लिखति। कस्मिन् कमिव ? चन्द्रे मृगमिव ? अत्र मुखस्य चन्द्रेण तिलकस्य मृगेण साम्यम्। कीदृशे ? सम्यगुदित: कामो यस्मात् तस्मिन् अर्थात् तसौव। चन्द्रपक्षे तथैवार्थ:। सर्वेषामिति विशेष: चन्द्रोदये कामोद्दीपनात्। पुन: कीदृशे ? वदनपक्षे तिलकं लिखत्वा साध्विदं वदनमित्युक्त्वा चुम्वनाय वलितो विन्यस्तो अधरो यत्र, चन्द्रपक्षे चुम्बनेन वलितो युक्तोडधरो यस्मादित्यर्थ:।।१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१।। पुन: प्रथमवितर्कविनिश्चयेन निजस्वाधीनप्रेयसीभावसौभाग्यं तस्यामेवारोपयन्ती तद्विनोदवृत्तान्तं दृष्टवत् प्राह, समुदितेत्यादिना गीतेन। मुरारि: पुरा प्रसिद्धासुरनिर्घातेनाप्य-साधितशौर्यकीर्त्ति: श्रीकृष्ण: अधुना विजयी। अनन्यगतिकमुग्धस्त्रीजनविश्वासघातेन, सम्पादितविजय:, यमुनाया: पुलिनसम्बन्धिनि, यमभगिनीसम्पर्कात् स्मरणमात्रेणापि खेददातरि वने हरिविरहेण द्रष्टुमपि अनर्हे विविधकुञ्जाकीर्णवृन्दाविपिने रमते, प्रियाभिमतमण्डनक्रियाध्यवसायेनात्मानं कृतार्थयन्निव क्रीडतीत्यर्थ:। कथं रमत इत्यत आह, षड्भि:, समुदितमदने, सम्यक्प्रकारेण उदितो मदनो यत्र इति समास:। प्रियकरस्पर्शसञ्जातमदनोद्बोध- व्यञ्जकदरहसितकृतप्रसादविशेषशोभिनीत्यर्थ:। चुम्बनवलिताधरे, चुम्बनाय वलितोऽनुकुलीकृतोऽधरो यत्र तस्मिन्। तत्समयोचित-चिबुकोन्नमनवशसञ्जाताधरकुञ्चनेन सूचितचुम्बनाभिलाषे इत्यर्थ:। ईदृशे, रमणीवदने, प्रियहृदयहारिविलासचतुराया: युवतेर्बहुविधवक्रोक्तिभङ्गीतरङ्गिते मुखे, अर्थात्तदेकप्रदेशे ललाटे, मृगमदतिलकं, कस्तूरीतमालपत्रं, सपुलकं, तन्मुखदर्शनस्पर्शनादिसमुदञ्चित-रोमाञ्चं यथा स्यात्तथा, रजनीकरे चन्द्रबिम्बे मृगमिव लक्ष्मलक्ष्मीमिव लिखति, रचयतीत्यर्थ:।।१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। समुदितेति; यमुनानद्यास्तीरे स्थिते वने मुरारि: मुरराक्षसस्य घातक: तथैव श्रीराधाया: शृङ्गारपीडाया: घातको नोपशान्तक:। तथाभूत: मुरारि: क्रीडति शृङ्गारक्रीडाम् रतिखेलं वा। य: खलु मुरं हत्वा विजीत: तन्निमित्तं शृङ्गारेऽथवा रतिरणे विजयी भवितुं वा कियत् क्षणम् ? नि:शङ्ककेलिप्रतिपादनाय विजयशब्देन व्यपदिष्ट:। शृङ्गारलीलायां स श्रीकृष्ण: चन्द्रमुख्या: तरुण्या: मुखे मृगमद: कस्तुरी तथा तिलकं लिखति। अर्थात् धवले मुखचन्द्रे कृष्णवर्णस्य कस्तुरीतिलकस्य स्पर्शेन रोमाञ्चं जनयति। तत् खलु

चन्द्रे कलङ्क इव प्रतिभाति ।अर्थात् चन्द्रे मृग इव दृश्यते। तच्चन्द्रं दृष्ट्वा श्रीकृष्णस्य कामना वर्द्धते। अत: तस्या: मुखे नाम अधरे चुम्बनं प्रददाति। वलितं सम्मुखीकृत्य चारु चुचुम्ब श्रीकृष्ण:।।१ ।।

**२-घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने।**
**कुरबककुसुमं चपलासुषमं रतिपतिमृगकानने।। रमते० ।।२ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।२ ।। चिकुरे केशे कुरुवककुसुमं रक्ताम्लानपुष्पं रचयतीति योजना। ''रक्ताम्लान कुरुवक:। चिकुर:कुन्तल: कच:। कीदृशं चपलासुषमं, विद्युन्मनोहरं, तडित्सौदामिनी-विद्युच्चञ्चलाचपला अपि। कीदृशे चिकुरे, घनचयरुचिरे, जलदपटलवत् सुन्दरे, पुन: कीदृशे तरलिततरुणानने तरलितानि चञ्चलीकृतानि तरुणानामाननानि येनेति विग्रह:। पुन: कीदृशे, रतिपतिमृगकानने, अत्र रतिपतिरेव मृग: चिकुरकाननेऽवस्थितत्वात् चिकुर एव काननं प्राचुर्य्याद्रूपित:।।२ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।२ ।। अपि च, घनचयेति। स तस्या इति प्रकरणलभ्यौ। चिकुरे कुन्तले। जातावेकवचनम्। कुरबककुसुमं शोणसैरेयकपुष्पं शोणाम्लानपुष्पं वा रचयति। किंभूते ? रतिपति: मृग इव तस्य कानने। किंभूते चिकुरे ? घनचयरुचिरे मेघपटलमनोहरे। पुन: किंभूते ? तरलिततरुणानने। तरलितानि तरुणानामाननानि येन। काननपक्षे तरलितानि तरुणानां कुरबककुसु मानां वा वातारिवृक्षाणामग्रभागा यस्मिन्। रमणीपक्षे कुलटानां सुखरूपम्। यथा मृग: कानने बली तथात्र काम:। अत्र 'मृग'शब्देन तत्र रममाणस्य हरे: परुषत्वं (पशुत्वं) व्यज्यते।।२ ।।

**(३) जगद्धरकृत- सारदीपिका (नोपलब्धा रचते)**

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।२ ।। केल्यन्तरमाह; घनचयेति। चिकुरे तस्या: केशपाशे कुरबककुसुमं शोणाम्लानपुष्पं, अरुणझिण्टीपुष्पं वा रचयति। यथाविन्यासमर्पयतीत्यर्थ:। कीदृशे चिकुरे ? घनचयवन्मेघसमूहवद्रुचिरे मनोहरे। पुन: कीदृशे ? रतिपति: काम: स एव मृगस्तस्य कानने वने। पुन: कीदृशे ? तरलितानि विलोकनेन चञ्चलीकृतानि तरुणानां यूनामाननानि मुखानि येन तादृशे। कीदृशं कुसुमम्? चपला इव रक्तविद्युदिव

सुषमातिशयिता शोभा यस्य तादृशम्। यद्वा, चपलावत्सुषमं चारु। अत्र विरहतापशामकतयातिश्यामलतया चिकुराणां सजलमेघसाम्यम्। केशग्रथिकुरबककुसुमानां चान्तरान्तरा दृश्यमानतया विरहिणां संतापजकतया रक्ततया लोहितविद्युत्साम्यम्। 'चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः' **इत्यमरः**। 'स्मृतः कुरबकः शोणाम्लानझिण्टीप्रभेदयोः' इति **विश्वः**। 'कुसुमं पुष्पफलयोः' इत्यपि। 'चपला कपिलाविद्युत्पुंश्चलीपिप्पलीषु च' इत्यपि। 'सुषमं चारुसमयोः सुषमा परमा द्युतौ' इति च।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। घनेति। हे सखि! घनचयरुचिरे नीरदवद्भासमाने तरलितानि चञ्चलानि वीक्षणोन्मुखानीति यावत्। तरलानां चञ्चलचित्तपुरुषाणाम् आननानि यस्मिन् तादृशे सर्वपुरुषप्रेक्षताशीले इत्यर्थः। तरलिततरुणेति क्वचित्पाठः। तदा तरुणानां यूनाम्। रतिपतिः कामः स एव मृगस्तस्य कानने रतिपति विहारयोग्य इत्यर्थः। एतादृशे चिकुरे कस्याश्च कुन्तलकलाषे, चिकुराया मन्मथोद्दीपकत्वादेवमुक्तमित्यवगन्तव्यम्। बिद्युच्चञ्चला चपलापि च **इत्यमरः**। तस्या सदृशीमेव सुषमा परमा शोभा यस्य तादृशं ''सुषमा परमाशोभेत्यमरः विद्युदिवभासमानमित्यर्थः। कुरुवकेति। कुरुवककुसुमं कुसुमविशेषान्। कुसुमित जातावेकवचनं रचयति घटयति अनेन प्रकारेणान्वयः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।।अपि किङ्करोत्यत आह; चिकुरे केशे कुरुवककुसुममरुणझीण्टीपुष्पं*रचयति यथा स्थानं विस्तारयति। चिकुर इत्येकवचनं सम्वृत्तकेशाभिप्रायमित्यवधेयम्। कुरुवककुसुममित्यत्राप्येकवचनं समूदायाभिप्रायेणेत्यवधेयम्। कीदृशे चिकुरे? घनचयरुचिरे मेधसमूहवन्मनोहरे। कुसुमं कथम्भूतम्? चपलासुषमं चपलाया इव विद्युत इव सुषमा शोभा यस्य तत्तथा। चपलासुषमामिति क्वचित् पाठः। तत्पक्षे चपलाया विद्युतः सुषमामत्यन्तसदृशमित्यर्थः। पकृतपुष्पानां लक्षालक्षत्वाल्लोहितत्वाच्च विद्युत्साम्यम्। अन्यस्मिन्नपि धनसमूहे विद्युद्वलतीत्युचितमेव। चिकुरे पुनः किम्भूते? वलितानि निजसौन्दर्यदर्शनकौतुकेन तरलिततरुणजनानामाननानि येन तत्तथा तस्मिन्। पुनः किम्भूते? रतिपतिमृगकानने। रतिपतिः कामः, स एव मृगः सकललोकचाञ्चल्यकारित्वात्। तस्य कानने निवासवन इति वेत्यर्थः। तथा च

तत्केशपाशे सर्वात्मना निरन्तरं कामो वसतीति वाक्यार्थः। 'तडित् सौदामिनी विद्युच्चञ्चला चपला अपी'**त्यमरः**। 'सुषमा परमा शोभे'त्यमरः।।२।।

*'झीण्टापुष्पम्' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। किञ्च घनेति। श्रीकृष्ण! सम्प्रति [११] ध्यानेन तव [१२] समागमेन तस्याश्चिकुरे ; जातावेकवचनम्; केशेषु कुरुबककुसुमं शोणमम्लानपुष्पं रचयति रचना [१३] विशेषं करोति। कीदृशे ? मेघसमूहवन्मनोहरो। [१४] अन्यथा सह रमणमाशङ्क्य किमर्थं खेदं प्राप्स्यतीति ध्वनिः। कीदृशम्? चपलावत् विद्युदिव सुषमा शोभा यस्य तत्। यथा मेघे विद्युद्भाति तथा चिकुरे कुसुमानीति भावः। कीदृशे ? रतिपतिः कामः स एव मृगस्तस्य वने। तथा कानने मृगस्तथा चिकुरे कामस्तस्याः। [१]करचरणादिषु कामः किमु वक्तव्यमिति [२]भावः। पुनः कीदृशे [३] चिकुरे ? तरलितानि[४]चञ्चलीकृतानि तरुणानामाननानि श्रीकृष्णस्य वा येन [५] यस्मिन्वा।।२।।

१.पदमेतत् द्वितीयत्वेन दृश्यते-नि.सा.इ.ड.२.घटयति-ड.ल.म.३.नास्ति-ड.४,५.नास्ति-ड.ल.म. ६.तथा-ड.७.द्वितीय-चन्द्रः-ड.८.शोभमानाः-ल.म.९.तः१०.अयं भागः-पञ्चमपदव्याख्या- नान्ते दृश्यते-ड.११.तव ध्यानेन तव समक्षमेव तस्याश्चिकुरे-फ.ज.१२.समागमे-ग.समाने-ह.१३.विशेषं वा-फ.ज.१४.त्वया-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। घनेति। घनचयरुचिरे मेघसमूहवत् मनोहरे चिकुरे केशपाशे कुरबककुसुमं [६] रक्तगेठीपुष्पं रचयति यथास्थानमर्पयति। पुनः [७]कीदृशे ? तरलितानि [८] चञ्चलीकृतानि तरुणानां मानसानि येन; अति [९] सुन्दरतयेत्यर्थः। कीदृशं [१०] कुसुमम्? चपला विद्युदिव सुषमा शोभा यस्य ; लक्ष्यालक्ष्यतया लोहितत्वाच्च विद्युत्साम्यम्। पुनः कीदृशे ? रतिपतिः कामः स एव मृगस्तस्य कानने। यथा मृगवासो वने तथा चिकुरे [११] काम इति ; कामजनक इत्यर्थः। अन्यस्मिन्नपि मेघे विद्युद्भवति। तरुणानां मेघसमयः कामाविर्भावजनक इति। मेघोदये हि [१२] हरिणीनामप्यतिसुखमुत्पद्यते।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। घनेति। तरलितं चञ्चलीकृतं तरुणस्य कृष्णस्य आननं मुखं येन तस्मिन्। यद्वा तरलितः तरुणो यया तस्याः तरलिततरुणायाः आनने रतिपतेः मदनस्य मृगकानने मृगयावने। घनचयः मेघसमुदाय इव रुचिरे रमणीये चिकुरे। चपलायाः विद्युतः

सुषमा शोभा यस्मिन् तत्। सुषमा परमा शोभा **इत्यमर:** (१.३.१७)। कुरबकस्य रक्तवर्णबाणस्य कुसुमं रचयति। स्रजं गुम्फति। कुरबकोऽरुणे **इत्यमर:** (२.४.७५)। रक्तत्वाद्विद्युदुपमानीकरणम्।।२।।

१.करणादिषु-अ.ब. २.नास्ति-फ.ज.ह. ३.नास्ति-फ.ग.ह.ज. ४.चञ्चलानि कृतानि-फ.ज. ५.यस्मिन्वेत्यर्थ-अ.ब. ६.रक्तगोडिपुष्पं-ल.रक्तगोटिपुष्पं-म.रक्तझिण्टीपुष्पं-क. ७.नास्ति-क. ८.नास्ति-ल. ९.सुन्दरेत्यर्थ:-ल.सुन्दरयेत्यर्थ:-म. १०.कुरबककुसुमम्-क. ११.कामवास इति कामजनके इत्यर्थ:-क. १२.विरहिणामप्यतिदु:खमुत्पधते-क.हारिणीनामप्यतिसुखमुधोतते-ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। घनचयेति। चिकुरे केशे कुरुबककुसुमं रक्ताम्लानपुष्पं रचयति। कुरुबककुसुमस्य माला क्रमेण रचनां करोतीति योजना। ''रक्ताम्लान: कुरुबक:'', ''चिकुर: कुन्तलो बाल: कच:'' इति। चिकुरे किंविधे ? घनचयरुचिर इति। जलदपटल इव शोभने, उपमानानि सामान्यवचनैरिति समास:। पुन: किंविधे ? तरलितेति। तरलितानि चञ्चलीकृतानि धैर्यात् प्रच्या ? वितानि तरुणान्याननानि येनेति विग्रह:। वीक्ष्यमाणेषु प्रशंसार्थमित्यर्थात्। कुरुवककुसुमं किंविधम् ? चपलासुषममिति। विद्युदिव सुषमा परमशोभा यस्येति विग्रह:। ''चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषु च'' इति **पदसागर:**। ''सुषमा परमा शोभा'' **इत्यमर:**। कृष्णवर्णत्वाच्चिकुरस्य मेघेन शोणवर्णत्वात् कुरुबकस्य विद्युता साम्यम्। यदुक्तम्, ''शोणानि भौमतीक्ष्णांशुताम्र-कुङ्कुमतक्षका:। गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दव:।।'' इति। चिकुरे किंविधे ? रतिपतिमृगकानन इति। अत्र रतिपतिरेव मृग:। चिकुरकानने स[त]त्य(स)त्यवस्थित-त्वात् चिकुर एव काननं प्राचुर्याद्रूपित:।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। न केवल तिलकं चिकुरे रक्तझिण्टीपुष्पञ्च रचयति तत्पुष्पे कवरीं ग्रथ्नातीत्यर्थ:। कीदृशम् ? चपलाय विद्युत इव सुषमा परमा शोभा यस्य तस्मिन्। पुन: कीदृशे ? मेघपुञ्जवत् सुन्दरे अतएव तद्गुणवर्णनेन मुखरीकृतं तरुणस्य कृष्णस्य आननंयेन तत्र, यतो रतिपतिरेव मृगस्तेन सदाश्रितत्वात् तस्या कानने।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। किं च घनेति। घनचयरुचिरे सुस्निग्धनीलमेघपटलादपि अतिसुन्दरे, अत एव तरलितं सविस्मयतच्छोभानुमोदनसञ्जाततरलं तरुणस्य नवतारुण्य शालितयाखिल-मोहनस्यापि कृष्णस्याननं मुखं यस्मात्तादृशे। अत एव रतिपतिरेव मृगस्तस्य कानने,

सुखवसतिस्थले, अनेनात्र मदनः सदा वसतीत्यर्थः। अन्याङ्गेषु इति किं वक्तव्यमिति भावः। ईदृशे चिकुरे विशिष्य विचित्रधम्मिल्लतया आविर्भाविते केशपाशे। चपलासुषमं, तडित्कान्तिकमनीयं कुरवककुसुमं, शोणाम्लानककुसुमानि रचयति, रचनाविशेषपूर्व-मेकैकं रतिकालीनं केशग्रहशङ्कासूचकं ग्रथ्नातीत्यर्थः। कुसुममिति जातावेक-वचनम् ।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। घनचयरुचिरेति; तस्याः तरुण्याः घनकेशराशिः घनमेघपटलवत् आकर्षणीयो भवति। यत्र घनान्धकारायिते केशपाशे कन्दर्पमृगधावनक्षेत्रं भवति। यत्र श्रीकृष्णः तेनाकर्षितः रक्तकुरवकं नाम शोणसैरेयकपुष्पं शेणाम्लानपुष्पं रक्तारुणझिण्टीपुष्पं वा सज्जीकरोति। पुनः कपोले तिलकमपि प्रददाति। श्रीकृष्णः केशभारेणाकृष्टःसन् तस्याः कपोले तिलकं पत्रालिस्तथा चिकुरे नाम कवरीभारे पुष्पं मेघे चपला इव भाति। अतः रतिपतिः श्रीकृष्णचन्द्रस्य विद्युदिव रतिकेलीप्रबन्धनं भविष्यति भविष्यतित्याशयः।।२।।

**३-घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते।**
**मणिसरममलं तारकपटलं नखपदशशिभूषिते।। रमते०।।३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। कुचयुगगगने मणिसरं तारकपटलं घटयतीति योजना। असमस्तरूपकमिदं, कुचयुगमिव गगनं वृहत्त्वात्। मणिसरः मुक्ताहारः सितधवलत्त्वात् तारकपटलत्वेन रूपितः। उभयस्मिन् किंभूते। सुघने कुचपक्षे सुसान्द्रे इत्यर्थः। गगनपक्षे सुघनमेघयुक्ते इत्यर्थः। घने मेघे मर्त्तिगुणे त्रिषु मूर्त्ते निरन्तरे इत्यमरः। पुनः कीदृशे, मृगमदरूचिरूषिते, इत्यर्थः। गगनपक्षे कस्तुरीद्रवेणेव म्रक्षित इत्युत्प्रेक्षा। पुनः कीदृशे पदनखशशिमूषित, कुचपक्षे पदनखमेव शशि तेन भूषिते, नखपदं वक्रत्त्वात् शशित्वेन रूपितं व्यवसति त्राणस्थान लक्ष्म्यंघ्रिवत्स्वपि**त्यमर**।।३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। अपि च,; घटयतीति। स तस्याः कुचयुगगगने कुचयुगं गगनमिव बृहत्त्वात्। अमलं मणिसरं हीरकहारं तारकपटलं तारकासमूहं घटयति योजयति। किंभूते ? सुघने सुतरां घने पीने। गगनपक्षे शोभनघने। किंभूते स्तनयुगे ? मृगमदरुचिरूषिते। कस्तूरीपरिष्वङ्गेन निवारितसुरतश्रमजले। गगनपक्षे मृगमदकान्तियुक्ते रूक्षे च भावेन। पुनः कथंभूते ? नखपदं शशीव तेन भूषिते। पक्षे, नखपदमेव शशी तेन भूषिते। अत्र तस्मिन्नभिलाषशन्यत्वं गगनपदव्यङ्ग्यम्।।३।।

## (३) जगद्धरकृत-सारदीपिका (टीका नोपालब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३।। केल्यन्तरमाह; घटयतीति। कुचयुगं गगनमिव ? बृहत्त्वात्। तत्रामलं निर्मलं मणिसरं मुक्ताहारं तदेवतारकपटलं तारकसमूहं घटयति प्रापयति। कीदृशे कुचयुगगगने ? सुष्टु अतिशयेन घनो विस्तारो यत्र तादृशे। मृगमदस्य कस्तूर्या रुच्या दीप्त्या रूषिते व्याप्ते। पुनः कीदृशे ? नखपदं नखाङ्कस्तदेव शशी तेन भूषितेऽलंकृते। नखक्षतं चेदर्धेन्दुसाम्यं बोध्यम्। तदुक्तं पञ्चसायके, अर्धेन्दुसंकाश-मिदं नखक्षतमर्धेन्दुसंज्ञं कथितं समासतः। कक्षानितम्बस्तनपार्श्वमध्ये दातव्यमेतत्क-रजं सदैव' इति। अत एवात्र 'शशि' पदमप्यर्धचन्द्रपरं बोध्यम्; पूर्णचन्द्रस्य तत्साम्याभावात्। अत्र कुचयुगस्य विस्तीर्णत्वात्कस्तूरिकया श्यामत्वा- ङ्करूपचन्द्र-वत्त्वाद्गगनत्वेन निरूपणम्; गगनस्यापि कविसंप्रदाये श्यामत्वेनैव प्रसिद्धेः। अत एव 'सुघन' इत्यादिभिस्त्रिभिर्विशेषणैर्गग-नत्वनिरूपणौपयिकविशेषणोपादानात्साङ्ग-मेतद्रूपकम्। 'घनः सान्द्रे दृढे दीर्घे विस्तारे लोहमुद्गरे' इति विश्वः। 'गुण्ठितरूषिते' **इत्यमरः**। एतद्व्याख्यानसमये क्षीरस्वामिनाप्युक्तम्; 'रूषिते लौकिकव्यावृत्त्येत्यर्थः।' 'यत्रान्तर्गिरिरेणुरूषितः।।' 'नक्षत्रे चापि मध्ये च तारकं तारकापि च' इति विश्वः।।३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३।। घटयतीति। सकृष्णः सुघनेऽत्यन्तपृथुले, गगन पक्षेशोमना घना यत्रेती तादृशि मृगमदेस्य कस्तूरीकायाः रूचिर्नीं लकान्तिस्थया रुषिते ब्याप्ते लिप्तकस्तुरित इत्यर्थः अन्यत्र मृगमदसामान्यरूचिः मध्यपदलोपी समासः। तया रूषितं नीलनभ इति प्रतीत्या एवमुक्तमित्यवगन्तव्यम्। नखपदशशिभूषिते नखब्रणशशिलेखालाच्छने कुचयुगगने स्तनयुगलबिहायसि अत्र कुचयुगगगनयोर्महत्वसाम्यात् कुचयुगस्य गगनत्वरूपणमव-गन्तव्यम्। उंक्त च परमाणुः परमः महान् परममहानपि तन्वि परमाणुः। यदि मध्यं यदि च कुचौ तरलद्दशस्तत्वदर्शिनां पुंसामिति। तारकपटलवत्तारकपटलं नक्षत्रपटलकल्पमित्यर्थः। अमलं त्रासादि रोपरहितं मणिसरं मुक्ता हारं घटयत्यलं करोति। ताकपटलमिति वस्तुरूपकमिति वा। नपुंसकलिङ्गस्तारशब्दोऽप्यस्ति। अथवा तारकाणां सम्बन्धि तारकं तस्येदमित्यण्यप्रत्ययः। तच्च तत्पटलं चेति। गगनवत् परममहति तद्वत् कस्तुरिकायाः नीलवर्णे वालचन्द्रिकातुल्ये नखरेखालङ्कृते कुचमण्डले तारावलीकल्प हारावली मन्दं करोरीत्यर्थः अनेन प्रकारेण रमत इत्यन्वयः। श्लेषोद्दीपितरूपकालङ्कारः।।३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। अपि किङ्करोत्यत आह। महत्वात् कुचयुगमेव गगनत्वेन निरूपितम्। स श्रीकृष्णः कुचयुगगगने तारकपटलं तारकसमूहरूपममलं निर्मलं मणिसरं मुक्ताहारं घटयत्यायोजयति। अन्यत्रापि गगने तारकपटलघटनमुचितमित्याशयः। कीदृशे कुचयुगगगने ? सुधनेऽत्यन्तनिविड इत्यर्थः। गगनमपि सूत्कृष्टा घना यत्रेति एतादृशमिति। पुनः कीदृशे कुचयुगगगने ? मृगमदः कस्तूरी, तस्या रुचिः दीप्तिस्तया रूषिते शोभमाने। गगनमपि मृगमदप्राया रुचिस्तया शोभमानं स्वभावतो नीलवर्णत्वात्। पुनः कीदृशे ? कुचयुगगगने नखपदशशिभूषिते। नखपदमेव शशीं प्रतिपच्चन्द्रः, तेन भूषिते। गगनमपि प्रतिपच्चन्द्रेणालङ्कृतं भवतीति रूपकालङ्कारः। 'मृगनाभिमृगमदो गन्धशेखरमित्यपि' इति हारावलिः। 'अभिस्वङ्गे स्पृहायाञ्च गभस्तौ च रुचिर्मते'ति **विश्वः**। 'मुक्ताहारे मणिसरः कटिसूत्रे परिच्छदे' इत्यपि। 'तारकः कर्णधारे न नक्षत्रे दिशि तारकमि'ति च। 'पदं स्थाने च वाक्ये च व्यवसायोपदेशयोरि'ति शाश्वतः।।३ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३ ।। पुनरपि तामेव वर्णयति, [५] घटयतीत्यादिना। कुचयुगगगने स्तनद्वयोत्सङ्गे [६] अमलमुज्ज्वलं मणिसरं मुक्ताहार[७]स्तमेव तारकपटलं नक्षत्रसमूहं घटयति [८] योजयति। [९] आकाशस्थां शोभामत्र निर्माति। कीदृशे ? [१०]सघने निबिडे मांसले वा। पुनः कीदृशे ? मृगमदरुचिरूषिते [११] कस्तूरीक्षितिलिप्ते। कुचयोरत्राकाशस्य मृगमदलिप्तयोः पयोधरत्वेन मणिसरस्य नक्षत्र, समूहत्वेन च साम्यमित्युत्प्रेक्षारूपकालङ्कारः। पुनः कीदृशे ? नखक्षतं तदेवं शशी तेन भूषितेऽलङ्कृते। नखचिह्नस्यार्धेन्दुसाम्यम्। तद्यथा (पञ्च)सायके,

"अर्धेन्दुसङ्काशमिदं रसज्ञैरर्धेन्दुसंज्ञं कथितं समासात्।" इति। घनः सान्द्रे दृढे [१२] दार्ढ्ये विस्तारे लोहमुद्गरे इति **विश्वः** (७०.३)। अभिषङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम् [१३]**इत्यमरः** (३.३.२९)। [१४] नक्षत्रे चाक्षमध्ये च तारकापि च इति **विश्वः** (?)। "सुघनं निबिडे प्रोक्तं विशाले दृढसारके" इति **वैजयन्ती**। हारो मणिसरो मुक्ताकाञ्चनादिविनिर्मिते इत्यपि च समूहे पटलः पूजाभेदेऽपि इति भोजे[१५] ।।३ ।।

१.सुघने-नि.सा.इ.ड.२.भूषिते-इ.ड.३.मणिरस-अ.४.पदमिदं तृतीयत्वेन दृश्यते-नि.सा.इ.ड.५.तः७.पर्यन्तं नास्ति-ब.६.निर्मलम्-अ.ब.इ.ग.८.नास्ति-अ.ब.९.आकाशस्याभामात्रं-अ.ब.१०.सुघने-इ.फ.ग.ह.ज.११.कस्तूरीदीप्तिदीप्ते-इ.ह.कस्तूर्यादिलिप्ते-ग.कस्तूरीदीप्तिजिते-फ.ज.१२.दीर्घे-ग.१३.इति धरणि-इ.फ.ग.ह.ज.१४.तः१५.पर्यन्तं नास्ति-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।।[२]घटयतीति। सुघने निबिडकुचयुगगगने स्तनद्वयाकाशेऽमलं निर्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं नक्षत्रसमूहं घटयति [३] योजयति। [४] पुनः [५] कीदृशे ? मृगमदरुचिः कस्तूरीदीप्ति [६] स्तया भूषिते। पुनः कीदृश ? नखपदं नखक्षतं तदेव शशी [७] द्वितीयाचन्द्रस्तेन भूषितेऽलङ्कृते; गगनपक्षे [८] शोभाना मेघा यस्मिन्। [९]घनं सान्द्रे दृढे दार्ढ्ये विस्तारे लोहमुद्गरे इति विश्वकोशे [१०] (७१.३)।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। घटयतीति। किञ्च सुघने निबिडे नखानां पदान्येव शशिनः तैः भूषिते कृतनखक्षत इत्यर्थः। मृगमदस्य रुच्या भूषिते ; आलिप्त इत्यर्थः। कुचयुगमेव गगनं तस्मिन् अमलं मणिसरं मुक्तामणिहारं तमेव तारकाणां पटलं समुदायं घटयति। मुक्ताहारं क्षिपतीत्यर्थः। अत्र कुचयुगस्य गगनत्वारोपेण मुक्तानां नक्षत्रारोपत्वमिति परम्परितम्। नखपदस्य चन्द्रत्वारोप इति सावयवाख्यरूपकम्।।३।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। घटयतीति। कुचयुगगगने मणिसरं मुक्ताहारं तारकपटलं घटयति योजयतीति योजना। कुचयुगं गगनमिव बृहत्त्वात्। यद्वा कुचयुगस्योपरि गगनस्योपरि स्थितत्वात् उपरिभागस्य गगनस्य व्यपदेशः। मणिसरं तारकपटलमित्यसमस्तरूपकम्। ''सरो हारे भूजाभुजे'' इति शाश्वतः। ''मणिर्मुक्तादिकेऽपि'' चेति। किंविधम् ? अमलं स्वच्छमिति यावत्। कुचयुगगगने किंविधे ? सुघनेति। सुतरां निरन्तरो घनमपि सुघनं निरन्तरं भवति। यद्वा शोभना घना मेघा यत्रेति विग्रहः। यद्यपि मेघयुक्ताकाशे नक्षत्राद्यसम्भवस्तथापि योग्यतावशादेवमुक्तम्। पुनः किंविधे ? मृगमदेति। कस्तूरी तस्याः रुच्या कान्त्या रूषिते प्रोक्षिते। रुचिशब्दोऽल्पताप्रतिपादनार्थः। गगनमपि कस्तूरीद्रवेणेव साक्षितमित्युत्प्रेक्षा कृष्णवर्णत्वात्। पुनः किंविधे ? **नखपदमिति**। नखपदं न चिह्नं तदेव शशी तेन भूषिते। ''पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुषु'' **इत्यमरः**। नखपदस्य लोहितत्वात् वक्रत्वाच्च चन्द्रत्वेन रूपणम्। गगनमपि शशिभूषितं भवति। ''तारकः कर्णधारे च दैत्ये सदृशि तारकम्। कनीनिकायां नक्षत्रे तारकं तारकापि च।।'' इति पदसागरः। नखपदशशीत्यत्र उदयकालचन्द्रो ज्ञातव्यः तस्य रक्तवर्णत्वात्।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।। तथाकुचयुगगगने मणिसरमेव तारकपटलं योजयति, मणिसरो मुक्ताहारः असमस्तरूपकमिदं कुचयुगमेव गगनं वृहत्वात् । किदृशे ? सुनिविड़े । गगनपक्षे शोभनमेघयुक्ते । तथा मृगमदरुचिभिर्म्रक्षिते । कुच पक्षे कस्तूरीदीप्तौवम्रक्षिते। किंच नखाङ्क एव शशि तेन भूषिते।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। कुचयुगमेव गगनं, महत्त्वांशेन रूपकम्। अत्रामलं स्वच्छतया जाज्ज्वल्यमानं मणिसरं मुक्ताहारमेव तारकपटलं, नक्षत्रपंक्तिः। असमस्तरूपकमिदम्। नपुंसकलिङ्गतारकशब्दोऽप्यस्ति। 'नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च' इति विश्वः। घटयति, कुचस्पर्शलोभेन यथा स्थापितमतिष्ठन्तमिव दृढतरं संश्लेषयतीत्यर्थः। कुचयोर्महत्त्वन्तु, यथोक्तम्परमाणुः परममहानपि च परमाणुः। यदि मध्यं यदि च कुचौ तरलदृशस्तत्त्वदर्शनं पुंसामिति । कीदृशे, सुघने कुचपक्षे सुनिविडे, गगनपक्षे शोभनो घनो मेघो यत्र यथा। पक्षे मृगमदरुचिभिः कस्तूरीकान्तिभिरुषिते, लिप्ते, कुचयोर्मकरीकादि लिखनानन्तरं मुक्ताहारार्पणमिति ज्ञेयम्। गगनपक्षे, मृगमदरुचिरिव रुचिर्या नीलकान्तिस्तया व्याप्ते, नखस्य पदं, क्षतचिह्नितं, तदेव शशी चन्द्रलेखा, तया भूषिते, मण्डिते, कस्तूरीचित्रिततया श्यामलवर्णे, नखलाञ्छनचन्द्रकलाविराजिते, अतिविस्तृतकुचमण्डले नक्षत्रपंक्तिरूपनिर्मलमुक्ताहारं कुचस्पर्शसुखपूर्वं योजितवानिति समुदायोऽर्थः। हारो मणिसरोमुक्ता पञ्चकादिविनिर्मितः' इति **वैजयन्ती**।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। घटयतीति; श्रीकृष्णचन्द्रस्तस्याः गगनमिव आकाशसदृशे पीनोन्नतकुचे स्तनपर्वते वा निर्मलमणिसर इव निर्मलं स्फटिकाकारं संयोज्य नखक्षतेन तारकाचिह्नखातं कृत्वा मृगमदः कस्तुरीप्रलेपने स्तनयुगलस्य आकाश इव अन्धकारतत्त्वं योजयति। तस्मिन् स्तनाकाशे नखक्षतेन शशिकलां तथा मणिमयहारेण तारकाखचितं करोति।।३।।

**४-जितविसशकले मृदुभुजयुगले करतलनलिनीदले।**
**मरकतवलयं मधुकरनिचयं वितरति हिमशीतले।। रमते० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। मृदुभुजयुगले मरकतवलयं मधुकरनिचयं वितरतीति योजना। इदमप्यसमस्तरूपकम्। 'रत्नभेदे मरकतःकटकम्बलयोऽस्त्रियम्। विश्राणनं वितरणं

स्पर्शनं प्रतिपादनमित्यमरः।' पुनः कीदृशे हिमशीतले सम्भोगेनकामतापरिवृत्ता-दित्यभिप्रायः।।४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, जितेति। स कृष्णस्तस्या जितबिसशकले मृणालखण्डसदृशे भुजयुगले वर्तमाने। करतलनलिनीदले कराब्जपत्रे। शोणे करतले नीलमरकतसंचयः सभ्रमरपद्मशोभामनुकरोति। तेन तयोः यावकमण्डनकमनीयतान्यायेन औपाधिकस्नेहो रसाभावत्वेन व्यञ्जितः। मरकतवलयं मधुकरनिचयमेव वितरति प्रयच्छति। किंभूते करतले ? हिमशीतले। अत्र 'हिमशीतल'शब्दस्तस्मिन्कामाभावं द्योतयति। तथा चाह; 'अनुरागोऽनुरक्तायां रसावह इति स्थितिः। अभावे त्वनुरागस्य रसाभासं जगुर्बुधाः'।।४।।

### (३) जगद्धरकृत- सारदीपिका

।।४।। जितेति । जितविसशकले, प्रियकरस्पर्शउदञ्चितरोमाञ्चतया मृणालखण्ड-जेतरीत्यर्थः। भित्तं शकलखण्डे वा, **इत्यमरः**। करतले एवातिकोमलतया नलिनीदले, पुनः हिमशीतले, हिमवदन्यस्यापि तापहरणसमर्थे, ईदृशे मृदुभुजयुगले,[२३] भूषणभारासहनशङ्कास्पदसुकुमारशालिबाहुयुग्मे, मरकतवलयमिति, जातावेकवचनम्, नीलरत्नमयकङ्कणानि एवं मधुकरनिचयानि, तानि वितरति, न्यस्यति। भुजपङ्क्ति-साहित्येन एव कमलस्य शोभाधिवयादिति तथा कृतवानिति भावः अत्राप्यसमस्त-रूपकम्।।४।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। किंच, जितबिसेति। मृदुभुजयुगले तस्याः कोमले बाहुयुगे मरकतवलयमिन्द्रनीलमणिकङ्कणं तमेव मधुकरनिचयं भ्रमरसमूहं विकिरति अर्पयति। कीदृशे भुजयुगले ? जितं निजमार्दवेन शैत्येन चाभिभूतं बिसशकलं मृणालखण्डं येन तादृशे। पुनः कीदृशे ? करतलमेव नलिनीदलं पद्मं यत्र तादृशे। यद्वा, करतलमेव नलिनीदलं पद्मिनीपत्रं यत्र तादृशे। पुनः कीदृशे ? हिमवच्छीतले। अत्र यद्यपि करतलस्य पद्मिनीपत्रत्वरूपणं न विरुद्धमिति द्वितीयव्याख्याने मरकतवलयस्य भ्रमरसमूहत्वेन रूपणात्करस्य पद्मरूपणमाच क्षोपलभ्यमित्येकदेशविवर्तिरूपकम्। तदुक्तं **काव्यप्रकाशे** (१०/९४), 'श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत्।' अस्यार्थः; केचन पदार्थाः श्रौताः श्रुतिपठिताः साक्षाच्छब्दाः, केचन आर्थाः, तदन्यार्थानुपपत्तिगम्या यत्र रूपके तदेकदेशविवर्तीति। 'नलिनी पद्मिनी पद्मव्योमसिन्धुसरोवरे' इति **विश्वः** । 'मरकतो नीलमणिः' इति ।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। जितेती। हे सखि! जिते विसशकले मृणालखण्डे येन तादृशे ततोऽत्यन्तकोमल इत्यर्थ। करतल एव नलिनिदले कमलपत्रे यस्य तादृशे, दलस्तानाङ्गुलीयककरतलरूपकमलसमेत इत्यर्थः। हिमशीतले नीहारवत् देहतापहारिणी, उपभोगोचित सौख्यसमेत भ्रमररूपमित्यर्थः मरकतवलयं गरुत्मतरन्तकङ्कणानि वलयमिति जातावेकवचनम्। वितरति निक्षपिति कमलकल्पकर-तलान्तकृते विससमानबाहुषु गतमधुकरपटलतुलःमरकतवल्यानि परिष्करोति, इत्यनेन प्रकारेण जपते इत्यन्वयः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। अपि किङ्करोत्यत आह; मृदुभुजयुगले कोमलबाहुयुगले मरकतवलयं मरकतघटितकङ्कणं वितरति ददाति। विपूर्वस्तरतिर्दाने। दानपदार्थस्तु प्रकृते परिवापनमेवेत्यवधेयम्। यद्वा तदीयभुजपीडनशङ्क्या मृदु लघु यथा स्यादेवं भुजयुगले मरकतवलयं वितरतीत्यन्वयः। कीदृशे भुजयुगले ? जितबिसशकले जितं बिसशकलं येन तस्मिन्। तथा च ततोऽप्यधिककोमले इति वाक्यार्थः। पुनः किम्भूते ? करतलनलिनीदले करावेव नलिनीदले यत्र तस्मिन्। पुनः कीदृशे ? हिमशीतले हिमादपि शीतल इत्यर्थः, कामानलतप्तानां तापशान्तिकरत्वात्। कीदृशं वलयम् ? मधुकरनिचयमिव इति रूपकालङ्कारः। अन्यस्मिन्नपि बिसदन्ते पद्मिनीपत्रयुक्ते हिमशीतले कश्चिन्मधुकरनिचयं विक्षिपतीति ध्वनिः। 'मृणालं बिसमब्जादी'त्यमरः। 'भित्तं शकलखण्डे वे'ति च। 'युग्मन्तु युगलं युगमि'त्यपि। 'स्वरूपानुर्द्धयोस्त-लमि'त्यपि। 'नलिनी पद्मिनी पद्म व्योमसिन्धुः सरोवर' इति **विश्वः**।। 'कङ्कणे वलयों मत' इति **धरणिः**।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। किञ्च जितेति। श्रीकृष्णस्तस्या मृदुभुजयुगले कोमलबाहुयुग्मे मरकतवलयं इन्द्रनीलमणिखचित[३] कङ्कणमेव भ्रमरसमूहं वितरत्यर्पयति। एतेन मरकतवलयस्य भ्रमरसमूहत्वेन भुजयुगल[४]सौरभाधिक्यं सूचितम्। कीदृशे ? जितमभिभूतं [५] तिरस्कृतं मदनेन गौरवतया वा बिसशकलं मृणालसमूहो येन। पुनः कीदृशे ? [६] करतलं नलिनी [७] दलसदृशं यत्र। पुनः कीदृशे ? [८] हिमशीतले हिमादपि शीतले विरहसन्ताप[९] हारित्वात्। कङ्कणे वलयो मतः इति धरणिः (?)।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। जितेति। मृदुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरकतरत्नखचित-कङ्कणमेव मधुकरनिचयं भ्रमरसमूहं [१०] वितरति ददाति विरचयतीत्यर्थः। कीदृशे [११] भुजयुगले ? जितबिसशकले [१२] जितकमलिनीदले। भ्रमरसमूहस्तिष्ठतीति। [१३]करतलनलिनीदले करतलमेव पद्मिनीपत्रं तादृशे [१४]। रूपकालङ्कारः।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। जितेति। हिमवच्छीतले जितं बिसशकलं कमलनालखण्डो येन तस्मिन्। मृदु च तत् भुजयुगलञ्च तस्मिन्। एवं तरलितनलिनीदले कमलपत्रे। मरकतवलयमेव मरकतकङ्कणमेव मधुकरस्य निलयं आश्रयं सदृशमित्यर्थः। वितरति तनोति। अत्रापि रूपकालङ्कारो व्यस्तः।।४।।

१.तरसितनलिनीदले-इ.२.निलयं-इ.३.कङ्कणे च-ग.४.सौरभ्याधिक्यं सूचितमिति-फ.ग.ह.ज.५.निजमृसम्मर्दनेन-इ.फ.ग.ज.६.करतलमेव नलिनीदलं यत्र-ग.करतलमेव कमलिनीदलं यत्र-इ.ह.करतलमेव नलिनीदलं कमलिनीदलं यत्र-फ.ज.७.दलं-इ.८.नास्ति-इ.फ.ग.ह.ज. ९.हाकरकत्वात्-ग.१०.विरचति ददाति। विरचसतीत्यर्थः-क.११.नास्ति-ड.१२.नास्ति-ड.ल.म.१३.तः१४.पर्यन्तो भागः पञ्चमपद-व्याख्यान्ते दृश्यते-ड.नास्ति-ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। जितेति। मृदुभुजयुगले मरकतवलयं हरिन्मणिखचितकङ्कणं विकिरतीति वाक्यार्थः। किंविधे ? जितबिसशकले अधरीकृतमृणालखण्डे। ''मृणालं विसमब्जादिकदम्बे षण्डमस्त्रियाम्'', ''भित्तं शकलखण्डे वा'' **इत्यमरः**। पुनः किंविधे ? करतलनलिनीदल इति। करतलं नलिनीदलमिव यस्येति विग्रहः। पुनः किंविधे ? **हिमेति**। हिमशीतले कामानलोपतप्तानां तापशान्तिकरणात् शीतलत्वम्। मृणालं कमलदलं च शीतलं भवति। मरकतवलयं मधुकरनिचयमित्यसमस्तरूपकम्। मरकतमणीनां श्यामत्वाद् भ्रमररूपता।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। अपरञ्च मृदुभुजयुगले मरकतवलयमेव मधुकरनिचयं वितरति अर्पयति। कीदृशे ? जितानि विसशकलानि मृणालखण्डानि येन तस्मिन् करतलमेव नलिनीदलं यत्र तस्मिन्, अतएव हिमवच्छीतले सम्भोगिन्याः कामतापराहित्यादिभिप्रायः मृणाले भ्रमरार्पणेनाद्भुतकुंजत्वम्।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। जितेति ।जितविसशकले, प्रियकरस्पर्शे, उदञ्चितरोमाञ्चतया मृणालखण्ड-जेतरीत्यर्थः। भित्तं शकलखण्डे वा' **इत्यमरः**। करतले एवातिकोमलतया नलिनीदले, पुनः हिमशीतले, हिमवदन्यस्यापि तापहरणसमर्थे, ईदृशे मृदुभुजयुगले, भूषणभारासहन-शङ्कास्पदसुकुमारशालिबाहुयुग्मे, मरकतवलयमिति, जातावेकवचनम्, नीलरत्नमय-कङ्कणानि एव मधुकरनिचयानि, तानि वितरति, न्यस्यति ।भुजपंक्तिसाहित्येन एव कमलस्य शोभाधिक्यादिति तथा कृतवानिति भावः अत्राप्यसमस्तरूपकम्।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। जितबिसशकलेति; तस्याः युवत्याः बिस, मृणालनालवलये कोमले भुजयुगले सुशीतले तथैव तस्याः करपल्लवमतीव रक्तवर्णं कमलपुष्पमिव पद्ममिव शोभनं सुन्दरं वा दृश्यते। कमलनालं पत्रं वा काम सन्तापहारकः। श्रीकृष्णः मरकतमणि इव मृणालनालं वलयीकृत्य हिमशीतलतां तनोति। अत्र भुजपंक्ति साहित्येन एव कमलस्य शोभाधिक्याादिति तथाकृतमिति। असमस्तरूपकम्।। ४।।

**५- रतिगृहजघने विपुलापघने मनसिजकनकासने।**
**मणिमयरसनं तोरणहसनं विकिरति कृतवासने।। रमते० ।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। रतिगृहजघने मणिसररसनं विकिरतीति योजना। रतिगृहं च तत् जघनं चेति कर्मधारयः। रतिगृहत्वेन रतिगृहं रूपितम्। सदा तदाश्रयत्वात् गृहं गमनादृतमति-सुन्दरमिति। मणिसरसनं विशेषणमाह। तोरणहसनमिति वहिर्द्वारसदृशमित्यर्थः। ''तोरणोऽस्त्री बहिर्द्वारमित्यमरः''। कीदृशे जघने, विपुलापघने महतीत्यर्थः। विपुलमपघनमङ्गं यस्येति विग्रहः। पुनः कीदृशे, मनसिजकनकासने कामस्य स्वर्णपीठ इत्यर्थः। पीतवर्णत्वात् सन्तोषजनकत्वाच्च जघनं कनकासनत्वेन रूपितम्। पुनः कीदृशे, कृतवासने कृतावासनो यत्रेति विग्रहः, पिनद्धकाञ्चीकतया जातसौन्दर्य्यातिरेकात् कृता रसनमिति विग्रहः। केचिन्मणिसरसनमित्यपि पठन्ति। मणिसरेण रत्नमालयान्वितं रसनं मेखला अथच मणिमुक्तादिः तस्य सरः लतिका तेन लक्षितं, रसनं मेखलां वा,। ''स्त्रीकट्यांमेखलाकाञ्ची क्लीबेसाररसनं तथा।''।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।।अपि च, रतीति। स तस्या रतिगृहजघने मणिमयरसनं मेखलं विकिरति। रतिगृहं च तज्जघनं च। जघनस्य रतिगृहेति नाम्नि सत्येव रतिं गृह्णा ति। रतेरावासप्रस्थापितत्वेन विशेषणपरता। किंभूते ? विपुलापघने विपुलावयवे। पुनः किंभूते ? मनसिजकनकासने कामस्य हेमपीठे। किंभूतं रसनम् ? तोरणहसनम्। रतिगृहं तोरणसदृशमिति यावत्। किंभूते रतिगृहे ? कृतवासने कृतं वासनं गन्धादि यस्य। गृहं च अधिवासपरिकल्पितासनादि रमणीयं भवति। अत्र 'कनक' शब्दः स्मरहरप्रियत्वेन कामस्योद्वेजको भवतीति ध्वन्यते।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। रतिगृहेति। विपुलापघने, मांसलाङ्गभूते, मनसिजस्य, मदनमहाराजस्य कनकासने, सुवर्णनिर्मितसिद्धपीठे, अत एव कृतवासने कामेनैव कृताधिवासिते, अनेन सहजसौरभत्वं सूचितम्। किं वा कृता श्रीकृष्णस्य सम्भोगस्पृहारूपवासना येन तत्र। अथवा कृष्णेन कुङ्कुमादिना कृताधिवसिते, ईदृशे, रतेः कामप्रियाया गृहे निवासास्पदे जघने, रतिसहितमदनसुखोपवेशस्वर्णमयसिंहासनरूपे, कट्यग्रभागे, मणिसररसनं, मणिसरो मणिमालिका, सारसना च मणिसररसना। सर्वो द्वन्द्वः विकिरति, विक्षिपति। तद्दर्शनसञ्जातकम्पकरतया यथातथं विनश्यतीत्यर्थः। कीदृशंतोरणं नाम बहिर्द्वारोपरि वितायमानमाङ्गल्यस्रक् तस्य हसनं, तिरस्कारी, हसनमिति, कर्तरि ल्युट् प्रत्ययः। किं वा तोरणस्य हसनमुपहासो यस्यतम्।।५।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। किंच, रतिगृहेति। रतेः शृङ्गारस्य गृहे आश्रये मणिमयरसनं मुक्तामयीं मेखलां विकिरति क्षिपति। अत्र विकिरतीत्यनेन काञ्चीवन्धनसमये श्रोणीस्पर्शजनित-साध्वसवशात्कम्प्यमानकरः क्षिपति, न तु बध्नातीति ध्वनितम्। कीदृशे ? विपुलापघने विपुलो विस्तीर्णोऽपघनोऽवयवो यस्य तादृशे, अतिमांसल इत्यर्थः। पुनः कीदृशे ? मनसिजस्य कामस्यासने कनकनिर्मितसिंहासन इव विस्तीर्णत्वादतिगौरत्वाच्च जघनस्य कनकासनसाम्यम्। अत्र जघनस्य कनकासनत्वरूपणमनुपठ्यमानमनसिजस्य महाराजत्वमाजीवतीत्येकदेशविवर्ति रत्यादिरूपकमिति। कीदृशं मणिमयरसनम् ? तोरणस्य मङ्गलस्य स्रजो हसनमुपहासो यस्मात्तादृशम्। अन्योऽपि यदि सिंहासने उपविशति तदा तत्र परिजनैर्वन्दनमौलिका बध्यते। मनसिजसिंहासनीभूते तस्याः जघने क्षुद्रमणिकारूपमाङ्गल्यस्रजं बध्नातीति भावः। पुनः कीदृशे जघने ? कृतं वासनं सस्त्रं

समाहृत्यापि काञ्चीं बध्नति कृष्णेऽतिलज्जया नायिकया कृतं शाटिकादिरूपं वस्त्र यत्रेत्यर्थः। यद्वा, कृतं वासनं श्रीकृष्णवशीकरणाय धूपविशेषो यत्र तादृशे ।अत एव तया वशीकृतः सन् मामवधूय तया सह रमत इति भावः। धूपविशेषश्च स्वदेहे नायकवशीकरणाय च नायिकया कर्तव्य इति कामशास्त्रे उक्तम्। तदुक्तं रतिरहस्ये; 'वरयुवतीमलयोद्भवसूक्ष्मैलासर्जकृष्टसिद्धार्थैः। सर्वाङ्गी गोधूपः सर्वजनानां वशीकरणम्।।' इति। यद्वा, कृता तत्कान्तिदर्शनात्कृष्णेन वासना भोगेच्छा यत्र तादृशे। यद्वा, कृतं वासनमर्थात्कामेन स्थानं यत्र तादृशे। यद्यपि 'मनसिजकनकासन' इत्यनेनैव कामस्थानं प्राप्तं तथापि नित्यं तत्सान्निध्यसूचनायैतदुक्तम्। 'अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्' **इत्यमरः**। 'सिंहासनं तद्धैमम्' इत्यपि। 'रसनं स्वादने पाने रसना काञ्चिजिह्वयोः। रसनं चापि' इति **विश्वः**। 'मङ्गलस्रक्तोरणोर्ध्वे भवेद्वन्दनमालिका' इति **क्षीरस्वामिलिखितकोषः**। 'वासनं वसने चाथ स्थाने ज्ञाने च धूपने' इति **विश्वः**।।५ ।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५ ।। रतीति। हे सखी ! कृष्णः विपुलं विस्तृतं तादृशापघनमङ्गं तादृशे विपुलाङ्गरूप इत्यर्थः। अपघनोऽङ्गमिति निपातनात् साधुः। मनसिजस्य कनकासने सुवर्णनिर्मितसिंहासने कनकासनवदत्युन्नते कान्त्या मनोहरे चेत्यर्थः। किञ्च कृता कस्तूरिकादि द्रव्यैर्निर्मिता वासना अधिवास स कृतो यस्मिन् तादृशे घनसारकस्तूरिकादिद्रव्यैरधिवासित इत्यर्थः। एतादृशे रतेः कामपत्न्या गृहमावासमन्दिरं यत्र तादृशं सत् तज्जघनं च यस्मिन्। पतिसमेत रत्यावासभूत मदनमन्दिरे जपन्नित्यर्थः। अथवा रतिरिच्छा तस्या गृहं स्थानं कामुकस्पृहास्पदम् इत्यर्थः। तादृशे जघने कट्याः पुरो भागे ''पश्चान्नितम्बं स्त्रीकट्या क्लीबे तु जघनं पुर'' **इत्यमरः**। तोरणस्य हसनं परिहासो यस्य तादृशं सुवर्णस्तस्य घटिततोरणमतीत्य प्रकासितमित्यर्थः एतादृशं मणिसरो नाम मणिमालिका सा रसना च मणिसररसनं सर्वद्वन्द्वो विभाषयैकवद्भवतीत्येकवद्भावः। तद्विकिरति विक्षिपति वध्नातीत्यर्थ।।५ ।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। अपि किङ्करोत्यत आह। रतेः श्रृङ्गारस्य गृहम् आश्रयो यज्जघनं नितम्बप्रदेशस्तस्मिन् मणिसारसनं मणिमयमेखलां विकिरति क्षिपतीत्यर्थः। कीदृशे ? विपुलो महान् अपधनोऽङ्गावयवो यस्य तस्मिन्। तेन नितम्बप्रदेशस्य गौरवातिशयो दर्शितः। पुनः कीदृशे ? मनसिजस्य कामस्य कनकासने कामपीठे इव विस्मृतत्वात्

निरन्तरमधिष्ठितत्वाच्चेत्यवधेयम्। पुनः कथम्भूते ? कृतवासने कृता वासना स्पृहा यत्र, कृष्णेनेत्यर्थात्। रसनापरिधापनसमये वस्त्राविगमनेन कृष्णेन सम्यक् प्रकारेण दर्शनात्तत्र स्पृहा कृतेति वाक्यार्थः। यद्वा कृतं वासनं धूपनं यत्र एतादृशे। सुरतार्थं जघनप्रदेशं वराङ्गना धूपयन्तीति प्रसिद्धिः। मणिसारसनं कीदृशम्? तोरणस्य हसनं निन्दकम्। तोरणं हसतीति नन्द्यादित्वात् कर्त्तरि न्युः। अन्यस्मिन्नपि राजगृहे विपुलशरीरे महाजनाधिष्ठिते तोरणं क्षिप्यत इति ध्वनिः। रूपकनामात्रालङ्कारः। अपधनोऽङ्गमिति निपातने। 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा। क्लीबे सारसनञ्चाथ पुंस्कट्यां मेखला त्रिष्वि'त्यमरः।। 'वासनं धूपने ज्ञाने इच्छायामपि वासनेति धरणिः।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। किञ्च रतिगृहेति। श्रीकृष्णः रतेः सुरतशृङ्गारस्य वा गृहे जघने नितम्बे मणिमयरसनं मुक्तामयीं मेखलां विकिरत्यर्पयति। कीदृशम्? [१]तोरणहसनं तोरणस्य [२] वनमालिकाया हसनं [३] निन्दकम्। राज्ञि सिंहासनोपविष्टे [४] वनमालिका बध्यत इति भावः। [५] कीदृशे ? विपुलापघने महत्तरमांसले। पुनः कीदृशे ? कामस्य [६] कनकासने सुवर्णासने। एतेन गौरवत्त्वमतिशयेन सूचितमिति। पुनः कीदृशे ? कृतं कामेन वासनं निवासो वस्त्रं वा सुगन्धो वा यत्र। अङ्ग प्रतीकोऽवयवोऽ[७]पघनोऽथ कलेवरम् **इत्यमरः** (२.६.७०)। [८] वासनं वसने वाऽथ स्थाने यानेवधूयने इति विश्वः [९] (७१.४२)।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। रतीति। रतेः शृङ्गारस्य गृहे आश्रये जघने नितम्बे मणिमयरसनं मुक्तामयीं मेखलां विकिरति ददाति। कीदृशे जघने ? विपुलो महत्तरोऽपघनः शरीरं यस्य। अतिमांसल इत्यर्थः पुनः कीदृशे ? मनसिजस्य [१०] कामस्य कनकनिर्मितं सिंहासनमिव (विद्यमाने)। [११] कीदृशम् मणिमयरसनम्? [१२] तोरणहसनं तोरणस्य [१३] वन्दनमालिकाया हसनं निन्दकम्। यदा राजा सिंहासने उपविशति तदा [१४] वन्दनमालिका बध्यते। [१५] पुनः [१६] कीदृशे ? कृतवासने कृतं दत्तं वासनं वस्त्रं यस्मिन् वस्त्रोपरि मेखलां बध्नातीत्यर्थः। यद्वा कृतं कामेन वासनं स्थानं यत्र। [१७] वासनं वा पाठः वासनं वसने वासस्थाने ज्ञाने च धूपने इति विश्वः (७१.४२)।।५।।

१.तोरणस्य हसनं-अ.ब.नास्ति-इ.फ.ग.ह.ज. २.चन्दनमालिकायाः-ह.ज. ३.निन्दनम्-इ.फ.ग.ह.ज. ४.चन्दन-फ.ज. ५.नास्ति-फ.ज. ६.नास्ति-इ.फ.ग.ह. ७.जघनो-इ.फ.ग.ह.ज. ८.तः ९.पर्यन्तं नास्ति-अ.ब.वासनं वसने वीरासने ज्ञाने च धूपने-विश्वः १०.नास्ति-क. ११.कीदृशे-ल.म.कीदृशम्-क. १२.नास्ति-ल.क.म.ड. १३.चन्दन-क. १४.चन्दन-क. १५,१६.नास्ति-ड.ल.म. १७.वासनं पाठः-क.

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।५ ।। रतिगृहेति। विपुलः अपघनः अवयवो यस्मिन् तस्मिन्। विशालभाग इत्यर्थः। मनसिजस्य कनकासनं सिंहासनं तस्मिन् निवासस्थाने तदालोकनेन उद्दीपनं भवतीति। तदारोपः। कृतं वासनं अगरुधूपनेन मृगमदलेपनेन वा परिमलितं तस्मिन्। रतिः काममहिषी तस्याः गृहञ्च तत् जघनं तस्मिन् सम्भोगस्थलमिति भावः। तोरणस्य बहिर्द्वारस्य हसनं उपहासकम्। मणिमयरसनं रत्नखचितकाञ्चीं विकिरति निबध्नातीत्यर्थः। तोरणग्रह उत्सवकाले रसालपल्लवादिमालाबन्धनं लोके प्रसिद्धतोरणे बध्यते इति तोरणशब्देन रसालसर इति कथितम्।।५ ।।

**(१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।५ ।। रतिगृहेति। रतेः प्रमोदात्मकस्य भावस्य गृहमास्पदं यज्जघनं तस्मिन्। मणिसारसनं मणियुक्तकाञ्चीकं विकिरति विक्षिपतीति योजना। ''स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा। क्लीबे सारसनं च'' **इत्यमरः**। रतिगृहत्वेन जघनं रूपितम्, सदा तदाश्रयत्वात्। किंविधम्? **तोरणहसनमिति**। तोरणसदृशमित्यर्थः। सुन्दरगृहस्य सतोरणत्वं युक्तमेव। जघने किंविधे? विपुलापघन इति। विपुलमपघनमङ्गं यस्येति विग्रहः महतीत्यर्थः। पुनः किंविधे? मनसिजकनकासने इति। कामस्य स्वर्णपीठे इत्यर्थः। तत्र कामो वसतीति कृत्वा पीतवर्णत्वात् सन्तोषजनकत्वाच्च जघनं कनकासनत्वेन रूपितम्। पुनः किंविधे? कृतवासन इति। कृता वासना यत्रेति विग्रहः। पिनद्धकाञ्चीकतया जातसौन्दर्यातिरेकात् कृता उपभोगवाञ्छा यत्रेत्यभिप्रायः। कृष्णेनेत्यर्थात्। यद्वा कृतवासने कृताच्छादने। ''वस आच्छादने'' इति धातुः। अत्र रतिगृहजघन इति तावद् वामनाचार्यः। किं च स चासमस्तमेव विशेषस्योत्कर्षमपकर्षं वा विवक्षितं प्रतिपादयति। अपि च रतिगृहत्वं जघनस्य विधेयोऽर्थः। स च समासे विच्छायतां व्रजति। तेन विधेयाविमर्शदोषः। तदेतद्दोषभयात् पाठान्तरमिच्छन्ति सुधियः रतिगृहजघने इति। जघने किंविधे? रतिगृहे रतिं गृह्णातीति क्विप् तस्मिन्।।५ ।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।५ ।। तथा च रतेर्गृहेआश्रये जघने मणिमयरसनं निक्षिपति तत्स्पर्शजातकंपतया अयथातथं विन्यन्यतीत्यर्थः। कीदृशं? तोरणस्य माङ्गल्यस्रजो हसनमुपहासो यस्मात् तत्। कीदृशे? विस्तीर्णम् अपघनं अङ्गं यस्य तस्मिन्, तथा कामस्य स्वर्णपीठे अतः कृता श्रीकृष्णस्य लीलाविशेषवासना येन तस्मिन्।।५ ।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। रतिगृहेति। विपुलापघने, मांसलाङ्गभूते, मनसिजस्य, मदनमहाराजस्य कनकासने, सुवर्णनिर्मितसिद्धपीठे, अत एव कृतवासने कामेनैव कृताधिवासिते, अनेन सहजसौरभत्वं सूचितम्। किं वा कृता श्रीकृष्णस्य सम्भोगस्पृहारूपवासना येन तत्र। अथवा कृष्णेन कुङ्कुमादिना कृताधिवासिते, ईदृशे रते: कामप्रियाया गृहे निवासास्पदे जघने, रतिसहितमदनसुखोपवेशस्वर्णमयसिंहासनरूपे, कट्यग्रभागे, मणिसररसनं, मणिसरो मणिमालिका, सा रसना च मणिसररसना। सर्वो द्वन्द्व: विभाषैकवत् भवतीति एकवद् भाव:। मणिमालान्यूत रसनाकलाप इत्यर्थ:। विकिरति, विक्षिपति। तद्दर्शनसञ्जातकम्पकरतया यथातथं विनश्यतीत्यर्थ:। कीदृशम्, तोरणं नाम बहिर्द्वारोपरि वितायमानमाङ्गल्यस्रक् तस्य हसनं, तिरस्कारी, हसनमिति कर्त्तरि ल्युट्प्रत्यय:। किं वा तोरणस्य हसनमुपहासो यस्यात्तम्।।५।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

५- रतिगृहजघनेति; तस्या युवत्या: रतिगृहं नाम शृङ्गारस्थानं जघनप्रदेशं वा मांसलेऽङ्गभूते कन्दर्पस्य सुवर्णासनमिव अति रमणीयं शोभमानमस्ति। एतद् खलु कनकासनं कामसिद्ध्यर्थं सुवर्णनिर्मितं सिद्धपीठमस्ति। तत्र सहजसौरभत्वं सूचितमस्ति। अस्मिन् मनोरमे शृङ्गारसिद्धपीठे मांसलस्थाने रतिदेवायतने मणिसररसनां अथवा मणिमयकटिमेखलां काममन्दिरस्य तोरणमिवानुभूयते। फलत: तत् खलु भगवत: श्रीकृष्णचन्द्रस्य कर्षणभूमि: सञ्जाता। स खलु लीलाविशेषार्थं वासनां वर्द्धयते।। ५।।

**६-चरणकिसलये कमलानिलये नखमणिगणपूजिते।**
**बहिरपवरणं यावकभरणं जनयति हृदि योजिते।। रमते०।।६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। चरणकिशलये यावकभरणमलक्तकपूरणं जनयतीति योजना, आताम्रत्वात् चरणं किशलयत्वेन निरूपितम्। "पल्लवोऽस्त्री किशलयमित्यमर:"। यावो लक्तो द्रुममय **इत्यमर**:। कीदृशे कमलानिलये लक्ष्मीगृहे श्रीयुक्ते इति यावत्। पुन: कीदृशे, नखमणिगणपूजिते, नखान्येव मणय: तद्गणेन पूजिते इत्यर्थ:। ननु चरणकिशलयमेव लोहितं तत्कथं यावकभरणं ददातीत्याह। बहिरपवरणमिति बहिर्वारिक इत्यर्थ:। मणिजुष्टं हि गृहं विशेषादाद्रीयते, चरणकिशलयं च लक्ष्म्या: गृहत्वेन निर्द्दिष्टं, जुष्ठं मणिवृन्देन, यत: प्राचीररूपेणालक्तकेन वा वृतमित्यभिप्राय:। कीदृशे हृदि योजिते श्रृङ्गारकालेबक्षसि

अर्पित इत्यर्थः अथवा हृदि योजिते, हृत्सदृश इत्यर्थः। हृदयमपि हरेः कमलागृहं, मणिजुष्टं धृतकौस्तुभत्वात्।।६ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६ ।। अपि च, चरणेति। हरिस्तस्याश्चरणकिसलये यावकभरणं पूरणं जनयति । किंभूते ? हृदि योजिते योगं प्रापिते। अर्थात् श्रीकृष्णस्य हृदि। किंविशिष्ट चरणकिसलये ? कमलानिलये लक्ष्मीनिवासस्थाने। पुनः किंभूते ? नखा एव मणिगणाः आरक्तत्वात्। तैः पूजिते । किंभूतं यावकभरणम् ? चरणस्य स्वभावलोहितत्वाद्बहि-र्भूतमाच्छादकम्। किंभूते हृदि ? कमलानिलये लक्ष्मीनिवासस्थाने। पुनः किंभूते ? नखमणिगणपूजिते। तया दत्तनखत्वात्।।६ ।।

## (३) जगद्धरकृत- सारदीपिका

।।६ ।। चरणकिसलये यावकभरणं जनयति उत्पादयति। चरणमेव किसलयं नवपल्लवतुल्यं तस्मिन्। यावकस्य अलक्तकस्याभरणं तत् किम्भूतम्। बहिरपवरणम् वरणस्य बहिः। अपवृणोतीति आच्छादयतीति अपवरणं तत् किम्भूते। नखमणिगणपूजिते नखा एव मणयो रत्नानि तेषां गणः समूहः तेन पूजितं अलङ्कृतम् तस्मिन्। पुनः किम्भूते। हृदि योजितेहृदयसन्निहिते।।६ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६ ।। किंच, चरणकिसलये चरण एव किसलयमाताम्रत्वात्कोमलत्वाच्च। तत्र यावकभरणं जनयति। कीदृशे ? कमलायाः श्रियो निलय आश्रये। पुनः कीदृशे ? नखा एव मणिगणा मणिसमूहास्तैः पूजितेऽलंकृते। कीदृशं यावकभरणम् ? बहिर्भूतं दूरीभूतमपवरणं यस्य तादृशम्, स्पष्टमित्यर्थः । पुनः कीदृशे ? हृदि हृदये योजिते। अनुरागातिशयात्प्रापितं स्वहृदये तच्चरणकिसलयं कृत्वा यावकं च रचयतीत्यर्थः। यद्वा, हृदि तस्यैव विशेषणम्। कीदृशे हृदि ? कमलाया लक्ष्म्या निलये आश्रये । लक्ष्म्याः कृष्णवक्षस्येव सर्वदा स्थितिः। पुनः कीदृशे ? नखा एव मणिगणास्तैर्भूषिते। लक्ष्म्या अपि गृहे तदीयचरणकिसलयं ददाति। तेन तस्य सौभाग्यातिशयो ध्वनितः। अत्र 'चरणकिसलये नखमणिगण' इत्यत्र रूप्यमाणयोः किसलयत्वमणिगणत्वयोः परस्परमयोगादयुक्तं नाम रूपकम्। तदुक्तं **दण्डिना** (२/७८); 'इदमार्द्रस्मितं ज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम्। इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम्' इति। 'कमलापीवरयोः' इति **विश्वः**। 'लाक्षा राक्षा जतु क्लीबे यावकालक्तकामयाः' इति **विश्वः**।।६ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। चरणेति हे सखि! कमलानिलये कृष्णप्रियात्वेन कमनीयरूपलक्ष्मीसेव्य इत्यर्थः। किञ्च मणिगणकल्पा ये नखास्तैः पूजिते विराजमानखराजिमनोहर इत्यर्थः। नखमणि इत्यर्थः। करतल एव नलिनीदले कमलपत्रे यस्य तादृशे, दलस्थानाङ्गुलीयक-करतलरूपकमलसमेत इत्यर्थः। हिमशीतले नीहारवत् देहतापहारिणी, उपभोगोचित सौख्यसमेत इत्यर्थः, एतादृश मृदुभुजयुगले कस्याश्चित्कोमलबाहुयुगले मधुकरनिचयं वस्तुरूपकमेतत् भ्रमररूपमित्यर्थः मरकतवलयं गारुत्मतरत्नकङ्कणानि वलयमिति जाताबेकवचनम्। वितरति निक्षिपति कमलकल्पकरतलान्तकृते विससमानबाहुषु गतमधुकरपटलतुल अमरकतवलयानि परिष्करोति, इत्यनेन प्रकारेण जपते इत्यन्वयः।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। अपि किङ्करोत्यत आह; चरणकिसलये पदपल्लवे यावकभरणमलक्तकरसेन स्वभावसिद्धकान्तेः भरणं पूरणं जनयत्युत्पादयति। अन्यत्रापि सजातीयेन पूरणमुचितमेव। कीदृशम्? बहिरपवरणं बहिर्बाह्ये अपवरणमाच्छादकमित्यर्थः। बहिरेब चरणे तरुणीभिरलक्तकरसासङ्गः क्रियत इत्याचारात्तथा वर्णितमित्यवधेयम्। किम्भूते चरणकिसलये? कमलानिलये कमलायाः लक्ष्म्याः निलये गृहे। अन्योऽपि किसलयः कमलाया निलय इति युक्तमुक्तम्। अन्यन्त्रापि लक्ष्मीगृहे बहिर्बाह्येऽपवरणं ओढाविति प्रसिद्धं तत् क्रियत इत्यवधेयम्। पुनः कीदृशे? नखा एव मणयः। तेषां गणः समूहः। तेन पूजिते अर्चिते प्रशस्ते वा। अन्यदपि लक्ष्मीगृहं मणिगणपूजितं क्रियत इत्याशयः। पुनः कीदृशे? हृदि वक्षसि योजिते अलक्तकरसादानार्थमर्थात् कृष्णेन, निवेशित इत्यर्थः। तदेभिः पदैर्निर्भरानन्दयुक्तः स भगवान् न मां स्मरत्यपीति ध्वनितम्।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। किञ्च चरणकिसलय इति। [२] श्रीकृष्णस्तस्याश्चरणपल्लवे यावकभरणं अलक्तकपूर्णं जनयति करोति तस्यास्तदनु शोभार्थम्। कीदृशे? हृदि योजिते नन्दसूनुना सुभृशमतिशयेन तव प्रेमाचिशयाय स्वहृदयं प्रापिते। हृदि [३] तच्चरणं धृत्वा यावकं रचयतीत्यर्थं। पुनः कीदृशे[४]हृदि? कमलायाः लक्ष्म्याः [५] श्रीराधाया निलये मन्दिरे। पुनः कीदृशे? नखा एव [६] मणिगणाः तैः पूजितेलङ्कृते। कीदृशम्? बहिर्भूतमपवरणं आवरणं यस्य; स्पष्टमित्यर्थः। आलक्तकालङ्कारेण हृद्यनुरागो बहिः स्फुटं जनित इति भावः।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६ ।। चरणेति। चरणकिसलये पादपल्लवे यावकभरणं [७] अलक्तकपूरणकं जनयति करोतीत्यर्थ:। कीदृशे चरणकिसलये ? हृदि योजिते [८]कृष्णेनानुरागातिशयात् स्वहृदयं प्रापिते। स्वहृदये तच्चरणं कृत्वा यावकं रचयतीत्यर्थ:। कीदृशे हृदि ? कमलानिलये [९] लक्ष्म्या आश्रये। [१०]कीदृशे चरणकिसलये ? नखा एव मणिगणा: पुष्परागादिरक्त-(त्न)समूहास्तै: पूजिते अर्चिते। कीदृशं यावकभरणम् ? बाह्यमाच्छादकं बहिर्भूतं अपवरणं [११] संवरणं यस्य स्पष्टमित्यर्थ:; नत्वान्तरमिति।।६ ।।

१ .बहिरुपकरणं-इ. २ .श्रीकृष्णश्चरणपल्लवे-इ.फ.ग.ह.ज. ३ .तव चरणं-ग. ४ .नास्ति-अ.ब. ५ .नास्ति-अ.ब. ६ .मणिसमूहा:-इ.फ.ग.ह.ज. ७ .अलक्तभूषणं-क. ८ .कृष्णेन रागातिशयात्-क. ९ .लक्ष्म्याश्रये-क. १ ० .कीदृशकिसलये-ड. १ १ .नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६ ।। चरणेति। कमलाया: लक्ष्म्या: शोभाया: निलये आश्रये। गोपीचरणस्य लक्ष्म्यालयत्वाभावेऽपि लक्ष्मीकान्तवक्षस्सम्बन्धवर्णनाद्वक्ष: स्थल लक्ष्मीसम्बन्धाद्वा कमलानिलयत्वं तत्काले सङ्गच्छते। हृद: विशेषणत्वे अस्थानत्वं स्यादिति चरणविशेषणत्वम्। नखा एव मणिगणा: तै: पूजिते शोभिते हृदि माधववक्ष:स्थले योजिते प्रयुक्ते; बन्धविशेषमानावस्थायां वक्षस्सम्बन्धात्। तदैकाग्रत्वेन माधव-मनस्सिद्ध्यते। चरण एव किसलये पल्लवे बहि: उपकरणं उपचाररूपं यावकं लाक्षारस: तस्य: भरणं लेपनं जनयति रचयति।।६ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। चरणेति। चरणकिसलये यावकभरणमलक्तकपूरणं जनयतीति योजना। आरक्तत्वात् कोमलत्वाच्च चरणं किसलयत्वेन रूपितम्। ''पल्लवोऽस्त्री किसलयम्'', ''यावोरक्तो द्रुमादय:'' **इत्यमर**:। किंविधे ? कमलानिलय इति। लक्ष्म्या: गृहे पद्मसदृशे इत्यर्थ:। कमलानिलय: पद्ममेव कमलानिलय इति परम्परितरूपकम्। किं वा लक्ष्म्या: निलये श्रीयुक्त इति यावत्। पुन: किंविधे ? नखेति। नखान्येव मणयस्तेषां गणेन पूजिते अलङ्कृत इत्यर्थ:। ननु चरणकिसलयमेव लोहितं तत्कथं यावकभरणं ददातीत्याहबहिरपवरणमिति। बहिर्वारकमित्यर्थ:। मणिजुष्टं हि गृहं विशेषादाद्रियते। चरणकिसलयं च लक्ष्म्या: गृहत्वेन निर्दिष्टम्। जुष्टं मणिबन्धे य(न्य)त: प्राचीररूपेण लतिकेनावृतमित्यभिप्राय:। किंविधे ? हृदि योजित इति। शृङ्गारकाले वक्षस्यर्पित

इत्यर्थ:।अथवा हृदि मनसि योजिते परिचिन्तिते। यद्वा हृदि योजिते हृत्सदृश इत्यर्थ:। हृदयमपि हरे: कमलागृहं मणिजुष्टं च धृतकौस्तुभत्वात्।।६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६।। तथा वक्षसि धृते चरणपल्लवे यावकाभरणं वहिरावरणं करोति। यत: श्रियो निवास: अतोनखा एव मणिगणास्तै: पूजिते श्रीनिवासस्य मणियुतस्यच वहिरावृतिर्युक्तै-वेत्यर्थ:।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। चरणेति। कमलाया: सर्वातिशायिन्या: सौभाग्यलक्ष्म्या निलये सदा निवासभूते, अत एव नखा एव मणिगणा, हीरकरत्नपंक्तिस्तेन पूजिते, सेविते अलंकृते इत्यर्थ:। सौभाग्यातिशयास्पदत्वमाह, हृदि योजिते, श्रीकृष्णेन करेण धृत्वा निजवक्षसि संघटिते, ईदृशे चरणकिशलये, पदपल्लवे, यावकभरणरूपं, बहिरूपवरणं जनयति, तत्र हृदयस्थितानुरागं परिपूरयन् तन्निष्क्रमणशङ्कया एवालक्तकरसपूरेण परित: प्रावरणं कृतवान्। अहो! अत: परं किं वदामि आत्मसौभाग्यस्पदत्वमिति भाव:।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६- चरणकिशलयेति; कमलाया: लक्ष्म्या: निलये वासस्थाने हृदये स्वस्य वक्षसि तस्या: तरुण्यां मणिमयेन अस्या: भूषितं पादयुगलं स्वस्य हृदये निधाय अलक्तकरागं रञ्जयति स्वकरेण श्रीकृष्ण:। अत्र सौभाग्यातिशयास्पदं योजितं भगवता श्रीकृष्णेन स्वहस्तेनालक्तकावरणेन हृदयस्य भाव: स्फुटीकृत:। चरणकिशलये अलक्तकरुपं आभरणरुपं जनयति। तत् हृदयस्थितानुरागं परिपूरयन् तन्निष्क्रमणशंकया एवालक्तकरसपुरेण परित: प्रावरणं कृतवान्। अहो अत: परं किं वा वदामि। आत्मसौभाग्यास्पदत्वमिति भाव:।।६।।

**७-रमयति सुदृशं कामपि सुभृशं खलहलधरसोदरे।**
**किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे।। रमते० ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। खलु हलधरसोदरे कृष्णे कामपि सुदृशं रमणीं सुभृशमतिशयं यथा स्यादेवं रमयति सतीह विटपोदरे वनमध्ये विरसम् अफलं यथा स्यादेवं चिरमवसं किमेतत् सखि! बदेति वाक्यार्थः हलधरो बलभदेः तस्य सोदरो भ्रातेति वाक्यार्थः। छलतस्तु हलधरः कर्षकः स प्रायेण मूर्खो भवति तस्यायं भ्राता किमित्यस्य बुद्धिर्भविष्यति इत्येतत्प्रतिपादितम्। मामभिसारस्थलं प्रेष्यान्यया सह रमत इति हरेः खलत्वम्।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, रमयतीति। हे सखि! मौनं विसृज। विरसं यथा स्वात्तथा चिरमिह विटपोदरे निकुञ्जे फलप्राप्तिलक्षणरहितं चिरं किं अवसं किमुषितास्मि। क्व सति? खलहलधरसोदरे दुष्टे बलभद्रभ्रातरि कामपि आत्मसदृशं खलां सुदृशं लक्षणया विरूपनेत्रां रमयति सति। अत्र 'हलधर'शब्दो मामनुकूलां विहायान्यासक्तोऽन्यां रममाणस्य तस्य पामरत्वं द्योतयति। ईदृशस्यास्य प्रतीक्षायां विदग्धया न स्थातव्यमिति भावः।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। हे सखि इह विटपोदरे शाखालतावृतकुञ्जाभ्यन्तरे अवशं परवशं निष्फलं उद्वेगकरं यथा स्यात् तथा चिरं किं विलम्बः। किमिति त्वं वद। कस्मिन् सति। हलधरसोदरे बलदेवानुजे कृष्णे खलु निश्चितं सदृशं स्वयोग्यं यथा स्यात् तथा कामप्यङ्गनां रमयति सति। किम्भूताम्। सुदृशं शोभनेदृशौ लोचने यस्याः सा तथा ताम्।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। रमयतीति। एवं स्वयमेव तत्तदाभरणं विधाय कामपि सुदृशं शोभने दृशौ नेत्रे यस्यास्ताम्। खलो दुर्जनो यो हलधरो बलभद्रस्तस्य सोदरो भ्राता कृष्णस्तस्मिन्सु-भृशमतिशयेन रमयति। हे सखि! वद कथय। इह विटपोदरे कुञ्जमध्ये विरसं रसशून्यं यथा स्यादेवमत एवाफलं यथा स्यादेवं चिरं बहुकालं व्याप्य किं किमित्येवं संस्थितास्मीत्यर्थः। अत्र च हलधरसोदरत्वेन कृष्णस्योपादानम्। हलधरो ग्राम्यः, तत्सोदरोऽयमपि तथैव भविष्यतीति तस्य मां विहाय कयाचिद्गोपिकया सह

केलिकरणमुचितमेवेति सूचनाय । 'विटप: पल्लवे षिङ्गे विस्तारे स्तम्बशाखयो:' इति **विश्व**:। अवसमिति 'वस निवासे' इत्यस्य धातोरुत्तमपुरुषैकवचनम्। लङ्। स्वाधीनभर्तृकेयं नायिका। तदुक्तं **शृङ्गाररतिलके** (१/७४), 'यस्या रतिगुणाकृष्ट: पति: पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता स्वाधीनपतिका यथा' इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। ध्यायतीति। हे सखि! हलधरसोदरे बलभद्रानुजे श्रीकृष्णे सदृशं स्वानुरूपां कामपि लोकोत्तरां सदृशं कान्तां ध्यायति सति इह खलु अस्मिन् खलु इति वाक्यालङ्कारे।

विटपोदरे लतामन्दिरे अफलं निरर्थकं किमिति स्थातव्यमित्यर्थ:। अतएवावशं परायत्तां वा किमिति स्थातव्यम्। विरसं रसाभावेन किमिति स्थातव्यम्। वद कथय। स्वकान्तेऽद्याननुरक्ते सति तदागमनपर्य्यन्तं निष्फलावस्थानम्। अवस्थाने वा पश्चादागतस्य कान्तानुभूतस्य पतेरुपभोगिन्या: अत्र तुच्छत्वात्। ततोऽपि नावस्थातव्यमितिभाव:।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। अतएवान्तविमृश्य पुनरपि सखीं सम्बोधयति। खलश्चासौ हलधरसोदरश्चेति खलहलधरसोदर: कृष्ण:। हे सखि! खलहलधरसोदरे कृष्णे कामपि भाग्यवती सुभृशमत्यर्थेन सुदृशं यदृच्छया कृष्णमुखावलोकनेनास्मदादिभ्य: सूत्कृष्टा दृक् यस्या: सा तथा, तां रमयति। उक्तप्रकारेण क्रीडति सति विरसं यथा स्यादेवं चिरं चिरकालं व्याप्य इह रात्रौ विटपोदरे वृक्षाभ्यन्तरे अहमफलं निष्फलं किमवसं किं स्थितास्मीति त्वं वद। अत: परं न स्थास्याम्येवेत्यभिप्रेत्यातीतारम्भनशोचनमित्यवधेयम्। हलधरपदोपन्यासेन हालिकसोदरत्वं दर्शयता कृष्णस्याविज्ञत्वं सूचितम्। यद्वा हलधरो वलदेव:, स चोन्मत्त: इति तत्सोदरत्वदर्शनेन कृष्णस्याप्युन्मत्तत्वं सूचितमिति।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। किञ्च [३] रमयतीति। हे सखि! खलार्थं हलं [४] धारयति तस्य [५] सोदरे भ्रातरि [६] निर्दयं नखक्षतकर्तु: सहोदरे सदृशे। कामपि नायिकां [७] त्वादृशीं [८] सुदृशं शोभनाक्षीं [९] तच्चरणं सुभृशमतिशयेत रमयति सति इह विटपोदरे धूर्तलतानिकुञ्जे अफलं निष्प्रयोजनं विरसं रसरहितं [१०] तथा चिरं बहुकालं किं अवसम्? किमर्थ? [११]मुषिताऽस्मि [१२] वद कथय। मौनं त्यक्त्वा तत्सन्तोषार्थं गमनं प्रति [१३] सानुकूलवाक्यं कथमेत्यर्थ:। विटप पल्लवे शृङ्गे विस्तारे स्तम्बशाखयो:इति [१४] **विश्व**:(७६.१३)।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। रमयतीति। हे [१५] सखि! खलहलधरसोदरे खलस्य दुर्जनस्य बलभद्रस्य [१६] सोदरे भ्रातरि कृष्णे [१७] कामपि [१८] सुदृशं कामपि नायिकां सुभृशं यौवनरूप-गुणादिभिस्तुल्यं यथा स्यात्तथा [१]रमयति सति क्रीडयति सति इह विटपोदरे लतागृहे अफलं निष्प्रयोजनं विरसं रसरहितं यथा स्यात्तथा चिरं बहुकालं किमवसम्? स्थिताऽस्मि हे सखि! वद कथय। [२]वाहिकस्य सोदर इति साभिप्रायम्। खल इति क्रोधाविर्भावेन। विटपः पल्लवे शृङ्गे विस्तारे स्तम्बशाखयोः इति **विश्वः** (७६.१३)।।७।।

१.सुभृशं-ड.क. २.सदृशं-क.सुदृशं-ड. ३.नास्ति-इ.फ.ग.ह.ज. ४.धारयतीति-इ.फ.ग.-ह.ज. ५.सहोदरे-इ.फ.ग.ह.ज. ६.निदयं-इ.फ.ग.ह.ज. ७.नास्ति-ब. ८.नास्ति-ग. ९.चरणमतिशयेन-इ. १०.नास्ति-अ.ब. ११.उषितासि-अ.ब. १२.नास्ति-अ.ब. १३.स्वानुं-फ.ज. १४.विटपोऽद्रौ लवणे धूर्तमूर्खके खदिरेऽपि च इति विश्वः-अ.ब. १५.नास्ति-क. १६.नास्ति-ड.ल.म. १७.कामपि सुभृशं अत्यर्थं कामपि नायिकां सदृशं यौवनगुणादिभिस्तुल्यं-क.कामपिसुभृशं अत्यर्थं कामिना सदृश यौवनं तपोगुणादिभिस्तुल्यं-ल.म. १८.सदृशं-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। रमयतीति। खलः असौ हलधरस्य सोदरः अनुजः तस्मिन्। सदृक् समाना। प्रकरणवशात् खलत्वगुणयुक्ततया माधवसममिति ईर्ष्यावचनम् कामपीति। ज्ञाते नामन्यपि असहनतयाऽनामग्रहणेन कामपीति। सुदृशं माधववशीकारकरणसमर्थदृक्त्वेन सुदृशं रमयति सति हे सखि! इह विटपोदरे कञ्जे विरसं नीरसं पर्युषितं अफलं माधवाश्लेषफलशून्यं यथा चिरं अवसं स्थिताऽस्मि। यद्वा काकुः; किमर्थं स्थातव्यं एहि गच्छाम इति भावः। यद्वा किमर्थं अहं स्थिता अहो मूढतेति।।७।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। रमयतीति, हे सखि खलु निश्चितं हलधरसोदरे कृष्णे सदृशं आत्मयोग्यां कामपि सुदृशं सुलोचनां रमयति सति इह विटपोदरे विटपानां नवपल्लवानां मध्ये अर्थात् पल्लवशयने विटपानां शाखानां मध्ये वा अरण्ये इति यावत्। शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियामिति रभसः। विरसमफलं निष्प्रयोजनं यथास्यादेवं किमर्थं चिरं बहुकालम् अहमवसम्, अवस्थां वद कथयेति बाक्यार्थः। हलधरो बलभद्रस्तस्य सोदरो भ्रातेति वस्त्वर्थः ''छलतस्तु हलधरः कृषकः स च प्रायेण मूर्खो भवति। तस्यायं भ्राता किमित्यस्य वुद्धिर्भविष्यतीत्येत् प्रतिपादितम्। खलहलधरसोदरे इति पाठे मामभिसारस्थानं प्रेष्यान्यया सह रमत इति हरे खलत्वम्।'' खलं भूस्थानकल्केषुनीच क्रूराधमे त्रिष्विति **मेदिनी**।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। किंच परवञ्चके हलधरस्य अविदग्धस्य सोदरे सदृशे श्रीकृष्णे कामपि सुदृशं सुभृशं यथा स्यात् तथा रमयति सति इह वनमध्ये विरसं विफलं यथा स्यात् तथा किमहमवसमित्येत् सखि वद मामभिसार्य्य अन्यया सह रमणाद्धरे: खलत्वम् ।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। प्रियोपालम्भपुर्वकं सखीं प्रति सनिर्वेदमाह, रमयतीति । हे सखि ! हलधरस्य, कादम्बरीसेवनोन्मत्तस्य बलभद्रस्य सोदरे तत् सदृशे इत्यर्थ:। अनेनास्य इदं करणीयमिदमकरणीयमिति विचारमूढत्वं सूचितम् । सदृशं, निजानुरूपसदृशं, दृग्विक्षेपचातुरीवचनैकचतुरां कामपि वक्तुमनर्हां सुदृशं रमयति, क्रीडयति सति खलु वाक्यालङ्कारे। इह विटपोदरे, शाखावृत्तगहनमध्ये, तिमिरप्राचुर्यात् बहुशङ्कापादके विरसं, तदागमनमपेक्ष्य चिरकालावस्थानेन लघुतापादकमफलम्, आगतस्यापि अन्योपभुक्तमुक्तस्य तस्य दर्शनस्पर्शनायोग्यत्वान्निष्प्रयोजनं च यथा स्यात्तथा चिरसमयावधिशून्यं स्थितास्मि। वद कथय। तत्प्रेमानुबन्धसुखमाधुर्येण बहुशोऽनु-वर्णयन्ती त्वमेव सर्वानर्थं कृतवती, कथमिदानीं मौनमालम्बस्व इति भाव: ।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। रमयतीती; यदि हलधरस्य बलरामस्य सहोदर: श्रीकृष्ण: खलस्वभावक: कामपि सुनयनामनेनैव गाढप्रेम्णा श्रृङ्गारं करोति तर्हि किमर्थं वनमध्ये वृक्षोदरे अहमत्र दु:खेन स्थास्यामि ? ।।७।।

**८-इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके।**
**कलियुग चरितं न वसतु दुरितं कविनृपजयदेवके।। रमते० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। इह मधुरिपुपदसेवके कविनृपजयदेवके, कलियुगचरितं न वसत्विति योजना। कीदृशे रसभणने कृतहरिगुणने, रसभणितविषये कृतं हरिचिन्तनं येन इति विग्रह:।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। अपि च, इहेति। कविराजजयदेवके कलियुगेन रचितं दुरितं न वसतु न तिष्ठतु। किंभूते ? रसभणने रसोद्दीपके। कर्तरि ल्यु:। पुन: किंभूते ? कृतहरिगुणने

कृतहरिकथाभ्यासे। पुनः किंभूते ? मधुरिपुपदसेवके। अथ च, इह रसभणने इति प्रबन्धविशेषणत्वेन योजनीयम्। इयमष्टपदी स्तुतिनिन्दापरत्वेन बोद्धव्या।। तथा च **सङ्गीतराजे**, 'द्रुतमण्ठेन तालेन द्रुतेनैव लयेन च। मल्लारे रसराजे स्यात्पदानां संततेः पुनः। स्वरग्रामस्तथा पाटास्तेना अपि यथाक्रमम्। हरिरसमन्मथाद्यस्तिलकाख्यः प्रबन्धराट्।।' इति हरिरसमन्मथतिलकनामा पञ्चदशः प्रबन्धः।। कृष्णानागमने हेतुं दूतीं विषादोपनयपुरःसरं सोत्कण्ठा राधा प्रकटयति; नायात इति। हे सखि राधे! स मया बहुप्रेयस्यापि आहूतः परं निर्दय इति नायातः। अथ राधाह; हे दूति! स यदि शठः धूर्तः तर्हि किं दूयसे ? त्वं मा विषादं कार्षीः। त्वं दूतीकर्मण्येव प्रभुः। दूत्याह; हे राधे! अहं अत एव दूये। स बहुवल्लभः सन् बह्वयो वल्लभाः प्रेयस्यो यस्य सः स्वच्छन्दं यथा स्यात्तथा रमते क्रीडति। पुना राधाह; तत्र ते किं दूषणं ? न हि त्वं विपरीताचरणेति मदीयमेव दैवं बलवत्तरमित्याह; हे सखि! पश्य जानीहि। बहुतरं ज्ञास्यसि वा। इदं हृदयं चेतो यास्यति। किंभूतं चेतः ? स्वयं स्फुटद्विदलत्। उत्प्रेक्षते; उत्कण्ठार्तिभरादिव प्रियमिलनेच्छापीडाभरादिव।अन्योऽपि आर्तिभरतापितो विदीर्यत एव। किंभूतं चेतः ? अद्य प्रियसङ्गमाय दयितस्य गुणैः आकृष्यमाणं मया निरुध्यमानमपि नीयत एव। आद्यानि च तानि प्रियाणि च तेषां तैर्वा सङ्गमः तस्यायः प्राप्तिः तस्मै, तेन वा दयितः, तस्य वा। आद्यप्रियसङ्गमे निमित्ते अयेन शुभावहेन विधिना दयितस्य। अथवा, आद्यप्रियसङ्गमायेति चतुर्थ्यन्तं भिन्नपदम्। एतदुक्तं भवति; हरिसंगमे पूर्वानुभूतस्मरणादिदं चेतो यास्यत्येव, न ते दूषणं न मम। सोऽपि नोपालम्भमर्हति; विधेः पराङ्नुखत्वात्। अथवा, एवंविधमिदं चेत एव यास्यति ज्ञास्यति इदमेव ज्ञातास्वादं निवृत्तिप्रेष्यतीत्युपरम्यते। अथाद्य पश्य। तद्गुणैराकृष्यमाणं सत् प्रियसङ्गमाय यास्यति ।। अत्र शार्दूलविक्रीढितं वृत्तम्। काव्यलिङ्गमलंकारः। उत्प्रेक्षोत्तरे च।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।। इह कविनृपजयदेवके किमपि दुरितं पापं न विशतु। अथवा न वसतु। न तिष्ठतु। न प्रवेशं करोतु। किम्भूतम्। कलियुगचरितं कलियुगस्य चरितं कलिहेतुकमित्यर्थः। कवीनां नृपः कविचक्रवर्ती स चासौ जयदेवश्च तस्मिन्। किंलक्षणे। कृतहरिगुणने कृतं हरिगुणनं हरिसङ्कीर्तनं येन सः तस्मिन्। कुत्र सङ्कीर्तनं कृतम्। इह। गीते। रसभणने रसस्य श्रृङ्गारस्य भणनं यस्मिन् तत्तथा तस्मिन्। पुनः किम्भूते जयदेवके। मधुरिपुपदसेवके मधुरिपोः श्रीकृष्णस्य पदसेवकोऽत्यन्तभक्तस्तस्मिन्। दुःखेन दुःखितां समागतां दूतीं प्रति राधा प्राह।।८।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।। इहैतत्काव्यकर्तरि कविनृपजयदेवके कलियुगेन चरितमाचरितं कृतं दुरितं न वसतु न तिष्ठतु। कीदृशे ? रसस्य कृष्णविषयशृङ्गाररसस्य भणनं कथनं यस्य तादृशे। अत एव कृतं हरेर्गुणनं चिन्तनं येन तादृशे। अत्र हेतुमाह; मधुरिपोः कृष्णस्य पदसेवके।।८।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।। इहेति। रसस्य विप्रयोगश्रृङ्गारस्य भणनं कथनं यस्मिन् तादृशे विप्रयोगे श्रृङ्गाररसप्रतिपादक इत्यर्थः। नन्द्याल्यु प्रत्ययान्तो भणनशब्दः। इहगीतेऽधिकरणे कृतं निर्मितं हरेः श्रीकृष्णस्य गुणनं कीर्त्तनं येन तादृशे गीते हरिविहारस्वागत इत्यर्थः। अतएव मधुरिपोः श्रीकृष्णस्य पदसेवके दिव्यश्रीपादपद्माराधिके कवीनां नृपो राजा स चासौ जयदेवश्च तस्मिन् कलियुगेन चरितम् आचरितं कलिस्वभावायेत्यर्थः। दूरितं पापं न वसतु न तिष्टतु हरिस्मर्त्तरि प्राप्तावस्थानादितिभावः उक्तम्,

स्थिते मनसि गोविन्दे दूरतो याति पातकम्।
उदयाचलमारूढ़े दिननाथे तमो यथा।। इति।। ८।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। कविनृपजयदेवके कविराजजयदेवके। स्वार्थे कन्। इह रसभणने श्रृङ्गाररसभणने कलियुगचरितं कलियुगे चरितमाचरितं दुरितं दुष्कृतं न वसतु। तथा च सततं श्रृङ्गारवर्णनेन दूरितं भवति, तन्मयि कविराजे न भवत्विति वाक्यार्थः। तदत्र हेतुगर्भविशेषणमाह; कविनृपजयदेवके कथम्भूते ? कृतहरिगुणने कृतं हरेः कृतगीतेन चिन्तनं येन तस्मिन्। पुनः कथम्भूते ? मधुरिपुपदसेवके मधुरिपोः कृष्णस्य पदयोः सेवक इत्यर्थः। तथा च रसभणनमप्यस्माकं कृष्णचरितानुसङ्गीतयेत्यहं कविराजो निरन्तरं तच्चिन्तपरायणस्य कृष्णसेवकस्य मम श्रृङ्गारवर्णनाजनितदुःखकृतमपि न भविष्यतीत्यपि सूचितम्।।८।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। गीतफलमाह-इहेति। इह [३] काव्यकर्तरि कवीनां नृपे कविराजे जयदेवके कलियुगस्य चरितं दुरितं पापं न वसतु न तिष्ठतु। कीदृशे ? रसस्य श्रीराधाकृष्ण-शृङ्गारस्य भणनं कथनं यत्र। पुनः कीदृशे ? कृतं हरेर्गुणगणनं सौन्दर्यादिपरिसंख्या येन। [४]पुनः किंविशिष्टे ? मधुरिपोः [५] श्रीकृष्णचन्द्रस्य चरणसेवके [६] चरणारविन्ददासे। [७] मधुसूदनपदस्य व्या(ख्या) पूर्ववद्ज्ञेया।।८।।

[८]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां पञ्चदशः प्रबन्धः।

१.क्रीडयति-ल.म. २.वाहकस्य-क. ३.काव्यवक्तरि-इ. ४.कीदृशे-इ.फ.ग.ह.ज. ५.श्रीकृष्णस्य-इ.फ.ग.ह.ज. ६.नास्ति-इ.फ.ग.ह.ज. ७.मधुसूदनपदं पूर्ववत्-इ.फ.ग.ह.ज. ८.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। इहेति। [२] इह मयि कविनृपजयदेवके कलियुगचरितं कलियुगकृतं [३] दुरितं पापं न वसतु न तिष्ठतु। प्रार्थनायां लोट्। कीदृशे ? रसभणने कृष्णशृङ्गारकथने। कर्तरि युच्। पुनः [४]कीदृशे ? कृतहरिगुणने कृतं हरेर्गुणनं [५] गुणकीर्तनं चिन्तनं येन। पुनः [६] कीदृशे ? मधुरिपोः कृष्णस्य पदसेवके।।८।।

[७] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां पञ्चदशः प्रबन्धः।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।। इहेति। इह अष्टपद्यां रसभणने शृङ्गाररसकथने कृतं हरेः गुणनं कीर्तनं येन तस्मिन्। मधुरिपुपदस्य सेवके। कविनृपश्चासौ जयदेवकः तस्मिन् ; स्वार्थे कः। कलियुगे चरितं दुरितं पापं न वसतु मा तिष्ठतु।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां पञ्चदशः प्रबन्धः।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।। इहेत्यादि। कविनृपजयदेवके कलियुगचरितं दुरितं दुष्कृतं न वसतु। किंविधे ? मध्विति। मधुरिपोः पादसेवके चरणशुश्रूषके। पुनः किंविधे ? इह र**सभणन** इति। अस्मिन् विप्रलम्भशृङ्गारप्रतिपादने कृतं हरिगुणनं हरिचिन्तनं येनेति विग्रहः।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। इहैतत् काव्यकर्त्तरि कवीनां नृपे जयदेवके कलियुगचरितं न वसतु। कुतः यतो मधुरिपोः पदसेवके अतएव कृतं हरेर्गुणानां चिन्तनं येन तस्मिन् तत्रापि रसस्य शृङ्गाररसस्य भणनं कथनं यत्र तस्मिन्। हृद्रोगं आशु अपहिनोतीत्युक्तेः।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। गीतमुपसंहरति, इहेति। इहेदृशलीलावर्णनपरे, अत एव कविनृपजयदेवके, मयि, स्वार्थे कः। कलियुगेन चरितमाचरितं दुरितं न वसतु। दुरितवारणे हेतून् दर्शयति। कृतं हरेः सकलानर्थहरणचतुरस्य कृष्णस्य गुणनं, गुणादिकीर्त्तनं येन तस्मिन्। अत्रापि

पुनः रसस्य, मधुरभक्तरसस्य भणने, भणतीति भणनमिति नन्द्यादिल्युट्प्रत्ययः। किं च मधुरिपोः पदयोः सवके, परिचारके।।८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

८- इहरसेति; हरेः गुणग्रामवर्णने तथा श्रृङ्गाररसवर्णनेऽपि मधुरिपुः मध्वरिचरणसेवकः कविराज :जयदेवस्तस्य कलियुगस्य कालुष्यरूपं कलिकलुषं तथा भूतं किल्विषं नश्यतां नाम। हरिरसमन्मथतिलकनामा पञ्चदशः प्रबन्धः।।८।

**४४-नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे**
**स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।**
**पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैर्**
**उत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति।।४४।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४४।। हे सखि! हे दूति! यदि स निर्दयः शठो नायातः तत्र किं दूयसे मा व्यथस्वेत्यर्थः। अस्योपमा,

बालको नानृतो भोगी शुचिर्दक्षो जीतेन्द्रियः।
विदग्धा सात्विकस्त्यागी अगरः सद्भिरुच्यते।।

ननु यमानेतुमहं गता तमानेतुं न शक्तास्मीति दूयते मम हृदयमित्याह। स्वच्छन्दं बहुबल्लभः स रमते, किं तत्र ते दूषणम् इति सोपालम्भनमिदम्, उपालम्भस्त्वत्कृत-कार्य्याय सखीति सम्बोध्य पुनर्दूतीति सम्बोधनादधिगन्तव्यम्। साधु साधु खल्वसि दूति! यतः इदृक् कर्म त्वयाकृतमित्युपलम्भार्थः। इत्थं दूतिमुपालम्भाभ्युरुषिता भङ्ग्या निजमरणं प्रतिपादयन्त्याह। पश्येत्यादि दयितस्य गुणैरातप्यमाणमिदं चेतः प्रियसङ्गमाय स्ययं यास्यति किम्। तदानयनार्थं भवत्यनुनीयत इति भावः। उत्कण्ठार्त्तिभरादिव स्फुटदिति अन्यदपि वस्त्वाधेयभरात् स्फुटत्यभिप्राय राधां प्रेष्यन्यया सह रमत इति हरेः शठत्वं तस्यास्तादृशी दुरवस्थां ज्ञात्वापि नागच्छतीति हरेर्निदयत्वम्।।४४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४४।। कृष्णानागमने हेतुं दूतीं विषादोपनयपुरःसरं सोत्कण्ठा राधा प्रकटयति, नायात इति। हे सखि राधे! स मया बहुप्रेयस्यापि आहूतः परं निर्दय इति नायातः। अथ राधा, हे दूति! स यदि शठः धूर्तः तर्हि किं दूयसे? त्वं मा विषादं कार्षीः। त्वं मा विषादं कार्षीः। त्वं दूतीकर्मण्येव प्रभुः। दूत्या, हे राधे ! अहं अत एव दूये। स

बहुवल्लभ: सन् बह्वयो वल्लभा: प्रेयस्यो यस्य स: स्वच्छन्दं यथा स्यात्तथा रमते क्रीडति। पुना राधा-तत्र ते किं दूषणं ? न हि त्वं विपरीताचरणेति मदीयमेव दैवं बलवत्तरमित्या, हे सखि ! पश्य जानीहि। बहुतरं ज्ञास्यसि वा। इदं हृदयं चेतो यास्यति। किंभूतं चेत: ? स्वयं स्फुटद्विदलत्। उत्प्रेक्षत, उत्कण्ठार्तिभरादिव प्रियमिलनेच्छा-पीडाभरादिव। अन्योऽपि आर्तिभरतापितो विदीर्यत एव। किंभूतं चेत: ? अद्य प्रियसङ्गमाय दयितस्य गुणै: आकृष्यमाणं मया निरुध्यमानमपि नीयत एव। आद्यानि च तानि प्रियाणि च तेषां तैर्वा सङ्गम: तस्याय: प्राप्ति: तस्मै, तेन वा दयित:, तस्य वा। आद्यप्रियसङ्गमे निमित्ते अयेन शुभावहेन विधिना दयितस्य। अथवा, आद्यप्रियसङ्गमायेति चतुर्थ्यन्तं भिन्नपदम्। एतदुक्तं भवतिहरिसंगमे पूर्वानुभूत-स्मरणादिदं चेतो यास्यत्येव, न ते दूषणं न मम। सोऽपि नोपालम्भमर्हति; विधे: पराङ्नुखत्वात्। अथवा, एवंविधमिदं चेत एव यास्यति ज्ञास्यति इदमेव ज्ञातास्वादं निवृत्तिप्रेष्यतीत्युपरम्यते। अथाद्य पश्य। तद्गुणैराकृष्यमाणं सत् प्रियसङ्गमाय यास्यति।। अत्र शार्दूलविक्रीडितं वृत्तम्। काव्यलिङ्गमलंकार:। उत्प्रेक्षोत्तरे च।।४४।।

### (३) जगद्धरकृत- सारदीपिका

।।४४।। हे सखि दूति शठो धूर्तो मन्दो यदि नायातो नागत:। किम्भूत:। निर्दय: निर्गता दया कृपा यस्मात् स तथा। तर्हि किमर्थं त्वं दूयसे परितापं कुरुषे। अनागमने हेतुमाह। स श्रीकृष्ण: स्वच्छन्दं स्वेच्छया यथा भवति तथा रमते विहरति। किम्भूत: बहुवल्लभ: बहुनां नारीणां वल्लभ: प्रिय:। अथवा। बहवो वल्लभा यस्य स बहुवल्लभ:। सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव:। यथा दीर्घजङ्घा। तत्र तस्मिन् विषये ते तव दूषणं किम्। ननु प्रस्तुते किं कर्तव्यमित्याह। यदीदानीमेव मदीयं चेत: प्रियसङ्गमाय स्वयं यास्यति। प्रियस्य सङ्गम: प्रियसङ्गम: तस्मै। इति त्वं अद्यैव पस्य अवलोकय। कथम्। स्फुटम्। सत्यम्। कस्मादिव। उत्कण्ठार्तिभरादिव। पूर्वानुभूतसुखस्मरण-मुत्कण्ठा, तस्या आर्ति: पीडा, तस्या भर: दुखातिशयहेतु: तस्मादिव। किम्भूतं चेत:। तस्य श्रीकृष्णस्य दयितस्य गुणगणै: आकृष्यमाणम्। पुन: किम्भूतम्। स्फुटदिव। विदीर्यदिव। अन्योऽपि गुणगणै: रज्जुसमूहै: आकृष्यमाणोऽपि परवशमायाति।।४४।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।४४।। पूर्वमन्यस्या: कस्याश्चित्कृष्णेन सह केलीमुत्प्रेक्ष्य सख्या अग्रे वाणतवती। संप्रति दूतीं कृष्णेनोपभुक्तां शङ्कमाना वक्रोक्त्या दूतीं प्राह, नायात इति। हे सखि दूति दूत्यकर्मकुशले ! स निर्दयो दयारहितोऽत एव शठ: कृतगूढमदपराधो यदि

नायातस्तदा किं दूयसे किमिति दु:खिता भवसि ? स तु शठो न भवति; किं तु धृष्ट: स्वच्छन्दमेव रमतेऽत: किं दूयसे इत्याह, स्वच्छन्दमिति। स कृष्णो बहुवल्लभोऽनेक-नायिकाप्रियोऽत एव स्वच्छन्दं नि:शङ्कं रमते। यया कयाचिद्गोपिकया सह केलिं करोति। तत्रार्थे ते तव किं दूषणम् ? अपि च, आश्चर्यरम्यस्य प्रियस्य कृष्णस्य संगमाय मिलनायेदं मम चेतोऽन्त:करणं यास्यति। कीदृशम् ? दयितस्य कृष्णस्य गुणै: सौन्दर्यादिभिराकृष्यमाणं बलात्कारेणानीयमानम्। अपरमपि गुणै: रज्जुभिरा-कृष्यमाणमन्यत्र नीयत इति ध्वनितम्। कीदृशं चेत: ? उत्कण्ठार्तिभरादिव स्फुटत्। उत्कण्ठा औत्सुक्यमार्ति: पीडा तयोर्योऽतिशयस्तस्मादिव बहिर्भवत्। अपरमपि वस्त्वन्तरसंकुले स्थाने स्थितं वस्तु शङ्कया बहिर्भवतीति ध्वनितम्। तथा च अत:परं विरहदु:खं सोढुमशक्ततया तद्गुणानेव स्मरन्त्या प्राणा एव त्याज्यास्तत: 'अन्त या मति: सा गति:' रिति स्वयमेव चेतस्तत्र यास्यतीति किमत: परं तवात्र गतागतायासेनेति भाव:। अथ वक्तृविशेषाद्बोद्धव्यविशेषाच्छठादिपदाच्च ध्वनितोऽयमर्थ:, हे दूति ! यदि स नायातस्तदा त्वं किं दूयसे ? तदनागमनं ममोत्तप्तये युज्यते, न तव। त्वं तु तत्सङ्गभोगेनेव कृतार्था जातेति सखीमपि सोत्कण्ठामाह। समीचीनं सख्यमाचरितमिति भाव:। यदि च निर्दयकुचोपमर्दनगाढालिङ्गनादिना त्वद्गात्रपीडने दयारहितस्तदापि त्वं किं दूयसे ? नायकस्य तादृशं दयाराहित्यं नायिकया भाग्येन लभ्यत इति भाव:। यदि च शठस्तदापि किं दूयसे ? शठेनैव मद्वञ्चनं कृतवता त्वमुपभुक्तेति शठतेति भाव:। यदि च बहुवल्लभ: स्वच्छन्दं रमते स तदापि ते किं दूष्णम् ? किं च बह्वीषु वल्लभासु मध्ये संप्रति त्वमेका प्रिया जातेति भाव:। पश्याद्येति। तथा च भवादृशीनामुपभोगमात्रमुद्देश्यमिति तस्य बहुवल्लभत्वेऽपि न क्षति:। मम तु प्रथमानुरागसमयमारभ्य प्रियेणान्या मनस्यपि न कृता। मनापि स्वप्नेऽपि तदन्यो नेच्छाविषयोऽभूत्, अधुना तु विधिवशाद्वैपरीत्ये प्राणानेव त्यक्ष्यामीति भाव:। अत्र प्रथमपदे शठो नायक उक्त:। 'स्वच्छन्दम्' इत्यादिना च धृष्ट:। तदुभयलक्षणं **रसार्णवसुधाकरे**, 'अनुकूलस्यैकजाति: शठो गूढापराधकृत्। धृष्टो व्यक्तान्ययुवति-भोगलक्ष्योऽपि निर्भय:' इति।।४४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४४।। अथानिष्टवल्लभानयनजनितं परितापं परिहारचेतसा किञ्चिद्रहस्यं कथयति। नायात इति। हे सखि ! मत्प्रियाचरणशी......दय: परितापपरिहर्त्ता अतएव शठोऽच्युत: विप्रियकारी नायातस्तादृश: श्रीकृष्णो यदि नायात: तावता त्वं किमिति दूयसे परितापं

प्राप्नोसीत्यर्थः। शठस्य निर्दयस्य परितापपरिहाराय अनागमनस्य युक्तत्वादिति भावः। किञ्च हे दूति! परानयनशीले! परार्थमनुचित्तत्वादिति भावः। अतएब तादृशस्यानयनमपि न त्वदाशीर्वहमितिभावः। इतोऽपि त्वया प्रियो नानीत इति खेदयितव्यामित्याह। पश्येति। हे सखि इदं चेतः मदीयमन्तःकरणं दयितस्य श्रीकृष्णस्य सङ्गमाय सम्भोगाय उत्कण्ठा वाञ्छा तया आर्त्तिः पीडा तस्याः भरादिव भरात् स्वयमेव स्फुटं यथा तथा यास्यति, श्रीकृष्ण समीपंप्रतिगमिष्यति। मारपीडितस्य परागमनपर्य्यन्तम् अवस्थानयोगादिति तद्भारनिवर्त्तकपुरुषशमनस्योचितत्वादिति भावः। पश्य अत्र वाक्यार्थः कर्म अतश्च मम सख्याः राधायाः प्रियसमागमो न जात इति खेदं परित्यज्य सुखेनात्मशरीर-समागमान्मनसः समागमस्यातिशयितत्वादितिभावः तदुक्तम्,

अहमिहैव वसन्नपि तावक-
स्त्वमपि तत्र वसन्नपि मामकः।
न तनुसङ्गम एव सुसङ्गमो
हृदयसङ्गम एव हि सङ्गमः।। इति।। अत्र द्वितीयावस्था।।४४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४४।। सख्या कृष्णस्तथा नानुनीत इत्याशङ्क्यार्थीभर्त्सनपूर्वकनिजार्त्तिमावेदयदि, हे सखि हे दूति! सखीति सप्रेमवचनम्? दूतीति प्रकृतदौत्याभिप्रायेण। यदि शठो धूर्त्तः निर्दयो निष्करुणः नायातः नागतः तदा किं त्वं दूयसे किमर्थमुपतप्ता भवसि? टुदूङ उपतापे। उपतापाभावे हेतुमाह, स बहुवल्लभः बह्वो वल्लभाः प्रेयस्यो यस्य एतादृक्। स्वस्य छन्दः स्वच्छन्दः। क्रियाविशेषणत्वेन नपुंसकम्। 'अभिप्रायश्छन्द आशय' **इत्यमर**। स्वच्छन्दं यथा स्यात्तथा रमते क्रीडति। तत्र विषये ते तव किं भूषणमपि तु न किमपीत्यर्थः। तथा च भवत्याः सदृशपरित्यागमात्रमुद्देश्यं न तु राधाजीवितमित्याशयः। तदत्र किं दूयस इत्युक्त्वा स धूर्त्तो निर्दयो बलुवल्लभः स्वल्पान्वयेनानुनीतोऽपि पुनः पुनस्तथानुनयो भवति। तथा च तदुक्तम् "येन विना न जिविज्जि अडा अनुनिज्जि असोक आववाहो विपत्ते विन अवता हे भन कस्मन वल्लहोग्नी'ति।" भवत्या च स तथा नानुनीत इति तात्पर्यार्थः सूचितः। नास्माकं दोषो भवत्यास्तच्चित्तस्वास्थ्यं कथं स्यादिति प्रकृतार्थमभिप्रेत्याह, पश्य अद्य वर्तमानदिन एव इदं मदीयं चेतो मनः कर्त्तृ प्रियसङ्गमाय स्वयं यास्यतीत्यर्थः। गमनञ्च पूर्वदेशविभागोत्तरदेशसंयोगश्च। तथा च शरीररूपपूर्वदेशविभागेन मरणं सूचितम्। मरणान्तरमवश्यमेता दृशमग्नचेतसो मम तत्सङ्गमोऽपि भविष्यतीति प्रियसङ्गमये-

त्युक्तम्। अत्र हेतुगर्भविशेषणमाह, किम्भुतम्? आकृष्यमाणम। पुनः किम्भुतम्? दयितस्य कृष्णस्य गुणौः सौन्दर्यादिभिः आकृष्यमाणम्। उत्कण्ठा पुनः किम्भूतम्? उत्सुकता। तया या आर्त्तिः तस्या भारो अतिशयः तस्मात् स्फुटदिव विदीर्यमाणमिव*। अन्यदपि किञ्चित्पदार्थानां भरेण स्फुटतीत्युचितम्। तथा च पाषाणादिद्रव्यं विदीयमाण गुणैराकृष्यमाणां गच्छत्येव, तथेदमपि यास्यत्येवेति वाक्यार्थः। आह च, 'उत्कण्ठोत्-केलिके समे। अर्त्तिः पीडा धनुःकोट्योरि'**त्यमरः**।।४४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४४।। [८] एवमन्यवधूरमणोत्कर्षं श्रुत्वा सञ्जातनिर्वेदा दूतीमाश्वासयन्तीव स्वयमेवाह, [९] नायातेति। हे सखि! [१०] दूति दौत्यकर्मकुशले यदि निर्दयो [११] मयि दयाशून्योऽत एव शठो धूर्तः [१२] कुण्ठितरागो निगूढापराधो वा नायातो नागतस्तर्हि [१३] त्वं किं दूयसे वृथा सन्तप्यसे। किं च वञ्चकोऽपि स्वच्छन्दं रमते। अनागमने हेतुमाह, बहुवल्लभः। बह्वीनां वल्लभः प्रियो बह्वयो वल्लभा यस्येति वा। तदानयने ते तव किं न दूषणं कोऽपराधोऽसामर्थ्यात्। ननु तच्छ्रुत्वा गन्तुमुदितामिवाह, पश्योद्येति। इदं मच्चेतः प्रियस्य वल्लभस्य श्रीकृष्णस्य [१] सङ्गमाय मिलनायालिङ्गनाय वा अद्य शीघ्रं [२] स्वयमेव यास्यतीति पश्य जानीहि। कीदृशं [३] चेतः? [४] दयितस्य प्रियस्य गुणैः सौन्दर्यादिभिराकृष्यमाणं वशीकृतम्। पुनः कीदृशम्? उत्कण्ठया प्रियदर्शनेच्छया या आर्तिर्मनः पीडा तस्या भरादाधिक्यादिव स्फुटत् बहुधा भवत् [५] बहिर्भवदिति वा अपरमपि वस्त्वन्तरसङ्कुले स्थाने स्थितं वस्तु साङ्कर्याद्बहिर्भवतिति भावः। नातः परं त्वया [६] तदानयनायायासः कर्तव्य [७] इत्यर्थः।।४४।।

१.नायातस्सकि-इ.फ.ग.ह.ड. २.इहापि-ड. ३.नास्ति-ड. ४.नास्ति-ड. ५.नास्ति-ड.ल.म. ६.नास्ति-ड. ७.नास्तीयं पुष्पिका-ड.क.ल.म. ८.एवमन्यव्रजयुवतीरमणोत्कर्ष-इ.फ.ग.ह.ज. ९.नायात इति-इ.फ.ग.ह.ज. १०.हे दूति-इ.ग.ह. ११.मद्ययाशून्यो-फ.ग.ह.ज. १२.कुण्ठितानुरागो-इ.फ.ग.ह.ज. १३.नास्ति-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४४।। कृष्णस्यानागमनदुःखितां सखीमाश्वासयन्त्याह, नायात इति। हे। सखि दौत्यकर्मकुशले! यदि निर्दयो दयारहितः; शठो [८] धूर्तो वञ्चकः कृष्णो नाऽऽयातस्तर्हि किं दूयसे [९] समुपतप्ता भवसि। अनागमने कारणमाहब हुवल्लभः बह्व्यो वल्लभाः स्त्रियः यस्य सः कृष्णः स्वच्छन्दं स्वेच्छया तत्र स्थाने रमते [१०] क्रीडति। ते तव किं दूषणं कोऽपराधः। तर्हि कथमत्रागमिष्यतीत्यत आहपश्येति। हे सखि! अद्य ममेदं

चेतो मन: प्रियसङ्गमाय कृष्णसम्भोगार्थंस्वयमेव यास्यति। त्वं पश्य जानीहि।[११]कीदृशं चेत:? दयितस्य कृष्णस्य गुणै: सौन्दर्यादिभिराकृष्यमाणं वशीकृतम्[१२]। पुन:[१३]कीदृशम्? उत्कण्ठा औत्सुक्यं आर्ति: कामपीडा तयोर्भरोऽतिशयस्तस्मादिव स्फुटत् बहिर्भवत् अपरमपि वस्त्वन्तरं सङ्कुले स्थाने स्थितं वस्तु साङ्कर्याद्बहि- र्भवतीति; अन्योऽपि गुणै रज्जुभिराकृष्टस्सन्[१४] प्रयातीति।।४४।।

१.सङ्गमायालिङ्गनाय वा-ग. २.स्वयमेव वा-इ.फ.ह.ज.स्वयमेवायास्यतीति-ग. ३.नास्ति-अ.ब.इ.ग.ह. ४.दयितस्य गुणै:-फ.ज.दयितस्य प्रियगुणै:-ग. ५.नास्ति-अ.ब. ६.तदानयनाय प्रयास:-ग. ७.इति-इ.फ.ग.ह.ज. ८.नास्ति-क. ९.सन्तप्ता-क.समुत्तप्ता-ल.म. १०.नास्ति-क. ११.त: १२.पर्यन्तं नास्ति-क. १३.नास्ति-ड. १४.प्रयातीति भाव:-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४४।। नायात इति। हे सखि प्रियकारिणि दूति! निर्दय: कारुण्यरहित: शठ: सङ्केतदानच्छलेन मां प्रस्थाप्य अन्यां गत इति गूढविप्रियकृत्त्वाच्छठ: नायात: नागतश्चेत्त्वं किं विषण्णासि किम्? शठत्वमेव (तस्य) बह्व्य: वल्लभा: कान्ता: यस्य स:। स शठ: स्वच्छन्दं अप्रतिबन्धकं रमते। तत्र तदानयनाभावकार्ये ते दूत्या: दूषणं किम्? न किमपि। तत्प्रतिपादनेन मदभिसरणकारित्वेन तवैवैतद्दूषणमिति व्यङ्ग्यम्। दयितस्य कृष्णस्य गुणै: सौन्दर्यातिकौशलादिगुणै: आकृष्यमाणं इदं मदीयं चेत: उत्कण्ठा औत्कण्ठ्यं कालासहिष्णुता तया आर्ति: पीडा तस्या: भयादिव स्फुटत् भिद्यमानं सत् प्रियस्य कान्तस्य सङ्गमाय स्वयं यास्यति चित्तविस्फोटां दशमीमवस्थां यास्यामीति व्यङ्ग्यम्।।४४।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४४।। नायात इति। हे सखि हे दूति यदि स निर्द्दय: शठो नायात: तत्र त्वं किं दूयसे? मा व्यथस्वेत्यर्थ:। ननु यमानेतुमहं गता तमानेतुं न शक्तास्मीति दूयते मम हृदयमित्याह । स्वच्छन्दं यथा स्यादेवं स बहुवल्लभ: सन् रमते तत् ते किं दूषणम्? अपि तु न किमपि बहुवल्लभ इति। बह्व्यो वल्लभा यस्येति विग्रह: सोपालम्भमिदम्। उपालम्भस्त्वकृतकार्याय। सखीति सम्बोध्य पुनर्दूतीति सम्बोधनादधिगन्तव्यम्। साधु खल्वसि सखि साधुखल्वसि दूति यत: ईदृक् कर्म त्वया कृतमित्युपालम्भार्थ:। इत्थं दूती मुपालभ्य रुषिता भङ्ग्या निजमरणं प्रतिपादयन्त्याह। पश्येत्यादि। अद्य इदानीं पश्य दयितस्य गुणैराकृष्यमाणामिदं चेत: प्रियसङ्गमाय स्वयं यास्यति। किं तदानयनार्थं भवत्यनुनंय(त) इति भाव:। मरणसूचिकां भङ्गीमाह। चेत: किंविधम्? उत्कण्ठार्त्ति-

भरादिव स्फुटदिति। उत्कण्ठाकालविलम्बासहिष्णुता तत् सकाशाद् याऽर्त्तिः वाञ्छितार्थाप्राप्तिजन्यदुःखं तस्या भरोऽतिशय एव भरो भारस्तस्मादिव स्फुटत् आत्मनो विमुक्तम्। स्फुट विसरणे शतृ। ज्ञानजनकात्ममनः संयोगध्वंसस्य मरणरूपत्वात्, अन्यदपि वस्त्वाधेयभरात् स्फुटतीत्यभिप्रायः। यद्यपि मरणानन्तरं मनोऽन्यत्र न याति तथापि मरणेऽपि तं नयत्यन्तर्यामीति लौकिकी रीतिः। अभिसाराय राधां प्रेक्ष्यान्यया रमत इति हरेः शठत्वं तस्या स्तादृशीं दुर वस्थां ज्ञात्वापि नागच्छतीति निर्द्दयत्वम्।।४४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४४।। अर्थ श्रीकृष्णस्य अनागमनेन विषर्णवदनां सखीं प्रति अतिनिर्वेदमाह नायात इति। से सखि! हे दूति! सखीभूत्वापि मत्प्रीत्यै दौत्यकर्मणि प्रवृत्ते:। दयारहितः निजैकाश्रयप्राणरक्षापराङ्मुखः शठोद्धन्तरन्यद् वहिरन्यत्कारी यदि नायातः, तर्हि त्वं किं दूयसे मा व्यथस्वेति। शठतामाह वहुवल्लभः स निःशङ्कं रमते, तत्र कार्य्ये ते तव किं दूषणम्, न किमपि। इत्थं सखीमनूद्य निर्वेदभङ्ग्या आत्मनो दशमीदशामाह। पश्याद्येदानीमेव दयितस्य मिलनाय इदं तदप्राप्तितापोन्मूलितधैर्य्यं ममेदं चेतं स्वयं यास्यति। केन प्रकारेण तदाह, उत्कण्ठाया आधिक्येन स्फुटदिव, तदपि कथं गुणैराकृष्यमाणम् अन्योऽपि रज्ज्वाकृष्टः सन यातीत्यर्थः। श्लिष्टगुणशद्वोक्ति विषयाविरोधिलक्षणायैव दयितशब्दोऽपि तथा।।४४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४४।। कृष्णाय तस्याः प्रणयोत्तरङ्गावस्थां प्रदर्शयितुं तुष्णीमवस्थितां सखीं प्रयत्नायासवैफल्येन स्वकृताक्षेपणं च विषण्णवदनां समालक्ष्य तामनुनयन्ती प्रणयविक्षिप्तचित्ता सा पुनराह, नेति, हे सखि! मत्प्रियाचरणैकप्रवणे। सः प्रणयभङ्गीकृतमल्लाघवः कृष्णः, निर्दयो निजैकगतिकजनजीवनत्राणपराङ्मुखो यदि नायातस्त्वन्नि- वेदितमदवस्थाश्रवणानन्तरमपि नागतस्ततस्त्वं मद्गौरवरक्षणकृतयत्ना किं दूयसे। किमर्थं परितप्यसे। समागतोऽपि तादृशो निर्दयः पुनः अकाण्ड एव प्रणयभङ्गं विधाय गच्छन् अतिलघुतामापादयेत्। ततः अनागमनमेव वरमिति भावः। ननु एष अहमायामीति मया सह निर्गतः किमिति नायात इति विचिन्त्य दूये, इत्याशङ्क्याहशठ इति हे दूति! सखि! मदर्थानुभूत पुनः पुनः यातायातखेदे! अभिमानं संत्यज, शठः कल्पितवाङ्माधुर्येण प्रलोभितत्वन्मानस उत्कण्ठित इव त्वया सह निर्गत्यापि पुनरन्यथाकृतसङ्केतः यदि नायातस्ततोऽपि किं परितप्यसे। समायातश्चापि तादृशशठः निजसौभाग्यप्रकटनपटीयान् प्रियान्तरप्रणयविक्षिप्तचित्तो गोत्रस्खलनादिना सन्ताप-

मेवाधिकं वितनुयात्। ततो वरमनागमनमिति भावः। ननु च त्यदीयोत्कण्ठातिशयः बहुकृत्य न कथितः। अतो वा नागत्य कामप्यभिससारेति, मद्दूषणं विभाव्य अनुतपामीत्याशङ्क्याह, बहुवल्लभः, बह्व्यः वल्लभा यस्य सः स्वच्छन्दं रमते। कयाऽपि दयितया विविधसम्भोगसुखानि यत्र, तत् तत् केशप्रसाधनमकरिकालिखनयावकरञ्जना-दिसरसविनोदेन निःशङ्कं क्रीडति। तत्र विषये तनूकृत्य मदवस्थापादनं ते तव किं दूषणं, न किमपि, किन्तु गुण एव। प्रस्तावसदृशं वाक्यमिति न्यायादिति भावः। ननु तत् समागमं विना लवमात्रमपि स्थातुं न शक्नोषीति चिन्तया सन्तपामीत्याशंक्य उक्तिभङ्ग्या आत्मनः दशमीं दशां सूचयन्ती आह, पश्येति। अद्येदानीमतिसूक्ष्मस्यापि कालोपाधिनिमेषादेर्दुरतिवाहनीयत्वेन चिरत्वप्रतीयमानात् अद्येति स्थूलोपाधित्वमुक्तम्। इदं तत्प्राप्तिशतगुणितोद्वेगं चेतः, सन्तततच्चिन्तनविगलितवेद्यान्तरं मनः प्रियसङ्गमाय स्वतः व्यवधानदुःखरहितालिङ्गनजनितक्षतवेदनाधरचुम्बनानाकुलितकेशग्रहादि महोत्सवशालितया अति प्रीतिकराय सम्भोगायेत्यर्थः।

दयितस्यातिदुर्लभतया निरतिशयप्रेमसम्पादनैकपरायणस्य गुणैर्मानिनीजनमनो-बन्धनसावधानैः, सौन्दर्यादिभिराकृष्यमाणं सत् उत्कण्ठार्त्तिभरादन्तर्गतमहोत्कण्ठा-जनितदुःसहविरहपीडातिशयात् स्फुटदिव सञ्जायमानोद्भेदमिव बहिर्भवदित्यर्थः। स्वयं यास्यति। अनाहूतमनुपदिष्टमार्गमनपहतप्रसरं, अनपेक्षितावसरं, गमिष्यतीति भावः। पश्य, जानीहि, यद् वा कृष्णाय राधायाः प्रौढानुरागातिभूमितां प्रदर्शयितुं सखी तस्यानागमनमुपक्षिपति। नायातीति, हे सखि! वञ्चनानर्हे राधे! मया बहुधोक्तः अपि निर्दयो नायात इति सख्युक्ते राधाया प्रतिवचनम्। हे सखि! यदि शठो नायातो नागच्छतु, ततस्त्वं किमर्थं दूयस इति। पुनस्तां कोपयितुं सख्या वचनम्। स्वच्छन्दं बहुवल्लभः सः रमत इति। ततो राधां प्रतिवचनं, किं तत्रेत्यादि। अनन्तरं कृष्णसङ्ग-मन्तरेण कथं स्थातुं शक्नोषीति सखीवचनं आशङ्क्य राधाया वचनं पश्येत्यादि।।४४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

४४ - नायातेति; सखि! यदि शठः श्रीकृष्णः दक्षिणनायकत्वेन अर्थात् अनेकनारी-परिरम्भणेन स्वच्छन्दतया निःशंकः रमते। अतः अत्रागन्तुं तस्य समयाभावात् नागतः। त्वं किमर्थं दूयसे दुःखितासि त्वं तं मत्समीपं आनेतुं तस्य पार्श्वं गतवती असि। परं स शठः वञ्चको वा नागतः। प्रियतमा नायिकानामाकर्षणाय स्वस्यगुणैः दयितगुणैः श्रीकृष्णस्य यद्वर्तते विशेषता तेनाहमाकर्षिता भूयस्तस्य गुणगानं च करोमि। श्रीकृष्णः मम प्रियतमोऽस्ति। प्राणान् मम तन्निमित्तमुत्कण्ठातिशयेनाहं वहुकष्टमनुभवामि। अत्र शार्दूलविक्रीडितम् वृत्तम्। काव्यलिङ्गालंकारः। उत्प्रेक्षोत्तरे च।।४४।।

।। षोडशः प्रबन्धः / गीतम् १६ ।।

।। देशाख्यरागरूपकतालाभ्यां गीयते ।।

**१-अनिलतरलकुवलयनयनेन।**
**तपति न सा किसलयशयनेन।।**
**सखि या रमिता वनमालिना।। ध्रुवम्।।१ ।।**

वराडीरागेण[१] गीयते

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। कथं त्वच्चेतः कृष्णसकाशं गन्तुमिच्छतीति सखीप्रतिबचनमाशङ्क्याह। इदानीं राधा स्वकीयं विरहदुःखं सखीमुद्दिश्य व्याजेन प्रलपति। विप्रलम्भश्रृङ्गारे प्रलापवतीयं नायिका। वराड़िरागेण गीयते।

अत्र गीते सर्वस्मिन् पदे पूर्वार्द्धं वनमालिनो विशेषणम् अपरार्द्धं स्त्रियाः विशेषणम्। अनिलेत्यादिः या वनमालिना रमिता सा किशलशयनेन न पततीति वाक्यार्थः किशलयशयनेनेति विवक्षावशात् सप्तम्यर्थे तृतीया तथा स्थाल्या पच्यते। कीदृशी अनिलतरलकुवलयनयनेन अनिलेन वायुना यत्तरलं कुवलयं नीलोत्पलं तादृक् नयनं यस्येति विग्रहः। सर्वासां गोपीनां सन्तोषार्थं दृष्टेश्चाञ्चल्यम्।।१ ।।

१. देशवराडी/ देशाख्य

### (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। तानेव दयितस्य सुरतसौशील्यादिकान्गुणानन्यनायिकामग्नत्वेन निन्दास्तुतिपरत्वेनाह; अनिलेति। तत्र पूर्वं ध्रुवपदं यथा; सखि येति। हे सखि! या गोपिका वनमालिना हरिणा रमिता। रमणमिता रमिता। अथवा, रमः संजातो यस्य इति वनमालिना सह क्रीडितेत्यर्थः। अथवा, उद्यानविहारादिभिर्हरिणा वा रममाणा गोपिका हरिणैव तद्विशेषक्रीडने नियुक्ता। आत्मना सह क्रीडनार्थ प्रेरितेति यावत्। अथवा, वनमालिना सह कामेन रन्तुं प्रेरिता, तत्रैव साभिलाषा क्रीडापरा बभूवेत्यर्थः। निन्दापक्षे तु; वनमालिनेति मालायाः सद्भावात्तस्याः संभोगपराङ्न्मुखत्वं सूचितम्। वनलक्ष्म्या मलिनेव; इतस्ततः पुष्परसास्वादात्। इति ध्रुवः।। अथ पदानि। अनिलेति। तत्र प्रतिपदमेकैकं विशेषणम्। तृतीयान्तं वनमालिनः, प्रथमान्तं च या इति पदोपलक्षितायास्तस्याः। तत्रापि च ध्रुवपदाद्विशेषणानां वैपरीत्येन। पक्षे; एतद्विपरीतोऽर्थः सूचितो भवति। किंभूतेन वनमालिना? अनिलेन तरले ये नीलोत्पले ते इव। नीले

कमले इव नयने यस्य । सा गोपिका किसलयशयनेन न तपति नोपतप्ता भवति। पक्षे; या किलान्यमनस्केन प्रियान्तरनिरीक्षणप्रहितचञ्चललोचनेनोपभुज्यते सा किसलयशयनेऽपि न तपतीति न, अपि तु तापं प्राप्नोत्येव।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। हे सखि वनमालिना माधवेन या नारी रमिता संभोगिता सा किसलयशयनेन नवपल्लवशय्यया करणभूतेन न तपति न मुह्यति। रमितेति सर्वपदे योजनीयम्। किम्भूतेन वनमालिना। अनिलतरलकुवलयनयनेन। अनिलेन वायुना तरलं यत्कुवलयं नीलोत्पलं तद्वन्नयने यस्य स तथा तेन।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। संप्रति कृष्णेन रममाणायाः सौभाग्यसुखं तद्विरहिण्याश्च संतापमष्टपद्या कथयति, अनिलेति। गीतस्यास्य देशाखरागो रूपकतालः। गीतार्थस्तु, हे सखि! या वनमालिना कृष्णेन रमिता क्रीडिता सा किसलयशयने पल्लवशय्यायां न तपति नोपतप्ता भवति। कृष्णाङ्गसङ्गे तत्सुखपदमेव भवतीति भावः। कीदृशेन वनमालिना ? अनिलेन वायुना तरलेऽनिलवद्वा तरले चञ्चले कुवलये तद्वन्नयने यस्य तेन। नायिकासंनिधौ साध्वसवशाच्चञ्चलनेत्रेणेत्यर्थः। अथया, याऽरमितेत्यत्र अश्लेषः। तथा च या वनमालिना अरमिता सा किसलयशयने न तपतीति, अपि तु तपत्येव। नद्वये प्रकृतस्यैवार्थस्य प्राप्तेः। यद्वा, किसलयशयनेनेत्येवं तृतीयैव। नञ् शिरश्चालने। तथा चायमर्थः या रमिता वनमालिना किसलयशयनेन न तपति ? अपि तु तपत्येव चेति काक्वा लभ्यते। 'अनिलो वसुवातयोः' इति **विश्वः**।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। अथ राधा कृष्णानुभूतानां कामिनीनां सौभाग्यं सख्याः पुरतो वर्णयति। अनिलेत्यादि। रूपकतालेन गेयम्। तत्र या रमिता वनमालिनेत्येद्ध्रुवपदमिदम्। हे सखि! अनिलेन पवनेन तरलानि चञ्चलानि कुवलयानि इन्दीवराणि तत्कल्पे नयने यस्य। कुवलयनयनेन इत्यत्र मध्यपदलोपी समासः। न समासान्तरम्। उक्तं च वामनेन। बिम्बाधरादौ मध्यपदलोपीन्यामिति नयनचापल्यस्योद्दीपकत्वात् तरलकुवलय- साम्यमवगन्तव्यम् पल्लवतल्पेनापीति यथाहं विरहातुरा उद्दीपकेन पल्लवतल्पदर्शनेन भूमौ पतामि तथा न सा पततीत्यर्थः।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। तादृशस्यापि विश्लेषेण कथमीदृशी भवसीति सखीवचनमाशङ्क्य न केवलमहमेवैतादृशी किन्तु यायास्तेन रमितास्तासां सर्वासामेषैव रीतिरतो नाहमभियोज्य

इत्यतः सकलसाधारण्यं दर्शयति। गीतस्यास्य देशाख्यरागः। रूपकतालः। रागलक्षणन्तूक्तमेव। विप्रलब्धोत्कण्ठिता चात्र नायिका। गीतार्थस्तु हे सखि! या वनमालिना कृष्णेण रमिता क्रीडिता। अत्र निष्ठया रमणस्यातीतत्वं दर्शितम्। तथा च यातीतरतिः सा किसलयशयनेन पल्लवशय्यया न तपति अपितु तपत्येवेत्यर्थः। वनमालिना किम्भूतेन ? अनिलेन वायुना तरलं यत् कुवलयं नीलनलिनं तद्वन्नयनं यस्य स तथा तेन। एतेन नयनस्यातिचाञ्चल्यं दर्शितम्। अथ च या वनमालिना अरमिता न रमितेत्यर्थः सा किसलयस्य शयने न तपति अपितु तपत्येवेत्यर्थः। तथा च वनमालैव परं सुखिनीति भावः। जगद्धरादयस्तु या वनमालिना रमिता सा किसलयशयने न तपति नोत्तप्ता भवति। या वनमालिना अरमिता सा किसलयशयनेन न तपति अपि तु तपत्येवेत्यर्थः इति क्रमेण योजयन्ति। तन्न मनोरमम्। एवं सति कृष्णेन रमितैव। तथा च स्वस्मिन् रमितत्वसत्त्वात् सुखिनीत्वम् अरमितत्वव्यतिरेकाच्च दुःखिनीत्वं प्रसह्येत। तदुभयस्यावर्णनीयत्वादिदानीं सा राधा मनोदुःख-मसहमानाऽन्यस्याश्च कृष्णरमितायाः सुखं कथयतीति स्वोक्तवत्राविरोधाच्चेति।।१।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१।। तत्र गतमपि चेतः सन्तप्तमेव भविष्यतीत्याह, अनिलेति। अक्रीडितायास्तु दुःखं समुचितमेव, क्रीडितायाः क्लेशं पश्य। वनं मद्वियोगाश्रुजलं; तन्मालिना। हे सखि या वनमालिना रमिता क्रीडिता सा किसलयशयनेन मृदुपल्लवतल्पेन न तपति; न सन्तप्ता भवति ? अपि तु भवत्येव। कुतः ? [२] सङ्गानन्तरं विरहशङ्कयाऽनुभूतरसोऽति-दुःखप्रदो भवतीति [३] अरमितावन्नैराश्यमागता। कीदृशेन वनमालिना ? अनिलेन वायुना तरलं चञ्चलं [४] यत्कुवलयं कमलं तद्वन्नयने नेत्रे यस्य तेन। अस्मिन् गीते संयोगवियोगौ ज्ञातव्यौ। राग [५] तालध्रुवपदं पूर्ववत्।।१।।

१.देववराडिरागे-नि.सा.देशाङ्करागेण एकतालीतालेन गीयते-इ.देशवरागः रूपकतालः-ड.देशाङ्करागेणैकतालीतालेन-क. २.संयोगानन्तरं-इ.फ.ग.ह.ज. ३.परमेतावन्नैराश्यमागता-फ.ज. ४.यत्कुवलयं तद्वन्नेत्रे-अ.ब.ग. ५.तालादिध्रुवपदं-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१।। देशवरागः अनिलेति। हे सखि! या नायिका वनमालिना कृष्णेन रमिता क्रीडिता सा किसलय [१] शयनेन पल्लवशय्यया न तपति। [२] अपि च सा या वनमालिना अरमिता मादृशी सा किसलयशयनेन (न) तवपि अपि तु तपत्येवेति काकुः [३]। [४] कीदृशेन ? अनिलेन वायुना तरलं चञ्चलं यत्कुवलयं नीलोत्पलं तद्वन्नयने यस्य [५] सः; तेन सर्वरसानामवलोकनादिति भावः। अस्मिन् गीते सम्भोगवियोगौ ज्ञातव्यौ।।१।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। तत्सम्भोगगुणान् प्रकटीकरोति, अनिलेति। अनिलेन वायुना तरलं चञ्चलं नीलोत्पलं तद्वन्नयने यस्य तेन वनमालिना या रमिता सम्भुक्ता सा स्त्री किसलयशयनेन पल्लवशय्याया न तपति। विरहिण्याः शीतोपचर्याकृतशय्यया सन्तापो न भवतीत्यर्थः। या रमिता वनमालिनेति द्विः पठनीयम्। ध्रुवास्थवनमालिविशेषणानि पदपूर्वदलस्थानि ध्रुवास्थयच्छब्दाकाङ्क्षापूरकाणि उत्तरदलस्थानीति ध्रुवसहितं पदं प्रत्येकमेव वाक्यम्।।१ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। कथं त्वच्चेतः कृष्णसकाशं गन्तुमिच्छतीति सखीवचनमाशङ्क्याह, अनिले-त्यादि। हे सखि! वनमालिना या नारी रमिता सा किसलयशयनेन नवपल्लवशय्यायां न तपति उत्तप्ता न भवतीति वाक्यार्थः। किसलयशयनेनेति विवक्षावशात् सप्तम्यर्थे तृतीया, यथा स्थाल्या पच्यत इति। अहं तु कृष्णसङ्गमाभावात् किसलयशयने सन्तप्तास्मीति भावः। एवमुत्तरत्रापि उक्तिविपर्ययो राधिकायाः स्वगतत्वेन अभिप्रेत इति ऊह्यम्। कीदृशा ? अनिलतरलकुवलयनयनेन इति। अनिलेन वायुना यत्तरलं कुवलयं नीलोत्पलं तद्वन्नयने यस्येति विग्रहः। सर्वासां गोपीनां सन्तोषार्थम् अतिशृङ्गारितया वीक्षस्व वा दृष्टेश्चाञ्चल्यम्।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। तद्गुणैरन्यस्याः सुखं वर्णयन्ती स्वस्यास्तदलाभात् निर्वेदेन श्लोकार्थमेव निश्चिनोति निलेत्यादिना। गीतस्यास्य देशवराड़ीरागरूपकतालौ। हे सखि! या वनमालिना रमिता विविधसम्भोगकेलिभिः नन्दिता सा किशलयशयनेन न तपति पल्लवशय्यायां सुखयति एव इत्यर्थः। एवं सर्वत्र योज्यम्। कीदृशेन अनिलेन ? तरले ये नीलोत्पले तद्वन्नयने यस्य तेन, उत्पलवत् शैत्यगुणेन तापोपशमनात् इति भावः।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ।। एवं श्रीकृष्णसौन्दर्यादिगुणाकृष्टचित्ता तस्य तादृशगुणानुवर्णनपूर्वकं तत्सम्भोगिन्या एव भाग्यमनुमोदमाना प्राह, अनिलेत्यादिना गीतेन। दोशवराडीरागेण गेयमित्युक्तम्। अनिलेति, हे सखि! विश्वासकथनविषयभूते हितोपदेशिकवयस्ये। या प्रेमसौभाग्यवती विचित्रविलासवशीकृतकृष्णचित्ता युवतिः वनमालिना सम्भोगसमयो-चितपरिमितभूषणशालिना श्रीकृष्णेन रमिता, विविधसम्भोगरसेन विनोदिता, सा सम्प्राप्ततदुपलालनसौभाग्या किशलयशयनेन सङ्केततल्पतां नीतेन, नवपल्लवशयनीयेन

न तपति। सन्तापं न प्राप्नोति। अहमेवैका मन्दभाग्या विरहशयनीयतां नीतेन तेन सन्तपामीति भाव:। वनमालिना कीदृशेन, अनिलेन तरले ये कुवलये नीलोत्पले, तत्कल्पे, नयने यस्य तेन। सम्भोगस्पृहाव्यञ्जकचापल्यशालि-हर्षविस्फारिलोचनेन इत्यर्थ:।।१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। अनिलेति; श्रीकृष्णस्य रतिप्रावीण्यं अन्याभि:साकं सुरतरसप्रावीण्यं दक्षिणनायकगुणं चाभिलक्ष्य श्रीराधा सखीमाह कथं सा नायिका कामपरितृप्ता इव व्यवहरति। या नायिका कामपरितृप्ताऽस्ति सा किमर्थं पुन: नलिनीदलेन उष्मतामनुभविष्यति? या खलु वनमालिना वनमालापरिहितनायकेन श्रीकृष्णेन कन्दर्पक्रीडायां प्रेरिता सति तस्या: मन: प्रेम्णा उल्लसितं भवति। अत: कामसंतापजन्यलक्षणं तस्या: न भवति। यस्य नयनं कुवलय इव शोभमानं तेन वनमालिना श्रीकृष्णेन रमिता कोमलपत्रशय्यायां न उत्तापमनुभवति। यतो हि तस्या: तापलक्षणं रमणात् शाम्यति। राधा ब्रवीति, मम कामपीडा वर्तते। अत: नलिनीदलेन उष्मतामनुभवामितीति ध्वनि:।।

**२-विकसितसरसिजललितमुखेन।**

**स्फुटति न सा मनसिजविशिखेन।। सखि या०।।२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। या वनमालिना रमिता सा मनसिजविशिखेन न स्फुटतीति न बिद्धा भवतीत्यर्थ:।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, विकसितेति। किंभूतेन हरिणा? स्फुटितारविन्दमिव मनोहराननेन सा गोपिका कामबाणेन विद्धा न भवति। पक्षे, विलासकलाविमुखेन। केवलं प्रसारितमुखेन संभोगमाप्नोति। सा मदनबाणैर्मनसि न विध्यते? अपि तु विध्यत एव।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। या रमिता सा न स्फुटति न भिद्यते। मनसिजविशिखेन। मनसि अधिकरणे जायत इति मनसिज: मार:, अलुप्तसप्तमीसमास:, तस्य विशिखो बाणस्तेन वनमालिना,

किम्भूतेन। विकसितसरसिजललितमुखेन विकसितं च तत्सरसिजं चेति तद्वल्ललितं सुन्दरं मुखं यस्य स तथा तेन।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।।अथ च, विकसितेति। या वनमालिना रमिता सा मनसिजविशिखेन कामबाणेन न स्फुटति न द्विधा भवति। कीदृशेन वनमालिना ? विकसितं पुष्पितं यत्सरसिजं पद्मं तद्वल्ललितं मनोहरं मुखं यस्य तेन। मुखहास्यत्वेन विकसितपद्मसाम्यं बोध्यम्। अथ च, या विकसितेन सरसिजललितमुखेन वनमालिना रमिता सा मनसिजविशिखेन न स्फुटति ? अपि तु स्फुटत्येवेति पूर्ववत् ।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। विकसितेति। विकसितमुत्फुल्लं यत्सरसिजं तद्बल्ललितं सुन्दरं मुखं यस्य तेन वनमालिना या रमिता सा मनसिजविशिशेन कुसुमरूपमन्मथबाणेन न स्फुटति न भिनत्ति। अथवा मनसिजविशिखेनारविन्देन स्फुटत सति तत्तुल्यसम्बर्द्धितस्य सजातीयतरेण वाधायोगादित्यर्थः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। एवमन्यदपि दर्शयति। विकसितं प्रफुल्लं यत् सरसिजं नलिनं तद्वल्ललितं सुन्दरं मुखं यस्य स तथा। तेन वनमालिना या रमिता अरमिता वा सा मनसिजः कामः तस्य विशिखेन बाणेन न स्फुटति न विदीर्णा भवत्यपितु भवत्येवेत्यर्थः। तथा च तेन रममापैव मनसिजविशिखेन न स्फुटतीति वाक्यार्थः।।२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।।विकसितेति। या रमिता वनमालिनेति सर्वत्र योज्यम्। सा मनसिजविशिखेन कामबाणेन न स्फुटति विद्धा न भवति अपि तु [६] भवत्येवेति पूर्वव[७]त्सर्वत्र योज्यम्। कीदृशेन[८]वनमालिना ? विकसितं प्रफुल्लं[९]यत्सरसिजं कमलं तद्वल्ललितं [१०] मनोहरं मुखं यस्य तेन।।२।।

१.शयने पल्लवशय्यायां-क. २.तः.३.पर्यन्तं नास्ति-क.ल.म.४.कथम्भूतेन वनमालिना-क.५.नास्ति-ड.६.भवत्येवेत्यादि-इ.फ.ग.ह.ज.७.सर्वं सर्वत्र-इ.ग.ह. ८.नास्ति-अ.ब.९.यत्कुवलयं-अ.ब.१०.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। विकसितेति। विकसितं प्रफुल्लं यत्सरसिजं कमलं तद्वन्मनोहरं [२] ललितमाननं यस्य ; एवम्भूतेन [३] वनमालिना या रमिता सा मनसिजविशिखेन [४] कामबाणेन न स्फुटति न विद्धा भवतीति सम्भोगे; वियोगे [५] तु[६]स्फुटत्येवेति [७] काकु:।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। विकसितेति। विकसितं फुल्लं सरसिजं तद्वत् ललितं सुन्दरं मुखं यस्य तेन। अत्र समासगतलुप्तोपमा। वनमालिना या रमिता सा मनसिजस्य मन्मथस्य विशिखेन बाणेन न स्फुटति न विदीर्णा भवति।।२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। विकसितेत्यादि। वनमालिना या रमिता सा मनसिजविशिखेन न स्फुटति न विद्धा भवतीत्यर्थ:। कीदृशा ? विकसितं यत् सरसिजं पद्मं तद्वल्ललितं मनोहारि मुखं यस्येति विग्रह:।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। या रमिता वनमालिनेति सर्वत्र योज्यम्। विकसित सरसिजवत् सुन्दरं मुखं यस्य तेन या रमिता सा कामशरेण विद्धा न भवति अहमेव तेन विद्धास्मीति भाव:।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। विकसितेति। प्रोत्फुल्लकमलवल्ललितं सुन्दरं मुखं यस्य तेन, क्रीडानुमतिसूचककान्ताविलासदर्शनोदितहर्षोत्फुल्लवदनेनेत्यर्थ:। ईदृशेन वनमालिना, या रमिता इति सर्वत्र योजनीयम्। चुम्बनादिना सन्तोषिता सा मनसिजस्य विशिखेन, शोषणसन्तापादिवाणैर्न स्फुटति, न भिद्यते। अहमेव निस्फलोद्यमा तादृशबाणविभिन्नाऽपि न द्वैधीभावं यामीति भाव:।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। विकशितेति, स्फुटितकमलशोभा इव शोभा यस्य तेन श्रीकृष्णेन रमिता तस्या: कन्दर्पपीडा नैव भवति। परन्तु मम राधिकाया: सा पीडा भवतीति ध्वनि:।।२।।

**३-अमृतमधुरमृदुतरवचनेन।**

**ज्वलति न सा मलयजपवनेन।। सखि या० ।।३ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। या वनमालिना रमिता सा अमृतमधुरमृदुतरवचनेन मलयजरचनेन न ज्वलतीति वाक्यार्थः ।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। अपि च, अमृतेति। किंभूतेन हरिणा ? अमृतवन्मधुरतरं कोमलं वचनं यस्य तेन। सा मलयानिलेन न ज्वलति न दीप्यते। अतिप्रियवचनस्य दाता न भावं द्योतयति। तेन 'प्रियवाक् स्त्री ( ?) शीलः स्त्रीणां भवति वल्लभः' इति वाल्लभ्यनिरासान्मनोऽन-वस्थानान्मलयमारुतेन ज्वलत्येव ।।३ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। अथ, अमृतेति। या वनमालिना रमिता सा मलयजपवनेन मलयगिरिजातेन वातेन न ज्वलति न दीप्यते। कीदृशेन वनमालिना ? अमृतादपि मधुरं मृदुतरमतिशयेन कोमलवचनं यस्य तेन। अमृतेत्याद्युचितविशेषणोपपत्त्या चामृतसेकेन ज्वलनाभावस्यो-चितत्वात्। अथ चामृतमधुरमृदुतरवचनेन वनमालिना या रमिता सा मलयजपवनेन न ज्वलति ? अपि तु ज्वलत्येवेति ।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। या रमिता सा न ज्वलति परितापं न प्राप्नोति। केन। मलयजपवनेन मलयजस्य चन्दनस्य पवनस्तेन। अथवा मलयजस्य चन्दनस्य रचनं लेपनं तेन। वनमलिना। किम्भूतेन। अमृतमधुरवचनेन अमृतवन्मधुरं सरसं तन्मृदुतरं कोमलतरं च, अमृतमधुरं मृदुतरं वचनं यस्य स तथा तेन। प्रकृष्टार्थ तरतमौ प्रत्ययौ भवतः ।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। अमृतेति। अमृतमिव मधुराण्यास्वाद्यानि मृदुतराणि अत्यन्तकोमलानि वचनानि चाटूक्तयो यस्य तादृशेन वनमालिना या रमिता सा मलयजरचनेन चन्दनानुनेन न ज्वलति विरहकालेऽपि तापं न प्राप्नोति। अमृतकल्पवचनोपलालितस्यान्येन तापायोगादिति भावः ।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। एवमन्यदपि दर्शयति। अमृतमिव मधुरं मृदुतरम् अतिकोमलं वचनं यस्य तेन वनमालिना या रमित। अरमिता वा सा मलयजपवनेन दक्षिणानिलेन न ज्वलति

अपितु ज्वल्त्येवेति। तथा च तेन रममानैव परं दक्षिाणानिलेन न ज्वल्त्योति वाक्यार्थः।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। किञ्च अमृतेति। [८] अमृतादपि मधुराणि मनोज्ञानि मृदुतराणि अतिशयेन कोमलानि वचनानि भाषणानि यस्य तेन[९] रमिता सा मलयजपवनेन चन्दनवायुना न ज्वलति इति पूर्ववत् सम्भोगे। वियोगे च ज्वलत्येव। अनेन नायकस्य प्रियवचनादयो गुणाः [१०] सूचिताः।।३।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। अमृतेति। अमृतवन्मधुराणि मनोज्ञानि मृदुतराणि अतिकोमलानि [११] वचनानि [१२] वाक्यानि यस्य तेन [१३] वनमालिना या रमिता सा मलयजपवनेन [१४] मलयानिलेन [१५] न ज्वलति [१६] न [१७] सन्दीप्यते सम्भोगे; वियोगे तु सा [१८] न ज्वलति? ज्वलत्येव।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। अमृतेति। अमृतमिव मधुरतरं अतिमधुरं च तत् मृदु च तत् कोमलं च तत् वचनं यस्य तेन। अत्रापि वाचकलुप्तोपमालङ्कारः। तेन या रमिता सा मलयजपवनेन दक्षिणमारुतेन न ज्वलति सन्तप्ता भवति।।३।।

१. अमृतमधुरतरमअदुवचनेन - इ. ड. २. आननं - क. ब. ३. ४. नास्ति - ड. ५.नास्ति -ल.म.६.न स्फुटत्येवेति-ड.७.काक्वा - क. ल. म.८.अमृतादतिमधुराणि-इ. फ. ग. ह. ज.९. रमिताऽपि - इ. फ. ग. ह.ज.१०.निरूपिताः-इ.फ.ग.ह.ब.११.नास्ति-क.ल.१२-१७. नास्ति - ड. १८. न ज्वलत्येव-ल.म.ज्वलत्येव-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। अमृतेत्यादि। वनमालिना या रमिता सा मलयजरचनेन न ज्वलतीति वाक्यार्थः। कीदृशा? अमृतान्मधुरं मृदुतरं वचनं यस्येति विग्रहः।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।।अमृतादपि मधुरतरमति कोमलं च वचनं यस्य तेन या रमिता सा मलयजपवनेन न ज्वलति। अहमेव तेन ज्वलितास्मीति अमृतसिक्ताया ज्वालातिशयानुपपत्तेरिति भावः।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। अमृतेति। अमृतादपि मधुरं लोभनीयं मृदुतरमतिकोमलं वचनं यस्य तेन। तत्कालोचितसुधामाधुरी- धुरीणश्रवणहारिनर्मालापेनेत्यर्थः, या रमिता क्रीडानुकूलतां प्राप्ता, सा मलयजपवनेन, विषसंयुक्तमलयाचलसंबन्धिसमीरेण न ज्वलति। अमृतसिक्ताया विषपरिभवानुपपत्तेः। अहमेव तादृशमलयानिलप्रज्वालित-विरहाग्निदग्धाऽपि भस्मसान्न भवामीति भावः।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। अमृतेति; अमृतमधुरकर्णरसायनमिव कोमलवचनेन कथिता सति श्रीकृष्णेन रमिता। अतः तां मलयपवनः न वाधां क्लेशप्रदं वा जनयति। अर्थात् अहं श्रीराधा तेन प्रपीडिता भवामीति ध्वनिः।।३।।

**४-स्थलजलरहरुचिकरचरणेन।**
**लुठति न सा हिमकरकिरणेन।। सखि या० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। या वनमालिना रमिता सा हिमकरकिरणेन न लुठतीति वाक्यार्थः। कीदृशेन स्थलजलरुहरुचिकरचरणेन स्थलकमलवत्पाणिपादेनेत्यर्थः।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, स्थलेति। किंभूतेन हरिणा? स्थलकमलकान्तिकरचरणेन सा गोपिका चन्द्रकिरणेन न लुठति न भूमौ परिवर्तते। ततः पक्षे, 'स्थलकमल' ग्रहणेन तदङ्गस्य तस्यापद्दायित्वमुत्कम्।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। या रमिता सा हृदि हृदये। केन। हिमकरकिरणेन हिमकरकिरणेन हिमकरस्य चन्दनस्य किरणाः अंशवः तेन। अथवा हिमवत् शीतलाः कराः किरणा यस्य स तथा तेन। वनमालिना किम्भूतेन। स्थलजलरुहरुचिकरचरणेन स्थले यज्जलरुहं करौ च चरणौ च करचरणौ स्थलजलरुहस्य रुचिः शोभा तद्वत्करचरणौ हस्तपादौ यस्य स तथा तेन। अथवा भूमिस्थितौ चरणौ स्थलपद्मवद्भासेते करचरणौ जलजवदित्यर्थः।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। स्थलजलेति। कीदृशेन वनमालिना? स्थलोद्भवं जलरुहं कमलं तद्वद्रुचिर्ययो-स्तादृशौ करौ चरणौ यस्य तेन। अथ च या वनमालिना रमिता सा हिमकरकिरणेन न लुठति किं? अपि तु लुठत्येव।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। स्थलेति। स्थलजलरुहस्य स्थलकमलस्य रुचिरिव रुचिर्यस्य तत्तादृशं करौ चरणौ च करचरणम्। प्राण्यङ्गत्वादेकवद्भावः। स्थलजलरुहवत् करचरणं यस्य तादृशेन वनमालिना श्रीकृष्णेन। अत्रस्थलजलग्रहणं जलरुहस्यात्यन्तकोमलता वर्णोत्कर्षार्थं स्थलनलिनस्य तादृशत्वादत्र जलरुहशब्दो रूढ़िभेदो न यौगिकः। तदपि रक्तवर्णमेव ग्राह्यम्। तस्यैव भगवतः सौभाग्यसूचकत्वात् उक्तं च,

पाणिपादतले रक्ते नेत्रान्तौ च नखानि च।
तालुजिह्वाधरोष्ठं च सप्तरक्तं प्रशस्यते।।

या रमिता सा हिमकरकिरणेन चन्द्रकिरणैः जातावेकवचनम्। न लुठति विरहवेदनया भूमौ गात्रपरिवर्त्तनं न करोतीत्यर्थः। चन्द्रविरोधिजलजसमानकरोपलालितस्य चन्द्र किरणबाधाया असम्भवत्वादितिभावः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। एवमन्यदपि दर्शयति। करौ च चरणौ च करचरणम्। प्राण्यङ्गत्वात् समाहारः। स्थलजलरुहस्य स्थलपद्मस्य रुचिरिव रुचिर्यस्य स तथा। एतादृशं करचरणं यस्य स तथा। तेनैव वनमालिना या रमिता अरमिता वा सा न हिमकरकिरणेन चन्द्रकिरणेन न लुठति नाधःपतति अपितु पतत्येवेति। लुठ अधःपतने धातुः। तथा च तेन रममानैव परं चन्द्रकिरणेन न लुठतीति वाक्यार्थः।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। [४]किञ्च [५] स्थलेति। स्थलजलरुहाणां स्थलकमलानां जलकमलानां च रुचिरिव दीप्तिर्येषां तादृशाः करचरणा यस्य तेन श्रीकृष्णेन रमिता या सा हिमकरकिरणेन चन्द्रकिरणसमूहेन न दहति ; अपि तु दहत्येव। जलरुहं [६] मकरध्वजस्य बाणत्वेनैवेति ध्वनितम्।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। स्थलेति। स्थलजलरुहाणां स्थलपद्मानां रुचिरिव रुचिर्येषां तादृशाः करचरणा यस्य तेन[९]वनमालिना या रमिता सा हिमकरकिरणेन चन्द्रदीप्त्या न दहति [१०] नोपतप्ता भवति। [११] अविवक्षितत्वात्कर्माभावः। इति सम्भोगे; वियोगे तु न दहति ? अपि तु दहत्येव। स्थलपद्मस्यातिलोहितत्वेनोपादानम्।।४।।

१.लुठतित-अ.ब.इ.नि.सा. २.रुचिसमरूचिरेण-इ. ३.विरहभरेण-४.अपि च-इ.फ.ग.ह.ज. ५.नास्ति-इ.फ.ग.ह.ज. ६.कामस्य-इ.फ.ग.ह.ज. ७.नास्ति-अ.ब. ८.कथं तस्य-फ.ज. ९.नास्ति-ड. १०.न मनस्तप्ता-ड. ११.अलक्षिततत्वात्-क. १२,१३.नास्ति-ड. १४.मम मनसि-ड. १५.विदार्यते-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। स्थलेति। स्थलजलरुहं अनीरजकमलं तद्वत् रुचिरं करौ चरणौ च करचरणं, द्वन्द्वैकवद्भावः, यस्य तेन या रमिता साहिमकरस्य चन्द्रस्य किरणेन न लुठति विरहाधिक्यान्निद्राया अभावान्न परिवर्तते। अत्रापि लुप्तोपमालङ्कारः।।४।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। स्थलेत्यादि। वनमालिना या रमिता सा हिमकरकिरणेन न लुलति न ग्लायतीति वाक्यार्थः। किंभूतेन? स्थलजलरुहरुचिकरचरणेन स्थलकमलवत् पाणिपादेने-त्यर्थः।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। स्थलकमलवद्रुचिरौ करौ चरणौच यस्य तेन या रमिता स चन्द्रस्य किरणेन भूमौ न परिवर्त्तते। अहमेव जालवन्धप्रविष्टेव तप्तास्मि। स्थलकमलवत् शीतल करचरणस्पर्शसुखेन उज्ज्वलतया इन्दुकिरणानां तापकत्वावगमादिति भावः।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। स्थलेति। स्थलजलरुहः, कमलाकृतिस्थलसम्भवकोमलारुणपुष्पविशेषः। तस्य रुचिरिव रुचिर्ययोस्तादृशौ करौ, चरणौ च यस्य तेनेति। करचरणस्य सुन्दरत्वं सुकोमलत्वं सुशीतलत्वं च सूचितम्। या रमति, स्तनजघनसंस्पर्शेण सम्भोगाय प्रोत्साहिता, सा हिमकरकिरणेन, विरहज्वरसंदीपनतुहिनकरकिरणैर्न लुठति। भूमौ पतिता न व्याकुलीभवतीत्यर्थः। अहमेव दैवहता निकुञ्जजालगलिततत्किरणकणेषु मूर्च्छितेव पतितापि मरणं न प्राप्नोमीति भावः।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। स्थलेति; स्थलकमल इव यस्य श्रीकृष्णस्य अत्यन्तं मनोरमं पादयुगलं भवति। तथैव श्रीकृष्णेन या कन्दर्पक्रीडा मुदिता सा चन्द्रकिरणेन न पीडामनुभवति। भूमौ वा परिवर्तते। परमहं श्रीराधा चन्द्रकिरणेन क्लिन्ना सती भूमौ पार्श्वं परिवर्तयामि।।४।।

**५-सजलजलदसमुदयरुचिरेण।**

**दलति न सा हृदि चिरविरहेण।। सखि या० ।।५।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। या वनमालिना रमिता सा चिरविरहभरेण हृदि न दलति विदीर्णाशा भवतीति वाक्यार्थः। कीदृशसजलजलदसमुदयरुचिरेण। समुदायः समुदयः **इत्यमरः**।।५।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, सजलेति। किंभूतेन हरिणा? सजलजलदोदयवद्दीप्तिमता। सा गोपिका हृदि दुःसहविरहभरेण न दीर्यते। पक्षे, अत्र 'सजलजलद'ग्रहणेनैव विरहेण संयोगेऽपि प्रियविरहसाम्यमिति निन्दार्थः।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। या रमिता सा हृदि हृदये न दलति। न विदीर्यते। केन। चिरविरहेण चिरं बहुकालं विरहस्तेन। किम्भूतेन वनमालिना। सजलजलदसमुदयरुचिरेण। जलेन सह वर्तन्त इति सजला नवीनाश्च ते जलदाश्च तेषां समुदयः समूहः तद्वद् रुचिरस्तेन।।५।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। सजलेति। अथ च, या वनमालिना रमिता सा विरहाधिक्येन हृदि हृदये न दलति न दीर्यते। पुनः कीदृशेन? सजलो जलसहितो यो जलदो मेघस्तत्समुदयवद्रुचिरेण मनोहरेण। अथ च, या वनमालिना रमिता सा विरहभरेण हृदि न दलति? अपि तु दलत्येवेत्यर्थः।।५।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। सजलेति। सजलानां जलसहितानां जलदानां मेघानां समुदायः समूहः तद्वत् रुचिरेण जलदेत्यत्र योगाक्षदरः। अन्यथा पौनरुक्त्यापत्तेः। अथवा सजलत्वादेव जलदत्वमवगन्तव्यम् एतेन वनमालिना या रमिता सा हृदि हृदये विरहभरेण विरहभावेन न दलति न प्राप्नोति। जलदसमानवर्द्धितस्य वियोगकालेऽपि जलददर्शनसम्बर्द्धित-विरहभारस्य समङ्गमसदितिभावः। जलदस्य विरहिजनतापकारित्वं कविप्रसिद्धमेव। उक्तं च **मालतीमाधवेऽपि**,

दैवादहमत्रतया चपलायतनो त्रयोर्वियुक्ताश्च।

अविरलविलोलजलदकालः समुपातश्चायमिति।।

दहतीति क्वचित् पाठः। तदा जलदसमानाश्लेषसम्भाविताया: विरहाग्निना च भस्मीभावायोगादिति भावः।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। एवमन्यदपि दर्शयति। सजलो जलसहितो यो जलदो मेघः। समुदायोऽस्यास्तीति समुदायः। तस्यादयवः। अर्शादित्वादच्। तद्वत् रुचिरो यो मनोहरः। अत्रावयविनमपहायावयवरूपजलददृष्टान्तेन कान्तेर्निरन्तरोदितत्वं सूचितम्। तेन वनमालिना या रमिता अरमिता वा सा विरहभरेण हृदि न दलनि न विदीर्यते अपितु विदीर्यत एव। सन्तापस्य हृदय एव वर्णनीयत्वात् हृदीत्युक्तम्। तथा च तेन रममानैव *परं हृदि न विदीर्यत इति वाक्यार्थः। एवं व्याख्याने जलदसमुदायस्योत्स्नायरूपस्य रुच्यभावेन कथं जलदसमुदाय रुचिरेणत्युक्तम् इति सहृदयानां दूषणमपास्तमित्यवधेयम्।।५।।

* 'वनमालि नेव' इति पाठान्नरम।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। किञ्च सजलेति। सजलजलदस्य सोदकमेघस्य सम्यगुदयस्तद्वद्रुचिरेण-[७]मनोहरेण वनमालिना रमिता सा हृदि विरहभरेण न दलति; अपि तु विदीर्णहृदया भवत्येव। अनुक्रीडिताया: [८]कथं विर (ह) स्तत्राहविप्रयोगरसमयत्वात्। सजलेत्यनेन श्रीराधाविरहात् श्रीकृष्णस्याश्रुपात इति भावः।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। सजलेति। सजलजलदसमुदयवत् सोदकमेघोदयवत् रुचिरेण सुन्दरेण [१२]वनमालिना या रमिता [१३] सा हृदि [१४] मनसि विरहभरेण विरहाधिक्येन न दलति न [१५] विदीर्यते इति सम्भोगे; वियोगे तु न दलति ? अपि तु दलत्येव।।५।।

क.१२,१३.नास्ति-ड.१४.मम मनसि-ड.१५.विदार्यते-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। सजलेति। सजलः जलसम्भृतः स चासौ जलदः मेघः तस्य रुचेः समारुचिः यस्य तेन। अत्र मेघकान्तेः उपमानत्वात्समपदसत्त्वादार्थी धर्मलुप्तोपमा। या रमिता सा हृदि विरहातिशयेन न दलति न भिन्ना भवति।।५।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। सजलेत्यादि। वनमालिना या रमिता सा विरहभरेण हृदि न दलति न विशीर्णा भवतीति वाक्यार्थः। कीदृशा ? सजलजलदसमुदयरुचिरेण, जलेन सह वर्तत इति

सजलः। स चासौ सजलश्चेति तस्य समुदयः समूहः सम्यक् उदयो वा तद्वद्रुचिर इति विग्रहः। ''समुदायः समुदय'' **इत्यमरः**।।५।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। सजलजलदानां समूहादपि रूचिरेण या रमिता सा विरहभरेण हृदि न विदीर्य्यते जलदवदार्द्रतया विदारासम्भवादिति अहमेव तेन विदीर्णहृदयास्मीति भावः।।५।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। सजलेति। सकलजनसन्तापहारिनीलघनकुञ्जमञ्जुलगात्रेण या रमिता, गाढाश्लेषादिना सन्तोषिता, सा विरहभरेण, चिरकालोपचीयमानवियोगदुःखातिशयेन हृदि हृन्मर्मणि न दलिता, न विदीर्णा भवतीत्यर्थः। अहमेव निर्ल्लजा विरहविदीर्णापि खण्डखण्डं न भवामीति भावः।।५।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। सजलेति; कृष्णमेघमाल इव श्रीकृष्णः तेन या रमणं करोति सा किं हृदयेन न दलति ? श्रीराधा परन्तु अत्र दलति।।५।।

**६-कनकनिकषरुचिशुचिवसनेन।**
**श्वसिति न सा परिजनहसनेन।। सखि या०।।६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। या वनमालिना रमिता परिजनहसनेन न श्वसिति निःश्वासं न त्यजतीत्यर्थः। कीदृशा कनकनिचयस्येय रुचिर्यस्य तदेवंभूतं शुचिः निर्मलं वसनं यस्येति विग्रहः।।६।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६।।अपि च, कनकेति। किंभूतेन हरिणा ? कनकनिकषश्यामरुचिश्चासौ शुचिवसनश्च तेन। अथवा कनकस्य निकषः निकषोपलरेखा तत्कान्तिविमलवस्त्रेण। सा गोपिका परिजनहसनेन न श्वसिति निःश्वासवती न भवति। पक्षे, या काषायवसनादिना संगता भवति सा परिजनैरुपहसिता दीर्घान्निश्वासान्मुञ्चत्येव।।६।।

### (३) जगद्धरकृत- सारदीपिका

।।६।। या रमिता सा न श्वसिति न निःश्वासं तनोति। केन। परिजनहसितेन परिजनः सेवकसखीजनः तस्य हसितमुपहसितं तेन। वनमालिना किम्भूतेन। कनकनिचयरुचि-शुचिवसनेन। कनकस्य सुवर्णस्य निचयो निकरः तस्य रुचिः तद्वद् शुचि निर्मलं शुद्धं वसनं वस्त्रं यस्य स तथा तेन।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। कनकेति। या वनमालिना रमिता सा परिजनानां हसनेन इयति लज्जा रोदितीत्यादिपरिजनहासेन। यद्वा, परितः सर्वतो जनानां हास्येन न श्वसिति न संतापनिःश्वासं त्यजति। कीदृशेन वनमालिना ? कनकनिकषः सुवर्णकषणपट्टिका तस्येव रुचिदीप्तिर्यस्यैतादृशं शुच्यनुपहतं वस्त्रं यस्य तेन। अत्र 'कनक'पदेनैव पीतत्वे प्राप्तेऽपि स्निग्धत्वाप्राप्तये 'निकष'पदोपादानम्। अथवा, या वनमालिना रमिता सा परिजनहसनेन न श्वसिति ? अपि तु श्वसित्येवेत्यर्थः। 'निकषः कषपट्टिका' इति **हारावली**। 'शुचिः शुद्धेऽनुपहते' इति **विश्वः**।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। कनकेति। कनकनिचयस्य सुवर्णसदृशस्य रुचिः कान्तिरिव कान्तिर्यस्य तादृशं शुचि पवित्रं अम्बरं यस्य तादृशेन वनमालिना या रमिता सा परिजनहसनेन परिचारिका परिहसनेन न श्वसिति निःश्वासं न प्राप्नोति। पीताम्बरपरिभुक्तेनावकाशित्वादिति भावः। श्वसितीत्यत्र रुधादिभ्यः सर्वधातुकेतीडागमः।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। एवमन्यदपि दर्शयति। कनकस्य निकषे पट्टिकायां या रुचिः तद्वत् शुचिवसनं यस्य तेन पीताम्बरेण वनमालिना या रमिता अरमिता वा सा परिजनानां हसनेन हास्येन न श्वसिति न दुःखं श्वासं न मुञ्चति अपितु मुञ्चत्येवेति। तथा च तेन रममानैव परं परिजनहसनेन न श्वसितीति वाक्यार्थः। अत्र कृष्णशरीरं नीलत्वात् निकषसदृशं वासश्च पीतत्वात् तत्र कनकसदृशमित्यवधेयम् 'निकषः पट्टिके'ति हारावलिः।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। किञ्च[१] कनकेति। कनकनिकषस्य सुवर्णतेजनपाषाणस्य रुचिरिव [२] रुचिर्यस्य तादृशं शुचि निर्मलं वसनं वस्त्रं यस्य तेन वनमालिना या रमिता सा परिजनहसनेन सखीजनपरिहासवाक्येन न श्वसिति; अपि तु [३]श्वासं करोतीति। वसनमिति श्रीराधाङ्गदीप्तिसादृश्यात्पीताम्बरधारणं न तु मण्डनार्थमिति भावः। तद्यथा,

पीताम्बरं किमिति नन्दसुतो बिभर्ति<br>
नीलाम्बरं किमिति भानुसुता बिभर्ति।<br>
मन्ये दिनेऽपि निजजीवनधारणार्थ-<br>
मालिङ्गनं कलयतो वसनच्छलेन।। इति।

शृङ्गारः शुचिरुज्ज्वलः **इत्यमरः** (१.७.१७)।[४] शुचिःशुद्धेऽनुपहते इति **विश्वः** (२१.६)। निकषः कषपट्टिका इति **हारावली** [५]।।६।।

१.नास्ति-इ.फ.ग.ह.ज. २.रुचिर्दीप्तिर्यस्य-ग.ह. ३.निःश्वासं-इ.फ.ग.ह.ज. ४.तः ५.पर्यन्तं नास्ति-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। कनकेति। कनकनिकषस्य सुवर्ण रेखाया रुचिरिव रुचिर्यस्य तादृशं शुचि विमलं वसनं वस्त्रं यस्य; पीताम्बरेणेत्यर्थः ; तेन [1] वनमालिना या रमिता [2] सा परिजनहसने [3] सपत्नीहसनेन [4] न [5] श्वसिति न श्वसनं करोति इति सम्भोगे; वियोगे तु न श्वसिति ? अपि तु श्वसित्येव।।६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। कनकेति। कनकनिकषस्य रुचिवत् दीप्तिवत् शुचिनी सोज्ज्वले वसने वस्त्रे यस्य तेन। अत्र वाचकलुप्तोपमया पीताम्बरत्वं वस्तु व्यज्यते। या रमिता सा वाग्भूषणविपर्यासजनितेन परिजनानां सखीनां हसनेन न श्वसिति न खिद्यति।।६।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६।। कनकेत्यादि। वनमालिना या रमिता सा परिजनहसनेन परिजनस्य उपहासेन न श्वसिति निश्वासं न त्यजतीत्यर्थः। किंभूतेन ? कनकनिचयस्येव रुचिः कान्तिर्यस्य तदेवंविधं शुचि अनुपहितं शुद्धं वा वसनं वस्त्रं यस्येति विग्रहः। ''शुद्धानुपहिते शुचिः'' **इत्यमरः**। ''स्वर्णं सुवर्णं कनकम्'' **इत्यमरः**।।६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६।। कनकस्य निकषपाषाणेषु या रुचिस्तद्वसनं यस्य, तेन या रमिता सा परितो जनानां हसनेन न श्वसिति सौभाग्यगर्वेण कश्चिदपि न गणयतीत्यर्थः । अहमेव तत् परिहासैर्निःश्वासयुक्तास्मीति भावः।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। कनकेति। कनकनिचयस्य, सुवर्णसमूहस्य रुचिरिव रुचिर्यस्य, तादृशं शुचिर्निर्मलमनुपहतं वा वसनं यस्य तेन। सम्भोगानन्तरं परिहितपीतवसन इत्यर्थः। या स्वाधीनप्रेयसी रमिता, वस्त्राभरणादिभिः सुवेशिता, सा परिजनहसेन,

धारा वाष्पमयी न याति विरतिं लोकस्य निर्मत्सतः,
प्रेमास्मिन्निति नन्दनन्दनरतं लोभान्मनो मा कृथाः।
इत्थं भूरि निवारिताऽपि सरले! मद्वाचि साचीकृत-
भ्रूद्वन्द्वा, नहि गौरवत्वमकरोः किं नाद्य रोदिष्यसि।।

इत्यादि सखीजनोपहासवचनेन न श्वसिति। लज्जादिसम्भवचित्ताश्वासं न करोतीत्यर्थः। अहमेवैका निर्ल्लजा सन्ततखरश्वसितेन विरहाग्निं प्रज्वालयन्ती बहुकदर्थनामनुभवामीति भावः।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। कनकेति; यथा विद्युल्लेखेव शोभनं सुवर्णवर्णाभं वसनं वस्त्रं शुद्धं परिधानं यः करोति तस्य परिजनपरिहासं प्रति भयं नास्ति। परं श्रीराधायाः परिहासपीडा वर्त्तते।।६।।

**७-सकलभुवनजनवरतरुणेन।**
**वहति न सा रुजमतिकरुणेन।। सखि या० ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। या वनमालिना रमिता सा अतिकरुणेन अतिशयेन करुणनाम्ना रसेन रुजं पीडां न वहतीत्यर्थः।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, सकलेति। किंभूतेन हरिणा ? सकलभुवनजनश्रेष्ठतरुणेन सातीव निर्भररसेनापि रुजं पीडां न धारयति। या किल सकलेष्वपि भुवनेषु वरतरुणेनोपभुज्यते तस्यास्तु एकैकस्यापि विरहेण शोको भवतीति निन्दा ।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। या रमिता सा रुजं न वहति। केन। अतिशयकरुणेन अतिशयेन करुणं करुणायुष्यं तेन। अथवा अतिकरुणेन अधिकं करुणस्तेन। वनमालिना किम्भूतेन। सकलभुवनजनवरतरुणेन सकलानि च भूवनानि चेति समस्तानि विश्वानि च तेषु ये जनास्तेषां मध्ये वरः श्रेष्ठः स चासौ तरुणश्चेति तेन। निर्धारणे षष्ठी। समासो बहुव्रीहिः। अनेन किमुक्तम्। या वरतरुणी स्वामिना सार्धमहर्निशं सुरतसुखमनुभवति सा पतिरहितानां विरहिणीनां दुःखं कामपीडादिकं न जानातीत्यर्थः।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। सकलेति। या वनमालिना रमिता सातिकरुणेनातिशयितकरुणारसेनोपलक्षिता सती रुजं तद्विश्लेषजन्यां व्याध्यवस्थां तद्वन्न वहति धारयति। कीदृशेन वनमालिना ? सकलभुवने समस्तलोके ये जनास्तेभ्योऽपि वरतरुणेन श्रेष्ठतरुणेन। अथवा, या वनमालिना रमिता साऽतिकरुणेनोपलक्षिता रुजं न वहति। अपि तु वहत्येवेत्यर्थः।

अस्मिन्पक्षेऽतिकरुणेति कृष्णस्य विशेषणम्। तदतिक्रान्तकरुणा दया यस्य तादृशेन निर्दयेनेत्यर्थः। 'करुणस्तु रसे वृक्षे कृपायां करुणा मता' इति **विश्वः** ।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। सकलेति। सकलानि समस्तानि यानि भुवनानि तेषु ये जनवराः नरश्रेष्ठाः तेषु तरुणेन युना श्रीपुरुषोत्तमेनेत्यर्थः। अतिकरुणेनात्यन्तकरुणावता वनमालिना या रमिता अतिकरुणेनेति भिन्नं वा पदम् अत्यन्तदययेत्यर्थः। सा रुजं वियोगदुःखं न वहनि। अनेन करुणावता गृहीताया वियोगजनितदुःखस्यासम्भवादितिभावः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। एवमन्यदपि दर्शयति। सकलभुवने समस्तस्वर्गादिलोके ये जनाः तेभ्योः वरतरुणेन श्रेष्ठतरुणेन वनमालिना या रमिता अरमिता वा सातिकरुणेन करुणरसेन रुजं पीडां न वहति अपितु वहत्येव। तथा च तेन रममानैव* परं करुणरसेन रुजं पीडा न वहतीति वाक्यार्थः।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। किञ्च[६]सकलेति। सकलभुवने चतुर्दशलोके ये जनास्तेभ्योऽपि वरेण सुन्दरेण श्रेष्ठेन वा तरुणेन च, सकलभुवने यः श्रीराधाख्यो जनो वरः श्रेष्ठस्तरुणो वा यस्य तेन वनमालिना या रमिता सा रुजं पीडां न वहति [७]न[८]धारयति ; अपि तु धारयत्येव। कीदृशेन ? अतिकरुणेन दयातिक्रान्तेन निर्दयेनेत्यर्थः। [९] यद्वा कीदृशी सा ? अतिकरुणरसेनोपलक्षिता ; अस्यां सम्भोगः वियोगश्च निर्वाहितः। [१०]करुणस्तु रसे वृक्षे कृपायां करुणा मता इति **विश्वः** [११](५०.३०)।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। सकलेति। सकलभुवने ये जना युवानस्तेभ्योऽपि वरेण श्रेष्ठेन [१२]तरुणेन च यूनाऽतिकरुणेनातिदयावता [१३] तेन [१४]वनमालिना या रमिता सा रुजं पीडा न वहति इति सम्भोगे ; वियोगे तु सा रुजं वहत्येव। कीदृशेन [१५]कृष्णेन ? अतिकरुणेन करुणां दयां अतिक्रान्तेन निर्दयेनेत्यर्थः। करुणस्तु रसे वृक्षे कृपायां करुणा मता इति विश्वः (५०.३०)। अतिकरुणेनातिकरुणरसेन उपलक्षिता सती।।७।।

१-५.नास्ति-ड.६.नास्ति-इ.फ.ग.ह.ज.७,८.नास्ति-अ.ब.९.नास्ति-इ.फ.ग.ह.ज.
१०.तः११.पर्यन्तं नास्ति-अ.ब.१२.नास्ति-क.१३.नास्ति-क.ल.म.१४,१५.नास्ति-ड

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। सकलेति। सकलभुवनजनेषु त्रैलोक्यलोकेषु वरः श्रेष्ठः स चासौ तरुणः तेन। सा विरहव्याधिं अतिकरुणेन विप्रलम्भजनितशोकेन न वहति। तत्सङ्गमे सति पूर्वोक्तरूपं न भवतीति भावः।।७।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। सकलेत्यादि। वनमालिना या रमिता सा अतिकरुणेन अतिशयेन करुणनाम्ना रसेन रुजं पीडां न वहतीत्यर्थः। कीदृशाम्? सकलभुवनजनेभ्यः वरः श्रेष्ठः चासौ तरुणश्चेति कर्मधारयः।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। सकलभुवनेषु ये जना युवानस्तेभ्यो वरः श्रेष्ठो यः किशोरस्तेन या रमिता सा अतिकरुणरसेन पीड़ां न प्राप्नोति। जगद्वल्लभतरुणप्राप्त्याः करुणानुपपत्तिरिति अहमेव रोदनादिना सखीं कदर्थयामि।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। सकलेति। सकलभुवनेषु चतुर्दिक्लोकेषु ये जनाः, युवानस्तेभ्यो वरतरुणः, सौन्दर्यमाधुर्यचातुर्यादिना, सर्वातिशायि किशोरमूर्त्तिः श्रीकृष्णः, तेन। तथा च कर्णामृते,

तत् कैशोरं तच्च वक्त्रारविन्दं, तन्माधुर्यं ते च लीलाकटाक्षाः।
तत् सौन्दर्यं सा च सान्द्रस्मितश्रीः सत्यं सत्यं दुर्लभं दैवतेषु।। इति।।

या रमिता प्रणयेन बहु मानिता, सा अतिकरुणेन, अतिशयकरुणरसेन उपलक्षिता रुजं, विरहकृतकार्श्यपाण्डिमादिसम्पादकं व्याधिं न वहति, न प्राप्नोति। अहमेव कृतपापा दुःसहविरहव्याधिपीडिताऽपि अन्तिमदशामप्राप्ता सखीजनं कदर्थयामीति भावः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। सकलेति; सर्वे खलु पृथिव्यां ये युवानःसन्ति तेषु श्रेष्ठः श्रीकृष्णः तेन रमिता कदाचित् पीडां नानुभवति। परं राधिकायाः भवत्येव। एतेषु गीतेषु यः वल्लभेन रमते तस्यापि रमणात् प्रागेव पीडा भवति। किशलय शयने, कन्दर्पोऽपि न शरनिक्षेपेण ताडयति। मलयजपवनेन सा न ज्वलति। चन्द्रकिरणेन न तपति। विरहेण न अस्थिरा भवति। परिजनहसनेन नावमानिता भवति। तथा च कामज्वरेण न पीडिता भवति। परन्तु साऽपि एतेषु सर्वेषु लक्षणेषु पीडिता सती पुनः रमणं करोति। अत्रैव विपरीतलक्षणाध्वनिः।।७।।

**८-श्रीजयदेवभणितवचनेन।**
**प्रविशतु हरिरपि हृदयमनेन।। सखि या० ।।८ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८ ।। अपिशब्दो भिन्नक्रमोऽनेनेत्यस्यानन्तरं द्रष्टव्यस्तदयमत्रार्थः। सतां हृदि हरिरस्त्येव असतां हृदि अनेनापि प्रविशत्वित्यादि।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८ ।।अपि च, श्रीजयदेवेति। अनेन श्रीजयदेवभणितं च तद्वचनं च तेन हेतुना हरिः श्रीकृष्णः हृदयं प्रविशतु। अर्थाद्राधायाः अथवा, अयं हरिः हृत्प्रविशतु। 'अपि'शब्दात्त-दारोपकरणवचनानि च । तथा च **सङ्गीतराजे**; 'रागो वराटिका यत्र तालो वर्णयतिस्तथा पदानि स्वेच्छयालापभूषितानि यथाद्युति।। ततः स्वराश्च पाटाश्च ततः पद्यानि कानिचित् इति नारायणपदान्मदनायासनामकः।। प्रबन्धः क्षितिनाथेन लोकनाथस्व वर्णितः'।। इति नारायणमदनायासनामा षोडशः प्रवन्धः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८ ।।अनेन गीतादिप्रबन्धमन्त्रेण वनमाली हरिः श्रीकृष्णः हृदयं प्रविशतु हृद्गोचरो भवतु। अनेन केन। श्रीजयदेवभणितवचनेन। सर्वगामित्वाल्लोकानां हृदयस्थितो भवत्वित्यर्थः। अत्रान्तरे मलयानिलेन पीडिता सती राधा तं पवनं प्रत्याह।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८ ।।श्रीजयदेवेति। अनेन जयदेवभणितमिलनेन श्रीजयदेवेन कविना भणितं वर्णितं यन्मिलनं कृष्णस्य कामिन्या सहेत्यर्थः। ते न हरिरपि कृष्णोऽपि हृदयमर्थाद्गातृणां श्रोतृणां प्रविशतु। यद्वा, श्रीजयदेवभणितस्य यन्मिलनं संबन्धोऽध्ययनगानरूपस्तेन हरिरपि हृदयं प्रविशत्वित्यर्थः।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८ ।।श्रीजयदेवेति। अनेन श्रीजयदेवेन भणितवचनेन जयदेवगदितगीतेन हरिरपि हृदयं प्रविशतु। गीतेन सन्तुष्टो हरिः श्रोतृणां च मनसि आविर्भवतु इत्यर्थः। अपिशब्देनोक्तकिशलयशयनयातनादिदुःखभावः समुच्चीयते। हरिरित्यनेन राधायाः तापहारित्वसूचनाय तद्धृदयप्रवेशोऽपि सूचितः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८ ।।कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। श्रीयुक्तो जवदेवः श्रीजदेवः। अनेन श्रीजयदेवभणितवचनेन प्रकृतगीतेन इत्यर्थात्, हरिः कृष्णः हृदयमपि

विशतु अर्थात् श्रृण्वतां गायताम्। तथा च तदुपस्थापकशब्दप्रवेशात् शब्दो कर्णे प्रविष्ट एव तदुत्तरं शब्दज्ञानोपनीतो मानसज्ञानविषयतां गच्छत्वित्यर्थः। क्वचित् 'भणितमिलनेने'ति पाठः। तत्पक्षे भणितं भणनम्। भावे क्तः। तेन यन्मिलनं प्राप्तिः शब्दोपस्थितिरिति यावत्, तया हृदयमपि विशतु तथा च शब्दज्ञानानन्तरं मानससाक्षात्कारविषयोऽपि भवत्विति वाक्यार्थः।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। (श्रीजयदेवेति)। श्रीजयदेवभणितं यद्वचनं गीतरूपं तेन। [३]अनेन हरिर्मनोहरः सन्तापहारी वा श्रृण्वतां गायतां श्रीराधाया अपि हृदयं प्रविशतु [४] प्रकर्षेण प्राप्नोतु।।८।।

[५]इतिश्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां षोडशः प्रबन्धः।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।।श्रीजयदेवेति। [६]अनेन श्रीजयदेवेन भणितं यद्वचनं गीतरूपं तेन हरिरपि हृदयं भक्तानां[७]चित्तं प्रविशतु; पुण्यदातृत्वात्।।८।।

[८]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां षोडशः प्रबन्धः।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।।श्रीजयदेवेति। श्रीजयदेवभणितं यद्रमणं प्रियं तेन अनेन अष्टपदीरूपेण हरिः हृदयं प्रविशति। अष्टपदीश्रवणेन श्रोता हरिध्यानयुक्तो भवतीत्यर्थः।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां षोडशः प्रबन्धः।

१.रमणेन-इ.ड. २.प्रविशति-इ. ३.अनेन परिगीतेन-फ.ज. ४.प्रवेशं प्राप्नेतु-इ.फ.ग.ह.ज. ५.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. ६.नास्ति-ड. ७.नास्ति-ड.क.चित्ते-ल.म. ८.नास्तीयं पुष्पिका-ड.क.ल.म.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।। श्रीजयेत्यादि। अपिशब्दो भिन्नक्रमोऽनेनेत्यस्यानन्तरं द्रष्टव्यस्तदयमत्रार्थः। सतां हृदि हरिरस्त्येव। असतां हृदयमनेनापि प्रविशत्वित्याशीः। अनेनेति केन? श्रीजयदेवभणितमननेन, श्रीजयदेवेन भणितं गीतं तस्य मननम् अभ्यासस्तेन।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। अनेन श्रीजयदेवभणितेन श्रीराधाया माधवमुद्दिश्य वचनेन हरिरपि हृदयं प्रविशतु । 'प्रविष्ट कर्णरन्ध्रेण स्वानां भावसरोरुहम्' इत्युक्तेः।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। श्रीति। श्रीजयदेवभणितेन, वचनेन श्रीराधाभाषितरूपेण अनेन हरिः, अपि शब्देन हरिणा या रमिता, साऽपि वस्तुगत्या राधैव हृदयं प्रविशतु। श्रोतृगातृणां मनसि राधासहितः सर्वमनोहरः श्रीकृष्णः प्रकर्षेण स्फुरतु इत्यर्थः। 'यत्र राधा तत्र हरिर्यत्र हरिस्तत्र राधे'ति द्वयोर्नित्यसम्भन्धादिति भावः।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेवस्योक्तवचनेन श्रोतृणां हृदये हरिः प्रविशतु। **संङ्गीतराजेण** वराटिका रागरुपेण निर्णितम्। तद् यथा, रागो वराटिका यत्र तालो वर्णयति तथा। पदानि स्वेच्छयालापभूषितानि यथा द्युतिः।। ततः स्वराश्च पाटाश्य तेना पद्यानि कानिचित्। इति नारायणपदान्मदनायासनामकः प्रबन्धः क्षितिनाथेन लोकनाथस्य वर्णितः।। इति नारायणमदनायासनामकः षोडश प्रबन्धः।।८।।

**४५-मनोभवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम्।**
**क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसि।।४५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४५।। अत्रावसरे मलयानिलेन पीडिता सती तां प्राह। मनोभवेति मनोभवानन्दनत्वेन चन्दनानिलस्य परोपकाररसिकता प्रतिपादिता। परोपकारश्चाक्रूरे एव भवतीति प्रसीदेत्युक्तम्। हे दक्षिण! मुञ्च वामतामिति दक्षिणपथप्रवृत्तस्य वामपथप्रवृत्ताभाव प्रतिभावनात्। क्षणं जगत् प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसीति अन्योऽपि यः क्वचिदासन्नमरणः सोऽपि माधवं द्रष्टुमिच्छतीत्यभिप्रायः। जगत्प्राणस्य प्राणहरताऽनुपयुक्तेति माधवदर्शनाकाङ्क्षाव्याजेन प्राणहरणप्रतिबन्धः। वंशस्थं नाम वृत्तम्।।४५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४५।। चेतो यास्यतीति सखीं प्रोच्य अन्तरा पुनः सव्याजं कालविलम्बं कृत्वा पुनः स्मरशरासहा मलयानिलमुपालब्धुमाह; मनोभवेति। हे चन्दनानिल! जगदाह्लादक! प्रसीद विपरीतलक्षणया क्षमां कुरु। कथं वैपरीत्यम्? यतः जगदाह्लादकस्वरूपप्रच्युत्या मम रिपोर्मनोभवस्य आनन्दमकरोः अतो मनोभवानन्दन! प्रसीद क्षमां कुरु। दक्षिणोऽहमिति कृत्वा हिताहितलक्षणवक्रतानभिज्ञत्वान्नोपालभ्यो-ऽहमिति वदसीति चेत्तर्हि जितम्। हे दक्षिण! क्षणं क्षणमात्रं वामतां मुञ्च। कृतजगत्प्राणस्य

मे सर्वसाधारण्येन नेयं प्रकृतिरिति चेत्, हे जगत्प्राण अङ्गीकृतजगत्प्राण! त्वं माधवं पुरो विधाय अग्रे कृत्वा सांप्रतमेव मम प्राणहरो भविष्यति। तर्हि साधु चेष्टितम्। नाहमस्या मरणनिमित्तं, किंतु माधव इतीदमेव वामताया विलसितमिति ।अत्र वंशस्थं वृत्तम्। अति[१]शयोक्तिकरलंकार:।।४५।।

## (३) जगद्धरकृत- सारदीपिका

।।४५।। हे चन्दनानिल मलयजपवन। सम्बोधने। किम्भूत। मनोभवानन्दन मनसि भवतीति मनोभव: कन्दर्प: तम् आनन्दयतीति तथा स: तस्य सम्बोधनम्। हे मनोभवानन्दन वामतां वक्रभावं मुञ्च, जहीहि। न केवलं वामतां वक्रतां मुञ्च, पुरोऽग्रे माधवं श्रीकृष्णं विधाय कृत्वा क्षणं प्रसिद, क्षणमात्रं प्रसन्नो भव, अनुकुलो भव। तत्रान्तर्गर्भितं हेतुमाह। हे दक्षिण शुभाचार उत्तम। जगत्प्राण जगतो विश्वस्य प्राणभूत। पश्चात् मम दु:खिताया सन्तप्ताया: प्राणहरो भविस्यसि। अनेन किमुक्तम्। स्वशरीरे अनादरपुरवैराग्यभावं दर्शयतीत्यर्थ:। राधा स्वमनोगतमाह।।४५।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४५।। संप्रत्यनिलमेव संतापदं मत्वोपालभते; मनोभवेति। हे चन्दनानिल चन्दनसंबन्धिवायो! मे मम प्रसीद प्रसादं कुरु। हे दक्षिण! सर्वेषां विलसिनामनुकूल-स्वभाव! वामतां प्रतिकूलतां मुञ्च। अत्र चन्दनतरुसंगतस्य वामत्वं नोचितमिति चन्दनानिलदक्षिणपदाभ्यां ध्वनितम्। वामत्वे हेतुगर्भविशेषणमाह; मनोभवेति। मनोभवं काममानन्दयतीति भनोभवानन्दन:। तथा च मम वैरी कामस्तं यदानन्दयसि तदेव प्रतिकूलमाचरसीति भाव:। यदि च वामतां न मुञ्चसि तदा माधवं कृष्णं जनं मम पुरोऽग्रे निधाय पश्चात्तद्दर्शनं कृत्वाऽथ प्राणहर: प्राणानां हर्ता भविष्यसि। यथा विरहिणीं मां व्यथयसि तथा मया विरहितं तमपि संतापय। यथा मदन्तिकं स आयास्यति तथा कुर्विभाव:। एतेन जगत्प्राणहरणे सामर्थ्यं ध्वनितम् । यद्वा, चन्दनानिल! क्षणं वामतां मुञ्च। माधवं पुरो निधाय पश्चान्मम प्राणहरो भविष्यसीत्यन्वय:। शेषं पूर्ववत् । जगत्प्राण जगतां प्राणभूत! दक्षिणस्य वामत्वं जगत्प्राणस्य प्राणहरत्वमिति विरोधालंकार:। 'वामं सव्यं प्रतीपे च द्रविणे चातिसुन्दरे' इति **विश्व**:। 'दक्षिण: सरलावामपरच्छन्दानु-वृत्तिषु' इति च।।४५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४५।। राधा तत्समये आगतमुद्दीपकं दक्षिणपवनं निन्दति। मनोभवेति। हे मनोभवानन्दन! मन्मथोद्दीपक हृदयाल्हादनशीलेति ध्वन्यते। चन्दनानिल मलयमारुत

प्रसीद तापहारित्वं विहाय प्रसन्नो भव। उक्तगुणसम्पन्नस्य प्रमादमुक्तत्वादितिभावः। पाघाध्मां इत्यादिना सीदादेशः। रे दक्षिण! दक्षिणदेशे भव! सरसवासेतरेति ध्वन्यते। वामतां वक्रत्वं सब्येतरत्वं ध्वन्यते मुञ्च त्यज। दक्षिणस्य सतो वामतायाविरोधादिति-भावः। अतएव रे! इति नीच सम्बोधनम्। हे जगत्प्राण! सर्वप्राणिनां प्राणभूतं माधवं श्रीकृष्णं क्षणं क्षणमात्रं मम पुरोऽग्रभागे विधाय मम प्राणहरः मम प्राणापहर्त्ता। ''हरतेरनुद्यमर्न'' (३-२-६) इत्यच् प्रत्ययः भविष्यसि। प्राणस्य सतः क्षणमात्रेणैव प्राणापहारकत्वरूपापकीर्त्तिर्भविष्यतीति भावः। धवं पतिं श्रीकृष्णं पुरो विधाय निक्षिप्य मा शब्दः प्रतिषेधवाची प्राणहरो भविष्यसि किमिति शेषः। तस्य भविष्यसीत्यस्मात्पूर्वमन्वयः। किमिति भविष्यसीत्यर्थः तथा चापकीर्त्तिपरिहाराय वा मह्यं परित्यज्य श्रीकृष्णागमनपर्य्यन्तं प्रसादोन्मुखत्वमेवेदानीमेव तव युक्तमिति तात्पर्य्यम्।।४५।।

(Tirupati Edition is not matching.)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४५।। प्राणनिरपेक्षा राधा दक्षिणानिलमभ्यर्थयति। प्राणापहरणादन्यत् किमस्माकं विधास्यतीति निर्भरतया रे इति संक्षेपसम्बोधनम्। रे दक्षिणमुञ्च प्रसीद प्रसन्नो भव। प्रसादस्तु प्रकृते प्राणहरणमेवेति भावः, वामतां प्रातिकूल्यं विमुञ्च। प्रातिकूल्य चन्दनानिल प्रकृते रक्षणमेवेत्यवधेयम्। अत्र मलयानिलत्वेनैवार्थात् दक्षिणत्वे प्राप्ते पुनर्दक्षिणपदोपादानं वामतां मुञ्च इत्यस्यानुरोधेन विरोधाभाससूचनार्थमित्यवधेयम्। कीदृश ? मनोभवः कामः तमानन्दयतीति आनन्दनः। नन्द्यादित्वादः। तथा च कामेनापि मम प्राणहरणार्थं यत्नः क्रियत एवेति तवानुकूल्ये तस्यानन्दो भविष्यतीति सूचितम्। भवतु तवाभिमतं विलम्बेन साधयामीत्याशंक्य त्वरयैवं विधेहीति दर्शयति। हे जगत्प्राण वायो! धवं स्वामिनं क्षणं स्वल्प कालमपि पुरोऽग्रे निधाय प्राणहरो मा भविष्यसि। तथा चास्माकं स्वामी यदि कदाचित् भवता सन्तापितः समायाति तदा तत्समक्षं भवान् मम प्राणापहरणे क्षमो न भविष्यतीत्यवधेयम्। त्वरया विधेहीति वाक्यार्थः। जगत्प्राणपदेन प्राणप्रतिपक्षतां दर्शयता प्राणापहरणे बीजमुपदर्शितम्। अमानीनाः प्रतिषेधवाचकाः। भगीरथादयस्तु हे जगत्प्राण वायो! माधवं कृष्णं क्षणं पुरो निधाय अग्रे कारयित्वा मम प्राणहरो भविष्यसि, तथा च प्राणवायुः प्राणान् द्रुह्यतीति मित्रद्रोही चाण्डालोऽसौ, तेन मरणकाले तस्य स्पर्शे कृष्णदर्शनेन प्रायश्चितं स्यादिति भाव इति

व्याचक्षते। तत्पक्षे भविष्यसीति पदेनाशंसायामर्थोपस्थितिं विना प्रकृतार्थासङ्गतिरित्यवधेयम्। समीरमारुतमरुज्जत्प्राण समीरणा' **इत्यमरः**।।४५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४५।। एवं सखीवचनेन विस्मृतप्रियदोषा मलयानिलमुपालभते प्रार्थयते च, मनोभवेति। हे मनोभवा [२] नन्दप्रद चन्दनानिल मलयसमीर त्वं प्रसीदं प्रसादं[३]कुरु। रे इत्याक्षेपसम्बोधने। दक्षिणवामतां प्रतिकूलतां मुञ्च दाहं संवारय। हे जगत्प्राण विश्वप्राणभूत माधवं श्रीकृष्णं क्षणं क्षणमात्रं पुरोऽग्रे निधाय कृत्वा मम प्राणहरो भविष्यसि ; प्राणोत्क्रमणसमये श्रीकृष्णदर्शनमतिदुर्लभमिति। भक्तजनानां प्राणहर्तृत्वमनुचितं तवेति भावः। [४] वामं सव्ये प्रतीपे च द्रविणे चाऽतिसुन्दरे इति विश्वः[५]-(८९.२२)।।४५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४५।। पीडयन्तं मलयानिलं प्रार्थयते-मनोभवेति। हे मनोभवानन्दन कामप्रमोदजनक चन्दनानिल मलय [६] मारुत! प्रसीद ममोपरि प्रसन्नो भव। रे इत्याक्षेपसम्बोधनं दुःखकारित्वात्। दक्षिण! वामतां [७] प्रतिकूलतां[८]मुञ्च[९]त्यज। हे जगत्प्राण जगतां प्राणभूत! क्षणमल्पकालं माधवं पुरो विधाय कृष्णमग्रे कृत्वा मम प्राणभूत! क्षणमल्पकालं माधवं पुरो विधाय कृष्णमग्रे कृत्वा मम प्राणहरो भविष्यसि। प्राणगमनसमये हि कृष्णदर्शनं अतिदुर्लभमिति। [१०] जगतां प्राणहन्तृत्व-मनुचितमिति भावः। वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे इति विश्वः (८९.२२)।।४५।।

१.मे-इ. २.नन्दन प्रसीद-फ.ज. ३.नास्ति-ग. ४.तः,५.पर्यन्तं नास्ति-अ.ब. ६.वात-क.ल.म.नास्ति-ल. ७.प्रतिकूलत्वं-क.ल.म. ८.नास्ति-ल.म. १०.जगतां प्राणकर्तृत्वात्प्राणह-रणमनुचितमिति भावः-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४५।। वायुमुपालभतेमनोभवेति। मनोभवस्य आनन्दन सन्तोषक तत्सहकारित्वात्। चन्दनानिल मलयजवात! मे मह्यं प्रसीद। मदनं तोषय मयिप्रसन्नो भव। दक्षिणवायो! वामतां वक्रतां क्रूरतामिति यावत्; मुञ्च त्यज। हे जगत्प्राण! त्वं मम पुरः माधवं क्षणं निधाय प्राणहरो मृत्युकरो भविष्यसि। अत्र मनोभवानन्दनत्वं प्रसन्नत्वे दक्षिणत्वं वामतात्यागे जगत्प्राणत्वं प्राणहरणे च हेतुत्वेन साभिप्रायकाणीति परिकराड;कुरालङ्कारः। विशेष्यत्वेन साभिप्रायकत्वात्।।४५।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४५।।अत्रावसरे मलयानिलेन पीडिता सती तं प्राह मनोभवेत्यादि। हे मनोभवानन्दन! हे कामानन्दजनक! मलयपवनसञ्चारे कामोद्दीपनात् हे चन्दनानिल! मनोभवानन्दनत्वेन चन्दनानिलस्य परोपकारिता प्रतिपादिता। परोपकारश्चाक्रूरे एव भवतीति प्रसीदेत्युक्तम्। रे दक्षिणेति। रे इति आक्षेपोक्त्या सम्बोधनम्। वामतां प्रतिकूलतां मुञ्च। त्वं चेदक्षिणस्तर्हि वामत्वं तवानुचितमित्यर्थः। दक्षिणवामयोर्विरोधात्। ''वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे'' इति विश्वः। ''दक्षिणः शरतो वह्नावपसव्यविनीतयोः'' इति कुमुदाकरः। चन्दनानिलेति वचनादेव दक्षिणत्वे प्राप्ते पुनर्दक्षिणेति सम्बोधनं वामतां मञ्चेत्यर्थानुरोधेन कृतम्। वामतामपरित्यजन्नेव कथंकारं प्रसीदामीति चेद् वदसि तर्हि शृणु, हे जगत्प्राण! त्वं जगतां प्राण इत्यर्थः। माधवं क्षणं मम पुरो विधाय मदग्रे कृष्णं कृत्वा पश्चान्मम प्राणहरो भविष्यसीति। ममेति ''काकाक्षगोलक'' न्यायेन उभयपक्षावलम्बिपदमेतत्। जगत्प्राणस्य तव माधवानयनं सम्भाव्यते। तस्मात् क्षणमपि मम पुरतो माधवं कृत्वा तस्य समीपे मम प्राणान् हरिष्यसीति अयमेव तव प्रसादो मयि भूयात्। तथा च, सति वामतापि न परित्यक्ता भवति। तथाहि, ''जगत्प्राणस्य ....हर्तृत्वमेव वामता'' इति। ''समीरमारुतमरुज्जगत्प्राणसमीरणाः'' **इत्यमरः**। अन्योऽपि यः कश्चिदासन्नमरणः सोऽपि माधवं द्रष्टुमिच्छतीत्यभिप्रायः। जगत्प्राणस्य प्राणहरताऽनुपयुक्तेति माधवदर्शनाकाङ्क्षाव्याजेन प्राणहरताप्रतिबन्धोऽपि तात्पर्यम्।।४५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४५।।अत्यावेशेन मनोवाष्पमुद्गिरति दैन्येनादौ सविनयमाह हे मनोभवस्यानन्द-दायक चन्दनानिल! परोप कारिन्नित्यर्थः, प्रसन्नो भव। पुनरीर्ष्योदयादेतदाह, रे दक्षिण सर्वानुकूल! वामतां प्रतिकूलतां मुञ्च। दक्षिणपथप्रवृत्तस्य वामपथप्रवृत्तेरयुक्तत्वाद्वामता त्याज्या इत्यर्थः। तर्हि किं विधेयम्? तत्राह, हे जगत्प्राण! जगद्हितोडपि त्वं मनोभवानन्दनाय चन्दनतरुसंपर्कात विषमश्चेन्मां मारयसि, तदा क्षणमपि माधवं पुरः कृत्वा पश्चान्मम प्राणहरो भविष्यसि।।४५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४५।।तत्क्षणमेव मन्दमन्दसंचारिणं मलयानिलं प्राणापहरणाय मन्मथप्रहितदूतमिव मन्यमाना तं प्रति हृदयस्थभावमुद्घाटयन्ती सदैन्यमाह, मनोभवेति। मनोभावानन्दन, मदनस्यापेक्षितसाधकत्वात् तदानन्दवर्धन, चन्दनानिल, सकलश्रमापनोदनतया

परोपकारिन् प्रसीद। मयि प्रसन्नो भव। ननु प्राणापकर्षणायागतस्य क्व प्रसादः, इदानीमेव त्वत् प्राणानुपहारीकृत्य मदनमामोदयामीति आक्षेपयन्तं विभाव्य रे! इति सम्बोधनम्। रे दक्षिण! अनुकूलस्वभाव। वामतां मुञ्च। प्रतिकूलतां त्यज। किं तर्हि करोमीत्यत आह, हे जगत्प्राण! सर्वप्राणभूततया वशीकृताखिलविश्व। मज्जीवनाधिनाथं माधवं पुरोऽग्रे क्षणं विधाय, क्षणमात्रमवस्थाप्य पश्चात् तद्दिदृक्षाधीनजीवनायाः प्राणहरो भविष्यसि। प्राणान् अपहरिष्यसि। अन्यथा तद्दिदृक्षाशृङ्खलिताना- मेतेषामपहरणं न सेत्स्यतीति भावः।।४५।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४५।। मनोभवानन्देनेति; श्रीराधे मलयानिलेन पीडिते सति तामनुनयवाक्येन व्रवीति; हे मलयानिल त्वं दक्षिणदेशात् प्रवहन्नसि। अतः त्वं दक्षिणनिलयरूपेण परिचितः व्यपदिष्टो वा। प्राणिनां जीवनाधायकरूपेण ते परिचितिरस्ति परं त्वं वामतां मयि कथं दर्शयसि। फलतः मम मरणं भविष्यति। आसन्नमरणस्य इच्छा पूरणीया। मरणात् प्राक् मां मम प्रियतमं श्रीकृष्णं मत् सम्मुखमानयेदिति मे प्रार्थना। वंशस्थवृत्तम्। अतिशयोक्तिरलंकारः ।।४५।।

**४६-रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो**
**विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते।**
**हृदयमदये तस्मिन्नेवं पुनर्वलते बलात्**
**कुवलयदृशां वामः कामो निकामनिरङ्कुशः।।४६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४६।। सम्प्रति निराशे दयिते सानुरागं चित्तं विचिन्वतीत्याह। राधा समनोगतमाह। रिपुरिवेति। यस्मिन् हरौ मनोगते सखीसंवासः सखीभिरेकत्रवासो रिपुरिव दुनोति, स्वच्छन्दगमनप्रतिरोधकत्वादित्यभिप्रायः। शिखीव हिमानिल इति तापकत्वात् ''शिखिनौ बह्निवर्हिणौ'' **इत्यमरः**। विषमिव सुधारश्मिर्यस्मिन्नितिदाहकत्वादित्य- भिप्रायः। तस्मिन् अदये निर्द्दये प्रणयिनी कान्ते हृदयमेवं पूर्वोक्तप्रकारेण वलाद् बलते स कथम् उक्तः स्यात्। कथमित्यर्थान्तरन्यासमाह। कुवलयदृशां वामः कामो निकामनिरङ्कुशः इति कामो निकाममित्यर्थामुदामस्या निरङ्कुश इति। अस्योपमा उक्तं च **रसिकसर्वस्वे,**

गुरुविप्रस्त्रियं दासीं विधवां वा सुरक्षिताम्।
निषिद्धे वर्त्तते प्राय: कामो वाम: स्वभावत:।।

स्वच्छन्द गो निरङ्कुश इति। हरिणी नाम वृत्तम्।।४६।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।४६।। इदानीं स्वचित्तमेवोपालभते; रिपुरिवेति। हे सखि! यस्मिन्गाते सति अन्यत्र स्थिते सति अथवाऽज्ञातस्वरूपे सति अयमनुकूलोऽपि सखीसंवास: रिपुरिव मनो दुनोति। अनु च शीतो वायु: ज्वलन इव मनो दुनोति। अपि च, अमृतदीधितिर्हालाहलमिव मनो दुनोति। एवमप्यर्थे तस्मिन्नप्यदये हृदयं पुनर्बलाद्वलते तदभिमुखीभवति। किं तर्हि क्रियते स्त्रैणस्थितिरियम्। कुवलयदृशां निकामनिरङ्कुश: कामो वाम एव वर्तते। निकामनिरङ्कुश: अतिशयोच्छृङ्खल:। अत्र हरिणीवृत्तम्। विरोधा[२]लंकार:।।४६।।

**(३) जगद्धरकृत- सारदीपिका**

।।४६।। यस्मिन् श्रीकृष्णेन मनोगते सति मनसि स्मृति सति अयं सखीसवांस: सखीजनसङ्ग, रिपुरिव शत्रुरिव, हृदयं दुनोति परितापयति। न केवलं सखीसंवासो दुनोति। हिमानिलोऽपि शीतलपवनोऽपि शिखीव अग्निरिव। न केवलं हिमानिल: शिखीव। सुधारस्मिरमृतमयश्चन्द्रोऽपि विषमिव। तस्मिन्नेवादये निर्दये श्रीकृष्णे पुनर्बलात् कामो वलते वर्धते। कामिनीनां मते कामो वाम: निकामनिरङ्कुश: निकाममतिशयेन निरङ्कुश: उत्कट:। अत एव वाम: वक्रस्वभाव:। दक्षिणो न भवतीत्यर्थ:।।४६।।

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।४६।। अधुना ममैवापराधो नान्यस्येत्याह; रिपुरिवेति। यस्मिन्कृष्णे मनो गते चेतसि कृते सति सखीसंवास: सखीभि: सहावस्थानं रिपुरिव शत्रुरिव दुनोत्युपतापयति। सखीर्दृष्ट्वा तत्कृतालंकाररचनापरिहासवासभवनपरिष्कारदिस्मरणेनाधिकतर उपतापो भवतीति भाव:। अयं च हिमानिलो हिमगर्भोऽप्यतिशीतलोऽपि वायु: शिखीवाग्निरिव दुनोति। अयं सुधारश्मिश्चन्द्रो विषमिव दुनोति। तस्मिन्नेव कृष्णेऽदये दयारहिते हृदयं पुनर्भूयोऽपि बलाद्धठाद्वलते। निवार्यमाणमपि तत्रैव गच्छतीत्यर्थ:। अत: कुवलयदृशां कमलनेत्राणां कामो निकाममत्यर्थं निरङ्कुशस्त्यक्तमर्यादोऽत एव मे वाम: प्रतिकूल:। अन्योन्यानुरागो हि कामो मनोहरो भवति, अत्र तु स मयि नीराग: केवलं ममैव चेतस्तत्र धावतीति वामता कामस्येति भाव:। अत्र सखीनां संवासस्य रिपुवत्, हिमानिलस्य वह्निवत्, सुधारश्मेर्विषवदपकारित्वं विरुद्धमिति विरोधालंकार:। 'शिखिनौ वह्निवर्हिणौ' **इत्यमर**:।।४६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४६।।श्रीकृष्णवियोगदु:खं पुनरपि सख्यै निवेदयति रिपुरिवेति। हे सखि! यस्मिन् कृष्णे मनोगते वियोगकाले मनसि स्थिते सति अयं परिदृश्यमान: सखीसंवास: सहचरीमण्डलं तत्सहवासो वा रिपुरिव शत्रुरिव हृदयं मदीयं चेत: कर्त्तृकर्म दुनोति कम्पयति। दुनोतीति पाठे पीडयति। कृष्णवियोगदशायां सखीसमाजो रिपुसमाजवत् त्याज्य: प्रतिभातीत्यर्थ:। तथा हिमानिल: शीतलवात: शिखीव हुताशनवत् मद्धृदयं घुनोति। कृष्णवियोगकाले श्रीचलानिल: शिखीकल्पप्रतिभातीत्यर्थ:। तथा सुधारश्मिरमृतकिरण: विषं गरलमिव धुनोति।

मुकुन्दविश्लेषसमये अमृतमपि विषकल्पं भवतीत्यर्थ:। यस्मिन्मनोगते सखी संवासादीनां रिपुप्रमुखकल्पता तस्मिन् कृष्णे एवं पूर्वोक्तप्रकारेण अदये मयि निष्करुणे सति तस्मिन् समये वलाहकभृङ्गमलयमारुतादिभट्टसम्पत्ति: वाम: वक्रस्वभाव: निकाममत्यर्थं निरङ्कुश: निरर्गलगति: काम मन्मथ: कुवलयदृशामिन्दीवराक्षीणां पुनर्भूयोऽपि वलिते प्रवर्द्धते कुवलयदृशामुपरतीतिशेष:। वलते धारारूपेण निर्गच्छति वल्लभपरिग्रहाभावे पुरन्ध्रीणां कामोद्रेक: प्रतिक्षणं प्रवर्द्धत इति। अत्र कामवाधाविरहिणीनां सर्वसां साधारणेति द्योतयितुं कुवलयदृशमितिवहुवचनम्। अथवा यस्मिन् श्रीकृष्णे मां परित्यज्य अन्यत्र गते गतवति सखीसंवासादय: रिपु प्रमुख इव मम मनो धुनोतीत्यन्वय:। तस्मिन् कृष्णे अदये पुनरागतिरहिते सति एवं परितापप्राप्तिमदिव मच्चित्तं वलते। कामादयो बाधका: किं करिष्यन्तीति वलते इत्यर्थ:। उक्तमर्थान्तरन्यासेन द्रढ़यति। कुवलयेति। तथाहि कुवलयदृशामुपरीति शेष:। काम: वाम: निकामं निरङ्कुशमित्यन्वय:। अत्र सतत हेतुना हेतुत्वप्रतिपादनं रूपवस्तुन: श्रीकृष्णवियोगस्यातिदु:सहतारूपं वस्तु व्यज्यत इति वस्तुध्वनि:।।४६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४६।। कन्दर्पस्य प्रातिकूल्यं दर्शयति। यस्मिन् कृष्णे स्मरणेन मनोगते सति चित्तस्थिते सति स्वयं सकलसिद्धसुखजनक: सखीसम्वास: सखीभि: सहावस्थिति: रिपुरिचव स्वच्छन्दगमनादिक्रियारोधनात् शत्रुरिव दुनोति पीडयति अर्थान्माम्, हिमानिलो हिमसम्बन्धिवायु: शिखीव दुनोत्यर्थान्माम्, सुधारश्मिरमृतकिरण: विषमिव दुनोत्यर्थान्माम्। तथा च स्वभावतो मिवं शत्रुरिव भवति, हिमशीतलो वायु: वह्निरिव भवति, सुधानिधिरपि विषमिव भवतीत्येवं सर्वेषां वैपरीत्यं भवतीति वाक्यार्थ:। तस्मिन्

निदये निष्करूणे एवं हृदयं मनः अर्थात् मम, पुर्नवलात् वलते भजते। तस्मात् कुवलयदृशां कृते कामः कन्दर्पः वामः कुटिलः निकामेनात्यर्थेन निरङ्कुशो न विद्यते अङ्कुशो निवारणहेतुर्यस्य एतादृक्। आरोप एवात्रालङ्कारः।।४६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४६।। पूर्वं मलयानिलस्य प्राणहन्तृत्वं विज्ञायोपालब्धः; सम्प्रति सर्वनिवोपालभतेरिपुरिवेति। अयं सखीभिस्सह सम्यग्वासो[१]ऽवस्थानं [२]रिपुरिव शत्रुरिव मम मनो दुनोति [३] सन्तापयति। [४] किञ्च हिमानिलः स्वभावशीलोऽपि शिखीवाग्निरिव दुनोति दहति [५]। किञ्च सुधारश्मिश्चन्द्रोऽपि विषमिव प्राणहर्ता। नायमेतेषामपराधः; [६]किन्तु तस्मिन् श्रीकृष्णे गते दूरं प्रस्थिते सति तथाविधा जाता इति [७]भावः। एवं तस्मिन् अदये[८]निर्दये मम हृदयं चेतः बलात् हठात् वलते पुनः पुनर्वार्यमाणमपि प्रविशति। बलेनाभिनिविशत इत्यर्थः। तत्र हेतुः कुवलयदृशां [९] नीलोत्पलाक्षीणां कामो निकामः [१०] निरङ्कुशोऽत्यर्थं स्वेच्छाचारी। किञ्च वामः [११]क्रूरश्च मयूरे दहने शिखी मयूरे स्याद्ब्रह्मचारिणि इति[१२] **हलायुधः**।।४६।।

१.वसतिस्थानं-अ.ब.२.३.नास्ति-अ.ब.४.तः५.पर्यन्तं नास्ति-अ.६.किञ्च-अ.ब. ७.नास्ति-इ.फ.ग.ह.ज.८.नास्ति-ग.९.नीलोत्पलदलनयनानां-ग.१०.निरङ्कुषस्त्वत्यर्थं-इ.ह.११.क्रूर एव-अ.ब.१२.**हलायुध**कोशे-नास्ति.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४६।। पुनरपि सखीं प्रत्याह, रिपुतिति। यस्मिन् कृष्णे गते दूरस्थे सति अयं सखीसंवासःसखीभिःसह सम्यक् वासोऽवस्थानं रिपुरिव [१] शत्रुरिव मम[२] मनो दुनोति सन्तापयति। हिमानिलः शीतलवायुः शिखीव अग्निरिव [३] मम [४] मनो दुनोति। सुधारश्मिश्चन्द्रो विषमिव दुनोति। तस्मिन्नदये करुणारहिते प्रिये एवं अविचारितमेव मम हृदयं [५] मम [६] मनः पुनः पुनरपि बलात् [७] हठात् वलते सङ्गच्छते निवार्यमाणमपि तत्रैव निर्गच्छतीत्यर्थः। [८]ततः कुवलयदृशां नीलोत्पलाक्षीणां [९] नारीणां वामःक्रूरः कामो निकामनिरङ्कुशः अतिशयेन स्वेच्छाचारी अपरतन्त्र इत्यर्थः।।४६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४६।। रिपुरिवेति। हे सखि सहचरि! समीपस्थत्वेऽपि शोकेन सप्लुतप्रयोगः। दूराह्वाने टेः प्लुतः स्यादिति। सख्याः संवास इति समस्तपदत्वेन व्याख्याने सर्वमतेऽपि स्वभवनोपालम्भत्यागः गुणवत्सख्या दूषणमापततीति प्लुतत्वेनैव व्याख्येयम्। यस्मिन् कृष्णे मनोगते सति अनागते सति बहिरप्राप्ते सति अयं संवासः कुञ्जः रिपुरिव शत्रुवत्

हिमानिल: दक्षिणवायु: शिखीव अग्निरिव, सुधारश्मि: चन्द्र: विषमिव दुनोति पीडयति। एवं अदये निर्दये तस्मिन् कृष्णे हृदयं अन्त:करणं बलात् बलतो इच्छां विनाऽपि आलम्बते। कुवलयदृशां काम: निकाम: अत्यन्त निरङ्कुश:। नियन्तृहीनगजतुल्यात् काम: मदन: वाम: वक्र: भवति। हरिणीवृतम्।।४६।।

१.नास्ति-ड.२.नास्ति-क.३,४.नास्ति-ड.पुनरागमिष्ये-इ.५.६.नास्ति-ड.ल.७.नास्ति-ल.म.८.यत:-क.ल.म.९.नास्ति-ड.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४६।। सम्प्रति नीरोगदयिते सानुरागं चित्तं विनिन्दतीत्याह - रिपुरिवेति। यस्मिन् हरौ मनोगते मनस्यवस्थिते सति न तु दृष्टिगत इत्यर्थ:। अयं सखीसंवास: सखीभिरेक....रिव स्वच्छन्दगमनप्रतिरोधकत्वादित्यभिप्राय:। हिमानिल: शीतोवायु: शिखी वह्निरिव तापकत्वात्। ''शिखिनौ वह्निबर्हिणौ'' **इत्यमर:**। तथा सुधारश्मिरपि विषमिव दाहकत्वात् दुनोति तापयतीति सर्वत्रान्वय:। मामित्यर्थात्। यतो विप्रयुक्तानां कामोद्दीपनवस्तूनि दु:खदायीनि भवन्ति तस्मिन् अदये निर्दये कान्ते हृदयमेवं पूर्वोक्तप्रकारेण पुनर्बलाद्धटात् वलते। स कृष्ण: कथं वक्तव्य इति आत्मनो दोषे परो न निन्दनीय:। कुत इत्यर्थान्तरन्यासमाहकुवलयेति। कुवलय- दृशामिन्दीवराक्षीणां कामो वामो भवति। प्रातिकूल्यं करोतीत्यर्थ:। हेतुगर्भत्वेन कामं विशिनष्टि। निकामेति। निकामं निरङ्कुश: यथेष्टमनर्गल: निवारकरहित इत्यर्थ:। यद्वा स्त्रीणां कामोऽभिलाष: यथेष्टमनिवार्य:।।४६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४६।।अथ निरोगे दयते सानुरामं चित्तं निन्दति ममैवायमपराधो नान्यस्येत्यह- रिपुरिति। यस्मिन् हरौचित्तारूढ़ेद्धपि सखीभि:सहैकत्र वासोद्धपि रिपुरिव दुनोति स्वच्छन्दगमनप्रतिरोधकत्वात्, शीतलवायुरप्यग्निरिव तापकत्वात्, चन्द्रेद्धपि विषमिव दाहकत्वात्। तस्मिन्निर्द्दये कान्ते पुनर्यदि हृदयमेवमुक्तप्रकारेण वार्य्यमाणमपि वलात् संसक्तं स्यात्तर्हि स्त्रीणामभिलाष: अत्यर्थमयन्त्रित: अतो वाम: प्रतिकूल एव हिताहितविचारापगमात्।।४६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४६।। एवमुपदिष्टस्यापि मलयानिलस्याकिञ्चित्करत्वमालक्ष्य निरनुरोधे कृष्णे अभिनिविष्टं निजचित्तं निन्दन्त्याह, रिपुरिति। यस्मिन् कृष्णे मनोगते चित्तारूढे सति अयं सर्वदाभिलषणीय: सखीसंवास: प्राणतुल्यवयस्याभि: सह एकत्र वासो रिपुरिव

रात्रुरिव दुनोति सन्तापयति, मामिति शेषः। स्वेच्छागमननिरोधकत्वादिति भावः। तथा हिमानिलः, सर्वायासहारिशीतलसमीरणः शिखीव, घृतादि प्रज्वलितवह्निरिव दुनोति। स्पर्शमात्रेणापि दाहमातनोतीत्यर्थः। तथा सुधारश्मिः सकलशरीरसन्ताप-हरोऽमृतकरोऽपि, विषमिव एकदेशस्पर्शमात्रेण सर्वाङ्गीणज्वालाकारिकालकूटमिव विक्षोभयतीत्यर्थः। एवं तस्मिन् मत्सकलबाधाविधाननिदानभूते अदये निघृणं हृदयं तद्वञ्चनावशीभूततया कृत्याकृत्यविचारशून्यं मनः पुनरपि वलात् निवारणमनादृत्य बलते आविशति। अतः कुवलयदृशां मदनदिव्यास्त्रभूतेन्दीवरकृतवैरनेत्राणां कामोऽभिलाषो निकामं निरङ्कुशः, अत्यर्थमयन्त्रितः प्रयत्नशतेनापि निवारयितुमशक्यः। इत्यर्थः। अत एव वामो वक्रः, दुष्प्रापविषयमलभमानः, निजाशयसन्तापक इत्यर्थः।।४६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४३।। रिपुरिवेति; श्रीराधा इदानीं कामसंतप्ता। विरहदुःखमसहमाना स्वचित्तमेवो-पालम्भते श्रीराधा। यस्मिन् कृष्णे मनोगते चेतसि कृते सखिसंवासः सखीभिः सहावस्थानं रिपुरिव शत्रुरिव दुनोत्युपतापयति। सखीं दृष्ट्वा तत्कृतालंकाररचना परिहासवासभवन-परिष्कारादिस्मरणेनाधिकतर उपतापो हिमगर्भोऽनिलः शीतलातिशीतलपवनः वायुर्वा शिखाग्निरिव अनलगर्भपवनायते दुनोति माम्। अर्थात् कष्टं प्रददाति। अपि च शीतलानिलानलायते। सुधारश्मिश्चन्द्रविम्बो विषायते। अथवा अमृतदीधितिर्हलाहलमिव मनः चित्तञ्च मम दुनोति। तस्मिन्नप्युदये हृदयं पुर्नबलादबलते तदभिमुखी भवति। स खलु निर्दयः श्रीकृष्णः तस्मिन्नपि मे मौनं गच्छति। किं वा कुर्याम्, इयं हि स्त्रैणस्थितिः। कुवलयदलदृशां निकामनिरंकुशः कामोवाम एव वर्तते। अर्थात् अतिशयोच्छृङ्खलं मनः इत्थं श्रीकृष्णे धावति। इति। हरिणिवृत्तम्। विरोधालंकारः।।४६।।

**४७-बाधां विधेहि मलयानिल पञ्चबाण**
**प्राणान्गृहाण न गृहं पुनराश्रयिष्ये।**
**किं ते कृतान्तभगिनि क्षमया तरङ्गैर्**
**अङ्गानि सिञ्च मम शाम्यतु देहदाहः।।४७।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४७।। सम्प्रति विरहानलदग्धा जीवोत्सर्गे कृतमती राधा हि बाधामित्यादि। हे मलयानिल! बाधां बिधेहि कुर्वीत्यर्थः पञ्चवाण! प्राणान् गृहाण, इति पञ्चवाणाः यस्येति विग्रहः।

सम्मोहनः क्षोभणश्च दहनः शोषणस्तथा।
उच्चाटनश्च कामस्य बाणाः पञ्च प्रकीर्त्तिता।।

कथमित्थं प्रार्थयसेत्याह। न गृहं पुनराश्रयिष्ये इति किं कृतान्तभगिनित्वेन यमुनायाः निर्द्दयत्वं प्रतिपादितम्। ननु क्षमां त्वक्त्वा सम्प्रति किं कर्त्तव्यं तदादिशतीत्याह। तरङ्गैरङ्गानि सिञ्च मम शाम्यतु देहदाहः इत्ययमत्राशयः। स्मृतान्यपि शीतवस्तूनि दंदह्यन्ते, तेषां तूपभोगो मृत्यवे इत्यवधार्य्य विरहसन्तापात्राधाया मर्त्तुकामया शीतवारिणा सेकः प्रार्थितः।

सन्निषाते तु दाहर्त्तुं यः सिञ्चेच्छीतवारिणा।
आतुरः स कथं जीवेद्भिषग्रः स कथं भवेत्।।इति।।४७।।

इति श्रीकविराज श्रीनारायणदासकृतायां सर्वाङ्गसुन्दर्य्यां विप्रलब्धावर्णने नागरनारायणो नाम सप्तमसर्गविवरणम्।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४७।। इदानीं कामोपतप्ता मलयानिलादीनधिक्षिपति; बाधामिति। हे मलयानिल! बाधां विधेहि पीडया किं प्रतीक्षसे? हे पञ्चबाण! प्राणान् गृहाण। पञ्चभिर्बाणैः पञ्चापि प्राणांस्त्वं गृहाण। भवत इदमेव प्रयोजनम्। यस्मात्स्मरोऽपि तप्तं जनमुपताप्य गृहाभिमुखीकरोति। एतदर्थमेव स्वभावपरित्यागेनाप्युपकृतिर्विधेया। परं तु अहं बाध्यमानापि गृहीतप्राणापि पुनर्गृहं नाश्रयिष्ये, श्रीकृष्णमेव शरणं व्रजिष्यामीति तावुपालभ्य पुनरुदीर्णस्मराथ यमुनामाह; हे कृतान्तभगिनि यमस्वसः! मलयानिलपञ्चवाणौ शैत्यसंभोगकारणावपि पीडयतः; तर्हि नहि त्वं यमस्य भगिनी, ताभ्यां प्राणेषु गृहीतेषु भ्रातुः किमुत्तरं दास्यसि? इति। तेन तव क्षमया क्षान्त्या किं? भ्रातुर्हितं समाचर

मत्प्राणार्पणेनेत्याह, तरङ्गैरूर्मिभिर्मम गात्राणि सिञ्च। तेषु सिक्तेषु माधवप्राप्त्या देहदाहः शाम्यतु। तरङ्गसेकेनापि तदलाभे प्राणेषु गतेषु देहदाहः शान्तिमेष्यतीत्यभिप्रायः। वसन्ततिलकावृत्तम्। अप्रस्तुतप्रशंसालंकारः।।४७।।

## (३) जगद्धरकृत- सारदीपिका

।।४७।। हे मलयानिल श्रीखण्डाचलसमीर! त्वं बाधां पीडां विधेहि कुरु। हे पञ्चबाण कन्दर्प त्वं प्राणान् गृहाण। अहं पुनः पुनरपि गृहं नाश्रयिष्ये न गमिष्यामि। हे कृतान्तभगिनि यमस्वसः। हे त्वं निर्दये यमुने। तव क्षमया निश्चलभावेन किम्। भ्रातुः स्वरुपं धर्मं मा कुरु। यतस्त्वं नारीणाम् अनङ्गजं दुःखं जानासीति। स्त्रीस्वभावत्वात्। यमुना यद्येवं पृच्छति मया तुभ्यं किं करणीयम्। प्रयोजनं वदुपालम्भनस्य। तत्राह। ममाङ्गानि गात्राणि तरङ्गैः स्ववीचिभिः सिञ्च सेचय। किमर्थं तदाह। ममायं देहदाहः शरीरतापः शाम्यतु शान्तिमुपशमं यातु। स्वास्थ्यं भजतामित्यर्थः।।४७।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां नागरनारायण नाम सप्तमः सर्गः।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४७।। संप्रति विरहदुःखमसहमाना मलयानिलादीन्प्रार्थयति; बाधामिति। हे मलयानिल मलयसंबन्धिवायो! बाधां पीडां विधेहि कुरु। अत्र मलयजचन्दनाश्रयत्वेन महाशयोऽतस्तदाश्रितस्य ते याचकप्रत्याख्यानं नोचितमिति सूचनाय 'मलयानिल'-पदोपादानम्। हे पञ्चबाण! मम प्राणान्गृहाण। पञ्चभिर्बाणैः पञ्चानामपि प्राणानां ग्रहणं कामस्योचितमिति सूचनाय 'पञ्च'पदोपादानम्। ननु कृष्णेन चेतुपेक्षिता तदा गृहं किमिति न गच्छसीत्यत आह, न गृहमिति। गृहं पुनः भूयो गृहं नाश्रयिष्ये। तेन विना गृहमपि मे संतापजनकमेव भविष्यतीति भावः। हे कृतान्तभगिनि! ते क्षमया सहिष्णुतया किम्? किं प्रयोजनमित्यर्थः। तरङ्गैरूर्मिभिर्मेऽङ्गानि सिञ्च प्लावय। देहदाहो विरहजन्यो देहदाहः शाम्यतु निवर्तताम्। कृतान्तो निर्दयस्तद्भगिन्यास्तेऽपि दया न युक्तेत्याख्यापनाय कृतान्तेत्युपात्तम्। 'भगिनी स्वसा' **इत्यमरः**। कामवाणा अपि; 'संमोहनः क्षोभणश्च दहनः शोषणस्तथा। उच्चाटनश्च कामस्य बाणाः पञ्च प्रकीर्तिताः' इति।।४७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४७।। राधा कृष्णविरहमसहमाना सख्याः पुरः प्रलपति। बाधामिति। हे मलयानिल! मदष्टमातङ्गपटीरपवमानप्राणहानिपर्य्यन्तं पीडां बिधेहि निर्द्दयं कुरु तादृशबाधाबिधाने शीघ्रमेव प्राणनिर्गमने वहुकालं वियोगजव्याधिवेदनानुभवस्याभावादिति भावः। हे

पञ्चबाण! प्राणान् गृहाण अपहर क्षिप्रसेवप्राणहरणे श्रीकृष्णविश्लेषदु:खानुभवस्याभावादिति तात्पर्य्यम्। अत्र प्राणानां पञ्चत्वात्तदपहरणेत्युक्तमवगन्तब्यम्। ननु कथमरण्ये तपसि पत्युपसदनाभावमात्रेण प्राणापहरणप्रार्थनात्सहजं सहजं पतिगृहं निजाश्रयावासमन्दिरं नाश्रयिष्ये न गमिष्यामि। एतादृशसौख्यस्य तत्राभावात्। ''स्त्रिये जारणे तुष्यन्तीति न्यायादित भाव:।''

अथ विरहवेदनावशात्तन्निवृत्त्यै मलयानिलमदनयोरकिञ्चत्करत्वं विचार्य्य तापनिवृत्तये समीपवर्त्तिनीं यमुनामवलोक्य सोपालम्भं प्रार्थयते। किमिति हे कृतान्तभगिनि यमसोदरि! यमुने! अत्र परदु: खापहर्त्तृत्वरूपमर्मसूचनार्थमेतत्सम्बोधनमवगन्तव्यम्। कृतान्तस्यापि तादृशत्वेन तद्भगिन्यपि तादृक्त्वात्। ते तव क्षमया परदाहावलोकेऽपि क्षमया अविदीर्णता लक्षणशान्त्या किं किं प्रयोजनमलमित्यर्थ:। क्षमया किमित्यत्र कारणानां योगे तृतीया वक्तव्येति तृतीया। तर्हि किं कर्त्तव्यं तदाह। तरङ्गैरिति। हे कृतान्तभगिनि! तरङ्गैस्तवोर्मिभिरङ्गानि मम करचरणादीनि सिञ्च अभिषेचय। तद्वा किमर्थं तत्राह ममेति। मम देहदाह: श्रीकृष्ण विरहानलजनितशरीरताप: शाम्यतु शान्तिं गच्छतु। तदेव तरङ्गाणां प्रयोजनं भबिष्यति। अन्यथा निरर्थकं स्यादिति तात्पर्य्यम्। अत्र सर्वा क्षतबाधाविधानप्राणापहरणरूपवेदनयोरङ्गीकारयति। मदनरूप वस्तुन: श्रीकृष्णविरहवेदनयोस्ताभ्यां गतदु:सहरूपां वस्तु व्यज्यत इति वस्तुना वस्तुध्वनि:।।४७।।

इति श्री गीतगोविन्दव्याख्यायां सप्तम: सर्ग:।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४७।। पुनरपि प्राणनिरपेक्षा राधा मलयानिलादीनभ्यर्थयति, हे मलयानिल! राधां विधेहि। यथेयं त्वरया गतजीविता भवति तथा पीडां विधेहीत्यर्थ:। अत्र मलयानिलपदेन पाषाणमयपर्वतसम्बन्धित्वदर्शनेन वायो: काठिन्यसूचनेन पीडायोग्यता दर्शिता। हे पञ्चबाण कामदेव! बाणान् शरान् गृहाण मम व्यापादनार्थमित्यर्थात्! एतदेव दर्शयति, अहं पुनर्गृहं नाश्रयिष्ये न गमिष्यामि। एतेनात्मनो वीरत्वदर्शनेन कामस्य पञ्चबाणत्वदर्शनेन च प्रहारयोग्यता दर्शिता। हे कृतान्तभगिनि यमुने! ते तव क्षमया किम्? अपितु न किमपि। तरङ्गैरङ्गानि सिञ्च। परममदेकतरङ्गसेचनेन मम प्राणत्यागद्देहदाह: शाम्यतु शमितो भवत्वित्यर्थ:। अत्र यमभगिनिपदोपन्यासेन प्रकृतकर्मयोग्यता दर्शिता। अत्र व्याख्याने यमभगिनि तव क्षमया किमित्युक्त्वाऽङ्गानि सिञ्च, मम देह: शाम्यत्त्विति

प्राणनिरपेक्षाया राधाया न वक्तुमुचितमिति दूषणमपास्तम्। 'कृतान्तो यमुनाभ्राते'-**त्यमरः**।।४७।।

*'वाधाम्' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४७।। पूर्वं [२]मलयानिलादयः शत्रुत्वेन ज्ञाताः। इदानीं तानेव मित्रत्वेन याचते, बाधामिति। हे मलयानिल चन्दनवायो! परमशीतलाश्रयोऽपि मम बाधां विधेहि कुरु। [३]किञ्च इतस्ततो विलोक्याह हे पञ्चबाण! पञ्चबाणेति सम्बोधनं सुकरहिंसार्थमिति। हे काम! पञ्चभिर्बाणैः मम प्राणान् गृहाण। [४]तानेवाह, सम्मोहनः क्षोभण(श्च) दहनः शोषणस्तथा। उच्चाटनश्च कामस्य [५] पञ्च बाणाः प्रकीर्तिताः।। ननु कथं गृहं प्रति न यासि तत्राह, यथा पुनर्भूयो गृहान्नाश्रयिष्ये न यास्यामि। [६]श्रीनन्दात्मजं विना मलयानिलादयोऽपि सन्तापकारका एवेति भावः। तेभ्योऽभीष्टम[७]प्राप्य कृष्णां याचते, हे कृतान्तभगिनि यमुने[८]! ते तव [९] क्षमया शान्त्या [१०] किम्? यतस्त्वं यमभगिनी। तरङ्गैः [११] कल्लोलैर्ममाङ्गानि सिञ्च क्षीणत्वात् [१२] सिञ्चनमेव प्लावनमिति ध्वनिः। तेन च सिञ्चनेन मम देहदाहो विरहाग्निजनितो देहसम्बन्धी दाहः [१३]क्लेशः शाम्यतु; देहदाहः [१४] सोढुमशक्योऽतो मरणं भवत्वित्यर्थः। यमुना [१५] शमनस्वसा इति (**अमर**:१.१०.३२) [१६]पीडा बाधा व्यथा दुःखम् [१७] इति चामरः (१.९.३)। [१८] कामः पञ्चशरः स्मरः [१९]**इत्यमरः** [२०] (१.१.२५)।।४७।।

१.पुनरागमिष्ये-इ.२.तया नियमेन मलयानिलादयः-फ.ज.३.नास्ति-अ.ब.४.तानाह-फ.ग.ज.५.बाणाः पञ्च-इ.फ.ग.ह.ज.६.श्रीनन्दसूनुं-ग.७.अप्राप्ता कृष्णां-इ.फ.ग.ह.ज.८.ते तव क्षमया वक्ष्यमाणशान्त्या किं-फ.ह.ज.९.नास्ति-अ.ब.१०.नास्ति-ग.११.नास्ति-अ.ब.१२.सिञ्चनमेवाप्लावनमिति-इ.फ.ज.ह.सिञ्चनमेवाप्तजीवनमिति-ग.१३.तः १४.पर्यन्तं नास्ति-अ.१५.तु यमस्वसा **इत्यमर**:-इ.फ.ग.ह.ज.१६.अयं नघण्टुकोद्धरो नास्ति-ग.१७.**इत्यमर**:-अ.ब.इ.फ.ह.ज. १८.तः.२०.पर्यन्तं नास्ति-अ.ब.१९.इत्यपि च-ग.इत्यपि-फ.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४७।। [१]पुनरपि जीवितनिरपेक्षत्वेन मलयानिलादीन् प्रत्याहबाधामिति। हे मलयानिल चन्दनवायो! बाधां मम पीडां विधेहि कुरु। हे पञ्चबाण कामऽत्वं प्राणान् गृहाण; यथा पुनरपि अहं गृहं नाश्रयिष्ये न यास्यामि तथा प्राणान् गृहाणेत्यर्थः। हे कृतान्तभगिनि-[२]यमभगिनि यमुने! ते क्षमता शान्त्या किम्? यमभगिन्यास्तव शान्तिर्नोचितेति भावः। त्वं तरङ्गैः[३]स्वकीयैः कल्लोलैरङ्गानि सिञ्च तेन मम देहदाहः शरीरसन्तापः शाम्यतु;

मरणं मे भवत्वित्यर्थ:। [४]एते कामबाणा:, सम्मोहन: क्षोभणश्च दहन: शोषणस्तथा। उत्पाटनश्च कामस्य बाणा: पञ्च प्रकीर्तिता:[५]।।४७।।

### (९) कृष्ण पण्डितकृत- जयन्ती

।।४७।। बाधामिति। हे मलयानिल दक्षिणवायो! बाधां विधेहि पीडां कुरु। गृहाण हे पञ्चबाण! प्राणान् गृहाण। अहं गृहं पुन: नागमिष्ये हे कृतान्तस्य यमस्य भगिनि! ते क्षमया किम्? तरङ्गै: मे अङ्गानि सिञ्च। तेन मम देहदाह: शाम्यतु शान्तो भवतु। कृतान्तभगिनीति सम्बोधनं दाहशमनँ प्रत्यननुगुणमिति विपरीतलक्षणया देहनाशानन्तरं स्वयमेव दाहशान्तिरिति देहत्यागो व्यज्यते। अत्र विप्रलब्धा नायिका। कृतान्तभगिनीति साभिप्रायम्।।४७।।

[६]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां विप्रलब्धावर्णने नागरनारायणो नाम सप्तम: सर्ग:।।

१.पुनरपिसखीं प्रत्याह जीवितनिरपेक्षत्वेन मलयादीन् प्रत्याह-ड. २.नास्ति-क.ल.म. ३.नास्ति-क.४.त:५.पर्यन्तो भाग: सर्गान्तश्लोकव्याख्याया अवसाने दृश्यते-ड.क.ल.म. ६.इतिगीतगोविन्दे विप्रलब्धरर्णने-इ.

### (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४७।। सम्प्रति विरहानलदग्धा जीवोत्सर्गे कृतमती राधाअहह बाधामित्यादि। हे मलयानिल बाधां विधेहि पीडां कुर्वित्यर्थ:। हे पञ्चबाण काम प्राणान् गृहाण। कामस्य झटिति प्राणहरणसामर्थ्य प्रतिपादनार्थं प्राणसंख्यासाम्येन पञ्चबाणेति सम्बोधनम्। पञ्चबाणा यस्येति विग्रह:। ''सम्मोहन: क्षोभणश्च दहन: शोषणस्तथा। उच्चाटनश्च कामस्य बाणा: पञ्च प्रकीर्त्तिता:।।'' कथमित्थं प्रार्थयसे इत्यत आह । गृहं पुनर्न आश्रयिष्ये। इतो व्यावृत्य गृहं पुनर्न गमिष्यामीत्यर्थ:। किं ते कृतान्तभगिनि यमुने! ते तव क्षमया किं प्रयोजनम्? कृतान्तभगिनीत्वेन यमुनाया निर्दयत्वं प्रतिपादितम्। ननु क्षमां त्यक्त्वा सम्प्रति किं कर्त्तव्यम्? तदादिशेत्याह। तरङ्गरङ्गानि सिञ्च। अत्र तरङ्गैरिति पयोभि: सेकसाधनत्वेन तरङ्गाणां हस्तसादृश्यं (श्यार्थं) वा अन्योऽपि पयसा हस्तेन वा सिञ्चति। मम देहदाह: शाम्यतु इत्ययमत्राशय: स्मृतान्यपि शीतवस्तूनि दंदह्यन्ते। तेषां तूपभोगो मृत्यवे इत्यवधार्य विरहसन्तापात् राधया मर्त्तृकामया शीतवारिणा सेक: प्रार्थित:। किंवा विरहानवस्थितचित्तत्वात् कामज्वरे सन्निपातज्वरबुद्ध्या मृत्यवे शीतवारिणा

सेकः प्रार्थितः। उक्तं च, ''सन्निपाते तु दाहान्तं यः सिञ्चेच्छीतवारिणा ।आतुरं स कथं जीवेद्भिषक् शास्त्रं कथं भवे'' दिति मरणेन देहदाहोऽपि यास्यतीत्यभिप्रायः इति श्रीगीतगोविन्दटीकायां सप्तम सर्ग विवरणम्।।४७।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।४७।। संप्रति विरहोत्तप्ता प्राणोत्सर्गं कृतमेवाह, विधामिति। मलयानिल। पीड़ां विधेहि कुरु, विषयत्वेन वाधाविधानसामर्थ्यात्। हे पञ्चवाण प्राणन् गृहाण पञ्चवाणधारित्वे पञ्चप्राणग्रहणयोग्यत्वात्। हे यमस्य भगिनि! ते क्षमया किं त्वं कथं क्षमसे ? यमानुजायाः क्षमा न युक्ता। तर्हि किं कर्त्तव्यम्। तरङ्गैरङ्गानि सिञ्च। तेन किं स्यात् ? मम देहदाहः शाम्यतु, दशमीदशां विधेहीत्यर्थः। कृष्णेन चेदुपेक्षितासि, तर्हि गृहमेव किं न यासि ? न गृहं पुनराश्रयिष्ये। तेन विना गृहमपि सन्तापकमेव स्यादतो मरणं युक्तमित्यर्थः।।४७।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।४७।। एवं निजप्राणाम्बुजनिर्मन्थनीयाचरणप्रियतमोपालम्भपूर्वमात्महृदयं विनिन्द्य प्रवलितनिर्वेदा प्राणापहरणाय मलयानिलप्रमुखं प्रार्थयते। बाधामिति हे मलयानिल! मलयाचलस्थ, सर्पसहकृतनिवासमन्दसमीरण! वाधां प्राणोत्पाटनकारिणीं पीडां विधेहि कुरु। गरलसाहित्येन तादृशबाधाविधानसामर्थ्यात्। धिक्कृतगरलशत-प्रभावहरिविरहमहाज्वालासहनातिस्तब्धप्राणानां शस्त्रादिमन्तरेण उत्पाटनमसाध्यमिति तस्याकिञ्चित् करत्वं मत्वा मन्मथं प्रार्थयते, हे पञ्चबाण! संशोषणसन्तापनादिविविधास्त्र-प्रयोगप्रवीण! प्राणान् गृहाण। मया एव परित्यक्तान् अङ्गीकुरु। पञ्चबाणेन पञ्च प्राणग्रहणसामञ्जस्यादायासाभावः सूचितः। ननु 'जीवन् भद्राणि पश्यति' इति अन्वयात् समयान्तरे पुनरभीष्टमाप्स्यसि। सम्प्रत्यात्मानं समाश्वास्य गृहं गम्यतामिति चेत् तत्राह, पुनरपि गृहं निजवसतिं नाश्रयिष्ये, न गमिष्यामि। तत्र श्वश्रूननान्दादिपरुषोक्तिसहनापेक्षया मरणमेव श्रेय इति भावः। तथास्यापि अकिञ्चित्करत्वं विभाव्य पुनरन्तिकवर्त्तिनीं यमुनामभियाचते, हे कृतान्तभगिनि! अनायासकृतसकललोकप्राणहरणप्रवीणस्य यमस्य स्वसः! यमुने! तरङ्गैस्त्वद्गर्वसर्वस्वव्यञ्जकोर्मिभिरङ्गानि मदीयलोचनादिसर्वावयवान् सिञ्च। बहिर्भवितुमुन्मुखानि तानि अभिसिञ्चन्ती तदभिमतं साधयेत्यर्थः। तेन ते किं स्यादत आह, मम विरहसंदग्धायाः देहदाहः शाम्यतु, शान्तिं प्राप्नोतु। यद्यपि मानसो दाहो मरणेनापि नापगच्छति, तथापि बाह्यान्तरद्विविधदाहयोः सहनापेक्षया वरमेकस्य सहनमिति भावः। ते क्षमया किं कथमेतां नित्यपरिचितां स्त्रियं स्वयमकस्मात् नाशयामि,

इति तितीक्षया किं प्रयोजनम्, न किमपीत्यर्थ:। यमानुजाया: क्षमाकरणस्यायौक्तिकत्वात् इति भाव:।।४७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४७।। वाधांविधेहीति; इदानीं कामोपतप्त हे मलयपवन! हे पञ्चबाणसम्पन्न कामदेव! त्वं वाधां विधेहि । पीडय मां किमर्थं प्रतीक्षसे भो! कन्दर्प पञ्चवाणेन पञ्चप्राणान् गृहाण। तव एतदेव प्रयोजनम्। यस्मात् त्वं विरहिणमुपताप्य स्वगृहाभिमुखीं करोसि। तेन त्वं संतप्तानामुपकारकोऽपि मन्यसे। परं प्राणपातेनापि नाहं गृहं गमिष्ये न चाश्रयिष्ये। श्रीकृष्ण एव मम शरण्य:। पुन: हे यमुने त्वं यमस्य भगिनी त्वयि क्षमा न शोभते। तथापि मेऽनुरोध: कामसन्तप्तस्य मे शरीरस्य दाहं शामयितुं प्लावय चेदहं गृहं न गमिष्ये श्रीकृष्णकर्त्तुकोपेक्षिताया: दु:खेन जले निमज्जनं वरमिति भाव:।।४७।।

**४७-क-इषन्मीलितेदृष्टि मुग्धविलसत्सीत्कारधारावशा**
**दव्यक्ताकुलकाकुविकसद्दन्तांशुधौताधरम्।**
**शान्तैस्तब्धपयोधरं भृशपरिष्वङ्गात्कुरङ्गीदृशो**
**हर्षोत्कर्षविमुक्तनि: सहतनोर्धन्यो धयत्याननम्।।४७ - क।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४७ - क।। इदानीमन्यापदेशेनात्मानं धन्यमिति ध्वनयति, ईषन्मीलितेति। हर्षोत्कर्षविमुक्तनि:सहतनो: हर्षोत्कर्षेण नानारतजनितानन्दातिशयेन विमुक्ताश्लेषत्वेन निर्व्यापारा नि:सहा च कामावेशवशादन्यव्यापारासहा तनुर्यस्या:। एतावता सुरतमनुश्रान्ततनोर्मृगलोचनाया धन्य एव मुखं धयति पिवति नाकृतपुण्यकर्मा । कथं यथा स्यात्? भृशपरिष्वङ्गाद्दृढालिङ्गनाच्छान्तस्तब्धपयोधरं शान्तौ विपुलकौ स्तब्धौ कठिनौ किंचिदानतौ पयोधरौ यस्मिन्कर्मणि तद्यथा स्यात्। एतावता सुरतान्ते नितान्तं कान्तं तन्मुखं दृष्ट्वा पुनरालिङ्ग्याधरपाने स्पृहाभवदित्यर्थ:। किंभूतमाननम्? ईषन्मीलितदृष्टि किंचिन्मुकुलिते दृष्टी यत्र । किंभूतमाननम्? मुग्धं मनोहरं यथा स्यात्तथा विलसन्त्यो या: सीत्कृतानां धारा श्रेणयस्तद्वशादव्यक्ता आकुलाश्च सुरतक्रीडायां या: काकवो ध्वनिविकारास्तासु विकसन्तो ये दन्तांशवस्तैर्धौतोऽधरो यत्र तत्तथा। कस्मात्? दृढालिङ्गनवशात्। एतेन वृक्षाधिरूढकमित्यालिङ्गनमुक्तम्। तल्लक्षणम्

'चरणेन चरणमाक्रम्य द्वितीयेनोरुदेशमाक्रमन्ती वेष्टयन्ती च तत्पृष्ठासक्तैकबाहुर्द्वितीयेनांसमवनमयन्ती ईषत्प्रवृत्तान्तःश्वसितसीत्कृतकूजिता चुम्बनार्थमधिरोढुमिच्छेदिति वृक्षाधिरूढकम्'। तच्च घटितमिति चुम्बनविशेषः। ईषत्प्रगृह्य निमीलितनयनावाच्छादयन्तीति घट्टितं नाम'। एतच्च तदालिङ्गनतोषेण आत्मनि धन्यत्वमारोप्य स्वात्मगतार्थचिन्तनपरं पद्यम्। शार्दूल विक्रीडितं वृत्तम्। जातिरलंकारः। पाञ्चाली रीतिः। मागधी गीतिः। भारती वृत्तिः। स्थितलयं गानम्।।४७ - क।।

## (३) जगद्धरकृत- सारदीपिका

।।६८-ग।। ईषदिति कुरङ्गीदृशो हरिणनयनायाः आननं मुखं धन्यो भाग्यवान् जनो धयति पिवति कीदृश्याः कुरङ्गीदृशः श्वासेन कामजनितेन स्मरपवनेन उन्नतौ किंचिच्चलितौ पयोधरौ स्तनौ तयोरुपरि परिष्वङ्गादालिङ्गनात् यः हर्षोत्कर्षः हर्षाधिक्यं तेन विमुक्ता त्यक्ता सालसा अतएव निःसहाकार्या क्षमा तनुः शरीरं यस्याः परिष्वङ्गं कृत्वा आलिङ्ग्य धन्यो धयति पिवतीति भावः कीदृशशमाननम् ईषत्मीलितदृष्टिं मुकुलिताननं मुग्धं सुन्दरं हसितं हास्यं यस्मिन् पुनः कीदृशं सीत्कारधारावशात् कामविकारपरवशात् अव्यक्ता आकुलाया केलिस्तस्यां यः काकुः शोकभीत्यादिभिः ध्वनिविशेषस्तेन विकसन्तः प्रकटीभवन्तो ये दन्ताः दशनास्तेषामंशुभिः किरणैर्धौतः क्षालितः अधरो यस्मिन्।

एतेन कविना निजमातापितृप्रतिपादनेन मङ्गलमाचरति तन्निजग्रन्थे।

(आशिरपिदत्तेति)प्रीतः प्रमोदवान् पीताम्बरः कृष्णः यत्र स तथा।।

कदाहं काव्यवारिधौ वसन्ति नो जलारसाः।
मदीय बुद्धिरल्पिका नबोदितं विशेषतः।।

रे रे न जातु कुटिलाश्च जनाः परेषु दोषैस्तदुच्चावचसः पशवो भवन्तः।
तस्मात्मदीयविपुलं परिशुद्धरत्नकाचश्रमं श्रमदृशे नियतं तनुध्वम् ।।
हे सज्जनाः परगुणेषु भवन्तः एव सन्तोषवन्त इति सर्वजनप्रतीतः।
तन्मे परिश्रममशेषममु विलोक्य टीकामिमां सुकृतिनोभृशमादरध्वम्।।६८-ग।।

(स्थानस्य परिवर्त्तनंकृतम्)

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकयां
सारदीपिकायां सुप्रीतपीताम्बर नाम

## (४) शंकरमिश्रकृत- रसमञ्जरी(टीकानास्ति)

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी(टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती (टीकानास्ति)

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४७ - क।। एवं पुरुषायित[८]विलासमुक्त्वा मुखपान[९]सौख्यमाह, मीलदित्यादिना। धन्यः [२]श्रीकृष्णः कुरङ्गीदृशः [३]मृगीदृशः श्रीराधायाः आननं मुखं धयति [४]चुम्बति। धन्योऽहमिति सादरं राधाधरामृतं पिबतीति भावः। कीदृश्याः? हर्षस्य [५]सुरतानन्दस्योत्कर्षेणाधिक्येन विमुक्ता[६]सालसा निःसहा श्रान्ता व्यापाराक्षमा तनुर्देहो यस्याः। कीदृशः? श्यामायाः [७]श्रीराधायाः यौ उत्तुङ्गौ[८]उच्चौ स्तनौ[९]तयोरुपरि परिष्वङ्गी आलिङ्गनस्वभावः। एतेन सुरतविरामेऽपि सुरततृप्तिः कथिता। कीदृशमाननम्? केनचित्सुरतानन्दसुखविशेषेण सुरतश्रमेण वा मीलद्दृष्टि मुद्रिताक्षि। कीदृशम्? सीत्काराणां धारा[१०]स्तासां[११]अंशवः [१२]किरणश्रेणयः तद्वशात्तदधीनादव्यक्ता अप्रकटा आकुलाश्च याः [१३]केलयस्तासु या काकुःक्रीडाध्वनिविशेषस्तेन विकसन्तः प्रकटीभवन्तो ये [१४]दन्तास्तै र्धौतः प्रक्षालितोऽधरो यत्र तादृशम्। ''काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः'' **इत्यमरः** (१.६.१२)।।४७ - क।।

१.ईषन्मीलितदृष्टि मुग्धविलसत्सीत्कार-नि.सा.ईषन्मीलितदृष्टि मुग्धहसित सीत्कार-ड.ईषन्मीलितमुग्धदृष्टिहसितं-च.२.नास्ति-क.ल.म.३.तः४.पर्यन्तो भागः-क.ल.म.ग्रन्थेष्वेवं दृश्यते विह्वल इति। कीदृशीम्? विलुलिता आम्लानां स्रजं धारयन्तीति। पुनः कीदृशी? आत्मरूपं पश्यतीति। स्तनजघनपदं स्तनौ च जघनपदं च पूर्वद्वारं इत्यर्थः। पाणिना करेण सद्य आच्छाद्य-क.अर्थात् कृष्णम्। कीदृशी? विलुलितां म्लानां स्रजं धारयतीति-ल.म.५.विक्षिप्तोऽभूत्-क.ल.म.६.मुक्ताकलापः-क.ल.म.७.नास्ति-क.८.सुरतविलास-इ.फ.ग.ह.ज.९.सौभाग्यमाह-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४७ - क।। ईषदिति। धन्यो जनः कुरङ्गीदृशः [१५]हरिणनयनायाः आननं मुखं [१६] धयति। कीदृश्याः कुरङ्गीदृशः? श्वासेन कामजनितेनोन्नद्धौ किञ्चिच्चलितौ [१७]यौ पयोधरौ स्तनौ तयोरुपरि परिष्वङ्गात् यो हर्षोत्कर्षो हर्षाधिक्यं तेन विमुक्ता त्यक्ता सालसाऽत एव निःसहा कार्याक्षमा तनुर्यस्याः सा। [१८]अथ वा ल्यब्लोपे पञ्चमी। परिष्वङ्गं कृत्वा आलिङ्ग्य धन्योऽधरं पिबतीति भावः। कीदृशमाननम्? ईषन्मीलितदृष्टि मुकुलितनयनं मुग्धं सुन्दरं हसितं हास्यं यस्मिन्। पुनः कीदृशम्? सीत्कारधारा-वशात्कामविकारपरम्परावशात् अव्यक्ता आकुला या केलिस्तस्यां या काकुः शोकभीत्यादिभिर्ध्वनिविशेषः तेन विकसन्तः प्रकटीभवन्तो ये दन्तांशवस्तैर्धौतः क्षालितः अधरो यस्मिन्।।४७ - क।।

१.शान्तस्तब्धपयोधरं भृशपरिष्वङ्गत्कु रङ्गीदृशो-नि.सा.श्वाशोन्नद्धपयोधरोपरि परिष्वङ्गा-त्कुरङ्गीदृशो-ड.श्वासान्नुच्चपयोधरोपरिपरिष्वङ्गरत्कुरङ्गीदृशो-च.२.श्रीनन्दनन्दन:-ग.३.मृगनयनाया:-इ.फ.ग.ह.ज.४.पिबति-इ.फ.ग.ह.ज.५.सुरतानन्दयोरुत्कर्षेण-अ.ब. ६.सालसा नि:क्षमा-अ.ब. ७.श्रीगोपकुमार्या:-ग.८.नास्ति-इ.फ.ग.ह.ज.९.तयोरुपरिष्वङ्गी-ग. १०.तेषां-अ.ब.इ.११.वशाद-धीनादव्यक्ता-ग.ह.१२.नास्ति-अ.ब.१३.केवलस्तेषु-अ. केलयस्तेषु-ब.१४.दन्तासु अंशव: किरणास्तैर्धौत:-ग.दन्तास्तेषां अंशव: किरणास्तैर्धौत:-ह, १५.हरिणीनयनाया-क.१६.धयति पिबतीत्यर्थ:-क.१७.नास्ति-ड.ल.म.१८.तनो: परिष्वङ्गं आलिङ्ग्य आननं धन्यो धयति पिबति इति भाव:-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४७ - क।। ईषदिति। ईषत् स्वल्पं मीलिते सङ्कुचिते मुग्धे च ते दृष्टी यस्मिन् तच्चैतादृशं हसितं यस्मिन् तत्। मीलितमुग्धदृष्टि यथा तथा हसितं यस्मिन्निति वा। सीत्काराणां दन्तक्षतासहनजातानां धारा परम्परा तस्या: वशात्। अव्यक्ता च सा स्फुटा च सा आकुला च सा केलिकाकु: सुरतोद्भवस्वरविकार: तया विकसन्त: दृश्यमानाश्च ते दन्तास्तेषां अंशुभि: कान्तिभि: धौत: स्वच्छ: अधरो यस्मिन् तत्। उच्चौ पयोधरौ तयोरुपरि परिष्वङ्गात् श्वासान् अमुञ्चदिति शेष:। हर्षस्य उत्कर्ष: आधिक्यं तेन विमुक्ता[३] उपवेशनाद्यभावान्निपतिता च सा नि:सहा क्षन्तुमशक्या तनु: शरीरं यस्या: तस्या: कुरङ्गीदृश: आयताक्ष्या: आननं मुखं धन्य: धयति पिबति चुम्बतीति भाव:। पुण्यवतामेव गाढालिङ्गनसहिताधरचुम्बनसुखातिशयो भवतीति। शृङ्गार: सम्भोगरूपरस एव। अत्र एवम्भूताया राधाया आननं कृष्ण: पपाविति प्रस्तुते विशेषे सामान्यमभिहितमिति अप्रस्तुतप्रंशसालङ्कार:।

अप्रस्तुतप्रंशसा स्यात्सा यैव प्रस्तुताश्रया।
कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।।
तदन्यस्य वचस्तुल्ये तत्तुल्यस्येति पञ्चधा।। इति लक्षणात्।।४७ - क।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४७ - क।। तत: तस्या रसावेशावसरे प्रिय: अधरं पीतवानित्याहमीलदिति। धन्यं आत्मानं मन्यमान: श्रीकृष्ण श्रीराधाया आननं पिवति। कीदृश्यां ? हर्षोत्कर्षस्य विमुक्त्या प्रसूत्या नि:सहा धर्त्तुमशक्या तनुर्यस्या: तस्या:। कीदृश: ? श्वासेन उन्नद्धयो: स्फीतयोरुच्चयो: पयोधरयो: उपरि परिष्वङ्गो विद्यते यस्य स:। अनेन पाने हेतुगर्भविशेषणानि आह मीलद्दृष्टि तथा मिलत्कपोलपुलकं तथा च शीत्कारस्य या

धारा अनसच्छिन्नता तस्या वशात् अव्यक्ता आकुला या केलिषु काकु: तया विकसितर्दन्तांशुभिधौत: अधर: यत्र तत्। अनेन रसावेश: सूचित:।।४७ - क।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४७-क।। अत्रैवावसरेऽतिप्रीत: कृष्णस्तस्या: अधरं पीतवान् इत्याह, मीलदिति। धन्य: तादृशप्रियारतानुभवेनात्मनो धन्यतां मन्यमान: श्रीकृष्ण: कुरङ्गीदृश: श्रीराधाया आननं मुखं धयति, पिवति। कीदृश्या:, श्रीकृष्णसुखतात्पर्यैक-निदानस्वकृत-विविधवैजात्यकृत्यपर्याप्तिजनितेन, हर्षोत्कर्षेणानन्दातिशयेन विमुक्तनि:सहा, त्यक्तश्रमा, तनुर्देहो यस्यास्तादृश्या:। कीदृश: श्यामाया: श्रीराधाया उत्तुङ्गपयोधरयो: किं वा कस्तूरिकालेपनश्यामलयोरुच्चकुचयोरुपरिभागे परिष्वङ्ग: विद्यते यस्य स:। तत्कुचाग्रभागे उर:संघटय्याधरसुधां पीतवानित्यर्थ:। आननं कीदृशम्। मीलन्ती, ईषन्मुद्रिता दृष्टिर्यत्र तत्। मिलन्त: कपोलदेशे पुलका यत्र तत्। सीत्कारस्य धारा, अनवच्छिन्नता तस्या वशात्, अव्यक्ताकुला, अस्पुटाकुला, या केलिषु काकुस्तया विकसद्भिर्दन्तांशुभिर्दशनकिरणैर्धौत: परिष्कृतोऽधरो यत्र। तदनेन प्रेमातिशय: सूचित:।।४७ - क।। (पुन: ६८ (ग) मध्येअस्ति)

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४७(क)।। ईषनमीलितदृष्टीति; अन्यापदशेने आत्मानं धन्यं ध्वनयति। हर्षोत्कर्षविमुक्तनि:सहतनो: हर्षोत्कर्षेण नानाप्रकारकेण रतेन जनितानन्दातिशयेन विमुक्ताश्लेषत्वेन आलिङ्गनमुक्तत्त्वेन निर्व्यापारा नि:सहा च कामावेशवशात् अन्यव्यापारेण असहा तनुर्यस्या: श्रीराधाया:। अनेनप्रकारणे सुरतान्तरेण श्रान्तक्लान्तशरीरस्य मृगलोचनाया: धन्य एव मुखं धयति पिवति नाकृतपुण्यकर्मा। य खलु न अपुण्यकर्मा। कथं यथा स्यात्? भृशं परिष्वङ्गा दृढालिङ्गनाच्छान्तस्तब्ध-पयोधरम्। अतिशयमालिग्ङ्गनेन आछादितौ स्तनौ। तेन शान्तम्। विपुलको स्तब्धौ। कठिनौ किञ्चानतौ पयोधरौ यस्मिन् कर्मणि तथैव। एतावता सुरतान्ते नितान्तं कान्तं तन्मुखं दृष्ट्वा पुनरालिङ्ग्याधरपाने स्पृहा जायते। किंभूतमाननम्? मुग्धं मनोहरं यथा स्यात्तथा विलसन्त्यो या: सीत्कृतानां धारा: श्रेणयस्तद्वशादव्यक्ता आकुलाश्च सुरतक्रीडायां या: काकवो ध्वनिविकारास्तासु विकशन्तो ये दन्तांशवस्तैर्धौतोधरो यत्र तत्तथा। कस्मात्? दृढालिङ्गनवशात्। एतेन वृक्षाधिरूढकमित्यालिङ्गनमुक्तम्। तल्लक्षणम् यथा; चरणेति; चरणेव चरणमाक्रम्य द्वितीयेनोरुदेशमाक्रमन्ती वेष्टयन्ती च तत्पृष्ठासक्तौक बाहुर्द्वितीयेनांसमवनन्ती ईषत्प्रवृत्तान्त: श्वसितसित्कृतकूजिता

चूम्बनार्थमधिरोढुमिच्छेदिति वृक्षाधिरुढकम्। तच्च घटितमिति चुम्बनविशेषः। ईषद् प्रगृह्य निमीलितनयनावाच्छादयन्तीति घटितं नाम। एतच्च तदालिङ्गन तोषेण आत्मनि धन्यत्वमारोप्य स्वात्मगतार्थ चिन्तनपरं पद्यम्। शार्दूलविक्रीडितं वृत्तम्। जातिरलंकारः। पाञ्चाली रितिः। मागधी गीतिः। भारतीवृत्तिः। स्थितलयं गानमिति कुम्भ-नरपतिः।।४७(क)।।

**४७-ख- प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं**
**राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।**
**व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने**
**स्वादुस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः।।४७-ख।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीकानास्ति)

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४७ - ख।। इदानीं सर्गान्ते वैष्णवानाशास्ते; प्रातरिति। अयं नन्दात्मजः जगदानन्दायास्तु। किंभूतः ? स्वादु स्मेरमुखः स्मेरं सहासं मुखं यस्य स तथा। किं कृत्वा ? राधानने नयनयोरञ्चलं प्रान्तमाधाय आरोप्य । किंभूतमञ्चलम् ? व्रीडाचञ्चलं लज्जया तरलम्। एतावता राधाननं कटाक्षवीक्षितं कृत्वेत्यर्थः। तदुक्तम्; 'यद्गतागतविश्रान्तिवैचित्र्येण विवर्तनम्। तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते' इति। क्व सति ? सखीमण्डले प्रातश्चकितं यथा स्यात्तथा स्वैरं स्वेच्छया हसति सति। किं कृत्वा ? अच्युतं नीलनिचोलं नीलपरिच्छदं विलोक्य । च पुनः राधाया उरः संवीतपीतांशुकम्। एवं वस्त्रविनिमयः सखीनां हास्ये कारणम्। इह हास्यो रसः। शार्दूलविक्रीडितं वृत्तम्। [१]स्वभावोक्तिरलंकारः। अत्र सर्गे शठो नावकः, अभिसारिका नायिका। तल्लक्षणं; स्मरार्ताभिसरेत्कान्तं सारयेद्वाभि-सारिका'।।४७ - ख।।

### (३) जगद्धरकृत- सारदीपिका (टीका नोपालब्धा)

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।४७ - ख।। सर्गान्ते भक्तान्कविराशिषाऽऽशास्ते, प्रातरित्यादिना। अयं नन्दात्मजः जगदान्दायास्तु। कथंभूतः ? स्वादुस्मेरमुखः ईषत्स्मितेन युक्तं मुखं यस्य तथोक्तः। किं कृत्वा ? राधाया आनने वदने नयनयोरश्चलं प्रान्तमाधायारोप्य। कीदृशम् ? लज्जया व्रीडया तरलं चञ्चलं कटाक्षवीक्षितं कृत्वेत्यर्थः। यथोक्तम्, यद्गतागताविश्रान्तिवैचित्र्येण

विवर्तनम्। तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते।। इति। अथवा, नयनयोरञ्चमाधाय अञ्चलेन राधानयने वाससाऽऽच्छाद्येति वा। क सति ? सखीमण्डले सहचरीवृन्दे। चकितं विस्मितं यथा भवाति तथा स्वैरं स्वेच्छया हसति हास्यं कुर्वति सति। किं द्दष्टा ? प्रातः प्रभातसमये अच्युतस्योरो वक्षो नीलनिचोलं कञ्चुकावृतं संवीतपीतांशुकं परिकल्पितपीताम्बरम। अथवा, राधायाः संवीतपीतांबरकृष्णस्य नीलनिचोलमिति वस्त्रं विपर्यासं द्दष्टवति वा।।४७-ख।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी(टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती (टीकानास्ति)

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४७-ख।। सर्गान्ते कविराशिषमाशास्ते, प्रातरित्यादिना। [४]सखीवचनैः शान्तिमलभमानां श्रीराधां दृष्टवा[५]श्रीकृष्ण एव जयदेवापदेशेन नान्य इति तदग्रे [६]प्रत्यक्षीभूतो नान्यथा कविः कथं प्रत्यक्षानभूतमिव वर्णयेत्[७]। अयं नन्दात्मजः जगदानन्दायाऽस्तु। कीदृशः ? राधामुखे [८] स्वैरस्मेरमुखः स्वैरं स्वेच्छया मन्दहास्ययुक्तमुखः। किं कृत्वा ? श्रीराधायाश्चकिंत विलोक्य दृष्ट्वा।[९]कीदृशम् ? व्रीडेति [१०]कामोद्भूतलज्जया [११] चञ्चलमञ्चलं वस्त्रप्रदेशो यत्र व्रीडेति [१२]भोगसम्भोगव्यञ्जकेति भावः। [१३]पुनः किं कृत्वा ? नयनयोरञ्चलमाधाय अञ्चलेन[१४]राधानयने[१५]वाससाऽऽच्छाद्येत्यर्थः। कस्मिन् सति ? [१६]सखीवृन्दे स्वच्छन्दं हसति सति। [१७]किं दृष्ठ्वा ? प्रातः प्रभाते अच्युतस्योरो वक्षो नीलनिचोलं नीलकञ्चुकावृतं संवीतपीतांशुकं [१८] परिकलितपीताम्बरञ्च द्वयोश्चकितं च विलोक्य। [१९]अथ वा राधायाः संवीतपीताम्बरं कृष्णस्य नीलनिचोलमिति वस्त्रविपर्यासं दृष्ट्वेति योजना।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावंतस[२०] शिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां नागरनारायणो नाम सप्तमः सर्गः।।४७-ख।।

१.एतत्पधद्व्याख्याभागवत्पत्रं नोपलभ्यते-अ. पधमिदं सव्याख्यं नास्ति-इ.अष्टमसर्गान्ते दृश्यते-ड.क.ल.म.२.स्मेरस्मेरमुखो-इ.३.सम्प्रति कविराशिषं ब्रूते-ड.सर्गान्तेकविराशिषं ब्रूते-फ.ग.स.ह.ज.४.तः५.पर्यन्तं नास्ति- - अ.ब.६.श्रीगोपाल एव-ग.७.प्रकटीभूतो-फ.ग.स.ह.ज.-८.स्मेरेण ईषद्धसनेन स्मेरमुखोऽबहिर्भत-दन्तद्युतिः-फ.ग.९.कीदृशं चकितम्-ग.१०.कामोद्भूतया-फ.ग.ह.ज.११.चञ्चलं चपलमञ्चलं-फ.ग.ह.ज.१२.मानससम्भोग-ग.ह.१३.पुनश्च-फ.ग.ह.ज. १४.श्रीगोपात्मजानयने-ग.१५.वा समाच्छाद्येत्यर्थः-फ.ह.ज.१६.सखीवृन्दे हसति सति स्वैरं

स्वच्छन्दम्-फ.ज.१७.पुन: किं कृत्वा-ब.१८.परिकल्पित-ग.१९.यद्वा-ग.२०.शिवदास-पण्डितात्मज-ग.ह.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४७ - ख।। सर्गान्ते कविर्भक्तान् प्रत्याशिषं ब्रूते, प्रातरिति। अयं ? नन्दात्मज:- कृष्णो जगदानन्दायाऽस्तु लोकसुखार्थं भवतु। कीदृश: व्रीडया चञ्चलं[१]चलत् नयनयोर्नेत्रयोरञ्चल(लं) अपाङ्गं कटाक्षं राधानने [२] राधामुखे आधायार्पयित्वा [३] स्वैरमतिशयेन स्मेरमुख ईषद्धास्ययुक्तमुख:। [४]स्मेरमुखे कारणमाह- (प्रातरिति)। [५]कस्मिन् [६] सति ? प्रात: [७] उषसि अच्युतं तं कृष्णं नीलं निचोलं वस्त्रं यस्य श्यामवस्त्रधरं विलोक्य दृष्ट्वा, [८]अनु च राधाया उरो वक्ष:स्थलं संवीतपीतांशुकं परिधानी(त)कृत-पीताम्बरं सविस्मयं विलोक्य [९] सखीमण्डले सखीसमूहे स्वैरं शनैर्हसति। [१०]वस्त्रपरिवर्तनमालोक्य [११] हास इत्यर्थ:। [१२]विलक्ष इति विस्मयान्वित: विलखायी भाषाप्रसिद्ध:[१३]।।४७ - ख।।

सान्द्रेति। क्षेपक:। इन्दिन्दिरो भ्रमर: मकरन्दवत् पुष्परसवत् सुन्दरं यथा स्यात्तथा गलन्त्या मन्दाकिन्या वियद्गङ्गया मेदुरं स्निग्धमित्यर्थ:। अशुभस्कन्दाय पापनाशाय। [१४]नागरश्चतुर:।।४७ - ख।।

[१५]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां नागरनारायणो नाम सप्तम: सर्ग:।।

१.चलमानं-ड.क.ल.म.२.राधाया आनने आधाय-क.३.नास्ति-क.४.स्मेरमुखत्वे-क.५.६.नास्ति-ड.७.उरसि-ड.ल.म.८.अमुत्र-क.९.नास्ति-क.इत आरभ्याऽऽपद्यसमाप्ति व्याख्या नास्ति-ल.म.१०.वर्तनमालोक्य-ड.११.हसति विहसति इत्यर्थ:-ड.१२.त:१३.पर्यन्तं नास्ति- -क.ल.म.१४.नास्ति-क.१५.इति श्रीगीतगोविन्दटीकायां सप्तम: सर्ग:-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती (टीका नास्ति)

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४७-ख।। अथैतत् दु:खवर्णनमसहिष्णु: कवि: सिंहावलोकनन्यायेन साधारणकेलिरात्रे: प्रातश्चरितवर्णनेन श्रीराधिकाया: खण्डितवस्थां वर्णयिष्यन् श्रीराधामाधवयो: प्राक्तनकेल्यनन्तरावस्थितिमाहप्रातरिति। नन्दात्मजो जगदानन्दायास्तु। कीदृशम् ? स्वच्छन्दं यथा स्यात् तथा सखीमण्डले हसति सति ब्रीड़चञ्चलं नयनयोरञ्चलं राधानने आधाय स्मेरमुख:। कुत: सखीहास: ? प्रभाते अच्युतं नीलनीचोलं चकितं

वीक्ष्य श्रीराधाया उरश्च सम्वीतमुत्तरीकृतं यत्र, एतादृशं वीक्ष्य। अतः सगोद्धयं नागरा एव नरानरसमूहा स्तेषामयनं मूलभूतं यः श्रीकृष्णो यत्र स इति वालवोधिन्यां सप्तमः सर्गः।।४७ - ख।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४७-ख।। एवं श्रीराधाया विरहप्रलापवर्णनसमाकुलः कविस्तस्याः प्राक्तन-सम्भोगानन्तरं सम्भ्रमकौतुकरसान्तरमुपक्षिपन् सर्गमुपसंहरति; प्रातरिति। अयं नन्दात्मजः जगदानन्दाय अस्तु। कीदृशः। सखीमण्डले, स्वेरमप्रतिबन्धं यथा स्यात्तथा हसति सति, व्रीडाचञ्चलं कटाक्षं राधानने आधाय अर्पयित्वा स्मेरस्मेरमुखः, सहजस्मेरमुखं सखीहासेन अधिकस्मेरं कृतवानित्यर्थः। किं दृष्ट्वा सखीमण्डलस्य हासः। तत्राह, प्रातरिति। प्रातः, प्रभाते, क्रीडानिकुञ्जात् निर्गमनसमये नीलनिचोलं यस्य तादृशम्, कृतनीलवस्त्रावगुण्ठनमित्यर्थः। अच्युतं श्रीकृष्णं तथा राधाया उरो वक्षः संवीतपीतांशुकम्, उत्तरीयं कृतं पीतांशुकं यत्र तादृशम्, चकितं समम्भ्रमं विलोक्य तासां कौतुकेन हासोदय इति भावः । यथोक्तं **श्रीगोविन्दलीलामृते**,

विलोक्याग्रे मेधाम्बरवृतशरीरं प्रियतमं,
वयस्यां तां पीताम्बरपरिवृताङ्गीं प्रमुदिताम्।
हसन्त्यस्ताः सख्यः करपिहितमुखः प्रतिदिशं
दिशन्त्यश्चान्योन्यं कुटिलचलदृग्भिर्मुमुदिरे।। इति।।

इति श्रीगीतगोविन्दे नागरो नारायणो नाम सप्तमः सर्गः। अत एव नागरो विलासी, नारीणां समूहो नारस्तस्यायमाश्रयभूतो नारायणः श्रीकृष्णो यत्र सोऽयं सर्गः।

।।इति रसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायां सप्तमसर्गः समाप्तः।।४७(ख)।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४७-ख।। स्मेराननोऽयं जगदानन्दकन्दनन्दात्मजो सूनो जगत्कल्याणं नन्दनाय करोतु। सर्गान्ते कविराशीषाऽऽशास्ते।। स एव नन्दपुत्रः कदाचित् कुञ्जे रात्रियापनं कृत्वा प्रातः श्रीराधायाः नीलवसनं स्वयं श्रीकृष्णः परिधाय तथा श्रीकृष्णस्य पीतवसनं श्रीराधा स्वदेहमावृत्य यदा कुञ्जाद् बहिर्गच्छतः तदानीं सखीमण्डलीनां हासेन श्रीकृष्णः हसति। श्रीराधा लज्जानम्रमुखेन नेत्रकोणे पश्यन्ती नन्दस्य नाम सुखस्य यथार्थपुत्रः श्रीकृष्णः संसारमानन्देन प्लावयतु।। स्वभावोक्तिरलंकारः यथा स्वभावोक्तिदुरुहार्थः स्वक्रिया रूपवर्णनम् इति **विश्वनाथः**, नायकः शठेति कुम्भ परं नायकस्य धृष्टता आंशिकतया

फलति यत: राधावदनं परिधाय नं लज्जते अपि तु हसति। तस्यान्यत्र दक्षिणनायकत्वात्। हास्यरस: अभिसारिका नायिका।

नत्वारविन्दं सद्गुरुं मातरं तां मीराभिधाम्
गीतगोविन्दटीकेयं प्रफुल्लेन विधीयते।
सा मीरा जगदम्बा हि राधा प्रार्थनया तया
तस्या: कृपाकटाक्षेण टिप्पणीयं प्रवर्तते।।
स्मर्यते राधाकृष्णयोर्लीला त्वलौकिकी क्षितौ।
स्वर्णलताभिधा टीका कृपयात्र वितन्यते।।
इति कवि: श्रीप्रफुल्लमिश्रविरचितायां स्वर्णलताटिप्पण्यां सप्तमसर्ग:।।४७(ख)।।

❁ ❁ ❁

# ।। अष्टमः सर्गः ।।

## विलक्ष्यलक्ष्मीपतिः



# ।। अष्टम: सर्ग: ।।

## । विलक्ष्यलक्ष्मीपति: ।

**४८-अथ कथमपि यामिनीं विनीय स्मरशरजजरिताऽपि सा प्रभाते।**
**अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम्।।४८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४८।। अस्मिन्नष्टमे सर्गे खण्ड़िता वर्णनीया।

निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविशेषविचित्रताङ्ग:।
यस्या: कुतोऽपि पतिरेति गृहं प्रभाते
सा खण्डिता निगदिता कविभि: पुराणै:।।

उत्तरगीतमवतारयति। अथेति। अथ कथमपि रात्रिं नीत्वा कामार्त्तापि सा प्रभाते प्रणतमपि प्रियं साभ्यसूयं यथा स्यादेवमाहेति वाक्यार्थ:। पुष्पिताग्रावृत्तम्।।४८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४८।। इदानीमेवं तत्परत्वेन विलपमानायास्तस्या: पुरत आर्तप्राणपरित्राणकारणं जगत्कारणकारणमाविरभूत्। अत: कविराह, अथेति। मानिनीनां हि प्रियाग्रतो मानोऽतिमानमेतीति प्रसिद्धमाह। अथ माधवागमनानन्तरं प्रियं साभ्यसूयं सा राधा वक्ष्यमाणमाह। किंभूतं प्रियम्? अग्रे प्रणतमपि। अर्थाच्चरणयो:। पुन: किंभूतम्? अनुनयवचनं सामवाक्यं वदन्तम्। क्व? प्रभाते। किंभूता सा? स्मरशरजर्जरितापि। किं कृत्वा? कथमपि महता कष्टेन यामिनीं विनीय। पुष्पिताग्रा वृत्तम्। खण्डिता नायिका। हरि हरीति खेदे धूर्तो नायक:। विप्रलम्भो रस:। जातिरलंकार:।।४८।।

### (३) जगद्धरकृत- सारदीपिका

।।४८।। अधुना राधाप्रियं प्रातरागतं दृष्ट्वा साभ्यसूयवचनमेवमाह अथेति अथानन्तरं मङ्गलार्थं वा कथमपि स कष्टं यामिनी रात्रिं निनायनीत्वा स्थिता सा राधा प्रियं कृष्णं साभ्यसूयं सेर्ष्यं यथा स्यात्तथाह उक्तवती कीदृशा सा स्मरशरै: कामबाणै: जर्जरितापि विद्धापि कीदृशां प्रियं प्रात: समये अनुनयाय प्रबोधायवचनं वाक्यं वदंतं पुन: कीदृशं अग्रेप्रणमन्तमपि नम्रमपि।।४८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४८।। अथेति। अथानन्तरं सा राधा प्रभाते प्रात: प्रियं कृष्णं साभ्यसूयमसूयासहितं यथा स्यादेवमाह उक्तवती। किं कृत्वा? यामिनीं रात्रिं कथमपि कष्टादपि विनीय नीत्वा। अत्र 'यामिनी'पदेन प्रियविरहेऽतिदीर्घत्वं ध्वनितम्। 'उदरवती कन्या' इतिवत्। कीदृशी? स्मरशरजर्जरितापि कामबाणपीडितापि अन्यनायिकानखाङ्कदर्शनेन जनितमहादु:खा विस्मृतविरहदु:खा उवाचेत्यर्थ:। कीदृशं प्रियम्? अनुनयाय स्वापराधजनितकोपशान्तये वचनं 'यज्जातं तज्जातं भूयो नेदृशमाचरामि' इत्यादिविनयवाक्यं वदन्तं प्रणतमपि नम्रमपि। 'रजनी यामिनी' **इत्यमर:**।।४८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४८।। अथ सख्यै विरहनिवेदनानन्तरं स्मरशरै: कामबाणै: जर्जरितापि बिद्धापि कथमपि अतिप्रयासेनैव यामिनीं निशां विनीय कृष्णं बिना नीत्वा प्रभाते प्रात:काले अनुनय उपशान्त्वनाय बिनयो नम्रीभावो यस्मिन् कर्मणि तद् यथा तथा। एतद् कृष्णविशेषणं वा वदन्तं गदन्तं न केवलं प्रियालापमात्रं अपि त्वग्रे पादकमलपुरोभागे प्रणतं नमस्कूर्वन्तमपि किमु तथाबिधमितिभाव:। प्रियं वल्लभं श्रीकृष्णम् अथवा प्रियं प्रियं बदन्तं श्रीकृष्णमिति वान्वय:। आभ्यसूया ईर्ष्या तया सहितं यथा तथा आह वक्ति। अन्यसम्भोगरूपमार्ग: कृतवन्तं श्रीकृष्णसोपालम्भं वदतीत्यर्थ:।।४८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४८।। खण्डितनायिकाया राधाया: प्रियोपलभ्भवर्णनाय प्रसङ्गमवता-रयति। अथान्तरं सा राधिका स्मरशरजर्जरितापि कामबाणखण्डखण्डीभूतापि यामिनीं रात्रिं कथमपि कष्टसृष्ट्या विनीय नीत्वा प्रभाते प्रात:काले अग्रे अनुनयवचनं प्रीतिजनकवचनं वदन्तं प्रणतमपि प्रकर्षेण नतं पादपतितमिति यावत्, एवभ्भूतमपि प्रियं साम्यसूयं सक्रोधं यथा स्यादेवमाह उक्तवती। अत्र च सर्गे खण्डिता नाम नायिका वर्णनीया। वल्लक्षणम् 'निद्राकषाय मुकुलीकृताभ्रनेत्री नारी नखव्रणविशेषविचित्रिताङ्गी। यस्या: कृतेऽपि पतिरेति गृहं प्रभाते सा खण्डितेति गदिता कविभि: पुराणै:।।'।।४८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४८।। उपालम्भं बहुविधं राधा प्रेम्णा समब्रवीत्। अष्टमे पादपतितं विलोक्य हृदयेश्वरम्।।

(अथेति)। अथशब्दो मङ्गलार्थ:। सा राधा कथमपि [२] कष्टं यामिनीं [३]विनीय रात्रिं नीत्वा साम्यसूयं सेर्ष्यं यथा[४]स्यात्तथा प्रियं[५]श्रीकृष्णमाह। कीदृशी? स्मरशरै: कामबाणै

[६] जर्जरिता विद्धाऽपि। कीदृशं प्रियम्? प्रभाते प्रातःकाले अनुनयाय [७] स्वापराधक्षमापणाय विनयं साञ्जलिं कृतापराधमपि मां क्षमस्वेति पुनरप्येवं न करिष्यामीत्यादि वदन्तम्। कीदृशम्[८]? [९]अग्रे प्रणतमपि प्रकर्षेण नतं नम्रमपि। गृहीत[१०]चरणमित्यर्थः। अत्र खण्डि (ते) यं नायिका। तल्लक्षणम्,

उल्लङ्घ्य समयं (य) स्याः प्रियश्चान्योपभोगवान्।
भोगलक्ष्माङ्कितः प्रातरागच्छेत्सा हि खण्डिता ।। इति।।४८।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४८।। अधुना[११]राधा प्रियं प्रातरागतं दृष्ट्वा [१२]साश्यसूयं वचनमेवाह अथेति। अथानन्तरं कथमपि सकष्टं यामिनीं रात्रिं विनीय [१३] नीत्वा स्थिता सा राधा प्रियं कृष्णं साभ्यसूयं सेर्ष्यं यथा स्यात्तथा आहोक्तवती। कीदृशी? स्मरशरैः कामबाणैर्जर्जरिताऽपि विद्धाऽपि ? कीदृशम्? प्रभाते प्रातः समयेऽनुन(य) वचनं अनुनयाय प्रबोधाय वचनं वाक्यं वदन्तम्। पुनः कीदृशम्? अग्रे प्रणतमपि। अत्र खण्डिता वर्ण्यते। तल्लक्षणम्,

१.निनीय-इ.फ.ग.ह.ज. २.कष्टेन-ग. ३.निनीय-इ.फ.ग.ह.ज. ४.नास्ति-इ.तथा-फ.ग.ह.ज. ५.श्रीनन्दसूनुमाह-ग. ६.नास्ति-ब. ७.तः ८.पर्यन्तं नास्ति- -ब.स्वाग्रे प्रणतं नम्रीभूतमित्यर्थः-ब. १०.चरणमपीत्यर्थ-फ. ११.नास्ति-ड. १२.साम्यसूयवचनमेवाह-ड.साभ्यसूयं वचनमाह-क. १३.नास्ति-क.ल. १४.नास्ति-क.

[१] भैरवरागे [२] यतिताले

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्[३]।
वहसि नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम्।।२।।

उल्लङ्घ्य समयं यस्या[४] वल्लभोऽन्योपभोगवान्।
भोगलक्ष्माङ्कितः प्रातरागच्छेत्सा हि खण्डिता।। इति।।

[५]लक्षणान्तरमपि-

निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविचित्रितसर्वगात्रः।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते
सा खण्डिता निगदिता कविभिः पुराणैः[६]।।४८।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४८।। खण्डितानायिकात्वं वर्णयितुं राधायाः खण्डितात्वं प्रकटयति अथेति। अथ सा राधा यामिनीं रात्रिं कथमपि अतिकष्टेन विनीय गमयित्वा स्मरशरेण जर्जरिता विशकलीकृताऽपि प्रभाते प्रातः अनुनयेन विनयं विज्ञप्तिं वदन्तं स्वानागमनकारणकलापं

[७] वदन्तं प्रणतमपि स्वापराधशमनार्थं नमस्कुर्वन्तमपि अभ्यसूयया ईर्ष्यया सहितं स्याद्यथा तथा प्रियं कृष्णं प्रत्याह। अर्थात् खण्डितालक्षणं सूचितम्। तथा च,
नीत्वाऽन्यत्र निशां प्रातरागते प्राणवल्लभे।
अन्यासम्भोगचिह्नैस्तु कुपिता खण्डिता मता। इति विद्यानाथ:
(प्र.रु.य.भू.श्लो.९/४६)।।४८।।

### (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४८।। अस्मिन् सर्गे खण्डिता वर्णनीया। तल्लक्षणम् ''निद्राकषायमुकलीकृतताम्रनेत्रा, नारी नखव्रणविशेषविचित्रिताङ्ग:। यस्या: कुतोऽपि गृहमेति पति: प्रभाते, सा खण्डितेति कथिता कविभि: पुराणै:।।'' इति। अथेत्यादि। अथानन्तरं कथमपि महता कष्टेन यामिनीं विनीय नीत्वा अतिवाह्य सा राधिका स्मरशरजर्जरितापि कामबाणजीर्णा सत्यपि प्रभाते अग्रे पुरत: स्थित्वा अनुनयविनयं वदन्तं प्रणतमपि प्रियं कृष्णं साभ्यसूयं यथा स्यादेवमाह। अर्थात् वक्ष्यमाणं वचनम् उक्तवतीति वाक्यार्थ:। गुणेष्वपि दोषारोपणमभ्यसूया तया सह वर्तत इति साभ्यसूयम्।।४८।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४८।। खण्डितावस्थामेव वर्णयति अथेत्यादिना खण्डितालक्षणं यथा, 'उल्लंघ्य समयं यस्या: प्रेयानन्योपभोगवान् भोगलक्ष्मीङ्कित: प्रातरागच्छेत् सा हि खण्डिता'।। इति।।अथ वहुविधप्रलापानन्तरं हरविरहवर्णनोपदर्शकललित-लवङ्गेत्यादि सखी वचन श्रवणेन संचरदधरेत्यादि स्वमनोरथकथनेन च अतिकष्टेन रात्रिं नीत्वा सा श्रीराधा प्रभाते प्रणतमपि प्रियं साभ्यसूयम् अभित: असूयया सहितं यथा स्यात्तथा आह। कीदृशी ? स्मरशरेण जर्जरिता क्षणमात्रमतिवाहयितुम् अशक्तापि। कीदृशं ? अग्रे अनुनयवचनं स्वापराधजनित कोपोपशमनवाक्यं वदन्तं ततोऽपि प्रसादमनालोच्य प्रणतम्। अनेन प्रेम्ण: पराकाष्ठा प्रदर्शिता। कण्ठागतप्राणाया अपि प्रियदर्शन मात्रेणासूयोदयात्।।४८।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४८।। अथ कविस्तस्या: खण्डितावस्थां वर्णयति, तल्लक्षणं यथा;

उल्लंघ्य समयं यस्या: प्रेयानन्योपभोगवान्।
भोगलक्ष्माङ्कित: प्रातरागच्छेत् खण्डिता हि सा।।

एषा तु रोषनि:श्वासतूष्णीं भावादिभाग् भवेत् ।अन्यच्च,

'अन्यासक्तेन कान्तेन खण्डिता सा तु या निशि।
प्रातस्तद्भोगचिह्नानि वीक्ष्योद्विग्ना तु खण्डिता' इति।।

अथेति, अथ, बहुविधप्रलापानन्तरं कथमपि अतिकष्टेन पुनः पुनरासादितमूर्च्छा-विस्मारितविविधवेदनाभरतया इत्यर्थः, यामिनीं युगायमानबहुक्षणसमवेतां रात्रिं विनीय वाहयित्वा सा खण्डितावस्थां प्राप्ता राधा प्रभाते, प्रातःकाले, अनुनयविनयम्, अनुनयाय कोपोपशमननिदानचाटुव्याकोषाय विनयः बद्धाञ्जलिः यथा स्यात्तथा, वदन्तं,

कठोरा भव मृद्वी वा प्राणास्त्वमसि राधिके।
अस्ति नान्या चकोरस्य चन्द्रलेखां विना गतिः।।

इत्यादि विज्ञप्तिं निवेदयन्तं तत्समय एवाग्रे चरणान्ते प्रणतमपि विलम्बागमनजनिता-पराधपरिहाराय प्रणमन्तमपि प्रियं निरुपाधिप्रेमविषयं तथा उपेक्षितुमनर्हं श्रीकृष्णं साम्यसूयमभिशब्दोऽधिकार्थः। असूया नाम गुणेषु दोषारोपः। तत्सहितं यथा स्यात्तथा आह, भाषितवती। कीदृशी, स्मरशरेण जर्जरिताऽपि, विभिन्नाऽपि शुद्धप्रेम्णः खलु काऽपि विचित्रमुद्रेयं, यत् विना कण्ठाग्रतप्राणा स्थिता, तद्दर्शनेनासूयाक्रान्तचित्ता यातेति। अनेन श्रीकृष्णस्यान्यसम्भोगो नास्ति, किन्तु तद्विचित्रप्रेमयविविधविलापश्रवणाभिनिवे-शविस्मृतसमयातिक्रमवशेन प्रातर्मिलनात् अन्याङ्गनासङ्गनिश्चयत्वप्रतीतेरेवास्याः खण्डितात्वप्रसक्तिरिति चिह्नापवादः चारोपित मात्र एव। न तु तात्त्विक इति प्रकरणार्थस्वारस्यादवगन्तव्यम्।।४८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४८।। अथकथमपीति; अथ एतदनन्तरम्। कथमपि यथा कथञ्चित् यामिनीं रात्रीं विनीय नीत्वा स्मरशरः कन्दर्पशरः तेन जर्जरिता पीडिता सा श्रीराधा प्रभाते प्रातः अनुनयवचनं वदन्तं चाटुवाक्यं प्रयुञ्जानं प्रणतमपि अवनतमुखप्रणामेन साभ्यसूयः सा सम्मुखम् असूयाभावं क्रोधं प्रकटय्य श्रीकृष्णमवदत्। अत्र पुष्पिताग्रावृत्तम्। खण्डिता नयिका। हरिहरीति खेदे धूर्त्तो नायकः, विप्रलम्भः शृङ्गारः, जातिरलंकार इति राणाकुम्भः। अत्र यामिनीपदेन प्रियविरहेण अतिदीर्घतापि ध्वन्यते। खण्डितायाः लक्षणम् यथा,

उल्लङ्घ्य समयं यस्याः वल्लभोऽन्योपभोगवान्।
भोगलक्ष्माङ्कितः प्रातरागच्छेत्सा हि खण्डिता।। इति।।

लक्षणान्तरमपि द्रष्टव्यम्;

निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविचित्रितसर्वगात्रः।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते
सा खण्डिता निगदिता कविभिः पुराणैः।। ४८।।

।। सप्तदशः प्रबन्धः / गीतम् १७।।

।।भैरवीराग यतितालाभ्यां गीयते।।

**१-रजनिजनितगुरुजागररागकषायितमलसनिवेशम्।**
**वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम्।।**
**हरिहरि याहि माधव याहि केशव मा वद कैतववादं**
**तामनुसर सरसीरुहलोचन या तव हरति विषादम्।। ध्रुवम्।।१ ।।**

**।। सप्तदशः प्रबन्धः ।।**

**भैरवीरागेण[१] गीयते**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१ ।। सा किमुवाचेत्याशयेनाह। भैरवीरागेण गीयते। अस्य स्वरूपम्,

सरोवरस्थे स्फटिकस्य मण्डपे सरोरुहैः शङ्कर मर्च्चयन्ती।
ताल प्रयोगे प्रतिवद्धगीता गौरी शुचीर्नागर भैरवीयम्।।

अथवा सरोवरस्था स्फटिकस्य मन्दिरे सरोरुहैः शङ्करमर्च्चयन्ती।
ताल प्रयोग प्रतिरङ्ग गीतै- गौरी तनु भैरिविका सतीयम्।।

रजनीति। हरिहरीति खेदऽन्वयः। या तव विषादं हरति तामनुसर कैतववादं मा मा वदेति योजना। माधव! केशव! सरसीरुहलोचन! इत्युपालम्बनपरं सम्बोधनपदत्रयं स्फुटं माधवः त्वं स्फुटं केशवः त्व स्फुटं सरसीरुहलोचनस्त्वं यतो मां परिहृत्य यां काचित् स्त्रियं प्राप्यैव रमयसीत्युपालम्भार्थः। छलादाक्षेपोऽप्यत्र बोध्यः तथाहि,

मधुर्दैत्यस्य पुत्रो वैदैत्योऽपि माधवः स्मृत।
कमलाक्षो निशान्धोऽपि रात्रौ कमलमुद्रणात्।।
चैतन्यरहितं मर्त्त्य मपि केशक मभ्यधुः।
जले मृतस्य सा दृश्या वध्वा कुम्भं गले क्रुधेति।।

नाहमन्याङ्गनासङ्गत इति कृष्णप्रतिवचनमाशङ्क्याह रजनीत्यादि। रजनिजागर एव रागो रञ्जनद्रव्यं तेन कषायितं लोहितीकृतं, तदा हे श्रीकृष्ण! तव नयनमनुरागं स्फुटं बहतीवेत्युप्रेक्षा। तां प्रत्यनुरागप्राचुर्य्यात्तव हृदि स्थितिमविन्दन चक्षुषा निर्गत इत्युत्प्रेक्षार्थः ''निर्य्यासे च कषायोऽस्त्री सुरभौ लोहितेऽन्यवदिति **विश्वः**''। अत्रापि खण्डिता इव प्रतिभाति। यदि त्वं नान्यङ्गनासङ्गतः कथमेतदित्यभिप्रायः।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१।। तामेव सपत्नी विषयेर्ष्यां प्रकटयति। तत्र पूर्वं पूर्वपदानुस्यूतत्वाधृवपदं व्याक्रियते, हरि हरीति। हरि हरीत्यव्ययानामनन्तार्थत्वात्खेदवाचकमव्ययम्। अथवा गानपूर्त्यै, स्तोभमात्रम्। खण्डिता राधा अग्रे प्रणतं प्रियं सेर्ष्यमाह, हे माधव लक्ष्मीपते! याहि गच्छ। अन्यासक्तो हि कथमन्यां प्रतारयसीति 'मा'शब्दद्योत्यम्। अथवा, मा स्वभावचञ्चला तस्याः पत्युश्चञ्चलत्वं युक्तमेव। तर्हि चञ्चलस्त्वं त्वदेकपरायणां मां कथं प्रतारयसीति याहि। एवमप्यधिक्षेपेऽसंतुष्टा पुनराह, हे केशव! याहि। स्वयोषिति रतत्वे किमुच्यते। प्रशस्ताः केशा यस्येति केशवपदव्युत्पत्तेः। त्वं केशसंस्कारवतीषु खौरणीषु रत इति 'केशव' शब्दव्यङ्ग्यम्। अतो हे केशव! बहुवल्लभ! त्वदेकपरायणोऽहमित्यादिकैतववादं छलवाक्यं मा वद। विषण्णे मयि किमकारणरोषणे रोष इत्याशङ्कसे चेत्। मैवम्; हे कुमुदलोचन! या तव विषादं हरति तामेव बहुप्रियामनुसर अनुरूपस्यानुरूपायामनुरूपं सुरतमिति। 'कुमुद'ग्रहणेन सोमवंशोद्भूतत्वाद्रात्रौ जागरो दिवाशयो लक्ष्यते। इति ध्रुवः।। अथ पदानि। रजनीति। हे कृष्ण! त्वं नयनमनुरागमिव वहसि। किंभूतमनुरागम्? स्फुटमतिबाहुल्येनान्तर्व्याप्य बहिर्निर्यातम्। पुनः किंभूतम्? उदितरसस्य शृङ्गारस्याभिनिवेश आग्रहो यत्र। अथानुरागविशेषणत्वेन उदितः स्वादस्याभिलाषस्याग्रहो यत्रेति । किंभूतं नयनम्? रजनिजनितो योऽसौ गुरुजागरराग: तेन कषायितं लोहितीकृतम्। पुनः किंभूतम्? अलसो निवेशोऽवस्त्रानं यत्र। अत्र 'वहति' इति पाठान्तरपक्षे तवेति पूर्वपक्षस्यानुषङ्गेण नयनं कर्तृ स्फुटमनुरागं वहतीति योज्यम् ।।१।।

## (३) जगद्धरकृत- सारदीपिका

।।१।। अस्मिन् खण्डितानाम नायिकावर्ण्यते तल्लक्षणं उल्लङ्घ्यसमयं यस्याः प्रेयानन्योपभोगवान् भोगलक्ष्म्याङ्कितः प्रातरागच्छेत्सा हि खण्डिता। निद्राकषायकलुषो कृत ताम्रनेत्रो नारी नखव्रणविशेष विचित्रिताङ्गः यस्याः कुतोऽपिगृहमेति उत्पतिः प्रभाते सा खण्डितेति कथिता कविभिः पुराणैः।'' साभ्यसूयवचनमेव गीतेनाह रजनीति भैरवरागः तल्लक्षणं ''सरोवरस्ये स्फटिकस्य मण्डपे सरोरुहैः शङ्करमर्च्चयन्ती तालप्रभेदप्रतिपन्नगीतागौरीतनुर्नारदभैरवीयं'' इति। हरि हरि खेदानुकारे अव्ययं हे केशव याहि हे माधव याहि कोपाधिक्येन द्विरुक्तिः कैतववादं च कपटवाक्यं मावद हे सरसीरुह लोचन कमल नयन तां नायिकां अनुसर गच्छया तव विषादं हरति दूरीकरोति कथं विषादत्वमित्याह हे कृष्ण तव नयनं नेत्रं स्फुटं व्यक्तं तस्यानुरागमिव

वहति धारयति कीदृशं नयनं रजनीजनितेन रात्रिकृतेन गुरूणातिशयेन जागररागेण जागरोत्पन्नलोहितरागेण कषायितं आरक्तं कृतं पुन: कीदृशं रात्रिजागरेणालसो मन्थरो निमेष: पक्ष्मचलनं यस्य कीदृशं अनुरागं उदित: कथित: रसस्य अन्यकामिनी विषय श्रृङ्गाररसस्याभिनिवेशस्तत्परता येन मा लक्ष्मी: तस्या: धव इत्यनेन तपतीत्येन चाञ्चल्यं द्योति तं केशवेत्यनेन क्लेशनाशकत्वेनापि क्लेशशब्दानुवृत्तित्वमनुचितमिति द्योतितम् ।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति, रजनीति। गीतस्यास्य भैरवी-रागो यतिताल:। माललक्षणमुक्तं प्राक्। गीतार्थस्तु, हरि हरीति खेदे। हे माधव हे केशव! याहि इतोऽपसर। लक्ष्मीश्चञ्चलातस्तेऽपि तादृशीष्वेवानुरागो युज्यते। स्थिरानुरागाणां मादृशां ते किं प्रयोजनमिति 'माधव'पदेन ध्वनितम्। कैतववादं छलवाक्यं मा वद मा कथय। 'कैतवं तु छले धूर्ते' इति विश्व:। ननु त्वदनुसरणायैवेतस्ततो भ्रमतो विलम्बो जात इत्यत आह, तामिति। हे सरसीरुहलोचन कमलनयन! तां नायिकामनुसरानुगच्छ या तव विषादं दु:खं हरति। अहं तु स्वयमेव संतप्ये। ते विषादं कथमपनेष्यामीति भाव:। अत्र पद्मं प्रभाते यथार्धमर्धमुकुलितं तद्वत्ते नयनं रात्रिजागरालस्यान्मुकुलीभवद्बलात्त्वया प्रसार्यमाणमित्युन्निद्रवशात्किंचित्प्रलपसीति 'सरसीरुहलोचन' इत्यनेन ध्वनितम्। यद्वा, सरसीरुहं यथा रात्रौ मुकुलितं तिष्ठति, प्रभाते प्रसरति, तथा त्वदीयनयनं रात्रौ मद्विषये निमलितमासीत्, इदानीं त्वया प्रसारितमिति तेन पदेन ध्वनितम्। ननु मे त्वत्तोऽन्या प्रेयसी नेत्यत आह, हे कृष्ण! तव नेत्रं नयनं तदनुरागमिव वहति धारयति। कीदृशं नयनम्? रजनिजनितो रात्रिजातो गुरुर्यो महाञ्जागरस्तज्जनितो यो रागो रक्तता तदेव रञ्जनद्रव्यं तेन कषायितमीषल्लोहितम्। तदेवालसनिमेषम्। अलसो मन्थरो निमेष: पक्ष्मविन्यासो यस्य तादृशम्। अत्र च रात्रिकेलिसाक्षिणा कृष्णेन यस्या: कस्याश्चिद्रो-पिकाया: केलिव्यासङ्गेन वृथा जागरणं कारित इति रागेण क्रोधेन कषायितस्य राधाया अग्रेऽन्यनायिकागुप्तरसाभिनिवेशत्वमुचितमेवेति ध्वनि:। 'गुरुर्महति चान्यवत्' इति विश्व:। 'रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु', 'गान्धारादावन्यो राग:' इति विश्व:। 'कषायो रसभेदे स्यादङ्गरागे विलेपने। निर्यासे च कषायोऽथ सुरभौ लोहितेऽन्यवत्' इति च। 'निवेश: शिबिरोद्वाहे विन्यासेऽनुप्रकाशिते' इत्यपि। 'हरि हरि' इत्यव्ययम् ।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१।। अन्या: सम्भोगचिह्नदर्शनपूर्वकमुक्तप्रकारमेव विषदयति। रजनीत्यादि। भैरवरागेण गीयत इत्युक्त्तां तस्यायमभिप्राय:। अयं राग: पुं राग:। एतत्पत्न्यस्तु देवक्रिया मेघरङ्गीकुरङ्गी भैरवस्त्रिया:रूपक तालेन गेयम्। तत् लक्षणं तु ''भूत द्वन्द्वं विरामान्तं रूपक: परिक्रीर्त्तित इति''। तत्र याहीत्यादि विषादन्तं ध्रुवपदम्। हे माधव यत्र कारणादुदिते उत्पन्ने रसेऽनुभूते श्रृङ्गारे अभिनिवेश आग्रहो यस्य तादृशं तव नयनं रजन्यां रात्रौ जनितो यो गुरुजागर: प्रवलनिद्राभाव: तेन य राग: रक्त्तिमा तेन कषायितं संजातरक्तरूपं सत् स्फुटमसन्दिग्धम् अनुरागमन्यस्यामासक्त्तिं बहतीव रागस्य रक्तवर्णता प्रागेव प्रतिपादिता, स्फुटामात क्रिया विशेषण वा नयनं ''कर्त्तृ कषायितमिति क्यवन्ताभावे निष्ठा'' जागरेण यत्कषायितं रक्तवर्णवदाचरणं तत्कर्मानुरागमिव वहतीत्यन्वय:। तस्मात् कारणात् हे माधव ! लक्ष्मीपते ! इदं तु दयिता दायकत्व सूचनात्तम् अतएव तामनुसरेत्यादि सम्भवति। हे केशव! याहि अन्यत्रैव गच्छेत्यर्थ:। अत्यन्तासूयाद्योतनार्थं द्विरुक्ति:। न केवलामत्रानवस्थानमात्रम्। अपितु कैतववादं धूर्त्तप्रलापम् उन्मत्त: कितवो धूर्त्त:'' **इत्यमर:**। मा वद मा व्रुहि। अपि तु सरसीरुहलोचन! पुण्डरीकाक्ष! अन्यानुसरणमार्गदर्शनेन तवापि वैफल्यमस्तीति सोल्लुण्ठनार्थमेतत्सम्बोधनमवगन्तव्यम्। या नायिका तव विषादं मन्मथकृतमन:पीड़ां हरत्यपाकरोति। तत्रैव गच्छेत्यर्थ:।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। अस्य गीतस्य भैरवीराग:। रूपकताल:। रागलक्षणम् श्यामा सुकेशी प्रियवादिनी च संलेपिता लोहितचन्दनेन। पीतस्त्रगध्यासितकेशपाशा प्रोक्ता कवीन्द्रै: किल भैरवीयम्।।' राधया यदुक्तं तदाह। हरि हरीति द्विरुक्ति: कोपजनितसम्भ्रमोक्तो। हे माधव! याहि गच्छ। मा लक्ष्मी:, तस्या धव: स्वामी। लक्ष्मीधवत्वेन चाञ्चल्यं तव युक्तमेवेति ध्वनि:। हे केशव त्वं याहि गच्छ। के सुखे शव इवेति छलेन सुखानभिज्ञत्वदर्शनेन मां विहायान्याङ्गनासङ्गित्वं तव युक्तमेवेति ध्वनितम्। अत्र याहीति द्विरुक्तिर्भत्सनोक्तौ, वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपभर्त्सनेष्विति पाणिनिसूत्रात्। कैतववादं कितवो धूर्त्त:, तस्य वादो वचनं त्वं मा वद मा व्रुहि। वद धातोर्भावे घञिति वाद:। हे सरसीरुहलोचन कमलोचन! तां गोपीमनुसर अनुगच्छ या तव विषादं कामजनितदु:खं हरति। अत्र निजमुखचन्द्रसविधे लज्जया नयननिमीलन-दर्शनेन सरसीरुहलोचनेति सोपहासवचनमित्यवधेयम्। विषादं हरतीत्यनेनात्र

कामजनितदु:खमात्रहरणं भवतो भविष्यतीति न तु कामकलाकुशलकामिनीसङ्गम स च खमपीति भाव:। कैतवमेव दर्शयति *'अलसनिवेशम्' इति पाठ। अत: सारवत्यामपि 'अलसा मन्दीभूताति निवेश विशनानि निपतनानि इति यावत्' इति पाठान्तरं वर्तते। रजनिजनितेति। नयनं कर्त्तृ अर्थात् तव, स्फूटं प्रव्यक्तम् अनुरागमिव वहति। अनुरागो लौहित्यं तदेव हृदयानुरागत्वेनोत्प्रेक्षते। नयनमिति जात्युत्प्रेक्षया एकवचनम्। किम्भूतं नयनम्? रजन्यां रात्रौ जनितो रजनिजनितो। गुरुर्महान्। जागर: जागरणम्। भावे घञ्:। तयो: कर्मधारय:। तेन यो राग: लौहित्यं तेन कषायितं तेन कषायितं लोहितीकृतम्। अत्र यद्यपि रागपदमधिकं जागरकषायितमित्येव वाच्यं तथापि सुवर्णेन धनेन धनीतिवत् समाधेयम्। यद्वा तादृशरागेण कषायितं विलिप्तमित्यर्थ:। तथा च 'कषायो रागभेदे स्यादङ्गरागे विलेपने। क्वाथरसे कषायोऽस्त्री तथा कलियुगेऽपि चे'ति। पुन: किम्भूतम्? अलसानि मन्दीभृतानि निमेषाणि निमेषणानि निपतितानीति यावत् यस्य तत्तथा, अर्थादुन्निद्रया। पुन: किम्भूतम्? उदित उद्गतो रसाभिनिवेश: श्रृङ्गाराभिनिवेशो यत्र तत्तथा। तथा चैतादृशनयनवानपि भवानेवं वक्तीति कैतववादो व्यक्त एव।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।।[८]भैरवराग: तल्लक्षणम्,

[९]सरोवरस्थे स्फटिकस्य [१०] मन्दिरे सरोरुहै: शङ्करमर्चयन्ती।

तालप्रभेदप्रतिपन्नगीता गौरीतनुर्नाम तु[२]भैरवीयम्।। इति ।

[३] यतितालध्रुवयोर्लक्षणं [४]पूर्वमेवोक्तम्। अभ्यसूयावचमेवाह, [५] हरी (ति)। [६] हरीति खेदे। हे माधव माया: [७]कपटरूपाया: धव: स्वामी हे कपटचूडामणे विरहिजन [८]दु:ख (द) त्वान्माधवेति। हे वसन्तेति वा। याहि [९] नेत्रपथा [१०] दितो गच्छ। किञ्च हे केशव प्रशस्तचिकुर सुन्दरशिखामणे प्रियागृहं याहि। कोपावेशेन पुनरुक्ति:। किञ्चोपाल-म्भान्तरमाह, हे सरसीरुहलोचन कमलनयन या तव विषादं मनस्तापं हरति दूरीकरोति तां प्रियामनुसर गच्छ। [११]कपटवादं मा वद। धूर्तवादमेवाह, हे कृष्ण! नयनं स्फुटं यथा स्यात्तथाऽनुरागमिव वहसि धारयसि। कीदृशम्? रजनिजनितेन गुरुणा गरिष्ठेन जागरणस्य [१२] रागेण कषायितं आरक्तीकृतम्। [१३]पुन: [१४]कीदृशम्? अलसेनालस्येन निमेष:[१५]पक्ष्मचलनं यस्य। पुन: कीदृशम्? उदित: कथित: रसस्यान्यानायिकाविषय-श्रृङ्गाररसस्याभिनिवेशो [१६] यस्य [१७] अथ वा [१८] प्रियविशेषणम्। कीदृशं प्रियम्? रजनिजनितो यो गुरु [१९] र्जागरस्तेन कषायिते ईषदारक्ते लोचने यस्य [२०] तम्। पुन:

कीदृशम् ? अलसो निवेशो वेश: स्वरूपं यस्य। पुन: कीदृशम् ? उदित: प्रकटित: [२१] रसस्य शृङ्गाररसस्याभिनिवेश: परतन्त्रता [२२]येन।।१ ।।

१.भैरवराग-ब.२.नास्ति-ब.३.अष्टमसर्गादित एतदवधिको भागो नोपलश्यते। पत्रलोपश्चाह्यते-अ.४.प्रेयानन्योभोगवान्-क.५.त:६.पर्यन्तं नास्ति-ड.ल.म.७.वाञ्छन्तं-इ.८.भैरविरागे यतिताले; भैरविरागलक्षणम्-इ.ह.भैरवीरागे यतिताले ; भैरवीलक्षणम्-ग.भैरवीरागलक्षणम्-फ.ज.९.शिवोवरस्य-ब.१०.मण्डपे-इ.फ.ग.ह.ज.

१.हरि हरि इति इ पुस्तके नास्ति २.भैरवाय-ब.३.तालध्रुवयो:-इ.फ.ग.ह.ज.४.पूर्ववत्-ग.५.रजनीति-इ.फ.ग.ह.ज.६.हरिहरीति क्वचित्पाठान्तरखेदे-इ.फ.ग.ह.ज.७.नास्ति-ब.८.दु:खप्रदत्वात्-ग.९.मेऽत्रपथादितोभव-अ.ब.१०.अष्टमसर्गस्यादितो व्याख्यानमेतदवधि नोपलभ्यते पत्रलोपात्-अ.११.कपटवाक्यं-इ.फ.ग.ह.ज.१२.सङ्केन-अ.ब.१३.नास्ति-इ.फ.ग.ह.ज.१४.नास्ति-ग.१५.पक्ष्मचपलं-इ.फ.ज.१६.यस्य तम्-फ.ज.१७.यद्वा-ग.१८.प्रियविषयं विशेषणम्-फ.ज.१९.जागरो जागरणं तेन-इ.फ.ह.ज.२०.नास्ति- -अ.२१.सरस-अ.ब.२२.येन तम्-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। अभ्यसूया [१] वचनमेवाह। [२]तेनास्य भैरवीरागस्तल्लक्षणम्-

[३]सरोवरस्थस्फटिकस्य मण्डपे सरोरुहै: शङ्करमर्चयन्ती।
[४]तालप्रभेदप्रतिपन्नगीता। गौरीतनुर्नाम तु भैरवीयम्।।

।।१ ।। रजनीति। [५]हरि हरि खेदानुकारेऽव्ययम्। हे केशव! याहि इतो गच्छ ; हे माधव! याहि ; [६]कोपाधिक्याद् द्विरुक्ति:। कैतववादं वञ्चककपटवाक्यं मा वद। हे सरसीरुहलोचन कमलनयन तां नायिकामनुसरानुगच्छ या तव विषादं मनस्तापं हरति दूरीकरोति। कथं[७]कैतववाद इत्यत आह, हे कृष्ण! तव नयनं स्फुटं प्रकटं[८]तस्या अनुरागमिव वहति धारयति। कीदृशं नयनम् ? रजनिजनितेन[९] रात्रिकृतेन गुरुणाऽतिशयेन जागररागेण [१०] जागरोत्पन्नरागेण लोहितत्वेन कषायित [११]मारक्तं कृतम्। पुन: कीदृशम् ? रात्रिजागरेण अलस: निमेष: पक्ष्मचलनं यस्य। कीदृशं अनुरागम् ? [१२]उदितरसाभिनिवेशं उदित: कथित: रसस्य अन्यकामिनीविषयक [१३] श्रृङ्गार-रसस्याभिनिवेश: तत्परता येन। माया: लक्ष्म्या: धव इत्यनेन तत्पतित्वेन चाञ्चल्यं द्योतितम्। [१४] केशव [१५]इत्यनेन क्लेश [१६]नाशकेनापि क्लेशदातृत्वमनुचितमिति द्योतितम्[१७]।।१ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। भैरवरागेण यतितालेन गीयते।

सम्पूर्णो भैरवीराग: सन्यास: सांशको मत:।
षड्जग्रहस्तथा गेयो यामेऽह्न: पश्चिमेऽपि च।।

रजनीति। रजन्यां जनित: गुरुजागर: तेन अतिजागरणेन राग: अरुणिमा तेन कषायितं आरक्तमित्यर्थ:। अलस: मन्द: निमेष: निमीलनं यस्य तत् ; नयनं नेत्रम्। स्फुटं यथा तथा उदित: उद्भूत: रसस्य अभिनिवेश: आग्रह: यस्मिन् तत्। अनुरागं प्रीतिमिव वहति। हृदयस्यानुरागो नेत्रयोरारुण्यरूपेणाभिव्यक्त इत्यर्थ:। अत्र नयनं जागररागत्वेन निमित्तेन अनुरागरूपवस्तुत्वेन सम्भाव्य (त) इति वस्तूत्प्रेक्षा पृथङ्निर्देशादुक्तास्पदा। निमेषमित्यत्र षकारशकारसाम्येच्छयाऽनषज्य अलसनिवेशमिति पाठे मन्दसंवेश: आकृतिरित्यर्थ:। स्मरार्ताया: प्रणतं प्रत्यसूयावचनं विरुद्धम्। तेन तस्मादपि प्रियस्यान्याभिसरणं दु:खकरमिति व्यज्यते। ध्रुवाया व्याख्यानम्। हे माधव! हे केशव! त्वं याहि याहि (इति) वीप्सा। कैतववादं कपटवादं उत्तररूपं मा वद। ननु किम्? या रमणी तव विषादं सन्तापं हरति तोषं करोति तां अनुसर गच्छ। हे सरसीरूहवल्लोचने यस्य तत्सम्बुद्धि।।१ ।।

१.वचनमाह-क. २.भैरवीरागस्तल्लक्षणम्-क.ल.म. ३.सरोवरस्थे स्फटिकस्य मण्डले-क.ल.म. ४.प्रक्षेपतालप्रतिपन्नगीता-क. ५.हरि हरिति खेदानुवाक्ये-क. ६.कोपाधिका द्विरुक्ति:-ड.कोपाधिक्येन द्विरुक्ति:-क.ल.म. ७.कै तववादित्वमित्यत आह-क.ल.म. ८.तस्यामनुरागमिव-ड. ९.नास्ति-क.ल.म. १०.जागरोत्पन्नलोहितरागेण-ड.ल.म. ११.आरक्तीकृतम्-ड. १२.नास्ति-ड. १३.श्रृङ्गारस्य-ड. १४.त:१७.पर्यन्तं नास्ति-ड. १५.इत्यनेनानेकक्लेशदातृत्वमनुचितमिति-ल.नाशकत्वेनापि-ल.म.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। भैरवीरागस्य लक्षणमाह, ''सरोवरस्थे स्फटिकस्य मण्डपे, सरोरुहै: शङ्करमट्टयन्ती। तालप्रयोग प्रतिबन्धरागा, गौरीशुचिर्नागरभैरवीयम्।।'' इति।। किं प्राहेत्या, रजनीत्यादि। हे माधव! हे केशव! याहि याहि गच्छ गच्छ। इदं सासूयमामन्त्रितमिति अपौनरुक्त्यम्। वाक्यादेवामन्त्रितस्यासूयासम्मतिकोपन-कुत्सनभर्सनेष्विति द्वित्वम्। कैतववादं कपटोक्तिं मा वद। हे सरसीरुहलोचने! तां नायिकाम् अनुसर अनुगच्छ या तव विषादं हरति खण्डयति। स्वसम्भोगजनितावशाद-खण्डनं तव सैव करिष्यतीति किमत्रागमने कार्यमस्तीत्याशय:। माधव! केशव! सरसीरुहलोचनेत्युपालम्ब(म्भ)नपरं सम्बोधनपदत्रयम्। तत्र माधवत्वेन श्रीपतित्वं, केशवत्वेन प्रशस्तकेशयुक्तत्वात् प्रशस्तकेशरचनाद्वा सौन्दर्यम्। केशाद् वोऽन्यतरस्यामिति वप्रत्यय:। सरसीरुहलोचनत्वेन चक्षुष्मता हरे: प्रतिपादिता। अचक्षुष्मान् भद्राभद्रं न जानातीति सरसीरुहलीचनेत्युक्तम्। चक्षुष्मानपि विरूप: स्यादिति माधवेत्युक्तम्। चक्षुष्मानपि सुन्दरोऽपि अननुभूतसुन्दरीक: स्यादिति माधवेत्युक्तम्।

स्फुटं माधवस्त्वं स्फुटं केशवस्त्वं स्फुटं सरसीरुहलोचनस्त्वम्। यतो मां परिहृत्य यां कांचित् स्त्रियं प्राप्य रमयसीत्युपलम्भार्थः। छलादाक्षेपोऽप्यत्र बोध्यः। तथाहि, ''मधो दैत्यस्य पुत्रो हि दैत्योऽपि माधवः स्मृतः। कमलाक्षो निशान्धोऽपि रात्रौ कमलमुद्रणात्। चैतन्यरहितं मर्त्यमपि केशवमभ्यधुः। जले मृतस्य सादृश्याद् बध्वा कुम्भं गले क्रुधा।।'' इति। नाहमन्याङ्गनासङ्गत इति कृष्णप्रतिवचनमाशङ्क्या, रजनीत्यादि। रजन्यां जनितो यो गुरुजागरः अत्यन्तं निद्राक्षयः। अनेन नारीषु नार्यां वा सुरताशक्तत्वात् स एव रागः रञ्जकद्रव्यं तेन कषायितं लोहितीकृतं तव नयनम् अनुरागं स्फुटं वहतीवेत्युत्प्रेक्षा। तां प्रत्यनुरागः प्राचुर्यात् तव हृदि स्थितिमविन्दन् चक्षुषा निर्गत इति उत्प्रेक्षार्थः। ''निर्यासे च कषायोऽस्त्री सुरभौ लोहितेऽन्यवत्'' इति **विश्वः**। किंविधं नयनम्? अलसेति। मन्दः निमेषो निमीलनं यस्य त(य)त्रेति वा विग्रहः। पुनः किंविधम्? उदितेति। प्रकाशीभूतो रसाभिनिवेशः शृङ्गाररसे निर्भरप्रवृत्तत्वं यत्र स्फुटमुदितरसाभिनिवेशमिति समस्तं वा पदम्। तदा मुदितं हर्षस्तु सम्भोगजनितः रसः शृङ्गारः, तया सह सम्भोगः तयोरभिनिवेशः। त्वय्यवस्थानं स्फुटो व्यक्तीकृतो मुदितरसाभिनिवेशो येन तत् तथा। यदि त्वं नान्याङ्गनासङ्गतः कथमेतदित्यभिप्रायः। अत्र यद्यपि निमेषाभिनिवेशशब्दयोरन्तिमौ वर्णौ मूर्द्धन्यतालव्यत्वात् पृथगेव तथापि अभिनिवेशशब्दस्य मूर्द्धन्यत्वाददोषः। ''विषु व्याप्तौ'' इत्यस्य धातोः प्रयोगात्। उक्तं च द्विरूपकोषे, ''षण्डशण्डौ कोषकोशौ वेशवेषौ वदन्त्यसौ'' इति। न विद्यते दन्त्यसकारो ययोस्तौ तथाक्तौ इति।।१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१।। गीतस्यास्य भैरवीराग यतितालौ। यथा, 'सरावरस्थे स्फटिकस्य मण्डपे सरोरुहैः शङ्करमर्च्चयन्ती। तालप्रयोगे प्रतिवन्धगीता गौरीतनुर्नारद भैरवीयम्'।। इति ।। हरिहरीति खेदे। हे माधव! हे केशव! त्वं याहि, इतो गच्छ। क्व यामि? हे सरसीरुहलोचन! चक्षुप्रीतिमात्रेण मुग्धस्त्रीजनवञ्चन! या त्वत्तोऽपि वञ्चनचतुरा सहजप्रेमानभिज्ञस्य तव विषादं कापट्यापादित वैमनस्यं हरति तां चित्तानुरूपचतुरव्यापारां अनुगछ। लोट् प्रयोगः। तत्स्फूर्त्तिसम्भावनया माधवेति, धवो न भवसीत्यनियतप्रियत्वं केशवेति प्रकृष्टकेशद्वारोन्मुक्तकेशत्वं सरसीरुहलोचनेत्यर्द्धमुद्रितनेत्रत्वं च ध्वनितम्। त्वदेकपरायणोऽणोमितिवदन्तं कपटवादं मा वद, न कैतवं ब्रूहि। सत्यमेद नान्याङ्गनासङ्गतोऽहमिति प्रतिवचनमाशङ्क्याह रजनिजनितेन गुरुजागरणरागेण कषायितं लोहितीकृतं तव नयनं अनुरागं वहतीत्युत्प्रेक्षे तां प्रत्यनुरागप्राचुर्य्यात् तव हृदि

स्थितमरविन्दचक्षुषा निर्गत इत्युत्प्रेक्षार्थं सहजमेवारुणं मे नयनं न जागरादित्याह। अलसेन निमीलनं यत्र तत् अनुभूतत्वद्वचनचिन्तया निमीलिते लोचने न जागरादिति कथितो रसस्याभिनिवेशो येन तत्। यदि त्वं नान्यङ्गनासङ्गतस्तर्हि कथमेतदित्यर्थ:। अग्रेऽप्येवमुन्नेयम्।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ।। यदाह तद्, व्यनक्ति, रजनीत्यादिना गीतेन। भैरवीरागेण गीयत इत्युक्तम्। अस्या: स्वरूपम्;

'सरोवरस्थे स्फटिकस्य मण्डपे सरोरुहै: शङ्करमर्च्चयन्ती।
तालप्रयोगप्रतिबद्धगीता गौरतनुर्नारदभैरवीयम्' इति।।

रजनीति। अत्र याहीति क्रियाया: प्रथमोपन्यासेन द्विरुक्त्याच्च प्रौढकोपावेश: सूच्यते। माधवेति सत्कूलप्रसूतस्यापि तव कथमीदृशीवञ्चनकलेति ध्वन्यते। श्लेषेण त्वं धवो भवितुं नार्हसीति महापरुषोक्तिश्च। हे केशव! इति केलिविस्रस्तकेशशोभां प्रदर्शयन् कथं मां क्षोभयसीति सूच्यते। ननु मज्जीवातुभूतां त्वामपहाय कुत्र यामीत्युक्ते कैतववादं मा वद। कपटचातुरीकल्पितकथनारभटीं मा जल्प। त्वदधीनोऽहं त्वामनुसरामि, कथमेवाक्षिपसीति सकार्पण्यमवलोकयन्तमाह, हे सरसीरुहलोचन! नेत्रशोभयैव विमोहितमुग्धस्त्रीजन। या त्वत्तोऽपि वञ्चनचतुरा, तव सदसद्विचारशून्यतया सहजप्रेमानभिज्ञस्य विषादं, कपटविलासोत्पादितनिजविषयोत्कण्ठाखेदं हरति, दूरीकरोति, तां त्वदनुरूपगुणामेवानुसर, तत्सेवयैवात्मानं कृतार्थयेति भाव:। सत्यमाख्यामि, नान्यासङ्गतोऽहमिति प्रतिवचनमाशंक्याहरजनीति। रजनौ जनित: सम्भोगपर्याप्ततया कृतो यो गुरुजागरराग:, अधिकजागराध्यवसायस्तेन कषायितं लोहितीकृतं तव नयनम्। उदित: कथित: रसाभिनिवेश:, अन्यया सह विविधशृङ्गार-लोलुपता यत्र तादृशमनुरागं स्फुटम् असंदिग्धं वहतीव। अन्यथाशंकिनि। स्वभावारुणमेव मे नयनमिति उत्तरमाशंक्याह, अलस:, क्रीडाभिनिवेशेनैव मन्दसञ्चारिनिमेष: यत्र तादृशम्। कथमन्यथा शंकेति भाव:।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। रजनीति; हरिहरीति पदेन खेदोक्ति: धूर्त्तनायकं प्रति। हे माधव हे कृष्ण: त्वं कैतववादं मिथ्यावचनं न ब्रूहि। हे सरसिजलोचन! अरविन्दनेत्र! तां नायिकामनुसर या खलु तव विषादं दु:खं हरति। अत्र मत्सविधे मृषा चाटूक्तिं मा भण। इति ध्रुवपदम्। अरात्रिं तवानुसरणेन प्रतीक्षया वा समग्रा दीर्घा रात्रिर्यापिता। खण्डिता नायिका।केशवपदेन

प्रशस्ताः केशाः यस्येति केशवः। त्वं केशसंस्कारवतीषु स्वैरिणीषु रत इति केशवशब्देन व्यज्यते। तेन केशवपदेन बहुवल्लभत्वं द्योत्यते।।

गीतमेतद् भैरवीरागयतितालाभ्यां गीयते।। भैरवीरागस्य लक्षणम् यथा,

सरोवरस्थे स्फटिकस्य मण्डपे सरोरुहैः शङ्करमर्च्चयन्ती।
तालप्रभेदप्रतिपन्नगीता गौरीतनुर्नारदभैरवीयम्।। इति।।१ ।।

**२-कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्।**
**दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम्।। हरिहरि० ।।२ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२ ।। त्वच्चिन्ताजागरार्थे नेत्रे रागो नान्यङ्गनारिति जागरादिति कृष्ण प्रतिवचने दूषणान्तरमाह कज्वलेति। हे कृष्ण! तव दशनवसनम् अधरः स्वभावादरुणं सम्प्रति तनोरनुरूपं सादृश्यं तनोतीति वाक्यार्थः। कीदृशं, कज्वलमलिनबिलोचनचुम्बनेन विरचितं नीलिमरूपं यस्येति विग्रहः। यदि त्वं नान्यङ्गना सङ्गतः कथमेत-दित्यभिप्रायः।।२ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२ ।। अपि च, कज्जलेति। हे कृष्ण! तव दशनवसनमधरस्तनोरनुरूपं रूपं तनोति। किंभूतम्? अरुणम्। स्वभावारुणमपि। पुनः किंभूतं दशनवसनम्? कजलेन मलिने ये विलोचने तयोश्चुम्बनेन विरचितो नीलिमा यत्र तत्। अत्र मलिनग्रहणं तन्नेत्रयोर्बहुपुरुषो-पभोग्यत्वं व्यञ्जयति।।२ ।।

### (३) जगद्धरकृत- सारदीपिका

।।२ ।। ननु त्वदन्वेषणार्थं जागरान्मे नेत्रयो लौहित्यमलन्दुःशङ्क्येत्यत आह कज्जलेति; हे कृष्ण तवारुणं ताम्बूलरागेण लोहितं दशन वसनं अधरः तनोः शरीरस्यानुरुपं सादृश्यं तनोति विस्तारयति कीदृशं दशनवसनं कज्जलेनाञ्जनेन मलिने श्यामे ये विलोचने नेत्रे तयो श्चुम्बनेन विरचितं कृतं नीलिमरूपं श्यामता रूपं यस्य आरक्ताधरस्य नेत्रचुम्बनेन श्यामता प्रतिपादनात् तनोरनुरूप त्वं अन्यायां कामिन्यां कृष्णस्याऽनुरागः सूचितः।।२ ।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।२ ।। खेदेन त्वदन्वेषणार्थपर्यटनजनितरजनि जागरान्नेत्रयोर्लौहित्यमित्यलं दुःशङ्क्येत्यत आह, कज्जलेति। हे कृष्ण! अरुणमपि ते दशनवसनमधरस्तव तनोः

शरीरस्यानुरूपं योग्यं कान्ति तनोति विस्तारयति। तनुरपि ते श्यामाऽधरोऽप्यधुना ते श्याम इति भावः। कीदृशम्? कज्जलेनाञ्जनीभूदेन मलिने ये विलोचने नेत्रे तयोश्चुम्बनेन विरचितो नीलिमा नीलपद्मपत्रं तादृशं, तस्याश्चुम्बनसमये लग्नतन्नेत्राञ्जनेन श्यामीभूतस्तदधर एव स्फुटत्वेन धूर्ततां प्रकटयतीति भावः। नेत्रयोरपि चुम्बनमुक्तं कामशास्त्रे, 'गुह्ये नेत्रे ललाटे च चुम्बनं परिकीर्तितम्' इति। 'ओष्ठाधरौ तु रतदच्छदौ दशनवाससी'**त्यमरः**।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। कज्जलेति। हे कृष्ण! यस्मात् कारणात् कज्जलेनाञ्जनेन मलिने ये विलोचने तयोश्च चुम्बने विरचितं सम्पादितं संक्रान्तमिति यावत् तादृशं नीलिमरूपं नीलवर्णं यस्य तत्तादृशम्। नयनस्य चुम्बनस्थानत्वे प्रागेव कथितम्। किञ्च अरुणम् अञ्जनाक्तनयनचुम्बनात् पूर्वं शोणवर्णं दशनवसनं दन्तच्छदः अधरः इत्यर्थः। तव तनोः शरीरस्यानुरूपं सदृशं समानरूपं तनोति भवति व्याख्यातं तत्तायाः याहि इत्यन्वयः साधारणेनेह एव।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। पुनरन्याङ्गनासङ्गचिह्नं दर्शयन्ती भर्त्सयति। हे कृष्ण अरुणं तव दशनवसनम् ओष्ठाधरं कर्त्तृ तनोः शरीरस्यार्थात्तव, अनुरूपं योग्यं कज्जलेन मलिनं यद्विलोचनं तत्र यच्चुम्बनं तेन विरचितं यन्नीलिमरूपं कृष्णवर्णं तत् तनोति विस्तारयति। तथा च कृष्णस्य भगवतः तद्योग्यं न त्वरुणाधरस्येति प्रकृतपापेनेदं वृत्तमिति दर्शितम्। यद्वा दशनवसनपदेनातिशुभ्रदशनद्युतिमतः कज्जलसम्बन्धदर्शनेन सितासितसम्बन्धः सूचितः। लोचने चुम्बनयोग्यता चक्षुः कपालफलकेत्यादिना कामशास्त्रदर्शितैव। 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी'त्यमरः। 'रूपं स्वभावसौन्दर्य' इति विश्वः।।२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२।। पुनरपि प्रकारान्तरेणोपालम्भमाह, कज्जलेति। हे कृष्ण! तवारुणं रागेणारक्तं [२]दशनस्य वसनमध (र) स्तनोः शरीरस्यानुरूपं तनोति विस्तारयति। कीदृशम्? कज्जलेनाञ्जनेन मलिनं श्यामं यद्विलोचनं तस्य चुम्बनेन विरचितं कृतं नीलिम्नो रुपं श्यामरूपं यस्य। स्वभावमलिनस्य तव मालिन्यकरमिति ध्वनिः।।२।।

### (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। कज्जलेति। हे कृष्ण! तवारुणं रागेण लोहितं दशनवसनं अधरः तनोः शरीरस्यानुरूपं सादृश्यं तनोति विस्तारयति। कीदृशं दशनवसनम्? कज्जलेनाञ्जनेन मलिनं श्यामं यद्विलोचनं नेत्रं चुम्बनेन विरचितं कृतं नीलिमरूपं श्यामतास्वरूपं यस्य। आरक्तस्याधरस्य नेत्रचुम्बनेन श्यामताप्रतिपादनात् तनोरनुरूपत्वमन्यस्यामनुरागश्च सूचित इति।।२।।

१.कीलित-अ. २.दशनं तस्य-अ.ब.

### (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। तदर्थमुच्यते मयाऽन्या काऽपि नानुसृतेत्यत आह, कज्जलेति। कज्जलमलिने विलोचने तयोश्चुम्बनेन विरचितं नीलिमरूपं यस्य तत्। अरुणं दशनवसनं अधरोष्ठं हे कृष्ण! तव तनोः अनुरूपं नामाभिव्यक्तवर्णशरीरस्य तनोति। यल्लोचनचुम्बनेन तवाधरः कृष्णो जातः इति अन्याङ्गनासङ्गमचिह्नस्य अनुरूपं सदृशं कृष्णत्वमिति भावः।।२।।

### (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। त्वच्चिन्ताजागरार्थे नेत्रे रागो नान्याङ्गनारतिजागरादिति कृष्णप्रतिवचने दूषणान्तरमाह, कज्जलेत्यादि। हे कृष्ण! तव दशनवसनम् अधरः स्वभावादारुणं सम्प्रति तनोरनुरूपं त्वदीयस्य नीलिम्नः सादृश्यं तनोति विस्तारयतीति वाक्यार्थः। अत एव कृष्णेति साभिप्रायसम्बोधनम्। ''सादृश्यमनुरूपं स्याद्'' इति **पदसागरः**। किंविधं स्यादित्या, कज्जलेत्यादि। कज्जलेन मलिनं यद्विलोचनं विशिष्टलोचनं तस्य चुम्बनेन विरचितं प्रतिपादितं नीलिमरूपं यस्याधरपुटस्येति विग्रहः। नीलस्य भावो नीलिमा। पृथ्वादिभ्य इमनिच्। यद्वा तव दशनवसनं कर्तृ तनोरनुरूपं रूपं तनोति। किंविधं तत्? कज्जलमलिनविलोचनचुम्बनविरचितनीलिमेति। यदि त्वं नान्यङ्गनासङ्गतः कथमेतदित्यभिप्रायः।।२।।

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। त्वच्चिन्ताजागरान्नेत्रे रागः न रतिरागादित्याह, हे कृष्ण! सहजारुणं तव दशनवसनं अधरः संप्रति तनोरनुरूपं अनुसादृश्ये सदृशरूपं श्यामतामित्यर्थः तनोति। कुतोऽनुरूपम्? कज्ज्वलेन मलिनयोर्विलोचनयोश्चुम्बनेन विरचितं नीलरूपं यत्र तत्, मलिनशब्दः तु ईर्ष्यया तवाधरचरितं व्यनक्ति इत्यर्थः।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२ ।। त्वच्चिन्तयैव तादृशत्वमस्येति प्रतिवचनमाशंक्याह, कज्जलेति। हे कृष्ण! श्यामशरीर। तत्प्रौढिप्रकटनपटीयस्तवारुणं दशनवसनं सहजारुणोऽधर: तनोरनुरूपं तनोति। तत्सौभाग्यवर्धनाय शरीरसदृशमात्मानं करोतीत्यर्थ:। अनुशब्दोऽत्र सदृशार्थ:। यत: कज्जलेन मलिनयोस्तद्विलोचनयोश्चुम्बनेन विरचितं नीलमरूपं यत्र तत्र। मलिनविलोचनयोरिति वा चुम्बनादरसूचककृतातिप्रशस्तनैल्यमित्यर्थ:। ईर्ष्यया मलिनशब्दोपन्यास:।।२ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२ ।। कज्वलेति, कज्वलेति रात्रौ अन्यनारीसङ्गेन तज्जनितशृङ्गारेण मलिनता स्पष्टीभवति। तद्यथा कज्वलं लोचनयो: विमृष्टजन्यमलिनतां प्राप्तेति। चुम्बनेन नायिकाया: चक्षुषि स्थिता नीलिमा ओष्ठे आगच्छति। सा नायिका बहुपुरुषोपभोगत्वात् मलिनवसनाऽस्ति। तव सकलं दशनवसनादय: ते तनोरनुरूपमस्ति। परं मलिनतां तनोति।।२ ।।

**३-वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम्।**
**मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम्।।हरिहरि० ।।३ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। त्वच्चिन्ताबलात्कृष्णो ममाधरो न नारीनेत्राञ्जनैरिति कृष्णप्रतिवचने दूषणान्तर-माहवपुरिति। तव वपु: कर्त्तृरिति रतिजयलेखमनुहरतीतियोजना। स्मरसङ्गरे वपुरिदं जयतीति रतिजयलेख:, कीदृशं वपु: स्मरसङ्गरे खरनखरक्षता रेखा यत्रेति विग्रह:। कस्येव इत्यादि। मरकतशकलकलितकलधौतलिपेरिव मरकतखण्डार्पित काञ्चनाक्षरपङ्क्तेरिव इत्यर्थ:। कलधौतं रौप्यहेम्नोरि**त्यमर:**''। वपुष: कृष्णवर्णत्वात् नखक्षतस्य रक्तवर्णत्वात् मरकतार्पितसुवर्णलिपे: साम्यम्।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। तव वपू रतिजयलेखमनुहरतीवानुकरोतीव। इदं वपुर्न, मया सर्व जितमिति कामिन: प्रति कामजायाप्रेष्यलेखोऽयम्। अनेन स्त्रीप्रेष्यत्वेन तस्याधमत्वं सूचितमिति व्यङ्ग्योऽर्थ:। किंभूतं वपु: ? स्मरस्य सङ्गर इव सङ्गरे कामविलासे स्वरनखराणां क्षतरेखा यत्र। अत्रापि 'खर'ग्रहणं विलासभङ्गे हेतु:। तस्या: संबन्धिनं लेखमिति वपुर्नखक्षतानां लेखेनोपमेयगर्भविशेषणमाह। मरकतशकले कलिताया: कलधौतलिपे:

संबन्धिनम्। अथवा, लिपेरित्यत्र पञ्चमी। तत्रैवं लिपेरिवेति योजनीयम्। 'कलधौत-लिपिमिव' इति युक्त: पाठ:।।३।।

## (३) जगद्धरकृत- सारदीपिका

।।३।। किं च वपुरिति हे कृष्ण तव वपु: शरीरं रति जयलेखं सुरतविजयप्रशस्ति लेखन पत्रं अनुवहति अनुकरोति किदृशं वपु: स्मरसङ्गरे कामयुद्धे खराणां तीक्ष्णानां नखानां क्षतान्येव रेखा यत्र कस्या इव मरकतशकले नीलमणिखण्डे कलिता निर्मिता या कलधौतलिपे: सुवर्णविरचिताक्षरस्य विन्यासस्येव वपुषो नीलत्वान्नखक्षत-स्फुटकत्वान्मरकतखण्डार्पितसुवर्णाक्षरसाम्यम्।।३।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३।। वपुरिति। हे कृष्ण! स्मरस्य कामस्य संगरे संग्रामे खराणां तीक्ष्णानां नखराणां नखानां रेखा यत्रैतादृशम्। तव वपुर्मरकतशकले नीलमणिखण्डे कलिता निर्मिता या कलधौतलिपि: सुवर्ण इवाक्षरविन्यासस्तस्या इव रति, जयलेखं सुरतविजयप्रशस्तिं लेखनपत्रमनुहरति सदृशीकरोति। अत्र कृष्णवपुषो नीलत्वान्मरकतशकलसाम्यम्। सुवर्णस्य कविसंप्रदाये आरक्तत्वेनैव वर्णनीयत्वान्नखक्षतस्य सुवर्णलिपिसाम्यं बोध्यम्। 'संगरोऽह्नि कृतौ युधि' इति विश्व:। 'पुनर्भव: कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्' **इत्यमर**:। 'गारुत्मतं: मरकतमश्मगर्भो हरिन्मणि:' इति च। भित्तं शकलखण्डे वा पुंसि' इति च। 'कलधौतं रूप्यहेम्रो: कलधौतं कलध्वनौ' इति **विश्व**:। 'वर्णदूत: स्यस्तिमुखो लेखो वाचिकहारक:' इति **हारावली**।।३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३।। वपुरिति। हे कृष्ण! यत: कारणात् स्मरस्य कामदेवस्य सङ्गरे युद्धे खरास्तीक्ष्णा: ये नखरा: नखास्तै: क्षतरेखा नखरेखा यस्मिन् तादृशं वपु: शरीरं मरकतमणे: शकले खण्डे कलिता लिखिता या कलधौतलिपि: तद्। अत्र कलधौतशब्देन सुवर्णमेव ग्राह्यं न रजतम्। ''कलधौतरूप्यहेम्नोरित्यमर:''। रतिजयलेखम् अन्यत् सुरतविजय पत्रम् अनुहरति अनुकरोति ततो याहीत्यन्वय:।।३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३।। अन्याङ्गनासङ्गमं दर्शयन्ती पुनर्भर्त्सयति। तव वपु: शरीरं मरकतस्य नीलप्रबालस्य शकले खण्डे कलिता अर्पिता या कनकधौतलिपि: सुवर्णरसलिपि: तस्या रतिजयलेखं सुरतजयपत्रमनुहरति। यद्वा अप्यर्थे इवशब्द:। तथा च वपुरपि

रतिजयलेखमनुहरतीत्यर्थः। किम्भूतं वपुः ? स्मरसङ्गरे कामयुद्धे खरनखरेण क्षतरेखा क्षतरूपरेखा यत्र एतादृशम्। नखपदस्य क्षतद्विरेखाद्वयोपदर्शनेन स्मरसमरोचितत्वं लिप्यनुकूलत्वञ्च दर्शितम्। तथा च मरकतसदृशं तव वपुः नखरक्षतरेखमनुहरति। कमिव ? मरकतशकलकलितकलधौतलिपेः रतिजयलेखमिवेत्यर्थः। अत्र नखरपदेन एतादृशीं मां विहाय न्यूनमनुरक्तोऽसीति मन्दत्वं सूचितम्। इदं पुनरत्रावधेयम्, पूर्वपक्षे रतिजयो नायकस्य, अत्र तु नायिकाया इति। 'नखोऽस्त्री नखरो स्त्रियामि'**त्यमरः**। 'लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ।' 'भित्तं शकलखण्डे वा' इति। 'कलधौतं हेमहाटकमि'ति च।।३ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३ ।। [१]किञ्च वपुरिति। हे प्रिय! तवेदं वपुः रतिजयलेखं सुरतविजयपत्रमनुहरति सदृशीकरोति। कीदृशम्? स्मरसङ्ग्रामे खराणां [२] तीक्ष्णानां [३]नखानां क्षतैर्जनिता रेखा यत्र। [४] कस्या इव ? मरकतशकले नीलमणिखण्डे कलिता निर्मिता कलधौतस्य [५] सुवर्णस्य लिपि [६] र्न्यासः पङ्क्तिर्यस्या इव।।३ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३ ।। वपुरिति। हे कृष्ण! तव वपुः शरीरं रतिजयलेखं[७]सुरतविजयलेखं सुरतविजय[८]प्रशस्तिलिखितपत्रं अनुकरोति। कीदृशं वपुः ? स्मरसङ्गरे कामयुद्धे खराणां तीक्ष्णानां नखराणां नखानां क्षतान्येव रेखा यत्र। कस्येव ? मरकतशकले नीलमणिखण्डे कलिता निर्मिता या कलधौतलिपिः [९]सुवर्णाक्षरविन्यासो यस्मिन् [१०] सः [११]तस्येवेति तव विशेषणम् ।।३ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३ ।। वपुरिति। स्मरसङ्गरे मदनकलहे निधुवने नखरनखाः तीक्ष्णनखाः तैः क्षताश्च ताः रेखाः क्षतरूपरेखाः यस्मिन् तत्। तव वपुः शरीरंमरकतशकलस्य मरकताभिधनीलस्य फलके कलिता लिखिता कलधौतस्य हेम्नः लिपिः प्रस्ता (रा) क्षरावलिः तस्याः सकाशात् रतेर्जयलेखा एतावत्पर्यन्तं ज्ञापिका रेखा यस्मिन् तदिव अनुहरति शोभते। अत्र गुणनिमित्तलेखधर्मोत्प्रेक्षालङ्कारः।।३ ।।

१.किञ्च हे प्रिय-इ.फ.ग.ह.ज. २.तीव्राणां-इ.फ.ग.ह.ज. ३.नास्ति-अ.ब. ४.कस्यां क इव-ग. ५.सौवर्णस्य-फ.ज. ६.न्यासपङ्क्ति-इ.ग.ह.नाम पङ्क्ति-फ.ज. ७.नास्ति-ड.ल.म. ८.प्रशस्तिपत्रं-ड. ९.सुवर्णवर्ण-क. १०.नास्ति-ड.ल.म. ११.तस्येति तवविशेषणम्-ड.तस्येतीति तव विशेषणम्-ड.तस्येतीति तव विशेषणम्-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। त्वच्चिन्ताबलात् कृष्णो ममाधरो न नारीनेत्राञ्जनैरिति कृष्णप्रतिवचने दूषणान्तरमाह, वपुरित्यादि। हे कृष्ण! तव वपुः कर्तृ मरकतशकलकलितकलधौतलिपेः सम्बन्धिनं रतिजयलेखम् अनुहरतीव। रतिजयपत्रलेखनमित्यर्थः। रतौ रत्यां वा जय उत्कर्षस्तस्य लेखस्तमिव। कीदृशं सत्? स्मरेति। सत्कामसङ्ग्रामे खराणां तीक्ष्णानां नखराणां क्षतरेखा यत्रेति विग्रहः। तथा च नायिकया रतौ जित्वा मयायं जित इति जनेषु प्रथयितुं तव शरीरे नखक्षतव्याजेन वर्णाः लिखिता इति समुदितार्थः। मरकतेति। मरकतशकले रत्नविशेषखण्डे कलितार्पिता कलधौतस्य स्वर्णस्य या लिपिरक्षरावली तस्या इति विग्रहः। नीलमणावपि उत्कीर्णा वर्णाः स्थायिन इति भावः। ''कलधौतं रूप्यहेम्नोः'' **इत्यमरः**। ''लिखिताक्षरसंस्थाने लिपिर्लिभिरुभे स्त्रियौ'' इति। यद्वा एतत् तव वपुः मरकतशकलकलितकलधौतलिपेरनुहरतीव अनुकरोतीव। अनुहरतेः कर्मणि षष्ठी सादृश्ये भवति अपि तु र(अ)नुहरतीतिवत्। तदा रतिजयलेखमिति वपुषोः विशेषणम्। रतेः सुरतस्य रतौ वा नखरेखारूपेण जयलेखनं यत्रेति विग्रहः। नखक्षतस्य रक्तवर्णत्वात् स्वर्णेन साम्यम्। यदुक्तम, ''पीतलोहितयोः स्वर्णपरागाग्नि-शिखादिषु। दानवासुरदैत्यानामैक्यमेवाभिसम्मतम्।।'' इति। शरीरस्य श्यामत्वेन नीलमणिसाम्यम्। यदि त्वं नान्याङ्गनासङ्गतः कथमेतदित्यभिप्रायः।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।। त्वच्चिन्ताशोकेन मलिनोऽयमधरो न नारीचुम्वनात् इत्याहतवेदं वपुः रतिजयलेखम् अनुहरति सदृशीकरोति। कीदृशम्? अनङ्गवाणतीक्ष्ना नखक्षतरूपा लेखा यत्र तत्। कस्या इव? मरकतमणिखण्डे अर्पितायाः काञ्चनद्रव, लिखिताक्षरपंक्तिरिव। बपुषः कृष्णत्वात् नखक्षतस्य रक्तत्वात् सरक्तार्पितलिपेः साम्यम्।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। विपरीतवादिनि। त्वत् गुणकीर्त्तनादेव मलिनोऽयमधरः कथं नारीनयनचुम्ब-नादित्याशंक्याह, वपुरिति। हे वञ्चनचातुरीधुरीण! तव तत्सम्भोगसुभगं अन्यस्य वपुस्तत्कामनापरिपूरकं शरीरं स्मरसङ्गरे रतियुद्धे खरा मदनबाणसदृशतीक्ष्णा नखास्तेषां क्षतरेखा यत्र तादृशम्। तत्चिरकालोपचितसम्भोगाटोपतृष्णासूचकतीक्ष्णकरजकृत-रेखमित्यर्थः। तथा सत् मरकतशकले मरकतशिलाखण्डे कलितायाः लिखितायाः

कलधौतलिपेः सुवर्णद्रवाक्षरपंक्तेः रतिजयलेखं रतिविजयपत्रिकामनुहरति, अनुकरोतीव। उपमानुप्राणितोत्प्रेक्षा। 'भित्तं शकलखण्डे वा' **इत्यमरः**। 'कलधौतं रूप्यहेम्नोः' इत्यपि।।३ ।।

## (१ ३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३ ।। वपुरनुहरतीति; ते वपुः शरीरं स्मरसङ्गरः कामसंगरः कामविलासः रतिरणो वा खरनख कठिनकरजरेखायां नखक्षतादिरेखया क्षताक्तः तव शरीरं मरकते इन्द्रनीलमणेः शकले खण्डे कलितायाः वा कलधौतलिपेरिव कलधौतलिपिः सुवर्णश्वइव अक्षरलिपिः विन्यासः तस्याः रतिरणस्य युद्धे विजयोद्घोषणं कुरुते। त्वं तस्याः समीपं गच्छ।।३ ।।

**४-चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम्।**
**दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम्।। हरिहरि० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। त्वां मृगतयो वने ममेदं वपुः कण्टकक्षतं न नारीनखक्षतमिति कृष्णवचने दूषणान्तरमाह। चरणेति। क्रौञ्चबन्धे हि सुरते नारीपदद्वयं कान्तस्य हृदये न्यस्यति यदुक्तम्,

योषित्पादौ हृदि न्यस्य कराभ्यां धारयेत्कचान्।
यथेष्टं ताडयेद्योनिं क्रौञ्चबन्धः प्रकीर्त्तितः।।

इति **स्मरदीपिकायां** चरणकमलगलदलक्तकसिक्तं तबेदं हृदयं वहिर्मदनद्रुमनव किशलयपरिवारं दर्शयति इवेत्युत्प्रेक्षा। मदन एव द्रुमो मयूरव्यंसकादित्वात्समासः। कीदृशम् उदारं श्रेष्ठं कौटिल्यरहितमिति यावत्। अथ आभ्यन्तरं कामं बहिः प्रकटयांचक्रे। यदि त्वं नान्यङ्गनासङ्गतः कथमेतदित्यभिप्रायः।।४ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, चरणेति। अत्र प्रीतिविशेषं सूचयति, हे कृष्ण! तवेदं हृदयं बहिर्मदनद्रुमस्य मदनो द्रुम इव तस्य नवकिसलयपरिवारं नवपल्लवसमूहमिव दर्शयति, किंभूतं हृदयम्? उदारं महत्। पुनः किंभूतम्? चरणकमलादलक्तकसान्निध्यादुप-भुक्तवनितापादपद्मतः गलतालक्तकेन सिक्तम्। अत्र मदनद्रुमत्वारोपेण बहिर्ग्रहणेन च तस्याः साधारण्याननुरागौ सूचितौ। हस्तचरणाभ्यां रतविशेषो यथा, 'यदि

संहतमूर्ध्वगमूरुयुगं युवतेः परिरभ्य नरो रमते। तदभग्नमचरःस्फुटनं च भवेदुरसि प्रमदाचरणद्वयतः' ।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। ननु मार्गं विस्मृत्य गच्छतीमेव पुषिवने कण्टकादि स्पर्शादेवं दृश्यते नतु नखाङ्कमित्यत आह चरणेति इदं उदारं मनोहरं तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य नवकिशलय परिवारं नूतनपल्लव समुहं बहिर्दर्शयतीव प्रकटयतीव कीदृशं हृदयं चरणकमलादन्य स्त्रीपादपद्मात्गलता स्त्रवता अलक्त केन सिक्तं उक्षितं किशलयपदं नैव नूतनत्व विधानाप्तुनर्नव पद्म अद्यतनत्व सूचनार्थं रुपकालङ्कार-श्चात्र ।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। ननु मार्गं विस्मृत्य कण्टकादिक्षतवर्त्मनागच्छतो मे वपुषि कण्टकक्षतं दृश्यते, न तु नखाङ्कमित्यत आह, चरणेति। इदमुदारं तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीव। कीदृशं हृदयम्? चरणकमलादन्यकामिनीपदपद्माद्गलता स्त्रवतालक्तकेन सिक्तम्। अपरोऽपि-वृक्षः सिक्तः समुल्लसन्पल्लवानुद्दर्शयतीति ध्वनिः। हृदि नायिकाचरणालक्तक-संबन्धकथनेन क्रोधाख्यो बन्धः कथितः। तदुक्तं **वात्स्यायन**, 'योषित्पादौ हृदि न्यस्य कराभ्यां धारयेत्कुचौ। यथेष्टं ताडयेद्योनिं क्रोधबन्धः प्रकीर्तितः।।' इति । 'परिवारः परिकरे समूहे वेष्टनेऽपि च' इति **विश्वप्रकाशः**।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। चरणेति। हे कृष्ण! यस्मात् कारणात् चरणकमलाभ्याम् अन्यस्याः पादसरोरुहाभ्यां गलत् स्त्रवदलक्तकं लाक्षारसं तेन सिक्तमार्द्रमुदारं विशालम् अथवा अन्यालिङ्गनदानशौण्ढ़मित्यर्थः। एतादृशं तव इदं परिदृश्यमानं हृदयं भरःस्थलं कर्त्तृ मदनद्रुमस्य हृदयान्तर्वर्द्धमानकामतरोः नवानि नूतनानि यानि किशलयानि पल्लवा तेषां परिवारं हृदयाद्बहि प्रवेशे दर्शयति प्रकाशयतीव। अतो याहीत्यन्वयः। कस्मिंश्चित्सुरतविशेषे चरणयो र्हृदयसम्बन्धस्यापि सम्भवात्तत्र लाक्षारससेचनमविरुद्ध-मित्यवगन्तव्यम्। अथवा समनन्तरमविरत प्रणयकलहवशादाचरितचरणाघातादलक्त-कसेचनमवगन्तव्यम्। यद्धा प्रेमातिशयात्तच्चरणयोर्हृदयनिवेशेन वा लाक्षासम्बन्ध-मित्यवगन्तव्यम्। उत्प्रेक्षा।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनरस्याङ्गनासङ्गमचिह्नदर्शनेन भर्त्सयति। इदं तव हृदयं बक्ष: कर्तृ बहिर्बाह्ये मदन: काम: स एव द्रुम: वृक्ष: तस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं दर्शयतीव। किसलयस्य नूतनत्वेनातिलौहित्यं दर्शितम्। हृदयं कथम्भूतम्? उदारम् असङ्गोपकत्वेन महत्तरमित्यर्थ:। पुन: किम्भूतम्? चरणावेव कमले, ताम्यां गलताक्षरा अलक्तकेन यावकरसेन सिक्तम्? तथा च क्रौञ्चबन्धात् कामिनीचरणयो: अलक्तरसा: कृष्णस्य हृदि लग्ना:। त एव हृदयस्थमदनद्रुमस्य नवकिसलयत्वेन उत्प्रेक्षन्त इति किसलयपदेन च पुष्पफलाद्यपि भात्येवेति ध्वनितम्। क्रौञ्चबन्धलक्षणं भारते, 'हस्तौ पश्चात् समानीयपदस्थाने शिरस्तथा। स्तिया: पादौ हृदि स्थाने क्रौञ्चबन्ध: प्रकीर्तित:' ।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। किञ्च चरणेति। तवेदं हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीव प्रकटयतीव। कीदृशम्? चरणकमलादन्यस्त्रीपादपद्माद्गलता स्रवताऽलक्तकेन सिक्तमुक्षितम्। अन्योऽपि वृक्ष: सिक्तमूलस्सन् पल्लवं प्रकटयति इति ध्वनि:। कीदृशम् उदारं [१]मनोहरमित्यर्थ:।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। चरणेति। तवेदमुदारं [७]मनोहरं हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य [८] नवकिसलयस्य परिवारं [९] नूतनपल्लवसमूहं बहिर्दर्शयतीव प्रकटयतीव। कीदृशं हृदयम्? चरणकमलादन्यस्त्रीपादपद्मात् गलता स्त्रवताऽलक्तकेन सिक्तमुक्षितम्। किसलयपदेनैव नूतनत्वाभिधानात्पुनर्नवपदमत्यन्तनवत्वसूचनार्थम्। "परिवार: परिकरे समूहे वेष्टनेऽपि च" इति [१] **विश्व:** (१०२.२५८)।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। चरणेति। चरणावेव कमले ताभ्यां गलन्तं स्रवत् अलक्तकं लाक्षारस: तेन सिक्तं आरक्तं उदारं तव हृदयं वक्ष: कर्तृ: मदन: एव द्रुम: तस्य नवकिसलयपरिवार: नवदलसमुदय: तं बहि: दर्शयतीव व्यञ्जयतीव। अत्रारुण्यगुणनिमित्तेन मदन (द्रुम) किसलयत्वेन सम्भावनाद्वस्तूत्प्रेक्षा। इवशब्दस्य(य) या सहान्वये धर्मोत्प्रेक्षेति वाग्भट: ।।४।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। त्वां मृगयतो वने ममेदं वपु: कण्टकक्षतं न नारीनखक्षतमिति कृष्णप्रतिवचनेन दूषणाय हरिमाह, चरणेति। हे कृष्ण! इदं तव हृदयं वक्ष: कर्तृ चरणकमलगलदलक्त-

कसिक्तम्। अर्थात्तस्या एव पादपद्मगलद् यावकेन सिक्तं रक्षितम्। उत्प्रेक्षते। अन्तरुत्पन्नस्य मदनद्रुमस्य नवकिसलयपरिवारं बहिर्दर्शयतीव। मदन एव द्रुम इति रूपकः। परिवारोऽत्र परिच्छदः। ''परिवारः परिजने खड्गकोषे परिच्छदे'' इति **मेदिनी**। किंविधम्? **उदारमिति**। उदारं महत् विपुलमिति यावत्। कौटिल्यरहितं वा। अत एवाभ्यन्तरकामं बहिः प्रकटयाञ्चक्रे। क्रौञ्चबन्धे सुरते हि नारीपदद्वयं कान्तस्य हृदये लगति। यदुक्तम्, ''योषित्पादौ हृदि न्यस्य कराभ्यां धारयेत् कुचौ। यथेष्टं ताडयेद्योनिं क्रौञ्चबन्धः प्रकीर्तितः।।'' इति। यदि त्वं नान्याङ्गनासङ्गतः कथमेतदित्यभिप्रायः।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। तवान्वेषणे भ्रमणाद्वने ममेदं वपुः कण्टकैः क्षतं न नारीनखैरित्यत्र सोकृण्ठमाह। इदं विद्यामानं तव हृदयं उदारं मनोहरं दर्शनीयमित्यर्थः। औदार्य्यमेवाह प्रेमोल्लासतो हृदि धृतचरण कमलगलदलक्तेन सिक्तं श्यामे उरसि अरुणयावकेन शाभितमित्यर्थः। तत्रोत्प्रेक्षे मदनद्रुमस्य हृदयानुगतनवपल्लवसमूहं वहिर्दर्शयतीव ।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। अविश्वासिनि। त्वदन्वेषणभ्रमणात् कण्टकक्षतसन्ततिरियम्। नान्यनारीनख-सम्भूतेति परिहारमाशंक्याह; चरणेति। हे कपटपाण्डित्यपारङ्गम! तद्रतिविक्रीतस्य तवेदं परिदृश्यमानं हृदयं वक्षःस्थलं चरणकमलात् गलितालक्तकेन सिक्तं, यावकदानसमय-समुदितत्वच्चापलादिनिरीक्षण-सञ्जातपरिहास-कोपकृततच्चरणा-घातनिःसृतलाक्षारससंक्रान्तमित्यर्थः। तथा सत् मदनद्रुमस्य हृदयान्तराभिवृद्ध-कन्दर्पतरोर्नवकिसलयपरिवारं नूतनपत्रपंक्तिं हृदयात् बहिःप्रदेशे दर्शयतीव इत्युत्प्रेक्षे। तस्याच्चरणाघातेनैव तव कामाभिवृद्धिरिति भावः। अत एवोदारं मन्नयनोत्सवदातारमिति सोलुण्ठोक्तिः। 'उदारो दातृमहतोः' **इत्यमरः**।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। चरणेति; कस्याः नायिकायाः चरणं वक्षसि धारयसि। यस्मात् चरणात् अलक्तकरसः गलितं भवति। फलतः त्वद्वक्षदेशमाद्रीकरोति। तव विशालवक्षसि पादसंस्थापि अलक्तकद्रवसंयुक्ते पादे मदनबृक्षइव तव विशालं वक्षदेशं कन्दर्पस्य बृक्षे नवकिशलयानां यथा रक्तवर्णता वर्तते तद्वत्तव हृदयं रञ्जितं भवति। यस्याःपदधारेण तव हृदये रक्तता मृष्टा भवति त्वं तस्याः समीपं गच्छ। हस्तचरणाभ्यां रतिविशेषो यथा यदि संहतमूर्ध्वगमूरुयुगं युवतेः परिरभ्य नरो रमते। तदभग्नमुरः स्फुटनं च भवेदुरसि प्रमदाचरणद्वयतः।

**स्मरदीपिकायां,** योषित्पादौ हृदि न्यस्य कराभ्यां धारयेत्कचान्
यथेष्टं ताडयेद्योनिं क्रौञ्चबन्ध: प्रकीर्त्तित: ।।।इति।।४।।

**५-दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्।**
**कथयति कथमधुनापि मया सह तव वपुरेतदभेदम्।। हरिहरि० ।।५।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। त्वां मृगयतो मम हृदयं गिरौ मन: शिलामृष्टं न चरणालक्तकैरितिकृष्णप्रतिवचन दूषणान्तरमाह। दशनेति। हे कृष्ण! तव वपु: कथमधुनापि मया सह एतद् भेदमैक्यं कथयति। नैरपेक्षाभिन्नताजातैवेत्यभिप्राय:। कथमभेदागम इत्याह। दशनेत्यादि। भवदधरगतं दशनपदं याते मम चेतसि खेदं जनयतीतिभङ्ग्युक्ति: वस्तुतस्तु प्रागुक्तं नयनादिरागादिकं कपटेनाच्छादितं इदं तु दशनपदम्। उदितचन्द्र इव केन निवारणीयमित्यभिप्राय:।।५।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, दशनपदमिति। हे कृष्ण, तव एतदिति अन्यरमण्युपभोगचिह्नितं मया सहाधुनापि प्रत्यक्षतो दृश्यमानेऽपि भेद एतामप्यवस्थां प्रापितया सहाभेदं कथं कथयति। कोऽसावभेद इत्वाह, दशनपदं दन्तक्षतं भवदधरगतं सत्, मम चेतसि खेदं जनयतीति। यस्य व्रणस्तस्य वेदनेति प्रसिद्धेऽन्यव्रणोऽन्यवेदनामादधातीति विरुद्धपरिहाराय भेद एव घटते। स च सुतरां विरुद्ध इति ।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। ननु तव खेदेन त्वया एक्यात्महृदये व्यार्धिविक्रिया जाता कथमन्यथा कल्प्यते स ते यं यदि तव मया ऐक्यं तस्यात्तदा तव शरीरगत क्षतेन मम वेदना न स्यादित्याह दशनेति, भवदधरगतं तवाधरोष्ठ वर्त्तमानं दशनपदं अन्यकामिनीदन्तक्षतं मम चापि मयासह अभेदं कथं कथयतीत्यर्थ:। न विद्यते भेदो यस्य पूर्वं मयासह तव वपुषो भेदोनास्तीति स्थितं इदानीन्तु तद्विपरीतमिति मयासह एवेति विभावनालङ्कारम् ।।५।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। किंच, दशनेति। भवदधरगतं दशनपदं तवाधरस्थितं कस्याश्चिद्दन्तक्षतं मम चेतसि खेदं दु:खं जनयति। एतत्तव वपुरधुनापि मया सह कथमभेदं कथयति, अन्यशरीरक्षतस्यान्यत्र व्यथाजनकत्वासंभवाद्वपुषो मेदं ज्ञापयतीति भाव:। अधुनात्यन्तहृदयभेदे वपुरभेदो नोचित इति काक्वा व्यज्यते। प्रसिद्धभेदकारणानि

षट्। भेदकारणस्य विभाव्यमानत्वाद्विभावनालंकारः। तदुक्तं दण्डिना (का. २/१९९), 'प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणान्तरम्। यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना।।' इति।।५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। दशनेति। हे कृष्ण! भवदधरगतं तव दन्तच्छविगतं दशनपदम् अन्यकामिनीकृत-दन्तक्षतं मम चेतसि खेदं तापं परं जनयति रचयति। आवयोरभेदात्कथं मे तापं करोतीत्याशङ्क्याह। कथयतीति। हे कृष्ण! एतदन्याः सम्भोगचिह्नतत्वेन प्रतीयमानं तव वपुः अधुनेदानीं मया सह अभेदमपि कथं कथयति। पूर्वं तुल्यरतिचिह्नाङ्कितयोरभेदो घटते। इदानीं विलक्षणाकारयोरावयोरभेदो दुर्घट एव। तथा च मम चेतसि खेदो युक्त इति तात्पर्य्यम्। अतश्च याहीत्यन्वयः।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। पूर्वानुरागं स्मारयन्ती भर्त्सनायान्यनायिकासङ्गमचिह्नमुपदर्शयति। भवदधरगतं दशनपद्म अर्थादन्यकामिनीदन्तक्षतं कर्तृ मम चेतसि चित्ते खेदं विषादं जनयति उत्पादयति। अधुनापि एतादृशि भेदे सिद्धेऽपि तवैतत् पराङ्गनादन्तेन क्षताधरं वपुः शरीरं मया सह अभेदं कथं कथयति? न ह्यस्मिन् दन्ताधातेनान्यस्य दुःखं भवतीत्यभेदकथनम्।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। इदानीं वैदग्ध्यमवलम्ब्योपालम्भमाह, दशनपदमिति। भवदधरगतं तवाधरे स्थिरं दशनपदं कयाचिद्दत्तं दन्तक्षतं मम चेतसि चित्ते खेदं सन्तापं जनयति। अन्यदीय[४]एतद्वपुरधुना मया सह अभेदं[५] कथं कथयति। एतेनादोषदर्शनं[६]नायके नायिकायाः कथितम्।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। इदानीं वैदग्ध्यमवलम्ब्योपालम्भमा, दशनपदमिति। भवदधरगतं तवाधरे स्थिरं दशनपदं कयाचिद्दत्तं दन्तक्षतं मम चेतसि चित्ते खेदं सन्तापं जनयति। अन्यदेव [४]एतद्वपुरधुना मया सह अभेदं[५] कथं कथयति। एतेनादोषदर्शनं[६]नायके नायिकायाः कथितम्। दशनेति। भवदधरगतं तवाधरोष्ठे वर्तमानं दशनपदं अन्यकामिनीदत्तं दन्तक्षतं मम चेतसि खेदं तापं जनयति करोतीत्यर्थः। एतद्दशनपदमधुनाऽपि [२]इदानीमपि तव वपुर्मया सहाभेदं [३] कथं कथयति? न कथयतीत्यर्थः। न विद्यते भेदो यस्य। पूर्वं मया सह तव [४] वपुषो भेदो नास्तीति स्थितम। [५] इदानीं तद्विपरीतमिति मया सह भेद एवेति।।५।।

१.मनोहरम्-इ.फ.ग. २.व्रणस्तावके-इ.फ.ग.ह.ज. ३.पीडयतीति-अ.ब.इ.फ.ग.ह. ४.तवाप्येतद्वपुरधुना-इ.फ.ग.ह.ज. ५.कथयति कथम्-फ.ग. ६.नयने-अ.ब. ७.महत्-क. ८.नवकिसलयपरिवार-क.ल.म. ९.नवपल्लव-क

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। दशनेति। भवत: कृष्णस्य अधरगतं अधरोष्ठच्छदनानां पदं क्षतरूपं मम चेतसि खेदं जनयति। एतत् नखदन्तक्षतं तव वपु: अधुनाऽपि मां विना त्वयि क्रीडत्यपि समये मया सह विरहदु:खमनुभवन्त्या सह अभेदं कथयति। तवाधरक्षतवेदनां मयि जनयतीति वाक्यहेतुकं काव्यलिङ्गमभेदप्रतिपादकम्। सपत्न्या त्वदधरचुम्बनमनुभूतं मम तन्नास्तीति ईर्ष्याकृतवेदना व्यज्यते दन्तक्षतवेदनया। पूर्वार्धे क्षतस्य कारणस्य खेदरूपकार्यस्य च भिन्नदेशत्वादसङ्गत्यलङ्कार:। वाक्यार्थत्वेनाङ्गमिति अङ्गाङ्गिभावेन सङ्कर:। कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गति: इति लक्षणात्।।५।।

१.परिवार: परिजने खड्गकोषे परिच्छदे-विश्व: २.नास्ति-क. ३.कथं कथयतीत्यर्थ:-ड.कथयति नकथयतीत्यर्थ:-क. ४.नास्ति-क. ५.इदानीन्तु-ल.म.इदानीमुत-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। त्वं मृगयतो मम हृदयं गिरौ मन:शिलामृष्टं न चरणालक्तकैरिति कृष्णप्रतिवचने दूषणान्तरमाहदशनेति। हे कृष्ण! तव वपु: कथमधुनापि मया सह एतदभेदम् ऐक्यं कथयति प्रकटयतीत्यर्थ:। अधुनापीत्यत्र ईदृशे प्रणयभङ्गे इत्यपरोऽर्थ:। नैरपेक्ष्याभिन्नता जातैवेत्यभिप्राय:। कथमभेदावगम इत्याहभवदधरगतमिति। दशनस्य पदम् उदितचन्द्र इव केनावरणीय इत्यभिप्राय:।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। गैरिकचित्रितं नान्यङ्गनाचरणालक्तकसिक्तमित्या, हे श्रीकृष्ण! एतद् प्रत्यक्षं तव वपु: कर्त्तृ अधुनापि मयासह ऐक्यं नावयो: भेद इति कथं कथयति। तत् कथनप्रकारमाह, तवाधरगतं दशनक्षतं मम चेतसि खेदं दु:खं जनयति इति व्यङ्गोक्ति:। त्वदधरस्थितस्य मच्चित्तव्यथाजनकत्वात् अभेदोज्ञायत इत्यर्थ:। नयनरागादिकं छद्मनाच्छादितमिदं तु उदितचन्द्रकलावत् प्रकाशमानम् इति भाव:।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। कुतोऽभेदकथनम्। यतो दशनपदं तत्प्रौढिसूचकं दन्तचिह्नं भवदधरगतं तवौष्ठप्राप्तं, ममैतदविलक्षणायाश्चेतसि त्वच्चेष्टितविवेकचतुरे मनसि खेदमितरवेदना-तिरिक्तं दु:खं जनयति। क्षणं क्षणमुत्पादयतीत्यर्थ:। त्वदधरस्थितव्रणो मां पीडयति, इत्यभेद इत्यभिप्राय:। आक्षेपेण वितर्कध्वनि:।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। दर्शनेति; दशनपदं दन्तच्छेदं तेन भवत: अधरोष्ठे क्षतमभिलक्ष्य मन्मनसि खेदं जनयति। त्वया यत्कथितं मम शरीरं त्वया अभेदमिति तत् सत्यम्। यदिदानीं तवाधरक्षतेनाहं पीडितास्मि। विभावनालंकार:।।५।।

**६-बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम्।**
**कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम्।। हरिहरि०।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। कथं प्रश्ने संभ्रमे च ''प्रकारार्थे च संशये'' इति विश्व:। अव्ययानामानेकार्थत्वादयमशब्दोऽन्यथावाची तदेयमत्रार्थ:। कथमन्यथा कामज्वरपीडितमनुगतं जनं वञ्चयसे। शुद्धात्मनो नैष व्यवहार इत्यभिप्राय: अनुमानोऽयमलङ्कार:। अनुमानं तदुक्तम्, ''यत्साध्यसाधकयोर्वचन'' इति काव्यप्रकाशे। अत्र ह्यनुगतजनवञ्चकत्वेन साध्यते मलिनतरत्वम्।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, बहिरिवेति। नूनं वितर्के। हे कृष्ण! अहमिति वितर्कयामि। तव मनोऽपि मनस: स्वभावादौज्ज्वल्ये सत्यपि बहिरिव बहिर्गतकृष्णवर्ण इव मलिनतरं भविष्यति। अथ चैवं न तर्हि अनुगतमाश्रितं भवन्तमधिकृत्यासमशरदूनं मल्लक्षणं जनं कथं वञ्चयसे। तद्वञ्चनादेव चित्तमपि मलिनमनुमीयते। मलिना एवाश्रितवञ्चनां कुर्वन्तीति।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। दंष्टो न तु दन्तक्षतमित्यत आह बहिरिवेति ननु मेवेति वितर्के हे कृष्ण तव चित्तमपि बहिरिव मलिनतरं श्याम भविष्यतीति। ननु तर्कयामि तनु मालिन्यं त्वया कथं-ज्ञातमित्याह अथाऽन्यथा त्वां असमशर: कामस्तस्य ज्वरेण पीडया दूनमुपतप्तं अनुगतं त्वामनुसृतमल्लक्षणं जनं कथं वञ्चयसे परतारयसि अत: कृष्णत्वं कौटिल्यमेवेति तनूमिति शब्दोपादानादूत्प्रेक्षालङ्कार।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। ननु तवोपायनार्थं कमलं त्रोटयति मयि पुष्पकोषादापतता भ्रमरेण ममाधरोष्टो दष्टो न तु दशनक्षतमिदमित्यत आह, वपुरिति। हे कृष्ण! नूनं तर्के उत्प्रेक्षायाम्। तव

मनोऽपि चित्तमपि वपुरिव शरीरमिव मलिनतरमतिशयेन मलिनं भविष्यति। यथा ते वपु: श्यामं तथा मनोऽपि भविष्यतीत्यर्थ:। ननु मनोमालिन्यं त्वया कथं ज्ञातमित्यत आह, कथमिति। अथेति संप्रश्ने। त्वमेव पृच्छयसे यदि तवान्तर्मलिनं न तदाऽसमशरदूनम् असमशरो विषमशर: कामस्तज्जनितेन ज्वरेण दूनं दु:खितमत एवानुगतं त्वामनुद्रुतं मादृशं जनं कथं वञ्चयसे प्रतारयसि ? तथा च शरणागतजनवञ्चनमन्तर्मालिन्य-मन्तरेण न भवतीति भाव:। तथा च व्याजेन दशनक्षतादिगोपनेऽपि नूनमितिपद-प्रदानादुत्प्रेक्षा नामायमलंकार:। तदुक्तं **दण्डिना** (का. २/ २५४)'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभि:। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश:।।' इति।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। बहिरिति। हे कृष्ण ! अत: कारणात् तव मन: चित्तमपि बहिरिव तव वाह्याकार इव मलिनतरमतिमलिनं नीलवर्णं चेति यावत्। केषांचिन्मतेऽन्त:करणस्य तैजसत्वा देवतालोचनसम्भावाना युज्यते। भविष्यति नूनम् असंशयमित्यर्थ:। परहृदयस्या प्रत्यक्षत्वात्कथमेवं कथमिति, अथवा अन्यथा अव्ययानामनेकार्थत्वादेवं व्याकृत असमशरज्वरेण मन्मथज्वरेण दूनं परितप्तं न केवलं परितापमात्रम् अपितु अनुगन्तुं तव मनोऽनुगमनमित्यर्थ:। एतादृश जनप्रतारणादेव भवन्मनस: मालिन्यमवगम्यत इति तात्पर्य्यम् अतो याहीत्वन्वय:।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। एवं नैरापेक्षोक्तौ कृष्णस्य नैराश्यं स्यादित्याशङ्क्य उपालम्भप्रसङ्गे नैवात्मनस्तमायत्ततां दर्शयति। हे कृष्ण ! नूनं निश्चितं तव मनोऽपि चित्तमपि बहिरिव बाह्यमिव मलिनतरं अतिकृष्णवर्णं भविष्यति। नूनमत्र वितर्के। अत्रोपपादकमाह, अथान्यथेत्यर्थ:। अव्ययानामनेकार्थत्वात्। जनं तथा च सामान्योक्त्याऽनपराधम् अनुगतमनुशायिनम् असमशरज्वरदूनं कामज्वरेण पीडितं कथं वञ्चयसे ? तथा चानपराधस्य एवम्वञ्चनमनुचितम्। ततोऽप्यनुयायिन: ततोऽप्यन्येनैव पीडितस्यैत्येवं कुवतस्तव मनो बाह्यमिव मलिनमिति वाक्यार्थ:।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। अभेदमुक्त्वा पुनर्दोषमाह, बहिरिवेति। हे कृष्ण ! नूनं निश्चितं तव मनोऽपि चित्तमपि बहिरिवातिशयेन मलिनं भविष्यति। वपुष:[१]श्यामत्वादिति [२] भाव:। कथं त्वया ज्ञातमित्यत आह, कथमिति। अथान्यथा मादृशं जनमनुगतमनुसृतं[(३)] त्वदेकशरणं

तदभावे कथं[४] वञ्चयसे प्रतारयसि। कीदृशम्? असम[५]शरज्वरेण दूनं सन्तप्तम्; तस्मात्तदस्तीति भावः।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। बहिरिवेति। नूनमिति वितर्के। हे कृष्ण! तव मनोऽपि चित्तमपि बहिरिव मलिनतरं कृष्णं भविष्यतीति नूनं तर्कयामि। त्वया कथं ज्ञातमित्यत आह, (-अथेति।) अथ अन्यथा त्वमनुगतं [६]सेवक जनं मल्लक्षणं कथं वञ्चयसे प्रतारयसि। कीदृशं जनम्? असमशरः [७] कामस्तस्य ज्वरेण पीडया [८] दूनमुपतप्तम्। [९]अत्र मलिनकृष्णत्वे कौटिल्यमेवेति।।६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। बहिरिवेति। हे कृष्ण! तव मनोऽपि अन्तःकरणं बहिरिव बहिर्गताङ्गमिव बहिर्भागमिव मलिनतरं कपटरूपमालिन्यवत्त्वात् कृष्णं भविष्यति नूनम्। अथैवं न चेत् असमशरज्वरेण दूनं खिन्नं अनुरागानुसृतं जनं मद्रूपं कथं वञ्चयसे। अनुगतवञ्चकत्वात्तव मनोमालिन्यं युक्तमिति भावः। अत्र मनसो मलिनतरत्वं नूनमिति प्रयोगादुत्प्रेक्ष्यत इत्युत्प्रेक्षा बहिरिवेत्युपमानुप्राणिता। उपमेयप्रतिपादितकृष्णवर्णस्य असमत्वेऽपि नीरूपमनसि कापट्यरूपमालिन्यस्य कृष्णवर्णस्य च भेदे निमित्तं मलिनत्वस्य प्रकटनमुत्तरार्धेऽनुगतजनवञ्चनरूपो हेतुरिति ।।६।।

१.श्यामता-अ.ब.२.नास्ति-अ.ब.३.त्वदेकशरणे-इ.४.वञ्चयसि-इ.फ.ग.ह.ज.५.शरदूनं-ग.६.सेवकजनं-ड.७.कामबाण-क.८.दूनमनुतप्तम्-क.९.अत्र मलिनकृष्णत्वं-क.अत्र मलिनं कृष्णत्वं-ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६।। बहिरिवेति। हे कृष्ण! हे मलिनाशय! नूनं तव बहिरिव मनोऽपि मलिनतरम् अतिशयेन मलिनं भविष्यतीति अनुमामि (अनुमिनोमि?)। अत्रापि कृष्णेति साभिप्रायसम्बोधनम्। कथमथेत्यादि । अथेति प्रश्नान्तरे। ''अथोऽथ च संप्रश्ने संशक्तारम्भयोरपि। अनन्तरे च कार्त्स्न्ये च संशये च प्रकीर्तितः।।'' इति विश्वः। अथ अन्यथा यद्येवं न स्यात्तर्हि असमशरज्वरदूनं कामज्वरपीडितम् अनुगतं त्वदनुकूलम् अर्थादनन्यशरणजनं कथं वञ्चयसे? आत्मानमुद्दिश्योक्तिरियम्। ''ग्रुधिवञ्च्योः प्रलम्भने'' इत्यात्मनेपदम्। शुद्धात्मना नैष व्यवहार इत्यभिप्रायः। अनुमानोऽयमलङ्कारः। अनुमानं तदुक्तम्, ''यत्साध्यसाधनयोर्वचः'' इति **काव्यप्रकाशः**। अत्र कामपीडितानुगतजनवञ्चकत्वेन साधनेन मनसो मलिनतरत्वं साध्यमिति। ''कथं प्रश्ने संभ्रमे च प्रकारार्थे च संशयः'' इति **विश्वः**।।६।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।६ ।। सौरभलुब्धभ्रमरेण दष्टोऽयमधरो नान्याङ्गनाचुम्बनत इत्याह। हे श्रीकृष्ण! मलिनात्मकं तव मनोऽपि वहिरिव मलिनतरं भविष्यतीत नूनमुत्प्रेक्षे। कथं प्रश्ने। अव्ययानामनेकार्थत्वात् अथ शब्दोऽद्धन्यथावाची। कथमन्यथा कामशरज्वरपीड़ित-मनुगतमनुकूलं जनं वञ्चयसे? शुद्धान्त:करणस्य नेयं रीतिरित्यर्थ:।।६ ।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।६ ।। एवमन्यसङ्गचिह्नदोषैरुपालभ्य पुन: स्वभायदोषं समारोप्य भर्त्सयति। बहिरिति। हे कृष्ण! मलिनगात्र। इत्यसूयोक्ति:। तव मन: प्रणयभङ्गदु:खग्राहकतयातिकठिनं चित्तं, बहिरिव शरीरमिव नूनं तर्कयामि। मलिनतरमत्यन्तमलिनं भविष्यति। कथमेवं ज्ञातम्, अथान्यथा, अव्ययानामनेकार्थत्वात् अथ शब्द: अन्यथावाचक:। अनुगतमनुकूलं त्वदर्थं विपिनमभिसृतमित्यर्थ:। असमशरज्वरदूनं, दुरन्तमदनव्या-धिसन्तप्तं मल्लक्षणं जनं कथं वञ्चयसे, प्रतारयसि, निर्मलान्त:करणस्य ईदृशत्वाभावादिति भाव:।।६ ।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।६ ।। वहिरिवेति वपुरिव; श्रीकृष्ण! तव शरीरं म्लानं कृष्णवर्णयुक्तं तथैव मनोऽपि नूनं निश्चयं मलिनं भविष्यति इति अनुमिनोमि। किमर्थं मां वारम्बारं वञ्चयसे शठत्वमाचरसि? तव खलु अहमनुगत: जन: एवंभूतायै कन्दर्पशरपीडितायै तव दया नास्ति। त्वं निजजनमपि वञ्चनं करोसि?।।६ ।।

**७-भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम्।**
**प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम्।। हरिहरि० ।।७।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।७ ।। भवान् वनेषु भ्रमति अवलाकवलाय युवतिजनग्रासाय स्त्री वधायेति यावत्। अत्र किं विचित्रम्, न किमपीत्यर्थ:। अत्रोपपत्तिमाह वधूवध: तत्रेति निर्दयबालचरित्रं पूतनिकैव प्रथयतीत्यर्थ:। पुरा किल भवता शिशुना विषदिग्धस्तनदात्री पूतना नामासुरी हतेति पौराणिकी कथा।।७ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।७ ।। अपि च, भ्रमतीति। हे वधूवधे निर्दय! भवान्वनेषु अबलाकवलाय युवतीग्रसनाय भ्रमति। सर्वाणि वाक्यानि सावधारणान्येवेति। यथा पार्थो धनुर्धर:' इतिवत् । अत्र

मद्वधे किं विचित्रम्? ममाबलाया वधः सुकर एव पूतनिका अतियुद्धमदा कंसभगिन्येव तव बालचरित्रं प्रथयति। बालेन यदि तादृशी प्रबला कवलिता तर्ह्यस्या अबलायाः कवलने किमाश्चर्यम्? अत्र स्त्रीवधो निषिद्ध इति निन्दा। 'अथ कथमपि' इत्यादौ खण्डिता नायिका। तल्लक्षणम्, 'ज्ञातेऽन्यासङ्गविकृते कान्ते कोपकषायिता। गत्वान्यत्रागते कान्ते भोगचिह्नैः कषायिता'।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। भ्रमतीति अबलाकवलाय स्त्रीणां ग्रसनार्थं भवान्वनेषु अरण्येषु भ्रमति अत्र स्त्री पापे किं विचित्रं न किमपीत्यर्थः यतः पूतनिकैवराक्षसी गोपवधूवेशे स्त्रीवधार्यं निर्दयं दयारहितं तव बालचरित्रं बालचेष्टितं प्रथयति ख्यापयति यद्वा हे वधूवध निर्दय शिशुना त्वया या, राक्षसी हता तस्मिं स्त्वायि यूनि सम्प्रति कोमलाङ्गी नामास्माकं मारणोङ्केचित्रमितिभावः।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। चित्तमालिन्यमेवाह, भ्रमतीति। भवान्वनेषु विपिनेष्वबलाकवलाय कामिनीग्रसनाय भ्रमति। अत्रार्थे किं चित्रम्? न किमपीत्यर्थः। तत्र हेतुमाह, प्रथयति ख्यापयति। त्वयापि बाल्ये येन स्तनदानप्रवृत्ता राक्षसी हता तस्य संप्रति कोमलाङ्गीनां मादृशां मारणे किं वक्तव्यमिति भावः। खण्डिता नायिका। तदुक्तं **भरतेन,** 'निद्राकषायकलुषीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रिताङ्गः। यस्याः कुतोऽपि गृहमेति पतिः प्रभाते सा खण्डितेति कथिता कविभिः पुराणैः' इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। भ्रमतीति। हे कृष्ण! यतः कारणात् भवान् अवलानां मादृशां दुर्वलकान्तानां कवलाय ग्रासाय नाशायेति यावत्। अत्रावलापदेन स्त्रीग्रहणसमनन्तरकार्य्ययेत्यर्थः। एतच्च भवार्थे स्फुटी भवति। वनेषु भ्रमति अटति। अत्र भवद् योगात् प्रथमपुरुषः। किं विचित्रं, किमाश्चर्य्यं? कथं न चित्रमिति शङ्कायामाह प्रथयतीति, हे कृष्ण! तव वधूवधे कामिनीमारणे निर्दयवालचरित्रमपि न चेष्टितम्। पूतनिका नाम काचिद्राक्षसी प्रथयति प्रख्यापयति। प्रथयते घटादित्वादुपधाह्रस्वः। वाल्यकाल एव महावलशालीमानुषाशनीकामिनीवधपाण्डित्यं प्रसिद्धं किल यूनः सतः तवेदानीमवला-मारणप्रावीण्यं किमु वक्तव्यमितिभावः। अतो याहीत्यन्वयः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। पुनरुपालम्भनपूर्वकं भर्त्सयति। भवान् अवलाकवलाय नारीभक्षणाय वने भ्रमति। अत्रं किं विचित्रम् अपितु न किमपीति वाक्यार्थ:। अत्रोपपादकमाह, वधूवधनिर्दयबालचरित्रम्, अर्थात्तव। पूतनिकैव। स्वार्थे कन्। पूतनैवेत्यर्थ:। प्रथयति निवेदयति। कालसामान्ये लट्। यद्वा वधूवधनिर्दय इति सम्बोधनम्।ते बालचरित्रं बालकस्य नीलस्त्रीवधरूपवृत्तं पूतनिकैव प्रथयतीत्यर्थ:। तथा च राक्षसी पूतना बालकेन भवता बालचरित्रेणैव व्रजमध्ये घातिता। सम्प्रति यूना त्वया अबला बनेषु ग्रस्यत इति अत्र किं विचित्रमिति वाक्यार्थ:।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। पुनरपि क्रूरत्वेनोपालम्भमाह, भ्रमतीति। भवान् अबलाकवलाय युवतीनां ग्रसनार्थं अकवलाय सुखाय वा वनेषु भ्रमति। अत्र अस्मिन्नर्थे किं [१] विचित्रमाश्चर्यं न किमपीत्यर्थ:। तत्र हेतुमाह (पूतनिकैवेति।) पूतनिकैव पूतनैव वधूवधे दयारहितं बालचरितं बालचेष्टितं प्रथयति [२]ख्यापयति। न केवलं पूतनैवाऽन्या खण्डिताऽपि [३] वा। तल्लक्षणम्-

निद्राकषायकलुषीकृत[४]ताम्रनेत्रो<br>
नारीनखव्रणविशेषविचित्रिताङ्ग:।<br>
यस्या: कुतोऽपि गृहमेति पति: प्रभाते<br>
सा खण्डितेति कथिता कविभि: पुराणै:। इति **भरते।**

बालेन त्वया कठिना हता तरुणेन कोमलाङ्गी [५] ग्रासे किं चित्रमिति भाव:।।८।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। भ्रमतीति। अबलाकबलाय स्त्रीणां ग्रसनार्थं भवान् वनेषु [६] अरण्येषु भ्रमति। अत्र स्त्रीग्रासे किं चित्रं किमाश्चर्यं यत् पूतनिकैव राक्षस्येव तव [७] वधूवधे निर्दयं दयारहितं [८] बालचेष्टितं प्रथयति ख्यापयति। हे वधूवधनिर्दयेति सम्बोधनं वा। शिशुना त्वया राक्षसी हता तस्मिन् त्वयि यूति सम्प्रति कोमलाङ्गीनामस्माकं ग्रासे [९] न नैव चित्रमिति भाव:। अथो अथ च सम्प्रश्ने मङ्गलारम्भयोरपि इति विश्व: (१५०.२७)। मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभि:। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश: इति (**काव्यादर्श:**-११।२३४) ।।८।।

१.चित्रमाश्चर्यं-इ.फ.ग.ह.ज. २.नास्ति-ग. ३.च-इ.फ.ग.ह.ज. ४.तीव्रनेत्रो-ग. ५.ग्रसने-ग. ६.नास्ति-क. ७.वधूवधेऽतिनिर्दयं-ड. ८.नास्ति-क. ९.तत्र किं चित्रमिति भाव:-क. तव विचित्रमिति भाव:-ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। भ्रमतीति। वनेषु कुञ्जवत्सु भवान् त्वं अबलानां स्त्रीणां कबलाय ग्रासाय नाशायेति यावत्; भ्रमति। युष्मच्छब्दप्रयोगा (भावा) त् मध्यमपुरुषप्रयोग:। अत्र अस्मिन्नर्थे स्त्रीसंहारकत्वे किं चित्रं किमाश्चर्यम्? पूतनिका कंसग्रहयुक्ता पूतनानाम राक्षसी। सैव वधूवधेन स्त्रीहननेन निर्दयं करुणारहितं बालचरित्रं अव्यक्तबुद्धिचरित्रं कर्म प्रथयति प्रकटयति। स्त्रीणां हनने यौवनसमये किं वक्तव्यमिति भाव:। अत्र अबलेत्यत्र बलाभावाभिप्रायकम्। बाल्ये तादृश्या: राक्षस्या: हन्तु: यौवने किं निर्बला (हन) नेन प्रयास: इति व्यज्यते। यौवने त्वां पश्यति सा त्वत्सङ्गमनाद्विना रमणं प्राप्नोतीति न तवैकनियतत्वमिति भाव:।।७।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। भ्रमतीति। भवान् अबलाकवलाय युवतीजनग्रासाय स्त्रीवधायेति यावत् वनेषु भ्रमति। अत्र किं चित्रम्? किमाश्चर्यम्? न किमपीत्यर्थ:। अत एव वधूवध: स्त्रीवधस्तत्र निर्दयं बालचरित्रं तवेति शेष:। पूतनिकैव प्रथयति ख्यापयति। पुरा किल भगवता शिशुना विषाक्तस्तन्यदात्री पूतनानामासुरी स्तन्यपानव्याजेन कवलितेत्यस्ति पुराणम्। ततस्तव बाल्यादारभ्य स्त्रीवधोद्धुरस्य सम्प्रति स्त्रीकवलेन किमाश्चर्यम्? अत्र निर्दयबालचरित्रमिति निर्दयत्वस्य विधेयत्वेन वक्तुमुचितत्वात् तदनुक्तौ विधेयाविमर्शदोषोऽपि प्रसज्जते। तत्रैवं समाधेयम्। वधूवधे निर्दयं बालचरित्रं यस्य। एवंविधं भवन्तं पूतनिकैव प्रथयतीति भवन्तम् इत्यध्याहार्य व्याख्येयम्।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। न वञ्चयाम्यहं त्वमेव मृषा शङ्कसे इत्याह। भवान् अवलाग्रासाय कान्तावधाय वनेषु भ्रमति, अत्र किं न विचित्रं किमपीत्यर्थ:। अत्रोदाहरणमाह स्त्रीवधे तव निर्दयवालचरित्रं पूतनिकैव कियत् प्रथयति विस्तारयति न तु सर्वम्, बाल्ये चेदेवं तदधुना कैशोरे किं चित्रमिति भाव:।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। नाहं वञ्चयामि, मुधैवमाशंकसे, इति उत्तरमाशंक्य सक्रोधमाह; भ्रमतीति। कैशोरमदातिदृप्तो भवान्, अवलाकवलाय मादृशमुग्धाङ्गनाग्रासाय इति स्त्रीजात्यनुकरणोक्ति:। मारणायेत्यर्थ:। वनेषु नि:शंकत्वात् व्यापारयोग्यविपिनस्थलेषु भ्रमति, पर्यटति। अत्र किं विचित्रमाश्चर्यम्। न किमपीत्यर्थ:। अत्रोदाहरणमाह तव वधूवधबालचरित्रं, स्त्रीमारणविषये दयारहितबाल्याचरणं, स्तन्येन प्राणचोषणरूप-

चेष्टाविशेषं पूतनिकैव, पूतनेव प्रथयति, कियन्मात्रं प्रकाशयति। न तु सर्वम्। तस्याः किशोरावस्थाचरितानभिज्ञत्वात्। बाल्यावस्थायामपि प्रबलाया एवं चेत् किमुत कैशोरावस्थायामबलानामिति भावः।।७।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।७।। भ्रमतीति; तव निर्दय चरित्रमहं जानामि। यतो हि अस्मिन् वने अवलाकवलाय वन्यभूमौ अवला स्त्रीहननाय भ्रमणं कुरुसे किमत्र चित्रम्? यतो हि बालकालतः प्रभृति पूतनिकेव पूतनिका एव वधूवधः स्त्रीहत्याजन्यनिर्दयं बालचरितं प्रसिद्धमेव। खण्डितानायिका तद् यथा **भरते**;

निद्राकषायकलुषीकृत[४]ताम्रनेत्रो
नारीनखव्रणविशेषविचित्रिताङ्गः।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते
सा खण्डितेति कथिता कविभिः पुराणैः। दृष्टान्तालंकारः।।७।।

**८-श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम्।**
**श्रृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम्।। हरिहरि० ।।८।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।८।। हे विवुधा! धीराः! श्रीजयदेवभणितरतिवञ्चित खण्डितयुवतिविलापं श्रृणुतेति वाक्यार्थः। रतिवञ्चिता चासौ खण्डितयुवतिश्चेति कर्मधारयः। कीदृशं, सुधा मधुरम् अतएव विवुधालयतोऽपि स्वर्गेऽपि दुरवापं सप्तम्यर्थे तसिः। खण्डितयुवतिलक्षणं, ननु रतिवञ्चितैव च खण्डिता इत्युच्यते। तत्कथमत्र रतिवञ्चितेति खण्डितयुवते र्विशेषणं प्रतीयते, उच्यते वञ्चितमिति नपुंसके भावे क्तः श्री जयदेव भणितं रतिवञ्चितं श्रृङ्गारवञ्चितं यस्या इति बिग्रहः।।८।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।८।। अपि च, श्रीजयदेवेति। हे विबुधाः! श्रीजयदेवेन भणितमभिलाषवञ्चित-खण्डितयुवतिविलापं शृणुत। किंभूतम्? सुधामधुरम्। पुनः किंभूतम्? स्वर्गेऽपि दुरापम्। सप्तम्यर्थे तसिः।। खण्डितालक्षणं यथा, 'निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रिताङ्गः। यस्याः कुतोऽपि पतिरेति गृहं प्रभाते सा खण्डितेति कथित्ता कविभिः पुराणैः।।' तथा च **संगीतराजे**, 'तालो वर्णयतिर्मेघरागो देवादिवर्णनम्। विप्रलम्भाख्यशृङ्गारो रसः करुणवेदनम्। कविनामाङ्कितपदप्रान्ते पाटस्वरावलिः। द्वित्राण्यथ पदानि स्युरिति लक्ष्मीपतेः पुरः। रत्नावलीप्रबन्धोऽयं निबद्धः कुम्भभूभुजा।।'

इति लक्ष्मीपतिरत्नावलीनामा सप्तदशः प्रबन्धः। पदरचना जयदेवोदिता कमलावल्लभ-गानोचिता। कुम्भनृपेण परं योजिता धातुवरेण भणत रसरताः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।। श्रीजयदेवेति हे विबुधाः पण्डिताः श्रीयुक्तो जयदेवेन भणित उक्त श्चासौ, रतिवञ्चित खण्डित युवति विलाप शुणुत आकर्णयत कीदृशं विलापं सुधातोपि मधुरं मनोहरं तत्र हेतुमाह विबुधालयतोपिस्वर्गादपि दुरापं दुर्ल्लभं तदुक्तं तव कथामृतमिति **श्रीभागवते** ।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।।श्रीजयदेवेति। हे विवुधाः पण्डिताः! इमं जयदेवेन कविना वर्णितं रतौ वञ्चितायाः प्रतारितायाः खण्डितायाः प्रातरागतान्यनायिकानखाङ्कचिह्नितप्रियाया विलापं परिदेवनं शृणुताकर्णयत। कीदृशम्? सुधातोऽपि मधुरम्। तत्र हेतुमाह, विबुधेति। विवुधाल-यतोऽपि देवालयेऽपि दुरापं दुष्प्रापमित्यर्थः। सुधा स्वर्गेऽपि सुलभा, कृष्णकथांमृतपानं तु तत्रापि दुर्लभमिति सुधापेक्षयाधिकमाधुर्यमिति भावः। 'विभुधः पण्डिते देवे' इति **विश्वः**। सुरालयतोऽपीत्यत्र सप्तम्यर्थे तसिः। सार्वविभक्तिकस्तसिरिति नियमात्।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। हे बिवुधाः! सुधामधुरममृतमधुरं श्रीजयदेवेन भणितः गदितः यो रतिवञ्चितायाः सुरतप्रतारितायाः खण्डितयुवत्या खण्डिता नायिकायाः विलापः विलापवर्ण्णनात्मकप्रबन्धः तं श्रृणुत आकर्णयत न केवलं श्रवणमात्रम् अपि तु सुदुरापं पापकृतामत्यन्तदुष्पापम्। आप्नोते "रीषदुः स्वत्यादिना" (३।३।१२६) खलच् प्रत्ययः। सुखं सुखहेतुभूतं मम प्रवन्धं वदतोऽपि पठतश्चेत् वदतेर्लोटस्थे स्तेत्यादिनापदेशः। परमानन्द प्रेप्तुभिरेतत्प्रबन्धश्रवणपठनमबश्यं कर्त्तब्यमिति भावः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। निजकीर्त्तेरनुवर्त्तनार्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमाहात्म्यं दर्शयति। श्रीयुक्तो जयदेवः श्रीजयदेवः। विबुधाः पण्डिताः। श्रीजयदेवभणितश्चासौ रतिवञ्जितखण्डितयुवतिविलापश्चेति स तथा तं श्रृणु। किम्भुतम्? सुधामधुरं सुधाया अपि मधुरं स्पृहणीयमित्यर्थः। पुनः किम्भुतम्? विबुधालयतोऽपि स्वर्गेऽपि दुरापम्। विबुधालयत इति आद्यादिभ्यः सप्त यां तसिः। अत्र धृष्टनायकः प्रातरापद्य सुरतेन निजवधूं तोषयत्यत्र तदपि नास्तीत्यत्र रातिवञ्चितपदेन दर्शितम्। 'विबुधः पण्डिते देवे' इति **विश्वः**।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। गीतार्थं दुर्लभत्वेन कथयति,[२] श्रीजयदेवेति। हे विबुधा:[३] श्रीकृष्णक्रीडारस-विभावनाचतुरा: हे विबुधा: पण्डिता [४] वा। इदं जयदेवभणितं कथितं रत्या सुरतेन [५] वञ्चिता या खण्डितामात्मानं मन्यमाना [६] युवति: श्रीराधा तस्या विलापं प्रातरागमननखक्षतशिथिलावलोकनस्वरभङ्गादिपरिदेवनं शृणुत। कीदृशम्? लयतो मोक्षादपि [७] ब्रह्मानन्दादपि दुरापं [८] दुष्प्रापम्। नेदं सुखं तत्रास्तीति भाव:। पुन: कीदृशम्? सुधामधुरं अमृतादपि [९] मधुरतरं गरिष्ठं वेत्यर्थ:।।८।।

[१०]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां सप्तदश: प्रबन्ध:।

१.नास्ति-अ.ब. २.नास्ति-अ.ब.श्री इति-इ.फ.ह.ज. ३.श्रीराधाकृष्ण-ग. ४.नास्ति-इ.फ.ग. ह.ज. ५.बृंहिता-इ. ६.नास्ति-अ.ब. ७.नास्ति-अ.ब. ८.नास्ति-अ.ब. ९.मिष्टं गरिष्ठं वा-इ.फ.ग.ह. ज. १०.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.

[१]तवेदं पश्यन्त्या: प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुण[२]च्छायमधुरम्।
ममाद्य [३] प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोक: शोकादपि किमपि लज्जां जनयति ।।१ ।। (भिन्नपाठ:)

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।।श्रीजयदेवेति। हे विबुधा: पण्डिता: भक्ता इत्यर्थ:। [४]इदं जयदेवभणितं गीतं जयदेवमुखादुदितं शृणुत। कीदृशं गीतम्? विबुधालयतोऽपि दुरापं विबुधानां आलय: समाज: तस्य दुरापम्। सकलविबुधानां आलय: समाज: तस्य दुरापम्। सकलविबुधानां पण्डितश्रेष्ठानामपि दुरापं दुर्बोधमित्यर्थ:। कस्मात् दुर्बोधम्? विषमपदसमूहबाहुल्यात्; अर्शाद्यजादिभिरुपलक्षितत्वात्[५] ।।८।।

[६]श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सप्तदश: प्रबन्ध:।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।।श्रीजयदेवेति। हे विबुधा: पण्डिता: यूयं मधुरं माधुर्यगुणयुक्तं श्रीजयदेवेन भणितं वर्णितं रतिवञ्चिता अप्राप्तसुरता खण्डिता च या युवति: तस्या: विलाप: प्रलाप: तम्। रतिवञ्चितेति विशेषणं खण्डितालक्षणज्ञापनार्थम्। विबुधानां देवानां आलयतोऽपि स्वर्गतोऽपि दुरापं प्राप्तुमशक्यत्वात् स्वर्लोकेऽपि दुर्लभमित्यर्थ:। एतादृशं शृणुत आकर्णयध्वम्

[७]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सप्तदश: प्रबन्ध:।।८।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयदेवेति। हे धीरा:!श्रीजयदेवभणितं रतौ वञ्चिताया: खण्डितयुवतेर्विलापं शृणुत समाकर्णयत। कीदृशम्? सुधामधुरमिति ।अमृतान्मधुरं स्वादुयुक्तम्। अत एव विबुधालयतोऽपि स्वर्गेऽपि दुरवापं दु:खेन लभ्यम्। सप्तम्यर्थे तसि:। सुखमिति क्रियाविशेषणम्। ननु रतिवञ्चितैव खण्डितेत्युच्यते; तत् कथमत्र रतिवञ्चितेति खण्डितयुवतेर्विशेषणं प्रतीयते? उच्यते। वञ्चितमिति नपुंसके भावे क्त:।श्रीजयदेवेन भणितं रतिवञ्चितं रतौ रत्या वा वञ्चितं वचनं यस्या:। सा चासौ खण्डितयुवतिश्चेति तस्या: विलापमिति न कश्चिद् दोष:।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। हे विवुधा:! श्रीकृष्णमधुरलीलास्वादचतुरा: !श्रीजयदेवभणितं रति वञ्चितया: खण्डिताया युवत्या: श्रीराधाया विलापं यत्र तत् शृणुततु । यत: सुधाया अपि मधुरं अतएव विवुधालयतोऽद्धपि स्वर्गादपि दुर्लभं, सप्तम्यान्तासि:। राधाकृष्णोपासनालभ्यत्वात् तत्रेदं नास्तीति भाव:।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। गीतमुपसंहरति।श्रीरिति। हे विबुधा:! भक्तिरसभावननिपुणा:।श्रीजयदेवेन भणितं रतिवञ्चिताया: खण्डितयुवत्या: खण्डितावस्थामवाप्ताया: राधिकाया: विलापं, कोपसंवलितसोक्लुण्ठसाकूतादिवचनसहितं परिदेवनं शृणुत। वदताऽपि कीदृशम्, सुधातोऽपि मधुरम्, अतो दुरवापम्, सर्वं दुर्लभम्, सुखं सुखरूपं शृणुत। 'सुधामधुरं' विबुधालयतोऽपि सुखं दुरवापमि'ति क्वचित् पाठ:। तदालयतोऽपि मोक्षादपि सुखम्, मोक्षे अपीदृशं सुखं नास्तीत्यर्थ:।अतो दुरवापं, दुष्प्रापमित्यर्थ:।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति;श्रीजयदेवो यथा खण्डितानायिका श्रीराधा तस्या: विलापं योजयति। तत: सुधामधुरगानं तव दुरापं दु:खं पापञ्च स्वर्गादपि परिष्करोतु। खण्डितानायिकालक्षणं भरतादिभि: प्रपञ्चितम्। **संगीतराजे** तालो वर्णयति मेघरागो देवादिवर्णनम्। विप्रलम्भाख्य: शृङ्गार:। करुणवेदनम्। प्रबन्धस्य नाम रत्नावलीति कुम्भ: अत्र पाटस्वरावलीति कुम्भकर्ण्ण:। विश्वनाथस्तु खण्डितालक्षणे -

पार्श्वमेति प्रियो यस्या अन्यसंयोगचिह्नित:।
सा खण्डितेति कथिता धीरैरिर्ष्याकषायिता।।३/७५।। (सा.द)।।८।।

**४९-तवेदं पश्यन्त्या: प्रसरदनुरागं बहिरिव**
**प्रियापादालक्तच्छुरितमरुणच्छायहृदयन्।**
**ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव**
**त्वदालोक: शोकादपि किमपि लज्जां जनयति।।४९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४९।। गीतार्थं संक्षिप्याह। तवेदमिति। हे कितव! त्वदालोकोऽद्य ममाशोकादपि त्वद् वियोगदु:खादपि किमपि लज्जां जनयतीति वाक्यार्थ:।

किमपीत्येतावती सेति वक्तुं न शक्यत इत्यर्थ:। कुतो लज्जां जनयतीत्याह। प्रख्यातेत्यादि: ''प्रणय: प्रसरे प्रेम्णि याच्ञा विश्रम्भयोरपीति **विश्व:**। मम कीदृश्या: तवेद मरुणच्छायहृदयं पश्यन्त्या: अरुणच्छायं च तत् हृदयं चेति कर्मधारय:। ''छाया सूर्य्यप्रियाकान्ति: प्रतिविम्बमनातप'' **इत्यमर:**। अरुणत्वे हृदयस्य हेतुमाह। प्रियापादालक्तच्छुरितमित्युत्प्रेक्षते। प्रसरदनुरागं वहिरिवेति तां प्रत्यानुराग: प्राचुर्य्यात्तवास्त: स्थितिमविन्दन् हृदयं भित्त्वा निर्गत इवेत्यर्थ:

इति श्रीकविराजश्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां खण्डितावर्ण्णने विलक्षलक्ष्मीपतिर्नामाष्टमसर्गविवरम्।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४९।। इदानीं खण्डितापि प्रौढत्वमालम्ब्य तमधिक्षिपति, तवेदमिति। हे कितव! त्वदालोकोऽद्य मम शोकादपि किमपि अधिकतरां लज्जां जनयति। त्वद्दर्शनेन शोकं पराकृत्य लज्जैवाधिकाभूत्। तत्र पूर्वं शोके कारणमाहप्रख्यातस्य जगद्विदितस्य स्नेहातिशयस्य भङ्गेन। ततो लज्जां प्रति हेतुगर्भं विशेषणमाह, किंभूताया मम? तवेदं हृदयं पश्यन्त्या:। किंभूतं हृदयम्? प्रियाया: यावककर्बुरितम्। अत एवारुणद्योति अरुणस्य द्योत इव द्योतो विद्यते यस्य तत्तथा। अरुण वत्सन्ध्यारागवद्द्योतनशीलं वा। उत्प्रेक्षते, बहि: प्रसरदनुरागमिव बहि: प्रसरन्नलक्तकव्याजेन तदनुरागो यस्मिन्। बहुमानपुर:सरमुपभोगयोग्यस्य कौस्तुभस्य प्रेष्यापादाहतिर्लज्जाधिक्ये हेतु:। तव प्रेष्योपभोगे लज्जापि नास्तीति व्यङ्ग्यम्। अत्र शिखरिणीवृत्तम्।।४९।।

### (३) जगद्धरकृत- सारदीपिका

।।४९।। तवेदमिति हे कितववञ्चक त्वदालोक स्तव दर्शनं प्रख्यातस्य लोकप्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भङ्गेन नाशेन य: शोकस्तस्मादपि मम अद्य किं अनिर्वचनीयां लज्जां जनयति कीदृश्यां मम तवेदं हृदयं पश्यन्त्या: कीदृशं हृदयं प्रियाया:

पादालक्तकेन चरणसम्बन्धियावकेन छुरितं व्याप्तं अतएव अरुणारक्ताछायादीप्तिर्यस्य तादृशं अरुणद्योतीति पाठे अरुण: सन्ध्यारागस्तद्वद्योति: शीलमस्येति तादृशं हृदयं समीक्ष्य कृते बहि: प्रसरदनुरागमिव बाह्यप्रसरन् अनुरागो यस्य रागो हि अरुणोवर्ण्यते ।।४९।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकयां सारदीपिकायां विलक्षलक्ष्मीपति नाम अष्टम: सर्ग:।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४९।। तवेदमिति। हे कितव धूर्त ! त्वदालोकस्तव दर्शनम्। प्रख्यात: प्रसिद्धो य: प्रणयभरोऽनुरागातिशयस्तस्य भङ्गेन नाशेन हेतुना शोकादिदु:खादपि किमप्यनिर्वचनीयां लज्जां जनयति। कीदृश्या मे? तवेदं प्रत्यक्षं हृदयं पश्यन्त्या:। कीदृशम्? प्रियापादालक्तकै: प्रियायाश्चरणसंबन्धियावकैर्व्याप्तम्। अत एवारुणच्छायमरुणा छाया दीप्तिर्यस्य तादृशम्। किमिव? बहि: प्रसरदनुरागमिव हृदयं परिपूर्णाधिक्याद्बहि: नि:सरत्। प्रेम्णैव या राधा पूर्वं सौभाग्यगर्वेण न कांचन गणयति स्म सा इदानीं समक्षमन्यनायिकाचरणालक्तकं हृदयं पश्यन्ती जीवत्येवेति विपक्षयुवतीपरिहासशङ्कया शोकादपि मेऽधिकलज्जा भवतीति भाव:। 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितो:। पालनोत्कोचयो: कान्तिसच्छोभापङ्क्तिषु स्मृता।।' इति **विश्वप्रकाश**:।।४९।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४९।। इतोऽपि त्वया न स्थेयमित्याह। तवेति। हे कितव। हे धूर्त्त। प्रियाया: यद्व्यतिरिक्तताया: वल्लभाया: पादोलक्तेन पादनिहितलाक्षारसेन च्छुरितं रुषितं व्याप्तमिति यावत्तत्रापि लाक्षारससम्वन्ध: पूर्ववदवगन्तव्य:।अतएव बहि: हृदयवाह्यदेशे प्रसरन्निर्गच्छन्ननुराग: अन्यकान्ताप्ते विशेषो यस्य तादृशमिदं परिदृश्यमानं तवारुणच्छायहृदयं शोणवर्ण्णम् उर: स्थलं कर्म। पश्यन्त्या: वीक्ष्यमाणाया: मम प्रख्यात: प्रसिद्ध: प्रणयभर: आवयो: पुरातनस्नेहाधिकां तस्य भङ्गेनापायेन हेतुना त्वदालोक: त्वदालोकनं शोकादपि वियोग दु:खादपि किमपि अनिर्वाच्यभूतां मम खण्डिताया: लज्जां जनयत्युत्पादयति। लोके हि पूर्वं येना साधारणसम्मान: कृत: पश्चात्तत्कृत्य वमानस्यातिलज्जा करत्वादिति भाव: अतश्च शोकाधिकलज्जाकरमन्या: सम्भोगचिह्नितभवदवलोकनं यथा न स्यात्तथ कर्त्तव्यमिति तात्पर्य्यम्।।४९।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४९।। न केवलमेवम्विधभवद्दर्शनेन दु:खमपितु लज्जापि भवतीति दर्शयति। हे कितव धूर्त। अद्य त्वदालोक: त्वत्सन्दर्शनम्, कर्तृ। प्रख्यातस्य प्रसिद्धस्य प्रणयभरस्य प्रमातिशयस्य भङ्गेन विनाशेन शोकादपि दु:खादपि। किमप्यनिवर्चनीयां लज्जां जनयति उत्पादयति। मम कथम्भूताया: ? तव इदम् अरुणच्छायहृदयं लोहितकान्तिवक्ष: पश्यन्त्या:। उक्तञ्च 'छाया सूर्यप्रिया कान्ति: प्रतिविम्बमनातप'इति। किम्भूतम् ? प्रियापादालक्तछुरितं सुरते क्रौञ्चबन्धे कान्ताचरणयावकरससम्बन्धमित्यर्थ:। अतएव वहिर्वाह्ये प्रसरदनुरागमिव। अन्यदपि यद्रसादिपूर्णं भवति ततस्तद्वहि:प्रसरतीत्युचितमेव। उत्प्रेक्षालङ्कार:। तथा चैतादृशो भवान् यच्चरितेनान्यस्यापि लज्जा भवतीति भर्त्सनं कृतमित्यवधेयम्। 'लोहितेऽप्यरुणे मत' इति **विश्व**:। 'प्रणयप्रेम्नि: विश्वास'इति च। 'आलोकौ दर्शनद्योतावि'**इत्यमर**:। अत्रारुणच्छायमित्यत्र वाच्यस्यारुणस्य गुणीभूतत्वादविमृष्टविधेयांशकतया दूषणमाहु:। तदनुरोधात् स्फुरितमिति भावे क्त:, छुरणमित्यर्थ:। तथा चेदं तव प्रियापादालक्तच्छुरणां पशन्त्या इत्यन्वय:। कीदृशम् ? अरुणच्छायं हृदयं यस्या: तत्तथा। वहि: प्रसरश्चासौ अनुरागश्चेति तत्तथा तमिव, तथा च प्रसरणशीलमूर्त्तानुरागमिवेत्यर्थे इति व्याचक्षते।।४९।।

*अत्र 'स्फुरितम्' इत्यस्य स्थाने 'छुरितम्' इति तथा 'छाय' इति स्थाने 'द्योति' इति पाठान्तरे स्त:।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४९।। गीतार्थं श्लोकेन संगृह्याह, तवेदमिति। हे [८] कितव धूर्त त्वदालोकस्तव दर्शनं प्रख्यात: [९]प्रसिद्ध: ममापि प्रणयभरस्य प्रेमातिशयस्य भङ्गेन नाशेन शोकादप्यद्य किमपि अनिर्वचनीयां लज्जां जनयति। कीदृश्या मम ? तवेदमीदृशं हृदयं [१]मनश्चापि अधरमपि च प्रियाया: वल्लभाया: पादालक्तेन यावकेन छुरितं मिश्रितं पश्यन्त्या: ; अत एवारुणच्छायं अरुणा [२] रक्ता छाया दीप्तिर्यस्य तादृशम्:;उत्प्रेक्षते बहिर्बाह्ये [३] प्रसरन्निर्गच्छदनुरागमिव। रागोऽप्यरूपो वर्ण्यते।।४९।।

१.तदेवं-अ.ब.ग.२.द्योतिहृदयम्-नि.सा.ड.च्छायि हृदयम्-इ.३.प्रारब्धात्-इ.४.त:५.पर्यन्तं नास्ति-ड.ल.म.६.पुष्पिकेयं नास्ति-ड.क.ल.म.७.नास्ति पुष्पिकेयम्-इ.८.हे दूर्त कितव-अ.ब.९.यस्तव-इ.फ.ह.ज.यतस्तव-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४९।। तवेति। हे कितव वञ्चक त्वदालोक: प्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य प्रेमातिशयस्य भङ्गेन नाशेन य: शोकस्तस्मादपि ममाद्य किमपि अनिर्वचनीयां लज्जां

जनयति। कीदृश्या मम ? तवेदं हृदयं [४]वक्ष: स्थलं पश्यन्त्या:। कीदृशं हृदयम् ? प्रियाया: नायिकाया: पादालक्तेन चरणयावकेन छुरितं [५] व्याप्तम्। अत एवारुणवत् सन्ध्यारागवत् द्योतितुं शीलं यस्येति। अरुणच्छायमिति पाठे अरुणाऽऽरक्ता छाया द्युतिर्यस्य तादृशं हृदयमिति समास:। उत्पेक्ष्यते-बहि: प्रसरदनुरागमिव बाह्ये प्रसरन्ननुरागो यस्य। रागो हि अरुणो वर्ण्यते।।४९।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४९।। तदेवमिति। हे कितव वञ्चकवचन प्रियाया: मदितराया: पादालक्तेन यावकरसेन छुरितं आलिप्तं अत एव अरुणच्छायि आरुण्ययुक्तं प्रस्तुतत्वात् तव हृदयं वक्ष: बहि: प्रसरन् प्राप्नुवन् अनुराग: यस्मिन् तदिव तदेतदिति हस्तनिर्देश:। एवमिति पाठेऽपि स एवार्थ: प्रत्यक्षगमक:। पश्यन्त्या: अवलोकयन्त्या: मम अद्य अधुना प्रारब्धात् फलोन्मुखदुरदृष्टात् प्रणयभर: स्नेहातिशय: तस्य भङ्गेन मां विहाय अन्यत्र गमनरूपेण त्वदालोक: तवालोकनं आलोक्यते वीक्ष्यत इति आलोको वीक्षणं शोकादपि सन्तापादपि मनसि मे मम चित्ते लज्जाधिक्यं जनयति। मम सन्तापस्तु महान् जात एव तदपेक्षया अधिकलज्जा भवतीत्यनेन त्वमेव निर्लज्जोऽसि एतादृशनिर्लज्जसङ्गमात् ममैव लज्जा भवतीति भाव:।।१।। [६]इति श्रीगीतगोविन्द-व्याख्यायां विलक्षणलक्ष्मीपतिर्नामाष्टम: सर्ग:।।४९।।

१.मन अधरं च-इ.फ.ह.ज.मनश्चाधर च-ग.२.नास्ति-अ.ब.३.प्रसरद्गच्छ-दनुरागमिव-अ.ब.४.नास्ति-क.५.चिह्नितम्-क.६.इति गीतगोविन्दे खण्डितावर्णने लक्ष्मीपतिर्नामाष्टम: सर्ग:-इ.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४९।। तदेवमिति। हे कितव ! अद्य मम त्वदालोक: प्रख्यातस्य सर्वतो विदितस्य प्रणयभरस्य स्नेहातिशयस्य भङ्गेन विनाशकरणेन हेतुना य: शोको दु:खं तस्मादपि किमपि लज्जां जनयतीति वाक्यार्थ:। किमपीत्येतावती सेति वक्तुं न शक्यत इत्यर्थ:। कुतो लज्जां जनयतीति हेतुविशेषणमाह। मम कीदृश्या: ? अरुणच्छायेति। तदेवमरुणच्छायहृदयं पश्यन्त्या:। अरुणच्छायञ्च तत् हृदयं वक्षश्चेति कर्मधारय:। ''छाया सूर्यप्रिया कान्ति: प्रतिबिम्बमनातप:'' **इत्यमर**:। ''हृदयं चित्तवक्षसो:'' इति **धरणि**:। अरुणत्वे हृदयस्य हेतुमाह, प्रियापादालक्तच्छुरितमिति। उत्प्रेक्षते। बहि: प्रसरदनुरागमिव तां प्रत्यनुराग: तवान्त:स्थितिमविन्दन् हृदयं भित्वा निर्गत इवेत्यर्थ:। अद्य ममैव प्रणयभरभङ्गेन यद् दु:खं तस्मादप्यतितरां दु:खमुत्पादयीति समुदितार्थ:। अरुणच्छायहृदयमिति कर्मधारयसमासे अरुणच्छायपदस्य समासे गुणीभूतत्वाद-

विमृष्टदोषो जागरूक:। तन्निवारणार्थम् अरुणच्छायिहृदयमिति केचित् पाठं कल्पयन्ति। तस्यायमर्थ:अरुणा चासौ छाया चेति अरुणच्छाया सा विद्यते तस्येतीन्। हृदयविशेषणमिति। तथा च एतत्पाठेऽपि न कर्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेदर्थ: प्रतिपत्तिकर इति वाक्येन बहुव्रीहेरर्थबोधकत्वे कर्मधारयोत्तरस्मिन् प्रत्ययस्यायुक्तत्वात् पाठकल्पनमिति अन्याय्यम्। पादालक्तच्छुरितारुणच्छायापादयो: पुनरुक्ततादोषोऽपि विद्यमान:। तस्मादेतद्दोषनिवारणार्थं व्याचक्ष्महे। **काव्यप्रकाशे**, ''कालो व्यक्तिस्वरादय:। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव:।।'' इति। तदेतदिति द्विपदाद्धस्तसंज्ञादेर्ग्रहणादिदमिति हस्तसंज्ञया पुरोवर्तिकृष्णस्य वपुर्बोधयति। तथा तव इदं वपु: पश्यन्त्या इति योजना। दृश्यन्ते चैवंविधा: महाकविप्रयोगा:। ''इति(त:) स दैत्य: प्राप्तश्रीर्नेत एवार्हति क्षयम्'' इत्यगृहीतनाम्न: कालिदासस्य प्रयोग:। तद्वदत्रापि। वपु: किंविधम्? अरुणच्छायहृदयमिति। अरुणच्छाया यस्य एवंविधं हृदयं यत्र वपुषि तत्। अत्र कर्मधारयसमासाभावाद विमृष्टदोषाभाव:। यतो वपु: पादालक्तकच्छुरितम्। अत एवारुणकान्तीति कारणकार्यत्वरूपेण पुनरुक्ततादोषो नास्तीति। प्रख्यातप्रणय-भङ्गेनेत्यत्राविमृष्टदोषनिवारणार्थं भिन्नं व्याख्येयम्। हे प्रणयभरभङ्गेन प्रख्यात! हे कितव! इति सम्बोधनद्वयम्। प्रणयभरभङ्गस्य व्यक्तत्वं त्वयि वर्तत इति युक्तं सम्बोधनम्। अथवा हे प्रख्यातप्रणयभङ्ग! हे इन! कितव! इति। इनश्चासौ कितवश्चेति। प्रभुर्भूत्वा कितवोऽसीति भाव:। ''इन: सूर्ये प्रभौ'' **इत्यमर**:। त्वदालोको मत्कर्तृक आलोको मम लज्जां जनयतीति तव दर्शनेन तावन्मम शोक एव। तस्मादधिकतरत्वेन मम लज्जां जनयतीति यदेवंभूतमनसा पश्यसि तेन ममैव लज्जा भवतु। त्वं तु निर्ल्लज एवेत्यभिप्राय:। एतेन सर्वदूषणं परिहृतम्।।४९।।

इति श्रीगीतगोविन्दटीकायाम् अष्टमसर्गविवरणम्।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४९।। तथैव पुनराह तवेति। हे कितव! त्वादालोकोऽपि त्वादागमनप्रतीक्षिण्या: मम प्रसिऽप्रेमातिशयभङ्गेन त्वद्वियोग दु:खादप्यनिर्वचनीयां जीवनमरणयो: सन्देहापादिकां लज्जां जनयति। कुतो लज्जाजननम्? तदेवमरुणद्युति हृदयं पश्यन्त्या: ततोऽपि कुत: प्रियायास्तस्या: पादालक्तेन व्याप्तम्। तत्रोत्प्रेक्षते प्रसरदनुरागं वहिर्गतमिव प्रवृद्धिं गछन्ननुरागो हृदयं भित्त्वा विनिर्गत इत्यर्थ:।।४९।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४९।। पुनस्तस्य लाक्षालक्षितवक्षः समालक्ष्य प्रकर्षण तपन्त्याह, तवेति। हे कितव! धूर्त्त! त्वदालोकः, तव दर्शनमद्य मम शोकादपि त्वद्विच्छेददुःखादपि कामपि अनिर्वचनीयां मरणस्पृहापादिनीं लज्जां जनयति। केन हेतुना, प्रख्यातः, प्रकर्षेण निरुपाधितया ख्यातः, प्रसिद्धः यः प्रणयभरः, प्रेमातिशयः, तस्य भङ्गेन, कुतः प्रणयभङ्ग इत्यपेक्षायां हेतुगर्भविशेषणम्। मम कीदृश्याः, इदमदृष्टपूर्वम्। अरुणच्छायहृदय-मरुणकान्तियुक्तं तव वक्षःस्थलं पश्यन्त्याः। 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्ब-मनातपः' **इत्यमरः**। को वा दोषो मत्हृदयस्य, तत्राह, हृदयं कीदृशम्? प्रियापादलक्त्तकच्छुरितं, प्रियतमाचरण, प्रियतमोरःस्थलसङ्घटनकारिसुरत-विशेषसूचकेन कान्ताचरणयावकरसेन संक्रान्तमित्यर्थः। अत उत्प्रेक्षे, बहिः प्रसरदनुरागमिव। अन्तरलब्धावकाशं बहिः प्रसृतानुरागव्यञ्जकमिव। अतो मम शोकाधिकतमा लज्जेति। क्वचित्, तदेवं पश्यन्त्याः इति पाठः। तदा एवं व्याख्येयम्, यद् हृदयं मम धन्यताहेतुभूतं, तदेव हृदयमेवं प्रकारान्तरेण पश्यन्त्या इति। अन्यत् समानम्।।४९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

४९- तवेदं पश्यन्त्या इति; यद्यपि सा खण्डितास्ति, तथापि इदानीं प्रौढत्वमबलम्ब्यते। श्रीकृष्णस्य दक्षिणनायकत्वमधिक्षिपति। हे कितव! हे शठ! तवावलोकनेनैव शोकादपि अधिकतरः लज्जानुभवः समुदेति। इति प्रगतवद्दर्शनेन अन्यनारीसंगात् शोकस्था भवतः आसम्। अद्वितीयस्नेहातिशयभङ्गेन प्रत्याख्यातग्लानिः मां दुःखाकरोति। परन्तु इदानीं तव हृदयं दृष्ट्वा, किंभूतं हृदयम्? प्रियायाः तस्याः नायिकायाः यावककर्वुरितं चित्रितं वा। त्वद्हृदये अरूणद्योतिना सन्ध्यारुणराग इव रागः तस्यैः परिप्रकटनं भवति। कुम्भकर्णस्तु, बहुमानपुरःसरमुपभोगयोग्यस्य कौस्तुभस्य प्रेष्योपदइति लज्जाधिक्ये हेतुः। त्वं खलु तस्याः पदमानीय हृदि स्थापयसे इति लज्जायाःहेतु। पुनः तव प्रेष्योपभोगे लज्जापि नास्तीति व्यङ्ग्यम्। शिखरिणीवृत्तम्।।४९।।

**४९-क- अन्तर्मोहनमौलिघूर्णनमिलन्मन्दारविश्रंसन**
**स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम्।**
**दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां**
**भ्रंशः कंसरिपो र्व्यपोहयतु वः श्रेयांसि वंशीरवः।। (संजीवनी)।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४९-क।। इदानीं सर्गान्ते मङ्गलाचरणाशिषमाह, अन्तर्मोहनेति। कंसारेः श्रीकृष्णस्य वंशीरवः पाविकाध्वनिः वो युष्माकं श्रेयांसि विपोलयतु विपुलीकरोतु। किंभूतो वंशीरवः? दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः दृप्यद्भिर्दानवैर्दूयमाना ये दिविषदस्तेषां दुर्वारदुःखा-पद्भ्रंशहेतुत्वाद्भ्रंशः। पुनः किंभूतः? कुरङ्गीदृशामन्तर्मोहन-मौलिघूर्णनच लन्मन्दारविभ्रंशनस्तम्भाकर्षणदृप्तिहर्षणमहामन्त्रः। अन्तर्मोहनेत्यादिदृप्ति-पदान्तो द्वन्द्वः। तेषां संहर्षो ग्रोगः तत्र महामन्त्र इव्र अन्तर्मोहनं मनोमोहनम्। अनेन मोहनं मौलिघूर्णनमिति वशीकारः। वशी कृता हि देवताः साधु साध्विति शिरोधूननेन प्रशंसन्ति। चलन्ति यानि मन्दारकुसुमानि तेषां विभ्रंशनम्। एतावता मारणमुद्दिष्टम्। मारणे हि कुसुमस्त्रजां भ्रंशो जायते। स्तम्भाकर्षणं सिद्धम्। दृप्तिर्बाधा। उच्चाटनमिति यावत्। एतेषां योगः। एतावता वंशीरवस्य मृगीदृशां संबन्धि षट्कर्मसाधनमहामन्त्रत्व-मुक्तम्। वंशं श्रुत्वा मृगीदृशस्तां तामवस्थां प्राप्नुवन्तीत्यर्थः।।४९-क।।

उद्यन्नष्टकुलाचलप्रतिनिधिः कीर्तिव्रजापूरिता-
ष्टाशोऽष्ट्द्रुहिणश्रुतिप्रतिहतिप्रक्रान्तभेरीरवः।
स्फुर्जच्छौर्यजिताष्टदिक्पतिरसौ श्रीकुम्भकर्णो व्यधा-
त्सर्गस्याष्टमितस्य चारुविवृतिं भक्तोऽष्टमूर्तेरिमाम् ।।

इति श्री रसिकप्रियानाम्नि श्रीगीतगोविन्दविवरणे म्लेच्छवनीदावानलमहाराज-श्रीकुम्भकर्णविरचितेऽष्टमः सर्गः ।।८।।

## (३) जगद्धरकृत- सारदीपिका (टीका नोपालव्धा)

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४९-क।। सर्गावसाने कविर्मङ्गलमाचरति, अन्तरिति। कंसरिपोः श्रीकृष्णस्य वंशीरवो मुरलीनादो वः युष्माकं कल्याणानि व्यपोहयतु वितरतु। कल्याणदातृत्व-सामर्थ्यकथनायात्र 'कंसरिपु'पदोपादानम्। किंलक्षणम्? कुरङ्गीदृशां हरिणनेत्राणा-

मन्तर्मोहनं मनोमोहनं, मौलिघूर्णनं तन्नादप्रशंसार्थं शिरश्चालनं, मिलन्मन्दारस्य विस्रंसनमधःपातनं स्तब्धाकर्षणं स्तब्धानां मानिनीनामपि वशीकरणं, दृष्टिहर्षणं नेत्रोत्साहः, श्रवणनिर्वृत्या नेत्रविकासो भवति। इत्यादिकर्मसाधने महामन्त्रः। पुनः किंलक्षणः ? दृप्यद्भिर्दर्पयुक्तैर्दानवैर्दैत्यैर्दूयमानानामुपतप्यमानानां दिविषदां देवानां दुर्वाराऽनिर्वार्या दुःखापदो दुःखहेतुभूता विपत्तयस्तासां भ्रंशो नाशकः। यच्छ्रवणेन देवा दैत्यपीडाभयान्मुक्ता भवन्तीति भावः। अनेनापि सामर्थ्यलक्षणो नायकगुण उक्तः। तथा च देवादीनां विलाससाधको यस्य वेणुनिनादः किं वक्तव्यं तस्य श्रीपुरुषोत्तमस्य विलासित्वमिति भावः।।४९-क।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जरीसमाख्यायामष्टमःसर्गः।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४९-क।। ग्रन्थस्यावच्छिन्नसम्प्रदायतामीहमानो ग्रन्थप्रक्रममपहाय सर्गान्ते मङ्गलमाचरति। अयं नन्दात्मजः श्रीकृष्णः जगदानन्दाय समस्तप्राणिजनसुखाय अस्तु भवत्वित्यर्थः। किम्भूतः ? व्रीडया लज्जया चञ्चलं नयनयोरञ्चलं प्रान्तभागं राधानने आधाय अर्पयित्वा स्मेरस्मेरमुखः ईषद्धसिताननः। कस्मिन् सति ? प्रातः प्रभाते अच्युतं कृष्णं नीलनिचोलं श्यामप्रच्छदपटं राधाया उरो वक्षः सम्वीतपीतांशुकं उत्तरयिपीतवस्त्रं चकितं यथा स्यादेवं विलोक्य स्वैरं लघु लघु यथा स्यादेवं सखीमण्डले हसति सति। 'निचोलः प्रच्छदपट' **इत्यमरः**। विलक्षो लक्ष्मीपतिर्यत्रेति व्युत्पत्त्या विलक्षणलक्ष्मीपतिरित्येतत् सर्गनाम।

इति समस्तप्रक्रियाविभजमानमहाराजशुक्लध्वजविरचिताथां सारवत्यां गीतगोविन्दटीकायाम् सर्गः।

इति श्रीगीतगोविन्दव्याख्यायामष्टमः सर्गः । खण्डितावर्णने विलक्ष्यलक्ष्मीपतिर्नाम अष्टमः सर्गः।।४९-क।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४९-क।। [५]श्लोकेन कविः सर्गान्ते[६]मङ्गलमाचरति, अन्तरिति। [७]कंसरिपोः श्रीकृष्णस्य वंशीरवो युष्माकं श्रेयांसि कल्याणानि व्यपोहयतु[८]ददातु। कीदृशः ? कुरङ्गीदृशां हरिणाक्षीणामन्तर्मोहनेन मौलिघूर्णनं [९] शिरःकम्पनं [१०] तेन मिलन्मन्दारस्य

पारिजातपुष्प (स्य) विश्रंसनं पतनं यस्मात्स:। (पुन:) कीदृश:? [११]स्तब्धानां सौन्दर्यादिगुणैर्गर्विष्ठानां [१२] कामिनीनामाकर्षणं वशीकरणं दृष्टिहर्षणं नेत्रोत्साह [१३] करी चेष्टेत्येवमादिसाधनम् [१४] एव महामन्त्रो यस्य स:। (पुन:) कीदृश:? [१५]दृप्यद्भिर्दर्पयुक्तैर्दैत्यैर्दूयमाना [१६] उपतप्यमाना (ये) दिविषदो देवा: तेषां दुर्वारा या दु:खापदस्तासां [१७] भ्रंशो नाशक:।।२।। विलक्षणा लक्ष्मी: शोभा [१८]यस्या: सा श्रीराधा तस्या: पति: श्रीकृष्णसंज्ञक:।।

इति[१९]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[२०] शिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां विलक्षणलक्ष्मीपति-र्नामाष्टम:[२१]सर्ग:।।४९-क।।

१.पद्यमिदं नास्ति-इ.सव्याख्यं नवमसर्गान्ते दृश्यते-ड.क.ल.म.२.स्तम्भा-इ.३.हृष्यद्दानव-फ.ग.ह.ज.४.व्यपोहरतु-अ.ब.५.श्लोकान्ते-अ.६.सर्गान्त-इ.७.नास्ति-ग.८.नास्ति-अ.ब.९.शिर:कम्पनेन-अ.ब. शिरोधूननं-इ.फ.ग.ह.ज.१०.नास्ति-ग.ह.११.स्तम्भानां-इ.१२.कामिनां-अ.ब.ह.१३.करं-अ.ब. करं चेत्येवमादि-इ.फ.ग.ह.ज.१४.एष-अ.ब.१५.हृष्यद्भि:-इ.फ.ग.ह.ज.१६.उपलप्यमाना-अ.ब.१७.ध्वंसो-ब.१८.यस्या: श्रीराधाया: पति: श्रीनन्दसूनुसंज्ञक:-ग.१९.श्रीमत्-अ.ब.२०.श्रीशिवदासपण्डि-तात्मज-ग.ह.२१.सर्ग: समाप्त:-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४९-क।। इदानीं कविर्भक्तान् प्रत्याशिषं ब्रूते, अन्तरिति। कंसरिपो: [१] कृष्णस्य वंशीरवो वेणुनाद: वो युष्माकं भक्तानां अश्रेयांस्यशुभानि व्यपोहयतु खण्डयतु। कीदृशो वंशीरव:? कुरङ्गीदृशां हरिणनयनानां अन्तर्मोहनं मनोमोह: मौलिघूर्णनं साधु साध्विति शिर:कम्पनं चलन्मन्दारविस्रंसनं गुम्फितपारिजातपुष्पादध:-पतनम् [२]स्तब्धाकर्षणं स्तब्धस्य अनिच्छो: आकर्ष: दृष्टिहर्षणं नेत्रोत्साह: एतेषु महामन्त्र: सिद्धमन्त्र:। वंशीरवाकर्णनेन सर्वा नायिका: सकलभावापन्ना भवन्तीत्यर्थ:। पुन: कीदृश:? दृप्यद्भि: दर्पयुक्तै:[३] दानवैर्दूयमानानां पीडितानां [४] दिविषदां देवानां दुर्वारा अनिवार्या [५] दु:खापदो [६] दु:खविपदस्तासां भ्रंशो नाशक:। वंशीरवं श्रुत्वा दु:खिता अपि[७]देवा[८] मुदमुद्वहन्तीत्यर्थ:। मुग्धो मूढो अलस:।।४९-क।।

इति श्रीगीतगोविन्दटीकायां[९]नारायणपण्डितविरचितायां विलक्षणलक्ष्मीपति-र्नामाष्टम: सर्ग:।।

१.कंसस्य शत्रो:-क.२.स्तब्धस्यानिच्छोराकर्ष:-ड.३.दानवैर्हृष्यमानानां-ड.४.नास्ति-ड.५.दु:खविपदो-ड.६.दु:खविपर्यया-ड.ल.दु:खविपर्याया-म.७.देवानां-ड.८.मुदं वहन्तीत्यर्थ:-क.९.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

### विलक्ष्यलक्ष्मीपति:

।।४९-क।। अथ श्रीराधिकाया अतिगाढ़मानविर्वन्धमभिप्रेत्य आत्मप्रयत्ने शिथिलेऽपि वंशीसाहाय्येनावश्यं मानोऽपयास्यतीति। सखी तदनुनये प्रर्वत्तयिष्यतीति स्मरन् कवि: वंशीध्वनिं वर्णयन् आशिषमातनोति अन्तरिति। कंसरिपो: वंशीरवो वो युष्माकं श्रेयांसि व्यपोहयतु विगतविघ्नानि करोतु नित्यं ददातु इत्यर्थ:। कीदृश: ? कुरङ्गीदृशां मनोमोहने मौलिघूर्णने चलन्मन्दारकुसुमानां विस्त्रंसने स्तम्भने आकर्षणे दृष्टिहर्षणे बशीकरणे महामन्त्र: कीदृश: ? दर्पयुक्तै: दानवै: दूयमानाना देवानाम् अनिवार्य्य-दुखपंक्तीनां ध्वंसो भ्रंशनरूप: नाशक इत्यर्थ:। तत् श्रवणमात्रेण देवा: दैत्यभयात् मुच्यन्ते इति भाव:। अतएव विलक्ष्यो गाढ़मानविलोकात् विस्मयान्वितो लक्ष्मीपति: श्रीराधापति: यत्र स:।।४९-क।।

इति बालबोधिन्यां अष्टम: सर्ग:।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४९-क।। अथ श्रीराधाया अतिगाढमाननिर्बन्ध: प्रयत्नशतेनापि शिथिलयितुमशक्य इति अभिप्रेत्य तत्सहायत्वेन परमोद्दीपनचूडामणिं वंशीरवमनुस्मरन् कविस्तेनाशिषं प्रयुञ्जान: सर्गमुपसंहति, अन्तरिति। कंसरिपो: श्रीकृष्णस्य वंशीरव: वो युष्माकं श्रोतॄणां श्रेयांसि, अभीप्सितशुभानि व्यपोहयतु। वर्धयत्वित्यर्थ:। धातूनामनेकार्थत्वात् व्यपोहयतु वोऽश्रेयांसि इति पाठश्चेत्, अश्रेयांसि' नाशयत्वित्यर्थ:। कीदृश:, कुरङ्गीदृशां, कृष्णमनोहारिविलासचतुरलोचनानां व्रजवधूनामन्तर्मोहने मनोमोहने मौलिघूर्णनेन चलतां मन्दाराणां पारिजातपुष्पाणां विस्त्रंसने स्तब्धे स्तम्भने च आकर्षणे च दृष्टिहर्षणे वशीकरणे च विषये महामन्त्र:, सिद्धमन्त्ररूप:, पुन: कीदृश:, दृप्यद्दानवैर्दर्पयुक्तासुरैर्दूयमानानां सन्तप्तानां दिविषदां देवानां दुर्वारा अनिवार्या या दु:खापद: क्लेशविपत्तयस्तासां भ्रंशो भ्रंशनरूपो नाशक इत्यर्थ:। यच्छ्रवणमात्रेण दैत्यभयं देवा मुञ्चन्तीत्यर्थ:। यथोक्तं विरुदावल्याम्,

बुद्धीनां परिमोहन: किल ह्रियामुच्चाटन: स्तम्भनो
धर्मोदग्रधियां मन: करटिनां वश्यत्वनिष्पादन:।

कालिन्दीकलहंस हन्त वपुषामाकर्षणः संभ्रुवां
जीयात् वैणवपञ्चमध्वनिमयो मन्त्राधिराजस्तव।।

किञ्च, रणति हरे ! तव वेणौ, नार्यो दनुजाश्च कम्पितस्वनाः।
वनमनपेक्षितदयिताः करबालान् प्रोच्छ्य धावन्ति।।

अपि च, रतिमनुरुध्य गृहेभ्यः कर्षति राधां वनाय या निपुणा।
सा जयति, निःसृष्टार्था वरवंशजा काकली दूती।।४९-क।।

इति श्री गीतगोविन्दे विलक्षलक्ष्मीपतिर्नामिष्टमसर्गः। विलक्षो राधामानगाढ-तालोचनया सविस्मयो लक्ष्मीपती राधिकापतिर्यत्र तन्नामाऽयं सर्गः।

।। इति श्रीरसिकरङ्गदाख्यायां गीतगोविन्दव्याख्यायामष्टमसर्गः।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४६-क।। इदानीं सर्गान्ते मङ्गलाचारमाह। कंसारेः श्रीकृष्णस्य वंशीरवः वंशीध्वनिः पाविकाध्वनिः वो युष्माकं श्रेयांसि विपोलयतु व्यपोहतु इति पाठान्तर। अर्थात् स मङ्गलमयध्वनिः भक्तानां श्रेयांसि विपुलीकरोतु। किम्भूतः स वंशीध्वनिः दुर्वारदानवैंदयमानं दुःखतापादिकं भ्रंशं साधयतु। कुरङ्गदृशमाकर्षणेन शिरसो घुर्णनेन तथा सम्मोहनेन तारण-मारण-वशीकरण-उच्चाटनादि तेषां योगस्तावत् षट्कमाणि तां नामावस्थां प्राप्नुवतीत्यर्थः।।

स्वर्णलताप्रसादेन यापितं गृह्यजीवनम्।
तस्याः शुभप्रभावेण लिखिता टिप्पणी मया।।

इति श्रीप्रफुल्लमिश्रकृतायां स्वर्णलताटिप्पण्याम् श्रीगीतगोविन्दे विलक्ष्य लक्ष्मीपतिर्नाम अष्टमसर्गः।।

❁ ❁ ❁

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016